चतुर्वर्गचिन्तामणिः
हेमाद्रिविरचितः

Caturvargacintāmani
of Hemādri

VOLUME — II (Part-I)

CHAUKHAMBHA SANSKRIT SANSTHAN
VARANASI, INDIA

THE
KASHI SANSKRIT SERIES
235
*****

CATURVARGACINTĀMAṆI

OF

ŚRĪ HEMĀDRI

Volume II

VRATAKHAṆḌA

PART I

EDITED BY

PAṆḌITA BHARATACANDRA ŚIROMAṆI

CHAUKHAMBHA SANSKRIT SANSTHAN
Publishers and Distributors of Oriental Cultural Literature
P. O. Chaukhambha, P. Box No. 1139
Jadau Bhawan, K. 37/116, Gopal Mandir Lane
VARANASI-221001 (INDIA)

Price : Rs. 2500-00 for the set of four volumes in seven parts
Rs. 1000-00 for Volume II (Vratakhaṇḍa Part 1, 2)

Originally Published by The Asiatic Society of Bengal in 1978
Reprinted 1985

Also can be had of
CHAUKHAMBHA VISVABHARATI
Post Box No. 1084
Chowk (Opposite Chitra Cinema)
VARANASI-221001
Phone : 65444

Printers–Srigokul Mudranalaya, Gopal Mandir Lane, Varanasi
and Globe Offset Press, New Delhi

॥ श्रीः ॥

काशी संस्कृत ग्रन्थमाला

२३५

चतुर्वर्गचिन्तामणिः

श्रीहेमाद्रिविरचितः

तत्र

व्रतखण्डनाम्नो

द्वितीयखण्डस्य

प्रथमो भागः

श्रीभरतचन्द्रशिरोमणिना परिशोधितः

चौखम्भा संस्कृत संस्थान

भारतीय सांस्कृतिक साहित्य के प्रकाशक तथा विक्रेता

पो० आ० चौखम्भा, पो० बा० नं० ११३९

जड़ाव भवन, के. ३७/११६, गोपाल मन्दिर लेन

वाराणसी (भारत)

प्रकाशक : चौखम्भा संस्कृत संस्थान, वाराणसी

मूल्य : रु० २५००–०० संपूर्ण १–८ खण्ड, ७ भाग

रु० १०००–०० द्वितीय खण्ड (व्रतखण्ड भाग १ व २)

मूल रूप से आसियाटिक् सोसायिटि आफ बंगाल द्वारा प्रकाशित, १८७८

पुनर्मुद्रणम् १९८५

अन्य प्राप्तिस्थान

चौखम्भा विश्वभारती

पोस्ट बाक्स नं० १०८४

चौक, (चित्रा सिनेमा के सामने)

वाराणसी–२२१००१ (भारत)

फोन : ६५४४४

मुद्रक—श्रीगोकुलमुद्रणालय, गोपाल मन्दिर लेन, वाराणसी एवं

ग्लोब आफसेट प्रेस, नई दिल्ली

चतुर्व्वर्गचिन्तामणि

व्रतखण्डम्।

श्रीहेमाद्रिणा विरचितम्।

षोड़शाध्यायपर्य्यन्तं प्रथमभागात्मकं।

———ooo@ooo———

आसियाटिक्‌सोसायिटिनामक समाजानुमत्या तत्साहाय्येन च

प्रचारितम्।

———

श्रीभरतचन्द्रशिरोमणिना

परिशोधितम्।

———

सम्बत् १९३४।

सूचीपत्रम्।

—०००—

अ		पृष्ठा
अकार्पण्यलक्षणं	..	९
अक्षमालादानमन्त्रः	..	९०२
अक्षयतृतीयाव्रतं	...	४००
अक्षयफलावाप्तिअक्षयतृतीयाव्रतं		४९९
अखण्डद्वादशीव्रतं	...	११०३
अखण्डद्वादशीव्रतोद्यापनं	..	१११९
अग्निचतुर्थीव्रतं	...	५०६
अग्निरूपं	..	१४४
अग्निरूपं	..	१९७
अर्घोऽष्टाङ्गः	..	४८
अङ्गारकचतुर्थीव्रतं	..	५०६
अङ्गिरसनामवत्सररूपं	..	२०५
अङ्गुल्यादिमानकथनं	...	५१
अङ्गुलीयकदानमन्त्रः	..	२९१
अचलासप्तमीव्रतं	..	६४३
अजपरूपं	..	१९३
अजादानमन्त्रः		३०६
अजैकपदमूर्त्तिः	..	१२७
अतिगण्डरूपं	..	१६३
अतिरौद्ररूपं	..	१९६

		पृष्ठा
अथर्ववेदरूपं	.	१०५
अथर्ववेदानां ऋषिदैवतच्छन्दांसि		२०९
अर्थशास्त्ररूपं	..	१०८
अदारिद्र्यषष्ठीव्रतं	..	६२९
अर्द्धनारीश्वरमूर्त्तिः	..	१२४
अधर्म्मदेशनिरूपणं	..	२९
अनघाष्टमीव्रतं	..	८११
अनन्ततृतीयाव्रतं	..	४२२
अनन्तद्वादशीव्रतं	..	१२००
अनन्तपञ्चमीव्रतं	..	५६४
अनन्तफलसप्तमीव्रतं	..	७४१
अनलरूपं	..	११८
अनसूयालक्षणं	..	८
अनायासलक्षणम्	..	९
अनिरुद्धरूपं	...	१२३
अनिरुद्धसाम्बयोर्म्मूर्त्तिः	..	११९
अनुराधारूपं	..	१५९
अन्नदानमन्त्रः	..	२८८
अनोदनासप्तमीव्रतं	...	७०१
अपराजितारुद्रमूर्त्तिः	...	१३०

	पृष्ठा
अपराजिताकल्पं ..	९१
अपराद्वादशीव्रतं ..	१०९१
अपूपान्नदानमन्त्रः ..	२८९
अविघ्नविनायकचतुर्थीव्रतं ...	५२४
अवियोगतृतीयाव्रतं ..	४३९
अवियोगद्वादशीव्रतं ..	११०७
अव्यङ्गसप्तमीव्रतं ..	७४१
अव्ययरूपं ..	२१०
अभिजिद्रूपं ..	१५८
अभिजिद्रूपंपुराणान्तरोक्तं ..	१९४
अभीष्टसप्तमीव्रतं ..	७९१
अमावस्यारूपं ..	१५५
अमुक्ताभरणसप्तमीव्रतं ..	६१२
अम्बकरुद्रमूर्त्तिः ..	१२८
अम्बारूपं ...	८१
अम्बिकारूपं ..	८९
अरुन्धतीरूपं ..	९२
अर्कसप्तमीव्रतं ..	७८८
अर्काष्टमीव्रतं ..	८३५
अलकातृतीयाव्रतं ...	४०४
अश्विनीकुमारमूर्त्तिः ...	१२७
अश्विनीरूपं ..	१५६
अशून्यशयनद्वितीयाव्रतप्रशंसा	२६६
...	१५७
अश्लेषारूपं	३४१
अशोकप्रतिपद्व्रतं ...	८६२
अशोकाष्टमीव्रतं ...	८०२
अशोकाष्टमीव्रतंपुराणान्तरोक्तं	

	पृष्ठा
अष्टमीव्रतानि ...	८११
अष्टमीरूपं ...	१५२
अष्टाङ्गधूपः ...	४०
अष्टादशपुराणानि ...	२०
अस्त्रलक्षणं ...	२४६
अस्त्रनामानि ...	१४०
अस्पृश्यलक्षणं ...	९
अहोरात्ररूपं ...	२००
आ	
आकाशरूपं ...	१४७
आग्नेयव्रतं ...	९५८
आर्द्रादानमन्त्रः ...	४७१
आर्द्रारूपं ...	१५७
आदित्यमण्डलसप्तमीव्रतं ...	७५२
आनन्दपञ्चमीव्रतं ...	४५७
आनन्दनवमीव्रतं ...	९४८
आनन्दस्यरूपं ...	२१८
आर्घ्यघटरूपं ...	१९३
आयुष्मतीरूपं ...	१६२
आरोग्यचतुर्थीव्रतं ...	५२०
आरोग्यदशमीव्रतं ...	९६३
आरोग्यसप्तमीव्रतं ...	७४७
आलेख्यपञ्चमीव्रतं ...	५६७
इ	
इक्षुदण्डदानमन्त्रः ...	५७१
इक्षुरूपं ...	१६२
इन्द्ररूपं ...	१४४

	पृष्ठा
ई	
ईश्वराविभवत्सररूपं ...	२०१
उ	
उत्क्रान्तिधेनुदानमन्त्रः ...	२९८
उत्तरफल्गुनीरूपं ...	१५८
उत्तरभाद्रपद्रूपं ...	१६०
उत्तरायणरूपं ...	२०२
उत्तराषाढारूपं ...	१५९
उदकसप्तमीव्रतं ...	७१६
उदकुम्भदानमन्त्रः ...	२९६
उपपुराणानि ...	२१
उपवासव्रतानुध्यानक्रम: ...	१००४
उपानद्दानमन्त्रः ...	२९०
उभयद्वादशीव्रतं ...	१०१३
उभयनवमीव्रतं ...	९२१
उभयसप्तमीव्रतं ...	७४८
उभयसप्तमीव्रतंपुराणान्तरोक्तं	७७९
उमामहेश्वरतृतीयाव्रतं ...	४०२
उमामहेश्वरदानमन्त्रः ...	२९३
उमामहेश्वरमूर्त्तिः ...	१२५
उमारूपं ...	८६
उल्कानवमीव्रतंभविष्योत्तरोक्तं	८९५
उल्कानवमीव्रतंसौरपुराणोक्तं	८९७
ऊ	
ऊनपञ्चाशत्वायवः ...	१३४
ऊर्णादानमन्त्रः ...	२९४
ऊर्णापटदानमन्त्रः ...	२९५

	पृष्ठा
ऋ	
ऋक्षकर्णीरूपं ...	९३
ऋग्वेदमन्त्राः ...	२४८
ऋग्वेदरूपं ...	१०४
ऋत्विगादिवरणविधिः ...	३०६
ऋद्धिरूपं ...	९०
ऋषयः ...	१०९
ऋषिपञ्चमीव्रतं ...	५६८
ए	
एकपादरुद्रमूर्त्तिः ...	१२७
एकादशरुद्राः ...	१२६
एकादश्यां जागरणगीतनर्त्तनभगवत्पूजनोत्सवमाहात्म्यं ...	९८४
एकादशीरूपं ..	१५६
ऐ	
ऐन्द्ररूपं ...	१७७
ऐन्द्रीरूपं ...	९१
ऐश्वर्य्यतृतीयाव्रतं ...	४९८
क	
कन्यादानमन्त्रः ...	३०५
कन्यारूपं ...	१९
कपिलदानमन्त्रः ...	२८७
कपिलमूर्त्तिः ...	१५१
कपिलाषष्ठीव्रतं ...	५७७
कमण्डलुदानमन्त्रः ...	३०२
कमलसप्तमीव्रतं ...	६९०
कार्त्तिकीरूपं ...	

	पृष्ठा
कर्कटव्रतं ...	१९०
कर्पूरदानमन्त्रः ...	२९२
कलशोत्पत्तिलक्षणम् ...	२१३
कलाव्रतं ...	१९२
कल्किद्वादशीव्रतम् ...	१३८
कल्किमूर्त्तिः ...	११९
कल्पव्रतम् ...	१०५
कल्याणसप्तमीव्रतम् ...	६३८
कस्तूरीदानमन्त्रः ...	२९२
कांस्यपात्रदानमन्त्रः ...	२९४
कात्यायनीव्रतं ...	८८
कान्तिद्वितीयाव्रतं ...	३७७
कामदासप्तमीव्रतम् ...	२८८
काममूर्त्तिः ...	११८
कामषष्ठीव्रतम ...	६१
कामाविपक्षमीव्रतं ...	५७५
कार्त्तिकेयषष्ठीव्रतम् ...	५९६
कार्त्तिकेयषष्ठीव्रतम् भविष्यपुराणोक्तं	६०५
कार्त्तिक्यादिमासि दीपदानविधिः	२१७
कालकर्णीव्रतम् ...	९८
कालयज्ञव्रतं ...	२१९
कालरात्रिव्रतम् ...	८१
कालवपावि ...	१९१
कालाष्टमीव्रतम् ...	८४९
कालीव्रतं ...	९१
काश्मीरलिङ्गदानमन्त्रः ...	२९४
काष्ठदानमन्त्रः ...	३००

	पृष्ठा
काष्ठाव्रतं ..	१९२
किम्पुरुषव्रतं ...	१८८
किल्लकस्य व्रतं ..	२१६
कुण्डलदानमन्त्रः ..	२९१
कुमपव्रतं ..	१९४
कुन्दचतुर्थीव्रतं ...	५२५
कुबेरतृतीयाव्रतं ...	४७८
कुमारषष्ठीव्रतं ..	५८८
कुम्भव्रतं ...	१९१
कुम्भीव्रतं ...	११०५
कुलत्थदानमन्त्रः ...	३००
कुष्माण्डदानमन्त्रः ...	२९९
कुष्माण्डमन्त्राः ...	२७८
कूर्मद्वादशीव्रतं ...	१०२१
कृत्तिकाव्रतं ...	१५६
कृसरान्नदानमन्त्रः ...	१८९
कृष्णचैत्रदानमन्त्रः ...	३८०
कृष्णचतुर्थीव्रतं ...	१५४
कृष्णचतुर्थीव्रतं ...	५०१
कृष्णचतुर्दशीव्रतं ...	१५५
कृष्णतृतीयाव्रतं ...	१५४
कृष्णत्रयोदशीव्रतं ...	१५५
कृष्णदशमीव्रतं ...	१५५
कृष्णद्वादशीव्रतं ...	१५५
कृष्णद्वादशीव्रतं ...	१०१०
कृष्णद्वादशीव्रतं विष्णुधर्मोत्तरोक्तं	११४७
कृष्णद्वितीयाव्रतं ...	१५२

		पृष्ठा
कृष्णनवमीरूपं	...	१५४
कृष्णपक्षरूपं	...	९०१
कृष्णपञ्चमीरूपं	...	१५४
कृष्णप्रतिपद्रूपं	...	१५३
कृष्णवर्णगोदानमन्त्रः	...	२८८
कृष्णवस्त्रदानमन्त्रः	...	२८८
कृष्णमूर्त्तिः	...	११८
कृष्णव्रतंपद्मपुराणोक्तं	...	११६१
कृष्णषष्ठीरूपं	...	१५४
कृष्णषष्ठीव्रतं	...	६२४
कृष्णसप्तमीरूपं	...	१५४
कृष्णारूपं	...	९०
कृष्णारूपान्तरम्	...	८९
कृष्णाष्टमीरूपम्	...	१५४
कृष्णाष्टमीव्रतं देवीपुराणोक्तं		८२३
कृष्णाष्टमीव्रतं विष्णुधर्मोत्तरोक्तं		८१९
कृष्णाष्टमीव्रतं भविष्यपुराणोक्तं		८१४
कृष्णैकादशीरूपम्	...	१५५
कृष्णैकादशीव्रतं	...	११५०
केतुरूपम्	...	१५१
कोटीश्वरीतृतीयाव्रतम्	...	४५९
कौमारीरूपम्	...	९२
कौलवरूपम्	...	१८२
क्रोधरूपम्	...	८८

ख

खरस्वरूपम्	...	९११

		पृष्ठ

ग

गणपतिचतुर्थीव्रतम्	...	५१९
गणेशचतुर्थीव्रतम्	...	५१०
गणेशप्रतिमादानमन्त्रः	...	३०९
गणेशरूपम्	...	७६
गणेशव्रतम्	...	५१०
गन्धद्रव्यदानमन्त्रः	...	३०२
गन्धर्वरूपाणि	...	१९९
गररूपम्	...	१८४
गुड़तृतीयाव्रतम्	...	४९०
गुडदानमन्त्रः	...	२९६
गुर्व्वष्टमीव्रतम्	...	८८१
गुह्यकद्वादशीव्रतम्	...	१२०४
गृहदानमन्त्रः	...	३०५
गृहपञ्चमीव्रतम्	...	५७४
गोकर्णाकृतिसौभाद्रं चक्रविधानम्		३१५
गोदानमन्त्रः	...	३०४
गोधूमदानमन्त्रः	...	२९५
गोपालनवमीव्रतम्	...	९३९
गोपालमूर्त्तिः	...	
गोपीचन्दनदानमन्त्रः	...	
गोमयादिसप्तमीव्रतम्	...	
गोवडमूर्त्तिः	...	१२१
गोविन्दद्वादशीव्रतं	...	१०९६
गोवत्सद्वादशीव्रतम्	...	११८०
गोवत्सद्वादशीव्रतं	...	१०८०

सूचीपत्रम् ।

	पृष्ठा
गौरीचतुर्थीव्रतम् ...	५३१
गौरीरूपम् ...	८२
गौरीव्रतम् ...	४५०
गौर्य्यादिमातरः ...	८४
ग्रन्थकर्त्तुः प्रशस्तिः ...	१
ग्राम्यारण्यभेदेन चतुर्द्दशद्रव्याणि	४९
ग्रीष्मरूपम् ...	१०२
घ	
घण्टाकर्णरूपम् ...	९१
घृतादिस्नानफलम् ...	२३५
घृतोदरूपम् ...	१४१
च	
चण्डिकारूपम् ...	८०
चतुःषष्टियोगिनीरूपाणि ...	९२
चतुर्थीरूपम् ...	१५२
चतुर्थीव्रतानि ...	५०१
चतुर्द्दशविद्या ...	१८
चतुर्द्दशीरूपम् ...	१५३
चतुर्मूर्त्तिचतुर्थीव्रतम् ...	५०७
चतुर्विंशतिमूर्त्तिः ...	११४
चतुष्पदरूपम् ...	१८६
चन्दनखण्डदानमन्त्रः ...	२९२
चन्दनाद्यनुलेपनदानमन्त्रः ...	२९२
चन्द्ररूपम् ...	१४९
चन्द्रहासारूपम् ...	९९
चन्द्रावलीरूपम् ...	९९
चम्पाषष्ठीव्रत ...	५९०
चामरदानमन्त्रः ...	२९२
चित्रभानुरूपम् ...	२०८
चित्रभानुसप्तमीव्रतम् ...	७८७
चित्रारूपम् ...	१४८
चैत्रभाद्रमाघतृतीयाव्रतम् ...	३९४
चैत्रशुक्लप्रतिपद्विहितं तिलकव्रतम्	३४८
छ	
छत्रदानमन्त्रः ...	३०५
छन्दोरूपम् ...	१०५
छागदानमन्त्रः ...	३०५
ज	
जयनिरूपणम् ...	१८
जयन्तरुद्रमूर्त्तिः ...	१२९
जयन्तव्रतम् ...	७९२
जयन्तीरूपम् ...	९२
जयन्तीसप्तमीव्रतम् ...	६६४
जयरूपम् ...	२१२
जयापञ्चमीव्रतम् ...	५४३
जयासप्तमीव्रतम् ...	६६०
जलशायिविष्णुमूर्त्तिः ...	१२२
जामदग्न्यद्वादशीव्रतम् ...	१०३२
जीरकदानमन्त्रः ...	३०१
ज्येष्ठारूपम् ...	८५
ज्येष्ठारूपम् ...	९२
ज्येष्ठारूपम् ...	१५९
ज्योतिषरूपम् ...	१०१
ज्वरमूर्त्तिः ...	१३२

	पृष्ठा
त	
तण्डुलदानमन्त्रः ...	३००
तपनीरूपं ..	१७०
तपश्चरणसप्तमीव्रतं	६३०
तपोव्रतं ..	७८८
तरलारूपं ..	९६
तामसधर्मलक्षणं ..	११
ताम्रपात्रदानमन्त्रः ..	२९०
ताम्बूलकरदानमन्त्रः ...	३०१
ताम्बूलदानमन्त्रः ..	३०१
तारकद्वादशीव्रतं ...	१०८०
तारणरूपं ...	२०९
तारारूपं ...	९७
तालुजिह्विकारूपं ..	९८
तिथिरूपाणि ...	१५६
तिन्दुकाष्टमीव्रतं ..	८४०
तिलदानमन्त्रः ...	२९६
तिलदाहीव्रतं ..	११३१
तिलद्वादशीव्रतं ...	११०८
तिलद्वादशीव्रतमाहात्म्यं ...	११४९
तुरगसप्तमीव्रतं ..	७०७
तुलसीदानमन्त्रः ...	२९१
तुलापुरुषदानेष्वलिविवरणं ...	३०७
तुलारूपं ..	१९०
तुष्टिप्राप्तितृतीयाव्रतं ...	४९९
तृतीयारूपं ...	१५२

	पृष्ठा
तृतीयाव्रतानि ..	३९४
तैतिलरूपं ..	१८३
तैलदानमन्त्रः ...	२९२
त्रयोदशपदार्थसप्तमीव्रतं ..	७५६
त्रयोदशीरूपं ..	१५३
त्रिगतिसप्तमीव्रतं ..	७३६
त्रिविक्रमतृतीयाव्रतं तृतीयं	४५६
त्रिविक्रमतृतीयाव्रतं द्वितीयं	४५४
त्रिविक्रमतृतीयाव्रतं प्रथमं	४५३
द	
दक्षिणामूर्त्तिः ...	१२५
दक्षिणायनरूपं ...	२०३
दधिमण्डोदरूपं ...	१४९
दयालक्षणं ...	८
दर्पणदानमन्त्रः ..	२९०
दशगणाः ...	२८२
दशमीरूपं ..	१५२
दशमीव्रतानि ..	९६६
दशाङ्गधूपः ..	५२
दशावतारव्रतं ...	११५८
दाम्पत्याष्टमीव्रतं ..	८४१
दासीदानमन्त्रः ..	३०४
दिक्पालरूपाणि ..	१४४
दिग्रूपाणि ..	१४३
दिनरूपं ..	९२
दीप्तिरूप ...	९३

	पृष्ठा
दुग्धदानमन्त्रः ..	२९१
दुन्दुभिरूपं ...	१०२
दुर्गानवमीव्रतं ...	९३७
दुर्गानवमीव्रतं प्रकारान्तरं	९५६
दुर्गापूजनं ...	९५५
दुर्गाव्रतं ..	८५६
दुर्मुखरूपं ...	२२०
दुर्जयारूपं ..	१०२
दूर्वागणपतिचतुर्थीव्रतं ..	५२०
दूर्वाष्टमीव्रतं ...	८७१
दूर्वाष्टमीव्रतं आदित्यपुराणोक्तं	८७५
देवकीमूर्त्तिः ...	११९
देवताभेदेन गायत्रीभेदः ..	२३२
द्रविणरूपं ...	१५६
द्वादशसप्तमीव्रतं ..	७२०
द्वादशसाध्यगणाः ..	१०६
द्वादशादित्यव्रतं ..	११०३
द्वादशाक्षयफलावाप्तितृतीयाव्रतं	४९८
द्वादशीरूपं ...	१५१
द्वादशीव्रतं कूर्मपुराणोक्तं	११५८
द्वादशीव्रतानि ..	११६१
द्वितीयारूपं ..	१५१
द्वितीयाव्रतानि ..	३६१
द्वादशाक्षरादिमन्त्राः ...	२२५
ध	
धनदरूपं ...	१४६
धनदव्रतं ..	११६१
धनिष्ठारूपं ...	१६०
धनुर्द्धररूपं ...	१००
धनूरूपं ..	१९१
धन्यव्रतं ..	९५५
धन्वन्तरिमूर्त्तिः ..	१११
धर्म्मदेशनिरूपणं ..	२६
धर्म्मरूपं ...	१०४
धर्म्मलक्षणानि ...	२५
धर्म्मव्रतं ...	९६०
धर्म्मशास्त्रप्रणेतॄणां सङ्ख्या ..	१९
धर्म्मशास्त्ररूपं ..	१०६
धर्म्मस्यप्रशंसा ..	१४
धर्म्माधर्म्मलक्षणं ..	१०
धर्म्मोत्पत्तिः ..	११
धातृरूपं ..	१९८
धाताख्यवत्सररूपं ..	२०
धान्यदानमन्त्रः ...	२९५
धान्यसप्तमीव्रतं ..	७८७
धृतिरूपं ..	१६४
ध्रुवरूपं ..	१४८
ध्रुवरूपं ...	१६६
ध्वजनवमीव्रतं ...	८८८
न	
नक्षत्रचतुर्थीव्रतं ..	५३१
नदीव्रतं ..	७९१

		पृष्ठा
नन्दानवमीव्रतं	...	९५६
नन्दाकृतिः	...	८०
नन्दासप्तमीव्रतं	...	६६९
नन्दिमूर्त्तिः	..	१३०
नयनप्रदसप्तमीव्रतं	...	७४४
नरनारायणमूर्त्तिः	...	११९
नरसिंहमूर्त्तिः	...	११६
नरसिंहव्रतम्	...	८७६
नवदुर्गाकृतिः	..	८४
नवनीदाकृतिः	...	१४२
नवमीव्रतानि	..	८८७
नवरात्रिव्रतं	...	९००
नवव्यूहार्च्चनम्	...	११३०
नागचतुर्थीव्रतं	...	५२९
नागदष्टोद्धरणपञ्चमीव्रतं	..	५६०
नागपञ्चमीव्रतं भविष्यपुराणोक्तं		६७२
नागमैत्रीपञ्चमीव्रतं	...	५६०
नागरूपाणि	...	१३९
नान्दीमुखमातरः	...	८४
नामतृतीयाव्रतम्	...	४२०
नामतृतीयाव्रतान्तरं	...	४७७
नामद्वादशीव्रतं	...	१०६७
नामनवमीव्रतं	..	९२८
नामसप्तमीव्रतं	...	७२६
निक्षुभार्कसप्तमीव्रतचतुष्टयं		६७८
निक्षुभार्कसप्तमीव्रतं तृतीयं		६७७

		पृष्ठा
निक्षुभार्कसप्तमीव्रतं प्रथमं		६७४
निक्षुभार्कसप्तमीव्रतम् द्वितीयं		६७४
निद्राकृतिः	...	१०५
निर्ज्जलैकादशीव्रतम्	...	१०८९
निलज्येष्ठाकृतिः	..	८१
नीराजनद्वादशीव्रतम्	...	११९०
नृत्यशास्त्राकृतिः	...	१०७
नृसिंहद्वादशीव्रतम्	...	१२९
प		
पञ्चसन्धिव्रतं	...	३५६
पञ्चगव्यं	..	४४
पञ्चपिण्डिकागौरीव्रतं	...	४८५
पञ्चभङ्गाः	...	४७
पञ्चमहापापनाशनीद्वादशीव्रतं		१२०१
पञ्चमहाभूतपञ्चमीव्रतम्	...	५५२
पञ्चम्याकृतिः	...	१५२
पञ्चमीव्रतानि	...	५३७
पञ्चरत्नकं	...	४७
पञ्चशाखं	...	१०७
पञ्चाग्निसाधनरम्भातृतीयाव्रतम्		४२६
पदार्थव्रतम्	...	९६७
पद्ममुद्रालक्षणं	...	१४१
पद्मनाभद्वादशीव्रतम्	...	१०३९
परशुराममूर्त्तिः	...	११७
पराजितदशमीविधिः	...	९६८
पराभवस्याकृतिः	...	२१५
परिघाकृतिः	...	१००

सूचीपत्रम् ।

	पृष्ठा
परिभाविन्याकृतिः ...	२१७
परिभाषा ...	३१
परिस्तरणदेवताः ...	३१०
परिस्तरणदेवताकथनं ...	७३
पानाञ्जनं ..	१००
पादुकादानमन्त्रः ...	१९२
पापचयार्थाजादानमन्त्रः	२९९
पापनाशनीसप्तमीव्रतम् ...	७४०
पायसान्नदानमन्त्रः ...	२८९
पार्थिवाकृतिः ...	२०९
पार्व्वत्याकृतिः ...	८७
पाशुपतनं ...	१७७
पिङ्गलस्याकृतिः ...	२१९
पिङ्गलाख्याकृतिः ...	३९
पिचुवक्त्राकृतिः ...	९९
पितृसङ्ख्या ...	१४०
पिशाच्याकृतिः ...	१८०
पिशिताशाकृतिः ...	१००
पुण्डरीकयज्ञप्राप्तिव्रतम् ..	१२०४
पुत्रप्राप्तिषष्ठीव्रतम् ..	६२८
पुत्रसप्तमीव्रतम् आदित्यपुराणोक्तं	७३८
पुत्रसप्तमीव्रतम् वराहपुराणोक्तं	७३४
पुत्रीयव्रतम् ...	८४४
पुत्रीयसप्तमीव्रतम् ...	७८९
पुनर्व्वस्वाकृतिः ...	१५७
पुरश्चरणसप्तमीव्रतम् ...	८०५

	पृष्ठा
पुराणलक्षणं ..	२०
पुष्पदानमन्त्रः ..	३०१
पुष्पद्वितीयाव्रतम् ..	१८१
पुष्याकृतिः ...	१५७
पुस्तकदानमन्त्रः ..	३०१
पूतनाकृतिः ..	१०२
पूर्व्वफल्गुन्याकृतिः ..	१५७
पूर्व्वभाद्रपद्रूपम् ..	१६०
पूर्व्वाषाढाकृतिः ...	१५७
पृथिवीपदसप्तमीव्रतम् ..	५७४
पृथ्वीमूर्त्तिः ..	१४०
पौरन्दरसप्तमीव्रतम् ..	४६७
पौर्णमास्याकृतिः ..	१५३
पौष्णाकृतिः ..	१८९
प्रकृतिपुरुषद्वितीयाव्रतम् ..	३९१
प्रचण्डोग्ररूपम् ..	९८
प्रजापतिनामसंवत्सराकृतिः	२०५
प्राजापत्याकृतिः ..	१०३
प्रतिपद्रूपम् ..	१५१
प्रतिपद्व्रतं चौराभिरं ...	३३६
प्रतिपद्व्रतानि ..	३३५
प्रतिष्ठायामृत्तिवरणम् ..	३०८
प्रदीपसप्तमीव्रतम् ...	९६७
प्रद्युम्नमूर्त्तिः ...	११८
प्रपञ्चिकाकृतिः ..	९९
प्रभवाख्यसंवत्सराकृतिः ..	१०४

	पृष्ठा
प्रमथ्याकृतिः ..	२०७
प्रमदनामवत्सराकृतिः ..	२०४
प्रमादिनाकृतिः ..	२१८
प्रमानतोषधर्म्म निरूपनम्	१७
प्रीतिरूपम् ...	१६१
प्लवङ्गस्याकृतिः ...	२१२
प्लवङ्गस्यरूपम् प्रकारान्तरं	२१४
फ	
फलतृतीयाव्रतं ...	५००
फलदानमन्त्रः ..	१९९
फलषष्ठीव्रतं ..	६०२
फलसप्तमीव्रतम् ..	७०१
फलसप्तमीव्रतं ..	७६१
फलसप्तमीव्रतं ..	७४२
ब	
बडवामुख्याकृतिः ..	९५
बलाकृतिः ...	१९४
बहुधान्याख्यवत्सराकृतिः ..	२०७
बहुरूपरुद्रमूर्त्तिः ...	१२८
बुधद्वादशीव्रतं ...	१०३७
बुद्धमूर्त्तिः ..	११९
बुधाकृतिः ..	१५०
बुधाष्टमीव्रतं ...	८६६
ब्रह्मकूर्च्चलक्षणम् ...	४५
ब्रह्माकृतिः ..	१९८
ब्रह्मव्रतं ..	३७७
ब्रह्माण्डदानेऽस्य विवरणं ..	२०६
ब्राह्म्यादिमातृकाकृतिः ..	८२
ब्रह्माकृतिः ..	१०३
भ	
भक्ष्यदानमन्त्रः ...	३०६
भर्तृप्राप्तिव्रतं ...	११९८
भद्रकाल्याकृतिः ...	९
भद्रकालीव्रतं ...	९६०
भद्रकालीव्रतं प्रकारान्तरं ..	९६०
भद्रातृतीयाव्रतं ..	४८३
भद्राकृतिः ..	६१
भद्राकृतिः ...	१८५
भद्रासप्तमीव्रतं ...	७०१
भयानकाकृतिः ..	९६
भरण्याकृतिः ..	१५६
भवानीतृतीयाव्रतं ..	४८२
भानुसप्तमीव्रतं ..	७८७
भावाख्यवत्सराकृतिः ..	२०६
भास्करसप्तमीव्रतं ...	२८८
भीमद्वादशीव्रतं पद्मपुराणोक्तं	१०४४
भीमद्वादशीव्रतं भविष्यपुराणोक्तं	१०४९
भूतमाताकृतिः ..	८२
भूदानमन्त्रः ..	३०४
भैरवमूर्त्तिः ..	१३०
भैरव्याकृतिः ...	८९

म

	पृष्ठा
मकराकृतिः ..	१९१
मघाकृतिः ..	१५७
मङ्गलाकृतिः ..	१४०
मङ्गलाकृतिः ..	९१
मङ्गलाष्टकं ...	४९
माङ्गल्यलक्षणं ..	९
माङ्गल्यसप्तमीव्रतं ...	७६८
मण्डकदानमन्त्रः ...	२९९
मण्डपादिकरणं ..	५८
मत्स्यकूर्मयोर्मूर्त्तिः ...	११५
मत्स्यद्वादशीव्रतं ...	१०११
मदनद्वादशीव्रतम् ..	११९४
मधुकतृतीयव्रतम् ..	४१२
मधुदानमन्त्रः ...	२९६
मधुपर्कः ..	९९
मनोन्मथिन्याकृतिः ...	८६
मनोरथद्वादशीव्रतम् ...	१००२
मन्दारषष्ठीव्रतम् ...	९०६
मन्दारसप्तमीव्रतम् ...	६५०
मन्मथस्याकृतिः ...	२१२
मरकतलिङ्गदानमन्त्रः ..	२९४
मरीचसप्तमीव्रतम् ...	९९६
मरुत्सप्तमीव्रतम् ...	७७५
मल्लद्वादशीव्रतम् ...	१११५
महाकालमूर्त्तिः ..	१३०
महाकाल्याकृतिः ...	८७
महाक्रूराकृतिः ..	९६
महागन्धर्वराजाकृतिः ..	१९६
महाजयासप्तमीव्रतम् ..	६६९
महादीपविधिः ..	२४३
महादेवस्याष्टमूर्त्तिः ...	११४
महानवम्युत्सवविधिः ..	९०३
महानवम्युत्सवविधिप्रकारान्तरं	९१०
महापूजाविधिः ...	१३८
महाफलद्वादशीव्रतम् ...	१०९
महालक्ष्म्याकृतिः ..	७८
महाव्रतम् ..	८६४
महासप्तमीव्रतम् ...	६५९
महास्नानं ...	२३६
महिषीदानमन्त्रः ..	३०५
महेश्वराष्टमीव्रतम् ..	८४७
मातृनवमीव्रतम् ...	९५१
मातृव्रतम् ..	८७६
मार्त्तण्डसप्तमीव्रतम् ...	७५४
माषदानमन्त्रः ...	२९५
मासाकृतिः ...	२०१
मिथुनाकृतिः ..	१९०
मीनाकृतिः ..	१९१
मीमांसाकृतिः ...	१०६
मुक्तादानमन्त्रः ...	२९०
मुक्तिद्वारसप्तमीव्रतं ..	७८०

		पृष्ठा
मुद्गदानमन्त्रः	...	२९५
मुद्रालक्षणानि	...	२४६
मुनिरूपाणि	...	१०९
मुनिव्रतम्	..	७९१
मूलाकृतिः	...	१५९
मृगशिरस्राकृतिः	...	१५६
मृगशीर्षव्रतम्	...	३५७
मृत्युमहिषीदानमन्त्रः	...	३०६
मेघनादाकृतिः	...	९८
मेघपालीयतृतीयाव्रतम्	...	४१३
मेषदानमन्त्रः	...	३०६
मेषदानमन्त्रः	...	१९८
मेषाकृतिः	..	१९०

य

यक्षरूपाणि	..	१३८
यजुर्व्वेदरूपं	...	१०५
यज्ञीयदेवताः	...	११०
यज्ञोपवीतदानमन्त्रः	...	३०२
यमचतुर्थीव्रतं	...	५२३
यमजिह्वारूपं	...	१०१
यमद्वितीयाव्रतं	...	३८२
यमरूपं	...	१४४
यमव्रतं	...	९८२
यमाह्निकरूपं	...	१०२
यवदानमन्त्रः	...	२९५
यशोदाकतिः	...	११९
याम्याकृतिः	...	९१
योगनिद्राकृतिः	...	८१
योगरूपाणि	...	१५१
योगेश्वरद्वादशीव्रतं	...	१०४१
योगेश्वर्य्याकृतिः	...	८९

र

रक्तवस्त्रयुग्मदानमन्त्रः	...	२८८
रत्नरूपदानमन्त्रः	...	२८७
रत्नाढ्याकृतिः	...	९८
रजतदानमन्त्रः	...	२९०
रत्याकृतिः	...	९१
रत्नदानमन्त्रः	...	३०४
रथदानमन्त्रः	...	३०४
रथनवमीव्रतं	...	९४६
रथसप्तमीव्रतं	...	६५२
रथाङ्गसप्तमीव्रतं	...	६५६
रक्षाकृतिः	...	९०
रसकल्याणिनीतृतीयाव्रतं		४६१
रससंग्राह्याकृतिः	...	९७
रसषट्कम्	..	४७
राक्षसभूतपिशाचरूपाणि	...	१३८
राक्षसाकृतिः	...	१९७
राक्षसस्याकृतिः	...	११८
राक्षस्याकृतिः	...	९१
राघवद्वादशीव्रतं	...	१०३४
राजराजेश्वरव्रतं	...	८६४

	पृष्ठा
राजधर्म्मलक्षणं ...	११
राध्यतृतीयाव्रतं ...	४५०
राध्यद्वादशीव्रतं ...	१०६०
राध्याग्निदशमीव्रतं ...	६६५
रामनवमीव्रतं ..	६४१
रामाख्याकृतिः ...	११८
राम्याकृतिः ...	१६०
रासोराकृतिः ...	१५१
रुक्मीण्यष्टमीव्रतं ...	८५३
रुद्रमूर्त्तिः ...	१२३
रुधिरोद्गारिण्याकृतिः ...	२२१
रूपनवमीव्रतं ..	६३३
रूपं चणस्य ...	१६२
रेवत्याकृतिः ...	१०१
रेवत्याकृतिः ...	१६१
रेवन्तमूर्त्तिः ...	१३०
रोगमुक्तिषष्ठीव्रतं ...	६२८
रोगहरषष्ठीव्रतं ...	६१६
रोहिणीद्वादशीव्रत ...	१११३
रोहिण्याकृतिः ...	१५६
रौद्राकृतिः ...	१५२
रौद्र्याकृतिः ..	२२०
रौद्राकृतिः ..	८५
रौप्यपादानमन्त्रः ...	२६८
रौहिणेयाकृतिः ..	१६४
ल	
लक्षणं क्षमायाः ...	८
लक्षणं क्षयस्य ..	१२२
लक्षणं क्षयायाः ..	६४
लक्षणाष्टाव्रतम् ...	८२६
लक्ष्मीनारायणाकृतिः ...	११३
लक्ष्मीपञ्चमीव्रतम् ..	५६८
लक्ष्म्याकृतिः ...	६४
लक्ष्मीस्वर्ग्याकृतिः ...	६५
लयाकृतिः ...	६४
ललितातृतीयाव्रतम् ...	४१०
ललिताकृतिः ...	८१
ललिताषष्ठीव्रतम् ...	६१०
लवणदानमन्त्रः ..	२६५
लवणधेनुदानमन्त्रः ...	२६०
लालसाकृतिः ...	६५
लीलाकृतिः ...	६४
लोकपालमण्ड्याकृति ...	१०३
लोलाकृतिः ...	६४
लोलुपाकृतिः ...	१००
लौहदानमन्त्रः ..	२८८
लौहपादानमन्त्रः ...	२६८
व	
वज्राकृतिः ...	१६८
वमन्याकृतिः ...	१००
वरचतुर्थीव्रतम् ...	५२०
वरदाकृतिः ...	६६
वराटिकासप्तमीव्रतम् ...	७२६
वराहद्वादशीव्रतम् ...	१०२०

		पृष्ठा
वराहमूर्त्तिः	...	११८
वरीयस्याकृतिः	...	१६९
वरुणाकृति;	...	१९५
वरुणाकृति;	...	१४५
वलकर्णाकृतिः	...	८६
वलप्रमथन्याकृतिः	...	८६
वलभद्रमूर्त्तिः	...	११८
वलवदाममन्त्रः	...	२९१
ववाकृतिः	...	१८१
वर्षाकृतिः	...	२०२
वसन्ताकृतिः	...	२०२
वसुदेवाकृतिः	...	११२
वसुरूपाणि	...	१३१
वसुव्रतम्	...	८४८
वह्निव्रतम्	...	७९१
वह्नेर्विधानम्	...	३११
वाक्पतिरूपम्	...	१९९
वामनद्वादशीव्रतम्	...	१०१०
वामनमूर्त्तिः	...	११७
वामन्याकृतिः	..	१००
वामाकृतिः	...	८५
वायीराकृतिः	...	१९७
वायुव्रतम्	...	९७१
वरुण्याकृतिः	...	८७
वाय्वाकृतिः	...	९४
वाल्मीकमूर्त्तिः	...	१२१

		पृष्ठा
वासुदेव द्वादशीव्रतम्	...	१०२६
विकारिण्याकृति	...	२१६
विकृत्याकृतिः	...	२११
विकृत्याकृतिः	...	१०१
विक्रमाकृति	...	१०८
विजयन्तिकाकृतिः	...	१०२
विज्ञाख्याकृतिः	...	१०२
विजयाद्वादशीव्रतम्	...	११२६
विजयपञ्चमीव्रतम्	...	५०६
विजयरूपम्	..	२१२
विजयाकृतिः	...	१९७
विजयसप्तमीव्रतम्	...	७१७
विजयसप्तमीव्रतान्तरं सवितुः सहस्र-नामानि	...	७०५
विजयद्वादशीव्रतम्	..	११४५
विजयाद्वादशीव्रतं ब्रह्मवैवर्त्तोक्तं		११५२
विजयाकृतिः	...	९२
विजयारोग्यसप्तमीव्रतम्	...	७१०
विजयासप्तमीव्रतम्	...	९१३
विजयैकादशीव्रतम्	...	११५२
विजयैकादशीव्रतं ब्रह्मवैवर्त्तोक्तं		११५२
विद्याप्रतिपद्व्रतम्	...	३३८
विद्यादिदेवताः	...	१०८
विद्येश्वरामूर्त्तिः	...	११६
विद्वज्जिह्वाकृतिः	...	९८
विधानद्वादशसप्तमीव्रतम		७९१

	पृष्ठा
विभवाकृतिः ...	७९२
विभूतिद्वादशीव्रतम् ...	७९२
विमलाकृतिः ...	९५
विरूपाक्षरुद्रमूर्त्तिः ...	१२७
विभवरुद्रमूर्त्तिः ...	१२८
विरोधाकृतिः ...	२१०
विरोधरुद्ररूपम् ...	२१७
विशालाक्षीरूपं ...	९४
विशोकद्वादशीव्रतम् ...	१००२
विशोकषष्ठीव्रतम् ...	६००
विशोकसप्तमीव्रतम् ...	७४६
विश्वरूपिकाकृतिः ...	१०२
श्वकर्म्माकृतिः ...	१०४
विश्वव्रतम् ...	११४५
विश्वरूपव्रतम् ...	६५
विश्वयशोख्याकृतिः ...	२१५
विश्वरूपिकाकृतिः ...	१०१
विश्वेदेव संख्या ...	१४०
विषाखाकृतिः ...	१५८
विष्कम्भाकृतिः ...	१६१०
विष्णु प्राप्तिद्वादशीव्रतम् ...	१२०२
विष्णोराकृतिः ...	१११
विष्णु व्रत ...	११७७
वीरभद्रमूर्त्तिः ...	१३१
वुद्धद्वादशीव्रत ...	१०१७
वुधाष्टमीव्रतम् ...	८६६
वृत्तानांमधुपर्कः ...	१०८

	पृष्ठा
वृत्राकृतिः ..	१६५
वृषाकृतिः ..	२०८
वृहत्कुक्ष्याकृतिः ...	१०१
वैतरणीदानमन्त्रः ...	२९०
वैकुण्ठाकृतिः ...	१९६
वृहस्पत्याकृतिः ..	१५८
वैतरणीव्रतं ...	१११०
वैदिकः मन्त्राः तेषांप्रयोजनं	२४०
वैधृत्याकृतिः ...	१७९
वैनायकचतुर्थीव्रतं ...	५३२
वैराजाकृतिः ...	१९२
वैष्णवीरूपं ...	९०
व्यजनदानमन्त्रः ...	२९७
व्यतीपातदानमन्त्रः ...	२९९
व्याकरणाकृतिः ..	१०५
व्याघाताकृतिः ...	१६७
व्यासमूर्त्तिः ...	१२१
व्योममुद्रालक्षणं ...	१२१
व्योमषष्ठीव्रतं ..	६१६
व्रतराजतृतीयाव्रतं ...	४८४
व्रतसामान्यधर्म्मस्तदधिकारिनश्च तद्ग्राह्यतिः ...	३२५
व्रतान्यभिधियन्ते ...	३३५
व्रतारम्भकालः ..	२२४
श	
शकुन्याकृतिः ...	१८५
शकुदानमन्त्रः ...	१८९

	पृष्ठा
शक्रव्रतं …	१२०४
शङ्करार्कव्रतं …	८३१
शङ्खदानमन्त्रः …	८७
शतभिषाकृतिः …	१६०
शमन्याकृतिः ..	१५१
शवराकृतिः ..	९७
शरदाकृतिः …	२०२
शर्करादानमन्त्रः …	२९६
शर्करासप्तमीव्रतं ..	६४२
शय्याभूमिदानमन्त्रः …	२९४
शाकपञ्चमीव्रतं ..	७९०
शान्ताचतुर्थीव्रतं ..	५१२
शान्तितृतीयाव्रतं …	४६५
शान्तिपञ्चमीव्रतं …	५५६
शान्तिपञ्चमीव्रतं भविष्यपुराणोक्तं	५६२
शालग्रामदानमन्त्रः ..	२९७
शालिहोत्रपञ्चमीव्रतं ..	५७३
शिखारूपं …	१०५
शिवकृष्णाष्टमीव्रतं …	८२१
शिवदूतीरूपं …	८७
शिवलाभदानमन्त्रः …	२९७
शिवप्रतिमादानमन्त्रः …	२९२
शिवलिङ्गदानमन्त्रः ..	२९४
शिवाचतुर्थीव्रतं ..	५१२
शिवाकृतिः …	९०
शिबिकादानमन्त्रः …	२०५
शिलचतुर्थीव्रतं …	५११
शिशिराकृतिः ..	२०२
शीलतृतीयाव्रतं …	४८५
शुक्लनामवत्सररूपं …	२०५
शुक्लपक्षरूपं …	२०१
शुक्लरूपं …	१०५
शुक्लाकृतिः …	१५०
शुचिव्रतं वह्निपुराणोक्तं ..	११९६
शुभरूपं ..	१७४
शुभसप्तमीव्रतं ..	६४८
शुभानुरूपं …	२०८
शूर्पदानमन्त्रः ..	२०२
शूलदानमन्त्रः ..	२९८
शूलरूपं …	१६४
शैलव्रतं …	७९२
शोभकृद्रूपं …	२१५
शोभनरूपं …	१६८
शोभनरूपं ..	१७२
शौचलक्षणं …	६
शौर्य्यव्रतं …	९५७
श्रद्धानिरूपणं …	३०
श्रवणद्वादशीव्रतं ..	११३८
श्रवणद्वादशीव्रतं भविष्यपुराणोक्तं	१६२
श्रवणारूपं ..	१६०
श्राद्धप्रशस्तानि ..	४९
श्रावणरूपं ..	१९७
श्रीपञ्चमीव्रतं ..	५३७
श्रीपञ्चमीव्रतं गरुड़पुराणोक्तं	५७३

	पृष्ठा
श्रीप्राप्तिपञ्चमीव्रतं ..	५०५
श्रीमुखाख्यवत्सररूपं ...	२०५
श्रीरामनवमीव्रतं ..	८८०
श्रीव्रतं ..	५०५
श्वेतवत्सदानमन्त्रः ..	२८८
श्वेतारूपं ..	९१
श्वेताश्वदानमन्त्रः ..	१८७

ष

षट्प्रकाराधर्म्माः ..	९
षष्ठीव्रतरूपं ब्रह्मपुराणोक्तं	६२७
षष्ठीव्रतं विष्णुधर्म्मोत्तरोक्तं	६२७
षष्ठीव्रतानि ..	५७७
षष्ठ्याकृतिः ...	१५२

स

संवत्सरारम्भविधिः ..	२६०
संकर्षणाकृतिः ...	११२
सत्तमाकृतिः ...	१९५
सन्तानाष्टमीव्रतं ...	८४६
सपानीयार्घ्यप्रदानमन्त्रः ...	२८९
सप्तधातवः ...	४८
सप्तधान्यं ...	४८
सप्तमीरूपं ..	१५२
सप्तमीशीलव्रतं ...	७९२
सप्तमीव्रतानि ...	६३०
सप्तमीस्नपनं ..	७७०
सप्तर्षिव्रतं ...	७९१
सप्तसप्तमीकल्पः ...	६७८
सप्तसमुद्राः ...	१४१

	पृष्ठा
समीरणरूपं ...	२००
समुद्ररूपं ...	१४१
सम्प्राप्तिद्वादशीव्रतं ...	१०९४
सरिद्व्रतं ...	७९०
सर्पपञ्चमीव्रतं ...	५६७
सर्पविषापहपञ्चमीव्रतं ..	५६४
सर्व्वकामव्रतं ...	११५१
सर्व्वजिद्रूपं ..	२१०
सर्व्वज्ञानरूपं ...	९६
सर्व्वधारिव्रतं ...	२१०
सर्व्वभूतदमन्याकृतिः ...	८६
सर्व्वमङ्गलरूपं ...	८१
सर्व्वाप्तिपञ्चमीव्रतं ...	७०५
सर्षपसप्तमीव्रतं ..	६८५
सहिरण्यतिलदानमन्त्रः ..	२९८
साध्याकृतिः ...	१०८
सात्त्विकधर्म्मलक्षणं ...	११
सात्त्विकादिभेदेनधर्म्मस्य प्रकारान्तरं	१०
साधारणधर्म्माः ...	६
साधारणस्वरूपं ...	२१६
साध्यरूपं ...	१७३
साध्यव्रतं ...	११७२
सामवेदस्य ऋषिदेवतच्छन्दांसि	१७९
सामवेदरूपं ...	१०४
सारस्वतपञ्चमीव्रतं ...	५५२
सार्व्वभौमव्रतं ...	९८२
सार्व्वरिपक्षाकृतिः ..	११४

	पृष्ठा
सावित्रकल्पं ...	१९२
सिंहदानमन्त्रः ...	२९४
सिंहाकृतिः ...	१९०
सितकल्पं ...	१९१
सितसप्तमीव्रतं ...	७७८
सिद्धार्थकादिसप्तमीव्रतं ..	५२४
सिद्धार्थस्याकृतिः ...	२१९
सिद्धाकृतिः ...	१६४
सिद्धाकृतिः ..	९०
सिद्धाकृतिः ...	१५१
सिद्धिविनायकचतुर्थीव्रतं ...	५२४
सुकर्म्माकृतिः ...	१६४
सुकृतद्वादशीव्रतं ..	१०७९
सुखचतुर्थीव्रतं ...	५२६
सुखषष्ठीव्रतं ...	६२८
सुगतिद्वादशीव्रतं ...	१०८१
सुगतिव्रतं ...	८८१
सुजन्मद्वादशीव्रतम् ...	११७४
सुदर्शनषष्ठीव्रतं ...	६२०
सुनामद्वादशीव्रतम् ..	१०६३
सुवर्णदानमन्त्रः ...	२८७
सुवर्णपद्मदानमन्त्रः ..	१९०
सुभगाकृतिः ...	९९५
सुरभ्याकृतिः ...	८२
सुरूपद्वादशीव्रतं ...	११०५
सुरेश्वररुद्रमूर्त्तिः ...	१२९०
सुरोदाकृतिः ..	१४२

	पृष्ठा
सूर्य्यमूर्त्तिदानमन्त्रः ...	३८३
सूर्य्याकृतिः ...	३४८
सूर्य्यव्रतं विष्णुधर्म्मोत्तरोक्तं	७७९
सूर्य्यसप्तमीव्रतं ...	७७०
सौद्यापनविद्याव्रतं ...	३४३
सौद्यापनमारोग्यप्रतिपद्व्रतं	३४८
सौद्यापनमासादशमीव्रतं ...	९७३
सौद्यापनमासादशमीव्रतं-भविष्यपुराणोक्तं ..	
सौद्यापनषष्ठीव्रतं ...	
सोपदंमदध्यमदानमन्त्रः ...	२
सोमद्वितीयाव्रतं ...	३८
सोमव्रतं ...	८०९
सोमाष्टमीव्रतं ...	८३६
सौभाग्यतृतीयाव्रतं ...	५७
सौभाग्यतृतीयाव्रतं ..	४
सौभाग्यतृतीयाव्रतं गरुडपुराणोक्तं	४८
सौभाग्यद्रव्ययुग्मदानमन्त्रः	३०२
सौभाग्यपञ्चमीव्रतं ...	५७८
सौभाग्याकृतिः ...	१८२
सौभाग्यशयनव्रतं ...	४५५
सौभाग्यस्याकृतिः ...	३२६
सौभाग्याष्टकं ...	५८
सौम्याकृतिः ...	१६८
सौरसप्तमीव्रतं ...	७८७
स्कन्दमूर्त्तिः ...	१२९
स्नानपरिमाणं ...	२३५

सूचीपत्रम् ।

		पृष्ठा			पृष्ठा
स्वर्णनागदानमन्त्रः	..	१०१	हरिव्रतं	...	११०१
स्वर्णादितिलदानमन्त्रः	...	२९०	हरिहरमूर्त्तिः	...	१२६
स्वातीरूपं	...	१९८	हर्षणाकृतिः	...	१९७
ह			हव्यद्रव्यनिरूपणं	...	२२१
हयग्रीवमूर्त्तिः	..	१२०	हस्तारूपं	...	१५८
हयाननाकृतिः	...	९७	हाहारवाकृतिः	...	९६
हरतृतीयाव्रतं	...	४८०	हुङ्काराकृतिः	...	९५
मूर्त्ति	...	११८	हेमन्ताकृतिः	...	१०१
रुद्रमूर्त्तिः	...	१२८	हेमलम्बस्याकृतिः	...	११३
व्रतं	...	८८१	होमविधिः	...	३०९
रिद्रादानमन्त्रः	...	३०२	होमविधिः देवीपुराणोक्तः		६९

ग्रन्थानां वचनसंख्या।

———000———

पृष्ठा

अ

अगस्त्यसंहिता ९४६।

अङ्गिराः २२७, ३२२।

अग्निपुराणं २१७, ३२१, ९९६।

आ

आग्नेयपुराणं ९९३।

आदित्यपुराणं ७४०, ८०४, ८७६, ९४७।

आनर्त्तकः ३०।

आपस्तम्बः १०, ३१, ३९, ४१।

उ

उमामाहेश्वरसंवादः ११०२।

ऋ

ऋष्यशृङ्गः ९९६।

क

कात्यायनः ३५, ५५, ७६, ३३१, ९९१, ९९१, १००१, १००३, १००५।

कालिकापुराणं २२, २३७, ४३९, ७८८, ८३१ ९६२, १००१।

पृष्ठा

कालीभरं ६१, ४५०, ५८८, ८६४, ८६५, ८६६, ९५५।

कूर्मपुराणं १३, २१, ३१, ५१३, ५२९, १००८, १०१०, ११५८।

क्षीरस्वामी ४७।

ग

गरुडपुराणं ४३, ३११, ३२२, ३३१, ३३९ ३८६, ४६०, ४८३, ५४६, ६१०, ७७०।

गारुडपुराणं ४४, ९४१, ९६५, ९९३, १००९

गार्ग्यः २४५, २४६।

गृह्यपरिशिष्टं ३२, ४०, ४२।

गोपथब्राह्मणं ५८।

गौतमः ९९७।

छ

छागलेयः ३४।

छन्दोगपरिशिष्टं ३२, ३६, ३८, ३९. ४०, ४२, ४९, ५६०, ४६७. ६०६, ६०८, ६३४, ६३०, ६४२, ६५२।

पृष्ठा

ज

जावालिः ६९ ।

जोतिषशास्त्रं २४५ ।

द

देवलः ६, १७, १२, १६ ।

देवीपुराणं २९, ६२, ६५, ६९, ९०, ११२, ३०९, ४८४, ५२५, ८२६, ८१७, ९९०, ११६७ ।

न

नरसिंहपुराणं ५१० ।

नारदीयपुराणं ९९१, ९९५, ९९६, १००२, १००३ ।

निगमपरिशिष्टं ३९, ९९९, १००२ ।

प

पद्मपुराणं ६७, ३०६, ३११, ३२३, ३५६, ३५७, ३६०, ३८९, ४२२, ४६१, ४७१, ४८३, ४८४, ४८५, ५००, ५२२, ५५३, ५५४, ६३८, ६४८, ७४४, ७८७, ७८८, ८७५, ९५८, ९८३, १०००, १०१०, १०४९, १०७५, ११६१ ।

पयःसंग्रहः ७८ ।

पिङ्गला ५८ ।

पुलस्त्यः ९९६ ।

पैठीनसि २९, ४२, ९९४ ।

प्रतिष्ठासारसंग्रहः ५५, ६०, ६१ ।

प्रमाणखण्डं ५६४ ।

ब

ब्रह्मपुराणं ३४, ४५, ४७, ५३, २२६, ३३०, ६१७, ७८९, ९९१, ९९२, १००४, १००७, १००९ ।

ब्रह्मसिद्धान्तः २४६ ।

ब्रह्माण्डपुराणं ५६८ ।

ब्रह्मा ७१ ।

ब्रह्मवैवर्त्तः १२, १००३, १००५, १००६, ११५६ ।

भ

भगवतीश्रुतिः ९, ३० ।

भवदीपिका ८९, ९९, १२८ ।

भविष्यपुराणं १२, ६६७, ६६९, ६७४, ६७६, ६७९, ६८५, ६८७, ६९०, ६६७, ६६९, ९५६, ९८२, ९९२, १०००, १००१ १००५, १०१०, १०५६, १०८४, ११४५ ११७७, ११८३, ११९८, ११००, १२०२ ।

भविष्यत्पुराणं १०, १९, १६, २७, ३१, ३४, ४२, ४७, ४८, ५०, ५७, ५८, ३१७, ३३०, ३११, ३३५, ३४५, ३६६, ३७७, ३८१, ४७४, ४७७, ४७८, ४९७, ५१०, ५१२, ५१७, ५५७, ५६६, ५६८, ५७१, ६०५, ६१५, ६१६, ६६९, ६७४, ६७६, ६७९, ६८५, ६८७, ६९०, ६९६, ६९७, ७०१, ७०२, ७०५, ७१७, ७२०, ७२४, ७१६, ७२८, ७३१, ७३४, ७३६, ७४१, ७४१, ७४६, ७४७, ७५२, ७५६ ७५७, ७६०, ७६२, ७६८, ७८६, ७८७, ७८८, ८१३, ८२९, ८४१, ८४४, ८७५, ८८१, ८८१, ८८८, ९१३, ९३०, ९३७, ९३९, ९४८, ९५६,

पृष्ठा

९५७, ९८२, ९९१, १०००, १००१, १००६, १०१०, १०५६, १०८४, ११४५, ११७०, ११८०, १२००, १२०१ ।

भविष्योत्तरं ४८, ५३, ३३२, ३५१, ३५२, ३५४, ३८०, ३८२, ३९४, ४०० ४०२, ४०५, ४०५, ४१२, ४१६. ४१९, ४२६, ४३०, ४३५, ५३१, ५४३, ५७४, ५९६, ६००, ६०१, ६०४, ६१७, ६७१ ७५४, ८१४, ८१९, ८३७, ८७३, ८९४, ८९६, ९१०, ९३२, ९५९, ९८१, १०२१, १०८९, १०९४, १११२, १११४, १११७, ११४५, ११७१ ।

भागवतं ७ ।

भृगुः २२५ ।

म

मत्स्यपुराणं १६, २१, ४८, ५३, ३८, ५८, ८८, १४९, १५०, २२२, २८७, ३०८, ३३१, ९९१, १०००, १००८, १०६०, ११९८ ।

मनुः २२, १००८ ।

मयसंग्रहः १३८ ।

मरीचिः ४०, ७५ ।

मार्कण्डेयपुराणं २६, ३४, ३७, ४९, ५१. ८७, ३२१, ४२१, ४४४, ५०८, १०१०, १०११ ।

महाभारत ७, ११, १४, १५, १६, २४, २५, ३२६, १०९१ ।

महायमोयपरिशिष्ट ४१ ।

पृष्ठा

य

यम ११९ ।

यमपुराणं १३ ।

याज्ञवल्क्यः १५, १८, ११, १६, ३७, ३८, ५०

र

रत्नकोषः २४१ ।

ल

लग्नः २४५ ।

लक्षणसमुच्चयं ८९ ।

लघुहारीतः २९ ।

लिङ्गपुराणं ४३, ६७, २३५, २२६, ३०७ ।

व

वराहपुराणं ११, ५७, ४६, ३२१, ३५५ ४७९, ५२४, ५५६, ६१६, ७२५, ७४८, ८७५ ९५९ ९८३, १००४, १०११, १०४४, ११०३ ११६१, ११७१, १२०४ ।

वराहमिहिरौ २१६ ।

वशिष्ठः २०, ३५, ५१ ।

वह्निपुराणं ३०, १०७, ११५८ ।

वातुलागम ४५ ।

वामनपुराणं ३४, ३८, १४०, ८५९, ११०५ ।

वायुपुराणं ११८ ।

वायुसंहिता २४० ।

विश्वकर्म्मशास्त्रं ७८, ७९, ८६, ८९, १०४, ११३, ११६, १३१, १५१, १९१, १३९, १४० ।

विश्वकर्म्मा १३९, १४० ।

पृष्ठा

विश्वामित्रः १०, ६७।

विष्णुः ५४।

विष्णुगुप्तः ५५, ५६।

विष्णुधर्म्मः १०१०, १०८१।

विष्णुधर्म्मोत्तरं ८, २५, ४४, ४७, ७६, ७९,
१०३, ११०, ११५, ११९, १२७, १४०,
, १४७, १५०, १९१, २१८, १४१, २४३,
, २८०, ३८९, २९१, २९२, ४५२, ४५४,
६, ४५७, ४९८, ५०५, ५५२, ५७४, ५७५,
२७, ७७४ ७७७, ७७८, ७७९, ७८०, ७९०,
७९१, ७९२, ८२१, ८४७, ८४८, ८४९,
९५०, ९६६, ९६८, १००९, १०६२, ११९२,
११४७, ११४८, ११५०, ११५१, ११७५,
११९४।

विष्णुपुराणं १८, २०, २७, २५।

विष्णुरहस्यं ९९३, ९९५, १००३, १००९,
१०९६, १०९७, ११०१, १२०१।

विष्णुस्मृतिः ९९४।

वृद्धगर्गः ४४।

वृद्धवशिष्ठः ५३, २४४।

वृहस्पतिः ८५२, ५३, २४४।

वेदव्यासः १३।

बौधायनः २९, ९९, ३५।

व्यासः २२, २२६, ३३१।

श

शङ्खलिखितौ १२, २५।

शतपथश्रुतिः ३८।

शातातपः २३, २४, २५।

शिवधर्म्मः ४४, १२५।

शुक्रः १२५।

शौचाचारपद्धतिः ५९।

शौनकः २४५।

ष

षट्त्रिंशन्मतं ४८।

स

सत्यव्रतः २४४।

सनत्कुमारप्रोक्तं ९९३, ९९४, ९९८, ९९९,
१००१।

स्वायम्भूः ९०।

सिद्धार्थसंहिता ११४।

सौरपुराणं ५३०, ८९९।

स्कन्दपुराणं १३, १४, ३१, ४३, ४४, ४५,
१२७, २२३, २१८, २१९, २२५, २३३, २४९,
४८०, ५०१, ५२६, ५३०, ५३१, ५७७, ५९०
६२६, ८२५, ८५५, ९९५, ९९९, १००१।

स्कन्दपुराणीयप्रभासखण्डं ११५६।

स्कान्दः ८१०।

स्मृतिमीमांसा ९९७।

ह

हरिवंशः ३२७।

हारीतः ४, २२, ३३, १००८।

विज्ञापनम्।

महामहोपाध्यायश्रीहेमाद्रिविरचितश्चतुर्व्वर्गचिन्तामणिर्नाम ग्रन्थोऽयं यत्र व्रतखण्ड, दानखण्ड, कालखण्ड, श्राद्धखण्ड, परिशेषखण्डसमाख्याकैः कस्यचिन्मते व्रतखण्ड दानखण्ड तीर्थखण्ड मोक्षखण्ड परिशेषखण्ड समाख्याकैः पञ्चभिरवय-वैर्व्विभक्तास्तेषां दानखण्डात्मकश्चिन्तामणिः आसियाटिकसोसा-इटिसभाध्यक्षमहोदयानामनुमत्या मया खाग्निग्रहेन्दुमित-सम्बदाख्यसम्वत्सरे मुद्रितोऽभूत् साम्प्रतं व्रतखण्डात्मकः प्रथमोऽपि मुद्रीयते मुद्रितोऽनल्पोऽल्पोऽवशिष्यते, चतुर्व्वर्गचिन्ता-मणौ स्मृतिनिबन्धे महाशास्त्रे ब्राह्मणादीनां वर्णानां ब्रह्मचर्य्या-दीनामाश्रमाणामनुलोमप्रतिलोमजातानां सङ्करजातीनाञ्च षड्विधधर्म्मा विस्तरेण साधारणधर्म्माश्चासंशयं निर्णीताः सन्ति, ग्रन्थोऽयमतिकायः सर्व्वसाधारणैर्व्बहुवित्तव्ययायाससाध्यतया-वत्तीकर्त्तुं बहुलतया च स्वयं लेखितु मयोग्यस्तेनास्य विरलप्रचारतया निखिलधर्म्मा आचारव्यवहाराश्रयाः साधारणै-रसंशयमवगन्तुमशक्यन्तेऽतः करुणया सर्व्वजन गोचरार्थं तुमूल्यं निर्द्धार्य्य मुद्रादिकरणव्ययोपयुक्तं नतु लाभार्थं मुद्रितः पस्य तु मुद्राङ्कनेन पूर्व्वराजनामधामचरितादीनि जिज्ञा-

सूनां विभिन्नजातीनामपि महोपकारः सुसम्भाव्यते अत्राणुरपि संशयो नास्ति साम्प्रतं विज्ञाप्यते हेमाद्रिस्तु देवगिरिस्थ यादववंशमहाराजाधिराजमहादेवचक्रवर्त्तिनो नृपतेः प्राड्विवाकापरपर्य्यायधर्म्माधिकरणपण्डित आसीत् यस्य सभापण्डित श्रीवोपदेव आसीत् सम्भाव्यते स च पञ्चवसुधरेन्दूम्मिते शकनृपति संवत्सरे द्वित्रादिवत्सर न्यूनाधिक्येन समजनिष्ट, हेमाद्रिस्तु तदैव समुदयं लेभे च, अत्रायं जनपरम्परासम्वाद एतद्ग्रन्थकर्त्ता वोपदेव इति वोपदेवस्तु महान् पण्डितः पदार्थादर्श महाभारत भाश्र कोष व्याकरण काव्य भागवतभाष्य बहुविध वैद्यकग्रन्थान् स च विरचितवान्, वीपदेवकृतपदार्थाभिधानकग्रन्थकारिकामनल्पस्थाने उत्थाप्य यथातत्त्वं कारिकाव्याख्यां समाधाय तत्प्रामास्य प्रतिपादनार्थं मूलं हेमाद्रौ चिन्त्यमित्यादिभिर्निवन्धैः कमलाकरभट्टाद्यभिहितैरेवं प्रतीमस, यद्यपि क्रमप्राप्तं व्रतखण्ड मेवादौ मुद्रयितुमुचितं तं प्रोज्झ्य दानखण्डस्य मुद्राङ्कने सन्दिहानस्य जिज्ञासोर्जिज्ञासाविनिवारणवीजमिदं व्रतखण्डस्यादर्शीभूतमेकमात्रपुस्तकं तदा लब्धं दानखण्डस्य चत्वारि पुस्तकानि परिप्राप्तानि अतो हेतोः क्रमप्राप्तमपि पूर्व्वं तन्न मुद्रितं, एकमात्रपुस्तकादर्शदर्शनविश्वासेन मुद्राङ्कनस्यानौचित्यात् अस्मिन् वर्षे व्रतखण्डस्यादर्शीभूतक पुस्तकत्रयं लब्धा अतो व्युत्क्रमं परावर्त्य व्रतखण्डमुद्रयितुमारभ्यते, पुस्तक

व्रयन्तु श्रीयुक्तागवर्णमेण्ट संस्कृतपाठशालास्थं, पुस्तकेषु तेषु अनेकस्थाने पाठानैक्यमस्ति एतावत् किं स्थानं स्थानं भिन्नकर्त्तृकमिव प्रतिभाति, तथापि स्मार्त्तशूलपाणि कमलाकरादिकृतग्रन्थानवलोक्य बहु विचार्य्य पुस्तकान्तरे पाठइतिविरुद्ध-पाठं संरच्य संलग्नीकृत्य मुद्रितः परिशोधितश्च. विचार्य्यतां, व्रतखण्डचिन्तामणौ व्रतविधानव्यपदेशेन सुरनरतिर्य्यगादिवारनक्षत्रकरणतिथीनां स्वरूपवर्णनं पिशाचभूतगन्धर्व्वकिन्नर विद्याधराप्सरोयक्षराक्षसादीनाञ्च स्वरूपवर्णनं नानामहर्षीणां नानादेवानां हरिहरहिरण्यगर्भादीनाञ्च स्वरूपवर्णनं श्रीमद्दुर्गादीनां भगवतीनाञ्चाकारादिवर्णनं किन्तावत् व्यास वाल्मीकि प्रभृतीनां सर्व्वेषां महर्षीणां वर्णरूपपरिवर्णनञ्चास्ति, तैर्नाना जातीयानामपि परोपकारः सम्भाव्यते च, हेमाद्रिकृतचतुर्व्वर्गं चिन्तामणिनामकग्रन्थस्य बहुलतया संक्षिप्तसंग्रहवत् शिष्यैरपशिष्यैःपाठ पाठनानामप्रचरद्रूपतया व्यवहाराभावेनेदृगवस्थाभावापन्नः, तदवस्थामपाकर्त्तुं सभ्यराजानामाज्ञया तत्पुरुषाणाञ्च चेष्टया च तदनुमत्या यद्यपि मया विशदीकर्त्तुमिष्यते तथापीदमपि द्रष्टव्यम्॥

महारण्यच्छेदात् परमपि कियच्छिष्टमपरं ।
ततश्छेत्तुर्द्दोषो नहि भवति भाव्ये हि विषये ।
वनन्यायादत्र क्वचिदपि भवेद्दुष्टमपरं ।
वचः क्षम्यं याचे विनति ततिपूर्व्वं हि कृतिन इति ॥१॥
महाराज्ञी जीव्याच्चिरमखिलराज्याधिपतया
तदस्या निर्व्विघ्नं भवतु निजराष्ट्रं प्रकृतिभिः ।
द्विषन्तः सन्त स्त्र प्रकृतिगुणतः सभ्यनृपतौ
ततः शान्तस्वान्ताः कुरुत नृपकार्य्यं निजमिव ॥ २ ॥
राज्ञः सत्पुरुषैः प्रयासबहुलै र्ग्रन्थाः समुद्धारिताः ।
श्रीमद्भागवतावतारसदृशान् जानन्तु नो तान् बुधाः ॥
मग्नानब्धिषु वेदशास्त्रनिचयान् ते चोद्धरन्ति स्म भोः
एतै र्व्वेदपुरःसराः कति कति ग्रन्थाः समुद्धारिताः ॥ ३ ॥

श्रीभरतचन्द्रशर्म्मणा ।

गणेशाय नमः।

हेमाद्रिः।

तत्र व्रतखण्डं।

प्रथमोऽध्यायः।

अथ ग्रन्थकर्त्तुः प्रशस्तिः।

पादप्रान्तविनिःसृतद्युसरितो देवस्य लक्ष्मीपते,
र्व्वक्त्राम्भोरुहसम्भवा त्रिजगतीवन्द्या जयन्ति द्विजाः।
राग-द्वेष-मदादि-दोष-विरहादन्तस्फुरज्ज्योतिषाम्
तेषामेव शिरोमणिर्व्विजयते विश्वाभिधानो मुनिः॥ १॥
गोत्रे तस्य बभूव निर्म्मलगुण श्रेणीभृतामग्रणी,
र्व्विद्या-चार-विवेक विक्रम निधिः श्रीवासुदेवः कृती।
यत्कीर्त्त्या धवलीकृते त्रिभुवने श्रीकण्ठ-वैकुण्ठयोः,
कैलासाचलदुग्धसिन्धु विषये नासीन्निवासो गृहे॥ २
नानादान प्रीणित प्राणिलोको

लोका-लोक-प्रान्तविश्रान्तकीर्त्तिः।
तस्मादासीन्नामतः कामदेवः
पुण्याचारैर्मूर्त्तिमान् धर्म्म एव ॥ ३ ॥
विमलगुणमणीनामाकरः कामदेवा
दभवदतुलतेजा नाम हेमाद्रिसूरिः।
सकल कलिकलङ्कातङ्कपङ्कापहारी
सुरसरितद्ववौघः शार्ङ्गपाणेः पदाब्जात् ॥ ४ ॥
पुरापि यत्पुण्यमगण्यरूपम्
श्रीकामदेवेन कृतं नु विद्मः।
येनादरिद्रां जगतीं विधातुम्
हेमाद्रिरप्यस्य गृहेऽवतीर्णः॥ ५ ॥
चरितं तस्य हेमाद्रेरद्भुतं केन वर्ण्यते।
उपैति प्रार्थितो यस्य सन्तानः कल्पवृक्षताम् ॥ ६ ॥
दृष्ट्वैव भावीनि यशांसि यस्य
जगत्त्रयी मण्डलपण्डितानि।
तथाविधं शिल्पमनल्पमिन्दो
र्धाता विधातुं शिथिलादरोऽभूत् ॥ ७ ॥
असौ विसीमा महिमा हिमाद्रिम्
हेमाद्रिसूरेरधरी करोति,
दूरादगम्यं मृगलोचनानाम्
येनाजड़ं मानसमेव धत्ते ॥ ८ ॥
कलाकलापं सकलं बिभर्त्ति
गवां सहस्राणि सदा ददाति।

जगत्प्रसिद्धद्विजराजभाव
स्तथापि यस्तारकतां दधाति ॥ ९ ॥

विध्वस्ताखिलवैरिणः किल महादेवस्य पृथ्वीपते,
राज्यश्रीरसमुद्रवर्द्धनशशी हेमाद्रिसूरिः परः ।
येन श्रीकरणाधिपत्यपदवीमासाद्य विद्यामपि,
न्यस्ता श्रीश्च सरस्वती च विदुषां गेहेषु देहेषु च ॥ १० ॥

जिज्ञासामिह कुर्वते कतिपये धर्मस्य तेभ्यो परे
जानन्त्येव समस्तशास्त्ररचनादस्माभिरेवं पुनः
निःशेषैरभिधीयते क्षितितले हेमाद्रिसूरेः परो
ज्ञातुं वा चरितुं क्षमोनहि पुरा भूतो न भावी पुरः ॥११॥

स सम्प्रति निरालोक लोकशङ्कापनुत्तये ।
विदधाति चतुर्व्वर्ग,चिन्तामणि मुदारधीः ॥ १२ ॥

यं पूर्व्वं चारुचिन्तामणि ममितगुणं मन्दराद्रिः समुद्रम्
निर्मथ्य प्रायशोऽयं वितरति वहुशः प्रार्थनादर्थमेव ।
सम्प्रत्यालोच्य * सर्व्वस्मृति-निगम-पुराणे-तिहासा-म्बुराशीन्
हेमाद्रिः स्पर्द्धयैव प्रकटयति चतुर्व्वर्गचिन्तामणिं सः ॥ १३ ॥

ध्यानमन्धानि तमांसि दूरे विचिन्त्य चिन्तामणिमेतमेव ।
मनोरथानां परिपूरणाय नान्यत्र सन्तः श्रममाचरन्तु ॥ १४ ॥

अनन्यमनसा सोऽयं चिन्तामणिरुपासितः ।
विदधातु सदाऽशेषमनोषितफलानि वः ॥ १५ ॥

खण्डानि चास्मिन् व्रत-दान-तीर्थ-
मोक्षाभिधानि क्रमशो भवन्ति ।

---

* आलोड्य इति क्वचित् पाठः ।

यत् पञ्चमं तत् परिशेषखण्ड
मखण्डितो यत्र विभाति धर्म्मः ॥ १६ ॥
धर्म्मो जयत्यभ्युदयैकहेतु
र्यस्य प्रकारान् षडुदाहरन्ति।
अवान्तरानेकविशेषयोगा
दन्येऽपि यस्मिन् बहवो भवन्ति ॥ १७ ॥
अमुष्य भेदानखिलान् प्रवक्तुम्
वाचस्पते-रप्यसमर्थभावः।
महानुभावा मुनयोऽपि शास्त्रे
तदेकदेशं प्रतिपादयन्ति ॥ १८ ॥
तेनेह हेमाद्रिसुधीः स्वशास्त्रे
साधारणं धर्म्मविशेषमाह।
फलाभिलाषानभिलाषभेदात्
काम्यञ्च नित्यञ्च यमामनन्ति ॥ १९ ॥

यदाह हारीतः।

काम्यैरेतैः क्रियमाणैस्तपोभिः
स्वर्गा-ल्लोकात् पुनरायान्ति जन्म-
कामैर्मुक्ताः सत्यलोकाः स यज्ञा
स्तपोनिष्ठानक्षयान् यान्ति लोकानिति ॥ २० ॥

अथ के ते धर्म्मस्य षट् प्रकाराः कतमश्चासावस्मिन् शास्त्रे प्रतिपादयिष्यमाणः साधारणाख्यो धर्म्मो विशेष इत्युच्यते।

तत्र धर्म्म इत्यनुवृत्तौ भविष्यत् पुराणे।

वर्णधर्म्मः स्मृतस्त्वेक आश्रमाणामतः परम्
वर्णाश्रमस्तृतीयस्तु गौणोनैमित्तिक स्तथा ॥
वर्णत्वमेकमाश्रित्य योधर्म्मः सम्प्रवर्त्तते
वर्णधर्म्मः स उक्तस्तु यथोपनयनं नृप ॥
आश्रमञ्च समाश्रित्य योधर्म्मः सम्प्रवर्त्तते
सखल्वाश्रमधर्म्मस्तु भिक्षादण्डादिको यथा ॥
वर्णत्वमाश्रमत्वञ्च योऽधिकृत्य प्रवर्त्तते
स वर्णाश्रमधर्म्मस्तु स्यान्मौञ्जी मेखला * यथा ॥
यो गुणेन प्रवर्त्तेत गुणधर्म्मः स उच्यते ।
यथामूर्द्धाभिषिक्तस्य प्रजानां परिपालनम् ॥
निमित्तमेक माश्रित्य यो धर्म्मः संप्रवर्त्तते ।
नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥

वर्णत्वमेकमाश्रित्येति एकशब्दो वक्ष्यमाणोभयनिमित्तव्यावृत्तिपरः, वक्ष्यमाणधर्म्मस्य वर्णधर्म्मत्वात् अयं त्वाश्रमत्वमनपेक्ष्य वर्णत्वनिमित्तकोऽतः सत्यामप्युपनयनस्याष्टवर्षत्वाद्यपेक्षायां नैक शब्द विरोध इति । अथवा वीप्सायामेकशब्दः ततश्चैकैकं वर्णत्वमुद्दिश्य यो विधीयते स वर्णधर्म्म इति अतएवाष्टवर्षादिवाक्यैरनेकवर्णत्वोद्देशेन विधीयमानमुपनयनं दृष्टान्तीकृतं । निमित्तमेकमाश्रित्येत्यत्र प्रायश्चित्तस्य नित्य काम्यवैधर्म्म्यमात्रेण नैमित्तिकत्वं न तु राहुदर्शननिमित्तस्नानादिवदकरणजनितदोष परिहारार्थतया निषिद्धकर्म्मकृताधर्म्म परिहारार्थतयैव तद्विधा-

* मौञ्जीयामेखलेति क्वचित् पाठः ।

नोपपत्तेः न च जातेष्टिवदुभयार्थत्वं, तत्र फलनिमित्तयो रुभयो रुपात्तत्वान्नत्विह तथेति।

साधारणधर्म्मास्तु महाभारते।

श्राद्धकर्म्म तपश्चैव सत्यमक्रोध एव च।
स्वेषु दारेषु सन्तोषः शौचं नित्यानसूयिता।
आत्मज्ञानं तितिक्षा च धर्म्मः साधारणो नृप॥

चातुर्वर्ण्यस्येति शेषः।

'तपः,श्चान्द्रायणादि।

यदाह देवलः।

व्रतोपवासनियमैः शरीरोत्तापनं नृप।

व्रतशब्दोऽत्र स्नान-दान-जप-होम-पूजोपवासादिपरः, एतेन व्रतखण्डप्रतिपाद्यानां धर्म्माणामपि साधारणत्वं सूचितं, आत्मज्ञानमित्यनेन मोक्षखण्डप्रतिपाद्यानामपि धर्म्माणां साधारणत्वं, न चापि शूद्राधिकरणन्यायेन शूद्राणां विद्यायामनधिकार इति कथं मोक्षधर्म्माणां साधारणत्वमिति वाच्यं। तेषामुपनयनाभावेनाध्ययनासम्भवाद्वेदवाक्यविचार एवानधिकारः। न पुनरवैदिके श्रावयेच्चतुरोवर्णानिति शूद्राणामपि पञ्चयज्ञादिवत् पुराणस्मृति प्रतिपाद्यविद्योपदेशदर्शनात्, ननु तथापि कथं वेदान्तवाक्यविचारजनितज्ञानाभावे शूद्राणां मोक्षधर्माधिकार इति चेत् मैवं। मोक्षसाधनस्य ज्ञानस्य तदेकसाध्यत्वसिद्धेः, तथाच श्रुतिः 'तरति शोकमात्मवित् ब्रह्मवेद ब्रह्मैव

भवति ब्रह्मविदाप्नोति परं विद्ययामृतत्वमश्नुत इति, मोक्षस्यात्मज्ञानसाध्यतां वदति । आत्मज्ञानस्य च पुराणादिवचननिचयनिचारपरिचयादप्युपपत्तेः श्रोतव्य इत्यादि वाक्यानां तु विचारनियमविधित्वानङ्गीकारात् अङ्गीकारे वा, तस्य द्विजातिनियततया श्रावयेच्चतुरोवर्णानित्यादिपुराणवचनविषयविधेरप्यध्ययनविधिवद्विचारपर्य्यन्ततास्तु ततश्च यथा द्रव्यसाध्यत्वाविशेषेऽपि क्रतूनान्तत्तद्वर्णविहितोपायनियमार्जितद्रव्यसाध्यत्वं एवमात्मज्ञानसाध्यत्वाविशेषेऽपि मोक्षस्य तदुपायविशेषजनितज्ञानसाध्यत्वमिति सर्व्वमनवद्यम् ।

तथाचोक्तं भागवते ।

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
इति भारतमाख्यानं मुनिना कृपया कृतम् ॥

महाभारतेऽपि ।

मामुपाश्रित्य कौन्तेय येऽपि स्युः पापयोनयः
स्त्रियो वैश्यास्तथा शूद्रा स्तेऽपि यान्ति परां गतिम् ॥

विष्णुः । क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥
आर्जवं लोभशून्यत्वं देव,ब्राह्मण,पूजनम् ।
अनभ्यसूया च तथा धर्म्मः सामान्य उच्यते इति ॥

ब्रह्मवैवर्त्ते ।

विद्या, दया, दमः, शौचं, सत्यमस्तेयता तपः ।
जितेन्द्रियत्वमक्रोधो लज्जा धर्म्म इति स्मृतः ॥

विष्णुधर्म्मोत्तरे।

तस्य द्वाराणि यजनं तपोदानं दया क्षमा।
ब्रह्मचर्य्यं तथा सत्यं तीर्थानुसरणं शुभम्॥
स्वाध्यायसेवा साधूनां सहवासः सुरार्च्चनम्।
गुरूणां चैव शुश्रूषा ब्राह्मणानाञ्च पूजनम्॥
इन्द्रियाणां यमश्चैव ब्रह्मचर्य्यममत्सरम्।
गङ्गास्नानं शिवो देवो विप्रपूजात्मचिन्तनम्।
ध्यानं नारायणस्यैतत् संक्षेपाद्धर्म्मलक्षणम्॥

दानमित्यनेन दानखण्डप्रतिपाद्यानाम् तीर्थानुसरणमित्यनेनापि तीर्थखण्डप्रतिपाद्यानाम् देवब्राह्मणपूजनमित्यनेनापि परिशेषखण्डप्रतिपाद्यानाम् देवतापूजनादिधर्म्माणां साधारणत्वं।

बृहस्पतिः।

दया, क्षमा, नसूया, च शौचा, नायास, मङ्गलम्।
अकार्पण्य, मस्पृहत्वं सर्व्वसाधारणानि च॥
परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा।
आपन्ने रक्षितव्यं तु दयैषा परिकीर्त्तिता॥
वाह्ये वाध्यात्मिके चैव दुःखे चौत्पातिके क्वचित्।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता॥
न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि।
नान्यदोषेषु रमते सानसूया प्रकीर्त्तिता॥
अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः।

स्वधर्म्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम् ॥
शरीरं पीड्यते येन सुशुभेनापि कर्म्मणा ।
अत्यन्तं तन्न कुर्व्वीत अनायासः स उच्यते ॥
प्रशस्ताचरणं नित्यमप्रशस्तविवर्ज्जनम् ।
एतद्धि मङ्गलं प्रोक्तं ऋषिभि स्तत्त्वदर्शिभिः ॥
स्तोकादप्युपकर्त्तव्यमदीनेनान्तरात्मना ।
अहन्यहनि यत् किञ्चित् अकार्पण्यं हि तत् स्मृतम् ॥
यथोपपन्ने सन्तोषः कर्त्तव्योऽत्यल्पवस्तुनि ।
परस्य चिन्तयन्नर्थं सास्पृहा परिकीर्त्तिता ॥

तदेवं निरूपिताः ।

षट् प्रकारा धर्म्माख्याः ।

अथ क्रमेण प्रतिपाद्यमुच्यते ।

प्रथमे व्रतखण्डेऽस्मिन्नादौ धर्म्मनिरूपणम् ।
परिभाषा व्रतानाञ्च प्रशंसा तदनन्तरम् ॥
व्रतानि प्रतिपन्मुख्यतिथीनां क्रमशस्तथा ।
नाना तिथि व्रतव्रात वार-तारा-व्रतानि च ॥
ततश्च योग-करण-संक्रान्ति-व्रतसंग्रहः ।
मासेषु नानामासर्त्तुवत्सरेषु व्रतान्यतः ॥
प्रकीर्णकव्रतानीह ततः शान्तिकपौष्टिकमिति ॥

इति प्रतिपाद्य संग्रहः ।

अथ श्रौत प्रवृत्ति साधनधर्म्म निरूपणम् ।

तत्र भगवती श्रुतिः ।

धर्म्मो विश्वस्य जगतः प्रतिष्ठा, लोके धर्म्मिष्ठं प्रजा उपसर्पन्ति, धर्म्मेण पापमपनुदति धर्म्मे सर्व्वं प्रतिष्ठितम्, तस्माद्धर्म्मं परमं वदन्तीति।

भविष्यत्पुराणे।

धर्म्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयलक्षणम् ॥

प्रथमश्रेयःशब्देनात्र श्रेयःसाधनं लक्ष्यते, श्रेयोऽभ्युदयलक्षणमिति श्रेयःशब्दस्याभ्युदयार्थत्वात्।

मनुः। विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।
हृदयेनाभ्यनुज्ञातो योधर्म्मस्तन्निवोधत ॥
'अद्वेषरागिभिः, अविहितरागद्वेषशून्यैः।
'हृदयेन निर्व्विचिकित्सिततया अभ्यनुज्ञातः
प्रतिपन्नो हृदयाभ्यनुज्ञातः।

आपस्तम्बः।

न धर्म्माधर्म्मौ चरत आवां स्व इति, न देवा न गन्धर्व्वा न पितर इत्याचक्षते, अयं धर्म्मो अयमधर्म्म इति, यं त्वार्य्याः क्रियमाणं प्रशंसन्ति स धर्मो यं विगर्हन्ति सोऽधर्म्मः।

विश्वामित्रः।

यथार्थं क्रियमाणं हि शंसन्त्यागमवेदिनः।
स धर्म्मो यं विगर्हन्ति तमधर्म्मं प्रचक्षते ॥

भृगुः। प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म्म वैदिकम्।
स्वर्गादौ सृजता सृष्टं ब्रह्मणा वेदरूपिणा ॥
प्रवृत्तसंज्ञको धर्म्मो गुणतस्त्रिविधोभवेत्।

सात्विको राजसश्चैव तामसश्चेति भेदतः ॥
काम्यबुद्ध्या च यत् कर्म्म मोक्षेऽपि फलवर्जितम् ।
क्रियते द्विज कर्म्मेह तत् सात्विक मुदाहृतम् ॥
मोक्षायेदं करोमीति सङ्कल्प्य क्रियते तु यत् ।
तत् कर्म्म राजसं ज्ञेयं न साक्षान्मोक्षकृद्भवेत् ॥
कार्य्यबुद्ध्यानपेक्षं यत् कर्म्मविध्यनपेक्षया ।
क्रियते द्विजवर्य्येह तत्तामसमुदाहृतम् ॥

वाराह पुराणे महातपा उवाच ।

अथोत्पत्तिं प्रवक्ष्यामि धर्म्मस्य महतीं नृप ।
माहात्म्येन समायुक्तं विस्तरेण नराधिप ॥
पूर्व्वं ब्रह्माव्ययः शुद्धः परात्परसंज्ञितः ।
स सिसृक्षुः प्रजास्त्वादौ पालनं तासु चिन्तयन् ॥
तस्य चिन्तयतस्त्वङ्गाद्दक्षिणाङ्गात् सकुण्डलः ।
प्रादुर्ब्बभूव पुरुषः श्वेतमाल्यानुलेपनः ॥
तं दृष्ट्वोवाच भगवांश्चतुष्पादं वृषाकृतिम् ।
पालयेमाः प्रजाः पुत्र त्वं ज्येष्ठो जगतो भव ॥
इत्युक्तः स समुत्तस्थौ चतुष्पादः कृते युगे ।
त्रेतायां स त्रिभिः पादैर्द्वाभ्यां वै द्वापरेऽभवत् ॥
कलावेकेन पादेन प्रजाः पालयते विभुः ।
षड्भेदा ब्राह्मणानां स त्रेधा क्षत्रे व्यवस्थितः ॥
द्विधा वैश्येषु शूद्रेषु त्वेकधा जगतः प्रभुः ।
रसातलेषु सर्व्वेषु द्वापरेषु स्वयम्भुवः ॥

चतुःशृङ्ग स्त्रिपाच्चैव द्विशिराः सप्तहस्तवान् ।
त्रिधैव बद्धो विप्राणां सुखगः पालयन् प्रजाः * ॥

ब्रह्मवैवर्त्ते ।

गोषु विप्रेषु वेदेषु वह्निष्वथच साधुषु ।
सुहृत्सु श्रीनिवासेषु तथाचासौ विशेषतः ॥
सतीषु सत्येषु च तथा दानशीलेषु तिष्ठति ।
शुद्धसत्त्वमयः श्रीमान् सप्तलोकसमाश्रयः ।
भविष्यति मनुष्येषु नातिरिक्तः कदाचन ॥

अथ फलतो धर्म्मनिरूपणम् ।

प्रवृत्तसंज्ञके धर्म्मे फलमभ्युदयो मतः ।
निवृत्तसंज्ञके धर्म्मे फलं-निःश्रेयसमतम् ॥

महाभारते ।

विद्या, वित्तं वपुः शौर्य्यं कुले, जन्म विरोगिता ।
संसारोच्छित्तिहेतुश्च धर्म्मादेव प्रकीर्त्तितः † ॥
शब्दे स्पर्शेच रूपे च रसे गन्धेच भारत ॥
प्रभुत्वं लभते जन्तु धर्म्मादेतत् फलं विदुः ॥
तथा । अर्थसिद्धिं परामिच्छन् धर्म्ममेवादितश्चरेत् ।
नहि धर्म्मादृतेनैश्वर्य्यं-स्वर्गलोकादि वा मृतम् ॥

---

* जगदिति क्वचित् पाठः ।

† प्रवर्त्तते इति क्वचित् पाठः ।

धर्म्मं चिन्तयमानोऽपि यदि प्राणैर्व्विमुच्यते ।
ततः स्वर्गमवाप्नोति धर्म्मस्यैतत् फलं विदुः ॥
यथाधर्म्मेण ते सत्या येऽधर्म्मेण धिगस्तु तान् ।
धर्म्मं हि शाश्वते लोके न जह्याद्धनकाङ्क्षया ॥
ऊर्द्ध्वबाहुर्व्विरौम्येष नच कश्चि च्छृणोति मे ।
धर्म्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥
उत्सवादुत्सवं यान्ति स्वर्गात् स्वर्गं सुखात्सुखम् ।
श्रद्दधानाश्च शान्ताश्च धनाढ्याः शुभकारिणः ॥
धर्म्मः प्रज्ञां वर्द्धयति क्रियमाणः पुनः पुनः ।
वृद्धप्रज्ञास्ततोनित्यं पुण्यमारभते नरः ॥

स्कान्दपुराणे ।

धर्म्मात्सुखञ्च ज्ञानञ्च यस्मादुभयमाप्नुयात् ।
तस्मात्सर्व्वं परित्यज्य विद्वान् धर्म्मं समाचरेत् ॥

कूर्म्म पुराणे ।

धर्म्मात् सञ्जायते ह्यर्थो धर्म्मात् कामोऽभिजायते ।
धर्म्मादेव परं ब्रह्म तस्माद्धर्म्मं समाश्रयेत् ॥

आह वेदव्यासः ।

कामार्थौ लिप्समानस्तु धर्म्ममेवादितश्चरेत् ।
नहि धर्म्मादृते किञ्चिद्दुष्प्रापमिति मे मतिः ॥
निपानमिव मण्डूका रसपूर्णमिवाण्डजाः ।
शुभकर्म्माण मायान्ति विवशाः सर्व्वसम्पदः ॥

स्कन्दपुराणे।

धर्म्माद्राज्यन्धनं सौख्यमधर्म्माद्दुःखसम्भवः।
तस्माद्धर्म्मं सुखार्थाय कुर्य्यात् पापञ्च वर्ज्जयेत्॥
लोकद्वयेऽपि यत् सौख्यं तद्धर्म्मात् प्राप्यते यतः।
धर्म्ममेकमतः कुर्य्यात् सर्व्वकामार्थसिद्धये॥
यः कर्म्म धर्म्मसंयुक्तं मनसापि विचिन्तयेत्।
स वर्द्धते यथा बातः शुक्लपक्ष इवोडुराट्॥
दीर्घकालेन तपसा सेवितेन तपोवने।
धर्म्मनिर्द्धूतपापानां संसिध्यन्ति मनोरथाः॥
धर्म्मवृद्धौ च वर्द्धन्ते सर्व्वभूतानि सर्व्वदा।
तस्मिन्नसति हीयेत तस्माद्धर्म्मं विवर्द्धयेत्॥
मनुः। श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्॥
एक एव सुहृद्धर्म्मो निधनेप्यनुयाति यः।
शरीरेण समं नाशं सर्व्वमन्यद्धि गच्छति॥
तस्माद्धर्म्मं सहायार्थं नित्यं सञ्चिनुयाच्छनैः।
धर्म्मेण हि सहायेन तमस्तरति दुस्तरम्॥

महाभारते।

धर्म्मो माता पिताचैव धर्म्मो बन्धुः सुहृत्तथा।
धर्म्मो भ्राता सखाचैव धर्म्मः स्वामी परन्तपः॥
नास्ति धर्म्मसमो बन्धुर्नास्ति धर्म्मसमः सुहृत्।
नास्ति धर्म्मसमो लाभो नास्ति धर्म्मसमा गतिः॥

तस्माद्धर्म्मः सहायत्वे सेवितव्यः सदा नृभिः ॥
धर्म्मः सतां गतिः पुंसां धर्म्मश्चैवाश्रयः सताम् ।
धर्म्मोलोकाश्रयस्तात: प्रवृत्तः सचराचरम् ॥

याज्ञवल्क्यः ।

कर्म्मणा मनसा वाचा यत्नाद्धर्म्मं समाचरेत् ॥
मनुः । धर्म्म एव हतोहन्ति धर्म्मो रक्षति रक्षितः ।
तस्माद्धर्म्मो न हन्तव्यो मा नो धर्म्मो हतोवधीत् ॥

महाभारते ।

बाल एव चरेद्धर्म्ममनित्यञ्जीवितं*यतः ।
फलानामिव पक्वानां शश्वत्पतनतोभयम् ॥
न कामान्नच संरम्भा न्नोद्वेगाद्धर्म्ममुत्सृजेत् ।
धर्म्म एव परे लोक इह चै वाश्रयः सताम् ॥
तथा । इदञ्च त्वामपरं ब्रवीमि पुण्यप्रदं तात महाविशिष्टं ।
न जातु कामान्नभयान्नलोभा द्धर्म्मञ्जह्याज्जीवितस्यापि हेतोः ।
व्यासः । धर्म्मादपेतं यत् कर्म्म यद्यपि स्यान्महाफलम् ।
न तत् सेवेत मेधावी शुचिः कुशतिलं यथा ॥
सुदुर्ल्लभमिदं † प्राप्य मानुष्यं लोकमध्रुवं ।
न कुर्य्यादात्मनः श्रेय स्तेनास्मात् वञ्चितश्चिरम् ॥
तृणपत्राग्रगाम्यम्बुबिन्दुवच्चपले यतः ।
जीवितम्बा धन विप्रा स्तस्माद्धर्म्मं समाचरेत् ॥

---

* अनुजीवितमिति क्वचित् पाठः ।

† नरमिति क्वचित् पाठः ।

महाभारते।

एकस्मिन्नप्यतिक्रान्ते दिवसे धर्म्मवर्ज्जिते।
दस्युभिः मुषितस्येव युक्तमाक्रन्दितुञ्चिरम्॥
अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्।
गृहीतइव केशेषु मृत्युना धर्म्ममाचरेत्॥
यस्य त्रिवर्गशून्यस्य दिनान्यायान्ति यान्ति च।
स लोहकारभस्त्रेव स सन्नपि न जीवति॥
तस्मात् सर्व्वात्मना धर्म्मं नित्यमेव समाचरेत्।
मा धर्म्मविमुखः प्रेत्य तमस्यन्धे पतिष्यति॥
नावसीदति चेद्धर्म्मः कपालेनापि जीवता।
आढ्योऽस्मीत्येव मन्तव्यं धर्म्मवित्ता हि साधवः॥

मत्स्यपुराणे।

अनित्यं जीवितं यस्माद्वसु चातीव चञ्चलम्।
केशेष्विव गृहीतस्तु मृत्युना धर्म्ममाचरेत्॥

आदित्यपुराणे।

मानुष्यं यः समासाद्य स्वर्गमोक्षप्रदायकम्।
द्वयोर्न साधयत्येकं स मृतस्तप्यते चिरम्॥
यावत्स्वास्थ्यशरीरत्वन्तावद्धर्म्मं समाचरेत्।
अस्वास्थ्यश्चोदितोऽनान्यत् किञ्चित्कर्त्तुं समुत्सहेत्॥
विष्णुः। युवैव धर्म्ममन्विच्छेदनित्यं जीवितं यतः।
कृते धर्म्मे भवेत् कीर्त्तिरिह प्रेत्य च वै सुखं॥

यथेक्षुहेतोरपि सेवितं * पय
स्तृणानि वल्लीरपि च प्रसिञ्चति ।
तथा नरो धर्म्मपथेन सञ्चरन्
सुखञ्च कामांश्च वसूनि चाश्नुते ॥

अथ प्रमाणतो धर्म्मनिरूपणम् ।

तत्र मनुः । वेदोऽखिलो धर्म्ममूलं स्मृति शीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥
विधिर्व्विधेयस्तर्कश्च वेदषड़ङ्गानि चेति ।

विधिरज्ञातज्ञापको वेदभागः, विधेयोमन्त्रः, तर्कोमीमांसा ।

अङ्गान्याह देवलः ।

शिक्षा-व्याकरण-निरुक्त-छन्दः कल्प-ज्योतींषीति वेदाङ्गानि । शुचौ तु चरिते शीलमित्याचारस्यैव शीलत्वाभिधानात् कथं पृथगुपादानम् । न आचार्य्यानुष्ठानलक्षणक्रियारूपत्वादाचारस्य स्वरूपविशेषत्वाच्छीलस्य व्यक्त एव भेदः । शुचौ तु-चरिते शीलमिति शीलस्य चरितविशेषहेतुत्वादुपचारेण चरितत्वाभिधानम् । अथ शीलं कस्य धर्म्मतां प्रमापयति । आत्मन एव पुरुषविशेषस्वभावोऽन्यथानुपपद्यमानः स्वस्य श्रेयःसाधनतां वोधयति । तथा च ब्राह्मण्यतेत्यादिहारीतवचने भावप्रत्ययान्ततयाभिधानं शीलस्य क्रियाव्यतिरेकिता वोधयन् स्वभावतामेव ज्ञापयति यदाह हारीतः । ब्रह्मण्यता, देवपितृ-

---

* प्रेषितमिति क्वचित् पाठः ।

भक्तता, सौम्यता अपरोपतापिता, अनश्लीलता* मृदुता, अपारुष्यं, मित्रता, प्रियवादित्वम् कारुण्यं कृतज्ञता-शरण्यता प्रशान्तिश्चेति त्रयोदशविधं शीलं, आचारे विवाहादौ कङ्कणबन्धनाद्यनुष्ठानादात्मतुष्टिरत्र धर्म्मसन्देहे वैदिकसंस्कारवासितान्तःकरणानां साधूनामेकत्र पक्षे मनःपरितोषः।

याज्ञवल्क्यः।

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक् सङ्कल्पजः कामो धर्म्ममूलमिदं स्मृतम्॥
पुराणं न्यायमीमांसा धर्म्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्द्दश॥

विष्णुपुराणे।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्म्मशास्त्रं पुराणञ्च विद्याह्येताश्चतुर्द्दश॥
आयुर्व्वेदो-धनुर्व्वेदो-गान्धर्व्व-श्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्याह्यष्टादशैव ताः॥

दृष्टार्थानामपि चतसृणा-क्वचिदलौकिकार्थप्रतिपादनाद्धर्म्मप्रमाणभावः। शङ्खलिखितौ। स्मृतयो धर्म्मशास्त्राणि तेषां प्रणेतारो मनु-विष्णु-यम-दक्षां-गिरोत्रि-वृहस्प-त्युशन-आपस्तम्ब-वशिष्ठ-कात्यायन--पराशर-व्यास-शङ्ख--लिखित-सम्वर्त्त-गौतम-शातातप-हारीत-याज्ञवल्क्य प्राचेतसादयः॥

---

* अनसूयतेति क्वचित् पाठः।

यमः । मनुर्यमोवसिष्ठोऽत्रिः दक्षो विष्णुस्तथाङ्गिराः ।
उशना वाक्पति-र्व्यास आपस्तम्बोऽथ गौतमः ॥
कात्यायनो नारदश्च याज्ञवल्क्यः पराशरः ।
संवर्त्तश्चैव शङ्खश्च हारीतो लिखितस्तथा ॥
एतैर्यानि प्रणीतानि धर्म्मशास्त्राणि वै पुरा ।
तान्येवातिप्रमाणानि न हन्तव्यानि हेतुभिः ॥

आदिशब्दाच्च बुध-देवल-सोम-जमदग्नि-प्रजापति-विश्वामित्र-वृद्ध-शातातप-पैठीनसि-पितामह-बौधायन-छागलेय-जाबालि-च्यवन-मरीचि-कश्यपाः ।

तथाहि भविष्यत्पुराणे ।

अष्टादशपुराणेषु यानि वाक्यानि पुत्रक ।
तान्यालोच्य महाबाहो तथा स्मृत्यन्तरेषु च ॥
मन्वादिस्मृतयो याश्च षड्विंशत् परिकीर्त्तिताः ।
तासां वाक्यानि क्रमशः समालोक्य ब्रवीमि ते इति ॥

मन्वादिस्मृतीनां षड्विंशत्वमुक्तम्, तच्चानन्तरोक्ताभिरेव पूर्य्यते । यानि पुनर्महाभारत-रामायण-विष्णुधर्म्म-शिवधर्म्म-प्रभृतीनि गृह्यपरिशिष्टानि च तानिच स्मृत्यन्तरेषुचेत्यनेनैवोक्तानि ।

तथा चोक्तं भविष्यत्पुराणे ।

अष्टादश पुराणानि रामस्य चरितं तथा ।
विष्णुधर्म्माणि * शास्त्राणि शिवधर्म्माश्च भारत ॥

---

* वायवीयश्चेति क्वचित् पाठः ।

कार्ष्णञ्च पञ्चमोवेदो यन्महाभारतं स्मृतम्।
सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते ॥
जयेति नाम चै तेषां प्रवदन्ति मनीषिण इति ॥

तदपि स्मृत्य-न्तरेषुचैवेत्यनेनैव परिगृहीतं वेदितव्यम् एवं यच्चान्यदप्यविगीतमहाजनपरिगृहीतं यदपि स्मृत्यन्तरेषु चेत्य नेणैव परिगृहीतं वेदितव्यं।

वशिष्ठः।

श्रुति स्मृति विहितो धर्म्मस्तदलाभे शिष्टाचारः प्रमाणं।
तथा। पारंपर्य्यागतोयेषां वेदः स परिवृंहणः।
विशिष्टा ब्राह्मणा ज्ञेया श्रुतिप्रत्यक्षहेतवः॥

पुराणलक्षणमुच्यते।

मत्स्य पुराणे।

सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥

विष्णुपुराणे।

अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते।
ब्राह्म-म्माद्यं वैष्णवञ्च शैवं भागवतं तथा॥
तथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम्।
आग्नेयमष्टमञ्चैव भविष्यन्नवमं स्मृतम्॥
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्।
वाराहं * द्वादशञ्चैव स्कान्दञ्चैव त्रयोदशम्॥

* विष्णु धर्म्मेति क्वचित् पाठः।

चतुर्द्दशं वामनञ्च कौर्म्मं पञ्चदशं स्मृतम् ।
मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततः परम् ॥

कूर्म्मपुराणे ।

अन्यान्युपपुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ॥
तृतीयं नान्दमुद्दिष्टं कुमारेण तु भाषितम् ।
चतुर्थं शिवधर्म्माख्यं *साक्षान्नन्दीशभाषितम् ॥
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम् ।
कापिलं मानवञ्चैव† तथैवोशनसेरितं ॥
ब्रह्माण्डं वारुणञ्चैव कालिकाह्वयमेव च ।
माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्चयम् ॥
पराशरोक्तं प्रथमं तथा भागवतद्वयम् ।
इदमष्टादशं प्रोक्तं पुराणं कौर्म्ममुत्तमम् ॥
वेदार्थवित्तमैः कार्य्यं यः स्मृतं मुनिभिः पुरा ।
स ज्ञेयः परमोधर्म्मोनान्यशास्त्रेषु संस्थितः ॥
या वेदवाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्व्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥

मत्स्यपुराणे ।

पाद्मे पुराणे यत् प्रोक्तं नरसिंहोपवर्णनम् ।
तत्राष्टादशसाहस्रं नारसिंह मिहोच्यते ॥

---

* नन्दिकेश्वर युग्मञ्चेति क्वचित् पाठः ।

† मारीचञ्चैवेति क्वचित् पाठः ।

नन्दाया यत्र माहात्म्यं कार्त्तिकेयेन वर्ण्यते ।
नन्दीपुराणं तल्लोके नन्दाख्यमिति कीर्त्यते ॥
यत्र-साम्बं-पुरस्कृत्य भविष्यति कथानकम् ।
प्रोच्यते तत्पुनर्लोके साम्बमेव शुचिव्रताः ॥
एवमादित्यसंज्ञञ्च तत्रैव परिगद्यते ॥
अष्टादशभ्यस्तु पृथक् पुराणं यत्तु दृश्यते ।
विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतं ॥

कालिका पुराणे ।

शैवं यद्वायुना प्रोक्तं वैरिञ्चिं सौरं मेवच ।
यदिदं कालिकाख्यं यत् मूलं भागवतं स्मृतम् ॥

देवलः । आर्षाः पूर्ववृत्तान्ताश्रयाः प्रवृत्तिफला इतिहासः ।

मनुः । प्रत्यक्षमनुमानञ्च * शाब्दञ्च विविधागमं ।
त्रयं सुविदितं कार्य्यं धर्म्मशुद्धिमभीप्सता ॥

मनुः । आर्षन्धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केण तु सन्धत्ते † स धर्म्मं वेद नेतरः ॥

तर्केण मीमांसादिना ।

व्यासः । धर्म्मशुद्धिमभीप्सद्भिर्न वेदादन्यदिष्यते ।
धर्म्मस्य कारणं शुद्धं मिश्रमन्यत् प्रकीर्त्तितम् ॥
अतः स परमोधर्म्मो यो वेदादवगम्यते ।
अवरः स तु विज्ञेयो यः पुराणादिषु संस्थितः ॥
एतेभ्योऽपि यदन्यस्मात् किञ्चिद्धर्म्माभिधायकम् ।
तच्च दूरतरं विद्धि मोहस्तस्याश्रयोमतः ॥

---

* शाब्दवेति क्वचित् पाठः ।

† यस्तर्केणानुसन्धत्ते इति क्वचित् पाठः ।

शङ्खलिखितौ ।

रागद्वेषाग्निदग्धानां मग्नानां विषयाम्भसि ।
चिकित्सा सर्व्वशास्त्राणि व्याधीनामिव भेषजम् ॥

भविष्यत्पुराणे ।

सुमन्तुरुवाच ।

शृणुष्वेदं महाबाहो भविष्यत् पञ्चलक्षणं ।
यत् श्रुत्वा मुच्यते राजन पुरुषो ब्रह्महत्यया ॥
यान्यनेकत्र वै पञ्च कीर्त्तितानि स्वयम्भुवा ।
प्रथमं कथ्यते ब्राह्मं-द्वितीयं वैष्णवं स्मृतम् ॥
तृतीय-त्वाष्ट्रं * व्याख्यातं चतुर्थं भाष्यमुच्यते ।
पञ्चमं प्रतिभाष्यञ्च सर्व्वलोकेषु पूजितम् ॥

हारीतः ।

अज्ञानतमसान्धानां भ्रामितानान्तु दृष्टिभिः ।
धर्म्मशास्त्रप्रदीपोऽयं धार्य्यो मार्गानुदेशकः ॥

शातातपः ।

श्रुति स्मृति स्तु विप्राणां चक्षुषी द्वे प्रकीर्त्तिते ।
काणस्तत्रैकहीनस्तु द्वाभ्यामन्धः प्रकीर्त्तितः ॥

यमपुराणे । †

---

* तृतीयं चैवेति क्वचित् पाठः ।

† पद्मपुराणे क्वचित् पाठः ।

बहुत्वादिह शास्त्राणां धर्म्ममूलं श्रुतिस्मृती।
इतिहासपुराणानि तस्मात्तेषु मनः कृथाः॥

शङ्ख लिखितौ।

वेदा वै विप्रकीर्णत्वाद्दुर्ज्ञेया धर्म्मसाधनम्।
सुबोधात्तत्समर्थां हि ब्रह्मणा विहिता श्रुतिः॥
श्रुति स्मृत्युदितान् धर्म्मान् मानवास्तान् पृथक् पृथक्।
कुर्व्वंतः प्राप्नुयुर्द्धर्म्ममन्यथा नरके गतिः॥
श्रौतं स्मार्त्तं क्रियावाक्यं हेतुभिर्यो विघातयेत्।
असच्छास्त्रमुपाश्रित्य स ज्ञेयः शिष्टनिन्दितः॥

महाभारते।

इतिहास पुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदोमामयं प्रतरिष्यति *॥
धर्म्मशास्त्राणि वेदाश्च षड़ङ्गानि नराधिप।
श्रेयसोऽर्थं विधीयन्ते नरस्याक्लिष्टकर्म्मणः॥

व्यासः। श्रुतिस्मृती द्विजातीनां पुरुषार्थप्रसाधिके।
इतिहास पुराणञ्च प्रमाणं धर्म्मनिश्चयः॥

यमः। वेदाः प्रमाणं स्मृतयः प्रमाणम्
धर्म्मार्थयुक्तं वचनं † प्रमाणम्।
यस्य प्रमाणं न भवेत् प्रमाणम्
कस्तस्य कुर्य्याद्वचनं प्रमाणम्॥

---

* प्रहरिष्यतीति क्वचित्पाठः।

† धर्म्मार्थसंयुक्तवचः प्रमाणमिति क्वचित् पाठः।

न यस्य वेदा न च धर्म्मशास्त्रं
न वृद्धवाक्यञ्च भवेत् प्रमाणम् ।
स धर्म्म कार्य्याग्निहती दुरात्मा
न सोऽपि तस्येह भवेत् प्रमाणम् ॥

विष्णुधर्म्मोत्तरे ।

शाङ्ख्यं योगं पञ्चरात्रं वेदाः पाशुपतं तथा ।
कृतान्तं पञ्चमं विद्धि ब्रह्मणः परिमार्गणे ॥
संसारक्षयदः* स्वर्गभावोपकरणेषु च ।
सेतुरावैष्णवाद्धर्म्मा सारमेतत् प्रकीर्त्तितम् ॥
एतावानेव सकलो वेदमार्ग उदीरितः ।
आभ्यः प्रशस्ताश्चैवान्याः शतशोऽथ सहस्रशः ॥

अथ निमित्ततो धर्म्मनिरूपणम् ।

शङ्खलिखितौ ।

तत्र धर्म्म लक्षणानि ।

देशः काल उपायो द्रव्यं श्रद्धा पात्रन्त्याग इति । समस्तेषु धर्म्मोदयः साधारणोऽन्यथा विपरीतः श्रद्धापात्रसपन्नो धर्म्मः कालः संक्रान्त्यादिः श्रद्धा द्रव्योत्पत्तिरिति कालस्तन्मूलो देशः देशोब्रह्मावर्त्तादिः ।

उपाय इति कर्त्तव्यता, द्रव्यं स्ववृत्त्युपार्जितं-श्रद्धा आस्तिक्य बुद्धिः ।

पात्रं विद्यात्रयोसम्पन्नं, एषु साधारणधर्म्मोत्पत्तिः ।

* संसारक्षयदे इति क्वचित् पाठः ।

अन्यथा धर्म्मामुदयः ।

अथाद्रव्योत्पत्तिरिति काल इति अयमपि संक्रान्त्यादिव-हानादौ धर्म्मकालः। तस्य लोदेशइति। एवम्भूत काल संपन्नो देशोऽपि धर्म्मस्य सम्पादयितेत्यर्थः ॥

अथ देशनिरूपणं तावत् प्रस्तूयते ।

तत्र मार्कण्डेय पुराणे ।

भगवन् कथितस्त्वेष जम्बुद्वीपः समासतः ।
यदेतद्भवता प्रोक्तं कर्म्म नान्यत्र पुण्यदम् ॥
पापदञ्चा महाराज वर्ज्जयित्वा तु भारतम् ।
इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते ॥
न खल्वन्य मनुष्याणां भूमौ कर्म्म विधीयते ।
योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरात् ॥
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्मृताः ।
दक्षिणे मलयोगस्य हिमवानुत्तरे तथा ॥
तदेतद्भारतं वर्षं सर्व्वबीजं द्विजोत्तम ।
ब्रह्मत्व, ममरेशत्वं देवत्वमपि दुर्ल्लभम् ॥
मृगपश्वौषधि चराद्योनिस्तद्वदतोऽश्नुते ।
स्थावराणाञ्च सर्व्वेषा मतो ब्रह्मन् शुभाशुभे ॥
प्रयान्ति कर्म्मभूर्ब्रह्मन्नान्यलोकेषु विद्यते ।
स्वर्गा, पवर्ग, प्राप्तिश्च पुण्यं पापञ्च * वै तथा ॥

* तथैव चेति क्वचित ।

देवानामपि विप्रर्षे सदैवैष मनोरथः ।
अपि मानुष्यमाप्स्यामो देवत्वात् प्रच्युताः क्षितौ ।
मनुष्यः कुरुते यत्तत्तन्न शक्यं सुरासुरैः ॥

विष्णुपुराणे ।

उत्तरञ्च समुद्रस्य हिमाद्रेश्चैव दक्षिणं ।
वर्षं यद्भारतं नाम भारती यत्र सन्ततिः ॥
अत्र जन्म सहस्राणां सहस्रैरपि सत्तम ।
कदाचिल्लभते जन्तुर्म्मानुष्यं-पुण्यसञ्चयात् ॥

गायन्ति देवाः किल गीतकानि
धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्म्माण्य संकल्पिततत् फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममही-मनन्ते
तस्मिन् लयं ये त्वमलाः प्रयान्ति ॥

भविष्यत् पुराणे ।

ब्रह्मावर्त्तात् परो देशः ऋषिदेशस्त्वनन्तरम् ।
मध्यदेशस्ततोन्यून आर्य्यावर्त्तस्त्वनन्तरम् ॥
नञ ईषदर्थे अनन्तरः ईषन्न्यून इत्यर्थः ।

मनुः । सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देव निर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥

कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसेनिकाः * ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ॥

मत्स्यो, विराटदेशः, पञ्चालाः कान्यकुब्जादिदेशाः, शूरसेनिका मथुरादेशः ।

हिमवद्विन्ध्ययोर्मध्ये यत् प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः † ॥
विनशनं कुरुक्षेत्रम् ।
आसमुद्रात्तु वै पूर्व्वादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरङ्गिर्य्योरार्य्यावर्त्तं विदुर्ब्बुधाः ॥
कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो ‡ यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥
एतान् द्विजातयो देशान् संश्रयेरन् प्रयत्नतः ।
शूद्रस्तु यस्मिन् कस्मिन् वा निवसेद्वृत्तिकर्षितः ॥
एष धर्म्मस्य वो योनिः समासात् कथितः किल ¶ ।
सर्व्वपापहरः पुण्यः साधनं सर्व्वकर्म्मणाम् ॥

वसिष्ठः । धर्म्म आर्य्यावर्त्त प्रागादर्शात् प्रत्यागालोकाचलादुदक् कुमारिकाया दक्षिणेन हिमवत, उत्तरेण विन्ध्याद्रेर्ये धर्म्मायेचारास्ते सर्व्वे प्रत्येतव्याः नत्वन्ये प्रतिलोमकधर्म्माः एनमार्य्यावर्त्तमित्याचक्षते गङ्गायमुनयोरन्तरालमप्येके यावद्वा कृष्णमृगो विचरति तावद्ब्रह्मवर्च्चसम् ।

---

* सुरसेनका इति क्वचित् पाठः ।

† उदाहृत इति क्वचित् पाठः ।

‡ याज्ञिक इति क्वचित् पाठः ।

¶ समासेन प्रकीर्त्तिता सम्भवश्चास्य सर्व्वस्य वर्णधर्म्माश्चिरेभत इति क्वचित् पाठः ।

पैठीनसिः ।

आहिमवत आकुमार्य्याः * सिन्धुवैतरणी नदी सूर्य्यस्योदगयनं पुनः यावद्वा कृष्णमृगो विचरति तत्र धर्म्मश्चतुष्पादो भवति ।

संवर्त्तः । स्वभावाद्यत्र चरति कृष्णसारः सदा मृगः ।
धर्म्मदेशः स विज्ञेयो द्विजानां धर्म्मसाधनम् ॥

व्यासः । सर्व्वे शिलोच्चयाः पुण्याः सागराः सरितस्तथा ।
अरण्यानि च पुण्यानि विशेषान्नैमिषन्तथा ॥

देवीपुराणे ।

देशो. नदा, गया शैल, गङ्गानर्म्मद, पुष्करम् ।
वाराणसी कुरुक्षेत्रं प्रयागो जम्बुकेश्वरः ।
केदारं भीमनादश्च कुण्डकं पुष्कराह्वयम् ।
सोमेश्वरं-महापुण्यं तथा चामरकण्टकम् ॥
कालिञ्जरं तथा विन्ध्यं यत्र वासोगुहस्य च ।
सर्व्वे शिवाश्रमाः पुण्याः सर्व्वा नद्यः शुभप्रदाः ॥
दान-स्नानो-पवासा-वै फलदाः सततं नृणाम् ।

विष्णुः । चातुर्व्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते ॥
तं म्लेच्छदेशं-जानीयादार्य्यावर्त्तस्ततः परम् ।

बौधायनः ।

आनर्त्तकाङ्गमगधाः सुराष्ट्रा दक्षिणापथः ।
तथा च सिन्धु, सौवीरा एते सङ्कीर्णयोनयः ॥

* मधुवैतरणीति क्वचित् पाठः ।

आनर्त्तकः ।

यस्मिन् देशे यास्काः* ।

तथा, पङ्गां स कुरुते पापं यः कलिङ्गान् प्रपद्यते ।
ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविः ॥

अथ श्रद्धानिरूपणम् ।

आह भगवती श्रुतिः ।

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः ।
श्रद्धा भगस्य मूर्द्धनि वचसा वेदयामसीत्यादिः ॥

मनुः । श्रद्धा पूतं वदान्यस्य हतमश्रद्धयेतरत् ।
श्रद्धयेष्टञ्च पूर्त्तं च नित्यं कुर्य्यात् प्रयत्नतः ॥

वह्नि पुराणे ।

श्रद्धा पूर्व्वाः सर्व्वधर्म्माः श्रद्धामध्या,न्त,संस्थिताः ।
श्रद्धानिष्ठाः प्रतिष्ठाश्च धर्म्माः श्रद्धैव कीर्त्तिताः ॥
श्रुतिमात्ररसाः सूक्ष्माः प्रधानपुरुषेश्वराः ।
श्रद्धामात्रेण गृह्यन्ते न करेण न चक्षुषा ॥
कायक्लेशैर्नबहुभिर्नचैवार्थस्य राशिभिः ।
धर्म्मः संप्राप्यते सूक्ष्मः श्रद्धा हीनैः सुरैरपि ॥
श्रद्धा धर्म्मः परः सूक्ष्मः श्रद्धा ज्ञानं परन्तपः ।
श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्व्वमिदं जगत् ॥

---

* यस्मिन् देशे द्वारका इति क्वचित् पाठः ।

सर्व्वस्वञ्जीवितं वापि दद्यादश्रद्धया यदि ।
नाप्नुयात् सकलं किञ्चित् अश्रद्दधानस्ततो भवेत् ॥

व्यास: । श्रद्धा वै सात्त्विकी देवी सूर्य्यस्य दुहिता नृप ।
सावित्री प्रसवित्री च विश्वसञ्जीवनी तथा ॥

स्कन्द पुराणे ।

श्रद्धा मातेव जननी ध्यानस्य सुकृतस्य च ।
तस्माच्छ्रद्धां समुत्पाद्य ध्यानं सुकृतमर्ज्जयेत् ॥

महाभारते ।

श्रद्धा धर्म्मसुता देवी पाविनी विश्वधारिणी ।
श्रद्धया साध्यते धर्म्मो महद्भि* र्नार्थराशिभिः ॥
निष्किञ्चना हि मुनयः श्रद्धापूता दिवङ्गताः ।
धर्म्मार्थ-काम-मोक्षाणां श्रद्धा परमकारणम् ।
पुंसामश्रद्दधानानां न धर्मो नापि तत् फलम् ॥
तथाक्रिया श्रद्दधानोदाता प्राज्ञोऽनसूयकः ।
धर्म्माधर्म्मविशेषज्ञस्तमस्तरति दुस्तरम् ॥

कालादीनि तु दानखण्डे वक्ष्यामः ।
तेषां तत्रोपयुक्ततमत्वात् ।

अथ परिभाषा ।

भविष्यत् पुराणे ।

सम्यक् संसाधनं कर्म्म कर्त्तव्य मधिकारिणा ।
निष्कामेन महावीर काम्यं कामान्वितेन च ॥

---

* बहुभिरिति क्वचित्पाठः ।

आचारयुक्तः श्रद्धावान् वेदज्ञोध्यात्मवित्तमः।
कर्म्मणां फलमाप्नोति न्यायार्जितधनश्च यः॥

सम्यक् प्रथमकल्पादिना, संसाधनं यथाविहितं साधनम्। अधिकारिणा,थिना,समर्थेन, विदुषा च, अध्यात्मवित्तमः परलोक फलभागिन्यात्मनि दृढप्रत्ययवान्।

'न्यायार्जितधनः' स्ववृत्त्यार्ज्जितधनः॥

आपस्तम्वः॥

प्रयोजयिता नुमन्ता कर्त्ता चेति स्वर्गनरकफलेषु भागिनः
यो भूय आरभते तस्मिन् फलविशेषः।

याज्ञवल्क्यः।

विधिदृष्टन्तु यत् कर्म्म करोत्यविधिना तु यः।
फलं न किञ्चिदाप्नोति क्लेशमात्रं हि तस्य तत्॥

मनुः॥ प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्म्मते र्व्विद्यते फलम्॥

छन्दोगपरिशिष्टे।

कात्यायनः।

अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कामचारिणाम्।
अक्रिया च परोक्ता या तृतीया चायथाक्रिया
स्वशाखाश्रेष मुत्सृज्य परशाखाश्रयश्च यः
कर्त्तुमिच्छति दुर्म्मेधा मोघं तस्य तु यत् फलम्
यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत्।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादि कर्म्मवत्।
अग्निहोत्रं, यजुर्वेदशाखास्तु विहितं यथा॥

छन्दोगप्रभृतिभिरनुष्ठीयते ।

गृह्यपरिशिष्टे ।

यद्वाल्पं वा स्वगृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतोभवेत् ॥

तथा । प्रवृत्तमन्यथा कुर्य्याद्यदि मोहात् कथञ्चन ।
यतस्तदन्यथा भूतं तत एव समापयेत् ॥

प्रवृत्तमारब्धम् अन्यथा भूतं क्रमाद्यन्यत्वेन यद्वैपरीत्यमापन्नम ॥

समाप्ते यदि जानीयान्मयैतदन्यथा कृतम्* ।
तावदेव पुनः कुर्य्यात् नावृत्तिः सर्व्वकर्म्मणः ॥

एतत्तु कर्म्मसमाप्तावन्यथाकरणज्ञानविषयम् ।

प्रधानस्या क्रिया यत्र साङ्गं तत् क्रियते पुनः ।
तदङ्गस्याक्रियायां तु नावृत्ति र्नैच तत्क्रिया ॥

यत्र प्रधानस्य कर्म्मणोऽकरणं तत्साङ्गमेव पुनः कर्त्तव्यम्, तदङ्गाकरणे तु न साङ्गप्रधानावृत्तिर्नापि तावन्मात्रस्याङ्गस्य करणं किन्तु प्रायश्चित्तमेव कार्य्यम् ।

हारीतः ।

अङ्गुष्ठस्योत्तरतोरेखा ब्रह्मतीर्थं, कनिष्ठकायाः पश्चात् प्राजापत्यम्, अग्रमङ्गुलीनां दैवम्, अङ्गुष्ठप्रदेशिन्योरन्तरा पित्रम्, मध्यआग्नेयं-उपस्पर्शनं ब्राह्मेण आचमनहोमतर्पणानि प्राजा-

* अयथाकृतमिति क्वचित् पाठः ।

पत्येन कुर्य्यात्, मार्ज्जनार्च्चनवलिकर्म्मभोजनानि दैवेन कुर्य्यात् पित्र्यर्थान् पित्र्येण, प्रतिग्रह,माग्नेयेन-प्रतिगृह्णीयात्।

छागलेयः।

हस्तमध्ये ब्रह्मतीर्थं दक्षिणाग्रहणे तु तत्॥

मार्कण्डेय पुराणे॥

नान्दीमुखानां कुर्व्वन्ति प्राज्ञाः पिण्डोदकक्रियाः।
प्राजापत्येन तीर्थेन यच्च किञ्चित् प्रजायते॥

ब्रह्मपुराणे।

मूलरेखासु स्वाङ्गुष्ठमणिबन्धेषु मध्यमम्।
प्राजापत्यं महातीर्थं विप्रस्तेनाचमेत्सदा॥
धनायुर्दाररेखासु सोमतीर्थं तु मध्यमम्।
लाजादिहवनं तेन कर्त्तव्यं वपनं तथा॥

'वपनं' व्रीह्यादिनिर्व्वापः।

भविष्यत् पुराणे।

कमण्डलु स्पर्शनं यत् दधिप्राशनमेव च।
सोमतीर्थेन राजेन्द्र सदा कुर्य्याद्विचक्षणः॥
वशिष्ठः। स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्म्मणि।
पवित्राणां तथा जाप्ये दाने च विधिनोदिते॥

वायुपुराणे।

क्रियां यः कुरुते मोहात् अनाचम्येह नास्तिकः।

भवन्ति तु वृथा तस्य क्रियाः सर्व्वा न संशयः ॥

कात्यायनः ।

दान-माचमनं होमं भोजनं देवतार्च्चनम् ।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् ॥
आसनारूढ़पादस्तु जान्वोर्वाञ्जलयोस्तथा ।
कृतावसक्थिकोयः स्यात् प्रौढ़पादः स उच्यते ॥

वसिष्ठः ।

जपहोमोपवासेषु धौतवस्त्रधरोभवेत् ।
अलङ्कृतः शुचि-र्मौनी श्रद्धावान्विजितेन्द्रियः ॥

बौधायनः ।

काषायवासाः कुरुते जपहोमप्रतिग्रहान् ।
न तद्देवगमं भवति हव्यं कव्यं स्वधा हविः ॥
व्यासः । आर्द्रवासास्तु यः कुर्यात् जपहोमप्रतिग्रहान् ।
सर्व्वन्तदासुरं ज्ञेयं वहिर्जानुश्च यत् कृतम् ॥

विष्णुपुराणे ।

होमदेवार्च्चनाद्यास्तु क्रियास्वाचमने तथा ।
नैकवस्त्रः प्रवर्त्तेत द्विजवाचनके जपे ॥
द्विजवाचनके, द्विजस्वस्तिवाचनादौ ।

शातातपः ।

सव्यादंशात्परिभ्रष्टं कटिदेशस्थिताम्बरम् ।

एकवस्त्रस्तु तद्विन्द्याद्दैवे पित्रे च वर्ज्जयेत् ॥

याज्ञवल्क्यः।

परिधानाद्वहिःकच्छा निवद्धा ह्यासुरी भवेत्।
धर्म्मकर्म्मणि विद्वद्भिर्व्वर्ज्जनीया प्रयत्नतः ॥

'वहिःकच्छा।'

वहिर्निर्गतकच्छेत्यर्थः।

छन्दोगपरिशिष्टे कात्यायनः।

यत्रोपदिश्यते कर्म्म कर्त्तुरङ्गं न सूच्यते।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः ॥
यत्र दिङ्नियमो नास्ति जपहोमादिकर्म्मसु।
तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्या पराजिताः ॥

ऐन्द्री प्राची, सौम्या उत्तरा, अपराजिता ईशानदिक्,

आसीन ऊर्द्धः प्रह्वीवा नियमो यत्र नेदृशः।
तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्टता ॥

प्रह्वः प्रगतजानुकः।

प्रह्वेण नम्रेण, तिष्ठता ऊर्द्धेन,

ओङ्कार इत्यनु वृत्तौ,

आह आपस्तम्वः।

तस्मादोमित्युदाहृत्य यज्ञ-दान-तपः क्रियाः।
वर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥

चिमात्रस्तु प्रयोक्तव्यः कर्म्मारम्भेषु सर्व्वशः ।
तिस्रः सार्द्धास्तु कर्त्तव्या मात्रास्तत्त्वार्थचिन्तकैः ॥
देवताध्यानकाले तु प्लुतः कुर्य्यान्न संशयः ॥

कश्यपः । भूति कर्म्मान्युच्चैस्तदादीन्येव वाक्यानि स्युर्यथा पुण्याहं सुसमृद्धमिति, भूतिकर्म्माणि सम्पत्कराणि तदानीति । ओंकारादीनि स्वस्त्यादिवाचनादीनि ॥

यमः । पुण्याहवाचनं देवि ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययोः ॥

मार्कण्डेय पुराणे ।

सूर्य्योदयं विना नैव स्नानदानादिकाः क्रिया ।
अग्नेर्विहरणं चैव क्लत्वभावश्च लक्ष्यते ॥

सूर्य्योदयशब्देन उषः कालो गृह्यते, तेन रात्रौ न कुर्य्यादिति तात्पर्य्यं ॥

दक्षः । देवकार्य्याणि पूर्वाह्णे मनुष्याणान्तु मध्यमे ।
पितृणा मपराह्णे च कार्य्याणीति विनिश्चयः ॥

अङ्गिराः । सन्ध्ययोरुभयोर्ज्जप्ये भोजने दन्तधावने ।
पितृकार्य्ये च दैवे च तथा मूत्रपुरीषयोः ॥
गुरूणां सन्निधौ दाने यागे* चैव विशेषतः ।
एषु मौनं समातिष्ठन् स्वर्गं-प्राप्नोति मानवः ॥

याज्ञवल्क्यः ।

यदि वाग्यमलोपः स्याज्जपादिषु कथञ्चन ।

---

* योगेइति क्वचित् पाठः । द्विकः क्रम इति क्वचित् पाठः ।

व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥
अज्ञानाद्यदि वा मोहात् प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादितिश्रुतिः ॥

तथा शतपथ श्रुतिः ॥

अथ यद्वाचंयमोव्याहरति तस्मादुहैष विसृष्टो यज्ञः पराङ्-पर्य्यावर्त्तते

ततो वैष्णवीमृचं यजुर्व्वा जपेदित्यादिः।

मनुः। न कुर्य्यात् कस्यचित् पीड़ां कर्म्मणा-मनसा-गिरा।
आचरन्नभिषिकन्तु कर्म्माण्यन्यान्यथाचरेत् ॥

वायुपुराणे।

दानं प्रतिग्रहो होमो भोजनं बलिरेव च।
साङ्गुष्ठेन सदा कार्य्यं मसुरेभ्योन्यथा भवेत् ॥

साङ्गुष्ठेन अङ्गुलीसङ्गताङ्गुष्ठेन।

एतान्येव तु कार्य्याणि दानादीनि विशेषतः।
अन्तर्जानु विधेयानि तद्वदाचमनं नृप † ॥

तद्वदाचमनं स्मृतम्।

छन्दोगपरिशिष्टे कात्यायनः।

सदोपवीतिना भाव्यं सदा बद्धशिखेन तु।
विशिखोऽनुपवीतश्च यत् करोति न तत् कृतम्।

† तद्वदाचमनं स्मृतमिति क्वचित्पाठः।

निगमपरिशिष्टे।

वामस्कन्धे यज्ञोपवीतं दैवे,

प्राचीनावीतं, इतरथा-पितृयज्ञे ताभ्यां हिकण्ठासक्तं उत्सर्गे निवीतम्।

पृष्ठदेशावलम्बितं ग्राम्यधर्म्मेषु। ग्राम्यधर्म्मः स्त्रीसम्भोगः।

बौडायनः।

कर्म्मयुक्तो नाभेरधःस्पर्शं वर्ज्जयेत्।

याज्ञवल्क्यः।

रौद्र, पित्रा, सुरा-न्मन्त्वान् तथा दैवाभिचारिकान्।
व्याहृत्यालभ्य चात्मानं अप स्पृश्यान्य दाचरेत्॥

छन्दोगपरिशिष्टे कात्यायनः।

पितृमन्त्रप्रवरणे आत्मालम्भेऽवेक्षणे।
अधो वायु समुत्सर्गे प्रहास्ये नृतभाषणे॥
मार्ज्जारमूषिकस्पर्शे आक्रुष्टे क्रोधसम्भवे।
निमित्तेष्वेषु सर्व्वत्र कर्म्म कुर्व्वन्नपः स्पृशेत्।
आत्मालम्भे हृदि स्पर्शे* यज्ञादौ विहिते।
अवेक्षणमपि यज्ञादि विहितमेव ग्राह्यम्॥

लघुहारीतः।

जपे-होमे तथा दाने स्वाध्याये पितृतर्पणे।
अशून्यं तु करं कुर्य्यात् सुवर्णरजतैः कुशैः॥

---

* हृदय स्पर्शे इति क्वचित् पाठः।

दर्भहीना तु या सन्ध्या यच्च दानं विनोदकम् ।
असंख्यातं च यज्जप्तं तत् सर्व्वं निष्प्रयोजनम् ॥

तथा । चितौ दर्भाः पथि दर्भाः ये दर्भा यज्ञभूमिषु † ।
स्तरणासन-पिण्डेषु षट्कुशान् ‡ परिवर्ज्जयेत् ॥
पिण्डार्थं ये कृता ¶ दर्भा यैः कृतं पितृतर्पणम् ।
मूत्रोच्छिष्टधृता ये च § तेषां त्यागो विधीयते ॥
निर्वीमध्ये च ये दर्भा ब्रह्मसूत्रे च ये कृताः ।
पवित्रां स्तान् विजानीयाद्यथा कायस्तथा कुशाः ॥ ॥

गृह्यपरिशिष्टे ।

दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः ।
अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥

मरीचिः ॥

मासि नभस्यमावास्या तस्यां दर्भचयोमतः ।
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ॥

छन्दोगपरिशिष्टे कात्यायनः ।

हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञियाः ।
समूलाः पितृदैवत्याः कल्माषा वैश्वदेविकाः ॥
ह्रस्वाः प्रवरणीयाः स्युः कुशादीर्घाश्च वर्हिषः ।

---

† दर्भानिति क्वचित्पाठः ।

‡ स्मृतादिति क्वचित्पाठः ।

¶ मूत्रोच्छिष्ट प्रलेपे तु इति क्वचित्पाठः ।

§ ये धृताइति क्वचित्पाठः ।

पञ्चयज्ञियाः पञ्चयज्ञार्हाः, प्रवरणमनुष्ठानं तदर्हाः प्रवरणीयाः

अनन्तर्गर्भिकं * साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥
तदेव दर्भपिञ्जल्या लक्षणं समुदाहृतम् ।
आज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु ॥

आपस्तम्बः ।

देवागारे तथा श्राद्धे गवाङ्गोष्ठे तथाध्वरे ।
सन्ध्ययोश्च द्वयोः साधुसङ्गमे गुरुसन्निधौ ॥
अग्न्यागारे विवाहे तु स्वाध्याये भोजने तथा ।
उद्धरेद्दक्षिणं पाणिं ब्राह्मणानां क्रियापथे ॥

दक्षिणमिति सव्यांशे वस्त्रं निधाय दक्षिणं बाहुमुत्तरीयाद्बहिः कुर्य्यादित्यर्थः ।

यथोक्तवस्त्वसम्पत्तौ† ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥
आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरितिस्थितिः ॥

अनादेशे अविधाने ।

मन्त्रस्य देवतायाश्च अनादेशे प्रजापति ॥

दैवता ‡ तत्ज्ञापका, मन्त्रा समस्तव्याहृतयश्च ।

---

* अनन्तर्गर्भिणमिति पुस्तकान्तरे पाठः ।

† यथोक्तवस्त्वसम्पन्न इति क्वचित पाठः ।

‡ प्राजापत्यो मन्त्र इति पुस्तकान्तरे ।

भविष्यत् पुराणे।

अनुक्तद्रव्यसंख्याच प्रतिमादेवता नृप।
सौवर्णी राजती ताम्री वृक्षजा मार्त्तिकी तथा॥
चित्रजा पिष्टजा ज्ञेया निजवित्तानुरूपतः।
आमाषात्पलपर्य्यन्तं कर्त्तव्याः शाठ्यवर्जितैः॥

पैठीनसिः।

काष्ठ-मूल-पर्ण-पुष्प-फल-प्ररोहेषु गन्धादीनां सादृश्येन प्रतिनिधिं कुर्य्यात्, सर्व्वालाभे यवः प्रतिनिधिः भवति।

मैत्रायणीयपरिशिष्टे।

दक्षिणालाभमूलानां लक्षणम् दक्षिणां ददाति।
न चात्र यजेत दर्भाभावे काशः प्रतिनिधिः॥

अथेध्मपालाशा,श्वत्थ-खदिर-लोहित-हरितो दुम्बराणां तद-लाभे सर्व्ववनस्पतीनाम्। विल्वनीप, निम्ब-राजवृक्ष-शाल्म,लूक कपित्थ-कोविदार-विभीतक-श्लेष्मातक--सर्व्व-कण्टकिवर्ज्जं घृतमन्यार्थं प्रतिनिधिस्तदलाभे दधि-पयो वा।

छन्दोग परिशिष्टे।

कात्यायनः।

पाण्याहुतिर्द्वादशपर्व्वपूरिका
दसादिना चेत स्रुचिगर्तपूरिका।
दैवेन तीर्थेन च हूयते हविः

खङ्गारिणि स्वर्च्चिषि तत्र पावके ॥
योऽनर्च्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः ।
मन्दाग्निरामयावी च दरिद्रश्चैव जायते ॥
तस्मात् समिद्धे होतव्यन्नासमिद्धे कथञ्चन ।
आरोग्यमिच्छतायुश्च श्रिय मात्यन्तिकीं तथा ॥
जुहुवांश्च* हुतेचैव पाणिं† पूर्य्यस्नुचादिभिः ।
न कुर्य्यादग्निधमनं कुर्य्यात्तु व्यजनादिना ॥
मुखेनैव धमेदग्निं मुखाद्दोषोभिजायते ।
नाग्निं मुखेनेति तु यत् लौकिके योजयन्ति तत् ॥

अथ गृह्य परिशिष्टे ॥

पृषदाज्य मिति प्रोक्तं दधिसर्पिरिति द्वयम् ।
क्षीरे शृतोष्णे दधिषु चामिक्षेति द्विसम्भवा ॥

स्कन्दपुराणे ।

त्वक्पत्रकेशर,लवङ्गैस्तु त्रिसमं मुनिभिः स्मृतम् ॥

लिङ्गपुराणे ।

आज्यं क्षीरं मधु तथा मधुरत्रय मुच्यते ।
त्वक्पत्रकलवङ्गानि केशरञ्च चतुःसमम् ‡ ॥

गरुड़ पुराणे ।

---

* जुह्वधुरिति क्वचित् पाठः ।

† पाणिसूर्पेति क्वचित् पाठः ।

‡ समांशकमिति पुस्तकान्तरे पाठः ।

कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च।
कुङ्कुमस्य त्रयश्चैकः शशिनः स्याच्चतुः समम्॥
कर्पूरं चन्दनं दर्भः कुङ्कुमञ्च चतुः समम्।
सर्व्वगन्धमिति प्रोक्तं समस्तसुरवल्लभम्॥

दूसमर्गः।

कुङ्कुमं चन्दनो, शीरं मुस्ता,लामञ्ज,केशरम्।
कर्पूरं त्रिसुगन्धञ्च सर्व्वगन्धः प्रकीर्त्तितः॥
त्वगेलापत्रकैस्तुल्यैः स्त्रिसुगन्धः प्रकीर्त्तितः॥

गारुड़ पुराणे।

कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा।
कक्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्द्दमः॥

शिवधर्म्मे।

पञ्चामृतं दधि-क्षीरं सिता मधु-घृतं नृप॥

स्कन्द पुराणे।

ताम्रारुणाश्वेतकृष्णानीलानामाहरेत् गवां।
गोमूत्रं गोमयं क्षीरं दधि-सर्पींषि च क्रमात्॥

विष्णु धर्म्मोत्तरे॥

अपः काञ्चनवर्णाया नीलायाश्च तथा घृतम्।
दधि वै कृष्णवर्णायाः श्वेतायाश्चैव गोमयम्।
गोमूत्रं ताम्रवर्णायाः पञ्चगव्ये प्रयोजयेत्॥

स्कन्दपुराणे ।

विष्णुः । तथा वह्नी,न्द्र,वायु,र्क,दैवत्यानि यथा क्रमम् ।
विद्धि^(?)तानि कुशोदञ्च पितृराजाधिदैवतम् ॥
प्रोक्ताभावे त्वथैतानि कपिलायाः प्रकल्पयेत् ।
गोमूत्रभागस्तस्यार्द्धं शकृत् चीरस्य च त्रयम् ॥
द्वयं दध्नोर्घृतस्यैकमेकश्च कुशवारिजः ।
गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् ॥
आप्यायस्वेति च चीरं दधिक्रावणेति वै दधि ।
तेजोसिशुक्रमित्याज्यं देवस्यत्वा कुशोदकम् ॥
एभिस्तु पञ्चभिर्युक्तं पञ्चगव्यं प्रचचते ।
एतदेव महापुण्यं ब्रह्मकूर्चमिति स्मृतम् ॥

ब्रह्मकूर्चलचणं, ब्रह्मपुराणात् ।

व्यासः । गोमूत्रे ताम्रवर्णायास्त्वेषमाषकसंख्यया ।
पुण्यं वरुणदैवत्यङ्गायत्र्याचाभिमन्त्रितम् ॥
गोमयं श्वेतवर्णायाश्चतुर्माषकमात्रया ।
गृह्णीया दग्निदैवत्यङ्गन्धद्वारेति वै शनैः ॥
चीरं काञ्चनवर्णायाः सोमदैवत्यमेव च ।
आप्यायस्वेति मन्त्रेण माष द्वादशसम्मितम् ॥
गृह्णन्ति वायुदैवत्यं कृष्णवर्णोद्भवं दधि ।
दशमाषकमात्रन्तु दधिक्रावण इति स्मरन् ॥
घृते तु नीलवर्णायाः पञ्चमाषकसंख्यया ।
गृह्णन्ति सूर्य्यदैवत्यन्तेजोसीति जपन् क्रमात् ॥

शतत्रयं माषमानं चत्वारिंशच्च पञ्च च।
कुशोदकस्य गृह्णीयाद्देवस्यत्वेति कीर्त्तयन्॥
ताम्रपात्रे पलाशे वा पात्रे मिश्रीकृतञ्च यत्।
आपोहिष्टेति चालोड्य प्रणवेन पिबन्ति च॥
उदङ्मुखस्त्रिराचम्य ततो गच्छेत् स तद्गृहम्।
तत्रापि होमेप्रागुदेहं कृत्वा दद्याच्चदक्षिणम्॥
ब्राह्मणस्य यथा शक्त्या शोभनं तु मनोहरम्।
गवां वर्णास्तु शुक्लाद्याः सन्ति देशेषु यत्र न॥
तत्र वर्णविभागेन पञ्चगव्यानि चाहरेत्।
वर्णालाभान्न दोषोऽस्ति मात्राहीनं विवर्ज्जयेत्॥
त्याज्यानि दूषितानां च दधिमूत्रपयांसि च।
प्रसक्तानां च शुक्रेण यत्न ज्ञानाच्च शोणितम्॥
चेलकेशास्थिभक्ष्याणां अभक्ष्यैः सम्पृचां तथा।
रोगार्त्तानां च यूकार्त्तिमृताण्डानाममङ्गलम्॥

मृताण्डा मृतगर्भाः।

निष्फलत्वेन वन्ध्यानां कृत्तानां कृमिभि स्तथा।
अमानप्रतिदत्तानि सन्धिनीप्रभवानि च॥
शुद्धभाण्डे मनोज्ञे च भूमावपतितानि च।
ग्रहीतव्यानि विविधं खेदन्तासां न कारयेत्॥
ब्रह्मकूर्च्चव्रतमिदं सर्व्वपापप्रणाशनम्।
सर्व्वकामप्रदं पुंसां रूपारोग्ययशः प्रदम्॥
महतामपि पापानां नाशनं श्रीविवर्द्धनम्।

ब्रह्म पुराणे ।

अश्वत्थो-दुम्बर-प्लक्ष-चूत-न्यग्रोध-पल्लवाः ।
पञ्चभङ्गा इति प्रोक्ताः सर्व्वकर्म्मसु शोभनाः ॥

आदित्य पुराणे ।

सुवर्णं रजतं मुक्ता राजावर्त्तं प्रवालकम् ।
रत्नपञ्चकमाख्यातं शेषं वस्तु ब्रवीम्यहम् ॥

विष्णु धर्म्मोत्तरे ॥

मुक्ताफलं हिरण्यञ्च वैदूर्य्यं पद्मरागकम् ।
पुष्परागञ्च गोमदन्नीलं गारुत्मतं तथा ॥

प्रवालमुक्तादीन्युक्तानि ।

भविष्यत् पुराणे ।

मधुरोऽम्लश्च लवणं कषायस्तिक्त एव च ।
कटुकश्चेति राजेन्द्र रसषट्क मुदाहृतम् ॥

शाकलक्षणन्तु चौरस्वामिनोक्तम् ।

मूल-पत्र-करीरा-ग्रफल काण्डाधिरूढकाः ।
त्वक् पुष्पं कवकञ्चेति शाकं दशविधं स्मृतम् ॥

करीरः वंशांकुरः, अग्रं पल्लवाः, काण्डं नालम्, कवकं छत्राकम्, ।

षट्त्रिंशन्मते च।

यवगोधूमधान्यानि तिलाः कङ्गुस्तथैव च।
श्यामाकं चीनकश्चैव सप्तधान्यमुदाहृतं॥

भविष्यत् पुराणे।

सुवर्णं रजतं ताम्रमारकूटं तथैव च।
लोहं त्रपु तथासीसं धातवः सप्त कीर्त्तिताः॥
आपः क्षीरं कुशाग्राणि दध्यक्षततिलास्तथा।
यवाः सिद्धार्थकाश्चैव अर्घोऽष्टाङ्गः प्रकीर्त्तितः॥

भविष्योत्तरात्।

पुष्पं फलं यवाः क्षीरं दधि दुग्ध कुशास्तिलाः।
तण्डुलाश्च तिलैर्मिश्रा अर्घोऽष्टाङ्गः स उच्यते॥

मत्स्य पुराणे।

तथा दग्धेषु लोकेषु भूर्भुवः स्वर्महादिषु।
सौभाग्यं सर्व्वलोकानामेकस्थमभवत्तदा॥

द्यामाप्नोति वसुधातलम्।

उत्क्षिप्त मन्तरिक्षस्थं ब्रह्मपुत्रेण धीमता।
दक्षेण पीतमात्रं तु रूपलावण्यकारकम्॥
वलं तेजोहविर्जीतं दक्षस्य परमेष्ठिनः।
शेषं तदपतद्भूमावष्टधा तदजायते॥
इक्षवस्तरुराजञ्च नीष्पावा यजि धान्यकं।
विकारोयवगोक्षीरं कुसुम्भं कुङ्कुमं तथा॥

लवणं चाष्टमन्त्रत सौभाग्याष्टक मुच्यते ।

वातुलागम ।

घृतं दधि मधु क्षीरन्तरुराजश्च धान्यकम् ॥
अजाजीचैव निष्पावा मङ्गलाष्टक उच्यते ।

आदित्य पुराणे ।

मध्याह्नःखड्गपात्रं तत् तथा नेपालकम्बलः ।
रूप्यं-दर्भा-स्तिला-गावो-दौहित्रः-कुतपाष्टकम् ॥
तथा । दूर्व्वा यवाङ्कुराश्चैव वालकं चूतपल्लवाः ।
हरिद्राद्वय सिद्धार्थं शिखिपच्चोरगत्वचः ।
कङ्कणौषधयश्चैताः कौतुकाख्या नव स्मृताः ॥

छन्दोगपरिशिष्टे ।

कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेय, चन्दनम् ।
वचा चम्पक, मुस्ते च सर्व्वौषध्योदश स्मृताः ॥

मार्कण्डेयः ।

जग्मुरेतानि वीजानि ग्राम्यारण्याभिधानि च ।
ओषध्यः फलपाकान्ताः शतं सप्तदश स्मृताः ॥
व्रीहयश्च यवाश्चैव गोधूमाः* कङ्गु सर्षपाः ।
प्रियङ्गवः कोविदाराः कोरदूषाः सचीनकाः ॥
माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
आढक्यश्चणकाश्चैव ग्राम्यारण्याश्च षोड़शम् ॥

---

* तिल इति क्वचित् पाठः ।

इत्येता ओषधीनां तु ग्राम्याणां जातयः स्मृताः।
ओषध्यो यज्ञिया ज्ञेया ग्राम्यारण्यायतुर्द्दश॥
व्रीहयश्च यवाश्चैव गोधूमाः कङ्गुसर्षपाः।
माषा मुद्गाः सप्तमाश्च अष्टमाश्च कुलत्थकाः॥
श्यामाकाश्चैव नीवारा जर्त्तिलाः सगवेधुकाः॥
कोविदारसमायुक्तास्तथा वेणुयवाश्च ये।
ग्राम्यारण्याः स्मृताश्चैता ओषध्यश्च चतुर्दश॥

भविष्यत् पुराणे।

अगुरुं चन्दनं मुस्ता सिह्लकं वृषणं तथा।
समभागन्तु कर्त्तव्यं धूपोऽयममृताह्वयः॥
तथा। श्रीखण्डं ग्रन्थिसहितमगुरुं सिह्लकं तथा।
मुस्तातथेन्दुभूतेश शर्कराञ्च दहेत्त्वाहम्॥
इत्येषोऽनन्तधूपश्च कथितो देवसत्तम।
तथा। कृष्णागुरुं सिह्लकञ्च वालकं वृषणं तथा॥
चन्दनन्तगरं मुस्ता प्रबोधः शर्करान्वितः।
कर्पूरं चन्दनं कुष्ठमुशीरं सिह्लकं तथा॥
ग्रन्थिकं वृषणं भीम कुङ्कुमं शठ्ञ्जनं तथा।
हरीतकी तथोशीरं यक्षधूप उदाहृतः॥
तथा। षड्भाग कुष्ठं द्विगुणो गुडस्य
लाक्षात्रयं पञ्चनखस्य भागाः।
हरीतकी सर्जरसः समांसी
भागैकमेकं त्रिलवं शिलाजम॥

घनस्य चत्वारि पुरस्य चैकौ
धूपोद्‌गाङ्गः कथितौ मुनीन्द्रैः ।
तथा । द्रुपर्णं सिल्लकं विप्र श्रीखण्डमगुरूं तथा ।
कर्पूरञ्च तथा मुस्तां शर्करां सत्वचं द्विज ॥
इत्येष विजयोधूपः स्वयं देवेन निर्म्मितः ।
कर्पूरं चन्दनं मांसी त्वक् पत्रैलालवङ्गकम् ॥
अगुरुं सिल्लकं धूपं प्राजापत्यं प्रचक्षते ।

अथ मानकथनं ।

अथ नामानि ।

आदित्य पुराणे ।

जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमन्तत् प्रमाणानां त्रसरेणुं प्रचक्षते ॥
त्रसरेणुश्च विज्ञेय अष्टौ तु परमाणवः ।
त्रसरेणवस्तु ते ह्यष्टौ रथरेणुस्तु सम्मतः ॥
रथरेणवस्तु तेह्यष्टौ वालाग्रं तत् स्मृतं बुधैः ।
वालाग्राण्यष्ट लिक्षा तु यूका लिक्षाष्टकं बुधैः ॥
अष्टौ यूका यवं प्राहुरङ्गुलन्तु यवाष्टकम् ।
द्वादशाङ्गुलमात्रो वै वितस्तिश्च प्रकीर्त्तितः ।
अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते ।
तालःस्मृतो मध्यमया गोकर्णश्चाप्यनामया ।
कनिष्ठया वितस्तिस्तु द्वादशाङ्गुलिकः स्मृतः ।
रत्नि स्त्वङ्गुलिपर्व्वाणि विज्ञेयश्चैकविंशतिः ।

चत्वारि विंशतिश्चैव हस्तपादाङ्गुलानि तु।
किष्कुः स्मृतोच्छ्रितः स्निग्धः द्विचत्वारिंशदङ्गुलः।
षण्णवत्यङ्गुलैश्चैव धनुर्दण्डः प्रकीर्त्तितः॥
धनुर्दण्डयुगन्नालिर्ज्ञेयाष्टेता यवाङ्गुलैः।
धनुषां त्रिंशता नल्वं माहुः संख्याविदोजनाः।
धनुः सहस्रे द्वे वापि गव्यूति रुपदिश्यते॥
अष्टौ धनुःसहस्राणि योजनन्तु प्रकीर्त्तितम्।

मार्कण्डेय पुराणे।

परमाणुः परं सूक्ष्मं त्रसरेणुर्महीरजः।
बालाग्रश्चैव लिचा च यूकाचाथ यवाङ्गुलम्।
क्रमादष्ट गुणान् प्राहुर्यवाश्चाष्ट ततोङ्गुलम्।
षडङ्गुलं पदं प्राहु र्वितस्तिर्द्विगुणः स्मृतः॥
द्वौ वितस्ती ततोहस्तो ब्रह्मतीर्थं द्विवेष्टनैः।
चतुर्हस्तो धनुर्दण्डो नालिका तद्युगेन तु॥
क्रोशोधनुःसहस्रे द्वे गव्यूतिश्च चतुर्गुणा॥
द्विगुणं योजनं तस्मात् प्रोक्तं संख्यानकोविदैः।

बृहस्पतिः॥

दशहस्तेन दण्डेन त्रिंशद्दण्डा निवर्त्तनम्।
दश तान्येव गोचर्म्म ब्राह्मणेभ्यो ददाति यः॥

वसिष्ठः॥

दशहस्तेन वंशेन दशवंशान्समन्ततः।

पञ्चचाप्यधिकान् दद्यादेतद्गोचर्म्मचोच्यते ॥

विष्णुधर्म्मोत्तरे ।

यदुत्पन्नमथा श्नाति नर: सम्वत्सरं द्विजा: ।
एतद्गोचर्म्ममात्रन्तु भुव: प्रोक्तं विचक्षणै: ॥

मत्स्य पुराणे ।

दण्डेन सप्तहस्तेन त्रिंशद्दण्डा निवर्त्तनम् ।
त्रिभागहीनं गोचर्म्ममानमाह प्रजापति: ॥

बृहद्वशिष्ठ: ।

गवां शतं वृषश्चैको यत्र तिष्ठेदयन्त्रित: ।
एतद्गोर्म्ममात्रं तु प्राहुर्वेदविदोजना: ॥

ब्रह्मपुराणे ।

धर्म्मशास्त्रेषु मानार्थं या: संज्ञा मुनिभि: स्मृता: ।
ता: सर्व्वा: व्यवहारार्थं बोद्धव्या: सम्प्रदायत: ॥
अनु: । लोक संव्यवहारार्थं या: संज्ञा: प्रथिता भुवि ।
ताम्र रूप्य सुवर्णानां ता: प्रवक्ष्याम्यशेषत: ॥
जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रज: ।
परमं* तत् प्रमाणानान्त्रसरेणुं प्रचक्षते ॥
त्रसरेण्वष्टकं॰ लिक्षाज्ञेयैका परिमाणत: ।
ता राजसर्षपस्तिस्रस्ते त्रयोगौरसर्षप: ॥

---

* प्रथममिति क्वचित् पाठ: ।

॰ त्रसवेणवोष्टाविति क्वचित् पाठ: ।

सर्षपाः षट् योमध्यः त्रियवस्त्वेककृष्णलं।
पञ्चकृष्णलकोमाषस्ते सुवर्णस्तु षोड़श॥
पलं सुवर्णाश्चत्वारः पलानि धरणं दश।
द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः॥
ते षोड़शस्याद्धरणं पुराणश्चैव राजतः।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः॥
धरणानि दश ज्ञेयः शतमानस्तु राजतः।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः॥

याज्ञवल्क्यः।

जालसूर्य्यमरीचिस्थं त्रसरेणुरजःस्मृतम्।
तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते॥
गौरस्तु ते त्रयः षट्ते यवा मध्यास्तु ते त्रयः।
कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोड़श॥
पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्त्तितम्।
द्वे कृष्णले रूप्यमाषो धरणं षोड़शैव ते॥
शतमानं तु दशभिर्धरणैः पलमेव च॥
निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः।

विष्णुः। जालस्थानमरीचिगतं रजस्त्रसरेणुसंज्ञकं तदष्टकं लिक्षा तत् त्रयं राजसर्षपः तत्त्रयं गौरसर्षपः ते षट् यवः तत्त्रयं कृष्णलं तत् पञ्चकं माषः तद्द्वादशकमक्षार्द्धं स चतुर्माषकं सुवर्णः तच्चतुःसौवर्णिकोनिष्कः द्वे कृष्णले रूप्यमाषः ते षोड़श धरणं ताम्रिकः कार्षापणः।

कात्यायनः ।

माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु ।
काकिनी तु चतुर्भागो माषकस्य पणस्य च ॥
पञ्चनद्याः प्रदेशे तु संज्ञेयं व्यावहारिकी ।
कार्षापण प्रमाणन्तु तन्निबद्धमिहैकया ॥
कार्षायणस्यैकाज्ञेया तावतस्तु धानकः ।

अगस्ति प्रोक्तेपि ।

यवः स्यात्सर्षपैः षड्भिर्गुञ्जा च स्यात्त्रिभिर्यवैः ।
गुञ्जाभिः पञ्चभिश्चैको माषकः परिकीर्त्तितः ॥
भवेत् षोड़शभिर्माषैः सुवर्णस्तैः पुनः स्मृतः ।
चतुर्भिः पलमेकस्य दशांशोधरणं विदुः ॥
अष्टभिर्भवति व्यक्तैः तण्डुलो गौरसर्षपैः ।
सर्वेणवोयवः प्रोक्तो गोधूमंचापरे जगुः ॥

विष्णुगुप्तः ।

पञ्चगुञ्जो भवेन्माषः सर्षपैश्च चतुर्गुणैः* ।
कवयो† धरणं प्राहुर्मणिमानविशारदाः ॥
मञ्जाटिका कणजविशेषस्तौल्ये गुञ्जाद्वयं विदुः ।
मञ्जाटिकाविंशतिस्तु धरणं तद्विदां मतम् ॥
स्थूलमध्यातिसूक्ष्माणां सुसूक्ष्माणा मपि स्मृतं ।

* माषास्तैश्चचतुर्गुणैरिति क्वचित् पाठः ।

† कनको इति क्वचित् पाठः ।

माषकैः पद्मरागः स्यादिन्द्रनीलादिषु स्मृतः ॥

हस्तत्रयं* प्रयोक्तव्यं न यस्मिन्मानमीरितम् ।

दीनारो रौप्यकैरष्टाविंशत्या परिकीर्त्तितः ॥

सुवर्णस्य सप्ततिमो भागो रौप्यकदृष्यते ।

प्रकारान्तरमाह ।

स एव ।

सुचेत्रे यथावत् मध्यपाककाले निष्पन्ना धान्यमाषा दश सुवर्णं माषः पञ्चवा गुञ्जाः सुवर्णमाषकः ते षोडश सुवर्णः ॥ एवं प्रमाणसिद्धस्य द्वितीया संज्ञा कर्ष इति चतुः कर्षं पलं पलानां शतेन तुला विंशति तौलिकोभारः । अस्यैव भारस्य उदतौलिक इति द्वितीया संज्ञा ।

ब्रह्म प्रोक्तं ।

पलानां विंशतिर्वीशः पञ्चवीशास्तुला मता ।

उदतौलिकः स एव स्याद्भारो विंशतितौलिकः ॥

विष्णु गुप्तः ।

रूप्यस्य सुवर्णाद्भिन्नं मानमभिधीयते ।

अष्टाविंशति गौरसर्षपा रूप्यमाषकः ते षोडश धरणं निष्का वा विंशतिर्वा रूप्यमाषकः पलञ्च दश धरणकं तत् पलानां शतं तुला तत् तुलाविंशतिर्भार इति । विंशत्या व्रीहितण्डुलै स्तुलायां विधृतैर्वज्राख्यस्य रत्नस्य धरणं भवति ।

* कुहस्तञ्चेति क्वचित्पाठः ।

अष्टभि र्गौरसर्षपैस्तण्डुलं कल्पयेदिति ।

कपर्द्दिभाष्यकारः ।

निघण्टौ ।

तथा । मानं तुला,ङ्गुलि,प्रस्थैः र्गुञ्जाः पञ्चाद्यमाषकः ।

ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम् ॥

सुवर्णविस्तौ हेम्नोक्षे कुरुविस्तस्तु तत्पले ।

तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला ॥

आचितोदश भाराः स्युः शाकटोभार आचितः ।

कार्षापणः कार्षिकःस्यात् कार्षिक स्ताम्रिकः पणः ॥

भविष्यत् पुराणे ।

पलद्वयं तु प्रसृति र्द्विगुणं कुड़वं मतम् ।

चतुर्भिः कुड़वैः प्रस्थः प्रस्थाश्चत्वार आढकः ॥

आढ़कैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः ।

कुम्भो, द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोड़श ॥

वाराह पुराणे ।

पलद्वयं तु प्रसृतं मुष्टिरेकं पलं स्मृतम्

अष्टमुष्टि र्भवेत् कुञ्चिः कुञ्चयोऽष्टौ तु पुष्कलम् ॥

पुष्कलानि च चत्वारि आढकः परिकीर्त्तितः ।

चतुराढको भवेद्द्रोण इत्येतन्मान लक्षणम् ॥

चतुर्भिः सेतिकाभिस्तु प्रस्थ एकः प्रकीर्त्तितः ।

सेतिका, कुड़वः मुष्टिर्यजमानस्येति केचित् मुष्टिरेकं पलं स्मृतमिति प्रोक्तम् ।

पाद्म पलद्वयेन प्रसृतं द्विगुणं कुडवं मतम्।
चतुर्भिः कुडवैः प्रस्थः प्रस्थैश्चतुर्भिराढकः॥
चतुराढको भवेद्द्रोण इत्येतद्द्रोणमानकम्।

गोपथ ब्राह्मणे।

पञ्चकृष्णलको माषस्तैश्चतुःषष्टिभिः पलं।
द्वात्रिंशद्भिः पलैः प्रस्थो मागधेषु प्रकीर्त्तितः॥
आढकस्तैश्चतुर्भिश्च द्रोणः स्याच्चतुराढकः।

अथ मण्डपादि लक्षणम्।

भविष्यत् पुराणे॥

चन्द्रो, घोषो विराजश्च काञ्चनः काम, रामकौ।
सुघोषो, घर्घरो, दक्षो मण्डपा नवमा मताः॥
चतस्रो धारिकाः कोणे द्वे द्वे द्वारेषु पार्श्वयोः।
विस्तारे तु यथा शोभे अपरा अपि धारिकाः॥
प्लक्षो दुम्बरिका, श्वत्था वटाः प्रागादितोरणाः।
पञ्चषट् सप्तहस्ताः स्युः कनीयः स्यात्ततः परम्॥
वस्ते वेदाङ्गुलावृद्धिः मार्द्धमष्टकरं परम्।
शूलं नवाङ्गुलं चाद्यं विद्याच्चार्द्धाङ्गुलं ततः॥
विस्तारं शृङ्गयोश्चास्य प्रवेशो द्व्यङ्गुलायतः।

अत्र यदुक्तंपिङ्गलामते।

हस्तद्वयं वहिस्त्यक्त्वा तोरणानि निवेशयेत्।

शूले नवाङ्गुलं दैर्घ्यं तत्तुरीयांशेन विस्तृतिः ॥
ऋजु वै मध्यशृङ्गं स्यात् किञ्चिद्वक्रन्तु पार्श्वयोः ।
प्रथमं तत्समाख्यातं द्व्यङ्गुलं रोपयेदथ ॥
शेषाणां द्व्यगुला वृद्धिर्विंशत्याङ्गुलवृद्धितः ।
शल्यं वस्वङ्गुलानाहम्परं वै षोडशाङ्गुलात् ॥
ललाटे पार्श्वयोश्चैव पृथुत्वं षड्भिरङ्गुलैः ।
अन्यमेतत् समाख्यातं शेषेऽष्टाङ्गुलवृद्धितः ॥
स्वस्तिकः श्रीकजाकं वा सर्व्वतोरणमिष्टदम् ।
उच्छ्रयेण तदर्द्धार्द्धात्तोरणानां प्रविस्तरः ॥
धारिका तोरणे स्तुल्या वेदीस्तम्भाः षडुन्नताः ।
खातं पञ्चांशतस्तेषां भूमिभागवशेन वा ॥
वेदी चतुष्करा मध्ये कोणे स्तम्भचतुष्टयं ।
अष्टाङ्गुलोच्छ्रितान्येषां कराङ्घ्रेकवृद्धितः ॥
विस्तारादुच्छ्रयाद्वापि नान्तरे ग्रन्थिवन्धनम् ।
पीता महोत्का देवी तु* लिङ्गायामद्धिविस्तरा ॥
विस्तारं नवधा कृत्वा मण्डपानां क्वचिन्मते ।
मध्ये पदेन वेदी स्यात् कुण्डानां सैषविस्तरः ॥
हस्तादूर्द्ध्वं क्वचिद्वेदी षट् षडङ्गुलवृद्धितः ।
वेदीपादोत्तरन्त्यक्त्वा कुण्डानि नव पञ्च च ॥
वेदास्तान्येव तानि स्युर्वर्त्तुलान्यथवा क्वचित् ।

उक्तं च शौचाचारपद्धतौ ।

---

* पैतामहोत्शक इति क्वचित् पाठः ।

शस्तानि तानि वृत्तानि चतुरस्राणि वा सदा।
दाहायाग्नौ भगाकारं द्वेषे स्वं दक्षिणोत्तरे।
अस्रं क्षयाय नैर्ऋत्यां षडस्रं वायवे मतम्॥
वृत्तं कुण्डमिह प्रोक्तं वारुण्यां शान्तिके हितम्।
कुण्डं कुम्भयाकार, मुत्तरे पुष्टिवर्द्धनम्॥
रौद्र्यां भयदमष्टास्रमिति वृद्धशिवागमः।
ऐन्द्र्यां कुण्डं चतुष्कोण मुच्यते स्तम्भकर्म्मणि॥

तथा प्रतिष्ठासारसंग्रहे॥

सर्व्वंदिक्षु क्षये कुण्डं वेदास्रं स्थापने विधौ।
तदेव वृत्तं वा कार्य्यं काम्ये कल्पोदितं तथा॥
चतुरस्रं भवेत् प्राच्यां सर्व्वकामप्रदं शुभम्।
आग्नेय्यां योधिपद्माभं सदासन्तानवर्द्धनम्॥
अर्द्धचन्द्रनिभं कुण्डं याम्ये विद्वेषणं नृणाम्।
त्रिकोणं नैर्ऋताशायां मारणार्थं प्रकल्पयेत्॥
नित्यमाप्यायने वृत्त पश्चिमे कुण्डमुत्तमम्।
षट्कोणं वायुकोणस्थं कुण्डमुच्चाटने मतम्॥
पद्माकारं भवेत् कुण्ड मुत्तरे पुष्टिसाधनम्।
अष्टकोणमथैशान्या मत्यन्तं च भयप्रदं।
काम्य मेतत् सदा कुण्डं स्थापनादौ विवर्ज्जयेत्॥

स्वायम्भुवे।

चतुरस्रं भवेत् कुण्डं वृत्तं वा हस्तसम्मितम्।

नित्ये नैमित्तिके चैव काम्यं वा कल्पचोदितम् ॥
चतुरस्रम्भवेत् प्राच्यामाग्नेय्यान्तु भगाकृति ।
याम्यायामर्द्धचन्द्रं तु नैर्ऋत्याञ्च त्रिकोणकम् ॥
वृत्तं कुण्डन्तु वारुण्यां वायव्यां पञ्चकोणकम् ।
पद्माकारन्तु सौम्यायामैशान्यामष्टकोणकम् ॥
अस्त्राणां वारुणानां तु कुम्भाकारं विधीयते ॥
वायव्यानां पताकाभं माहेन्द्राणान्तु वज्रवत् ।
सप्तजिह्वाकृति प्रोक्तमाग्नेय्याङ्गुरुसत्तमैः ॥
मध्यमोत्तमवीर्य्याणां चतुरस्राङ्गुलप्रदम् ।
त्रिकोणमल्पवीर्य्याणां स्त्रीरूपाणां भगाकृति ॥
अर्द्धचन्द्रं तु रौद्राणां सौम्यानां वृत्तमेवहि ।
पञ्चकोणं तु दूतीनां किन्नराणां तथैव च ॥
विद्याविद्वेषकरणं पद्माकारं हितं मतम् ।
सर्व्वेषा मेव मन्त्राणां वृत्तं स्यात् सार्व्वकामिकम् ॥
तेन वृत्तं प्रकुर्व्वन्ति विधिशास्त्रविदोजनाः ।

यदुक्तं कालोत्तरे ।

अष्टमूर्त्त्यात्मके न्यासे नव कुण्डानि कल्पयेत् ।
पञ्चमूर्त्त्यात्मके पञ्च वेदास्राण्येव कल्पयेत् ॥
शान्तिके हस्तमात्राणि कुण्डानि परिकल्पयेत् ।
क्रमाद्द्व्यङ्गुलया वृद्ध्या ततः शेषेषु षण्मुख ॥
अष्टादिक्ष्वष्टकुण्डानि वेदीपादोन्नकानि तु ।
नवमं कारयेत् कुण्डं वेदास्रं कुण्डमध्यमम् ॥

चतुर्द्दिक्षु च चत्वारि पञ्चमं त्वीशकोणकं।

तथा। अपि वेदाङ्गुलं कुण्डदिगादिस्तु यथाक्रमम् ॥

ज्येष्टादिकन्यसान्तानां वेदीपादाद्वहिः कृतम्।

वेदयुग्माश्रितं कृत्वा अङ्गुलं भागसम्मितम् ॥

तावद्भिरङ्गुलैर्हस्तं कुण्डानां परिकल्पयेत्।

हस्तमात्रं खनेत्तिर्य्यक् ऊर्ध्वं मेखलया सह ॥

खाताद्द्वाद्येङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधिः।

मेखला त्रितयं कार्य्यं कोणैरामयमाङ्गुलैः।

दैर्घ्यात् सूर्याङ्गुला नाभिस्त्र्यंगीनाविस्तरेण तु ॥

एकाङ्गुलोच्छ्रिता सा च प्रतिष्ठाभ्यन्तरे तथा।

कुम्भद्वयसमायुक्ता चाश्वत्थदलवन्मता।

अङ्गुष्टमेखला युक्ता मध्येत्वाज्य * ध्रुतिस्तथा ॥

दक्षस्या पूर्व्वयाम्ये तु जलस्था पश्चिमोत्तरे।

† इतरस्यापि कुण्डस्य योनि र्दक्षदलस्थिता ॥

दिक्षु वेदाप्रवृत्तानि पञ्चमं त्वीशगोचरे।

तस्य नाभिदले दक्षे यदिष्टं तद्विधीयते ॥

कुण्डानां पञ्चकं वाप्य कर्त्तव्यं पूर्व्वतस्थितमिति।

तद्यथा प्रथमे च।

कुण्डं जिनाङ्गुलं तिर्य्यगूर्द्ध्वं मेखलया सह।

परेषां द्व्यङ्गुला वृद्धिरङ्गजातसमन्विता ॥

* स्थितिरिति क्वचित् पाठः।

† नवमस्येति क्वचित् पाठ

‡ न तेति क्वचित्पाठः।

विनामानाङ्गुलादूर्द्धं चतुर्विंशतिमांशकम् ।
अङ्गुलन्तेन कुण्डानामङ्गजातं विधीयते ॥
कण्ठाङ्गुलाद्वहिः कार्य्या मेखलैका षडङ्गुला ।
चतु-स्त्रि-द्व्यङ्गुला-यद्वा-तिस्रः सर्व्वत्रशोभनाः ॥
मेखला मध्यतोयोनिः कुण्डार्द्धांत्त्यंशविस्तृता ।
अङ्गुष्ठमानोष्ठकं वा कार्य्याश्वत्थदलाकृतिः ॥
प्रागग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखी ।
पूर्व्वामूखाःस्मृताः शेषायथाशोभं समन्विता ॥

देवी पुराणे ।

हस्तादि लिखिते कुण्डे समाख्यातं समीचते ।
ओष्ठमेकांगुलं कार्य्यं भागो द्वादशमायतः ॥
ओष्ठं विस्तरसामान्यागजोष्ठसदृशी शुभा ।
चतुरङ्गुलमानेन प्रथमा मेखला भवेत् ॥
एकोनाद्व्यंगुलीया तु एवं कुण्डं शुभावहम् ।
चतुरस्रं तु पूर्व्वादि अश्वत्थदल सम्मितम् ।
ऊर्द्धकुण्डङ्गजाकारं वृत्तं पद्मकमष्टवा ॥
पद्माकारं प्रकर्त्तव्यं कुण्डं चेशानगोचरम् ।

यदुक्तं प्रतिष्ठासारसंग्रहे ।

प्रतिष्ठास्थापनादीनां मुख्यमास्थापनं यतः ।
मण्डपोत्तर मुत्सृज्य कर्त्तव्यं मण्डपद्वयं ॥
धाम्नीधामान्तरं त्यक्ता धामाग्रे यत्र मण्डपः ।
दशद्वादशहस्तोवा द्विद्विवृद्ध्या ततः क्रमात् ॥

तन्मध्ये नवधा कृत्वा मध्यभागेन वेदिका।
विकारार्काष्टभिः कार्य्या प्रावृता वा नवाङ्गुलैः।
तद्वदुत्तरमुत्सृज्य दशहस्तप्रमाणतः॥
पूर्वभागेऽथवा सौम्ये कर्त्तव्यः शान्तिमण्डपः।
तन्मध्ये वेदिकापद्मे कर्त्तव्यं ग्रहपूजनम्।
तत्रापि शान्तिहोमार्थं न व कुण्डानि कल्पयेत्॥
यज्ञमण्डपमध्ये तु वेदोपादाद्बहिः क्रमात्।
सर्व्वदिक्षु च यत् कुण्डं वेदास्रं स्थापने विधौ॥
तदेव वृत्तं वा कार्य्यमन्यथाकारनिर्मितम्।
चतुर्व्विंशाङ्गुलादूर्द्धं द्वाङ्गुलादिविवर्द्धितः॥
व्यासात्* खातःकरः प्रोक्तो निम्नस्त्र्यङ्गुलेनतु।
खाताद्बाह्येऽङ्गुलः कण्ठः तद्बाह्ये मेखला क्रमात्॥
प्रथमाद्ध्यङ्गुला व्यासादुन्नतासा नवाङ्गुलैः।
मध्यमाद्ध्यङ्गुला वाह्ये तृतीया तु यमाङ्गुला॥
मेखलाः पञ्च वा कार्य्या षट् पञ्चभिस्त्रिपञ्चकैः।
पञ्चत्रिमेखलोच्छ्रायं ज्ञात्वाशेषमधः खनेत्॥
खाताधिके भवेद्रोगी हीने धेनुधनक्षयः।
वक्रकुण्डे तु सन्तापोमरणं भिन्नमेखले॥
मेखलारहिते शोकोऽभ्यधिके वित्तसंक्षयः।
भार्याविनाशनं प्रोक्तं कुण्डं योन्या विना कृतं।
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्ज्जितम्॥

---

* खातहीने धनक्षय इति पाठान्तरं।

स्थापने सर्व्वकुण्डानां ध्वजाग्रं सर्व्वसिद्धिदं इति ॥
प्रतिकुण्डं पताकाद्याः प्रोक्ताः कालोत्तरे तथा* ।
सप्तहस्ताः पताकाः स्युः सप्तमांशेन विस्तृताः ॥
लोकपालाः सुवर्णेन नवमो तुहिनप्रभाः ।
पीत, रक्तादिवर्णाश्च पञ्चहस्ता ध्वजाः स्मृताः ॥
द्विपञ्चहस्तैर्दण्डैस्तैर्वंशजैः संयुता मताः ॥
सप्तविंशतिभिः काण्डो विष्टरा बहुमात्रकाः ।
हस्तार्द्धाः समिधः शस्ता इह वै चोत्तरे पुनः ॥
पञ्चहस्ताः ध्वजाः कार्य्या वैपुल्येन द्विहस्तकाः ।
सप्तहस्ताः पताकाः स्युर्व्विंशत्यङ्गुलविस्तृताः ॥
पञ्चहस्तध्वजानान्तु पञ्चमांशप्रवेशिताः ।
दशहस्तपताकानां दण्डाः पञ्च प्रवेशिताः ॥
सिन्दूराः कर्व्वुरा धूम्रा धूसरा मेघसन्निभाः ।
हरिताः पाण्डुवर्णाश्च शुभ्राः पूर्व्वादितः क्रमात् ॥
एवं वर्णा ध्वजाः कार्य्याः पताकाः पाकशासन ।

कलशोत्पत्तिकलशलक्षणम् ।

देवीपुराणे ।

कलशान् सुदृढान् कुर्य्याल्लक्षणानि वदामि ते ।
उत्पत्ति-लक्षणं मानं कथयामि यथा मुने ॥
वारकाः कलशाश्चैव येन लोके प्रकीर्त्तिताः ।
अमृते मथ्यमाने तु सर्व्वदेवैः समन्वितैः ॥

* कालोत्तरे यथेति क्वचित् पाठः ।

मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्।
उत्पन्नममृतं तत्र महावीर्य्यपराक्रमम्॥
तस्यायं धारणायैव कलशः परिकीर्त्तितः।
कलां कलां गृहीत्वा वै देवानां विश्वकर्म्मणा॥
निर्म्मितोऽयं सुरैर्यस्मात् कलशस्तेन कथ्यते।
वारयन्ति ग्रहान् यस्मात् मानवा विविधां स्तथा॥
दुर्हृदश्च तथाघोरां स्तेन ते वारकाः स्मृताः।
कलशस्य मुखे ब्रह्मा ग्रीवायान्तु महेश्वरः॥
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः।
शिखासु देवताः सर्व्वा वेष्टयन्ति चतुर्द्दिशम्॥
पृथिव्यां यानि तीर्थानि कलशे निवसन्ति हि।
गृहे शान्तिश्च पुष्टिश्च प्रीतिर्गोतृप्ति रेव च॥
ऋग्वेदोऽथ यजुर्व्वेदः सामवेदस्तथैव च।
अथर्व्ववेदसहिताः सर्व्वे कलशसंस्थिताः॥
पूर्णामृतेन तोयेन श्रितास्त्वेकान्ततो धृताः।
सरित्सरःखातजेन तडागेन जलेन वा॥
वापी-कूपोदद्रिव्येन सामुद्रेण सुखावहाः॥
सर्व्वमङ्गलमाङ्गल्याः सर्व्वकिल्विषनाशकाः।
अभिषेके सदा ग्राह्याः कलशा ईदृशाः शुभाः॥
यात्रा, विवाह काले वा प्रतिष्ठा यज्ञकर्म्मणि।
योजनीया विशेषेण सर्व्वकर्म्मप्रसाधकाः॥
पञ्चाशाङ्गुलवैपुल्या उत्सेधः षोड़शाङ्गुलः।
कलशानां प्रमाणं तु मुखमष्टाङ्गुलम्भवेत्॥

अथ ऋत्विग्वरणम् ।

तत्र ब्रह्माण्डदानमधिकृत्योक्तम् ।

पद्मपुराणे ।

बालाग्निहोत्रिणं विप्रं सुरूपञ्च गुणान्वितम् ।
सपत्नीकञ्च सम्पूज्य भूषयित्वा विभूषणैः ॥
पुरोहितं मुख्यतमं कृत्वान्यांश्च तथा द्विजान् ।
चतुर्विंशद्गुणोपेतान् सपत्नीकान् निमन्त्रितान् ॥
अहताम्बरसञ्छन्नान् स्रग्विणस्तु विभूषितान् ।
अङ्गुलीयकानि तथा कर्णवेष्टांश्च दापयेत् ॥
एवं विश्वास्य सम्पूज्य तेषामग्रे स्वयं स्थितः ।
अष्टाङ्गप्रणिपातेन प्रणम्य च पुनः पुनः ॥
पुरोहिताय पुनः कृत्वा कृत्वा वै करसम्पुटम् ।
यूयम्वै ब्राह्मणा धात्रा मैत्रत्वेचानुगृह्णता ॥
सौमुख्येनेह भवतां भवेत्पूतो नरः स्वयम् ।
भवतां प्रीतियोगेन स्वयं प्रीतः पितामहः ॥

तुला पुरुषमधिकृत्योक्तं ।

लिङ्गपुराणे ।

शतनिष्काधिकं श्रेष्ठं तदर्द्धं मध्यमं स्मृतम् ।
तस्याप्यर्द्धं कनिष्ठं स्यात्त्रिविधं तत्र कल्पितम् ॥
वस्त्रयुग्ममयोष्णीषं कुण्डलं कण्ठभूषणम् ।
अङ्गुलीभूषणञ्चैव मणिबन्धस्य भूषणम् ॥

एतानि चैव सर्व्वाणि प्रारम्भे सर्व्वकर्म्मणि।
पुरोहिताय दत्त्वाथ ऋत्विग्भ्यः सम्प्रदापयेत्॥
पूर्व्वोक्तं भूषणं सर्व्वं सोष्णीषं वस्त्रसंयुतम्।
दद्यादेतत् प्रयोक्तृभ्य आच्छादनपटं बुधः॥

अन्यांश्चतुर्विंश ऋत्विजः।

कृत्वेतिवचनात्पञ्चविंशतिर्ब्राह्मणा निमन्त्रणीयाः। ते च प्रतिष्ठामधिकृत्य मत्स्यपुराणे भेदेनोक्ताः।

शुभास्तत्राष्ट होतारो द्वारपालास्तथाष्ट वै।
अष्टौ तु जापकाः कार्य्याः ब्राह्मणा वेदपारगाः॥
सर्व्वं लक्षणसम्पन्ना * मन्त्रवन्तो जितेन्द्रियाः।
कुल,शील समायुक्ताः जापकाःस्युर्द्विजोत्तमाः॥
हेमालङ्कारिणः कार्य्याः पञ्चविंशतिऋत्विजः।
दौचयेच्च समं सर्व्वानाचार्य्यो द्विगुणं लभेदिति॥

निष्कादीनारभ्य शतं पञ्चविंशतिर्व्वा वस्त्रालङ्कारमूल्यम्। एतत् प्रयोक्तृभ्यो वरणवाक्यम्, ॐ अद्य अमुकयज्ञेनाहं यक्ष्ये यदङ्गभूतममुककर्म्मार्थममुकगोत्रममुकशर्म्माणममुकवेदाध्यायिन-ममुकं, त्वामहं वृणोमि, वृतोस्मीति प्रतिवचनम्।

कर्म्मभेदश्चोक्तो मत्स्यपुराणे।

गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्ततः।
पठध्वमिति तान् ब्रूयादाचार्य्यं त्वभिपूजयेत्॥

---

* लक्षण सम्पूर्णा इति क्वचित् पाठः।

यजध्वमिति तान् ब्रूयाद्धोतृकान् पुर एव तु ।
उत्कृष्टमन्त्रजाप्येन तिष्ठध्वमिति जापकानिति ॥

प्रारम्भे सर्व्वकर्म्मणीति लिङ्गपुराणे वचनादस्य सर्व्व व्रतादीनां ऋत्विक्-साध्यधर्म्मसाधारणम् ।

अथ मधुपर्कः ।

आह जावालिः ।

ब्राह्मणमृत्विजं चैव श्रोत्रियं गृहमागतम् ।
अर्च्चयेन्मधुपर्केण स्नातकं प्रियमेव च ॥

विश्वामित्रः ।

सम्पूज्य मधुपर्केण ऋत्विजः कर्म्म कारयेत् ।
अपूज्य कारयन् कर्म्म किल्बिषेणैव युज्यते ॥

अथ होमविधिः ।

देवीपुराणे ।

परिसमुह्यो पलिप्योल्लिख्योद्धृत्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य्य प्रणीय परिस्तीर्य्यार्थवदासाद्य पवित्रे कृत्वा-प्रोक्षणीश्च संस्कृत्यार्थवत् प्रोक्षणीनिरुप्याज्यमधिश्रित्यपर्य्यग्निं कुर्य्यात् स्रुवं प्रतप्य दर्भैश्च संमृज्याभ्युक्ष्य पुनः प्रतप्याभ्युक्ष्यदध्या-दाज्य मुद्वास्योत्थाप्य उत्पूयावेक्ष्य प्रोक्षणीश्च पूर्व्ववदुपयमन् कुशानादाय समिधोप्याधाय पर्य्युक्ष्य जुहुयात् । एष एव विधि-र्यत्र क्वचिद्धोमतः, परिसमूहनं मानस्तोकेत्युपलेपनम् ।

त्वां व्रतेच्छिद्रमिति उल्लिख्य, व्रज ङ्गच्छेत्युद्धृत्य देवस्यत्वेत्य-भ्युक्ष्य अग्निमूर्द्धेति अग्निमुपसमाधाय समिधाग्निं देवस्यत्वेति समिधमादध्यात्, अपि गृह्णामीत्यग्नेरभ्युक्षणं कृत्वाहिरण्य गर्भे दक्षिणतो ब्रह्मा आपोहिष्टे ति उत्तरतः प्रणीता कयानश्चित्र इति प्रणीताप्रस्तारणम्। पवित्रेस्थो वैष्णव्यो सवित्रे हिष्टृनित्याज्य निरूपणं। त्रातारमिति स्रुचम् प्रतप्य अनिशितोसि स पत्नच्चि-दिति सम्मार्ज्जनं। प्रत्युष्टरक्षः इति प्रतपनं। सवितुर्वः प्रसव उत्पुनामीति पुनः प्रतपनं। तदेवाग्निरित्युत्पवनं। धूसरोसीति पर्य्युक्षणम्। प्रजापतये स्वाहा मूलहोमाहुतयः एवं वैदिकोऽग्निः संस्कृतो भवति।

एवं लक्षणसंयुक्तं सर्व्वयज्ञेषु याज्ञिकम्।
विधानं विहितं तत्र ब्रह्मणा मिततेजसा॥
अन्यथा ये प्रकुर्व्वन्ति सूत्रमाश्रित्य केवलम्।
निराशास्तत्र गच्छन्ति सर्व्वे देवा न संशयः॥

अथातः परिस्तरणदेवताः कथ्यन्ते।

परिसमूहने करुपयः, उपलेपने विश्वेदेवाः, उल्लेखने मित्रा-वरुणौ, उद्धरणे पृथिवी, अभ्युक्षणे गन्धर्वाः, अग्न्यासादने सर्व्वाः, दक्षिणासादने ब्रह्मा, उत्तरतः प्रणीतायां सागरः, अर्थावसादने शतक्रतुः, पवित्रबन्धने पितरः, प्रोक्षणीसंस्कारे मातरः, जुहू स्रुक्स्रुवे* तथा ब्रह्मविष्णुमहेश्वराः, आज्यतापने वसवः,

---

* जुहूस्रुवे स्रुचि इति पाठान्तरं।

अधिश्रयणे वैवस्वतः, पर्य्यग्निकरणे मरुतः, उद्वासने स्कन्दः, उत्पवने प्रत्युत्पवने च चन्द्रादित्यौ, आज्यावेक्षणे दिशः सर्व्वाः पवित्राधाने, प्रणीतायामुमा देवी, इध्मे लक्ष्मीः,विश्वस्य भूतानि।

पूर्व्वोक्तानां तु वह्नीनामेकमादाय पावकम्।
होमकर्म्मप्रकर्त्तव्यं विधिं ज्ञात्वा महा मुने॥
एता वै देवताः प्रोक्ता ब्राह्मणानां हिताय वै।
यज्ञेषु पशुबन्धेषु तथा सर्व्वक्रियासु च॥

ब्रह्मोवाच।

वह्नेर्व्विधानं परमं सर्व्वकर्म्मसुखावहम्।
कथयामि नृपश्रेष्ठ नामभेदक्रियादिभिः॥
अग्नेः परिग्रहः कार्य्यः सर्व्वशास्त्रार्थवेदकैः।
वामदक्षिणसिद्धान्ते स्वगृह्यपारगैस्तथा॥
कार्य्यः परिग्रहोवह्नेः सर्व्वसम्पत्तिवेदिभिः।
अन्यथा अन्तरायास्ते भवन्ति धनआयुषोः॥
नित्यव्याधिरधन्योवा सर्व्वलोकतिरस्कृतः।
अविदित्वा यथावच्च तज्ज्ञः सर्व्वसुखायते॥
तस्मात्सर्व्वप्रयत्नेन अग्न्याधेये क्रिया मता।
कुण्डाष्टकं समाख्यातं त्रिभेदन्तु मया तव॥
बहुविधिविधानन्तु एकस्मैवोपचारतः।
स्त्री-बाल-शूद्रैस्तु होतव्यं होतव्यं प्रत्ययं यथा॥
सभ्ये महानसे वापि न कुण्डे च कदाचन।
संस्कृतैर्नामभेदैस्तु रचयित्वा हुताशनम्॥

महाविद्यार्थकुशलैर्होतव्यं कर्म्मकांक्षिभिः।
श्रूयतेच पुरा वत्स अविदित्वा च तत् सुत॥
संस्कृतबहुमानस्तु राज्यभ्रंशमवाप्नुयात्।
तथा वारविहोता च चिरान्मृत्युमवाप्तवान्॥
तस्मादस्थिरवक्रो तु न होतव्यमवेदिना।
वेदनं ते प्रवक्ष्यामि येन सिद्धिः प्रजायते॥
चतुष्कोणोत्थकुण्डे च मण्डले मधुसूदन।
धनुषाकृतिके रुद्रः सर्व्वदेवनमस्कृतः॥
चतुरस्रे भवेदग्निर्मण्डले तु हुताशनः।
अर्द्धचन्द्रेऽनलोऽग्निरग्निरेवं प्रतिष्ठितः॥
द्विजानां देवताःसप्त आचार्यो योगदैवतः।
उदको वरुणो देवो दर्भेषु च महोरगाः॥
स्रुवायान्तु महादेवी स्रुचो देवस्त्रिलोचनः।
तत्संयोगे परः सर्व्वः सर्व्वदेवनमस्कृतः॥
प्रणीता पृथिवी ज्ञेया स्वाधिकारे महामखाः।
पुष्पेषु क्रतवो विद्धि पात्रेषु च महोदधिः॥
वेदीमध्ये तु गायत्री सामस्कृत्यचणे स्थितः।
इन्धने मणिभद्रस्तु त्रिखावज्रधरस्तथा॥
होतारन्तु विजानीयात् चमसादिषु पर्व्वताम्।
अपायां देवता रुद्रस्तालहन्ते च वायवः॥
मन्त्रेषु चरणे सर्व्वे भस्मभूयोपि शङ्कर।
लोकपालस्तु कोणेषु ओङ्कारे सर्व्वदेवताः॥
मातरो होमभागे तु पुतनादिस्फुलिङ्गकाः।

आदित्योऽधिष्ठितस्तेजो लये देवः परः शिवः ।
प्रातर्होमस्तु देवानां प्रहरार्द्धेन भूतिदः ॥
मध्याह्ने तु मनुष्याणां मोक्षहेतोस्त्रियामिकः ।
अपराह्ले पितॄणाञ्च सन्ध्यायाञ्चाङ्गभौतिका ॥
रात्रौ पापविनाशार्थं दिवासिद्धिप्रसाधने ।
प्रहरार्द्धं तु होतव्यमर्द्धरात्रे तथा गुदम् ॥
प्रत्यूषे पुत्रदं वत्स गुदाय सर्व्वकामिकम् ।
क्षणादौ सर्व्वकार्य्येषु सर्व्वप्राप्तिप्रदायकम् ॥
क्षणादिदेवता देया प्रथमाचावराहुतिः ।
अन्यथा विफलं विप्र भवते हवनन्तदा ॥
वाच्यंमृणमयतां प्रीत्यै गौर्य्यै होमो नृपुङ्गव ।
दशधा पुण्यवृद्धिश्च हवनस्नानभोजनैः ॥
देवाकैः शूलपद्माङ्कैः शङ्खचक्रशुभाननैः ।
घृतक्षीररसादीनि गृह्णीयात्तानि बुद्धिमान् ॥
देव्याः स्थापनयष्टीयो वसोर्द्धारैः प्रभाषितैः ।
द्रव्यैर्होमः प्रकर्त्तव्यो अन्यथा ह्यविधानतः ॥
आत्मवेलासु ते तृप्तिं पुष्टं यच्छन्ति देवताः ।
वेलामन्त्रगणानाञ्च अस्तिदैवतगे फलं ॥
एतत्ते कथितं वत्स सर्व्वलोकसुखावहम् ।
होता चेन्मन्त्रहीनस्तु अशुचिर्भवते सदा ॥
तस्मात्तु संस्कृते वह्नौ स्वहोतव्यमवैदिकैः ।
मन्त्राकदकहोतारो ह्यशायजन्ति देवताः ॥
अवैदिकास्तु होतारो नैव प्रीणन्ति वै सुरान् ।

होमात्सर्व्वफलावाप्तिः सर्व्वेषामपि जायते ॥
तस्मात् मन्त्रविधानेन प्रातरेव शुभप्रदः।
पूर्व्वेण्निर्देवता विष्णुर्दक्षिणेन हरः स्मृतः ॥
पश्चिमेन स्थितो ब्रह्मा एता वै अग्निदेवताः।
रुद्रन्तेजसि जानीयात् जलार्थावापि चर्च्चिका ॥
क्रियायुषे तु विप्राणां लक्ष्मीस्तत्राधिदेवता।
एवं प्रतिष्ठिते होमे अग्नयश्च त्रयस्तथा ॥
त्रयोदेवा* स्त्रयः कालास्त्रिरग्नि स्त्रिगुणस्थिताः।
गार्हपत्यो दक्षिणाग्नि राहवनीयश्च ते त्रयः ॥
एकस्यैव समुत्पन्नो वहुभेदा द्विजोत्तम।
शाखाश्चतस्रः श्रीपर्णशुचिवैकङ्कती तथा ॥
खादिराश्मनविल्वाद्यैस्त्रुचोहस्तादिदीर्घतः।
अङ्गुष्ठपरिणाहाढाङ्गुण्ड कुम्भकभूषितम् ॥
पुष्करं पुष्करौ द्वौतु मध्यरेखास्थितौ किल।
स्त्रुकशार्द्धक्रिया कार्य्या दण्डस्तत्र सुशोभनन् ॥
षडङ्गुल परीणाहं भूमियन्त्रविनिर्म्मितम्।
द्व्यङ्गुलं मूलदेशे तु कुम्भपुष्कर मूलगम् ॥
गुढिकान्तद्विजानीयात् त्रिभागेन तु पुष्करम्।
वेदी सप्ताङ्गुला कार्य्या पञ्चवर्णं प्रकल्पयेत् ॥
त्रिनिखातं समं कार्य्यं अग्रं कुशात् षडङ्गुलम्।
गोकर्णाकृतिशोभाढ्यं कनिष्ठाङ्गुलिरन्ध्रगम् ॥

---

* त्रयोदेवा इति क्वचित् पुस्तके पाठः।

घृतनिःक्रमणं कार्य्यं यवत्रयसुरेषितं ।
एवं स्रुवं स्रुचं कृत्वा ताभ्यां होमः सुखावहः ॥
शमीगर्भोऽरणी कार्य्या देव्याहस्तप्रमाणतः ।
वितस्तिपाणिनाहाढ्या मध्यं वै षोडशाङ्गुलम् ॥
वृत्तङ्करद्वयोपेतं दशाङ्गुलसुवृत्तिदम् ।
आपीडं सुसमं कार्य्यं मध्यमायसवेधनम् ॥
घटिकाङ्कुरयागार्थं वालरज्वा समा शमा ।
सुदृढां वह्निमन्त्रेण पूजयित्वा तु पातयेत् ॥
अभावे सूर्य्यकान्तैर्व्वा तदभावे करीषजा ।
सामान्यायतनागारे आनयेत्ताम्रभाजने ॥
शरावे मृण्मये पात्रे कुण्डे पूजान्विते न्यसेत् ।
अग्निचक्रं विधाने तु सर्व्वकर्म्मणि कारयेत् ॥
हेमराजतताम्राणि काष्ठ,शैल,मृदोपि वा ।
रत्नादीनि च पात्राणि शुभवेदाङ्कितानि च ॥
अर्घ,नैवेद्यपूजार्थं बलिदानञ्च कल्पयेत् ।
पश्चादेव विधानेन होमं कुर्य्याद्यथाविधि ॥

मरीचिः ।

प्रागग्राः समिधो ग्राह्याः अखर्वाणीह्यपाटिताः ।
काम्येषु वश्यकर्म्मादौ विपरीता जिघांसतः ॥
विशीर्णा विदला ह्रस्वा वक्रा वहुशिरः कृशाः ।
दीर्घाः स्थूला घुणैर्जुष्टाः कर्म्मसिद्धिविनाशकाः ॥

समिदित्यनुवृत्तौ ब्रह्मपुराणे :

शमी,पलाश,न्यग्रोध,प्लक्ष,वैकङ्कतोद्भवाः।
अश्वत्थो,दुम्बरी,विल्वः चन्दनः-सरलस्तथा।
शालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः॥

छन्दोगपरिशिष्टे कात्यायनः।

नाङ्गुष्ठादधिका कार्य्या समित्स्थूलतया क्वचित्।
नविमुक्तत्वचा चैव न सकीटा न पाटिता॥
प्रादेशान्नाधिका न्यूना न तथा स्यात् द्विशाखिका।
न सपर्णा समित् कार्य्या होमकर्म्मसु जानता॥

छन्दोगपरिशिष्टे कात्यायनः।

पाण्याहुतिर्द्वादशपर्व्वपूरिका।

स्वङ्गारिणि स्वर्चिषि तत्र पावके॥

योनर्च्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।
मन्दाग्निरामयावी च दरिद्रश्चैव जायते॥
तस्मात् समिद्धे होतव्यं न समिद्धे कथञ्चन।
आरोग्यमिच्छतायुश्च श्रियमात्यन्तिकीं तथा॥
जुहुयांश्च हुते चैव पाणिशूर्पस्रुवादिभिः।

अथ वक्ष्यमाणेषु तिथ्यादिव्रतेषु देवतामूर्त्तीनां पूज्यत्वात् देवतामूर्त्तयउच्यन्ते।

विष्णुधर्म्मोत्तरे।

विनायकस्तु कर्त्तव्यो गजवक्त्रश्चतुर्भुजः।

स्थलकश्चाक्षमाला च तस्य दक्षिणहस्तयोः ॥
पात्रञ्चोदकपूर्णञ्च परशुश्चैव वामतः ।
दन्तश्चास्य न कर्त्तव्यो वामे रिपुनिसूदन ॥
पादपीठकृतः पाद एक आसनगो भवेत् ।
पूर्णं चोदकपात्रे च कराग्रन्तस्य कारयेत् ॥
लम्बोदर स्तथाकार्य्य स्तब्ध कर्णश्च यादव
व्याघ्रचर्म्माम्बरधरः सर्पयज्ञोपवीतवान् ॥

स्थलकं, गजदन्ताकारं ।

गणेशस्य ।

देवी सरस्वती कार्य्या सर्व्वाभरणभूषिता ।
चतुर्भुजा सा कर्त्तव्या तथैव च समुत्थिता ॥

समुत्थिता, जर्द्धा ।

पुस्तकञ्चाक्षमाला च तस्या दक्षिणहस्तयोः ।
वामयो श्च तथा कार्य्या वैणवी च कमण्डलुः ॥

वैणवी, वीणा ।

समपाद प्रतिष्ठा च कार्य्या सौम्यमुखी तथा ।
सरस्वती ।

हरेः समीपे कर्त्तव्या लक्ष्मीस्तु द्विभुजा नृप ।
दिव्यरूपाम्बरधरा सर्व्वाभरणभूषिता ॥

गौरी शुक्लाम्बरा देवी रूपेणाप्रतिमा भुवि*।
पृथक् चतुर्भुजा कार्य्या देवी सिंहासना शुभा ॥
सिंहासनस्था कर्त्तव्यं कमलञ्चारुकर्णिकम्।
अष्टपत्रं महाभाग कर्णिकायान्तु सा स्थिता ॥
विनायकवदासीना देवी कार्य्या महाभुजा।
दृहन्नाल-ङ्करे कार्य्यं तस्याश्च कमलं शुभम् ॥
दक्षिणे यादवश्रेष्ठ केयूरं प्रान्तसंस्थितम्।
वामेऽमृतघटः कार्य्यस्तथा राजन् मनोहरः ॥
तस्याश्च द्वौ करौ कार्यौ विल्वशङ्खधरौ द्विज।
आवर्जितघटं कार्य्यं तत् पृष्ठेकुञ्जरद्वयं ॥
देव्याश्च मस्तके पद्मं तथा कार्य्यं मनोहरम्।

लक्ष्मीः।

पयसङ्ग्रहे।

पद्मस्था पद्महस्ता च गजोत्क्षिप्तघटप्लुता।
श्रीः पद्ममालिनी चैवकालिकाकृतिरेव च ॥

श्रीः।

विश्वकर्म्मशास्त्रे।

चैत्रे कोला पुरादन्ये महालक्ष्मीर्य्यदोच्यते।
लक्ष्मीवत् सा तदा कार्य्या रूपाभरणभूषिता ॥
दक्षिणाधः करे पात्रमूर्द्धे कौमोदकी ततः।

* द्विवीति क्वचित् पाठः।

वामोर्द्धे खेटकं धत्ते श्रीफलन्तदधः करे ॥
विभ्रती मस्तके लिङ्गं पूजनीया विभूतये ।

महालक्ष्मीः ।

विष्णुधर्मोत्तरे ।

अष्टादश भुजा कार्य्या भद्रकाली मनोहरा ।
आलीढस्थासनस्था च चतुःसिंहे रथे स्थिता ॥
अक्षमाला त्रिशूलञ्च खड्गश्चन्द्रश्च यादव ।
वाणचापे च कर्त्तव्ये शङ्खपद्मौ तथैव च ॥
स्रुक् स्रुवौ च तथा कार्यौ तथोदककमण्डलू ।
दण्डशक्ती च कर्त्तव्ये कृष्णाजिन-हुताशनौ ॥
हस्तानां भद्रकाल्यास्तु भवेत् कान्तिकरः करः ।
एकश्चैव महाभाग रत्नपात्रधरो भवेत् ॥

भद्रकाली ।

विश्वकर्म्मशास्त्रात् ।

निगद्यते ह्यथो चण्डी हेमाभा सा सुरूपिणी ।
त्रिनेत्रा यौवनस्था च क्रुद्धा चोर्द्धस्थिता मता ॥
कृशमध्या विशालाक्षी चारुपीनपयोधरा ।
एकवक्त्रा तु सुग्रीवा वाहुविंशतिसंयुता ॥
शूलासि शङ्खचक्राणि वाण शक्तिपवीनपि* ।
अभयण्डमरुञ्चैव छत्रिकां दक्षिणे करे ॥
ऊर्द्ध्वादि क्रमयोगेन विभ्रती सा सदा शुभा ।

* वाणशङ्कुपवीनपीति क्वचित् पाठः ।

नागपाशस्तथा खेटं कुठाराङ्कुशकार्मुकम्॥
घण्टा,ध्वज,गदा,दर्पं,मुद्गरं वाम एव च।
तदधोमहिषश्छिन्नमूर्द्धा पतितमस्तकः॥
शस्त्रोद्यतकरस्तस्थः तद्ग्रीवासम्भवः पुमान्।
शूलभिन्नो वमद्रक्तोरक्त भ्रूमूर्द्धजेचणः॥
सिंहेन खाद्यमानश्च पाशबद्धो गले भृशम्
याम्याङ्घ्राक्रान्तसिंहाच सव्याङ्घ्रालीढगासुर॥
चण्डोचोद्यतशस्त्रेयस्याशेषरिपुनाशिनी।

पवि,र्व्वज्रं।

असुरे, महिषे।

चण्डिका।

शक्तिं वाणं तथा शूलं खड्गञ्चक्रञ्च दक्षिणे।
चन्द्रविम्बमधो वामे खेटमूर्द्ध कपालकम्॥
शूलं चक्रञ्च* विभ्राणा सिंहारूढा च दिग्भुजा।
एषा देवी समुद्दिष्टा दुर्गा दुर्गापहारिणी॥

दिग्भुजा,दशभुजा॥

दुर्गा। नन्दा भगवती देवी भारद्वाजाभिनन्दजा।
वर-पाश-ङ्कुश-आनि विभ्रती च चतुर्भुजा॥

---

* शुकपत्रकचेति क्वचित् पाठः।

गौरवर्णा गजस्था* वा खड्ग-खेट-वराभया ।
नन्दा । अम्बा कुमुदवर्णाभा पाशांकाभीतिधारिणी ॥
अम्बा । चतुर्बाहुः प्रकर्त्तव्या सिंहस्था सर्व्वमङ्गला ।
अच सूत्रं काजं दधे मूलकुण्डीधरोत्तरे ॥

सर्व्वमङ्गला ।

एकवीणा जया कर्णपूरा नग्ना खरस्थिता ।
वङ्गीत्था कर्णिकाकर्णी तैलाभ्यक्तशरीरिणी ॥
वामपादे लसल्लोहकल्पकण्टकभूषणा ।
वर्द्धयन्मूर्द्धजाक्लष्टा कालरात्रिर्भयङ्करी ॥

काल रात्रिः ।

शङ्खमूर्द्धकरादर्शं विभ्रती वामपार्श्वतः ।
याम्ये फलाञ्जनीहस्ता ललितोर्द्धा सुभूषणा ॥

ललिता ।

तुङ्गनासा च लम्बोष्ठी लम्बमानस्तनोदरी ।
आलोहिता स्मृता ह्येषा ज्येष्ठा लक्ष्मीरिति श्रिये ॥
उत्पलाभयहस्तेयं द्विभुजा वीरवन्दिता† ।
ज्येष्ठा । रक्तज्येष्ठा च नीलाच भूतलन्वितपादिका ॥
भूतलं स्पृशते दोर्भ्यां द्विभुजा वीरवन्दिता ।

नीलज्येष्ठा ।

गौरी कुमारिका रूपा ध्यायमाना महेश्वरैः ।

---

* कजस्थेति क्वचित् पाठः ।

† खेयसेसदेति क्वचित् पाठः ।

वरदाभयहस्ता सा द्विभुजा श्रेयसे सदा ॥
अक्षसूत्रा भये पद्मं तस्याधश्च कमण्डलुः।
गौर्य्यां मूर्त्तिश्चतुर्बाहुः कर्त्तव्या कमलासना ॥

गौरी। श्यामवर्णा विशालाक्षी क्षीरारुणनिभानना* ।
द्विभुजा बिभ्रती लिङ्गं चर्म्म शस्त्रन्तु दक्षिणे ॥
सिंहासनोपविष्टेयं मुक्ताभरणमूर्द्धजा।
भूत प्रेत, पिशाचाद्यैः सेविता तु विशेषतः ॥
इन्द्ररक्षैश्च गन्धर्वैः सिद्धविद्याधरादिभिः।
अश्वत्थस्याप्यधो देवी भूतमातेति विश्रुता ॥

भूतमाता।

सुरभिर्गोमुखा देवी† सुरूपा‡ सर्व्वभूषणा।
ग्रासमुष्टिं तथा कुण्डीं बिभ्राणा भूतिपुष्टिदा ॥

सुरभिः।

निद्रा तु शयनारूढा सुसौम्या मुकुलेक्षणा।
पानपात्रधरा चेयं द्विभुजा परिकीर्त्तिता ॥

योगनिद्रा।

अथातः सम्प्रवक्ष्यामि मातृरूपाणि ते जय।
तत्र ब्राह्मी चतुर्वक्त्रा षड्भुजा हंससंस्थिता ॥
पिङ्गला भूषणोपेता मृगचर्म्मोत्तरीयका।

---

* निभां शुकेति क्वचित् पाठः।

† गौरीति क्वचित् पाठः।

‡ स्त्रीरूपेति क्वचित् पाठः।

वरं सूत्रं स्रुवं धत्ते दक्षबाहुत्रये क्रमात् ॥
वामे तु पुस्तकं कुण्डीं बिभ्रती चाभयप्रदा ।
माहेश्वरी वृषारूढा पञ्चवक्त्रा त्रिलोचना ॥
शुक्लेन्दुभृज्जटाजूटा शुक्ला सर्व्वसुखप्रदा ।
षट् भुजा वरदा दक्षे सूत्रं डमरुकं तथा ॥
शूल-घण्टा-भयं वामे सैव धत्ते महा भुजा ।
कौमारी रक्तवर्णा स्यात् षड्वक्त्रा सार्कलोचना ॥
रविबाहुर्मयूरस्था वरदा शक्तिधारिणी ।
पताकां बिभ्रती दण्डञ्चापम्बाणं च दक्षिणे ॥
वामे चापमथो घण्टां कमलं कुक्कुटं त्वधः ।
परशुं बिभ्रती तीक्ष्णं तदधस्त्वभयान्विता ॥
वैष्णवी तार्क्ष्यगा श्यामा षड्भुजा वनमालिनी ।
वरदा गदिनी दक्षे बिभ्रती चाम्बुजस्रजम् ॥
शङ्खचक्राभया वामे साचेयं विलसद्भुजा ।
कृष्णवर्णा तु वाराही शूकरास्या महोदरी ॥
वरदा दण्डिनी खड्गं बिभ्रती दक्षिणे सदा ।
खेटपाशाभया वामे सैव चापि लसद्भुजा ॥
ऐन्द्री सहस्रदृक् सौम्या हेमाभा गजसंस्थिता ।
वरदा सूत्रिणी वज्रं बिभ्रत्यूर्द्धन्तु दक्षिणे ॥
वामे तु कलशं पात्रं त्वभयं तदधः करे ।
चामुण्डा प्रेतगा रक्ता विकृतास्याहिभूषणा ॥
दंष्ट्राग्रा क्षीणदेहा च गर्त्ताक्षी भीमरूपिणी ।
दिग्बाहुः क्षामकुक्षिश्च मुशलं कवचं शरम् ॥

अङ्कुशं बिभ्रती खड्गं दक्षिणेष्वथ वामतः।
खेटं पाशन्धनुर्दण्डं कुठारं चेति बिभ्रती॥
चण्डीका श्वेतवर्णा स्यात् शवारूढा* च षड्भुजा।
जटिला वर्तुलाक्षा वरदा शूलधारिणी॥
कर्णिकां बिभ्रती दक्षे पानपात्राभयान्यतः॥
इत्येवं मातरः प्रोक्ता रूपभेदव्यवस्थया।

इति ब्राह्म्यादिमातृरूपं।

गौर्य्यादि मातरस्तु भविष्यत् पुराणे निरूपिताः।
गौरी पद्मा-शची-मेधा सावित्री विजया जया।
देवमाता स्वधा स्वाहा तथान्या लोकमातृकाः॥
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह।
पूज्या स्त्रियोऽथवार्च्चायां वरदा भयपाणयः॥

नान्दीमुखमातरः॥

नवपद्मान्विते स्थाने पूज्या दुर्गास्वमूर्त्तितः।
आदौ मध्ये तथेन्द्रादौ † नवतत्त्वाक्षरैः क्रमात्॥
अष्टादश भुजैका तु पीनवक्षोरुहोरुका।
सर्व्वालङ्कारसंयुक्ता सर्व्वसिद्धिप्रदायिनी॥
मूर्द्धजं ‡ खेटकं घण्टां आदर्शं तर्जनीधनुः।
ध्वजं डमरुकं पाशं बिभ्रती वामपाणिभिः॥
शक्ति,मुद्गर-शूलानि वज्रं शङ्खमथाङ्कुशम्।

---

* शिवारूपेति क्वचित् पाठः।

† इन्द्राद्याविति क्वचित् पाठः।

‡ पूर्व्वजमिति क्वचित् पाठः।

शलाकां मार्गणं चक्रं दधाना दक्षिणैः करैः ॥
जयमिच्छद्भिरित्येताः पूजनीया महात्मभिः ।
शेषाः षोड़शहस्ताश्च शलाका मार्गणं विना ॥
रुद्रचण्डा* प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवतीचैव चण्डरूपातिचण्डिका ॥
नवमी चोग्रदण्डा च मध्यस्था वह्निसन्निभा ।
रोचना वारुणा कृष्णा नीला शुक्ला च धूम्रिका ॥
पीता च पाण्डुरा ज्ञेया आलीढस्था हरिस्थिता ।
महिषस्था समस्तोका दैत्यमूर्द्धजमुष्टिका ॥
पद्माकृती रथस्थाप्या इत्युक्तं स्कन्दयामले ।

इति नवदुर्गायाः ।

वृत्तस्था† जटिला चाद्या ‡ वह्निज्वालासमप्रभा ।
कपालाभयहस्तोग्रा वामा वामफलप्रदा ॥
द्विबाहुरेकवक्त्रैषा विधातव्या विपश्चिता ।
वामा । पाटलाभा भवेद्दष्टाकपालवरधारिणी ॥
उग्रा महाबला भूत्यै शत्रुघ्नी शेषपूर्व्वजा ।
ज्येष्ठा । रक्तवस्त्रा तथा रौद्री कपालचमरीकरा ॥
शेषपूर्व्वा तु विज्ञेया कृष्णवक्त्रा सुभीषणा ।
रौद्री । घनश्यामा ततः काली ताम्ररक्तनिभानना ॥
कपाल कर्णिका हस्ता विज्ञेया भयनाशिनी ।

---

* उग्रचण्डेति क्वचित् पाठः ।

† व्रतस्थेति क्वचित्पाठः ।

‡ प्रोक्तेति क्वचित् पाठः ।

काली। नीलशुभ्रा महादेवी विकर्णी कलपूर्व्विका।
कपालशक्तिहस्तेयं भयहृच्च शुभप्रदा॥

कलविकर्णी।

बभ्रुवर्णा विशालाक्षी कपालजपमालिका।
विश्राणा शान्तिदा भूत्यै बलपूर्णा विकर्णिका॥

वलविकर्णिका।

ताम्राभा श्वेतवर्णा स्यात् बलप्रमथनी शुभा।
कपालपाशिनी चेयं सर्व्वशत्रुक्षयङ्करी॥

बल प्रमथनी।

जया कुसुमवर्णाभा दंष्ट्रिणी च महोदरी।
कपालवज्रिणी भूतदमनी सर्व्वपूर्व्विका॥

सर्व्वभूतदमनी।

नीलताम्रारुणाभासा पृथुवक्त्रा मनोन्मनी।
कपालखड्गिनी भूत्यै शत्रूणां भयवर्द्धनी॥

मनोन्मनी।

विश्वकर्म्मशास्त्रात्।

अक्षसूत्रञ्च कुण्डीं च हृदयाग्रे पुटाञ्जलिं।
पञ्चाग्निकुण्डमध्यस्था कृष्णान्तामनुधारयेत्॥

कृष्णा। अक्षसूत्रञ्च कमलं दर्पणञ्च कमण्डलुं।
उमा विभर्त्ति हस्ते तु पूजिता त्रिदशैरपि॥

उमा। अक्षसूत्रं शिवं देवगणाध्यक्षं कमण्डलुं।

अग्निकुण्डद्वयं पार्श्वे पार्व्वती पर्व्वतोद्भवा ॥

पार्व्वती ।

मार्कण्डेय पुराणे ।

सा भिन्नाञ्जनसङ्काशा दंष्ट्राङ्कितवरानना ।
विशाललोचना नारी बभूव तनुमध्यमा ॥
खड्ग,पात्र-शिरः खेटैरलङ्कृत्य चतुर्भुजा ।
कबन्धहारशिरसा बिभ्राणां हि शिरःस्रजम् ॥

महाकाली ।

सैव शिवरात्रिः ।

विष्णुधर्म्मोत्तरात् ।

लम्बोदरी तु कर्त्तव्या रक्ताम्बरपयोधरा ।
शूलहस्ता महाभागा भुजप्रहरणा तथा ॥
कार्पासकलुषा देवी वारुणी चातिसुन्दरी ।
वृहन्नखा च कर्त्तव्या बहुवाहुस्तथैव च ॥
चामुण्डा कथिता चैव सर्व्वसत्वबशङ्करी ।

वारुणीचामुण्डा ।

तथैवार्त्तमुखी शुष्का शुष्ककाया विशेषतः ।
बहुवाहुयुता देवी भुजगैः परिवेष्टिता ॥
कपालमालिनी भीमा तथा खट्वाङ्गधारिणी ।

शिवदूती तु कर्त्तव्या शृगालवदना शुभा।
आलीढासनसंस्थाना तथा राजंश्चतुर्भुजा।
असृक्पात्रधरा देवी खड्गशूलधरा तथा॥
चतुर्थस्तु करस्तस्यास्तथाकार्य्यस्तु मांसपः।

शिवदूती मत्स्यपुराणे।

कात्यायन्याः प्रवक्ष्यामि रूपं दशभुजं तथा।
त्रयाणामपि देवानामनुकारानुकारिणीं।
जटाजूटसमायुक्तामर्द्धेन्दुकृतलक्षणां*।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननां॥
अतसीपुष्पसङ्काशां सुप्रतिष्ठां सुलोचनां।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम्॥
सुचारुदशनां,† तद्वत्पीनोन्नतपयोधराम्।
त्रिभागस्थानसंस्थानां महिषासुरमर्द्दिनीं॥
त्रिशूलं दक्षिणे दध्यात् खड्गञ्चक्रं तथैव च।
तीक्ष्णबाणं तथा शक्तिर्वामतो विनिबोधत॥
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च।
घण्टाञ्च परशुञ्चापि चामरं सन्निवेशयेत्॥
अधस्तान्महिषं विन्द्याद्विशिरस्कं प्रदर्शयेत्।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम्॥
हृदिशूलेन निर्भिन्नं तिर्य्यग्वृत्ति विभूषणम्‡।

---

* कृतशेखरामिति क्वचित् पाठः।

† सुचारुदशनामिति क्वचित् पाठः।

‡ निर्य्यदन्त्रविभूषितमिति क्वचित् पाठः।

रक्तरक्तीकृताङ्गञ्च रक्तविस्फारितेक्षणम् ॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ।
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ॥

इति कात्यायन्याः ।

मन्त्रदीपिकायां ।

सिंहारूढाम्बिका वाच्या भूषिता दर्पणोद्वहा ।
वामभुजे दर्पणोद्वहा दक्षिणे वरयुक्ता । यदुक्तम् ।
निशायुद्धे करे प्रोक्तो वरः साधारणः सदा ॥

अभयञ्चेति ।

खड्गखेटधरा द्वाभ्यां कर्त्तव्या च चतुर्भुजा ।

अम्बिकायाः ।

लक्षणसमुच्चये ।

दशबाहुस्त्रिनेत्रा च शस्त्र-शक्त्य-सि-डामरम् ।
बिभ्रती दक्षिणे हस्ते वामे घण्टाञ्च खेटकम् ।
खट्वाङ्गञ्च त्रिशूलञ्च देवी योगेश्वरी मता ॥

योगेश्वर्य्याः ।

एवंरूपा भवेदन्या पाशाङ्कुशयुतारुणा ।
भैरव्याख्या यदीष्टा तु भुजैर्द्वादशभिर्युता ॥

भैरव्याः ।

विश्वकर्म्मशास्त्रात् ।

कमण्डल्वक्षसूत्रे च विभ्रती वज्रमङ्कुशम् ।
गजासनस्थिता रम्भा सुरूपा सर्व्वकामदा ॥

रम्भायाः ।

देवीपुराणे ।

शिवा वृषासना कार्य्या त्रिनेत्रा वरपाणिका ।
डमरुरगधारीच त्रिशूलाऽभयदायिका ॥

शिवायाः ।

सुमध्याङ्कारयेत् कीर्त्तिं नीलोत्पलव्यवस्थिताम् ।
सर्व्वाभरणभूषाङ्गीं कलशोत्पलधारिणी ।
मदिरोदनगन्धा या महार्घमणिभूषणा ॥ तुष्टिः ।
सिद्धिर्द्देवी प्रकर्त्तव्या सिद्धार्थकवरप्रदा ।
सितचन्दनगन्धा या सितपङ्कजभूषिता ॥
सितासनस्थिता देवी प्रतिहारोपशोभिता । सिद्धिः ।
सुन्दरीङ्कारयेदृद्धिं पर्य्यङ्कासनसंस्थितां ॥
दर्पणालोकसुमनां तिलकालकभूषिताम् ।
माला,चामरशोभाढ्यां वेणुवीणासदाप्रियां ॥ ऋद्धिः ।
क्षमा तु सुमुखी कार्य्या योगपट्टोत्तरीयका ।
पद्मासनकृताधारा वरदोद्यतपाणिका ।
शूलमेखलसंयुक्ता प्रशान्ता योगसंस्थिता ॥ क्षमा ।
सुसिद्धा वैष्णवी कार्य्या खड्गचक्रगदाम्बुजा ।
वनमालाकृतापीडा पीतवस्त्रा सुशोभिता ॥

वैष्णवी ।

ऐन्द्री सुरवराध्यक्षा गजराजोपरिस्थिता ।
वज्राङ्कुशधरा देवी हारकेयूरभूषिता ॥ ऐन्द्री ।
वैवस्वती प्रकर्त्तव्या दुर्धरा महिषोपरि ।
शूकरास्या कपालेऽसृक्पिबन्ती दण्डधारिणी ॥ याम्या ।
तेजोधिका प्रकर्त्तव्या दीप्तिश्चन्द्रासनस्थिता । दीप्तिः ।
कमनीया रतिः कार्य्या वसन्तोज्ज्वलभूषणा ॥
नृत्यमाना शुभा देवी समस्ताभरणैर्युता ।
वीणावादनशीला च मदकर्पूरचर्च्चिता ।
दण्डाक्षसूत्रधरा च व्रतस्थायोगसंस्थिता । रतिः ।
श्वेता पूर्णेन्दुसदृशा श्वेतपङ्कजसंस्थिता ॥ श्वेता ।
भद्रा सुभद्रा कर्त्तव्या भद्रासनव्यवस्थिता ।
नीलोत्पलफलहस्ता शूलसूत्राक्षधारिणी ॥ भद्रा ।
सिंहासनस्थिता देवी जटामुकुटमण्डिता ।
शूलाक्षसूत्रधरा च वरदा भयचापधृक् ॥
दर्पणं शरखेटञ्च खड्गचन्द्रधरा शिवा ।
सुरूपा लक्षणोपेता सुस्तनी चारुभाषिणी ।
सर्व्वाभरणभूषाङ्गी सर्व्वशोभासमन्विता ॥

मङ्गला ।

जयाञ्च विजयां कुर्य्यात् शूलपद्माक्षधारिणीं ।
वरोद्यताञ्च सिंहस्थां सर्व्वकर्म्मप्रसाधिनीं ॥

विजया ।

काली करालवक्त्रा च चण्डपाशोद्यता भवेत् ।

काली। घण्टाकर्णी प्रकर्त्तव्या घण्टात्रिशूलधारिणी।

घण्टाकर्णी।

जयन्ती सुन्दरी कार्य्या कुन्तशूलासिधारिणी।
खेटकव्यग्रहस्ता च पूजनीया शुभान्वितैः॥

जयन्ती।

दितिर्दैत्यनुता देवी यदा पूज्या महामुने।
दण्डासनस्थिता भद्रा सर्व्वाभरणभूषिता॥
फलनीलोत्पलकरा चोत्सङ्गशिशुभूषिता। दितिः।
अक्रोधा रुन्धती देवी सितवस्त्रा व्रतस्थिता॥
पत्रपुष्पोदककरा चन्दनेन सुचर्च्चिता।

अरुन्धती।

अपराजिता च कर्त्तव्या सिंहारूढा महाबला।
पिनाकेषुकराचैव* खड्गखेटकधारिणी॥
त्रिनेत्रेन्दुजटाभारा कृतवासुकिकङ्कणा।

अपराजिता।

कौमारी चैव कर्त्तव्या मयूरासनशक्तिभृत्।
त्रिदण्डी कालरूपा च रक्तमाल्या सकुक्कुटा॥

कौमारी।

मयदीपिकायां।

चतुःषष्टियोगिनीरूपाणि।

* पिनाकशरहस्ताचेति क्वचित् पाठः।

वज्रस्याभयभृद्वास्ये कारयेत् खेटकभृत्ततः ॥
हेमभूषणभूषा स्यादक्षोभ्या करिसंस्थिता ।

अक्षोभ्या ॥ १ ॥

अक्षकर्णी तु गौराङ्गी कम्बुत्राणाभयावहा ।
धनुःकपालभृत्सौम्ये ऋक्षस्था तर्ज्जनोस्थिता ॥

ऋक्षकर्णी ॥ २ ॥

राक्षसी हेमवर्णा स्याच्चारुगात्री वृषस्थिता ।
कुठाराशनिभृद्वास्ये वामे पाशाङ्कुशान्विता ॥

राक्षसी ॥ ३ ॥

क्षपणा चम्पकच्छाया दक्षिणे मुद्गराङ्कुशा ।
कपालञ्च फलं सव्ये धत्ते कुञ्जास्थिसंस्थिता* ।

क्षपणा ॥ ४ ॥

क्षया कूर्म्मस्थिता गौरी जपस्था सा घटान्विता ।
वामे कपालपिण्डाभृत्सर्व्वालङ्कारभूषिता ॥ ५ ॥

पिङ्गाक्षीस्याद्बभ्रुवर्णा त्रिनेत्रा च हयस्थिता ।
कौशेयपाशभृद्वास्ये वामेवाङ्कुशखेटिनी ।

पिङ्गाक्षी ॥ ६ ॥

अक्षया हेमवर्णा स्याच्चारुगात्री वृकस्थिता ॥
कुठारखड्गभृद्वास्ये वामेपाशाङ्कुशान्विता ।

---

* कुञ्जास्थि संस्थितेति पाठान्तरं ।

अजया ॥ ७ ॥

जया तु श्रवगा पीता शक्तिभिन्दिधनुःकरा।
याम्ये डमरुशूलेषु वस्तभृत् मृगसंस्थिता ॥

जया ॥ ८ ॥

शक्ति खड्गधरा त्र्यचा खेटपाशकपालिनी।
रक्ता वह्निःस्थिता वाला क्रीडन्ती दहनैः सह॥

वाला ॥ ९ ॥

लीला लीलावती रक्ता दचपाणिजयान्विता।
विभ्राणा पश्चिमस्याशं वामे मस्तार्द्धमम्बुजम् ॥

लीला ॥ १० ॥

वृषारूढा जया रक्ता याम्ये दण्डासिधारिणी।
कर्त्तरीकार्द्धभृद्वामे तर्ज्जन्यासक्तसिक्थका* ॥

लया ॥ ११ ॥

कर्त्तरी मार्ज्जनी याम्ये सौम्ये पिडनकङ्करे।
शूलं करुयुतं द्वाभ्यां धत्तेलोलातु सारदा ॥

लोला ॥ १२ ॥

वामे लुलापमुण्डञ्च तत् पिवन्त्यसृक्करक्तिका।
लङ्के शोरस्थिता लङ्का खादन्ती पिशितङ्घनम् ॥

* तर्जन्यासक्तहृत्तिका। इति क्वचित् पाठः।

लङ्का ॥ १३ ॥

त्रिफला शाकखोटादामोदकाशी च दक्षिणे* ।
शोणालङ्केश्वरी कुम्भे डिम्भाभूर्वोस्तु बिभ्रती ॥

लङ्केश्वरी ॥ १४ ॥

दक्षिणे बरदं चक्रे वामे कङ्गणकङ्करे ।
बिभ्राणा कोलगा रक्ता लालासृग्लालसा मता ॥

लालसा ॥ १५ ॥

द्वीपिस्था विमला रक्ता नाचालङ्कारभूषिता ।
कर्त्तरीकुम्भभृद्याम्ये वामे पाशकपालिनी ॥

विमला ॥ १६ ॥

कृष्णा हुताशनाजस्था ज्वालिनी दक्षिणे शुभा ।
वामे त्वभयहस्ता स्याद्विष्टराज्यघटान्विता ॥

हुताशना ॥ १७ ॥

शूकरास्था विशालाक्षी त्रिसन्ध्यस्थापितेतरा ।
घण्टावाद्यकरा सौम्ये याम्ये कर्त्तरिकाभया ॥

विशालाक्षी ॥ १८ ॥

हुङ्कारा मीनवक्त्रास्यात् मीनगा साक्षमालिनी ।
मुशलं बिभ्रती वामे सौम्ये तु फलपल्लवौ ॥

हुङ्कारा ॥ १९ ॥

अङ्गाभ्यां बिभ्रती वालौ पर्य्यङ्के वडवामुखी ।

* त्रिफलाशाकको टेन्द मोदकाशिवदक्षिणे इति क्वचित् पाठः ।

समत्स्यकूर्म्मभृद्याम्ये कृष्णा नीलधरान्वितः॥

वड़वामुखो॥ २०॥

तर्ज्जन्यभयभृत्सौम्ये याम्ये दण्डकपालिनी।
कृष्णा हाहारवा क्रूरा रासभस्था खरस्थिता॥

हाहारवा॥ २१॥

लुलापास्या लुलापस्था महाक्रूरा सितेतरा।
वामेऽस्याः पाशमैलाजं दक्षिणे दण्डलेखनी॥

महाक्रूरा॥ २२॥

असिता क्रोधना याम्ये खादन्ती मांसमण्डकम्।
वामे विद्युज्जिह्वा क्रूरा सव्ये सीरकपालिनी।
चक्रस्था कर्णमदिरं बिभ्रती जम्बुकस्थिता॥

क्रोधना॥ २३॥

कृष्णा भयानना गृध्री दंष्ट्रोग्रास्थिविभूषणा।
याम्ये स्यात् शिखरं शूलं घर्घरं लेलिहान्यतः॥

भयानना॥ २४॥

त्रिशूल*पृष्ठभृद्वामे मुण्डं डमरुकं शवम्।
बिभ्राणा भाजनं हाभ्यां सर्व्वज्ञा प्रेतगा सिता॥

सर्व्वज्ञा॥ २५॥

जानुक्षिप्तौ करौ कृत्वा उद्यन्ती तरलायते।
शूलडमरुहस्ता च गोधाङ्गा तरला सिता॥

---

* कुशूलेति पाठान्तर।

तरला ॥ २६ ॥

तारा तारगुणैर्युक्ता कौशिकस्था सितेतरा ।
धत्ते शवार्द्धके सौम्ये शूलमुद्गरमन्यतः ॥

तारा ॥ २७ ॥

कृष्णा पद्मस्थिता दक्षे ज्ञानमुद्राक्षमालिनी ।
ऋग्वेदं वामतो धत्ते पुस्तकञ्च कमण्डलुम् ॥

कृष्णा ॥ २८ ॥

रौद्रा कृष्णा* तुरङ्गास्या कवन्धस्था हयानना ।
मुण्ड-शूर्पधरा याम्ये सौम्ये संहारिकाङ्कभृत् † ॥

हयानना ॥ २९ ॥

छिन्नहस्ता शवाकृष्टा सारा स्थूला जटाधरा ।
खट्वाङ्गं डमरुं सौम्ये शूलौल्के बिभ्रती ततः ॥
शवस्था रससंग्राही नृत्यन्ती जटिला सिता ।
कुशूलान् चक्रकङ्कालान्‡ विभ्रती चर्मवासिनी ॥

रससङ्ग्राही ॥ ३० ॥

सवेदकद्विजासक्ता कनिष्ठा शवरालिभा ।
वामे करोपधानासिधरा उल्काधरान्यतः ॥

---

* रौद्राकृष्टेति पुस्तकान्तरे पाठः ।
† संहारिकाम्बुभृदिति पुस्तकान्तरे ।
‡ कुशूलचक्रकङ्कालानिति पुस्तकान्तरे पाठः ।

शवरा ॥ ३१ ॥

स्फटिकाभा गरुत्मस्था सुकान्ता तालुजिह्विका।
शङ्खखेटकहस्ताग्रा याम्ये स्वस्तिकखड्गभृत् ॥

तालुजिह्विका ॥ ३२ ॥

रक्ताची वाहनारूढा रक्तपाना शशिप्रभा।
गदाखड्गधरा याम्ये वामे पाशकपालभृत् ॥

रक्ताची ॥ ३३ ॥

विद्युज्जिह्वा सिता क्रूरा सव्ये सीरकपालिनी।
चक्रस्वरचक्रकर्त्तरि धारिणी दक्षिणे करे ॥

विद्युज्जिह्वा ॥ ३४ ॥

ग्राहस्था चामरच्छत्रभृद्दृतिद्वयसंयुता।
कुम्भ-पाश-धरा श्वेता क्रोधपुत्रा करङ्गिनी ॥

करङ्गिनी ॥ ३५ ॥

मेघनादा तु चन्द्राभा खड्गखेटक-धारिणी।
जालैर्वृता घनारूढा तड़िन्मण्डलसन्निभा ॥

मेघनादा ॥ ३६ ॥

प्रचण्डोग्रा तु नक्रस्था याम्ये स्याः कर्त्तरीफलम्।
कपालं मुण्डमन्यत्र शत्रुघ्ना स्फटिकप्रभा ॥

प्रचण्डोग्रा ॥ ३७ ॥

शुक्लवृषासना रौद्रा विभ्रत्यक्षाक्षसूत्रकम्।

कालकर्णी जगत्ख्याता* कर्णे कालविभूषणा॥

कालकर्णी॥ ३८॥

कर्त्तरीमभयं याम्ये धत्ते श्वेता वरप्रदा।
वृषदंशसमारूढा पूर्णपात्रधरान्यतः॥

वरदा॥ ३९॥

चन्द्रहासा स्थिता गौरी वेदास्यां दोर्द्वयोः क्रमात्।
कमण्डल्वङ्कुशव्यग्रा मन्त्रमाला स्रुचान्विता॥

चन्द्रहासा॥ ४०॥

चन्द्रावली तु हेमाभा हेमसिंहासनस्थिता।
याम्ये ऽक्षमाला मालाभृत् शेषेऽब्ज-ध्वजधारिणी॥

चन्द्रावली॥ ४१॥

फलस्रगन्विता याम्ये कुन्त-कुण्डीधरान्यतः।
रौक्ममाला प्रपञ्चाख्या गौरी विश्वप्रपञ्चिका॥ ४२॥
मर्कटस्था प्रशाखाख्यां बिभ्रतीं करयोर्द्वयोः।
खादन्त्याम्रफलं हृष्टा गौराङ्गी वानरानना॥

प्रपञ्चिका॥ ४३॥

पिचुवक्त्रा मृगव्याली पिङ्गाची याम्यसौम्ययोः।
भिन्दिपालकखेटाभ्यां† पाश-सिभ्याञ्च संयुता॥

---

* जटाख्यातेति पुस्तकान्तरे पाठः।

† भिन्दिमालकखेटाभ्यामिति पुस्तकान्तरे पाठः।

पिचुवक्त्रा ॥ ४४ ॥

काकास्या श्वेनगा गौरी पिशाची रक्तमण्डिता।
कङ्काल-कर्त्तरी खड्गं बिभ्रती याम्यसौम्ययोः॥

पिशाची ॥ ४५ ॥

फल-तूल धरा वामे सौम्ये-शस्त्रासि-धारिणी।
खड्गस्था बभ्रुवर्णा स्यात् पिशिताशातिदुर्व्वला॥

पिशिताशा ॥ ४६ ॥

नृत्यन्ती लोलुपा पीना खरस्था याम्यसौम्ययोः।
खड्गडमरुकर्त्तरीःपाशञ्चैव तु बिभ्रती॥

लोलुपा ॥ ४७ ॥

वमनी पुष्पकस्था स्यात् गौरी यक्षगणान्विता।
गदापट्टिश-भृत्सौम्ये स्थूलतोमरिणी ततः॥

वमनी ॥ ४८ ॥

तपनी सर्पगा गौरी वराङ्गी पन्नगानना।
स्वकर्णयानयोर्भागे* न्यस्तहस्तोग्ररूपिणी॥

तपनी ॥ ४९ ॥

पीता महाखुगा या स्यात् वामनी बिभ्रती करे।
कुठारं लगुडं वामेऽक्षमालां पनसन्ततः॥

* सफणोयानभोगेनेति पुस्तकान्तरे।

वामनी ॥ ५० ॥

शूलभिन्नतुलापास्था सिंहाक्रष्टशरीरिणी ।
जिह्वे द्वे बिभ्रती चैव चतुर्दा विकृतानना ॥ ५१ ॥
शङ्खपूरणिका हाभ्यां वृकाभयधरा हयोः ।
द्विसिंहरथसंस्था स्यात्तालाभा वायुवेगिका ॥ ५२ ॥
भासस्थिता बृहत्कुचिः सौम्ये मुण्डकपालभृत् ।
गौरी महातनुः शौर्ये कर्त्तरीपट्टिकादनी ॥

बृहत् कुचिः ॥ ५३ ॥

उष्ट्रस्था विकृता गौरी भयकृद्विकृतानना ।
तूणञ्च डमरुं याम्ये सौम्ये खड्गाङ्गमस्तकम् ॥

विकृता ॥ ५४ ॥

खेटकं खड्गभृद्वामे* गदा-चक्रा-सिभृत्ततः ।
वनमालावती पीता तार्च्यस्था विश्वरूपिका ॥

विश्वरूपिका ॥ ५५ ॥

मुषलं मुद्गरं याम्ये परशुस्त्वन्धनं ततः ।
बिभ्रती यमजिह्वा स्यात् कराला महिषस्थिता ॥

यमजिह्वा ॥ ५६ ॥

नृत्यन्ती खरगा श्वेता याम्ये डमरुतूलभृत् ॥
सदैत्यशैले मुण्डोग्रा जयन्ती वामहस्तयोः ॥

* खेटमङ्गाजम्हृद्वामेइति पुस्तकान्तरे ।

जयन्ती ॥ ५७ ॥

श्वारूढा दुर्जया श्वेता रौद्री भूतगणावृता।
खड्गकुन्तोद्यतकरा दुर्गकाननवासिनी ॥

दुर्जया ॥ ५८ ॥

असक्तृत् खेटिनीदोर्भ्यां चतुर्द्धार्थ्योस्यसौम्ययोः।
शूलबाणधरा याम्ये धनुःशक्तिकरोन्यतः ॥

यमाङ्किका ॥ ५९ ॥

शकटस्थातिघोरास्या घोरवर्णा यमान्तिका।
मार्ज्जारस्था विडाली च विडालाक्षी भवेत् सिता ॥

विडाली ॥ ६० ॥

वामे तूणञ्च खट्वाङ्गं शूलं टङ्कञ्च विभ्रती।
कृशा पिशाचवक्त्रोग्रा कपालस्था च रेवती ॥

रेवती ॥ ६१ ॥

कुशूलयष्टिभृद्वामे भिन्दिमालाकपालभृत्।
कुण्डाभा पूतना वाचा विकृतास्या शवस्थिता ॥

पूतना ॥ ६२ ॥

कर्त्तरीशूलभृद्याम्ये वामे मुण्डकपालिनी।
श्वेतवर्णा वृषारूढा विजया विजयप्रदा ॥

विजयन्तिका ॥ ६४ ॥

विष्णुधर्मोत्तरात् ।

ब्रह्माणं कारयेद्विद्वान् देवं सौम्यं चतुर्भुजम् ।
बद्धपद्मासनन्तुष्टं तथा कृष्णाजिनाम्बरम् ॥
जटाधरं चतुर्बाहुं सप्तहंसरथस्थितं ।
वामे न्यस्तेतरकरन्तस्यैकन्दोर्युगं भवेत् ॥
एतस्मिन् दक्षिणे पाणावक्षमाला तथा शुभा ।
कमण्डलुं द्वितीये च सर्व्वाभरणधारिणम् ॥
सर्व्वलक्षणयुक्तास्यं शान्तिरूपस्य पार्थिव ।
पद्मपत्रदलाग्राभं ध्यानसंमीलितेक्षणम् ।
अर्च्चायाङ्कारयेद्देवं चित्रे वा वास्तुकर्म्मणि ॥

ब्रह्मा ।

पद्मपत्रासनस्थश्च ब्रह्मा कार्य्यश्चतुर्मुखः ।
सावित्री तस्य कर्त्तव्या वामोत्सङ्गगता तथा ॥

आदित्यपुराणे ।

आदित्यवर्णा धर्म्मज्ञा साक्षमालकरा तथा ।
रूपं पूर्व्वोदितं कार्य्यं रूपमन्यज्जगत्पतेः ॥

प्रजापतिः ।

हंसयाने न कर्त्तव्यो न कार्य्यश्च चतुर्मुखः ।
ब्रह्माख्यमपरं रूपं सर्व्वं कार्य्यं प्रजापतेः ॥
अक्षसूत्रं पुस्तकञ्च धत्ते पद्मं कमण्डलुम् ।
चतुर्व्वक्त्रा तु सावित्री श्रोत्रियाणां गृहे स्थिता ॥

लोकपाल ब्रह्मा।

विश्वकर्म्मा तु कर्त्तव्यः सुररूपधरः प्रभुः।
सन्दंशपाणिर्द्विभुजस्तेजोमूर्त्तिधरो महान्॥

विश्वकर्म्मा।

चतुर्वक्त्रश्चतुष्पादश्चतुर्बाहुः सिताम्बरः।
सर्व्वाभरणवान् श्वेतो धर्म्मःकार्यो विजानता॥
दक्षिणे चाक्षमाला च तस्य वामे च पुस्तकम्।
मूर्त्तिमान् व्यवसायस्तु कार्यो दक्षिणभागतः॥
वामभागे ततः कार्यो वृषः परमरूपवान्।
कार्य्यौ पद्मकरौ मूर्द्ध्नि विन्यस्तौ तु तथा तयोः॥

धर्म्मः।

विश्वकर्म्मशास्त्रात्।

ऋग्वेदः श्वेतवर्ण्णः स्यात् द्विभुजो रासभाननः।
अक्षमालामयः सौम्यः प्रीतश्चाध्ययनोद्यतः॥

ऋग्वेदः।

नीलोत्पलदलाभासः सामवेदो हयाननः।
अक्षमालान्वितो दक्षे वामे कम्बुधरः स्मृतः॥

सामवेदः।

अजास्यः पीतवर्णः स्यात् यजुर्वेदोऽक्षसूत्रधृक।

वामे कुलिशपाणिस्तु भूतिदो मङ्गलप्रदः ॥

यजुर्वेदः ।

अथर्व्वणाभिधो वेदो धवलो मर्कटाननः ।
अक्षसूत्रञ्च खट्वाङ्गं बिभ्राणोयं जयप्रियः ॥

अथर्व्ववेदः ।

शिक्षा शुभ्राभयकरा ज्ञानमुद्रान्विता शुभा ।
अक्षसूत्रा सकुण्डीका द्विभुजा दण्डपङ्कजा ॥

शिक्षा ।

कल्पस्तु कुमुदाभासो वायसास्यो महोदरः ।
दण्डी कुण्डीधरोऽक्षश्यो मेखलाकुण्डलान्वितः ॥

कल्पः ।

सितं व्याकरणं ज्ञेयं मयूरास्यं कटोदरम् ।
वीणाकजान्वितं दिव्यं दिव्यवस्त्रविभूषितम् ॥

व्याकरणम् ।

इन्दुवन्निर्मलं शान्तं बकवक्त्रं कृशोदरम् ।
पाशपङ्कजहस्तं स्याद्वाक्षसूत्रं सपुस्तकम् ।
निरुक्तमिति निर्णीतं छन्दोनिर्णीयतेऽधुना ॥

निरुक्तम् ।

जवाकुसुमसंकाशं छन्दो ज्ञेयं विपश्चिता* ।

* विचक्षण इति पाठान्तरम् ।

चकोरास्यस्तपाकन्तु* मतिं विभ्रच्छिखान्वितम्।
लोहकुण्डलकोपेतं प्रवालक्षतकुण्डलम्॥

छन्दः।

ज्योतिषं तु विड़ालास्यमिन्द्रगोपनिभं शुभम्।
अक्षसूत्रं कजं विभ्रद्धस्तयोर्दक्षवामयोः॥

ज्योतिषम्।

सोमकान्तिसमाभासं मीमांसाशास्त्रमुत्तमम्।
अक्षसूत्रं दधद्दक्षे सुधापूर्णघटं करे॥

मीमांसा।

अतसीपुष्पसङ्काशो न्यायो ज्ञेयो विपश्चिता।
सिंहास्यो दक्षिणे सूत्रं ध्वजं वामकरे दधत्॥

न्यायः।

धर्म्मशास्त्रं सितं शान्तं चाषवक्त्रं कजासनम्।
मुक्ताजपाङ्कुशं दक्षे तुलाहस्तन्तु वामतः॥

धर्म्मशास्त्रम्।

पुराणं चम्पकाभासं शुकवक्त्रं चतुर्द्दलम्।
अक्षसूत्रचये ज्ञेयं नानाभरणभूषितम्॥
इतिहासः कजाभासः शूकरास्यो महोदरः।
अक्षसूत्रं घटं बिभ्रत् पङ्कजाभरणान्वितः॥

---

* जयाक्रान्तु इति पाठान्तरम्।

इतिहास: ।

पीतवर्णो धनुर्वेद: पिकवक्त्रो महातनु: ।
रत्नमालावलिं धत्ते* मस्तके भूषिता जटा: ॥

धनुर्व्वेद: ।

आयुर्वेदो हरिद्राभो वानरास्यो विशालदृक् ।
अक्षसूत्रं सुधाकुम्भं विभ्रदारोग्यदो भृशं ॥

आयुर्व्वेद: ।

नृत्यशास्त्रं सितं रम्यं मृगवक्त्रं जटाधरम् ।
अक्षसूत्रं त्रिशूलञ्च बिभ्राणञ्च त्रिलोचनम् ॥

नृत्यशास्त्रम् ।

पञ्चशास्त्राभिधं शास्त्रं धवलं वृषभाननम् ।
अक्षसूत्रं हलं धत्ते वनमालाविभूषितम् ॥

पञ्चशास्त्रम् ।

शास्त्रं पाशुपतं शुभ्रं व्यालवक्त्रं कृशोदरम् ।
सूत्रपात्रधरं भीमं व्याघ्रचर्म्माम्बरावृतम् ॥

पाशुपतम् ।

पातञ्जलाभिधं रक्तं सर्पवक्त्रं सुतेजसम् ।
अक्षसूत्रं पृदाकुञ्च धारयन् कुण्डलान्वितं ॥

---

* पवित्रं धत्ते इति पाठान्तरम् ।

'पृदाकुः, सर्पः।

पातञ्जलम्।

साङ्ख्यं तत् कापिलं बभ्रु वक्त्रमुज्ज्वलतुन्दिलम्।
जाप्यदण्डधरं दीर्घं नखलोमजटाधरम्॥

साङ्ख्यम्।

अर्थशास्त्रं भवेद्गौरं सारिकाचन्दनं शुभम्।
अक्षसूत्रं फलं बिभ्रदनहारं कमण्डलुं॥

अर्थशास्त्रम्।

विद्या॥ ३३॥

विष्णुधर्म्मोत्तरात्।

ऋग्वेदस्तु स्मृतो ब्रह्मा यजुर्व्वेदस्तु वासवः।
सामवेदस्तथाविष्णुः शम्भुस्त्वाथर्वणो भवेत्॥
शिक्षा प्रजापतिर्ज्ञेयः कल्पो ब्रह्मा प्रकीर्त्तितः।
सरस्वती व्याकरणं निरुक्तं वरुणः प्रभुः॥
छन्दो विष्णुस्तथैवाग्निर्ज्योतिषं भगवान् रविः।
मीमांसा भगवान् सोमो न्यायमार्गो समीरणः॥
धर्म्मश्च धर्म्मशास्त्राणि पुराणञ्च तथा मनुः।
इतिहासः प्रजाध्यक्षो धनुर्वेदः शतक्रतुः॥
आयुर्वेदस्तथा साक्षाद्देवो धन्वन्तरिः प्रभुः।
कलावेदं मही देवी नृत्यशास्त्रं महेश्वरः॥
सङ्कर्षणः पञ्चरात्रं रुद्रः पाशुपतं तथा।
पातञ्जलमनन्तश्च साङ्ख्यञ्च कापिलो मुनिः॥

अर्थशास्त्राणि सर्व्वाणि धनाध्यक्षः प्रकीर्त्तितः ।
कलाशास्त्राणि सर्व्वाणि कामदेवो जगद्गुरुः ॥
अन्यानि यानि शास्त्राणि यत् कर्म्माणि प्रचक्षते ।
स एव देवता तस्य शास्त्रं कार्य्यञ्च देववत् ॥

अधिदेवता ।

अथ मुनिरूपाणि नय संग्रहे ।

उदासीनाः सोपवीताः कमण्डल्वक्षसूत्रिणः ।
जटिलाः श्मश्रुलाः शान्ताः आसीना ध्यानतत्पराः ।
सप्तर्षयो वसिष्ठश्च कार्य्यो भार्य्यासमन्वितः ॥
गौतमश्च भरद्वाजो विश्वामित्रश्च कश्यपः ।
जमदग्निर्वसिष्ठोऽत्रिः सप्त वैवस्वतेऽन्तरे ॥

ऋषयः ।

मरीचि-रत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
प्रचेताश्च वसिष्ठश्च भृगुर्नारद एव च ॥
जटिलाः श्मश्रुलाः शान्ताः कृशा धमनिसन्तताः ।
कुशुम्भाक्षधराः कार्य्या मुनयो द्विभुजा दश ॥
नारदो देवगन्धर्वः साक्षसूत्रकमण्डलुः ।
सेव्यो वै वीणया वामभुजमूलोपगूढया ॥

नारदस्य ।

मुनयो भविष्योत्तरात् ।

अगस्त्यः ।

प्रशत्या काञ्चनं कारयित्वा शक्त्या तु शोभितम् ।

पुरुषाकृतिं प्रशान्तञ्च जटामण्डलधारिणम् ॥
कमण्डलुकरं शिष्यैर्मृगैश्च परिवारितम् ।
मृत्युधुग्विषहन्तारं दर्भहस्तं वरं मुनिम् ॥

अगस्त्यस्य ।

कर्त्तव्याः शक्ररूपेण भृगवो नाम देवताः ।
भुवनो भावनश्चैव सुजन्यः सुजनस्तथा ॥
क्रतुः स्रुवः स्वसुर्नाम व्यजश्च ह्यमुनस्तथा* ।
प्रसवश्चाव्ययश्चैव दक्षो द्वादशकस्तथा ।
भृगवो नामनिर्द्दिष्टा देवा द्वादश यज्ञियाः ॥

भृगवः ।

जीवरूपेण कर्त्तव्या देवाश्चाङ्गिरसस्तथा ।
आत्मा ह्यायुर्मनो दक्षः पदप्राणस्तथैव च ॥
हविष्यश्च गविष्ठश्च ऋतः सत्यश्च तेजसः ।

अङ्गिरसः ।

विष्णुधर्म्मोत्तरात् ।

देवदेवं तथा विष्णुं कारयेद्गरुडस्थितम् ।
कौस्तुभोद्भासितोरस्कं सर्व्वाभरणधारिणम् ॥
सजलाम्बुद सच्छायं पीतदिव्याम्बरं तथा ।
मुखाश्च कार्य्याश्चत्वारो बाहवो द्विगुणास्तथा ॥
सौम्येन्दुवदनं पूर्व्वं नारसिंहन्तु दक्षिणम् ।
कपिलं पश्चिमं वक्त्रं तथा वाराहमुत्तमम् ॥

---

* ह्यपुतस्तथेति क्वचित्पाठः ।

तस्य दक्षिणहस्तेषु बालार्कमुशलाभयाः ।
चर्म्मतोरवराविन्दु वामे च* वनमालिनः ॥
कार्य्याणि विष्णोर्वंमस्य वामहस्तेष्वनुक्रमात् ।

अर्कः, चक्रं 'इन्दुः' शङ्खः ।

विष्णुः ।

एकवक्त्रो द्विबाहुश्च गदाचक्रधरः प्रभुः ।

लोकपालविष्णुः ।

एकवक्त्रश्चतुर्बाहुः सौम्यरूपः सुदर्शनः ।
पीताम्बरश्च मेघाभः सर्व्वाभरणभूषितः ॥
कण्ठेन शुभदेशेन कम्बुतुल्येन राजता ।
वराभरणयुक्तेन कुण्डलोत्तरभूषिणा ॥
अङ्गदी बद्धकेयूरो वनमालाविभूषणः ।
उरसा कौस्तुभम्बिभ्रत् किरीटं शिरसा तथा ॥
शिरः पद्मःस्तथैवास्य कर्त्तव्यश्चारुकर्णिकः ।
पुष्टिश्लिष्टायतभुजस्तनुस्ताम्रनखाङ्गुलिः ॥
मध्येन त्रिवलीभङ्गशोभितेन सुचारुणा ।
स्त्रीरूपधारिणी चोणी कार्य्या तत्पादमध्यगा ॥
तत् करस्थाङ्घ्रियुगलो देवः कार्य्यो जनार्द्दनः ।
तालान्तरपदन्यासः किञ्चिन्निष्क्रान्तदक्षिणः ॥
अनुद्दश्या मही कार्य्या देवदर्शितविस्मिता ।
देवश्च कटिवासेन कार्य्यो जान्ववलंबिना ॥

* चापेचेति क्वचित् पाठः ।

वनमाला च कर्त्तव्या देवजान्ववलम्बिनी।
यज्ञोपवीतं कर्त्तव्यं नाभिदेशमुपागतम्॥
उत्फुल्लकमलं पाणौ कुर्य्याद्देवस्य दक्षिणे।
वामपाणिगतं शङ्खं शङ्खाकारन्तु कारयेत्॥
दक्षिणे तु गदा देवी तनुमध्या सुलोचना।
स्त्रीरूपधारिणी मुग्धा सर्व्वाभरणभूषिता॥
पश्यन्ती देवदेवेशं कार्य्या चामरधारिणी।
कार्य्यन्तन्मूर्द्ध्नि विन्यस्तं देवहस्तन्तु दक्षिणं॥
वामभागगतश्चक्रः कार्य्यो लम्बोदरस्तथा।
सर्व्वाभरणसंयुक्तो वृत्तविष्फारितेक्षणः॥
कर्त्तव्यश्चामरकरो देववीक्षणतत्परः।
कार्य्यं देवकरं वामं विन्यस्तं तस्यमूर्द्धनि॥

वसुदेवः।

वासुदेवस्वरूपेण कार्य्यः सङ्कर्षणः प्रभुः।
स तु शुक्लवपुःकार्य्यो नीलवासा यदूत्तमः॥
गदास्थाने च मुशलञ्चक्रस्थाने च लाङ्गलम्।
कर्त्तव्यौ तनुमध्यौ तु नृरूपौ रूपसंयुतौ॥

सङ्कर्षणः।

वासुदेवस्वरूपेण प्रद्युम्नस्य तथा भवेत्।
सतु दूर्व्वाङ्कुरश्यामः सितवासा विधीयते॥
चक्रस्थाने भवेच्चाप गदास्थाने तथा शरम्।

तथाविधौ तौ कर्त्तव्यौ यथा मुषललाङ्गली ॥

प्रद्युम्नः ।

एतदेव तथा रूपमनिरुद्धस्य कारयेत् ।
पद्मपत्राभ-वपुषो रक्ताम्बरधरस्य तु ॥
चक्रस्थाने भवेच्चर्म्म गदास्थानेऽसिरेव च ।
चर्म्म स्याच्चक्ररूपेण प्रांशुः खड्गो विधीयते ॥
चक्रादीनां स्वरूपाणि किञ्चित्पूर्व्वं सुदर्शयेत् ।
रम्याण्यायुध-रूपाणि चक्रादीन्येव यादव ॥
वामपार्श्वगताः कार्य्या देवानां प्रवराध्वजाः ।
सुपताकायुता राजन् यष्टिस्थास्ते यथेरितम् ॥

अनिरुद्धः ।

विश्वकर्म्मशास्त्रात् ।

लक्ष्मीनारायणौ कार्य्यौ संयुक्तौ दिव्यरूपिणौ ।
दक्षिणस्था विभोर्मूर्त्तिर्लक्ष्मीमूर्त्तिस्तु वामतः ॥
दक्षिणः कण्ठलग्नोऽस्या वामो हस्तः सरोजभृत् ।
विभोर्वामकरो लक्ष्म्याः कुक्षिभागस्थितः सदा ॥
सर्व्वावयवसम्पूर्णा सर्व्वालङ्कारभूषिता ।
सुष्ठुनेत्र कपोलास्या रूपयौवनसंयुता ॥
सिद्धिः कार्य्या समीपस्था चामरग्राहिणी शुभा ।
कर्त्तव्यं वाहनं सव्ये देवाधोभागगं सदा ॥
शङ्खचक्रधरौ तस्य द्वौ कार्य्यौ पुरुषौ पुरः ।
वामनौ हार, केयूर, कीरीट, मणिभूषणौ ॥

उपासकौ समीपस्थौ प्रभोर्ब्रह्मशिवात्मकौ।
रसनां योगपट्टञ्च शिखामञ्जलिमाश्रितौ॥

लक्ष्मीनारायणौ।

पद्मासनसमासीनः किञ्चिन्मीलितलोचनः।
घोणाग्रे दत्तदृष्टिश्च श्वेतपद्मोपरिस्थितः॥
वामदक्षिणगौ हस्तौ उत्तानावेकभागगौ*।
तत्करद्वयपार्श्वस्थे पङ्केरुहमहागदे॥
ऊर्द्ध करद्वये तस्य पाञ्चजन्यः सुदर्शनः।
योगस्वामी स विज्ञेयः पूज्यो मोक्षार्थियोगिभिः॥

योगेश्वरः।

सिद्धार्थसंहितायां।

वासुदेवो गदा-शङ्ख-चक्र-पद्मधरो मतः।
पद्मं शङ्खं गदां चक्रं धत्ते नारायणः क्रमात्॥
गदां चक्रं तथा शङ्खं पद्मं वहति माधवः।
चक्रं पद्मं तथा शङ्खं गदाञ्च पुरुषोत्तमः॥
पद्मं कौमोदकीं-शङ्खं चक्रं धत्ते त्वधोक्षजः।
सङ्कर्षणो गदा, शङ्ख, पद्म, श्चक्र, धरः स्मृतः॥
चक्रं गदां पद्मशङ्खौ गोविन्दो धरते भुजैः।
गदां पद्मं तथा शङ्खं चक्रं विष्णुर्विभर्त्ति यः॥
चक्रं शङ्खं तथा पद्मं गदां च मधुसूदनः।
गदां सरोजं चक्रञ्च शङ्खन्धत्तेऽच्युतः सदा॥

* वामभागगौ इति पुस्तकान्तरं।

पद्मं कौमोदकीं चक्रमुपेन्द्रः शङ्खमुद्वहेत् ।
चक्र, शङ्ख, गदा, पद्म, धरः प्रद्युम्न उच्यते ॥
पद्मं कौमोदकीं शङ्खञ्चक्रञ्चत्ते त्रिविक्रमः ।
शङ्खञ्चक्रं गदां पद्मं वामनो वहते सदा ॥
पद्मञ्चक्रं गदां शङ्खं श्रीधरो धरते भुजैः ।
चक्रं पद्मं तथा शङ्खं नरसिंहो बिभर्त्ति यः ॥
पद्मं सुदर्शनं शङ्खं गदाञ्चत्ते जनार्द्दनः ।
अनिरुद्धश्चक्र-गदा-शङ्ख-पद्म-लसद्भुजः ॥
हृषीकेशो गदाचक्रं पद्मं शङ्खञ्च धारयेत् ।
पद्मनाभो वहेच्छङ्खं पद्मं चक्रं गदां तथा ॥
पद्मञ्चक्रं गदां शङ्खं धत्ते दामोदरस्तथा ।
शङ्खञ्चक्रं सरोजञ्च गदां वहति यो हरिः ॥
शङ्खं कौमोदकीं पद्मं चक्रं विष्णुर्बिभर्त्ति यः ।
एताश्च मूर्त्तयो ज्ञेया दक्षिणाधः करक्रमात् ॥
वासुदेवादिवर्णाःस्युः षट्षड़ ते तदाश्रयाः ।

चतुर्व्विंशतिमूर्त्तीनां ।

विष्णुधर्म्मोत्तरे ।

हंसोमत्स्यस्तथा कूर्म्मः कार्य्यास्तद्रूपधारिणः ।
शृङ्गीमत्स्यस्तु कर्त्तव्यो देवदेवो जनार्द्दनः ॥

मत्स्यकूर्मौ ।

ऐश्वर्य्यमनिरुद्धस्य वराहो भगवान् हरिः ।
ऐश्वर्य्यशतया दंष्ट्राग्रसमुद्धृतवसुन्धरः ॥

10-2

नृवराहोऽथवा कार्य्यः शेषोपरिगतः प्रभुः ।
शेषश्चतुर्भुजः कार्य्यः चारुरत्नफणान्वितः ॥
आश्चर्य्योत्फुल्लनयनो देववीक्षणतत्परः ।
कर्त्तव्यौ सीरमुशलौ करयोस्तस्य यादव ॥
सर्पभोगश्च कर्त्तव्यस्तथैव रचिताञ्जलिः ।
आलीढस्थानसंस्थान स्तत् पृष्ठे भगवान् भवेत् ॥
वामारत्निगता तस्य योषिद्रूपा वसुन्धरा ।
नमस्कारपरा तस्य कर्त्तव्या द्विभुजा शुभा ॥
यस्मिन् भुजे धरा देवी तत्र शङ्करो भवेत् ।
अन्ये तस्य कराः कार्य्याः पद्मचक्रगदाधराः ॥
हिरण्याक्षशिरश्छेदचक्रोद्यतकरोऽथवा ।
मृतोद्धृतहिरण्याक्षः सुमुखो भगवान् भवेत् ॥
मूर्त्तिमन्तमनैश्वर्य्यं हिरण्याक्षं विदुर्बुधाः ।
ऐश्वर्य्यणाविनाशेन स निरस्तोऽरिमर्द्दनः ॥
नृवराहोऽथवा कार्यो ध्याने कपिलवत् स्थितः ।
द्विभुजस्त्वथवा कार्यः पिण्डनिर्व्वपनोद्यतः ॥
समग्रक्रोडरूपेण वक्तुदानवमध्यगः ।
नृवराहोवराहश्च कर्त्तव्यः क्ष्माविदारणः ॥

वराहस्य ।

य एवं भगवान्विष्णुर्नरसिंहवपुर्द्धरः ।
ध्यानविधिः स एवोक्तः परमज्ञानवर्द्धनः ॥
पीनस्कन्धकटिग्रीवः कृशमध्यः कृशोदरः ।

सिंहाननो नृदेहश्च नीलवासाः प्रभान्वितः ।
आलीढस्थानसंस्थानः सर्व्वाभरणभूषितः ।
ज्वालामालाकुलमुखो ज्वालाकेसरमण्डलः ॥
हिरण्यकशिपोर्व्वक्षः पाटी यन्नखरैः खरैः ।
नीलोत्पलाभः* कर्त्तव्यो देवजानुगत स्तथा ॥
हिरण्यकशिपुर्दैत्यस्तमज्ञानं विदुर्बुधाः ।

नरसिंहः ।

कर्त्तव्यो वामनो देवः शङ्कैर्गात्रपर्व्वभिः ।
पीनगात्रश्च कर्त्तव्यो दण्डी वाध्ययनोद्यतः ।
दूर्व्वाश्यामश्च कर्त्तव्यः कृष्णाजिनधरस्तथा ॥

वामनस्य ।

सजलाम्बुदसङ्काश-स्तथाकार्य्यस्त्रिविक्रमः ।
दण्डपाशधरः कार्य्यः शङ्खचक्रगदाधरः ॥
शङ्खचक्रगदापद्माः कार्य्यास्तस्य सुरूपिणः ।
निर्हस्तास्ते न कर्त्तव्या शेषं कार्य्यन्तु पूर्व्वतः ॥
एकोर्द्धवदनः कार्य्यो देवो विस्फारितेक्षणः ॥

त्रिविक्रमः ।

कार्य्यस्तु भार्गवो रामो जटामण्डलदुष्टंशः ।
हस्तेऽस्य परशुः कार्य्यः कृष्णाजिनधरस्य तु ॥

परशुरामः ।

---

* नीलोतपलाच इति पुस्तकान्तरेपाठः ।

रामो दाशरथिः कार्य्यो राजलक्षणपालितः* ।
भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महायशाः ।
तथैव सर्व्वे कर्त्तव्याः किन्तु मौलिविवर्ज्जिताः ॥

रामादयः ।

कृष्णश्चक्रधरः कार्य्यो नीलोत्पलदलच्छविः ।
इन्दीवरधरा, कार्य्या तस्य साचाच्च रुक्मिणी ॥

कृष्णः ।

सीरपाणिर्बलः कार्य्यो मुशली चैव कुण्डली ।
श्वेतोऽतिनीलवसनो मदादघ्णितलोचनः ॥

बलभद्रः ।

चापबाणधरः कार्य्यः प्रद्युम्नश्च सुदर्शनः ।
राजन्निन्द्रमणिश्यामः † श्वेतवासा मदोत्कटः ॥

प्रद्युम्नः ।

कामदेवस्तु कर्त्तव्यो रूपेणाप्रतिमो भुवि ।
अष्टबाहुः प्रकर्त्तव्यः शङ्खपद्मविभूषणः ॥
चापबाणकरश्चैव मदादघ्णितलोचनः ।
रतिः प्रीतिस्तथा शक्तिर्मदशक्तिस्तथोज्वला ॥
चतस्रस्तस्य कर्त्तव्याः पत्नी रूपमनोहराः ।
चत्वारश्च शरास्तस्य कार्य्या भार्य्यास्तनोपगाः ॥

---

* राजलक्षणलक्षित इति पाठान्तरं ।

† दूर्व्वादलश्याम इति पाठान्तरं ।

केतुश्च मकरः कार्य्यः पञ्चवाणमुखोमहान् * ।

कामः ।

कर्त्तव्यश्चानिरुद्धोऽपि खड्गचर्म्मधरः प्रभुः ।
साम्बः कार्य्यो गदाहस्तः सुरूपश्च विशेषतः ।
साम्बानिरुद्धौ कर्त्तव्यौ पद्माभौ रक्तवाससौ ।

अनिरुद्ध साम्बयोः ।

पद्मपत्राग्रगौराभा कर्त्तव्या देवकी तथा ।

देवकी ।

मधूकपुष्पसच्छाया यशोदापि सदा भवेत् ।

यशोदा ।

गोपालप्रतिमां कुर्य्यात् वेणुवादनतत्पराम् ।
वर्हापीडां घनश्यामां द्विभुजामूर्द्ध्वसंस्थिताम् ॥

गोपालस्य ।

काषायवस्त्रसम्वीतः स्कन्धसंसक्तचीवरः ।
पद्मासनस्थो द्विभुजो ध्यायी बुद्धः प्रकीर्त्तितः ॥

बुद्धः ।

खड्गोद्यतकरः क्रुद्धो हयारूढो महावलः ।
म्लेच्छोच्छेदकरः कल्की द्विभुजः परिकीर्त्तितः ॥

कल्की ।

दूर्व्वाश्यामो नरः कार्य्यो द्विभुजश्च महावलः ।

---

* खड्गचर्म्मकरः कार्य्यः पञ्चवाणधरोमहानिति पुस्तकान्तरे ।

नारायणश्चतुर्बाहुर्नीलोत्पलदलच्छविः ॥
तयोर्मध्ये तु वदरी कार्य्या फलविभूषणा।
वदर्य्यामवनौ कार्य्यावक्षमालाधरावुभौ ॥
अष्टचक्रे स्थितौ याने भूतयुक्ते मनोरमे।
कृष्णाजिनधरौ दान्तौ जटामण्डलधारिणौ ॥

पादेन चैकेन रथस्थितेन
पादेन चैकेन च जानुनेन।
कार्य्यो हरिश्चात्र नरेण तुल्यः
कृष्णोपि नारायणतुल्यमूर्त्तिः।

नरनारायण, हरि, कृष्णाः।

मूर्त्तिमान् पृथिवीहस्तन्यस्तपादः सितच्छविः।
नीलाम्बरधरः कार्यो देवो हयशिरोधरः ॥
विन्द्यात् सङ्कर्षणांशेन देवो हयशिरोधरः ॥
कर्त्तव्योऽष्टभुजो देवः तत्करेषु चतुर्थतः ॥
शङ्खं चक्रं गदां पद्मं स्वाकारञ्चारयेद्बुधः।
चत्वारश्च कराः कार्य्या वेदानां देहधारिणः।
देवेन मूर्द्धि विन्यस्ताः सर्व्वाभरणधारिणः ॥

हयग्रीवः।

प्रद्युम्नं विद्धि वैराग्यात् कापिलं तनु* माश्रितः।
मध्ये तु करकः कार्य्यस्तस्योत्सङ्गगतः परः ॥

* कापिलां सिद्धिमिति पाठान्तर।

द्वीयुगं चापरं तस्य शङ्खचक्रधरं भवेत् ।
पद्मासनोपविष्टस्य ध्यानसंमीलितेक्षणः ॥
कर्त्तव्यः कपिलो देवो जटामण्डलमण्डितः* ।
वायुसंरोधपीनांसः पद्माङ्कचरणद्वयः ॥
मृगाजिनधरो राजन् ब्रह्मसूत्रोपवीतवान् ।
विभुर्मन्त्रमहापद्मकलिकासंस्थितः प्रभुः ॥

वैराग्यभावेन महानुभावो
ध्यानस्थितः स्वम्परमं पदन्तत् ।
ध्यायंस्तथास्ते भुवनस्य गोप्ता
साङ्ख्यप्रवक्ता पुरुषः पुराणः ॥

कपिलः ।

व्यासः कृष्णतनुर्व्यासः पिङ्गलोऽतिजटाधरः ।
सुमन्तुर्जैमिनिः पैलो वैशम्पायन एवच ।
तस्य शिष्यास्तु कर्त्तव्यास्चत्वारः पारिपार्श्विकाः ॥

व्यासः ।

गौरस्तु कार्य्यो वाल्मीकिस्तेजोमण्डलदुर्द्दृशः ।
तपस्यभिरतः शान्तो न कृशो न च पीवरः ॥

वाल्मीकिः ।

वाल्मीकिरूपं सकलं दत्तात्रेयस्य धारयेत् ।
धन्वन्तरिः सुकर्त्तव्यः सुरूपः प्रियदर्शनः ॥
करद्वयगतश्चास्य साम्रतः कलशो भवेत् ।

* जटामण्डलदुर्द्दृश इति पुस्तकान्तरे पाठः ।

धन्वन्तरिः।

जलमध्यगतः कार्य्यः* शेषपन्नगदर्शनः।
फणापुष्पमहारत्नदुर्निरीक्ष्यशिरोधरः॥
देवदेवस्तु कर्त्तव्यस्तत्र गुप्तचतुर्भुजः।
तथापरस्य कर्त्तव्यः शेषभोगाङ्कसंस्थितः॥
एकपादोऽस्यकर्त्तव्यो लक्ष्म्युत्सङ्गगतः प्रभोः।
तथापरस्य कर्त्तव्यस्तत्र जानौ प्रसाधितः॥
कर्त्तव्यो नाभिदेशस्यस्तथातस्यापरः करः।
तथैवान्यः करः कार्य्यो देवस्य तु शिरोधरः॥
सन्तानमञ्जरीधारी तथैवास्यापरो भवेत्।
नाभिसरसिसम्भूते कमले तस्य यादव॥
सर्व्वपृथ्वीमयो देवः प्राग्वत्कार्य्यः पितामहः।
नाललग्नौ च कर्त्तव्यो पद्मस्य मधुकैटभौ॥
नृरूपधारीण्यि भुजङ्गमस्य
कार्य्याण्यथास्त्राणि तथा समीपे।
एतत्तवाग्रे यदुपुङ्गवाग्र्य
देवस्य रूपं परमस्य तस्य॥

जलशायिनः।

तार्क्ष्यो मरकतप्रख्यः कौशिकाकारनासिकः।
चतुर्भुजस्तु कर्त्तव्यो वृत्तनेत्रमुखस्तथा॥
गृध्रोरुजानुचरणः पक्षद्वयविभूषितः।

* जटामध्यगतः कार्य्यः इति पाठान्तरम्।

प्रभासंस्थानसौवर्णकलापेन विराजितः ॥
छत्रन्तु पूर्णकुम्भन्तु करयोस्तस्य कारयेत् ।
करद्वयन्तु कर्त्तव्यं तथा विरचिताञ्जलि ॥
यदास्य भगवान् पृष्ठे छत्रकुम्भधरौ करौ ।
न कर्त्तव्यौ तु कर्त्तव्यौ देवपादधरौ शुभौ ॥
किञ्चिल्लम्बोदरः कार्यः सर्व्वाभरणभूषितः ।

गरुड़ः ।

विष्णुधर्म्मोत्तरात् ।

देवदेवं महादेवं वृषारूढन्तु कारयेत् ।
तस्य वक्त्राणि कार्य्याणि पञ्च यादवनन्दन ॥
सर्व्वाणि सौम्यरूपाणि दक्षिणं विकटं मुखम् ।
कपालमालिनं भीमं जगत्संहारकारकम् ॥
त्रिनेत्राणि तु सर्व्वाणि वदनं तूत्तरं विना ।
जटाकलापे महति तस्य चन्द्रकला भवेत् ॥
तस्योपरिष्टाद्वदनं पञ्चमन्तु विधीयते ।
यज्ञोपवीतं च तथा वासुकिं तस्य कारयेत् ॥
दशबाहुस्तथा कार्य्यो देवदेवो महेश्वरः ।
अक्षमालात्रिशूलं च चर्म्म दण्डमयोत्पलम् ॥
तस्य दक्षिणहस्तेषु कर्त्तव्यानि महाभुज ।
वामे च मातुलाङ्गञ्च चापादर्शं कमण्डलुम् ॥
तथा चर्म्म च कर्त्तव्यं देवदेवस्य शूलिनः ।
वर्णस्तथास्य कर्त्तव्यश्चन्द्रांशुसदृशप्रभः ॥

रुद्रः।

ईशस्तत्पुरुषो घोरो वामजातक्रमेण तु।
सितपीतकृष्णरक्ताश्चतुर्वर्णाः प्रकीर्त्तिताः॥
पञ्चवक्त्राः स्मृताः सर्व्वे दशदोर्द्दण्डभूषिताः।
खड्ग, खेट, धनु, बाण, कमण्डल्वक्षसूत्रिणः॥
वराभयकरोपेताः शूलपङ्कजपाणयः।

वामो, वामदेवः।

जातः, सद्योजातः ईशानादि पञ्चमूर्त्तयः।
सर्व्वो भीमो महादेवः रुद्रः पशुपतिर्भवः।
उग्र ईशान इत्यष्टौ मूर्त्तिर्या शिवसन्निभा॥
मृगाङ्कचूड़ामणयो जटामण्डलमण्डिताः।
त्रिनेत्रा वरखट्वाङ्गत्रिशूलवरपाणयः॥

मूर्त्तीयाष्टकम्।

अर्द्धं देवस्य नारी तु कर्त्तव्या शुभलक्षणा।
अर्द्धन्तु पुरुषः कार्य्यः सर्व्वलक्षणभूषितः॥
ईश्वरार्द्धे जटाजूटं कर्त्तव्यं चन्द्रभूषितम्।
उमार्द्धे तिलकं कार्य्यं सीमन्तमलकं तथा॥
भस्मोद्धलितमर्द्धन्तु अर्द्धं कुङ्कुमभूषितम्।
नागोपवीतिनं चार्द्धमर्द्धं हारविभूषितं॥
वामार्द्धे तु स्तनं कुर्य्यात् घनं पीनं सुवर्त्तुलम्।
उमार्द्धे तु प्रकर्त्तव्यं सुवस्त्रेण च वेष्टितम्॥

मेखलां दापयेत्तत्र वज्रवैदूर्य्यभूषिताम् ।
ऊर्द्धलिङ्गं महेशार्द्धं सर्पमेखलमण्डितम् ॥
पादञ्च देवदेवस्य समपद्मोपरिस्थितम् ।
सालक्तकं स्मृतं वाममञ्जनेन विभूषितं ॥
त्रिशूलमक्षसूत्रञ्च भुजयोः सव्ययोः स्मृतम् ।
दर्पणञ्चोत्पलं कार्य्यं भुजयोरपसव्ययोः ॥

अर्द्धनारीश्वरः ।

एवमेव दिक्पालेशानः ।

दक्षेण मुद्रां प्रतिपादयन्तं
सिताक्षसूत्रं च तथोर्द्धभागे ।
वामे च पुस्तामखिलागमाद्यां
विभ्राणमूर्द्धेन सुधाधरं च ॥
सिताम्बुजस्थं सितवर्णमीशं
सिताम्वरालेपनमिन्दुमौलिम् ।
ज्ञानं मुनिभ्यः प्रतिपादयन्तं
तं दक्षिणामूर्त्तिमुदाहरन्तं ॥

दक्षिणामूर्त्तिः ।

युग्मं स्त्रीपुरुषं कार्य्यं उमेशौ दिव्यरूपिणौ ।
अष्टवक्त्रं तु देवेशं जटाचन्द्रार्द्धभूषितम् ॥
द्विपाणिं द्विभुजां देवीं सुमध्यां सुपयोधराम् ।
वामपाणिन्तु देवस्य देव्याः स्कन्धे नियोजयेत् ॥
दक्षिणन्तु करं शम्भोरुत्पलेन विभूषितम् ।

देव्यास्तु दक्षिणं पाणिं स्कन्धे देवस्य कल्पयेत्।
वामपाणौ तथा देव्या दर्पणं दापयेन्नृभम् ॥

इति उमामहेश्वरौ।

कार्य्यं हरिहरस्यापि दक्षिणार्द्धं सदाशिवः।
वाममर्द्धं हृषीकेशः श्वेतनीलाकृतिः क्रमात् ॥
वरं त्रिशूलं चक्राब्जधारिणो बाहवः क्रमात्।
दक्षिणे वृषभः पार्श्वे वामभागे विहङ्गराड़िति ॥

हरिहरमूर्त्तिः।

द्विवर्णा जटिलाः चाचाः पुर त्रिशूलधारिणः।
पुटाञ्जलिकराः सर्व्वे विश्वे शाश्वेक वक्त्रकाः ॥
अनन्तश्च त्रिमूर्त्तिश्च सूक्ष्मः श्रीकण्ठ एवच।
शिवः शिखण्डिकनेत्र एकरुद्रश्च ते क्रमात् ॥

विद्येश्वराः।

विश्वकर्म्म शास्त्रात्।

अथ रुद्रान् प्रवक्ष्यामि बाहुषोड़शकान्वितान्।
अजो नामा महारुद्रो धत्ते शूलमथाङ्कुशम् ॥
कपालं डमरुं सर्पं मुद्गरञ्च सुदर्शनम्।
अक्षसूत्रमयो दक्षे तथा वामे कराष्टके ॥
तर्ज्जनी मूर्द्धतस्तत्र खट्वाङ्गस्तदधः करे।
गदां च पट्टिशं घण्टां शक्तिं परशुकुण्डिकाः ॥

अजैकपदः ॥ १ ॥

एकपादाभिधो बिभ्रत् द्वादशार्द्धाह्वहिः शरम्।
चक्रं डमरुकं शूलं मुद्गरं तदधोवरम्॥
अक्षसूत्रमधो वामे खट्वाङ्गञ्चोर्द्ध्वहस्तके।
धनुर्घण्टां कपालञ्च कौमुदीं तर्ज्जनीघटम्॥
परशुञ्च क्रमाद्धत्ते धत्ते वाञ्छष्टकेऽत्विति*।
अनेकभोगसम्पत्तिं कुरुते यजनात् सदा॥

एकपादः ॥ २ ॥

अहिर्बुध्नो गदां चक्रं चखौ डमरुमुद्गरौ।
शूलांकुशाक्षमालाञ्च दधोर्द्धाधःकरः क्रमात्॥
तोमरं पट्टिशं चर्म्म कपालं तर्ज्जनीघटम्।
शक्तिः परशुकं वामे दधवद्धारयत्यसौ॥

अहिर्बुध्नः ॥ ३ ॥

विरूपाक्षस्ततः खड्ग शूलं डमरुकाङ्कुशम्।
सर्पं चक्रं गदामक्षसूत्रं बिभ्रत् कराष्टके॥
खेटं खट्वाङ्गकं शक्तिं परशुं तर्ज्जनी घटं।
घण्टाकपोलकौ चेति वामार्द्धादिकराष्टके॥

विरूपाक्षः ॥ ४ ॥

रेवतो दक्षिणे चापं खड्गशूलं गदां मही।

---

* वामवाकष्टकेत्विति पुस्तकान्तरे पाठः।

चक्रांकुशाक्षमालास्तु धारयन्नूर्द्धमादितः॥
धनुः खेटञ्च खट्वाङ्गं घण्टातर्ज्जनिकांततः।
परशुं पट्टिशं पात्रं वामबाह्वकेऽर्कवत्॥
सर्वसंस्तत्करोत्येष आयते वाचं नाङ्कुशम्।

रेवतः॥ ५॥

हराख्ये मुद्गरश्चैव डमरुं शूलमङ्कुशम्।
गदासर्पाक्षसूत्राणि धारयन् दक्षिणोर्द्धतः॥
पट्टिशन्तोमरं शक्तिं परशुं तर्जनीघटम्।
खट्वाङ्गं पात्रकश्चेति वामोर्द्धादिक्रमेण तु॥

हरः॥ ६॥

बहुरूपोदधद्दक्षे डमरुञ्च सुदर्शनम्।
सूर्पशूलांकुशैयस्तु कौमुदीं जपमालिकाम्॥
घण्टाकपालखट्वाङ्गं तर्ज्जनीं कुण्डिकां धनुः।
परशुं पट्टिशं चैव वामार्द्धादि कराष्टके॥

बहुरूपः॥ ७॥

अम्बकोपि दधच्चक्रं डमरुं मुद्गरं शरम्।
शूलांकुशाहिजाप्यञ्च दक्षोर्द्धादिक्रमेण हि॥
गदा-खट्वाङ्ग-पात्राणि कार्मुकं तर्ज्जनीं घटौ।
परशुं पट्टिशं चेति वामार्द्धादिकराष्टके॥

अम्बकः॥ ८॥

सुरेश्वरं हि-डमरुं चक्रं शूलांकुशावपि।
शरञ्च मुद्गरं चापं दक्षवाह्वष्टकेत्विति॥

पङ्कजं परशुं घण्टां पट्टिशं तर्ज्जनीं धनुः ।
खट्वाङ्गं कारयेत्पात्रं वामेऽष्टकरपल्लवे ॥

सुरेश्वरः ॥ ८ ॥

जयन्तो दशमो रुद्रोप्यङ्कुशं चक्र-मुद्गरम् ।
शूला-हि डमरुं बाणमक्षसूत्रं यमेत्विति ॥
गदा-खट्वाङ्ग-परशुं कपालं शक्ति-तर्ज्जनीं ।
धनुः कुण्डी-स्रुचोर्द्धादि वामबाह्वष्टके दधत् ॥

जयन्तः ॥ १० ॥

अथापराजितो दक्षे तोमरं खड्गमङ्कुशम् ।
शूला-हि-चक्र-डमरु-मक्षमालां दधत् क्रमात् ॥
शक्तिं खेटं गदां पात्रं तर्ज्जनीं पट्टिशङ्कजं ।
घण्टामुत्तरतश्चाथ धारयन्नूर्द्धमादितः ॥

अपराजितः ॥ ११ ॥

अजैकपादहिर्व्रध्नः विरूपाक्षश्च रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
रुद्रा एकादश प्रोक्ता जयन्तश्चापराजितः ॥

विष्णुधर्म्मोत्तरात् ।

कुमारः षण्मुखः कार्य्यः शिखण्डिकविभूषणः ।
रक्ताम्बरधरः कार्य्यो मयूरवरवाहनः ॥
कुक्कुटश्च तथा घण्टा तस्य दक्षिणहस्तयोः ।
पताका वैजयन्ती च शक्तिः कार्य्या च वामयोः ॥

स्कान्दः।

अथातो रूपनिर्माणं वक्ष्येऽहं भैरवस्य तु।
लम्बोदरन्तु कर्त्तव्यं वृत्तपिङ्गललोचनं॥
दंष्ट्राकरालवदनं फुल्लनासापुटन्तथा।
कपालमालिनं रौद्रं सर्व्वतः सर्पभूषणम्॥
व्यालेन त्रासयन्तञ्च देवीं पर्व्वतनन्दिनीं।
सजलाम्बुदसङ्काशं गजचर्म्मोत्तरच्छदम्॥
बहुभिर्बाहुभिर्व्याप्तं सर्व्वायुधविभूषणम्।
बृहत्शालप्रतीकाशैस्तथा तीक्ष्णनखैः शुभैः।
साचीकृतमिदं रूपं भैरवस्य प्रकीर्त्तितम्॥

भैरवः।

महाकालस्य कथितमेतद्वै भैरवं मुखम् *।
देवीत्रासनकश्चास्य करे कार्य्यश्च पन्नगः।
नचास्य पुरतः कार्या देवी पर्व्वतनन्दिनी॥
शुक्ला न कार्यास्य तथा नरक्ता
समीपतो मातृगणप्रधाने।
कार्य्यं तथा या परिवर्हमस्य
गणाश्च कार्य्या बहुरूपरूपकाः॥

महाकालः।

नन्दी कार्य्यस्त्रिनेत्रस्तु चतुर्व्वाहुर्म्महाभुजः।

* मेतदेव षण्मुखमिति पुस्तकान्तरे पाठः।

सिन्दूरारुणसङ्काशो व्याघ्रचर्म्मपरिच्छदः ॥
त्रिशूलभिन्दिपाले च करयोस्तस्य कारयेत् ।
शिरोगतं तृतीयन्तु तर्ज्जयन्तं तथापरम् ॥
आलोकयानं कर्त्तव्यं दूरादागमिकञ्जनम् ।

नन्दी ।

अनेनैव तु रूपेण वीरभद्रं विदुर्ब्बुधाः ।

वीरभद्रः ।

ज्वरस्त्रिपादः कर्त्तव्यस्त्रिनेत्रैर्वदनैस्त्रिभिः * ।
भस्मप्रहरणो रुद्रस्त्रिबाहुर्व्याकुलेक्षणः ॥

ज्वरः ।

विश्वकर्म्मशास्त्रात् ।

अथातः संप्रवक्ष्यामि वसुरूपाणि ते जय ।
पद्माक्ष-मालिके तस्य दक्षवामकरद्वये ॥
सीर-शक्ती दधानोऽयं धराख्यो वसुरादिमः ।
मालां पुष्करवीजोत्थां चक्रं शक्तिं कमण्डलुम् ॥
दक्षाधरादिसव्येन यस्य स्युः स ध्रुवो मतः ।
मुक्ताफलकृतामाला पङ्कजं शक्तिरङ्कुशः ॥
स वसुः कीर्त्तितो वत्स सोमनामेति वै बुधैः ।
सव्यवामोर्द्धगौ यस्य करौ स्तः शक्तिसंयुतौ ॥
सीरा-ङ्कुशान्वितौ चाधः स भवेदापसंज्ञकः ।

---

* ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचन इति पाठान्तरं ।

अक्षमालोपवीत्यूर्द्ध्वं सृणिशक्तिकरावधः ॥
यस्य स्तः सोऽनिलाख्यः स्याच्छुभदः पञ्चमो वसुः ।
स्रुवाक्षमालिको दक्षे वामे शक्ति कपालभृत् ॥
सव्योर्द्धादिक्रमाद्योसौ नलाख्यस्तु वसुः स्मृतः ।
खट्वाङ्गशधरः सव्ये शक्ति-खेटकरोन्यतः ॥
प्रत्यूषाख्यो वसुश्चायं सप्तमः परिकीर्त्तितः ।
सव्ये दण्डकपालोसौ वामे तु सृणि-शक्तिकः ॥
शुभदः कीर्त्तितश्चायं प्रभासो-वसुरष्टमः ।
एते सर्व्वे समाख्याता नवकाञ्चनसन्निभाः ॥
धरोध्रुवश्च सोमः स्यादापश्चैवा निलोनलः ।
प्रत्यूषश्च प्रभासश्च* वसवोष्टौ प्रकीर्त्तिताः ॥

इति वसुरूपनिर्म्माणम् ।

शृणु वत्स प्रवक्ष्यामि सूर्य्यभेदांस्तु ते जय ।
यावत् प्रकाशकः सूर्य्यो जायते मूर्त्तिभिर्यथा ॥
दक्षिणे पौष्करी माला करे वामे कमण्डलुः ।
पद्माभ्यां शोभितकरा सा धात्री प्रथमा स्मृता ॥
शूलं वामकरे चास्याः दक्षिणे सोम एव च ।
मित्रा नाम त्रिनयना कुशेशयविभूषिता ॥
प्रथमे तु करे चक्रं† तथा वामे च कौमुदी ।
मूर्त्तिर्म्मणिमयी ज्ञेया सपद्मैः पाणिपल्लवैः ॥

* प्रभासश्चेति पाठान्तरं ।

† वज्रमिति पुस्तकान्तरे ।

अक्षमाला करे सव्ये चक्रं वामे प्रतिष्ठितम्।
सा मूर्त्ती रौद्री ज्ञातव्या प्रधानापद्मभूषिता॥
चक्रं तु दक्षिणे यस्या वामे पाशः सुशोभनः।
सा वारुणी भवेन्मूर्त्तिः पद्मव्यग्रकरद्वया॥
कमण्डलुर्दक्षिणतो*मालाचाक्षमयी भवेत्।
सा भवेत् सम्मता सूर्य्यमूर्त्तिः पद्मविभूषिता॥
यस्या दक्षिणतः शूलं वामहस्ते सुदर्शनः।
भगमूर्त्तिः समाख्याता पद्महस्ता शुभा जय॥
अथ वामकरे माला त्रिशूलं दक्षिणे स्मृतम्।
विवस्वन्मूर्त्तिरेषास्याः पद्मलाञ्छनलक्षिता॥
पूषाख्यस्य भवेन्मूर्त्तिर्द्विभुजा पद्मलाञ्छिता।
सर्व्वपापहरा ज्ञेया सर्व्वलक्षणलक्षिता॥
दक्षिणे तु गदा यस्या वामे चैव सुदर्शनः।
पद्मव्यग्रा तु सावित्री मूर्त्तिः सर्व्वार्थसाधनी॥
स्रुचं च दक्षिणे हस्ते वामे होमजकीलकं।
मूर्त्तिस्त्वाष्ट्री भवेदस्य पद्मरुद्धकरद्वया॥
सुदर्शनकरा सव्ये पद्महस्ता तु राभतः।
एषा स्यात् द्वादशी मूर्त्तिर्विष्णोरमिततेजसः॥
धाता, मित्रो, र्य्यमा रुद्रो वरुणः सूर्य्य एव च।
भगो विवस्वान् पूषा च सविता दशमः स्मृतः †॥

---

* ऽक्षमालाचैववामत इति पाठान्तरं।

† धातार्य्यमा च मित्रश्च वरुणोऽंशो भगस्तथा।
इन्द्रो विवस्वान् पूषा च पर्य्यन्यो दशमः स्मृतः।
ततस्त्वाष्टा तथा विष्णुरजघन्यो जघन्यजः इति पुस्तकान्तरे पाठः।

एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते।

इति द्वादशादित्यरूपनिर्माणम्।

अथातः सम्प्रवक्ष्यामि रूपाणि मरुतां तव।
अक्षमालाम्बुजे दक्षे वामे कुण्डीध्वजान्वितः॥
श्वसनाख्यो भवेद्देवं साधकानां सुसिद्धिदः।
चक्राक्ष मालिका पात्र ध्वजयुक् स्पर्शनाभिधः॥
कपाल ध्वजपाशाब्ज-धारको वायुनामकः।
मातरिश्वा कपालाब्ज-ध्वज-पात्र-करो मतः॥
ध्वजाक्षसूत्र- पात्राब्जं बिभ्राणः स्यात्सदागतिः।
ध्वजा-सि- खेट-पात्राणि धारयंस्तु महाबलः॥
ध्वज-पाश-कपालाक्षि-संयुतो बलवर्द्धनः।
पात्राक्षसूत्र पाशाब्ज-धारकः पृषदश्वकः॥
अक्षसूत्र-गदा-कम्बु-ध्वजी-गन्धवहाभिधः।
कपाल-ध्वज-पात्राब्ज-हस्तको गन्धवाहकः॥
ज्ञान मुद्राक्ष सूत्राब्ज ध्वजहस्तो निलो मतः।
अक्षमाला-सुनीलाब्ज-ध्वज-कम्बु धराशुगः॥
ध्वज-बाण-धनुः कुण्डी-करयुक् सुमुखो* भवेत्।
ध्वजाब्ज-पात्र-मुद्राणि धारयेत् कर्कराभिधः॥
अब्जाक्षमालिका-पात्र-ध्वज-हस्तः समीरणः।
ध्वजपात्रघनाब्जानि बिभ्राणस्तु समीरकः॥
अक्ष सूत्र ध्वजाब्जानि मुण्डं बिभ्रत्यनुत्तमः।

* सुरथ इति पाठान्तरं

अक्षमाला-ध्वजा-ब्जानि धारयन्मारुताभिधः ॥

कं गिरः ।

पद्य-चसूत्र-पाशा-ब्ज-संयुतो नागयोनिजः ।
ध्वज-मुण्डा-चपाची-स्याज्जगत्प्राणाभिधः स्मृतः ॥
ध्वज सूत्र सपाशा-ब्ज-संयुतः पावनाभिधः ।
खट्वाङ्ग-ध्वज-खेटानि बिभ्राणो वातसंज्ञकः ॥
ध्वजा-चक्षतपात्राणि धारयंस्तु प्रभञ्जनः ।
अक्षसूत्र ध्वजा-ब्जा-हि-पाणियुक्पवनामकः ॥
शूला-ब्ज-ध्वज-पात्राणि नभस्वानिति धारयन् ।
ध्वजां-कुशा-च-मुण्डानि बिभ्राणोऽतिबलो मतः ॥
सध्वजा-म्बु ज-पात्राङ्कस्तरस्वीनाम कीर्त्तितः ।
दण्ड मुण्ड ध्वजा-ब्जानि धारयन् द्वादशो मतः ॥
ध्वजा-च-तर्ज्जनी-पात्र पाणि युग् देवयक्षकः ।
अक्षमाला कुठारा-ब्ज-ध्वज-युग्मात्रजाह्वकः* ॥
घण्टा-च-ध्वज-मुण्डानि धारयन्नधराभिधः ।
बोधिपल्लव-सूचा-ब्ज-ध्वज-हस्तः सदोर्द्धदृक् ॥
अक्ष सूत्र-ध्वजा-शोकपात्र-युक्मतिरोधनः ।
पाणिको नाम विज्ञे यो वलाक्षध्वज मुण्ड युक् ॥
ध्वजाक्ष घटपात्राणि धारयन् साधकोमतः ।
बीजपूरध्वजाब्जाक्षसंयुतो विश्वपूरकः ॥
घण्टा-चध्वज-मालाभिः संयुतो जगदाश्रयः ।

* रात्रद्राक्षक इति पाठान्तरं ।

विश्वातिरिक्तको नाम ध्वजलाञ्छन पाश युक्॥
अक्षमालाकजे घण्टाध्वजौ विभ्रत् कजागरः।
विश्वोदरो भवेदेष शङ्ख,शूल घट,ध्वजी॥
अयगो नाम विज्ञेयो यक्षबाणधनुर्धटी।
श्रीफला-ञ्जा-क्षपात्राणि धारयंस्तीव्रको मतः॥
शक्ति मुण्ड-ध्वज पाशी सुवह्नोऽयं प्रकीर्त्तितः।
अक्ष सूत्र ध्वज पाश पात्र युक् बीजवर्द्धनः॥
ध्वज पाश-कपालाब्जैर्युतो भद्रजवो मतः।
टङ्क-पाश-ध्वजा-ब्जानि धारयन् पुष्करोद्भवः॥
पलाशपत्र-पाशा-ब्ज-ध्वज-हस्तोऽग्निनो पतिः।
जम्बुबीज-ध्वजा-ब्जाक्षपाणियुग्व्यक्तमूर्त्तिमान्॥
परिघाक्षध्वजाब्जानि धारयन् विश्वगो मतः।
सर्व्वे चतुर्भुजा ज्ञेया युवानः कुटिलभ्रुवः॥
सव्योर्द्धाद्युत्तरोर्द्धान्तक्रमेणायुधधारिणः।
रक्ताक्षाश्च महावीर्य्याः सर्व्वभूषणभूषिताः॥
धूम्रवर्णा मृगारूढ़ाः सर्वे ते शवलांशुकाः।
इति तेऽत्र समाख्याता शुभदास्तु मरुद्गणाः॥
संख्ययैकोनपञ्चाशत सर्व्वरोगापनुत्तये।

एकोनपञ्चाशन्मरुता।

स्कान्दे।

साध्याः पद्मासनगताः कमण्डल्वक्ष सूत्रिणः।
धर्म्म पुत्रामहात्मानो द्वादशामरपूजिताः॥

ब्रह्माण्ड पुराणे ।

मनो,मुमन्ता प्राणश्च नरयानश्च वीर्य्यवान् ।
विश्ति,र्हंय्यो,नयश्चैव हंसो,नारायणस्तथा ।
प्रभवो,विष्णु,र्व्विभश्च साध्या द्वादश जज्ञिरे ॥

साध्यानां ।

विष्णुधर्म्मोत्तरे ।

पद्मपत्रसवर्णाभौ पद्मपत्रसमाम्बरौ ।
द्विभुजौ देवभिषजौ कर्त्तव्यौ देवसंयुतौ ॥
सर्व्वाभरणसम्पन्नौ विशेषाच्चारुलोचनौ ।
तयोरौषधयः कार्य्या दिव्या दक्षिणहस्तयोः ॥
वामयोः पुस्तके कार्य्ये दर्शनीये तथा द्विज ।
एकस्य दक्षिणे पार्श्वे वामे वान्यस्य यादव ॥
नारीयुगं प्रकर्त्तव्यं सुरूपश्चारुदर्शनम् ।
तयोश्च नामनी प्रोक्ते रूपसम्प,त्तथाकृतिः ॥
मधूकपुष्पसङ्काशा रूपसम्पत् प्रकीर्त्तिता ।
आकृतिः कथिता लोके शरकाण्डनिभा तथा ।
रत्नभाण्डकरे कार्य्ये चन्द्रशुक्लाम्बरे तथा ॥

अश्विनौ ।

पृष्ठस्थः सूर्य्यवत् कार्य्यो रेवन्तश्च तथा प्रभुः ।

रेवन्तस्य ।

अथ संग्रहे।

यक्षरूपाणि।

तुन्दिला द्विभुजाः कार्य्या निधिहस्ता मदोत्कटाः।
गदी वैश्रवणः श्रेष्ठो नृपालस्त्वष्टमो वरः॥
सिद्धार्थो मणिभद्रश्च सुमना नन्दनो यशाः।
कण्डूतिः पाञ्चकः शङ्खी मणिमान् पद्म,रामकौ॥
सर्व्वत्रभोजी पिङ्गाक्षश्चतुरो मन्दराश्रयः।
शुभद्रचन्द्रप्रद्योतमेघवर्णजयावहाः॥
द्युतिमान् केतुमान् श्वेतोमौलिमान् विजयाकृतिः।
पद्मवर्ण महाघाश्च पुष्पदन्ताः सुदर्शनाः॥
पूर्णमास, हिरण्याक्ष, शतजिह्व, बलाहकाः।
वलाक, विपुलौ पद्मनाभः कुमुद, वीरकौ॥
सुगन्धइत्यमी यक्षास्तेषां राजा धनाधिपः।

यक्षरूपनिर्म्माणं।

राक्षसरूपं मयदीपिकायां॥

रक्तवस्त्रधराः कृष्णा नखदीर्घाः सदंष्ट्रिकाः।
कार्त्ती-खट्वाङ्ग-हस्ताश्च राक्षसा घोररूपिणः॥
हेति प्रहेति यक्षघ्न शङ्कुश्च सनवन्धनाः।
विद्युत्,सर्ज,मनुष्याद,पौरुषेय सुकेशिनः॥
उग्रमालीत्यमी प्रोक्ताः प्रधाना राक्षसाः किल।
भूतास्तथैव दानाश्च दीर्घवक्त्राः पिशाचकाः॥

इति राक्षस भूत पिशाच रूपनिर्म्माणम् ।

वरदो भक्तलोकानां किरीटी कुण्डली गदी ॥
कार्य्यस्तु रूपी गन्धर्व्वो वीणावाद्यरतस्तथा ।

गन्धर्व्वाः ।

नागरूपाण्याह विश्वकर्म्मा ॥

अनन्तो रक्तकायश्च शितपङ्कजमालिकः ।
शतसाहस्रभोगोऽहिः शिरःकुवलयान्वितः ॥

वासुकिः ।

श्वेतदेहश्च कर्त्तव्यः स्फुरन्मौक्तिकसन्निभः ।
रक्ताङ्गः स्वस्तिकोपेतः सुतेजास्तक्षको महान् ॥
कृष्णः कर्कोटकः कण्ठे शुक्लरेखात्रयान्वितः ।
रक्तपद्मनिभः पद्म शिराः शुक्लेषुविद्रुमान् ॥
शङ्खवर्णो महापद्मो मस्तके कृष्णशूलधृक् ।
हेमाभः शङ्खपालः स्यात् सितरेखाधरो गले ॥
कुलिको रक्तदेहस्तु चन्द्रार्द्धकृतमस्तकः ।
द्विजिह्वो बाहवः सप्त फणामणिसमन्वितः ॥
अक्षसूत्रधराः सर्व्वे कुण्डिकापुच्छसंयुताः ॥
एकभोगा स्त्रिभोगावा स्त्रीतज्जायासुतादयः ।

इति नागरूपनिर्म्माणम् ।

आह मयः* ॥

---

* यम इति क्वचित् पाठः ।

कुशपत्र, विष्टरस्थाः पितरः पिण्डपात्रिणः।

विष्णुधर्म्मोत्तरे।

प्रभाकरा वर्हिषदो अग्निष्वात्तास्तथैव च।
क्रव्यादा श्चोपहूताश्च आज्यपाश्च सुकालिनः * ॥

पितरः।

वायु पुराणात्।

ऋतु दक्षौ वसुः सत्यः कालको धुरिलोचनौ।
पुरूरवा माद्रवाश्च विश्वे देवा दश स्मृताः॥
विदेहास्तु प्रकर्त्तव्या दक्षिणे बाणपाणयः।
कर्त्तव्या वामभागे तु शरासनपरायणाः † ॥

विश्वे देवाः।

विश्वकर्म्मा।

षड्विंशदङ्गुले खड्ग शक्ती तालाधिकौ मतौ।
शूलपाशौ पद्मशङ्खौ तालमात्रौ प्रकीर्त्तितौ॥
गदा द्वितालपाशश्च गोलकाष्ठप्रमाणतः।
बाणो द्वितालको दण्डो द्विगुणो द्वादशाङ्गुलः॥
कपालं पङ्कजं चर्म्म पात्रखड्गाङ्गुलो मतः‡।

* अग्निष्वात्ता स्तथासौम्या हविष्यन्तस्तथोष्मपान् सुकालिनोवर्हिषद आज्यां
व्यपां स्तर्पये त्तत इति पुस्तकान्तरे पाठः।

† कुशासन परायणा इति पुस्तकान्तरे पाठः।

‡ कपालं पङ्कजं तद्वत् दर्पणोष्टाङ्गुलोमत इति पुस्तकान्तरे पाठः।

डमरुं सुस्वना घण्टा छुरिका षोड़शाङ्गुला ॥
वज्रं तत् पुरुषस्थूलं कर्कशोऽतिदृढ़ो वली ।
शक्तिस्तु योषिताकारा लोहिताङ्गी स्वकाश्रिता ॥
दण्डोऽपि पुरुषः कृष्णो घोरो लोहितलोचनः ।
खड्गश्च पुरुषःश्यामशरीरः क्रुद्धलोचनः ॥
पाशः सप्तफणः सर्पपुरुषः पुच्छसंयुतः ।
ध्वजस्तु पुरुषः पीतो व्यावृतास्यो महावलः ॥
गदा पीतप्रभा कन्या सुपीनजघनस्थला ।
त्रिशूलं-पुरुषो दिव्यः सुभ्रूः श्यामकलेवरः ॥
शङ्खोऽपि पुरुषो दिव्यः शुक्लाङ्गः शुभलोचनः ।
द्वेतिर्व्वहुतिथौ शास्त्रे भीमः श्यामतनुः पुमान् ॥
शरःस्यात् पुरुषो दिव्यो रक्ताङ्गो दिव्यलोचनः ।
धनुः स्त्री पद्मरक्ताभा मूर्द्धि पूरितचापभृत् ॥
एव मस्त्राणि पूतानि जानीयात् परमेश्वरे ।
उक्तानां चैव सर्वेषां मूर्द्ध्नि स्वायुधलाञ्छनम् ॥
भुजौ द्वौ तु प्रकर्त्तव्यौ स्कन्धलम्बौ सदा वुधैः ।

इत्यस्त्रनामप्रक्रमः ।

धर्म्मं ज्ञानं च वैराग्यमैश्वर्यं च तथैव हि ॥
सितरक्तपीतकृष्णसिंहरूपाः प्रकीर्त्तिताः ।

धर्म्म, ज्ञान, वैराग्यै, श्वर्य्याणि ।

शुक्लवर्णा मही कार्य्या दिव्याभरणभूषिता ।
चतुर्भुजा सौम्यवपुश्चन्द्रांशुसदृशाम्वरा ॥

रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतम्।
पद्मं करे च कर्त्तव्यं भुवो यादवनन्दन॥
दिग्गजानां चतुर्णाञ्च कार्य्या पृष्ठगता तथा।
सर्व्वौषधियुता देवी शुक्लवर्णा ततः स्मृता॥

पृथ्वी।

लवणोदः प्रकर्त्तव्यो द्विभुजः सर्व्वसिद्धये।
धत्ते नमालिकां दक्षे वामे पात्रं तु रत्नभृत्॥
सोत्तरीयोपवीती च पाटलाभः सुवस्त्रधृक्।
बर्हिःपवित्रपाणिस्तु लाभदो भूतिमण्डितः॥

लवणोदः।

क्षीरोदः श्वेतवर्णस्तु द्विभुजो रत्नकुण्डलः।
मकरस्थोऽम्बुजं दक्षे वामे तु कलशं दधत्॥

क्षीरोदः।

दधिमण्डोद एवात्र विज्ञेयो वारिजासनः।
दण्डं शङ्खं च बिभ्राणो द्विभुजोऽसौ जटायुतः॥

दधिमण्डोदः।

घृतोदः कपिलो ज्ञेयः कुलीरस्थो जटाधरः।
कमण्डलुं पीतं पात्रञ्च घटं बिभ्रत्तु दोर्द्वये *॥

घृतोदः।

इक्षूदोऽत्र प्रकर्त्तव्यो गोमूत्रसदृशच्छविः।

---

* द्विजप्रियमिति वा पाठः।

दर्दुरस्थो घटं दण्डं बिभ्राणो नीलकुण्डलः ॥

इक्षूदः ।

सुरोदो गण्डकान्तस्थो ज्ञेयो गोमेदसन्निभः ।
मुद्गरं कुण्डिकां बिभ्रत् द्विभुजो भूतिवर्द्धनः ॥

सुरोदः ।

स्वादूदो मौक्तिकाभासो दर्दुरस्थो सुवेशधृक् ।
मुक्तासूत्रार्घपात्रे च धारयन् सर्पभूषणः ॥
वैडूर्य्यसदृशाः सर्व्वे द्विभुजाः कलशान्विताः ।
पङ्कजस्थाः प्रकर्त्तव्याः देवताज्ञपनाय तु ॥

समुद्रः ।

द्वीप,वर्ष,नगाः सर्व्वे कामरूपधरा यतः ।
प्रेष्ठायुधान्विताः कार्य्याः स्व स्व चिह्न धरानराः ॥

विष्णुधर्म्मोत्तरात् ।

पूर्व्वा गजगता वाला रक्तवर्णा तु दिग् भवेत् ।
पङ्कजस्था प्रतिज्ञेया करेणुन्नतहस्तका ॥
वृहद्वक्त्रा वृहत्काया पद्माभा पूर्व्वदक्षिणा ।
रथस्था दक्षिणा पीता तथा स्यात् प्राप्तयौवना ॥
उष्ट्रगा कृष्णपीता च तरुणी याम्यपश्चिमा ।
यौवनाद्विच्युता कृष्णा पश्चिमा तुरगाश्रिता ॥
आसन्नपलिता नीला मृगगा तदनन्तरा * ।

* अनुर्व्वाणावनन्तरति पुस्तकान्तरे पाठः ।

श्वेता नरपक्षा कृष्णा च तथा भवति चात्तरा ॥
अतिकृष्णा वृषस्था च शुक्ला पूर्व्वोत्तरा भवेत्।
अधस्तात् पृथिवी तुल्या चोर्द्धा गगनसंस्थिता: ॥
चतुर्द्दन्ते गजे शक्रः श्वेतः कार्य्यः सुरेश्वरः।
वामोत्सङ्गगता कार्य्या तस्य भार्य्या शची नृप ॥
नीलवस्त्रा सुवर्णाभः सर्व्वाभरणवांस्तथा।
तिर्य्यग् ललाटके तार्च्यः कर्त्तव्यश्च विभूषितः ॥
शक्रश्चतुर्भुजः कार्य्यो द्विभुजा च तथा शची।
पद्माङ्कुशौ च कर्त्तव्यौ वामदक्षिणहस्तयोः ॥
वामं शचीपृष्ठगतं द्वितीयं वज्रसंयुतम्।
वामे शच्याः करे कार्य्या रम्याः सन्तानमञ्जरी ॥
दक्षिणं पृष्ठविन्यस्तं देवराजस्य कारयेत्।

इन्द्रः।

रक्तं जटाधरं वह्निं कारयेद्धूम्रवाससम्।
ज्वालामालाकुलं सौम्यं त्रिनेत्रं श्मश्रुधारिणं ॥
चतुर्वाहुं चतुर्द्दंष्ट्रं देवेशं वायुसारथिम्।
चतुर्भिश्च शुकैर्युक्ते धूमचिह्नरथे स्थितम् ॥
वामोत्सङ्गगता स्वाहा शक्रस्येव शची भवेत्।
रत्नपात्रकरा देवी वह्नेर्दक्षिणहस्तयोः ॥
ज्वाल त्रिशूले कर्त्तव्ये त्वक्षमामाल्यश्च वामके।

अग्निः।

सजलाम्बुदसच्छायः तप्तचामीकराम्बरः।

महिषस्थश्च कर्त्तव्यः सर्व्वाभरणवान् यमः ॥
नीलोत्पलाभां धूम्रोर्णां वामोत्सङ्गे च कारयेत् ।
धूम्रोर्णा द्विभुजा कार्य्या यमः कार्य्यश्चतुर्भुजः ॥
दण्डखड्गावुभौ कार्य्यौ यमदक्षिणहस्तयोः ।
ज्वाला त्रिशूला कर्त्तव्या त्वक्षमाला च वामके ॥
दण्डोपरि मुखं कार्य्यं ज्वालामालाविभूषणम् ।
धूम्रोर्णा दक्षिणे हस्ते यमपृष्ठगतो भवेत् ॥
वामे तस्याः करे कार्य्यं मातुलाङ्गं सुदर्शनः ।
पार्श्वे तु दक्षिणे तस्य चित्रगुप्तं तु कारयेत् ॥
उदीच्यावेषं स्वाकारं द्विभुजं सौम्यदर्शनं ।
दक्षिणे लेखनी तस्य वामे पत्रं तु कारयेत् ॥
वामे पाशधरः कार्य्यः कालो विकटदर्शनः ।

यमः ।

विरूपाक्षो विवृत्तास्यः प्रांशुदंष्ट्रोज्ज्वलाननः ।
ऊर्ध्वकेशो हरित्श्मश्रुः द्विबाहुर्भीषणाननः ॥
वर्णेन कृष्णरक्ताङ्गः कृष्णाम्बरधरस्तथा ।
सर्व्वाभरणवानुष्ट्रदण्डरश्मिकरस्तथा ॥
भार्य्याश्चतस्रः कर्त्तव्या देवी च निर्ऋतिस्तथा ।
कृष्णाङ्गी कृष्णवदना पाशहस्ता तु वामतः ॥

निर्ऋतिः ।

सप्तहंसे रथे कार्य्यो वरुणो यादसाम्पतिः ।
स्निग्धवैदूर्य्य संकाशः श्वेताम्बरधरस्तथा ॥

किञ्चित्प्रलम्बजठरो मुक्ताहारविभूषितः ।
सर्व्वाभरणवान् राजन् महादेवश्चतुर्भुजः ॥
वामभागगतं केतुं मकरं तस्य कारयेत् ।
छत्रं तु शुभितं मूर्द्धि भार्य्या सर्व्वाङ्गसुन्दरी ॥
वामोत्सङ्गगता कार्य्या मध्ये तु द्विभुजा नृप ।
उत्पलं कारयेत् वामे दक्षिणं देवपृष्ठगम् ॥
पद्मपाशौ करे कार्य्यौ देवदक्षिणहस्तयोः ।
शङ्खञ्च रत्नपात्रञ्च वामयोस्तस्य कारयेत् ॥
भागे तु दक्षिणे गङ्गा मकरस्था सचामरा ।
देवी पद्मकरा कार्य्या चन्द्रगौरी वरानना ॥
वामे तु यमुना कार्य्या कूर्म्मसंस्था सचामरा ।
नीलोत्पलकरा सौम्या नीलनीरजसन्निभा ॥

वरुणः ।

वायुरम्बरवर्णस्तु तदाकाराम्बरो भवेत् ।
कोष्ठपूरितचक्रस्तु द्विभुजो रूपसंस्थितः ॥
गमनेच्छा शिवा भार्य्या तस्य कार्य्या च वामतः ।
कार्य्यौ गृहीतवक्रान्तःकराभ्यां पवनो द्विजः ॥
तथैव देवी कर्त्तव्या शिवा परमसुन्दरी ।
व्यावृतास्यस्तथा कार्य्यो देवीव्याकुल मूर्द्धजः ॥

वायुः ।

कर्त्तव्यः पद्मपत्राभो वरदो नरवाहनः ।
चामीकराभो वरदः सर्व्वाभरणभूषितः ॥

लम्बोदरश्चतुर्बाहुर्व्वामपिङ्गललोचनः ।
उदीच्यवेषः कवची हारभाराद्दितो हरः ॥
द्वे च दंष्ट्रे मुखे तस्य कर्त्तव्ये श्मश्रुधारिणः ।
वामेन विभवा* कार्य्या मौलिस्तस्यारिमर्द्दन ॥
वामोत्सङ्गगता कार्य्या वृद्धिर्द्देवी वरप्रदा ।
देवपृष्ठगतं पार्श्विद्विभुजायास्तु दक्षिणम् ॥
रत्नपात्रधरं कार्य्यं वामं रिपुनिसूदन ।
गदा-शक्ती च कर्त्तव्ये तस्य दक्षिणहस्तयोः ॥
सिंहार्कलक्षणं केतुं शिविकामपि पादयोः ।
शङ्ख-पद्मनिधी कार्य्यौ सुरूपौ निधिसंस्थितौ ।
शङ्ख-पद्माञ्जलिक्रान्तं वदनं तस्य पार्श्वयोः ॥

धनदः ।

विष्णुधर्म्मोत्तरात् ॥

नीलोत्पलाभं गगनं तद्वर्णाम्बरधारि च ।
चन्द्रार्कहस्तं कर्त्तव्यं द्विभुजं सौम्य दर्शनः ॥

आकाशम् ।

चतुरस्रं भवेन्मूलं ततो वृत्तं महाभुज ।
तत्तुल्यचतुरस्रञ्च मेरुवत् संस्थितं शुभम् ॥
भद्रपीठमयः प्रोक्तो व्योमभागस्तृतीयकः ।
स्तम्भवच्चतुरस्रं च मध्यभागः प्रकीर्त्तितः ॥

---

* विभवेति क्वचित् पाठः ।

भद्रपीठवदन्यच्च तत्र पद्मं न्यवेदयेत्।
शुभाष्टपत्रं तन्मध्ये कर्णिकायां दिवाकरः॥
पत्राष्टके न्यसेत्तस्य दिक्पालान् सर्व्वतोदिशः।

व्योम।

विष्णुरूपधरः कार्य्यो ध्रुवो ग्रहगणेश्वरः।
चक्ररश्मिकरः श्रीमान् द्विभुजः सौम्यदर्शनः॥

ध्रुवः।

रविः कार्य्यः शुभश्मश्रुः सिन्दूरारुणसुप्रभः।
उदीच्यवेषः स्वाकारः सर्व्वाभरणभूषितः॥
चतुर्वाहुर्म्महातेजा कवचेनाभिसंवृतः।
कर्त्तव्या रसना चास्य पातीयाङ्गतिसंश्रिताः *॥
रश्मयस्तस्य कर्त्तव्या वामदक्षिणहस्तयोः।
ऊर्द्ध स्रग्दामसंस्थाना सर्व्वपुष्पचिता शुभा॥
स्वरूपरूपः स्वाकारो दण्डः कार्य्योऽस्य वामतः।
दक्षिणे पिङ्गले भागे कर्त्तव्यास्यातिपिङ्गलः॥
उदीच्यवेषौ कर्त्तव्यौ तावुभावपि यादव।
तयो र्मूर्द्ध्नि च विन्यस्तौ करौ कार्य्यौ विभावसोः॥
लेखनी पत्रकौ कार्य्यौ पिङ्गलस्यातिपिङ्गलः†।
चर्म्म-शूल-धरो देवस्तथा यत्नाद्विधीयते॥
सिंहो ध्वजश्च कर्त्तव्यस्तथा सूर्य्यस्य वामतः।

---

* याचोर्य्याङ्गतिसङ्गिता इति पाठान्तरं।
† पत्रकरकः कार्य्यो भवतीति पाठान्तरं।

चत्वारश्चास्य कर्त्तव्यास्तनया तस्य पार्श्वयो ॥
रेवन्तश्च यमश्चैव मनुद्वितयमेव च ।
ग्रहराजो रविः कार्य्यो ग्रहैर्व्वा परिवारितः ॥
राज्ञी सवर्णा छायाच तथा देवी सुवर्च्चसा ।
चतस्रश्चास्य कर्त्तव्या पत्नाश्च परिपार्श्वयोः ॥
एकचक्रे च सप्ताश्वे षडश्वे वा रथोत्तरे ।
उपविष्टस्तु कर्त्तव्यो देवो ह्यरुणसारथिः ॥

मत्स्य पुराणात् ।

पद्मासनः पद्मकरः पद्मगर्भदलद्युतिः ।
सप्ताश्वरथसंस्थश्च द्विभुजश्च सदागतिः ॥

सूर्य्यः ।

चन्द्रः श्वेतवपुः कार्य्यः श्वेताम्बरधरः प्रभुः ।
चतुर्बाहुर्म्महातेजाः सर्व्वाभरणभूषितः ॥
कुमुदौ च सितौ कार्य्यौ तस्य देवस्य हस्तयोः ।
कान्तिर्म्मूर्त्तिमतौ कार्य्यौ तस्य पार्श्वे तु दक्षिणे ॥
वामे शोभा तथा कार्य्या रूपेणाप्रतिमा भुवि ।
चिह्नं तथास्य सिंहाङ्कं वामपार्श्वेऽकंवद्भवेत् ॥
दशाश्वे च रथे कार्य्यौ द्वे चक्रे वरसारथौ ।

मत्स्यपुराणे ।

श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतभूषणः ।

गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी ॥

चन्द्रः।

विष्णुधर्म्मोत्तरात्।

भौमोऽग्नि तुल्यः कर्त्तव्यस्त्वष्टाश्वे काञ्चने रथे।

मत्स्यपुराणात्।

रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः।
चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः॥

भौमः।

विष्णुधर्म्मोत्तरात्॥

विष्णुतुल्यो बुधः कार्य्यो भौमतुल्ये तथा रथे॥

बुधः।

तप्तजाम्बूनदाकारो द्विभुजश्च बृहस्पतिः।
पुस्तकं चाक्षमालाञ्च करयोस्तस्य कारयेत्।
सर्व्वाभरणयुक्तश्च तथा पीताम्बरो गुरुः॥

गुरुः।

अष्टाश्वे काञ्चने दिव्ये रथे दृष्टिमनोरमे।
शुक्रः श्वेतवपुः कार्य्यः श्वेताम्बरधरस्तथा॥
द्वौ करौ कथितौ तस्य निधिपुस्तकसंयुतौ।
दशाश्वे च रथे कार्य्यो राजते भृगुनन्दनः॥

शुक्रः ।

कृष्णवासास्तथा कृष्णः शनिः कार्य्यः शितानन: ।
दण्डाक्षमालासंयुक्तः करत्रितयभूषणः ॥
कार्ष्णायसे रथे कार्य्यस्तथैवाष्टतुरङ्गमे ।

शनिः ।

रौप्ये रथे तथाष्टाश्वे राहुः कार्य्यो विचक्षणैः ।
कम्बलं पुस्तकं कार्य्यं भुजेनैकेन संयुतं ।
करमेकन्तु कर्त्तव्यं शस्यं शून्यन्तुदक्षिणं ॥

राहुः ।

भौमवच्च तथा रूपं केतोः कार्य्यं विजानता ।
केवलं चास्य कर्त्तव्याः दशराजंस्तुरङ्गमाः ॥

केतुः ।

विश्वकर्म्मशास्त्रात् ।

तिथयोऽथाधुनोच्यन्ते प्रतिपद्द्विभुजारुणा ।
मेषगा शक्तिपाशा सा सितपक्षादिमा मता ॥

प्रतिपदः ।

द्वितीया हंसगा शुभ्रा पाशपुस्तकधारिणी ॥

द्वितीयायाः ।

तृतीया वृषगा गौरी शूलपाशधरा मता ॥

तृतीयायाः।

नीलोत्पलदलाभासा चतुर्थी मूषकस्थिता।
परशुं बिभ्रती पाशं पीतवस्त्रा-त्रिसंयुता॥

चतुर्थ्याः।

पङ्कजस्था प्रवालाभा फणामस्तकभूषणा।
शङ्खं मुद्रां तथा पाशं बिभ्राणा पञ्चमी मता॥

पञ्चम्याः।

मयूरगारुणा षष्ठी पाश-कुक्कुटधारिणी॥

षष्ठ्याः।

ताम्रवर्णाब्जपात्रा सा हयस्था सप्तमी मता।

सप्तम्याः।

घण्टापात्रधरा गोस्था गोक्षीर धवलाष्टमी॥

अष्टम्याः।

नवमी सिंहगा शुभ्रा पाश पात्र-धराशुभा॥

नवम्याः।

कृष्णवर्णा लुलापस्था दशमी दण्डपाणिनी॥

'लुलापो, महिषः।

दशम्याः।

एकादशी मृगाङ्कस्था तुला-कर्त्तरिकायुता।
सिंहाननाऽरुणगला-तुन्दिला* लासिनी परा॥

एकादश्याः।

द्वादशी गरुड़ारूढा मेघवर्णारपाणिनी॥

अरं, चक्रम्।

द्वादश्याः।

चाप-बाण-धरा गौरी मकरस्था त्रयोदशी।

त्रयोदश्याः।

अजस्था पाटलाभा सा पलपासुरा भृता †।
नीलकण्ठेन्द्रगोपाभलोचनेयं चतुर्दशी॥

चतुर्दश्याः।

शशगा पौर्णिमा शुभ्रा मौक्तिकाभरणान्विता।
सुधापूर्णघटा धीर वामदक्षिणवाहुका॥

पौर्णमास्याः।

धूसरा कृष्णपक्षाद्या मारसंस्था चतुर्मुखा।
अक्षसूत्रं स्रुवं पुस्तीपात्रं धत्ते चतुर्भुजा॥

कृष्णप्रतिपदः।

द्वितीया कुमुदाभासा वृषस्था‡ साक्षकुण्डिका:।

---

* तुन्दिलीति पुस्तकत्रये पाठः।

† सुरामृतेति क्वचित् पाठः।

‡ वृषस्थेति क्वचित् पाठः।

कृष्णद्वितीयायाः।

तृतीया तार्क्ष्यगा नीला शङ्खपात्रधरा द्विदोः।

कृष्णतृतीयायाः।

चतुर्थी कज्जलाभा सा महिषस्था चतुर्भुजा।
धत्ते चमालिकां दण्डं पाशं पात्रञ्च दंष्ट्रिणी॥

कृष्णचतुर्थ्याः।

ग्राहस्था चन्द्रगौराभा पञ्चमी साचकुण्डिका।

कृष्णपञ्चम्याः।

नरचा मयूरगा रक्ता शक्तिकुक्कुटधारिणी।
एकास्या द्विभुजा षष्ठी रक्तवस्त्रा सुभूषणा॥
नीलकुन्तलकण्ठा सा जटाखण्डेन्दुभूषिता।

कृष्णषष्ठ्याः।

इभस्था सप्तमी गौरा द्विभुजा वज्रपात्रिणी।

कृष्णसप्तम्याः।

प्रेतगा वाष्टमी रक्ता कृष्णग्रीवा शितांशुका।
अक्षं खड्गं तथा खेटं पात्रं धत्ते चतुर्भुजा॥

कृष्णाष्टम्याः।

सर्पगा नवमी नीला दंष्ट्रिणी पात्रतर्जनी।

कृष्ण नवम्याः ।

सिंहासनस्थिता शुभ्रा दशमी पीतकुण्डला ।
ज्ञानमुद्राक्षपात्रेयं पीतवस्त्राब्जमालिनी ॥

कृष्णदशम्याः ।

एकादशी वृषस्थाञ्जनीलशुभ्रारशूलिनी * ।

कृष्णैकादश्याः ।

ताम्रवर्णा रथारूढा पात्र-खेटा-सि पङ्कजा ।
द्वादशी शुभ्रवस्त्रेयं नीलकुण्डलभूषिता ॥

कृष्ण द्वादश्याः ।

अशोककलिका वाण-चाप-पात्रा त्रयोदशी ।
मेचकाब्जासना श्यामा हरिद्वस्त्रा मदालसा ॥
गदा-पात्रधरा गौरा निधिस्था वा त्रयोदशी ।

कृष्णत्रयोदश्याः ।

द्विभुजा तुरगारूढा कृष्णवर्णा चतुर्द्दशी ।
खड्गभल्लधरा नीलकुण्डला शुकभूषणा † ॥

कृष्णचतुर्द्दश्याः ।

---

* नीलशुभ्रा त्रिशूलिनीति क्वचित् पाठः ।

† शुभभूषणेति क्वचित पाठः ।

अमावास्या विधातव्या द्विर्दोर्मरकतप्रभा।
दर्भासनस्थिता चेयं दर्भपिण्डधरा कृशा॥

अमावास्यायाः॥

अथ नक्षत्ररूपाणि कथयामि समासतः।
तत्रादावश्विनी ज्ञेया पद्मपत्रनिभा शुभा॥
अश्ववक्त्राम्बुजारूढा द्विभुजा च सिताम्बरा।
दक्षे दिव्यौषधीपात्रं विभ्रती पुस्तकं करे॥

अश्विन्याः।

भरणी महिषारूढा गजवक्त्राञ्जनप्रभा।
दण्डपाशधरात्युग्रा रक्तदृक् परिकीर्त्तिता॥

भरण्याः।

छागस्था छागवक्त्रास्या पिङ्गभ्रूकेशलोचना।
सूत्रं शक्तिञ्च विभ्राणा पीनाङ्गजठराकृणा॥
कीर्त्तिका कीर्त्तिता चेयं स्वर्णमालाविभूषणा।

कृत्तिका।

रोहिणी तुहिनाभासा सर्पवक्त्रा तु हंसगा।
सूत्र-कुण्डीधरा देवी कीर्त्तिता हारभूषणा॥

रोहिण्याः।

मृगानना हयास्या वा नागवक्त्राग्रहायिणी।

छत्रस्था चन्द्रगौराभ कुण्डिका जयमालिनी ॥

मृगशीर्षायाः।

श्वमुखी कृष्णवर्णा तु रक्तार्द्रा शूलपाणिनी।
नीलवस्त्रा वृषारूढ़ा वास्थिमाला विभूषणा ॥

आर्द्रायाः।

शूकरास्यो विडालस्यो गौरवर्णः पुनर्वसुः।
सूत्र-वज्रा-क्षुशा-भीतीर्बिभ्राणः परिकीर्त्तितः ॥

पुनर्वसोः।

छागारूढ़श्च मेघाभः पुष्यियं मधुपिङ्गभाक्।
अक्षचण्डासनी कुण्डीं दधानोत्र चतुर्भुजः ॥

पुष्यस्य।

कोकास्या वा विडालास्या रक्ताश्लेषा चतुर्भुजा।
अक्ष-कुण्डीधरा द्वाभ्यां सर्पालिङ्गनकारिणी ॥

अश्लेषायाः॥

कपिवक्त्रा मघा श्यामा कृशाङ्गी च महोदरा।
दर्भ-पिण्डधराजस्था द्विभुजेयमुदीरिता ॥

मघायाः।

पूर्व्वा हस्तिमुखा स्फस्था शुकहस्तद्वयारुणा।

स्कः, चक्रम्।

पूर्व्वायाः।

व्याघ्राननोत्तरा गोस्था शुभ्रवर्णा चतुर्भुजा।
हारिणी सूत्र-खट्टाङ्ग-धारिणी परिकीर्त्तिता॥

उत्तरायाः।

गौरारुणो लुलापास्यो हस्तनामा हयस्थितः।
अक्षवज्रभुजद्वन्द्वो भूतिदः परिकीर्त्तितः॥

हस्तस्य।

व्याघ्रास्या महिषारूढा चित्रा गौरा चतुर्भुजा।
अक्षकुण्डी सपुस्ती च सुधापूर्णघटान्विता॥

चित्रायाः।

महिषस्था मृगारूढा* गौरा श्यामाथवा मता।
पीना चतुर्भुजा स्वात्यक्ष-कुश-ध्वज-पात्रिणी॥

स्वात्याः।

हर्यक्षवदना रक्ता नाभिपादान्तहेमभा।
मेष-च्छागस्थिता सेयं विशाखाङ्कुश वज्रिणी॥
वामे शक्तिमधः पात्रं विभ्राणा हेमभूषणा।

विशाखायाः।

---

* वृषारूढेति क्वचित् पाठः।

हरिस्था च विडालास्या द्विभुजाम्बुजवज्रिणी ।
मूर्द्धादिनाभि-पादान्तश्यामगौरा क्रमेण तु ॥
अनुराधा परिज्ञेया पद्मरागविभूषणा ।

अनुराधायाः ।

पीतवर्णा गजारूढा भल्लास्या वा मृगानना ।
अक्षसूत्रं पविन्दक्षे वामे ज्येष्ठाङ्कुशं धये ॥

ज्येष्ठायाः ।

मूलरूपं विधातव्यं श्यामं कुणपवाहनम् ।
खड्गखेटधरं चोग्रं द्विभुजञ्च वृकाननम् ॥

मूलस्य ।

कुम्भीरवदना नीला मर्कटस्था चतुर्भुजा ।
अक्षसूत्रं कजं पाशं पात्रं या विभ्रती सदा ॥
पूर्व्वाषाढा समुद्दिष्टा पीतवस्त्राब्जभूषणा ।

पूर्व्वाषाढायाः ।

सर्पगा चोत्तराषाढा गौरवर्णा सुरूपिणी ।
नागबन्धजटाजूट-स्वर्णकुण्डल-भूषिता ॥
अक्षनागधरा दक्षे वामे पुस्ती सकुण्डिका ।

उत्तराषाढायाः ।

अभिजित् कुमुदाभा सा नक्रवक्त्रा तु हंसगा ।

वरस्रुक्-पुस्तका-भीति-संयुतेयं चतुर्भुजा ॥

अभिजितः।

नीलरुक् तुरगारूढा श्रवणो मर्कटाननः।
शङ्ख-चक्र-गदा-ज्ञानि विभ्राणः स्वर्णभूषणः ॥

श्रवणस्य।

तप्तचामीकराभा सा निधिस्था पङ्कजासना।
पक्वविम्बाधरा तन्वी पीनोन्नतपयोधरा ॥
दीर्घवेणी सपुष्पा सा मौक्तिकाभरणान्विता।
चारुनेत्रा सुवेषाढ्या द्विभुजा वसनारुणा ॥
वरालयान्विता सौम्या धनिष्ठा परिकीर्त्तिता।

धनिष्ठायाः।

शुभ्रा मकरगाऽश्वास्या द्विभुजा पाशपाणिनी।
पाटला वस्त्रसंयुक्ता कीर्त्तिता शततारका ॥

शततारा।

पूर्व्वा भाद्रपदा शुभ्र गोवक्त्रा छागगामिनी।
मेषशीर्षधरा सेयं सोधुपात्रञ्च बिभ्रती ॥

पूर्व्वभाद्रपदायाः।

गर्धभास्या वृषारूढा सिता भाद्रपदोत्तरा।
पात्रञ्च डमरुन्धत्ते द्विभुजेयमुदीरिता ॥

उत्तरभाद्रपदायाः ।

रेवती करभास्यास्या द्विभुजा हस्तिगामिनी ।
कमलं कुण्डिकाञ्चत्ते श्वेतवर्णा महास्वना ॥

रेवत्याः ।

अथ योगानां ।

विष्कुम्भः प्रथमो ज्ञेयः पीतवर्णस्तु षड्भुजः ।
रक्तास्यो नीलकण्ठस्तु वृत्तनेत्रः सुभीषणः ॥
विशालभालो दीर्घाङ्गस्तुङ्गनासो जटाधरः ।
लम्बकर्णेन्द्रनीलोत्थस्वर्णरत्नजकुण्डलः ॥
शुभ्रनीलेन्द्रगोपाभवसनः स्वर्णभूषणः ।
मुद्गरं प्रथमे दक्षे द्वितीये कर्त्तरीमिह ॥
तृतीये कुलिशं पाणौ वामाद्ये टङ्कमेवच ।
श्वेनपुच्छं द्वितीये च तृतीये चामृतं घटं ॥
विश्राणः पूजनीयोयं पीतपुष्पैः सुगन्धिभिः ।
कार्य्यनिष्पत्तये नूनमन्यथा विघ्नदायकः ॥

विष्कुम्भस्य ।

प्रीतिनामा द्वितीयस्तु जवाकुसुमसन्निभः ।
श्वेतवक्त्रो विशालाक्षो लम्बकर्णेन्दुकुण्डलः ॥
भालालितिलकोपेतः सौम्यो मुक्ताविभूषणः ।
श्वेतवस्त्रो जटामौलिरष्टवाहुर्वृकोदरः ॥
बन्धुपुष्पाङ्कजीवोत्थमल्लिकामादिमे यमे ।

द्वितीये मे दकं पाणौ तृतीये कदलीफलं ॥
चतुर्थे पङ्कजञ्चैव वामाद्ये चामृतं घटं।
द्वितीये चात्र वै पात्रं सोमपूर्णं मनोहरं ॥
तृतीये कुलिशं हस्ते चतुर्थे चात्र वै ध्वजां।
दधानो भूतये प्रीत्यै सर्व्वतापनिवृत्तये ॥

प्रीतेः।

आयुष्मांस्तु तृतीयोऽयं मौक्तिकाभोऽरुणोदरः।
चौमवस्त्रान्वितश्चैव मुक्तासौवर्णभूषणः ॥
द्विभुजः प्रथमे दक्षे चाक्षसूत्रञ्च मौक्तिकं।
दूर्वाञ्च द्वितीये वै तृतीये चूतपल्लवं ॥
चतुर्थे पङ्कजञ्चैव पञ्चमे दातपत्रकं।
सुधाकुम्भन्तु वामाद्ये वीजपूरपिधानकम् ॥
पात्रं दध्यन्वतीयेतं द्वितीये करपल्लवे।
तृतीये श्रीफलं हस्ते चतुर्थे पविमेव च ॥
पञ्चमे चामरं हस्ते स्वर्णदण्डं सितं शुभम्।
धारयन्नेष वै पूज्यो भोगायुष्यविवृद्धये ॥

आयुष्मतः।

सौभाग्याख्यश्चतुर्थोऽत्र स्फाटिकाभस्त्रिलोचनः
स्कन्धारुणो महासत्वः सुन्दरः कुमुदाम्बरः ॥
दशबाहुरयञ्चाक्षे प्रथमे श्रीफलं करे।
अक्षसूत्रं प्रवालोत्थं द्वितीये करपल्लवे ॥
ततीये कमलं हस्ते चतुर्थे वारवालकं।

पञ्चमे शक्तिमत्रैव वामाद्ये पात्रमेव च ॥
द्वितीये चामृतं कुम्भं तृतीये तु प्रकीर्णकं।
चतुर्थे दर्पणं हस्ते वेत्रदण्डञ्च पञ्चमे ॥
बिभ्राणः सौम्यः सौभाग्यो वृद्धये चायुषे श्रिये ।

सौभाग्यस्य ।

शोभनः पञ्चमो योगः श्वेतवक्त्रो वशी वली* ।
शेषोरुणकृशश्याङ्गः प्रवालकृतकुण्डलः ॥
शोणशुक्लाम्बरश्चैव मुक्ताविद्रुमभूषणः ।
अक्षसूत्रं सुहेमोत्थं प्रथमे दक्षिणे करे ॥
द्वितीये पङ्कजं हस्ते तृतीये श्रीफलं शये ।
तुर्ये शक्तिं कराम्भोजे वामाद्ये वै कमण्डलुम्॥
द्वितीये स्वर्णजं पात्रं तृतीये चैव दर्पणम् ।
चतुर्थे चामरं पाणौ धारयन्नष्टदोरिति ॥
पूजनीयो महाभक्त्या सौख्य-सौभाग्य-वृद्धये ।

शोभनस्य ।

अतिगण्डाभिधश्चाथ षष्ठो योगः प्रतीयते ।
गण्डारुणसितः क्रूरः कृष्णवक्त्रोर्कभूषणः ॥
स्थूलो वृद्धश्रुतिस्तुङ्गनासिकोऽरुणभूषणः ।
पिङ्गश्मश्रुजटामौलिः षड्भुजः कटिसूत्रवान् ॥
अक्षसूत्रं यमादिस्थे लोहजं करपल्लवे ।
एणं मृगं द्वितीये च तृतीये चैव वारिजम् ॥

---

* श्वेतवक्त्रोवशी वलीति क्वचित् पाठः ।

पात्रं वामादिमे पाणौ द्वितीये शक्तिमेव च।
पताकान्तु तृतीये वै दधानः कृष्णलोहितैः॥
पूजनीयो महाभक्त्या दुष्टभीतिनिवृत्तये।

अतिगण्डस्य।

चतुर्भुजः सुकर्म्मा वै श्वेतवाहृदरश्रुतिः।
नीलशुभ्रांशुकोपेतः स्वर्णनीलविभूषणः॥
रुद्राक्षमालिकामर्क्के प्रथमे करपल्लवे।
द्वितीये कमलं पाणौ वामादौ दण्डमेव च॥
पताकामत्र वै हस्ते द्वितीये सुमनोहरे।
विभ्रत्सुवृद्धये नृणां कर्म्मारम्भशुभप्रदः॥

सुकर्म्मणः।

धृत्याख्यश्चाष्टमो योगः कथ्यते वसुबाहुकः।
भालारुणस्तु सर्व्वाङ्गे श्वेतवर्णारुणाम्बरः॥
स्वर्णमुक्तेन्द्रनीलाढ्यो विद्रुमान्वितभूषणः।
मुक्ताक्षमालिकां दत्ते प्रथमे रत्नमुद्रिके॥
द्वितीये श्रीफलं पाणौ तृतीयेऽशोकपल्लवम्।
चतुर्थे हेमजं दण्डं वामाद्ये वै कमण्डलुम्॥
द्वितीये चामृतं पात्रं तृतीये चाम्बुजं करे।
पताकामत्र वै तुर्य्ये विभ्राणः श्रीविवृद्धये॥

धृतेः।

नवमः शूलनामाथ कथ्यते व्यक्तभागतः।

ताम्रारुणगलश्चैव श्वेतवर्णः कृशोदरः ॥
भालरेखात्रयश्चैव त्रिजटो नीलकुन्तलः ।
अर्कहस्ते यमादिस्थे त्रिशूलं चाति भीषणम् ॥
द्वितीये मुद्गरं पाणौ तृतीये चाक्षसूत्रकम् ।
चतुर्थे शृङ्खलामत्र पञ्चमे दण्डमेव च ॥
षष्ठे चैवाम्बुजं पाणौ कपालं चोत्तरादिमे ।
टङ्कं द्वितीयके चैव तृतीये वै कमण्डलुं ॥
सन्दंशन्तु करे तुर्ये पञ्चमे चैव दर्पणम् ।
पताकामत्र वै षष्ठे धारयन्नेष पूजितः ॥
भवेदनिष्टनाशाय वैरिविध्वस्तये नृणाम् ।

शूलस्य ।

गण्डाख्यः कथ्यते योगो दशमः सोऽशमत्र हि ।
गण्डः शुभ्रारुणाङ्गस्तु षड्भुजो मेचकाम्बरः ॥
हरिन्मणिविभूषाढ्यो नीलविद्रुमकुण्डलः ।
अक्षसूत्रं यमादिस्थे द्वितीये चन्द्रहासकम् ॥
तृतीये वारिजं नीलं वामाद्ये वै कमण्डलुं ।
द्वितीये खेटकं हस्ते पताकाञ्च तृतीयके ॥
दधानो यज्वनस्तुष्टेत्र रोगानिष्टनिवृत्तये ।

गण्डस्य ।

एकादशस्तु वृद्धाख्यः कथ्यते रसचन्द्रदो ।
पादारुणापरश्वेतो भालविस्तीर्णमण्डलः ॥
विचित्र वसनोपेतो मुक्ता-सौवर्णभूषणः ।

अक्षसूत्रं यमादिस्थे द्वितीये चामृतं घटं ॥
तृतीये नन्दकं पाणौ चतुर्थे बाणमेव च।
पञ्चमे मुद्गरञ्चैव षष्ठे सन्दंशमेव च ॥
सप्तमे कम्बुमत्रैव पङ्कजञ्चाष्टमे शये।
कुण्डिकामादिमे वामे द्वितीये पात्रमेव च ॥
तृतीये खेटकं हस्ते चतुर्थे चैव कार्मुकं।
पञ्चमे टङ्कमत्रैव षष्ठे वेणं विषाणकं ॥
सप्तमे चापमत्रैव पताकामष्टमे करे।
बिभ्राणः श्रेयसो वृद्धै चायुर्गोत्रधनस्य च ॥

ध्रुवः।

द्वादशो ध्रुवनामा वै योगश्चात्रैव कथ्यते।
दक्षस्थलारुणश्चैव श्वेतसर्व्वाङ्ग एव च ॥
माञ्जिष्ठवसनोपेतो हेम-मुक्ताविभूषणः।
चतुर्द्दशभुजोपेतो दक्षिणाद्ये क्षसूत्रकं ॥
द्वितीये तु कजं खड्गं तृतीये चैव मुद्गरं।
चतुर्थे सायकं हस्ते पञ्चमे चैव पङ्कजं ॥
षष्ठे मनोहरं शङ्खं सप्तमे चामरं शये।
पात्रं सौम्यादिमे पाणौ द्वितीये चैव खेटकं ॥
टङ्कं तृतीयके हस्ते चतुर्थे चैव कार्म्मुकं।
पताकामत्र वै हस्ते पञ्चमे वरलक्षणे ॥
षष्ठे मनोहरादर्शौ सप्तमे च क्रमाद्दधत्।
पूजनीयो महाभक्त्या लक्ष्मी-स्थैर्य्यादिहेतवे ॥

ध्रुवस्य ।

कथ्यते चाधुना योगो व्याघाताख्यस्त्रयोदशः ।
नाभ्युर्द्धं लोहितश्चायं श्वेतपूर्व्वस्त्रिलोचनः ॥
अन्तःश्वेतारुणप्रान्तवसनः सूर्य्यकुण्डलः ।
गले स्फटिकमालोसौ शेषरुद्राक्षभूषणः ॥
मणिबन्धालिवर्णस्तु षड्भुजः कुटिलाननः ।
पङ्कजं प्रथमे दक्षे द्वितीये परशुं शये ॥
तृतीये चाक्ष वै पाशं वामे पात्रमिहादिमे ।
द्वितीये चामृतं कुम्भं तृतीये चाङ्कुशं शये ॥
बिभ्राणोयं महापूज्यः कार्य्यभ्रंशनिवृत्तये ।

व्याघातस्य ।

अधुना कथ्यते योगो हर्षणाख्यश्चतुर्दशः ।
जानूर्द्धं लोहितश्चायं तत्पूर्व्वं श्वेत एवच ॥
पाटलाभांशुकोपेतो मुक्ता-वैदूर्य्यभूषणः ।
भुजद्वादशकोपेतो लम्बकर्णो विशालदृक् ॥
कौस्तुभं प्रथमे दक्षे द्वितीये चाक्षसूत्रकं ।
तृतीये पङ्कजं हस्ते चतुर्थे बाणमेव च ॥
पञ्चमे शङ्खमत्रैव षष्ठे पाशं कराम्बुजे ।
वामादिमे करे पात्रं द्वितीये चामृतं घटं ॥
तृतीये परशुं हस्ते चतुर्थे चैव कार्मुकं ।
पञ्चमे तु करे चक्रं षष्ठे चैवाङ्कुशं शये ॥
बिभ्राणः श्रेयसे भूत्यै मानोन्नत्यै सुखाय च ।

हर्षणस्य।

अथ पञ्चदशो योगः कथ्यते वज्रसंज्ञकः।
श्वेताहिकाञ्चीं बिभ्राणः* कम्बुग्रीवारुणाननः।
रोचनावसनोपेतो विद्रकर्णस्त्रिलोचनः॥
वज्रवैदूर्य्यभूषाढ्यः कटिसूत्रसमन्वितः।
जटां त्रिवलयं बिभ्रत् दिग्भुजः परितो बली॥
अक्षसूत्रं यमादिस्थे द्वितीये बाणमेव च।
तृतीये पङ्कजं हस्ते चतुर्थे कुलिशं शये।
पञ्चमे परशुं पाणौ वामाद्ये चामृतं घटम्॥
द्वितीये कार्म्मुकं चैव तृतीये पात्रमुत्तमम्।
चतुर्थे कुलिशं चैव पञ्चमे पाशमेव च॥
विभूद्धिजय-सौख्याय-लक्ष्मी-सन्तानवृद्धये।

वज्रस्य।

कथ्यते चाधुना योगः सिद्धिनामा तु षोड़शः।
पादजङ्घारुणश्चोर्द्ध श्वेतवर्णः शुभाननः॥
दिग्भुजो लोहितग्रीवो लोहितानिहिताम्बरः।
मुक्ताहारमणिस्वर्णभूषणः सोमकुण्डलः॥
श्रीफलं प्रथमे दक्षे द्वितीये चैव पङ्कजम्।
तृतीये पुस्तकं हस्ते चतुर्थे बाणमेव च॥
पञ्चमे तु ध्वजं हस्ते वामे पात्रमिहादिमे।
द्वितीये चामृतं कुम्भं तृतीये चैव चामरम्॥
चतुर्थे चैव कोदण्डं पताकामिह पञ्चमे।

---

* श्वेताहिका बघाम्भोषमिति पाठान्तरं।

दधानः सिद्धये नृणां वाञ्छितार्थस्य सिद्धिदः ॥

सिद्धे. ।

व्यतीपाताभिधश्चैव योगः सप्तदशस्त्विह ।
कण्ठेन लोहितश्चायं श्वेतग्रीवोऽलिभाननः ॥
शुभ्रमाञ्जिष्ठवसनो नीलस्वर्णजभूषणः ।
अष्टादशभुजो देवो भ्रुकुटीकुटिलाननः ॥
दात्रमर्काद्रिमे हस्ते द्वितीये लोष्ठभेदनं ।
अक्षसूत्रं तृतीये तु तुर्य्ये बाणं मनोहरम् ॥
पञ्चमे शृङ्खलां लौहीं षष्टे कवचमेव च ।
सप्तमे मुद्गरं हस्ते पङ्कजं चाष्टमे करे ॥
कुद्दालं नवमे हस्ते शृङ्गिकामादिमोत्तरे ।
पात्रं द्वितीयके चैव स्वर्णकुम्भं तृतीयके ॥
चतुर्थे कार्म्मुकं पाणौ पञ्चमे कर्त्तिका मिह ।
मुशलन्तु करे षष्ठे सप्तमे टङ्कमेव च ॥
अष्टमे च ध्वजं हस्ते नवमे प्राङ्कुटं शये ।
दधानो वैरिवर्गस्य ध्वस्तये चैव मृत्यवे ॥
यज्वनः पुत्रसन्तत्यै लक्ष्मीभोगसुखाय च ।

व्यतीपातस्य ।

अष्टादशो वरीयांश्च कथ्यते योग उत्तमः ।
आकण्ठशुभ्रवर्णस्तु लोहितग्रीव एव च ॥
श्वेतवस्त्रो विशालाक्षो लम्बकर्णोऽर्ककुण्डलः ।

स्वर्णाभरणभूषाढ्यो लक्षणानेकसंयुतः॥
सिताम्बरोऽरुणप्रान्तो द्वात्रिंशद्भुजसंयुतः।
अक्षसूत्रं यमादिस्थे द्वितीये बीजपूरकं॥
चन्द्रहासं तृतीये तु तुर्ये बाणं कराम्बुजे।
पञ्चमे शङ्खमत्रैव षष्ठे परशुमेव च॥
सप्तमे मुद्गरं हस्ते चाष्टमे दात्रमेव च।
नवमे चात्र वै शृङ्गं दशमे कमलङ्करे॥
एकादशे पविञ्चात्र द्वादशे हलमेव च।
दण्डं त्रयोदशे हस्ते शक्तिमस्त्रं चतुर्द्दशे॥
कजम्पञ्चदशे हस्ते षोड़शेऽथ त्रिशूलकम्।
घण्टं वामादिमे पाणौ पात्रमत्र द्वितीयके॥
तृतीये खेटकञ्चैव तुर्य्ये कार्म्मुकमेव च।
चक्रन्तु पञ्चमे हस्ते षष्ठे चैव कुठारकम्॥
सप्तमे टङ्कमत्रैव चामरञ्चाष्टमे शये।
नवमे डमरुञ्चैव दशमे चात्र वल्लकीं॥
एकादशे शृणिञ्चैव द्वादशे मुशलं शये।
त्रयोदशे तु वै पाशं गदामत्र चतुर्द्दशे॥
दर्पणन्तिथिजे हस्ते ध्वजमत्रैव षोड़शे।
ददानः श्रेयसे भूत्यै सर्व्वभोगसुखाय च॥

वरीयसः।

एकोनविंशकश्चात्र कथ्यते परिवासनः *।

---

* परिवासनेति क्वचित् पाठः।

पादजान्वन्तशुभ्रोऽसौ श्वेतवक्त्रो जटाधरः॥
मध्यारुणोदरे नीलरेखासंयुतएव च।
नीलाम्बरो महासत्वो हेमरत्नजकुण्डलः॥
सुवर्णभूषणोपेतो षड्भुजः क्रूरदर्शनः।
गदामर्कादिमे हस्ते द्वितीये परिघं शये॥
तृतीये कमलं पाणौ वामाद्ये पात्रमेव च।
द्वितीये पट्टिशं हस्ते तृतीये चात्र वै ध्वजं॥
बिभ्राणः शत्रुनाशाय दुष्टभीतिनिवृत्तये॥

परिघस्य।

अथ त्रिंशतिमो योगः शिवाख्यश्चात्र कथ्यते।
शुभ्रवर्णस्त्रिनेत्रस्तु मौक्तिकाभरणान्वितः॥
दक्षिणे प्रथमे हस्ते वीजपूरं मनोहरं।
अक्षसूत्रं द्वितीये च तृतीये कम्बुमेव च॥
चतुर्थे सायकं हस्ते पञ्चमे चन्द्रहासकम्।
मुद्गरञ्च करे षष्ठे सप्तमे परशुं शये॥
कुद्दालमष्टमे पाणौ नवमे दात्रमेव च।
दशमे चात्र वै शृङ्गं पविमेकादशे त्विह॥
द्वादशे पञ्चशाखां वै लोष्टभेदनमेव च।
त्रयोदशे हलञ्चैव शक्तिमस्त्रं चतुर्दशे॥
करे पञ्चदशे दण्डं षोड़शे चाम्बुजन्त्विह।
त्रिशूलं मुनिचन्द्रे च वसुचन्द्रे च तोमरम्॥
वामादिमे शये पात्रं द्वितीये चामृतं घटं।

तृतीये चक्रमत्रैव चतुर्थे वै शरासनम् ॥
पञ्चमे खेटकं हस्ते षष्ठे टङ्कं कराम्बुजे।
कुठारं सप्तमे पाणौ शाङ्कुटञ्चाष्टमे त्विह ॥
नवमे चामरं शुभ्रं दशमे डमरुन्त्विह।
शृणिमेकादशे हस्ते द्वादशे चैव दर्पणं ॥
अष्टादशे शये कुन्तं* विभ्राणः शान्तिदृङ्मये

शोभनस्य।

एकविंशोऽधुना योगः सिद्धिनामाभ धीयते।
जवाकुसुमसङ्काशः शुभ्ररेखावशोदरः ॥
जटाभिरष्टभिस्तस्य मुकुटः खण्डचन्द्रयुक्।
शोणशुभ्रांशुकोपेतः स्फाटिकाभरणान्वितः ॥
वसुपञ्चभुजः सौम्यस्तुन्दिलः सर्व्वलक्षणः।
तोमरञ्चादिमे दक्षे द्वितीयेत त्रिशूलकं ॥
तृतीये पङ्कजं पाणौ तुर्य्ये दण्डं सुवर्णजम्।
पञ्चमे तु करे शक्तिं षष्ठे वै लाङ्गलं शये ॥
सप्तमे कुलिशं हस्ते शृङ्गमत्रैव चाष्टमे।
नवमे दात्रमत्रैव दशमे तु परश्वधं॥
मुद्गरं रुद्रहस्ते वै द्वादशे चन्द्रहासकम्।
त्रयोदशे शये बाणं शङ्खमत्र चतुर्दशे ॥

---

* कुन्तमिति क्वचित् पाठः।

कुम्भमिन्द्रादिमे हस्ते द्वितीये डमरुं शये।
पाशन्तु नवमे हस्ते दशमे वै कुठारकम्॥
टङ्कमेकादशे हस्ते द्वादशे चैव खेटकम्।
त्रयोदशे शये चापं चक्रमत्र चतुर्द्दशे॥
धारयन् पूजनीयोऽसौ भोग-सौख्य-श्रिये जये।

सिद्धः।

साध्यो द्वाविंशकश्चैव कथ्यते योग एव सः।
शुभ्रवर्णो विशालाक्षो वह्निरेखागलाननः॥
कौसुम्भवसनोपेतो वज्रवैदूर्य्यकुण्डलः।
वेदवह्निभुजोपेतो मेखलानेकरत्नयुक्॥
अक्षसूत्रं यमादिस्थे द्वितीये वीजपूरकम्।
तृतीये शक्तिमत्रैव तुर्य्ये चैव त्रिशूलकं॥
पञ्चमे सायकं हस्ते षष्ठे वज्रं कराम्बुजे।
सप्तमे पङ्कजं पाणौ दण्ड* मत्रैव चाष्टमे॥
नवमे तोमरं पाणौ दशमे शक्तिमेव च।
एकादशे हलं हस्ते द्वादशे शृङ्गमेवच॥
त्रयोदशे शये खड्गं परशुन्तु चतुर्द्दशे।
करे पञ्चदशे रम्ये मुद्गरं कठिनाङ्गुलौ॥
षोड़शे दात्र मत्रैव शङ्खं सप्तदशेत्विह।
वामादिमे करे कुण्डीं द्वितीये पात्र मेव च॥
तृतीये चाभयं हस्ते तुर्य्ये डमरुमेव च।

* कुन्तमिति पुस्तकान्तरे।

पञ्चमे कार्म्मुकं पाणौ षष्ठे चैवाङ्कुशं शुभ ॥
सप्तमे तु ध्वजं दिव्यमष्टमे पाशमेव च।
नवमे कुन्तमत्रैव दशमे तु गदामिह ॥
मुशलं रुद्र हस्ते वै द्वादशे चैव चामरम्।
त्रयोदशे करे खेटं कुठारन्तु चतुर्द्दशे ॥
टङ्कं पञ्चदशे पाणौ षोड़शे चैव दर्पणं।
चक्रं सप्तदशे हस्ते दधानः श्रीविवृद्धये ॥

साध्यस्य।

शुभनामा त्रयोविंशो योगश्चात्रैव कथ्यते।
नीलकालिकशोणस्तु मौक्तिकाभस्त्रिलोचनः ॥
शोणरेखाङ्कितग्रीवः शोणशुभ्रांशुकावृतः।
मुक्ताविद्रुममाणिक्यभूषणः स्वर्णकुण्डलः ॥
द्वात्रिंशद्बाहुसंयुक्तो जटाकपिलमण्डलः।
वरं प्रथमादिमे पाणौ द्वितीये चाक्षसूत्रकम् ॥
तृतीये च त्रिशूलं वै तुर्य्ये बाणं कराम्बुजे।
पञ्चमे पङ्कजं चैव षष्ठे कुलिशमेव च ॥
सप्तमे शक्तिमत्रैव दण्डं वै चाष्टमे करे।
नवमे तोमरं हस्ते दशमे शृङ्गिकामिह ॥
हलमेकादशे चैव द्वादशे खड्ग मत्रहि।
द्वात्रं त्रयो दशे हस्ते मुद्गरं च चतुर्द्दशे ॥
शङ्खं पञ्चदशे पाणौ षोड़शे तु परश्वधम्।
अभयं चादिमे वामे द्वितीये वै कमण्डलुं।

तृतीये पात्रमत्रैव तुर्य्ये कार्मुकमेव च।
पञ्चमे डमरुं पाणौ षष्ठे चाङ्कुशमेव च॥
सप्तमे वीजपूरं वै ध्वजं वै चाष्टमे करे।
नवमे पानपात्रञ्च दशमे कुन्तमेव च॥
गदामेकादशे हस्ते द्वादशे चैव खेटकम्।
चामरं सप्तमे पाणौ टङ्कमत्र चतुर्दशे॥
चक्रं पञ्चदशे चैव षोड़शे तु कुठारकम्।
बिभ्राणो भुक्तये* पूज्यः सौन्दर्य्याय सुखाय च॥

शुभस्य।

चतुर्विंशतिमत्रात्र शुक्लाख्यः† कथ्यतेऽधुना।
चिवुके लोहितश्चायं चन्द्रगौर स्त्रिलोचनः॥
जटामुकुटखण्डेन्दु नीलरेखा सुधाधरः।
सिन्दूरवदनोपेतो भालालितिलकाङ्कितः॥
प्रवालमौक्तिक-स्वर्ण-भूषणः कण्ठकौस्तुभः।
खर्बङ्गिबाहुसंयुक्तो रत्नमुद्रासमन्वितः॥
शूर्पाक्षमालिकां याम्ये प्रथमे करपल्लवे।
द्वितीये च त्रिशूलं वै तृतीये बाणमेव च॥
परस्वधं करे तुर्य्ये पञ्चमे शङ्खमेव च।
मुद्गरं चात्र वै षष्ठे सप्तमे दात्रमेव च॥
अष्टमे तु करे खड्गं नवमे चैव लाङ्गलम्।
दशमे शृङ्गमत्रैव तोमरं रुद्रसम्मिते॥

---

* भुक्तये इति क्वचित्पाठः।

† शुक्लाख्य इति क्वचित् पाठः।

द्वादशे तु करे दण्डं शक्तिमत्र त्रयोदशे।
चतुर्द्दशे शये वज्रं करे पञ्च दशे कजम्॥
वीजपूरन्तु वामाद्ये द्वितीये पात्रमेव च।
तृतीये कार्म्मुकं पाणौ तुर्य्ये चैव कुठारकम्॥
पञ्चमे चक्रमत्रैव षष्ठे टङ्कं कराम्बुजे।
सप्तमे चामरं पाणौ खेटकं चाष्टमे शये॥
नवमे तु गदामत्र दशमे वाऽमृतं घटम्।
कुन्तमेकादशे हस्ते द्वादशे पात्र मेव च॥
त्रयोदशे सृणिं चैव दर्पणञ्च चतुर्द्दशे।
ध्वजं पञ्चदशे हस्ते दधानस्तु महायच॥

शुक्लस्य।

पञ्चविंशतिमो योगो ब्रह्मनामा प्रतीयते।
शोणोरुपाण्डुराशेषो चन्द्रगौरस्त्रिलोचनः॥
नीलकालिकशोणस्तु ग्रीवास्वर्णस्त्रिरेखिकः।
जटात्रयप्रलम्बोऽसौ सौम्यः प्रहसिताननः॥
ताम्रवर्णांशुकोपेतः कण्ठरुद्राक्षमालिकः।
मुक्तामाणिक्यहेमोत्थभूषणः सोमकुण्डलः॥
विंशद्बाणभुजोपेतः किङ्किणीजालमेखलः।
सौम्याक्षमालिकां दक्षे प्रथमे तलशोभने॥
द्वितीये तु वरं पाणौ खड्गमत्र त्रयोदशे।
हलं चतुर्द्दशे हस्ते शृङ्गं पञ्चदशे त्विह।
षोड़शे चैव लोहासिं मुनिरम्भ्रे च तोमरम्॥

अष्टादशे शये दण्ड* शक्तिमेकोनविंशके।
करे विंशतिमे चक्रं त्वेकविंशे शये कजं॥
द्वाविंशे चमसं हस्ते त्रयोविंशे शयेऽर्व्वुदम्।
चतुर्विंशतिमे पाणौ सुदृष्टं लोहभेदनम्†॥
पञ्चविंशे तु रुद्राक्षं वामाद्ये वै कमण्डलुम्।
द्वितीये चाभयं हस्ते तृतीये चात्र वै भुवम्॥
तुर्य्ये खट्वाङ्ग मेवेह कुद्दालं‡ चैव पञ्चमे।
षष्ठे शरासनं पाणौ सप्तमे कवचं शये॥
अष्टमे पट्टिशं हस्ते नवमे वै सुदर्शनम्।
दशमे बीजपूरं वै पाशमेकादशे करे॥
द्वादशे चात्र वै टङ्कं खेटमत्र त्रयोदशे।
चतुर्द्दशे कुठाराख्यं डमरुन्तिथिसंज्ञिते॥
षोड़शे चामरं हस्ते कुम्भं सप्तदशे त्विह।
अष्टादशे गदामत्र मुशलं नन्दचन्द्रजे॥
अङ्कुशं विंशके हस्ते पाशश्चैवैकविंशके।
द्वाविंशके ध्वजं शुभ्रं वीरभद्रस्त्रिपञ्चजे॥
जिने सुनिर्म्मलादर्शं पञ्च विंशेऽजिनं शये।
दधानो यज्वनो गोत्र-परमायुर्विवृद्धये॥

ब्रह्माणः।

ऐन्द्रः षड्विंशकश्चात्र कथ्यते तव साम्प्रतम्।

* वज्रमिति क्वचित् पाठः।
† सुदृढ़ लौहभेदनमि क्वचित् पाठः।
‡ तुर्येवामाभृतं पात्रमिति क्वचित् पाठः॥

हस्तपादारुणश्चायं शेषः शुभ्रायतेक्षणः ॥
धम्मिल्लमल्लिकामाल्यचन्दनाद्यनुलेपनः।
भालालितिलकश्चैव कर्णकुण्डलमेचकः ॥
मुक्ताहारोज्वलोरस्कः सर्व्वरत्नविभूषणः।
शुभ्रशोणेन्द्रनीलाभवसनः सर्व्वलक्षणः ॥
युग्मबाणभुजोपेतो मनागरुणलोचनः।
शक्तिमर्कादिमे हस्ते द्वितीये मौक्तिकस्रजम् ॥
तृतीये कमलं पाणौ चतुर्थे शुक्तिकामिह।
स्रुवन्तु पञ्चमे पाणौ षष्ठे चात्र त्रिशूलकम् ॥
सप्तमे चैव योधासिं* कुद्दालं चाष्टमे करे।
नवमे पत्रिकाञ्चैव दशमे चन्द्रहासकम् ॥
एकादशे हलं हस्ते द्वादशे शृङ्गमेव च।
तोमरं मन्मथे पाणौ दण्डं चैव चतुर्द्दशे ॥
करे पञ्चदशे शक्तिं षोड़शे कुलिशं शये।
चक्रञ्च मुनिचन्द्रार्के वसुचन्द्रे परस्वधम् ॥
एकोनविंशके कन्दुं विंशके पुस्तकं त्विह।
विष्टरं त्वेकविंशे वै द्वाविंशे चैव मुद्गरम् ॥
चमसन्तु त्रयोविंशे चतुर्विंशे त्विहार्व्वुदम्।
पञ्चविंशतिमे हस्ते लोष्टभेदनमेव च ॥
षड्विंशे च तुरुष्कास्त्रं† वामाद्ये वाभयं शये।
द्वितीये कुण्डिकामत्र तृतीये वीजपूरकं ॥

* योधा सिमिति क्वचित् पाठः।

† षड्विंशेचैवतरुष्कास्त्रमिति पुस्तकान्तरे पाठः।

तुर्य्ये वामे घृतं* पात्रं पञ्चमे स्रुवमेवहि ।
षष्ठे खट्वाङ्गमेवेह सप्तमे डमरुं शये ॥
अष्टमे प्राङ्कुटं† पाणौ नवमे चैव कार्म्मुकम् ।
दशमे खेटकं हस्ते रुद्रे चैव कुठारकम् ॥
द्वादशे चामरं हस्ते कुन्तमत्र त्रयोदशे ।
गदां चतुर्द्दशे चैव मुशलन्तिथिसंमिते ॥
अङ्कुशं षोड़शे हस्ते पाशं सप्तदशे करे ।
पट्टिशं वसुचन्द्राङ्के चक्रन्त्वेकोनविंशके ॥
कवचं विंशके चैव दाचस्त्वेकविंशके ।
द्वाविंशके तु वै टङ्कं त्रयोविंशे ध्वजन्त्विह ॥
वीरभद्रं चतुर्व्विंशे पञ्चविंशे तु दर्पणं ।
अजिनं चात्र षड्विंशे विभ्राणः श्रीविहृतये ॥

ऐन्द्रस्य ।

वैधृत्याख्यस्तु वै योगः सप्तविंशतिमस्त्विह ।
शुभ्रवर्णो महारौद्रो शीवाशोणः सिताननः ॥
जटापञ्च प्रलम्बस्तु मेचकारुणकुण्डलः ।
नीलशोणसुवर्णोत्थभूषणो मेचकाम्बरः ॥
वेदवाणभुजोपेतो वृहत्कुक्षिसुमन्थरः ।
अक्षसूत्रं यमादिस्थे द्वितीये वरमेव च ॥
तृतीये चैव सन्दंशं तुर्य्ये शुक्तिं समुद्रजां ।

* तुर्येवामाभृतमिति च पुस्तकान्तरे पाठः ।
† प्रासदंमिति पुस्तकान्तरे पाठः ।

पञ्चमे पङ्कजं पाणौ षष्ठे चात्र स्रुवन्तथा ॥
सप्तमे सायकं पाणौ श्वानं खड्गमिहाष्टमे ।
नवमे चैव कुद्दालं दशमे च त्रिशूलकम् ॥
शृङ्गमेकादशे हस्ते द्वादशे हलमेव च ।
त्रयोदशे तु वै खड्गं तोमरन्तु चतुर्दशे ॥
करे पञ्चदशे दण्डं षोडशे शक्तिमेव च ।
वज्रं सप्तदशे पाणौ कवचं वसुचन्द्रजे ॥
परशुं नन्दचन्द्रोत्थे विंशके चार्ब्बुदं करे ।
एकविंशे शये चैव लोष्टभेदन मेव च ॥
द्वाविंशे वै तुरष्कास्त्रं त्रयोविंशे तु शङ्ककम् ।
पुस्तकन्तु चतुर्व्विंशे पञ्चविंशे तु विष्टरम् ॥
षड्विंशे मुद्गरं पाणौ चमसं सप्तविंशके ।
वामादिमे करे कुण्डीमभयन्तु द्वितीयके ॥
मीनं तृतीयके हस्ते चतुर्थे बीजपूरकं ।
पञ्चमे पात्रमत्रैव षष्ठे चैव स्रुवङ्करे ॥
सप्तमे कार्म्मुकं पाणौ डमरुं चाष्टमे करे ।
नवमे प्राङ्कुटं हस्ते खट्वाङ्गञ्चैव दिक्करे ॥
चामरं रुद्रजे चैव द्वादशेऽत्र कुठारकम् ।
खेटं त्रयोदशे चैव कुन्तमत्र चतुर्दशे ॥
गदां पञ्चदशे पाणौ षोड़शे मुशलन्त्विह ।
सृणिं सप्तदशे हस्ते पाशमष्टादशे करे ॥
पट्टिशं नन्दचन्द्रोत्थे वीरभद्रन्तु विंशके ।
एकविंशे शये टङ्कं द्वाविंशे चाजिनङ्करे ॥

त्रयोविंशे तु वै चक्रं कवचं जिनहस्तके ।
पञ्चविंशे तु वैपात्रं षड्विंशे दर्पणं शुभं ॥
सप्तविंशे ध्वजं हस्ते धारयन् दुष्टघातकृत् ।

वैधृतेः ।

इति योगानां रूपाणि ।

करणानामथो वक्ष्ये रूपसम्बन्धिलक्षणं ।
ववाभिधन्तु वै पीतं जटिलं रत्नकुण्डलम् ॥
नीलवस्त्रन्तु रुद्राक्षभूषणं कण्ठपाण्डुरं ।
चतुर्दशभुजोपेतं पिङ्गभ्रूलोचन त्रयं* ॥
वरं यमादिमे हस्ते द्वितीये वाणमेव च ।
तृतीये कुलिशं पाणौ चतुर्थे चैव पङ्कजम् ॥
मुद्गरं पञ्चमे चैव षष्ठे सन्दंशमेव च ।
सप्तमे वाङ्कुशं दिव्यं पञ्चशाखे महोदरे ॥
प्रथमे वाभयं वामे द्वितीये तु शरासनं ।
तृतीये पुस्तकं हस्ते चतुर्थे मुकुरं शये ॥
टङ्कन्तु पञ्चमे पाणौ षष्ठे कर्त्तरिकामिह ।
करे तु सप्तमे चात्र नागपाशं दधक्रिये ॥

ववस्य ।

वालवाख्यन्तु वै रक्तं नीलग्रीवं महोदरं ।

---

* तुङ्गभ्रुलोचन त्रयमिति क्वचित् पाठः ।

श्वेतवस्त्रं जटाभारं* पिङ्गलं तुङ्गनासिकम् ॥
कण्ठरुद्राक्षमालन्तङ्कतिमत्कालपाण्डुरं ।
रक्त-चन्द्रकरोपेतं कक्षालम्नकरण्डकम् ॥
प्रथमे मोदकं हस्ते दक्षिणे सुमनोहरे ।
द्वितीये केतकीपत्रं तृतीये शक्तिमेव च ॥
चतुर्थे पङ्कजं पाणौ पञ्चमे वै सुदर्शनम् ।
षष्ठे सर्व्वायसम्बाणं सप्तमे कुलिशं करे ॥
सन्दंशमष्टमे हस्ते पात्रं वामादिमेष्विह ।
द्वितीये कुण्डिकामत्र तृतीये चैव पट्टिशं ॥
वीजपूरं करे तुर्ये पञ्चमे शङ्खमेव च ।
कोदण्डमत्र वै षष्ठे सप्तमे कुलिशङ्करे † ॥
अष्टमे पुस्तकं विभ्रद्दश्यायविजयाय च ।

वालवस्य ।

श्वेताब्जकर्णिकाभासं तृतीयं कौलवाभिधम् ।
रक्तकण्ठं पिकास्यं वै नीलश्वेतारुणाम्बरम् ॥
मुक्तारुद्राक्षसौवर्णभूषणं चेन्द्रनीलकम् ।
अष्टादशभुजोपेतं किङ्किणी कटिसूत्रकम् ॥
वरं यमादिमे हस्ते द्वितीये चाक्षसूत्रकम् ।
तृतीये स्वर्णजं दण्डं चतुर्थे चैव पुस्तकम् ॥
पञ्चमे मोदकं हस्ते षष्ठे सन्दंशमेव च ।
सप्तमे डमरुं पाणौ वज्रमत्रैव चाष्टमे ॥

* जटाधारमिति पुस्तकान्तरे ।
† सप्तमे चाङ्कुशं दृढ मिति क्वचित्पाठः ।

नवमे शृङ्गिकामत्र शोणगुञ्जाद्यनामिमां ॥
अभयं चादिमे वामे द्वितीये वै कमण्डलुम् ।
तृतीये वासवं पात्रं तुर्ये चाम्भोजमुत्तमम् ।
पञ्चमे चामरं शुभ्रं षष्ठे दात्रं कराम्बुजे ॥
सप्तमे वल्लकीमत्र शृणिं चैवाष्टमे करे ।
नवमे कदलीपत्रं दधत्सम्पद् सुखाय च ॥

कौलवस्य ।

चतुर्थं तैतिलं नाम श्यामवर्णं कृशोदरम् ।
शोणवस्त्रं जवापुष्पमालिकं तैत्तिराननम् ॥
वियत्पत्रभुजोपेतं घण्टावद्धनितम्बकम् ।
प्रथमे दक्षिणे हस्ते श्रीफलं सुमनोहरम् ॥
खड्गमत्र द्वितीये वै तृतीये चैव पुस्तकम् ।
अक्षसूत्रं करे तुर्ये पञ्चमे वाणमेव च ॥
षष्ठे सुदर्शनं दिव्यं सप्तमे कुलिशं त्विह ।
अष्टमे तु स्रुवं पाणौ नवमे चैव मुद्गरम् ॥
दशमे चाङ्कुशं हस्ते पात्रं वामादिमे करे ।
द्वितीये खेटकं चैव तृतीये वारिजं शुभम् ॥
चतुर्थे कुण्डिकामत्र पञ्चमे चैव कार्मुकम् ।
षष्ठे मनोहरं शङ्खं सप्तमे चामरं सितम् ॥
स्रुवं चैवाष्टमे हस्ते नवमे टङ्कमत्र हि ।
दशमे तु करे पाशं बिभ्राणं शस्वनः श्रिये ॥

तैतिलस्य ।

पञ्चमं चात्र विज्ञेयं करणन्तु गराभिधं।
गोमुखं चित्रितग्रीवं धूसरं लोहिताम्बरम् ॥
पञ्चपञ्चभुजोपेतं कृतपद्मासभूषणम् ।
आदिमेदक्षिणे शक्तिं द्वितीये चक्रमेव च ॥
तृतीये श्रीफलं हस्ते चतुर्थे चैव पङ्कजम् ।
पञ्चमे पुस्तकं रम्यं षष्ठे वाणं मनोहरम् ॥
सप्तमे गोवृषं शृङ्गं कुलिशं चाष्टमे करे ।
नवमे वल्लकीमत्र दशमे वीरभद्रकम् ॥
एकादशे तु सन्दंशं पञ्चशाखे मनोहरे ।
अभीति मुत्तरादिस्थे द्वितीये शङ्खमत्र हि ॥
पात्रमत्र तृतीये वै चतुर्थे चैव चामरम् ।
पञ्चमे डमरुं हस्ते षष्ठे चैव शरासनं ॥
सप्तमे कुण्डिकामत्र चाष्टमे दशचक्रकम् ।
नवमे तु करे वंशं दशमे चैव दर्पणम् ॥
एकादशे तु रुद्राक्षं विभ्रत् कीर्त्ति-सुख-श्रिये ।

गरस्य ।

वानरास्यं वणिक् धूम्रं पीतवस्त्रं वृषासनम् * ।
युगबाहुयुतं चेदं षष्ठं कनकभूषणम् ॥
वरमर्कादिमे हस्ते द्वितीये चाद्य सूचकम् ।
तृतीये शुक्तिकामत्र मोदकन्तु चतुर्थके ॥

† वृषाननमिति क्वचित् पाठः ।

पञ्चमे कुलिशं हस्ते षष्ठे शक्तिं कराम्बुजे ।
सप्तमे वैणवं दण्डं खड्गमत्रैव चाष्टमे ॥
नवमे पाशमत्रैव दशमे चैव वै ध्वजम् ।
एकादशे तुरुष्कास्त्रं द्वादशे वै सुदर्शनम् ॥
सौम्यादिमे करेऽभीतिं द्वितीये वै कमण्डलुम् ।
बीजपूरं तृतीयेऽत्र पानपात्रं चतुर्थके ॥
पञ्चमे पञ्चवक्त्राख्यं षष्ठे चैव तु पट्टिशं ।
सप्तमे चामरं हस्ते खेटकं चाष्टमे शये ॥
नवमे चाङ्कुशं पाणौ दशमे हलमेव च ।
एकादशे करे रम्यं दर्पणं चातिनिर्म्मलम् ॥
द्वादशे धारयन् शङ्खं लक्ष्मीसौभाग्य हृद्वये ।

वणिजः ।

व्याघ्रचर्म्माम्बरा भद्रा श्वेताभा गर्द्दभासना ।
सप्तबाहुसमोपेता त्रिपदा लोहभूषणा ॥
कर्त्तिकामादिमे दक्षे द्वितीये तु गदामिह ।
तृतीये सायकं हस्ते चतुर्थे चन्द्रहासकम् ॥
खेटमूर्द्ध्वकरे वामे तदधश्चैव कार्म्मुकम् ।
पात्रमस्मादधो वामे धारयन्ती रिपोर्भये * ॥

भद्रायाः ।

अष्टमं शकुनिप्रख्यं करणं हरितप्रभम् ।

---

* पात्रमस्मादधोहस्ते धारयन्ती रिपोर्वजे इति क्वचित् पाठः ।

प्रवालभूषणोपेतं शक्रगोपनिभाम्बरं ॥
रक्तपञ्चभुजोपेतमेणवक्त्रं वृकोदरम्* ।
आदिमे रविजे चक्रं द्वितीये वरमेव च ॥
अक्षसूत्रं तृतीये तु तुर्ये चैव तु पङ्कजम् ।
पञ्चमे मोदकं हस्ते षष्ठे वज्रं कराम्बुजे ॥
सप्तमे तोमरं पाणौ शक्तिमत्रैव चाष्टमे ।
नवमे हस्तिजन्दन्तं दशमे चन्द्रहासकम् ॥
एकादशे करे बाणं द्वादशे वांकुशं शये ।
त्रयोदशे गदामत्र शङ्खं वामादिमे करे ॥
अभयन्तु द्वितीयेऽत्र तृतीये वै कमण्डलुं ।
बीजपूरं करेतुर्ये पञ्चमे पात्र मेव च ॥
षष्ठे कराम्बुजे शृङ्गं सप्तमे कुन्तमेव च ।
परिघं वाष्टमे हस्ते दण्डन्तु नवमे करे ॥
खेटकं दशमे पाणौ धनुरेकादशे शये ।
द्वादशे पात्र मत्रैव त्रिशूलन्तु त्रयोदशे ॥
दधानः श्रेयसे भूत्यै विजयाय सुखाय च † ।
तापाय चैव शत्रूणां विशेषेण समर्चितम् ॥

शकुनिः ।

चतुष्पदाभिधं चात्र नकमं काथ्यते जय ।

* मदोदरमिति पुस्तकान्तरे ।
† विभवाय सुखाय च इति क्वचित पाठः ।

कृष्णवर्णं चतुष्पादं चतुरास्यं जटान्वितम्॥
मनुष्यास्यन्तु वै पूर्वं दक्षिणं चैव गोमुखम्।
अजास्यं पश्चिमन्तस्य चोत्तरं शूकराननं* ॥
मनुष्याकारवत्सर्व्वं त्रिकपुच्छविनिर्गतम्।
पीतवस्त्रं दृढतत्कुक्षि नीलमुक्ताविभूषणम्॥
वसुपञ्चभुजोपेतं दीर्घनादं महाजवं।
दक्षिणाद्ये करे शक्तिं द्वितीये चाक्षसूत्रकम्॥
सुदर्शनं तृतीये तु चतुर्थे चैव पङ्कजम्।
पञ्चमे मुद्गरं चैव षष्ठे मोदकमेव च॥
सप्तमे तु गदां पाशावष्टमे वाङ्कुशं शये।
नवमे तु करे बाणं दशमे खड्गमेव च॥
एकादशे करे दन्तं द्वादशे शक्तिमत्र हि।
त्रयोदशे शये चात्र तोमरं सुदृढं शुभम्॥
चतुर्दशे तु वै वज्रं वामाद्ये भीतिमेव च।
कमण्डलुं द्वितीये वै तृतीये शङ्ख मेव च॥
चतुर्थे बीजपूरं वै पञ्चमे टङ्कमेवच।
षष्ठे पात्रं सुधापूर्णं सप्तमे च त्रिशूलकम्॥
अष्टमे पात्र मत्रैव नवमे धनुरेव च।
दशमे खेटकं हस्ते दण्डमेकादशे करे॥
द्वादशे पट्टिशं पाणौ कुन्तमत्र त्रयोदशे।
शृङ्गं चतुर्द्दशे बिभ्रद्गोचहृद्देश सुपूजितः॥

चतुष्पदस्य।

---

* कमलाननमिति पुस्तकान्तरे पाठः।

नागाख्यं दशमं रक्तं नीलवस्त्रं जटाधरम्।
मनुष्याकारमेवैतन्मस्तकं न्यस्ततत्फणं* ॥
विंशद्गुण भुजोपेतं मुक्तारुद्राक्षभूषणं।
प्रथमे मोदकं दद्ये द्वितीये चैव पङ्कजं ॥
अक्षसूत्रं तृतीयेऽत्र वरन्तुर्य्ये कराम्बुजे।
पञ्चमे तु करे चक्रं षष्ठे वज्रन्तु वैशये ॥
सप्तमे तोमरं पाणौ शक्तिमत्रैव चाष्टमे।
नवमे सोज्वलं दन्तं दशमे चन्द्रहासकं ॥
बाणमेकादशे हस्ते द्वादशे चाङ्कुशं शये।
त्रयोदशे गदामत्र तुरुष्कास्त्रं चतुर्द्दशे ॥
करे पञ्चदशे दात्रं† वामे पात्रन्तु चादिमे।
बीजपूरं द्वितीयेऽत्र तृतीये वै कमण्डलुं ॥
चतुर्थे चाभयं हस्ते पञ्चमे शङ्खमेव च।
षष्ठे कराम्बुजे शृङ्गं सप्तमे कुन्तमुत्तमं ॥
पट्टिशं चाष्टमे हस्ते नवमे दण्डमत्र हि।
दशमे खेटकञ्चैव धनुरेकादशे करे ॥
द्वादशे पाशमत्रैव त्रिशूलञ्च त्रयोदशे।
चतुर्द्दशे दशास्यं वै करे पञ्चदशेऽर्व्वुदं ॥
दधानं विजयारोग्यं कुर्व्वीताभयदं नृणां।

नागस्य।

एकादशन्तु किन्नुघ्नं करणं कथ्यतेऽधुना।

---

* मनुष्याकारमेवैतन्मनुषन्यस्तसत्फणमिति पाठान्तरं।

† पात्रमिति क्वचित् पाठः।

गोक्षीरधवलं चैतत्पीतवस्त्रं हयाननम् ॥
सर्व्वाभरणसंयुक्तं द्वात्रिंशद्बाहुसंयुतम् ।
वरञ्चैवादिमे दद्याद् द्वितीये चाक्षसूत्रकम् ॥
तृतीये सोज्ज्वलं चक्रं तुर्य्यचाब्जं कराम्बुजे ।
पञ्चमे मोदकं हस्ते षष्ठे वै कुलिशं शये ॥
सप्तमे तोमरं पाणौ शक्तिमन्नैव चाष्टमे ।
नवमे गजदन्तञ्च दशमे खड्गमुत्तमम् ॥
एकादशे तु वै वाणं द्वादशे सृणिमेव च ।
त्रयोदशे गदामत्र डमरुञ्च चतुर्दशे ॥
करे पञ्चदशे पुस्तीं परशुञ्चैव षोड़शे ।
अभयञ्चादिमे वामे द्वितीये वै कमण्डलुम् ॥
शङ्खमत्र तृतीये वै चतुर्थे बीजपूरकम् ।
पञ्चमे चासवं पात्रं षष्ठे शृङ्गं मनोहरम् ॥
सप्तमे कुन्तमत्रैव चाष्टमे पट्टिशं शये ।
नवमे वैणवं दण्डं दशमे खेटमेव च ॥
चापमेकादशे पाणौ द्वादशे पात्र* मत्र हि ।
त्रयोदशे त्रिशूलं वै टङ्कमत्र चतुर्दशे ॥
वीणामिष्विन्दुहस्ते च ध्वजञ्चैव तु षोड़शे ।
धारयद्वैरिणां ध्वस्त्यै पूजनीयं विपश्चिता ॥
विद्या-लाभाय-स-न्तुष्टि-विजयादि-सुखार्थिना ।

किन्तुघ्नस्य ।

इति करण रूपाणि ।

---

* पाशमिति पुस्तकान्तरे ।

अथ राशिरूपाणि।

मेषवक्त्रो नरो रक्तो द्विभुजः पङ्कजासनः।
ध्यानमुद्राङ्करः पीतवसनः कनकाङ्गदी॥

मेषस्य।

वृषाननो नरः शुभ्रो रक्तवस्त्रार्घकुण्डिकः।

वृषस्य।

पुमान् गदी सवीणा वा योषिच्च मिथुनं सितं।

मिथुनस्य।

कर्कटः कपिलो ध्यानस्थः कूर्म्ममुद्राधरो नरः।

कर्कटस्य।

सिंहवक्त्रोऽरुणोऽब्जस्थो द्विभुजोऽभयपात्रयुक्।

सिंहस्य।

शुक्लासिभृत् सिता कन्या द्विभुजा पङ्कजासना।

कन्यायाः।

तुलाधरो नरो गौरः पिङ्गनेत्रकजासनः।

तुलस्य।

वृश्चिकस्थो नरः पिङ्गो द्विभुजो मर्कटाननः*।
दक्षे वृश्चिकमालाधृक्वामे पात्रं सुरायुतम्॥

---

* मर्कटासन इति पुस्तकान्तरे पाठः।

वृश्चिकस्य ।

अश्ववक्त्रो नरश्चापी ज्याकृष्टकरदक्षिणः ।

धनुः ।

अधःकुम्भोधरो नीलो मृगवक्त्रो नरो हि सः ।

मकरस्य ।

मकरास्यो सितोऽजस्यो रिक्तकुम्भो नरो घटः ।

कुम्भस्य ।

मत्स्ययुग्मस्थितः श्यामो मत्स्यहस्तो वृहोदरः ।
मत्स्यवक्त्रो नरो मीनो हरिन्मणिविभूषणः ॥

मीनस्य ।

विष्णुधर्म्मोत्तरात् ।

कालः करालवदनो नित्यगश्च विभीषणः ।
पाशहस्तश्च कर्त्तव्यः सर्पवृश्चिकरोमवान् ॥

कालस्य ।

विश्वकर्म्मशास्त्रात् ।

निमेषस्तु भवेद्दत्र मेचकाभोर्द्दनीलदृक् ।
अक्षसूत्रं करे दत्ते ज्ञानमुद्रामथोत्तरे ॥
दधानो योगसंसिद्धैर पूजनीयो विपश्चिता ।

निमेषस्य।

नीलवर्णा भवेत् काष्ठा पीतवस्त्रा त्रिलोचना।
अष्टादशभुजोपेता ज्ञानपुस्तीसमन्विता॥

काष्ठायाः।

शुक्लवर्णा कला ज्ञेया नीलवस्त्रा त्रिलोचना।
व्योमवज्राङ्करुद्राक्षकण्ठलम्बितमालिका॥
मुक्ताक्षमालिकार्का सा वामपङ्कजसंयुता।
पूजनीया विशेषेण ज्ञानविज्ञानहेतवे॥

कलायाः।

क्षणाभिधो भवेत् पीता मुनिपक्षसुमौक्तिकः।
जटात्रिमौक्तिकोपेतश्चन्दनालिकपाण्डुरः॥
मुक्तासूत्रार्कहस्तोयं वामे स्वर्णकमण्डलुः।

क्षणस्य।

मुहूर्त्तानधुनावक्ष्मि नामलक्षपृथक्फलैः।
तत्रादिमस्तु रौद्राक्षः श्यामश्वेतारुणच्छविः॥
श्वेतवस्त्रो महातुङ्गो दक्षिणे सर्पमादधत्।
वामे पात्रं सुधापूर्णं चुद्रकर्म्मप्रसिद्धये॥

रौद्रस्य।

सिताभिधो द्वितीयस्तु श्वेतवर्णो महोदयः।

श्वेतप्रोणाभवस्त्रोऽयं श्वेतमुक्ताविभूषणः ।
दक्षिणे पङ्कजं शुभ्रं वामे चैव कमण्डलुम् ।
दधानस्तु श्रियै पूज्यो योगवृद्ध्यै सुखाय च ॥

सितस्य ।

तृतीयोथाजपाख्यस्तु कृष्णः शुभ्रो महातनुः ।
दक्षिणे पङ्कजं नीलं वामे सर्पं महाफणम् ।
बिभ्रद्विपुलभोगाय पूजनीयो महाधिया ॥

अजपस्य ।

तुर्य्यश्चार्य्यभटाख्यस्तु नीलः शुभ्रो महोदरः ।
दक्षिणे पुस्तकं हस्ते वामे चैव त्रिशूलकम् ।
दधानः श्रेयसे भूत्यै विजयाय सुखाय च ॥

आर्य्यभटस्य ।

अधुना चैव सावित्रः पञ्चमः कथ्यते जय ।
श्वेतवर्णोऽश्ववक्त्रस्तु मेचकावसनान्वितः ॥
पुस्तकं दक्षिणे हस्ते वामे कुण्डन्तु निर्व्रणम् ।
दधद्रोगविनाशाय पूजनीयोप्यहर्निशम् ॥

सावित्रस्य ।

वैराजश्चात्र वै षष्ठः श्यामवर्णो जटाधरः ।
दक्षिणे तु करे दण्डं वामे चैव स्रुवं करे ॥
दक्षिणे तु करे दण्डं वामे चैव स्रुवं करे ॥
बिभ्रद्वृद्ध्यै च सौख्याय पूजनीयोऽतिभक्तितः ।

वैराजस्य।

सप्तमश्चात्र गन्धर्व्वस्ताम्रवर्णः कृशोदरः।
दक्षिणे वल्लकीं पाणौ वामे शक्तिञ्च धारयेत्।
सौख्यवृद्ध्यै यशोवृद्ध्यै पूजनीयो विपश्चिता॥

गन्धर्व्वस्य।

अधुना चाभिजिन्नाम कथ्यतेऽप्यष्टमः शुभः।
पीतवर्णोऽतिकृष्णस्तु ताम्रवर्णो महोदरः।
तूलहस्तद्वयोपेतः पूजनीयः सुखाप्तये॥

अभिजितः।

सएव कुतपो नाम विज्ञातव्यो मनीषिभिः।
पितॄणां सुप्रियश्चैव पिण्डहस्तोऽयचाप्ययम्॥

कुतपस्य।

नवमो रौहिणेयाख्यो मुहूर्त्तः कथ्यते जय।
शुभ्रवर्णो विशालाक्षो नीलवस्त्रोऽभ्रकुण्डलः॥
दक्षिणे पङ्कजं पाणौ वामे मोदकमेव च।
दधानः सुखसम्पत्त्यै विजयारोग्यवृद्धये॥

रौहिणेयस्य।

अधुना कथ्यते वत्स दशमस्तु बलाभिधः।
गौरवर्णोऽरुणश्वेतवसनः स्वर्णकुण्डलः॥
दक्षिणे तु करे शङ्खं वामे पङ्कजमादधत्।

बलस्य ।

हेमवर्णो बृहद्गात्रः कृष्णश्वेतारुणांशुकः ।
अक्षसूत्रं करे दक्षे वामे चैव कमण्डलुं ॥
दधत् प्रजासुखार्थं पूजनीयो विपश्चिता ।
एकादशोऽधुना ज्ञेयो मुहूर्त्तो विजयाभिधः ॥

विजयस्य ।

नैर्ऋताख्योऽधुना ज्ञेयो द्वादशस्तु मुहूर्त्तकः ।
नीलवर्णोत्पलमौलिः पीतवस्त्रो महाबलः ।
दक्षिणे तु करे चक्रं वामे चाभयमादधत् ॥

नैर्ऋतस्य ।

त्रयोदशो भवेदत्र रक्तः सतमसाभिधः ।
ताम्रवस्त्रो महौजस्को* रत्नहेमजकुण्डलः ।
शोणपङ्कजदक्षस्तु वामकुण्डीसमन्वितः ॥

सतमसस्य ।

मुहूर्त्तः कथ्यते चात्र वरुणाख्यश्चतुर्दशः ।
मुक्ताफलनिभश्चैव मुक्ताहारविभूषणः ।
धनुर्बाणधरश्चैव पूजनीयः सुखाप्तये ॥

वरुणस्य

अथ पञ्चदशो ज्ञेयः सुभगस्तु हरित्प्रभः ।

* महौजस्क इति क्वचित् पाठः ।

सुभगस्य।

अथो निशाचरान् ब्रूमो मुहूर्त्तान् तिथिसंख्यकान्।
तत्रादिमोऽतिरौद्राख्यः कृष्णवर्णोऽरुणांशुकः॥
चतुर्भुजोमहाक्रूरः साश्रिसङ्कटकेवलः।
आदिमे दक्षिणे बिभ्रत् कौशिकञ्चातिभीषणं॥
द्वितीये तु करे सर्पं वामोर्द्ध्वे त्वथ वै करे।
सन्दंशं तदधः पात्रं बिभ्राणः सर्व्वविघ्नहा॥

अतिरौद्रस्य।

महागन्धर्व्वराजाख्यो द्वितीयस्तत्र चैव हि।
कृष्णशुभ्रारुणग्रीवो नीलवस्त्रो महाबलः॥
चतुर्भुजो विशालाक्षो गौरवर्णो जटाधरः।
आदिमे दक्षिणे शङ्खं द्वितीये चैव पङ्कजं॥
वामोर्द्ध्वगे करे वीणां तदधस्थे तु पात्रकम्।
धारयन्निष्टसम्पत्त्यै पूजनीयो विचक्षणैः॥

महागन्धर्व्वराजस्य।

तृतीयः कथ्यते चाथ रात्रिजो द्रविणाभिधः।
तप्तचामीकराभासः कृष्णनीलारुणांशुकः॥
दक्षिणे प्रथमे पद्मं हेमजञ्चातिशोभनम्।
द्वितीये तु करे वीणां वामोर्द्ध्वे बीजपूरकम्।
दधानः सर्व्वसम्पत्ति सुखायुः श्रीविविद्धये॥

द्रविणस्य।

आवणाख्यस्ततस्तुर्यो नीलवर्णोऽर्ककुण्डलः।
नीलारुणांशुकोपेतः कण्ठनीलाक्षमालिकः॥
दक्षिणाद्ये करे खड्गं द्वितीये चैव पङ्कजम्।
वल्लकीमूर्द्धजे वामे पात्रमस्मादधस्थिते।
दधानः पूजनीयोऽयं ज्ञानविज्ञानसिद्धये॥

आवणस्य।

मुहूर्त्तः कथ्यते चाथो वायुसंज्ञस्तु पञ्चमः।
हरिद्वर्णो जवाकर्णः श्वेतवस्त्रो महावलः॥
कौरमर्कादिमे हस्ते द्वितीये तु ध्वजं शये।
वामोर्ध्वगे करे सीरं द्वितीये पात्रमादधत्॥

वायोः।

अग्निसंज्ञस्ततः षष्ठो जवाकुसुमसन्निभः।
कृष्णनीलांशुकोपेतः शिखारुद्राक्षसंयुतः॥
दक्षिणाद्ये करे पात्रं द्वितीये शक्तिमेवच।
वामादिमे करे कौरं द्वितीये सीरमेव च।
दधानः कीर्त्तये भुक्त्यै विजयायुःप्रवृद्धये॥

अग्नेः।

अधुना कथ्यते वत्स राक्षसाख्यस्तु सप्तमः।
नीलवर्णोग्रदंष्ट्रस्तु नीलशुभ्रारुणांशुकः॥

दक्षिणाद्ये करे पद्मं द्वितीये तु त्रिशूलकम्।
खट्वाङ्गमुत्तरे वामे पात्रमस्मादधःस्थिते।
दधद्वैरविघाताय पूजनीयस्तु साधकैः॥

राक्षसस्य।

धाता चैवाष्टमः पीत वर्णः पाटलभांशुकः।
कर्णस्फटिकसौवर्णकुण्डलः कम्बुकन्धरः॥
पुस्तीमर्कादिमे हस्ते द्वितीये चैव विष्टरम्।
वामादिमे करे पिण्डं द्वितीये स्वर्णकुण्डलं*।
दधानः प्रीतये भुक्त्यै विजयाय सुखाय च॥

धातुः।

नवमः सौम्यनामाथ शुभ्रवर्णो विशालदृक्।
पीतवस्त्रो महातेजा मुक्तासर्व्वाङ्गभूषणः॥
आदिमे दक्षिणे शङ्खं द्वितीये चैव पङ्कजम्।
वामादिमे करे पात्रं द्वितीये सीरमेव च।
दधानस्तुष्टये भुक्त्यै पूजनीयस्तु मुक्तिदः॥

सौम्यस्य।

दशमश्चाच विज्ञेयो मुहूर्त्तो ब्रह्मसंज्ञकः।
पीतवर्णः शुक्लवस्त्रो जटामुकुटसंयुतः॥
कण्ठरुद्राक्षमालोऽयं भालपाण्डुरचन्दनः।
सुवर्णकुण्डलोपेतः कटिसूत्रोत्तरीयवान्॥

---

* स्वर्णलाङ्गलमिति पुस्तकान्तरे॥

अक्षसूत्रं यमादिस्थे द्वितीये चैव पङ्कजम् ॥
वामोर्द्ध्वे तु स्रुवं हस्ते पुस्तकन्तदधःकरे ।
दधत् सौवर्णमुक्तालाभाय विजयाय च ॥

ब्रह्मणः ।

एकादशोऽधुना ज्ञेयो वाक्पतिर्नामनामतः ।
सुवर्णवर्ण एवायं कृष्णशुभ्रांशुकान्वितः ॥
कुण्डी मर्कादिहस्ते तु द्वितीये सीर मेव च ।
वामादिमे करे कीरं द्वितीये नीरजं दधत् ।
प्रजालाभकरश्चैव कार्य्यनिष्पत्तिसाधकः ॥

वाक्पतिः ।

द्वादशश्चात्र विज्ञेयो पौष्णनामा सुलोहितः ।
पीतवस्त्रो जटामौलिर्मुनिपुष्पकृतश्रुतिः ॥
तुन्दिलः सोपवीती च नीलकीलकपाण्डुरः ।
अर्कादिमे करे वीजपूरकं शुभ्रवर्णकम् ॥
द्वितीये वारिजं पाणौ पात्रं वामादिमे करे ।
सन्दंशन्तु द्वितीयेऽयं धारयन् वैरितापद ॥

पौष्णस्य ।

जयाधुनात्र वैकण्ठो वैकुण्ठाख्यस्त्रयोदशः ।
पादजान्वन्तशुभ्रोऽयं कण्ठान्तारुणवर्णकः ॥
अलिवर्णस्तु केशान्त कुण्डलानेकरत्नजः ।
दक्षिणाद्ये करे पुस्तीमम्बुजन्तु द्वितीयके ॥

केकीपिच्छन्तु वामाद्ये द्वितीये चातपत्रकं।
दधानः कीर्त्तये भुक्त्यौ पूजनीयः सिताम्बुजैः।

वैकुण्ठस्य।

चतुर्द्दशोऽधुना ज्ञेयो नामतस्तु समीरणः।
जलनीलनिभश्चैव शुभमारकतद्युतिः॥
सितनीलारुणप्रान्तवसनः स्निग्धलोचनः।
तालपत्रं यमादिस्थे द्वितीये नीलनीरजम्॥
वामादिमे करे पात्रं द्वितीये नीलकञ्जम्।
दधानो यज्वनो भूत्यै वालव्रतैर्बसुखाय च॥

समीरणस्य।

अथ पञ्चदशो ज्ञेयो मुहूर्त्तो नैर्ऋतोऽरुणः।
मेचकाभस्त्रिनेत्रस्तु दंष्ट्रावान् वसनारुणः॥
स्वर्णेन्द्रनीलभूषाढ्यः शोणालितिलकान्वितः।
आदिमे दक्षिणे वाणं द्वितीये कमलं करे।
वामादिमे धनुर्हस्ते द्वितीये चैव वारिजं।
दधच्छान्त्यै सुभोगाय बलाय विजयाय च।

नैर्ऋतमुहूर्त्तस्य।

एते निशाचरा ख्याता मुहूर्त्ताः सकलास्तव।
अहोरात्राभिधश्चात्र कृष्णग्रीवादिमूर्द्धजः।
कण्ठपादान्तशुभ्रोऽयं द्विभुजो दीर्घगोधिकः।
सामचन्द्रजटामौलिः पिङ्गलश्मश्रुलोचनः॥

नृमुण्डमालिकोपेतः कृष्णशुभ्रांशुकान्वितः ।
अर्कमर्के दधानोऽयं वामे चैव विधुन्तुदं ।
इष्टापूर्त्तप्रसिद्ध्यर्थं पूजनीयो मनीषिभिः ॥

अहोरात्रस्य ।

शुक्लपक्षो नरः शुक्लो जटामुकुटसंयुतः ।
शोणवस्त्रो विशालाक्षो भालालितिलकान्वितः ॥
सूर्य्यमर्के दधानोयम्वामे चन्द्रजविम्बकम् ।
पूजनीयो महाभक्त्या प्रतिपक्षं सिते सिते ॥
अस्य द्वादश भेदाः स्युर्व्विज्ञेया वर्णभेदतः ।
पूजनीयोवलात्यर्थं-प्रतिमासन्तु भेदतः ॥

शुक्लपक्षस्य ।

श्यामाभः कृष्णपक्षस्तु सितशोणाम्बरो बली ।
सूर्य्यविम्वं यमे विभ्रद्वामे दीपं समुज्ज्वलम् ॥
पूजनीयो बलात्यर्थं प्रतिमासन्तु भेदतः ।
इत्यस्यार्कप्रभेदाःस्युर्भपक्षादिजनामतः ॥

कृष्णपक्षस्य ।

स्वनामतस्तु मासः स्यात् द्विवर्णस्तु द्विदोरिति ।
नाभ्युर्द्धाधःश्वेतकृष्णः पिङ्गलोचनमूर्द्धजः ॥
सूर्य्यचन्द्रान्वितः सोऽयं प्रतिमासन्तु पूज्यते ।
स्वनामपूर्व्वकैर्मन्त्रै र्होमपूजावसानकैः ॥

मासस्य।

ऋतुषट्कमथो ब्रूमो लक्ष्यनाम पृथक्फलैः।
हेमन्ताख्यस्तु तत्राद्यः कपिलः पिङ्गकुण्डलः।
पीतवस्त्रसमोपेतस्त्रिजटः कृष्णगोधिकः॥

गोधिर्ललाटं।

धान्यमञ्जरिकाव्यस्तु वामपार्श्वपिधानकः।
पूजनीयो विभूत्यर्थं धान्यसम्पत्तिवृद्धये॥

हेमन्तस्य।

शिशिराख्यो द्वितीयस्तु हरित्पीतनिभारुणः।
पीतकुण्डलकर्णस्तु कण्ठविद्रुममालिकः॥
मधुद्रुमप्रसूनाङ्गपात्रमर्कं कराम्बुजे।
वामे धान्यशरावन्तु धारयन्निष्टवृद्धये॥

शिशिरस्य।

विष्णुप्रकरणोक्तस्तु ज्ञातव्योऽत्र वसन्तकः॥

वसन्तस्य।

ग्रीष्माभिधश्चतुर्थस्तु धूसरो रूक्षगात्रकः।
अक्षसूत्रार्कहस्तस्तु वामे शुभ्रातपत्रयुक्।
रोगसन्तापनाशाय पूजनीयोऽरिपक्षहा॥

ग्रीष्मस्य।

पञ्चमस्तोदवर्त्तुस्तु हरिद्वर्णोऽरुणेक्षणः।

ताम्रवर्णांशुकोपेतः कृष्णविद्रुमकुण्डलः ॥
मीनमर्कं दधानोयं तोयपूर्णघटं परे ।
मेघमालावृतश्चैव विद्युद्दहनदीप्तिमान् ।
हरितालिदलैः पूज्यो पुष्टिसन्तुष्टिवृद्धये ।

वर्षायाः ।

शरदृतुरथो षष्ठश्चन्द्रगौरः सुलोचनः ।
कण्ठ मौक्तिक मालस्तु कर्णचन्द्रज कुण्डली ॥
चन्द्रविम्बं-करे दक्षे वामे चामृतजं घटं ।
दधानः पूजनीयोऽयमायुर्वृद्धै सुखाय च ॥

शरदः ।

दक्षिणायनसंज्ञोऽथ श्यामः सोमेन्द्रलोचनः ।
पीतवस्त्रो वृहत्तुण्डः कर्णिकारदलश्रुतिः ॥
वीजाङ्कुरशरावार्कैः खनित्रोत्तरहस्तकः ।
पूजितः सिद्धये नित्यं धनधान्यसमृद्धये ॥

दक्षिणायनस्य ।

उत्तरायणसंज्ञोऽथ शुभ्रवर्णो विशालदृक् ।
माञ्जिष्ठवसनोपेतः स्वर्णमुक्ताविभूषणः ॥
पुस्तकं दक्षिणे हस्ते वामे तु रविविम्बकम् ।
दधद्भूत्यै मुदे चैव पूजनीयस्तु कीर्त्तये ॥

उत्तरायणस्य ।

अथ संवत्सरान् ब्रूमो नाम लक्षफलादितः।
प्रभवाख्योभवेदाद्यः पीतवर्णो महोदरः॥
नीलवस्त्रसमोपेतो दक्षकाञ्चनकुण्डलः।
वामे स्फाटिकवर्णस्तु पृष्ठलम्बिजटान्वयः॥
दक्षिणे प्रथमे शक्तिं पङ्कजन्तु द्वितीयके।
वामादिमे शरावन्तु बीजपूर्णं कराम्बुजे।
द्वितीये चैव सन्दंशं दधानः पुष्टिवृद्धये॥

प्रभवस्य।

विभवाख्यो द्वितीयस्तु नीलपीतारुणच्छविः।
पीतशुभ्रान्तवस्त्रोऽयं कण्ठे पद्माक्षमालिकः॥
दक्षिणाद्ये शरं पाणौ द्वितीये नीलपङ्कजम्।
सन्दंशमुत्तरार्द्धस्थे द्वितीये चैव कार्म्मुकम्॥
दधद्विभूतये नित्यं पूजनीयो विपश्चिता।

विभवस्य।

शुक्लनामा तृतीयस्तु श्वेतपिङ्गल सन्निभः।
कण्ठपद्माक्षमालोयं शुभ्रप्रान्तालिवस्त्रधृक्॥
दक्षिणाद्ये शरावन्तु द्वितीये वाणमेवच।
दर्पणञ्चोत्तरादिस्थे द्वितीये चैव कार्मुकम्।
दधानो भूतये मर्त्यैः पूजनीयः कृतात्मभिः॥

शुक्लस्य।

प्रमोदाख्यश्चतुर्थस्तु नीलग्रीवो महोदरः।

श्वेतवस्त्रोऽजसङ्काशो योगपट्टोत्तरीयवान् ॥
दक्षिणाद्ये तु सन्दंशं द्वितीये सीरमेवच ।
वामादिमे शरावन्तु द्वितीये नीलपङ्कजम् ।
दधत् सौख्याय भोगाय विजयाय महाय च ॥

प्रमोदस्य ।

प्रजापत्याख्य एवात्र पञ्चमः स्वर्णसन्निभः ।
शोणभूषणवस्त्राढ्यस्तुन्दिलो गौरपाण्डुरः ॥
अक्षसूत्रं यमादिस्थे द्वितीये परशुं करे ।
शरावमुत्तरादिस्थे द्वितीये पुस्तकं दधत् ॥
प्रजावृद्ध्यै विभूत्यै च पूजनीयोविजानता ।

प्रजापतेः ।

अङ्गिराख्यस्ततः षष्ठो वर्णशुभ्रोऽतिलोमशः ।
ताम्रवस्त्रो महातेजा द्वादशाङ्गः सचन्दनः ॥
पवित्रदर्भपाणिस्तु जटामण्डितमस्तकः ।
ज्ञानखड्गन्तु दक्षाद्ये द्वितीये समिधङ्करे ॥
वामादिमे शरावन्तु ब्रह्मदण्डं द्वितीयके ।
दधत्सुपूजितो भूत्यै श्रेयसेच सुखाय च ॥

अङ्गिरसः ।

सप्तमः श्रीमुखाख्यस्तु पीतवर्णो विशालदृक् ।
पाटलावसनोपेतो दीर्घं कर्णालकारुणः ॥
सुवर्णरत्नभूषाढ्यः सर्व्वानर्थविघातकृत् ।

श्रीफलं दक्षिणादिस्थे द्वितीये चैव पङ्कजम्॥
पुस्तकञ्चोर्द्धगे वामे तदधस्तु शरावकम्।
दधानः पुष्टये लक्ष्म्या चन्दनादिभिरर्च्चितः॥

श्रीमुखस्य।

भावाभिधोऽष्टमस्तत्र नीलशुभ्रारुणच्छविः।
पीतकृष्णारुणप्रान्त वसनश्वेतकुण्डलः॥
मुक्ता विद्रुम मालोऽयं जटापिङ्गाक्षएवच।
दक्षिणे प्रथमे पुस्तमंशकन्तु द्वितीयके॥
वामोर्द्धगे करे शूलं तदधःपात्रमासवं।
बिभ्रत्संपूजनीयस्तु धान्यलाभाय वै श्रिये॥

भावस्य।

नवमोऽत्र युवाख्यस्तु पाटलाभोरुणेक्षणः।
नीलवस्त्रजटोत्तुङ्गो रत्नमेचककुण्डलः॥
दक्षिणे प्रथमं शङ्खं द्वितीये तु सुदर्शनम्।
वामादिमे करे पात्रं द्वितीये नीलपङ्कजम्।
बिभ्राणः कान्तये पूज्यो लक्ष्मीसौभाग्यवृद्धये॥

युवाख्यस्य।

धाताचैव प्रविज्ञेयो दशमः पिङ्गलोचनः।
कृष्णशुभ्रारुणप्रान्तवसनःश्वेतकुण्डलः॥
शरावमादिमे दक्षे द्वितीये बीजपूरकम्।
वामोर्द्धगे करे पुस्तीं नीलमिन्दीवरन्त्वधः॥

जयाय पुत्रसम्पत्त्यै पुजनीयः सुभक्तितः ॥

धात्राख्यस्य ।

ईश्वराभिधएवात्र ज्ञेय एकादशोप्यसौ ।
कैरवाभस्त्रिनेत्रस्तु जटाखण्डेन्दुमौलिकः ॥
मुक्तास्फाटिकरौद्राक्षभूषणस्तुङ्गनासिकः ।
त्रिशूलमादिमे दक्षे द्वितीये सीरमेवच ॥
शरावमादिमे वामे द्वितीये चैव पुस्तकम् ।
बिभ्रत् सौख्याय पूज्योऽसौ योगवद्भिः सुताप्तये ॥

ईश्वरस्य ।

द्वादशो बहुधान्याख्यः पीतनीलारुणच्छविः ।
पीतवस्त्रो विशालाक्षस्तुन्दिलोदीर्घगोधिकः ॥
जवाकुसुममालोयज्ञवची गजकुण्डलः ।
दक्षिणाद्ये करे कुम्भं सौवर्णं सर्व्वधान्यकम् ॥
क्षीरपूरपिधानन्तत् खचितानेकरत्नकम् ।
द्वितीये डमरुं पाणौ चोर्द्ध्वे नीलजनीरजम् ॥
द्वितीये तु करे सीरं दधानः सर्व्वधान्यकम् ।
सिद्धये पूजितो नित्यं स्वनामाद्यैस्तु संस्कृतः* ।

बहुधान्यस्य ।

प्रमाथिसंज्ञकश्चाद्यः शुक्लवर्णो महाभुजः ।
जटात्रितयसंयुक्तो दीर्घभारोऽर्ककुण्डलः ॥

* स्वनाम्नाद्याण संस्कृतमिति पुस्तकान्तरे ।

शोणनीलाम्बरोपेतः काञ्चनानेकमुद्रिकः।
पिकमर्कादिमे हस्ते द्वितीये कम्बुमेवच॥
पाशं वामोर्द्धगे हस्ते तदधश्चाम्बुपात्रकम्।
दधानो वैरिघाताय स्ववर्गस्यैव पुष्टये॥

प्रमाथिनः।

विक्रमाख्यो द्वितीयस्तु नीलशुभ्रो महोदरः।
पीतवस्त्रो कृष्णवालः कण्ठमौक्तिक मालिकः॥
आदिमे दक्षिणे शङ्खं द्वितीये चैव पङ्कजम्।
वामादिमे करे पात्रं पाशमत्र द्वितीयके॥
दधानोऽपि बलात्यर्थं पूजनीयस्तु यत्नतः।

विक्रमस्य।

वृषाभिधस्तृतीयस्तु श्वेतगौरो विशालदृक्।
स्थूलरोमातिसंहृष्टः केतकीदलकर्णयुक्॥
पीतप्रान्तारुणोपेतवसनः कटिघण्टिकः।
आदिमे दक्षिणे पाशं द्वितीये शङ्खमेवच*॥
वामादिमे करे पात्रं द्वितीये मृगमेवच।
धनधान्यप्रवृद्ध्यर्थं पूजनीयोऽतिसादरम्॥

वृषस्य।

चतुर्थश्चित्रभान्वाख्यश्चित्रग्रीवोऽरुणांशुकः।
मुक्तागर्भनिभश्चैव वरदः स्वर्णकुण्डलः॥
मुक्तास्रजन्तु दक्षाद्ये द्वितीये चैव पाशकम्।

* शृङ्गमेवचेति क्वचित् पाठः।

वामादिमे करे कम्बुं द्वितीये पङ्कजं शुभम् ।
बिभ्रदानन्दसम्पत्त्यै प्रतापार्थविवृद्धये ॥

चित्रभानोः ।

पंचमस्तु शुभान्वाख्यः शुभ्रशोणरुचिः शुभः ।
कण्ठविरेखशोणस्तु जटाकाञ्चनसन्निभः ॥
आदिमे दक्षिणे पद्मं द्वितीये शङ्खमुज्ज्वलम् ।
वामोर्द्धे तु करे पाशं तदधःस्थे शयेऽङ्कुशं ।
बिभ्राणः सुखदः शान्त्यै रिपुपक्षक्षयाय च ॥

सुभानोः ।

अत्र संवत्सरः षष्ठस्तारणाख्यः सिताम्बरः ।
श्वेतनीलारुणश्चैव स्वर्णकुण्डलभूषणः ॥
प्रथमे दक्षिणे कुम्भं द्वितीये चैव पङ्कजम् ।
उत्तराद्ये करे पाशं द्वितीये शङ्खमादधत् ।
दुर्गत्यनेकनाशाय भूतये विजयाय च ॥

तारणस्य ।

सप्तमः पार्थिवाख्यस्तु तप्तकाञ्चनसन्निभः ।
पीतशोणाम्बरश्चैव कृष्णग्रीवोऽतिसुन्दरः ॥
सर्व्वरत्नविभूषाढ्यः केतकीदलमस्तकः ।
आदिमे दक्षिणे बाणं द्वितीये चैव पङ्कजम् ॥
कार्म्मुकञ्चोत्तरादिस्थे द्वितीये शङ्खमेव च ।
दधद्राज्यादिलाभाय पूजनीयः प्रयत्नतः ॥

पार्थिवस्य।

अव्ययाख्योऽष्टमश्चात्र कैरवारुणसन्निभः।
कृष्णनीलारुणश्वेतवसनश्चित्रकुण्डलः॥
कौरमर्कादिमे हस्ते द्वितीये सीरमेव च।
शङ्खं वामादिमे हस्ते द्वितीये पाशमादधत्।
यज्वनोभूतये नित्यं हृद्धये चायुषे श्रिये॥

अव्ययस्य।

सर्व्वजिन्नवमोऽप्यत्र श्वेतनीलोऽसितप्रभः।
नीलवस्त्रजटोत्तुङ्गः कृष्णनीरजकुण्डलः॥
अर्कादिमे करे बाणं द्वितीये चैव पुस्तकम्।
वामादिमे करे पात्रं द्वितीये पात्रमेव च।
दधानः पूजनीयोऽयं विजयाय सुखाय च॥

सर्व्वजितः।

अधुना कथ्यते वत्स दशमः सर्व्वधारकः।
कङ्कपत्रनिभश्चैव पाटलावसनान्वितः॥
नीलपङ्कजवर्णस्तु मुक्ताहारविभूषणः।
पाशमर्कादिमे हस्ते द्वितीये केतकीदलम्॥
शङ्खञ्चैवोत्तरादिस्थे द्वितीये चैव पुस्तकम्।
दधानो विजयारोग्यहृद्धये चैव यज्वनः॥

सर्व्वधारिणः।

एकादशोऽधुना ज्ञेयो विरोधिर्नाम वत्सरः।

कृष्णपाण्डुरदेहस्तु वरदो नीलकुण्डलः ॥
कृष्णप्रान्ताकृणश्चैव वसनप्रान्तभूषणः ।
बिम्बीफलन्तु चार्काद्ये द्वितीयं श्वेतपङ्कजम् ॥
वामादिमे करे सर्पं द्वितीये पाशमादधत् ।
पूजनीयोऽरिघाताय बलहृद्वैर च यज्वनः ॥

विरोधिनः ।

द्वादशो विकृताख्यस्तु धूम्रः पिङ्गलोचनः ।
नीलशुभ्रांशुकोपेतो मेषशृङ्गजकुण्डलः ॥
दक्षिणाद्ये करे पाश द्वितीये मेषशृङ्गकम् ।
वामोर्द्धगे करे शङ्खं पाशमस्मादधःकरे ।
दधानो रोगनाशाय दुष्टशत्रुविधानकृत् ॥

विकृतेः ॥

खराभिधानस्तत्राद्यो रक्तवर्णो वृहोदरः ।
नीलवस्त्रो वृहद्वालो घनवर्वरमूर्द्धजः ॥
दक्षिणाद्ये करे शक्तिं द्वितीये खड्गमेव च ।
वामादिमे करे पात्रं द्वितीये चामरन्दधत् ।
शत्रुतापाय पूज्योऽसौ विजयायैव यज्वनः ॥

खरस्य ।

नन्दनाख्यो द्वितीयस्तु पीतशोणाननो बली ।
शुभ्रवस्त्रो जटालम्बो दीर्घकर्णः कजासनः ॥
पङ्कजन्तु यमादिस्थे द्वितीये शक्तिमेवच ।

वज्रमिन्द्रादिमे पाशौ द्वितीयेचाङ्कुशं शये।
दधानः श्रेयसे भूत्यै पूजनीयोमहोदयः॥

नन्दनस्य।

विजयाख्यस्तृतीयस्तु श्वेतपीतारुणच्छविः।
कृष्णवस्त्रः कृशोत्तुङ्गजटारुद्राक्षमालिकः॥
अक्षसूत्रं यमादिस्थे द्वितीये कुलिशङ्करे।
शक्तिं वामादिमे हस्ते द्वितीये चैव पङ्कजम्।
दधानो विजया रोग्य हृद्धये चैव पूजितः॥

विजयस्य।

जयाभिधश्चतुर्थोऽत्र पीतशोणः शुचिः सुखी।
पीतवस्त्रो जटैकस्तु पीतरुक्कर्णवेष्टितः॥
पुस्तकं प्रथमे दक्षे द्वितीये नीलपङ्कजम्।
वामादिमे करे वज्रं द्वितीये शक्तिमेव च।
दधानः शुभमाङ्गल्यवृद्धये चैव पूजितः॥

जयस्य।

पञ्चमो मन्मथाख्यस्तु नीलशोणशुचिः शुभः।
स्वर्णकुण्डलसंयुक्तः कीरपक्षनिभांशुकः॥
मल्लिकाधन्वबाणस्तु मूर्व्वापुष्पजमालिकः* ।
दण्डन्तु दक्षिणे हस्ते द्वितीये चैव पङ्कजम्॥
वामादिमे करे पुस्तीं द्वितीये शक्तिमेव च।
दधानः सिद्धये भूत्यै योषिद्वर्गवशीकृतौ॥

* मोवापुष्पजमालिक इति पुस्तकान्तरे।

मन्मथस्य।

षष्ठश्चैवात्र विज्ञेयो वज्री दुर्मुखाभिधः।
शुकचञ्चुनिभश्चैव नीलकुण्डलसम्बरः॥
दक्षिणाद्ये करे शक्तिं द्वितीये वज्रमेव च।
शुकं वामादिमे पाणौ द्वितीये सर्पमादधत्॥
पूजनीयो विधानेन भ्रूकुटीकुटिलाननः।
दुष्टशत्रुविनाशाय सर्व्वरोगोपशान्तये॥

दुर्मुखस्य।

सप्तमो हेमलम्बाख्यो रक्तपीतनिभच्छविः।
गृध्रपक्षांशुकश्चैव रत्नकुण्डलभूषणः॥
हेमजं पङ्कजं दक्षे प्रथमे करपल्लवे।
द्वितीये कुलिशं पाणौ वामाद्ये पात्रमुत्तमम्।
द्वितीये तु करे शक्तिं दधानो भुक्तये जय॥

हेमलम्बस्य।

अष्टमस्तु विलम्बाख्यः पाटलाभः कृशोदरः।
पीतवस्त्रो बृहद्व्यालीजटाखण्डेन्दुमण्डनः॥
प्रथमे दक्षिणे सर्पं द्वितीये शक्तिमेव च।
वामादिमे करे पात्रं द्वितीये चैव पङ्कजम्।
दधानः शत्रुघाताय पूजनीयोविशेषतः॥

विलम्बस्य।

विकारी नवमश्चाथ कृष्णनीलारुणच्छविः।

ताम्रकुण्डलवस्त्राढ्यः कण्ठशोणत्विरेखिकः ॥
दक्षिणाद्ये करे बाणं द्वितीये चैव पुस्तकम्।
वामादिमे धनुर्हस्ते द्वितीये शक्तिमादधत्।
पूजनीयोविशेषेण सर्व्वरोगोपशान्तये ॥

विकारिणः।

दशमः शार्वरिप्रख्यः कृष्णशुभ्रारुणच्छविः।
शोणवस्त्रोऽतिदीर्घाङ्गः स्थूलबर्बरमूर्द्धजः ॥
दक्षिणाद्ये करे सर्पं द्वितीये शाल्मलीदलम्।
कौशिकञ्चोत्तरादिस्थे द्वितीये शक्तिमेव च।
दधानः कीर्त्तये पुंसां शत्रुभङ्गाय पूजितः ॥

शार्व्वरिणः।

एकादशः प्लवाख्यस्तु शशकर्णनिभच्छविः।
दर्दुराभाम्बरोपेतो लोहकुण्डलसंयुतः ॥
आदिमे दक्षिणे हस्ते दर्दुरं मणिसंयुतम्।
द्वितीये तु करे शक्तिं पात्रं वामादिमे करे।
द्वितीये पङ्कजं बिभ्रत् पूजनीयोप्यमित्रहा ॥

प्लवस्य।

शुभकृत् द्वादशोप्यत्र नागजाभः सुलोचनः।
पाटलावसनोपेतः कृष्णाकुण्डलभूषणः ॥
दक्षिणे भीषणां शक्तिं प्रथमे करपल्लवे।
द्वितीये हेमजं पद्मं वामाद्ये चैव दर्पणम् ॥

द्वितीये कुलिशं हस्ते दधत्सौख्याय सम्पदे ॥

शुभकृतः ।

शोभकृत् पीतधूम्रस्तु प्रथमो नीलजाम्बरः ।
नीलभूषणसंयुक्तो रत्नमुद्राकराङ्गुलिः ॥
घटमर्काद्दिमे हस्ते द्वितीये चैव पुस्तकम् ।
वामाद्दिमे करे पात्रं द्वितीये ध्वज मेव च ॥
दधानः श्रियसे पुष्ट्यै पूजनीयोजयाय च ।

शोभकृतः ।

क्रोधिसंज्ञो द्वितीयस्तु नीलशुभ्रः कृशोदरः ।
मेचकाम्बरसंयुक्तस्तुङ्गनासालिपाण्डुरः ॥
पद्ममर्काद्दिमे हस्ते द्वितीये ध्वजमेवच ।
वामाद्दिमे कजं पाणौ द्वितीये सीर मेव च ।
दधानो वैरिनाशाय कृष्णद्रव्यैः सुपूजितः ॥

क्रोधिनः ।

विश्वावसुस्तृतीयस्तु कृष्णग्रीवः सुलोलटक् ।
कृष्णशुभ्रारुणप्रान्तबसनश्चित्रकुण्डलः ॥
ध्वजमर्काद्दिमे पाणौ द्वितीये कुलिशं शये ।
दधानो भुक्तये प्रीत्यै नानाभोगफलाप्तये ॥

विश्वावसोः ।

पराभवश्चतुर्थस्तु धूसरोऽरुणजाम्बरः ।

नीलोत्पलश्रुतिश्चैव क्षुद्रघण्टिकमेखलः॥
नीलोत्पलन्तु दक्षाद्ये द्वितीये ध्वजमेव च।
वामादिमे करे पात्रं सन्दंशन्तु द्वितीयके।
धारयन्नरिघाताय पूजनीयो विपश्चिता॥

पराभवस्य।

पञ्चमस्तु प्लवङ्गाख्यो हरिणाजिनसन्निभः।
मेषोदराभवस्त्रोयं संयुतकृष्णकन्धरः॥
दक्षिणाद्ये ध्वजं पाणौ द्वितीये मेषशृङ्गकम्।
वामादिमे करे पात्रं द्वितीये पाशमेव च।
दधानो भूतये भूत्यै पूजनीयः सदा नृभिः॥

प्लवङ्गस्य।

किलकाख्यस्ततः षष्ठः कृष्णवर्णोऽतिदीर्घयुक्।
नीलवस्त्रो जटाभारः कृष्णकुण्डलभूषणः॥
कीलकं दक्षिणादिस्थे द्वितीये ध्वजमेव च।
वामादिमे करे पाशं सन्दंशन्तु द्वितीयके।
दधानो विजया,रोग्य,वृद्धये चैव पूजितः॥

किलकस्य।

सप्तमः सौम्यनामाथ कीर्त्यते वत्सरः शुभः।
नीलपीत जटायुक्तोरम्भादलनिभांशुकः॥
स्वर्णपत्रश्रुतिश्चैव कण्ठपङ्कजमालिकः।
चन्द्रमर्कादिमे हस्ते द्वितीये केतकीदलम्॥

वामादिमे ध्वजं हस्ते द्वितीये नीरजं शुभं।
विभ्रत्सौभाग्ययोगाय पूजनीयः शुभक्षितः॥

सौम्यस्य।

साधारणोऽष्टमो ज्ञेयो नील गौरारुणच्छविः।
पीतशोणान्तवस्त्रोयं स्वर्ण कुण्डल रत्नयुक्॥
चन्द्रहासं यमादिस्थे द्वितीये चैव कीलकम्।
वामादिमे ध्वजं पाणौ सन्दंशश्चोत्तरे दधत्।
धमद्वैर सुखाप्त्यर्थं पूजनीयः सिताम्बुजैः॥

साधारणस्य।

विरोधकृच्च विज्ञेयो नवमो वत्सरो जय।
पिङ्गाभः शुक्लवस्त्रोऽयं पिङ्गश्मश्रुजटेच्चयः॥
दक्षिणाद्ये करे शङ्खं द्वितीये चैव वै ध्वजम्।
चन्द्रहासन्तु वामाद्ये द्वितीये परशुं शये।
बिभ्राणो रोगनाशाय शत्रुसन्तापकृत् जय॥

विरोधकृत्।

परिधावी तु विज्ञेयो दशमश्चैव वत्सरः।
इन्दीवरारुणश्वेतः कृष्णपीतनिभांशुकः॥
ब्रह्मप्रसवकर्णस्तु कण्ठपङ्कजमालिकः।
पिकमर्कादिमे हस्ते द्वितीये ध्वजमेव च॥
घण्टां वामादिमे पाणौ द्वितीये चैव मुद्गरम्।
दधानो हृदये चैव श्रेयो-भूति-सुखा-युषाम्॥

परिधाविनः।

प्रमादी चापि विज्ञेयो रुद्रसंख्योऽपि वत्सरः।
अतसीपुष्पसङ्काशो हरिनीलारुणाम्बरः।
मदघूर्णितनेत्रस्तु तन्द्रीभूत इवालसः।
दण्डमर्कादिमे हस्ते द्वितीये दण्डमेव च॥
वामादिमे करे पात्रं द्वितीये बिसिनीदलम्।
दधानो रोगविच्छित्त्यै अनुभङ्गाय यज्वनः॥

प्रमादिनः।

आनन्दाख्यः सितः पीतवसनो द्वादशोऽत्र हि।
मुक्तेन्द्रनीलसौवर्णभूषणो नीलकुण्डलः॥
पङ्कजं दक्षिणादिस्थे द्वितीये केतकीदलम्।
वामोर्ध्वन्तु ध्वजं पाणौ तदधःस्थे तु मोदकम्।
योषिद्वश्याय स पूज्यो गन्धपुष्पाक्षतादिभिः॥

आनन्दस्य।

तामसानां भवेदाद्यो राक्षसो नाम वत्सरः।
इन्दीवरदलाभासो हेमवस्त्रोऽर्कभूषणः॥
अर्कमर्कादिमे हस्ते द्वितीये सृणिमेव च।
नीलोत्पलन्तु वामाद्ये द्वितीये कुलिशं शये॥
दधद्रोगादिनाशाय पूज्यः स्थाणुभिरेव सः।

राक्षसस्य।

अनलाख्यो द्वितीयस्तु नीलशुभ्रारुणच्छविः।

पीतप्रान्तालिवस्त्रस्तु वज्रकुण्डलभूषणः ॥
चन्द्रहासं यमादिस्थे द्वितीये चार्क्कङ्करे ।
पिशितञ्चोत्तरादिस्थे परे चैव परश्वधम् ।
दधत् सुसम्पदेऽरीणां विजयायैव यज्वनः ॥

अनलस्य ।

पिङ्गलाख्य स्तृतीयोऽत्र कुसुदारुणसन्निभः ।
श्वेतप्रान्तारुणानीलवसनः स्वर्णभूषणः ॥
आदिमे पिशितं याम्ये द्वितीये सीर मेव च ।
कुलिशञ्चैव वामाद्ये सन्दंशन्तु द्वितीयके ।
बिभ्राणो विजया-रोग्य-वृद्धये चैव पूजितः ॥

पिङ्गलस्य ।

कालयुक्ताभिधस्तुर्य्यो नीलकण्ठो वृकोदरः ।
पीतारुणांशुकोपेतो नील स्वर्णजभूषणः ॥
यमादिमे करे सर्पं द्वितीये सीर मेव च ।
सीधूपात्रन्तु* वामाद्ये द्वितीये कीलमेवच ।
पूजनीयो विशेषेण यज्वनो वैरिमृत्यवे ॥

कालयुक्तस्य ।

अधुना कीर्त्यते वत्स सिद्धार्थो नाम पञ्चमः ।
तप्तकाञ्चनसङ्काशो नीलशुभ्रारुणांशुकः ॥
नीलकुण्डलसंयुक्तो मुक्ताविद्रुम भूषणः ।

* सीध्वपात्रन्तु इति पुस्तकान्तरे ।

सौवर्णं कलशं याम्ये प्रथमे करपल्लवे ॥
इन्दीवरं परे चैव कुलिशञ्चोत्तरोर्द्धगे।
वीजपूरमधस्तस्मा द्दधानः श्रेयसे मुदे ॥

सिद्धार्थस्य।

रौद्राभिधस्ततः षष्ठः पिङ्गलः कृष्णलोहितः।
पाटलावसनोपेतो ह्रस्वबर्व्वरमूर्द्धजः ॥
कीर* मर्कादिमे हस्ते द्वितीये हलमादधत्।
कुण्डीमिषादिमे† पाणौ परे कुण्डलिनं शये।
रोगनाशाय संभुक्त्यै पूज्योऽयं परिपन्थिषु ॥

रौद्रस्य।

सप्तमः कथ्यते चायं मेचकाभः सुदुर्म्मतिः।
शङ्कमर्कादिमे हस्ते स्वर्णमेखलरत्नजम् ॥
सर्पमत्र द्वितीये वै कुण्डीमिन्द्रादिमे शये।
द्वितीये पुस्तकं पाणौ दधद्विद्विषकृद्रिपोः ॥

दुर्म्मतेः।

अष्टमे दुन्दुभिप्रख्यो नीलग्रीवो विशालदृक्।
सोमवर्णः सिताम्भोजवसनः कृष्णगोधिकः ॥
जटा मुकुट भालेऽयं‡ स्वर्ण पत्रद्युतिः शुभः।
कदलीफलमर्काद्ये द्वितीये शङ्ख मेव च ॥

---

* कीलमिति पुस्तकान्तरे।

† मिं द्रादिमे इति पुस्तकान्तरे।

‡ जटामुकुट भामीमिति पुस्तकान्तरे।

बीजपूरन्तु वामाद्ये द्वितीये सस्यमञ्जरीं ।
बिभ्राणो धनधान्याय पूजनीयः सदा नृभिः* ॥

दुन्दुभेः ।

नवमो रुधिरोद्गारी नीलशोणालिदेवयुक् ।
कृष्णप्रान्तारुणश्वेत वसनो नीलभूषणः ॥
लोहिताक्षो जटापिङ्गः शोणचन्दनचर्च्चितः ।
रक्तोत्पलं यमादिस्थे द्वितीये कुलिशं शये ॥
पिशितञ्चोत्तरादिस्थे द्वितीये चाङ्कुशं दधत् ।
वैरिभङ्गाय वै पूज्यो बालवृद्धैश्च हि यज्वनः ॥

रुधिरोद्गारिणः ।

दशमश्चैव रक्ताक्षो नीलकण्ठः कृशोदरः ।
पीतनीलतनुश्चैव नील शोणालिकाम्बरः ॥
शरमर्कादिमे पाणौ द्वितीये चैव पङ्कजम् ।
सीरमिन्द्रादिमे हस्ते द्वितीये चैव कर्त्तरीं ।
दधद्वैरिविघाताय पूजनीयः प्रयत्नतः ॥

रक्ताक्षो ।

एकादशोऽधुना वत्स क्रोधनाख्यो निगद्यते ।
सजलाम्बुदसङ्काशः पीतशोणाम्वरान्वितः ॥
लोहभूषणसंयुक्तः केशमध्यगपङ्कजः ।
दक्षिणाद्ये करे शूलं पलशुष्कायसंयुतः ॥

---

* सदान्नमिदइति पुस्तकान्तरे पाठः ।

द्वितीये कर्त्तरीमत्र वामाद्ये पात्रमासवम् ।
सन्दंशन्तु द्वितीये वै दधानो वैरिमृत्यवे ॥

क्रोधनस्य ।

क्षयाभिधो भवेदत्र द्वादशो वत्सरो जय ।
कृष्णग्रीवः सुनीलाङ्गो रक्तनेत्रो जटाधरः ॥
मेचकारुणवस्त्रस्तु नीलकारुण्यगोधिकः ।
आद्यमे दक्षिणे सर्पं द्वितीये चैव पाशकम् ॥
विषकुम्भन्तु वामाद्ये द्वितीये चैव कैतवम् ।
कृष्णप्रसूनकं बिभ्रदमित्राणां विघातकृत् ॥

क्षयस्य ।

इति देवता मूर्त्तयः ।

अथ ग्रहस्थापनविधिः ।

मत्स्यपुराणे ।

मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ।
उत्तरेण गुरुं विद्यात्सोमं दक्षिणपूर्व्वकम् ॥
पश्चिमे तु शनिं विद्याद्राहुं दक्षिणपश्चिमे ।
पश्चिमोत्तरतः केतूं स्थापयेत् शुक्लतण्डुलैः ॥

स्कन्दपुराणे ।

सूर्य्यस्य चोत्तरे शम्भुमुमां सोमस्य दक्षिणे ।
स्कन्दमङ्गारकस्यैव दक्षिणस्यां निवेशयेत् ॥

सौम्यपश्चिमतो विष्णुं ब्रह्माणं जीवपूर्व्वतः ।
इन्द्रमैन्द्र्यां सिताहिद्दि मन्दाग्नेरग्रतोयमम् ॥
राहोः पूर्व्वोत्तरे कालं सर्व्वभूतभयावहम् ।
केतोर्नैर्ऋतदिग्भागे चित्रगुप्तं निधापयेत् ॥
उत्तरे शनिसूर्य्याभ्यां गुरुकेत्वोश्च दक्षिणे ।
गणाधिपं प्रतिष्ठाप्य सर्व्वदेवनमस्कृतम् ॥
स्थानाधिदेवतानाञ्च स्थाप्य प्रत्यधिदेवताः ।
विनायकादिदुर्गाद्या नान्तरे ग्रहदेवयोः ॥

स्मृत्यन्तरे ।

इन्द्रं पूर्व्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुवेरं चोत्तरे तथा ॥
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ।
इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ॥
देवेशेशानयोर्मध्ये आदित्यानां तथायनम् ।
अग्नेः पश्चिमभागेतु रुद्राणामयनं विदुः ॥
प्रेतेशरक्षोमध्ये तु मातृस्थानं प्रकल्पयेत् ।
नैर्ऋतेरुत्तरेभागे गणेशायतनम्विदुः ॥

कुबेर मरुतां स्थान मुच्यते ।

अथ कलशोत्पत्तिस्तल्लक्षणञ्च ।

देवी पुराणे ।

कलशान् सुदृढान् कुर्य्याल्लक्षणानि वदामि ते ।

उत्पत्तिं लक्षणं मानं कथयामि यथामुने ॥
वारिकाः कलशाश्चैव येन लोके प्रकीर्त्तिताः।
अमृते मथ्यमाने तु पानार्थं सर्व्वदैवतैः॥
मन्थानं मन्दरङ्कृत्वा नेत्रं कृत्वा तु वासुकिम्।
उत्पन्नममृतं तत्र महावीर्य्यपराक्रमम् ॥
तस्यायं धारणार्थाय कलशः परिकीर्त्तितः।
कलां कलां गृहीत्वा वै देवानां विश्वकर्म्मणा ॥
निर्म्मितोऽयं सुरैर्य्यस्मात् कलशस्तेन कथ्यते।
वारयन्ति ग्रहान् यस्मात् मातरो विविधांस्तथा।
दुरितांश्च तथाघोरां स्तेन ते वारकाः स्मृताः॥
कलशस्य मुखे ब्रह्मा ग्रीवायान्तु महेश्वरः।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः॥
शाखासु देवताः सर्व्वा वेष्टयन्ति चतुर्दिशम्।
पृथिव्यां यानि तीर्थानि कलशे निविशन्ति ह ॥
गृहे शान्तिश्च पुष्टिश्च प्रीतिर्गीर्भिरेव च।
ऋग्वेदोथ यजुर्व्वेदः सामवेदस्तथैवच ॥
अथर्व्ववेद सहिताः सर्व्वे कलश संस्थिताः।
पूर्णामृतेन तोयेन सितास्ते काञ्चनोज्ज्वलाः॥
सरित्सरःखातजेन तडागादिजलेन वा।
वापीकूपोदद्विव्येन सामुद्रेण सुखावहाः॥
सर्व्व मङ्गल माङ्गल्याः सर्व्वकिल्विषनाशनाः।
अभिषेके सदा शस्ताः कलशा ईदृशाः शुभाः॥
यात्राविवाह काले वा प्रतिष्ठा यज्ञकर्म्मणि।

योजनीया विशेषेण सर्व्वकर्म्मप्रसाधकाः ।
पञ्चाशाङ्गुलवैपुल्यमुत्सेधे षोड़शाङ्गुलः ।
कलशानां प्रमाणं हि मुखमष्टाङ्गुलं भवेत् ॥

नारदीय नृसिंहखण्डात् ।

भृगुरुवाच ।

तुङ्गा भद्रा च भगिनी हे तनयौ सह्यसम्भवे ।
तयोर्भद्रा तटेवत्स त्वं प्रतिष्ठाप्य केशवम् ॥
तमाराध्य जगन्नाथं गन्धपुष्पादिभिः क्रमात् ।
हृदि कृत्वेन्द्रियग्रामं मनः संयम्य यत्नतः ॥
हृत्पुण्डरीके देवेशं शङ्खचक्रगदाधरम् ।
ध्यायन्नेकमनावत्स द्वादशाक्षरमभ्यसेत् ॥

ॐ नमो भगवते वासुदेवाय ।

इमं मन्त्रं हि जपतो देवदेवस्य शार्ङ्गिणः ।
प्रीतो भवति विश्वात्मा मृत्युन्तेनोपशाम्यति ॥

इति द्वादशाक्षरः ।

नारदीय नृसिंहखण्डात् ।

शुक उवाच ।

किं जपन् मुच्यते तात सततं विष्णुतत्परः ।
संसारदुःखात्सर्व्वेषां हिताय वद मे पितः ॥

व्यास उवाच।

अष्टाक्षरं प्रवक्ष्यामि मन्त्राणां मन्त्रमुत्तमम्।
यज्जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात्॥
हृत्पुण्डरीकमध्यस्थं शङ्खचक्रगदाधरम्।
एकाग्रमनसा ध्यात्वा विष्णोः कुर्य्याज्जपन्नरः॥
एकाग्रे विजने स्थाने विष्णग्रे वा जलान्तिके।
जपेदष्टाक्षरं मन्त्रं चित्ते विष्णुं निधाय च।
अष्टाक्षरस्य मन्त्रस्य ऋषिर्नारायणः स्मृतः॥
छन्दोऽस्य देवी गायत्री परमात्मा च देवता।
शुक्लवर्णस्तु ओङ्कारो नकारो रक्त उच्यते॥
मोकारो वर्णतः कृष्णो नाकारो रक्त एवच।
राकारः कुङ्कुमाभासो यकारः पीत उच्यते॥
णाकारो मञ्जनाभस्तु यकारो बहुवर्णकः।
ॐ नमो नारायणायेति मन्त्रः सर्व्वार्थसाधकः॥

ब्रह्म पुराणे।

ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं नारायणात्मकम्।
नारायणात्परं किञ्चिन्नेह पश्यामि हे द्विज॥
तेन व्याप्तमिदं सर्व्वं दृश्यादृश्यं चराचरम्।
स्मरेन्नारायणं ध्यायेद्धस्ते काये च विन्यसेत्॥
शेषे हस्त तलं यावत्तर्ज्जन्यादितयोर्न्यसेत्।
ॐकारं वामपादे तु नकारं दक्षिणे न्यसेत्।
मोमारं वामकट्यान्तु नाकारं दक्षिणे तथा॥

राकारं नाभिदेशेतु यकारं वामबाहुके ॥
णाकारं दक्षिणे पाणौ यकारं मूर्द्ध्नि विन्यसेत् ।
अधश्चोर्द्धञ्च विश्रये पार्श्वतः पृष्ठतोग्रतः ॥
ध्यात्वा नारायणं देवं विदध्यात् कवचं पुनः ।
पूर्व्वे मां पातु गोविन्दो दक्षिणे मधुसूदनः ॥
पश्चिमे श्रीधरो देवः केशवश्च तथोत्तरे ।
पातु विष्णु स्तथाग्ने वै नैर्ऋत्ये माधवोऽव्ययः ॥
व्यायव्ये तु हृषीकेशस्तथेशाने च वामनः ।
भूतले पातु वाराहस्तथोर्ध्वे तु त्रिविक्रमः ॥
कृत्वैवं कवचं पश्चादात्मानं चिन्तयेन्नरः ।
अहं नारायणो देवः शङ्खचक्रगदाधरः ।
एवं ध्यात्वा तदात्मानमिमं मन्त्र मुदीरयेत् ॥

इति नारायणाष्टाक्षरः ॥

अग्निपुराणे ।

मुक्तिहेतु र्हरः साक्षात् सर्व्वज्ञो ज्ञानभावकः ।
अस्याभिधानमन्त्रोयमभिधेयश्च सस्मृतः ॥
अभिधानाभिधेयत्वात् मन्त्रात् सिद्धिप्रदोहरः ।
तस्मात् वेदे मुनिश्रेष्ठ मन्त्रः षड़क्षरः परः ॥
किं तस्य बहुभिर्मन्त्रैः शास्त्रैर्वा बहुविस्तृतैः ।
यस्य नमोहरायेति मन्त्रोऽयं हृदि संस्थितः ।
तनाधीतं श्रुतं तेन तेन सर्व्वमनुष्ठितम् ॥
धर्मस्थानानि यावन्ति विधिस्थानानि यानि च ।

षड़क्षरस्य मन्त्रस्य भाष्यन्तानि समासतः॥

इति षड़क्षरः।

शैवी पञ्चाक्षरी विद्या।

वायुसंहितायाम्।

अथो परमविद्यायाः स्वरूप मधुनोच्यते।
आदौ नमः प्रयोक्तव्यः शिवाय च ततः परं॥
शैवीयञ्चाक्षरी विद्या पञ्च श्रुतिशिरोगता।
शब्दजातस्य सर्व्वस्य बीजभूता समासतः॥
प्रथमं मन्मुखोद्गीर्णा समासेनात्मवाचिका:।
तप्तचामीकरप्रख्या पीनोन्नतपयोधरा॥
चतुर्भुजा त्रिनयना वालेन्दुकृतशेखरा।
पद्मोत्पलधरा सौम्या वरदाभयपाणिका॥
सर्व्वलक्षणसम्पन्ना सर्व्वाभरणभूषिता।
सितपद्मासनासीना नीलकुञ्चितमूर्द्धजा॥
अस्याः पञ्चविधा वर्णाः प्रस्फुरद्रश्मिमण्डला।
पीतः कृष्णस्तथा धूम्रवर्णतोरक्तएव च॥
पृथक् प्रयुक्ताः पञ्चैते विन्दुनादविभूषिताः।
अर्द्धचन्द्राकृतिर्व्विन्दुर्नादो दीपशिखाकृतिः॥
बीजं द्वितीयं बीजेषु मन्त्रस्यास्य वरानने।
दीर्घं पूर्व्वं तुरीयस्य पञ्चमं शक्तिमादिशेत्॥
वामदेवो नाम ऋषिः पंक्तिः छन्द उदाहृतं।
देवता शिवएवाहं मन्त्रस्यास्य वरानने॥

गौतमोऽत्रिर्वशिष्ठश्च विश्वामित्रस्तथाङ्गिराः ।
भरद्वाजश्च वर्णानां क्रमशो ऋषयः स्मृताः ॥
गायत्र्यनुष्टुप् त्रिष्टुप्च्छन्दांसि बृहती विराट् ।
इन्द्रो रुद्रो हरिर्ब्रह्मा स्कन्दस्तेषां च देवताः ॥
मम पञ्चमुखान्याहुः स्थानं तेषां वरानने ।
पूर्व्वादिश्चोर्द्ध पर्य्यन्तं नकारादि यथा क्रमं ॥
उदात्तः प्रथमो वर्णश्चतुर्थश्च द्वितीयकः ।
पञ्चमः स्वरितश्चैव मध्यमो निहतः स्मृतः ॥
मूलं विद्या शिवः शैवं सूत्रं पञ्चाक्षरं विना ।
सामान्यस्यापि जानीयाच्छैवं मे हृदयं मतम् ॥
नकारः शिव उच्येत मकारस्तु शिखोच्यते ।
शिकारः कवचं तद्वद्वाकारोनेत्र उच्यते ॥
यकारोस्त्रं नमः स्वाहा वषट्वौषडितिप्लुत ।
फडिति पञ्चवर्णानां मन्त्राङ्गत्वं यदा यदा ॥
तदापि मूलमन्त्रोयं किञ्चिद्भेदसमन्वयात् ।
अत्रास्य पञ्चमो वर्णो द्वादशस्वरभूषितः ॥
तस्मादनेन मन्त्रेण मनोवाक्कायभेदतः ।
आवयोरर्च्चनं कुर्य्याज्जपहोमादिकैस्तथा ॥

इति शिवपञ्चाक्षरः ।

अथ सौरषडक्षरः ।

भविष्यपुराणे ।

सनत् कुमार उवाच ।

अथार्चना विधिं वच्मि मन्त्रोद्धारं निबोध मे।
सर्व्वपापहरं पुण्यं सर्व्वरोग विनाशनं॥

ॐ खखोल्काय नमः।

मूलमन्त्रः।

ॐ विठिठिठठःशिरः॥

ॐ ज्वलज्वलठठशिखा॥

ॐ सहस्र सौठठः कवचं॥

ॐ सर्व्वतेजोधिपतये ठठ अस्त्रं॥

ॐ सहस्र किरणोज्वलाय ठठ उर्ध्वबन्धः॥

पृथिव्यै भूभाविन्यै ठठ भूतबन्धः॥

ज्वलने प्रज्वल ठठ अग्निप्राकारः॥

आदित्याय विद्महे विश्वभावनाय धीमहि।
तन्नः सूर्य्यः प्रचोदयात्॥

गायत्री।

सकलीकरणमिदं।

ॐ धर्म्मात्मने नमः पूर्व्वतः।

यमाय नमो दक्षिणतः।

दण्डनाथाय नमः पश्चिमतः।

रैवताय नमः उत्तरतः ॥

ॐ श्याम पिङ्गलायनमः ईशान्याम् ॥

ॐ दीक्षिताय नमः ॐ लक्ष्मै वज्रधर विश्वजये नमो नैर्ऋत्ये ।

ॐ आदित्याय भूर्भुवः स्वर्नमः वायव्याम् ।
चन्द्राय चन्द्राधिपतये नमः पूर्वतः ॥
ॐ कारकाय क्षितिसुतायनमः आग्नेय्यां ॥
ॐ बुधाय सोम पुत्रायनमः दक्षिणे ॥
ॐ बृहस्पतये अङ्गिरःसुताय नमः नैर्ऋत्यां ॥
ॐ शुक्राय महर्षये भृगुसुताय नमः पश्चिमतः ॥
ॐ शनैश्चराय रविसुताय नमः वायव्याम् ।
राहवे नमः पश्चिमतः यमाय नमो दक्षिणतः ॥

ॐ भगवन्नपरिमितमयूखमालिन् सकलजगत्पते सप्ताश्ववाहन चतुर्भुज परमसिद्धिप्रद विष्णुलिङ्ग भानो पाहि पाहि इममर्घ्यं मम शिरसि गतं गृहाण तेजोग्ररूपानन्त ज्वल ठठः ॥

इत्यर्घ्यावाहनमन्त्रः ।

ॐ नमो भगवते आदित्याय सहस्रकिरणाय गच्छ गच्छ सुरवरपुरं पुनरागमनाय ।

विसर्जनमन्त्रः ।

शृणुष्वाहो विधिं कृत्स्नं प्रवक्ष्याम्यनुपूर्व्वशः ।

इति सौरः षडक्षरः॥

अथ देवताभेदेन गायत्र्यः।

तत्पुरुषाय विद्महे महादेवाय धीमहि

तन्नो रुद्रः प्रचोदयात्॥

गणाम्बिकायै विद्महे कर्मसिद्धै धीमहि

तन्नोगौरी प्रचोदयात्॥

तत् पुरुषाय विद्महे वह्निवक्त्राय धीमहि।

तन्नः स्कन्दः प्रचोदयात्॥

तत् पुरुषाय विद्महे वक्रतुण्डाय धीमहि

तन्नोदन्ती प्रचोदयात्॥

हंससेनाय विद्महे वह्निवक्त्राय धीमहि

तन्नः स्कन्दः प्रचोदयात्॥

तीक्ष्णशृङ्गाय विद्महे वह्निपादाय धीमहि

तन्नो वृषः प्रचोदयात्॥

हरिवक्त्राय विद्महे रुद्रवक्त्राय धीमहि

तन्नोनन्दी प्रचोदयात्॥

नारायणाय विद्महे वासुदेवाय धीमहि

---

* चक्रतुण्डायेति पुस्तकान्तरे।

तन्नो विष्णुः प्रचोदयात् ।
महाम्बिकायै विद्महे कर्म्मसिद्धै धीमहि
तन्नो लक्ष्मी प्रचोदयात् ।
समुद्भूतायै विद्महे विष्णुनैकेन धीमहि
तन्नो धरायै प्रचोदयात् ।
वैनतेयाय विद्महे सुपर्णपक्षाय धीमहि
तन्नो गरुडः प्रचोदयात् ।
पद्मोद्भवाय विद्महे देववक्त्राय धीमहि
तन्नः स्रष्टा प्रचोदयात् ।
शिवास्यजायै विद्महे शिवास्यजायै धीमहि
तन्नोवाचः प्रचोदयात् ।
देवराजाय विद्महे वज्रहस्ताय धीमहि
तन्नः शक्रः प्रचोदयात् ।
वैश्वानराय विद्महे ज्वाललीलाय धीमहि
तन्नो अग्निः प्रचोदयात् ।
वैवस्वताय विद्महे दण्डहस्ताय धीमहि
तन्नो यमः प्रचोदयात् ।
निशाचराय विद्महे खड्गहस्ताय धीमहि

तन्नो निर्ऋतिः प्रचोदयात्।

शुद्धहस्ताय विद्महे पाशहस्ताय धीमहि

तन्नो वरुणः प्रचोदयात्।

सर्व्वप्राणाय विद्महे सृष्टिहस्ताय धीमहि

तन्नो वायुः प्रचोदयात्।

यक्षेश्वराय विद्महे गदाहस्ताय धीमहि

तन्नो हस्तः प्रचोदयात्।

सर्व्वेश्वराय विद्महे शूलहस्ताय धीमहि

तन्नो रुद्रः प्रचोदयात्।

कात्यायन्यै विद्महे कन्याकुमार्य्यै धीमहि

तन्नो दुर्गिः प्रचोदयात्।

सुभगायै विद्महे काममालिन्यै धीमहि

तन्नो गौरी प्रचोदयात्।

वेदात्मकाय विद्महे हिरण्यगर्भाय धीमहि

तन्नः षण्मुखः प्रचोदयात्।

भास्कराय विद्महे सहस्ररश्मिन् धीमहि

तन्नः सूर्य्यः प्रचोदयात्।

रुद्र हस्ताय विद्महे शक्तिहस्ताय धीमहि

तन्नोदेवी प्रचोदयात् ।

एवं प्रभिद्य गायत्रीन्तत्तद्देवानुरूपतः ।
पूजयेत् स्थापयेत्तेषामासनं प्रणवं स्मृतमिति ॥

इति लैङ्गे गायत्रीभेदाः ।

शिवधर्म्मे ।

कल्पकोटिसहस्रैस्तु यत्पापं समुपार्ज्जितम् ।
घृतस्नानेन तत्सर्व्वं दहत्यग्निरिवेन्धनम् ॥
अयुतं योगवां दद्याद्दोग्ध्रीणां वेदपारगे ।
वस्त्रं हेमादियुक्तानां चीरस्नानस्य तत्फलम् ॥
दध्ना तु स्नापयेल्लिङ्गं सकृद्भक्त्या तु यो नरः ।
सर्व्वपापविनिर्म्मुक्तः शिवलोके महीयते ॥
मधुना स्नापयित्वा तु सकृद्भक्त्या तु यो नरः ।
पापकञ्चुकमुत्सृज्य वह्निलोके महीयते ॥
स्नानमिक्षुरसेनापि योलिङ्गे सकृदाचरेत् ।
लभेद्विद्याधरं लोकं सर्व्वकामसमन्वितम् ॥
पयो,दधि,घृत,चौद्र,शर्कराद्यै,रनुक्रमात् ।
ईशादिमन्त्रैः संस्नाप्य शिवलोकमवाप्नुयात् ॥
यः पुमांस्तिलतैलेन करयन्त्रोद्भवेन च ।
शिवाभिषेकं कुरुते स शैवं पदमाप्नुयात् ॥

परिमाणन्तु तत्रैवोक्तम् ।

स्नानं पलशतं ज्ञेयमभ्यङ्गः पञ्चविंशतिः ।

पलानां द्वे सहस्रे तु महास्नानं प्रकीर्त्तितम् ॥

लिङ्गपुराणात्।

महास्नानञ्च यः कुर्य्यात् घृतेन मधुना ततः।
स याति मम सायुज्यं स्थानेष्वेतेषु सुव्रत ॥
स्नानं पलशतं ज्ञेय मभ्यङ्गः पञ्चविंशतिः।
पलानां द्वे सहस्रे तु महास्नानं प्रकीर्त्तितम् ॥
स्नाप्य लिङ्गं मदीयञ्च गव्येनैव घृतेन वा।
विशोध्य सर्व्वद्रव्यैस्तु तोयेनाप्यभिषेचयन् ॥
महास्नाने प्रसक्ते तु स्नानमष्टगुणं स्मृतम्।
जलेन केवलेनैव गन्धतोयेन भक्तितः ॥
अनुनिर्म्मेञ्च तत्सर्व्वं पञ्चविंशत्पलेन वै।
शमीपत्रञ्च विधिना विल्वपत्रञ्च चम्पकम्।
अथान्यानि च पत्राणि बिल्वपत्रं न संत्यजेत् ॥
दशद्रोणैस्तु नैवेद्यमष्टद्रोणैरथापि वा।
शतद्रोणसमं पुण्यमाढकेन विधीयते ॥
वित्तहीनस्य मर्त्यस्य नात्र कार्य्या विचारणा।
भेरी,मृदङ्ग,मुरज,करताल,पटहादिभिः ॥
वादित्रैर्विविधैश्चान्यै रान्दोलैर्विविधैस्तथा।
जागरं कारयेत्तत्र प्रार्थयेच्च यथाक्रमम् ॥
स्वभृत्य,पुत्र,दारैश्च तथा सम्बन्धिबान्धवैः।
सार्द्धं प्रदक्षिणं कृत्वा प्रार्थयेल्लिङ्गमीश्वरम् ॥
इत्युक्त्वा चैव रुद्रञ्च त्वरितं शान्तिमेव च।

मन्वइति महाबीजं तथा पञ्चाचरस्य वै इति ॥

इति महा स्नानम् ।

कालिका पुराणात् ।

कार्त्तिक्यामथ वैशाख्या मयनादिषु पर्व्वसु ।
दत्त्वा दीपान् समुद्दोध्य देवस्याग्रे बलिन्ततः ॥
भूतानां देवदेवस्य ब्रह्मादिषु भवेत् सुधीः ।
स व्रती देवमामन्त्य स्वपेद्भमौ हरिं स्मरन् ॥
उपलिप्य गृहं गत्वा निराहारो निशि स्वपेत् ।
अपरेऽहनि पूर्व्वाह्णे गत्वा तत्रैव मन्दिरे ।
कारयेत्तु महास्नानं हराय विधिना शृणु ॥
पञ्चविंशत्पलेनैव अभ्यङ्गं कारयेदथ ।
शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन वै ॥
पलानां द्विसहस्रेण महास्नानं विधीयते ।
तावता मधुनाचैव दध्ना चैव ततः पुनः ॥
तावतैव हि चीरेण गव्येनैव भवेत्ततः ।
भूयः सार्द्धसहस्रेण फलानामैक्षवेण तु ॥
रसेन कारयेत् स्नानं भक्त्याचेच्चम्बुना ततः ।
पुनः शीताम्बुना दत्त्वा वस्त्रपूतेन मन्त्रवित् ॥
स्नापयेत् भक्तितो भूमौ गन्धपाचस्थितेन तु ।
विधिना स्नाप्य दारुेन गोरोचन-याथालिपेत् ॥
कृष्णकुङ्कुम कर्पूर चन्दनागुरुयुक्तया ।

कृष्णाकस्तूरी।

लेपयित्वा ततो लिङ्गमापीडान्तं घनं शुभम्।
नीलोत्पलसहस्रेण मालाम्बध्वा प्रपूजयेत्॥
अलाभात्तु सहस्राणामर्द्धार्द्धेनैव पूजयेत्।
उत्पलानामलाभे तु पत्रैश्च श्रीतरोर्य्यजेत्॥
पद्मैर्व्वा चम्पकैर्वापि जात्यापाटलयापि वा।
पुन्नागैः कर्णिकारैर्व्वा श्वेतमन्दारजैरपि॥
मदनैर्मरुपुष्पैर्व्वा शमीशुक्लार्क,नागरैः।
यथालाभञ्च पत्रैर्व्वा निर्गन्धैरमलोर्जितैः॥
प्रपूज्य कारयेद्भक्त्या सुगन्धपुष्पमण्डपम्।
गुग्गुलुञ्चाज्यसंयुक्तमगुरुं वासितं दहेत्॥
संपूज्य गौरीभर्त्तारं गीत,वादित्र,मङ्गलैः।
शालिपिष्टोद्भवैः सिद्धैर्घृतपूर्णैः समुज्ज्वलैः॥
ततो नीराजनं दीपैः षड्विंशत्या तु कारयेत्।
सर्षपैर्दधियुक्तैश्च दूर्व्वागोरोचनाचतैः॥
गन्धपुष्पोदकं दद्यात् धूपार्थञ्चिन्त्य शङ्करम्।
शातकुम्भं ततः पद्ममष्टपत्रं सकर्णिकम्॥
ध्यात्वा निवेदयेत् मूर्द्ध्नि लिङ्गस्य कुसुमैः सह।
सूक्ष्मवस्त्रयुगञ्चौतं श्वेतं वा पद्मसन्निभम्॥
चामरं दर्पणञ्चैव दीपवर्त्तिं प्रदापयेत्।
धूपसञ्चारणञ्चैव सङ्कटं पूर्व्वमेवच॥
वितानकध्वजौ दद्यात् किङ्किणीरवकान्वितौ।

अथाष्टभिः क्षितिः पीडा अङ्गैर्भक्त्या तु दण्डवत् ॥
तत उच्चैः पठेत् स्तोत्रं शाङ्करञ्च शिवप्रियम् ।
प्रदक्षिणं ततो गच्छेच्छनैर्निर्माल्यवर्जितः ॥
प्रणम्य च पुनः पश्चान्नैवेद्यञ्च निवेदयेत् ।
दीनान्धकृपणांश्चैव आगतान् शिवदीक्षितान् ॥
तर्पयेदन्नपानेन सर्व्वांस्तानुक्तगौरवात् ।
कुर्य्यादेतन्महास्नानं विधिनानेन धर्म्मवित् ॥
कारयेद्यः शिवेभक्त्या तस्य पुण्यफलं शृणु ।
समुद्धृत्य शतं सार्द्धं कुलानां पापवर्जितः ॥
भुवनं ब्रह्मलोकान्तं भुक्त्वा भोगानशेषतः ।
व्रजेत् क्रीडायते तस्मिन् विमानस्थोऽमरैर्युतः ॥
भोगान् यथेप्सितान् भुक्त्वा शिवसा पुज्यतां व्रजेत् ।
मायाञ्च तां समुत्सृज्य अन्ते योग मवाप्नुयात् ॥
केवलेनाथ वाज्येन दध्ना गव्येन चैव वा ।
पयसा पञ्चगव्येन मधुनेक्षुरसेनवा ॥
यः कारयेन्महास्नानं विधिनानेन मन्त्रतः ।
सोपि तेनैव मार्गेण गमिष्यति परम्पदम् ॥
अन्तरा म्रियते यस्तु अपूर्णो नियमेन वा ।
सोपि गच्छेत्पदन्तत्तु शिवभक्त्याह्यतन्द्रितः ॥
विधिनानेन निःस्नेयः स्नानं तोयेन कारयेत् ।
नराणां विंशतिं यावत्स यास्यति परम्पदम् ॥
एवमेव हि शूद्रस्य सर्व्वं मन्त्रविवर्जितम् ।
मन्त्रयुक्त्याऽर्च्चयेद्यस्तु ततः पुण्याधिको भवेत् ॥

इति महा पूजा विधिः।

वास्तु संहितायाम्।

पूजनीयो महादेवो लिङ्गमूर्त्तिः सनातनः।
पद्ममष्टदलं हैमं नवरत्नैरलङ्कृतं॥
कर्णिकाकेसरोपेतमासनं परिकल्पयेत्।
राजतन्तदभावे तु रक्तसितमथापि वा॥
पद्मं तस्याप्यभावे तु केवलं भावनामयम्।
तत्पद्मकर्णिका मध्ये कृत्वा लिङ्गङ्कनीयसम्।
अथ वा स्फाटिकोपेतं पूजयेद्विस्तृतक्रमात्।
प्रतिष्ठाप्य विधानेन तल्लिङ्गं कृतशोधनम्॥
परिकल्प्यासनं मूर्त्तौ पञ्चवक्त्रप्रकारतः।
पञ्चगव्यादिभिः पुण्यैर्यथाविभवसंश्रितैः॥
स्नापयेत् कलशैः पूर्णैः सहस्राद्यैस्तु शम्भवे।
गन्धद्रव्यैः स कर्पूरैश्चन्दनाद्यैः स कुङ्कुमैः॥
सवेदिकं समालिप्य लिङ्गं भूषणभूषितम्।
विल्वपत्रैश्च पद्मैश्च रक्तैः श्वेतैस्तथोत्पलैः॥
नीलोत्पलैस्तथान्यैश्च पुष्पैस्तैस्तैः सुगन्धिभिः।
पुण्यैः प्रशस्तैश्चित्रैश्च पत्रैर्दूर्वाचतादिभिः॥
समभ्यर्च्य यथा लाभं महा पूजा विधानतः।
धूपं दीपं तथा दद्यान्नैवेद्यञ्च विशेषतः॥
निवेदयित्वा विभवं कल्याणञ्च समाचरेत्।
इष्टानि च विशिष्टानि न्यायेनोपार्जितानि च॥

सर्व्वद्रव्याणि देयानि व्रते तस्मिन् विशेषतः ।
श्रीपर्णोत्पलादिफलन्तत्प्रमाणं बिल्वपत्रके ॥
पुष्पान्तरेण नियमो यथालाभं निवेदयेत् ।
अष्टाङ्गमर्घमुद्दिष्टं धूपदीपौ विशेषतः ॥
कृष्णागुरुरघोराख्ये वक्रे सव्ये मनःशिला ।
चन्दनं वामदेवाख्ये मुखे कृष्णागुरुं पुनः ॥
पौरुषे गुग्गुलुं सव्ये सौम्ये सौगन्धिकं मुखे ।
ईशानेऽपि त्विशानीं वा दद्याद्धूपं विशेषतः ॥
अगुरुमिश्रं गुग्गुलुं प्रदद्यात् घृतसंयुतम् ।
चन्दनागुरुकुष्ठाद्यं सामान्यन्तु प्रचक्षते ॥
कर्पूरवर्त्तिना देयो दीपो घृतबलिस्ततः ।
अर्घ-माचमनं देयं प्रतिवक्रमतःपरम् ॥
प्रथमावरणे पूज्यौ क्रमाच्च हरषण्मुखौ ।
ब्रह्माङ्गानि तिलांश्चैव प्रथमावरणेऽर्च्चिताः ।
द्वितीयावरणे पूज्या विद्येशाश्चक्रवर्त्तिनः ॥
तृतीयावरणे पश्चादष्टमूर्त्तिर्महेश्वरः ।
महादेवादयस्तत्र तथैकादशमूर्त्तयः ॥
चतुर्थावरणे पूज्याः सर्व्वएव गणेश्वराः ।
बहिरेव तु पद्मस्य पञ्चमावरणक्रमात् ॥
दशदिक्पतयः पूज्याः शास्त्रात्सानुचरास्तथा ।
ब्रह्मणो मानसाः पुत्राः सर्व्वेऽपि ज्योतिषाङ्गणाः ॥
सर्व्वे देवाश्च देव्यश्च सर्व्वाः सर्व्वेऽपि खेचराः ।
पातालवासिनश्चान्ये सर्व्वे मुनिगणा अपि ॥

योगिनी मरुतः पञ्च पञ्चगोमातरस्तथा ।
क्षेत्रपालाश्च सगणाः सर्व्वञ्चैव चराचरम् ॥
अथावरणपूजान्ते संपूज्य परमेश्वरं ।
साज्यं सव्यञ्जनं हृद्यं हरेर्भक्तं निवेदयेत् ॥
मुखवासादिकं दत्त्वा ताम्बूलं सोपदंशकम् ।
अलङ्कृत्य च भूयोऽपि नानापुष्पविभूषणैः ॥
नीराजनान्तं विस्तार्य्य पूजाशेषं समापयेत् ।
वराङ्गं सोपहारञ्च शयनञ्च समीरयेत् ॥
यदन्नं पाचितं हृद्यं तत्सर्व्वमनुपूर्व्वशः ।
कृत्वा च कारयित्वा च हुत्वाचैव प्रपूजनम् ॥
स्तोत्रं व्यामोहनं जप्त्वा विद्यां पञ्चाक्षरीं जपेत् ।
दत्त्वार्घमष्टौ पुष्पाणि देवमुद्रासलिङ्गतः ॥

ताम्बूलमुखवासयोर्लक्षण मुक्तं
रत्नकोशे ।

महापिप्पलपत्राणि क्रमुकस्य फलानि च ।
शुक्तिक्षारेण संयुक्तं ताम्बूलमिति संज्ञितं ॥
श्वेतपत्रञ्च पूर्णञ्च क्रमुकस्य फलानि च ।
नारिकेलफलोपेतं मातुलाङ्गसमायुतम् ।
एलाकक्कोलकर्पूरैर्मुखवासं प्रचक्षते ॥
एतेषामप्यलाभे तु तत्तद्द्रव्यं स्मरेद्बुधः ।
तत्तद्द्रव्यन्तु सङ्कल्प्य पुष्पैर्व्वापि समर्पयेदिति ॥

इति प्रकारान्तरेण महापूजाविधिः ।

विष्णुधर्म्मोत्तरात् ।

महावर्त्तिः सदा देया भूमिपाल महाफला ।
कृष्णपक्षे विशेषेण तत्रापि च विशेषतः ॥
अमावास्या च निर्दिष्टा द्वादशी च महाफला ।
आश्वयुज्यामतीतायां कृष्णपक्षस्य या भवेत् ॥
अमावास्या महापुण्या द्वादशी च विशेषतः ।
देवस्य दक्षिणे पार्श्वे देया तैलतुला नृप ॥
पलाष्टकयुतां राजन् वर्त्तिं तत्र प्रकल्पयेत् ।
महारजनरक्तेन समग्रेण तु वाससा ॥
वामपार्श्वे तु देवस्य देया घृततुला नृप ।
पलाष्टकयुतां पुण्यां शुक्लां वर्त्तिञ्च दापयेत् ॥
वाससा तु समग्रेण सोपवासो जितेन्द्रियः ।
एवं वर्त्तिद्वयमिदं सकृद्दत्त्वा महीपते ॥
स्वर्गलोकञ्चिरं भुक्त्वा जायते भूतले यदा ।
तदा भवति लक्ष्मीवान् रूपसौभाग्यसंयुतः ॥
राष्ट्रे च जायते तस्मिन् देशे च नगरे तथा ।
कुले च राजशार्दूल तत्रस्याद्दीपवत्प्रभा ॥
अत्युज्ज्वलश्च भवति युद्धेषु कलहेषु च ।
ख्यातिं याति सदा लोके सज्जनानाञ्च सद्गुणः ॥
एकामप्यथ वा दद्यादभीष्टामनयोर्द्वयोः ।
मानुष्ये सर्व्वमाप्नोति यदुक्तन्ते मयानघ ॥
सामान्यस्य तु दीपस्य राजन् दानं महाफलम् ।
किं पुनर्महतस्तस्य फलस्यान्तो न विद्यते ॥
दीपदानं महापुण्यमन्यदेवस्य च ध्रुवम् ।

किं पुनर्देवदेवस्य अनन्तस्य महात्मनः॥
गिरिशृङ्गेषु दातव्या नदीनां पुलिनेषु च।
चतुष्पथेषु रथ्यासु ब्राह्मणानाञ्च वेश्मसु॥
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च।
दीपदानं महामन्त्रं महत्फलमुपाश्नुते॥

इति महादीपविधिः।

अथ व्रतारम्भकालः।

तत्र सत्यव्रतः।

उदयस्था तिथिर्याहि न भवेद्दिनमध्यभाक्।
सा खण्डा न व्रतानां स्यादारम्भे च समापने इति॥

एतद्व्यतिरिक्तायामखण्डायां
प्रारम्भमाह वृद्धवशिष्ठः।

खखण्डव्यापिमार्त्तण्डा यद्यखण्डा भवेत्तिथिः।
व्रतप्रारम्भणन्तस्यामनष्टगुरुशुक्रयुगिति॥

तिथिर्यद्यनष्टगुरुशुक्रयुक् अनस्तमितगुरुशुक्रयुक्ता तस्यां व्रतमारम्भणीयमित्यर्थः, इदमुपलक्षणं। गुरुशुक्रयोर्वाल्ये वार्द्धक्येऽपि व्रतन्नारम्भणीयमित्यर्थः।

तथाच वृद्धमनुवृहस्पती।

अग्न्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च।
वेदव्रत-वृषोत्सर्ग-चूडाकरण-मेखला।
माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत्॥
वाल्ये वा यदि वा वृद्धे शुक्रे वास्तङ्गते गुरौ।

मलमासइवैतानि वर्जयेद्देवदर्शनमिति ॥

गार्ग्योऽपि ।

नामा-न्नप्राशन-चौड़ं विवाहं मौञ्जिबन्धनम् ।
निष्क्रमञ्जातकर्मापि काम्यं वृषविसर्जनम् ॥
अस्तगे च गुरौ शुक्रे वाले वृद्धे मलिम्लुचे
उद्यापनमुपारम्भं व्रतानां नैव कारयेदिति ॥

लल्लः ।

नीचस्थे वक्रसंस्थे ह्यभिचरणगते बालवृद्धास्तगे वा
सन्यासो देवयात्रा व्रतचरणविधिः कर्णवेधस्तु दीक्षा ।
मौञ्जीवन्धोऽथ चूडा परिणयनविधिर्वास्तुदेवप्रतिष्ठा
वर्ज्याः सद्भिः प्रयत्नात् त्रिदशपतिगुरौ सिंहराशिस्थितेचेति ॥

नीचलक्षणन्तु ज्योतिःशास्त्रे ।

सूर्य्यादिषूच्चमजगोमकराः क्रमात् स्युः ।
स्त्रौ कर्कि-मीन-वणिजोस्तगमञ्च नीचमिति ॥

उच्चस्थानात्सप्तमं नीचमित्यर्थः ।

तथाच नीचस्थे गुरौ मकरगते इत्यर्थः ।

शौनकः ।

कौर्त्यागारविवाह याग गमनं* चौराद्यकर्णव्यधं
विद्या-देवविलोकनो-पनयनं दीक्षा-परीक्षा व्रतं ।
स्नानं तीर्थगमं रणं पुर महादान प्रतिष्ठापनं

---

* योगगमनमिति पुस्तकान्तरे पाठः ।

सिंहस्थे विबुधार्चिते न शुभदं कर्त्तुस्तथा सूर्य्यगे ॥

अस्तलक्षणन्तु ब्रह्मसिद्धान्ते।

रविणासक्तिरन्येषां ग्रहाणामस्तउच्यते।
ततोर्व्वाक् वार्द्धकं विद्यादूर्द्धं वाल्यं प्रकीर्त्तितमिति ॥
एतयोरवधिः ज्योतिःशास्त्रेऽनेकधादर्शितः।
बालः शुक्रो दिवसदशकं पञ्चकञ्चैव वृद्धः
पश्चादह्नस्त्रितयमुदितः पञ्चमौढ्यः क्रमेण।
जीवो वृद्धः शिशुरपि सदा पञ्चमन्यैः शिशू तौ
वृद्धौ प्रोक्तौ दिवसदशकञ्चापरैः सप्तरात्रमिति ॥
एतेषां पक्षाणां व्यवस्था देशान्तरविषया आपद्विषया वा।

तथाच गार्ग्यः।

शुक्रो गुरुः प्राक्पराक्च बालो
विन्ध्येत्र दशावन्तिषु सप्तरात्रं।
वङ्गेषु हूणेषु च षट्च पञ्च
शेषेच देशे त्रिदिनं वदन्तीति ॥

वराहमिहिरोऽपि।

बहवो दर्शिताः काला ये बाल्ये वार्द्धकेऽपि च।
ग्राह्यास्तत्राधिकाः शेषा देशभेदादुतापदीति ॥

अथमुद्रालक्षणानि।

संमुखीकृत्य हस्तौ द्वौ किञ्चित्सङ्कुचिताङ्गुली।
मुकुली तु समाख्याता पङ्कजप्रसृतेव सा ॥

मुकुलीपङ्कजमुद्रयोः ।

पूर्व्वा च मुकुलो या च प्रदेशी निस्रताङ्गुलिः ।
व्याकोशमुद्रा मुकुला पद्ममुद्रां प्रदर्शयेत् ॥

पद्ममुद्रायाः ।

अङ्गुष्ठौ कुञ्चितौ द्वौ तु स्वकीयाङ्गुलिवेष्टितौ ।
उभौ चाभिमुखौ हस्तौ योजयित्वा तु निष्ठुरा ॥

निष्ठुरायाः ।

तर्जन्यौ कुञ्चितौ कृत्वा तथैव च कनीयसी ।
अधोमुखा दृष्टनखा स्थिता मध्ये करस्य तु ॥
चतस्रश्चोच्छ्रिताः पृष्ठे अङ्गुष्ठावेकतः कुरु ।
नालं व्यवस्थितौ द्वौ तु व्योममुद्रा प्रकीर्त्तिता ॥

व्योममुद्रायाः ।

अथ वैदिकमन्त्राणामृषि दैवत छन्दांसि ।

तत् प्रयोजनमाह याज्ञवल्क्यः ।

आर्षं छन्दो दैवतञ्च विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥
अविदित्वा तु यः कुर्य्याद्याजनाध्ययनं जपम् ।
होममन्तर्जले, दानं तस्य चाल्पफलं लभेत् ॥

तथा ।

यो विजानाति मन्त्राणामार्षं छन्दश्च दैवतम् ।
विनियोगं ब्राह्मणञ्च मन्त्रार्थं ज्ञानकर्म्म च ॥

एकैकस्य ऋषेः सोऽपि वक्ष्योह्यतिथिवद्भवेत्।
देवता याश्च सायुज्यं गच्छन्त्यत्र न संशयः॥
पूर्व्वोक्तेन प्रकारेण ऋष्यादीन् वेत्ति यो द्विजः।
अधिकारी भवेत्तस्य रहस्यादिषु कर्म्मसु॥
येन यदृषिणादृष्टं सिद्धिः प्राप्ता च येन वै।
मन्त्रेण यस्य यत्प्रोक्तमृषेर्भावस्तदार्षकम्॥
छन्दनात् छन्द उद्दिष्टं वाससा इवचाकृतिः।
आत्मा सञ्छादितो देवैर्मृत्योर्भीतैस्तु वै पुरा॥
आदित्यैर्वसुभीरुद्रैस्तेन छन्दांसि तानि वै।
यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या।
तदाकारं भवेत्तस्य देवत्वं देवतोच्यते॥
पुरा देवैः समुत्पन्ना मन्त्राः कर्म्मार्थमेव च।
अनेन चेदं कर्त्तव्यं विनियोगः स उच्यते॥
नैरुक्त्यं यस्य मन्त्रस्य बिनियोगप्रयोजनं।
प्रतीष्ठानं स्तुतिश्चैव ब्राह्मणं तदिहोच्यते॥
एवं पञ्चविधं योगं जपकाले ह्यनुस्मरेत्।
होमे चान्तर्जले योगे स्वाध्याये याजने तथेति॥

तत्रादौ ऋग्वेदमन्त्राः।

अग्निमीलेति सूक्तस्य मधुच्छन्दो विश्वामित्रोऽग्निर्गायत्री।

वायवायाहीति सप्तानां मधुच्छन्दाः।

आद्यानातिसृणां वायुः अनन्तराणामिन्द्रवायू। सप्तमायामित्रावरुणौ। सप्तानां गायत्री।

सदसस्पतिमितिमन्त्रस्य काण्वोमेधातिथिः सदसस्पतिर्गायत्री।

अम्बयोयं त्यध्वमित्यस्य काण्वोमेधातिथिरापोगायत्री।

यत्रिद्विसत्यसोमपा इति आजीगर्त्तः शुनःशेफः इन्द्रः।

आद्यानां सप्तानां पंक्तिर्नवानां गायत्री।

युवाना मेधातिथिः काण्व ऋभयो गायत्री।

स्योनापृथिवी मेधातिथिः काण्वः पृथ्वी गायत्री।

अतोदेवेतिद्वयोर्मेधातिथिर्देवोविष्णुर्गायत्री।

कस्यनूनमिति पञ्चदशर्चस्य आजीगर्त्तिर्वैश्वामित्रो।

वा शुनःशेफः ऋषिः प्रथमायाः कः प्रजापतिस्त्रिष्टुप्।

द्वितीयाया अग्निस्त्रिष्टुप्।

अभित्वेति तिसृषु सविता।

भगस्येत्यस्यां भगोवा गायत्री।

नहितइत्याद्या दश वारुण्यस्त्रिष्टुभः।

त्वमग्नेप्रथमोङ्गिरा इत्यष्टादशर्चस्य।

आङ्गिरस हिरण्यस्तूपः अग्निर्जगती।

अष्टमीषोडश्यष्टादश्यस्त्रिष्टुभः।

एतेति पञ्चदशर्चस्य आङ्गिरस हिरण्यस्तूप इन्द्रस्त्रिष्टुप्।

कद्रुद्रोयेति नव घोरःकाण्वो रुद्रः।

तृतीयायां रुद्रो मित्रावरुणौ सप्तम्यादित्रिषु सोमः

गायत्री।

यास्तइत्यन्त्या अनुष्टुप्।

उदुत्यञ्जातवेदसमितित्रयोदश, अन्त्यास्त्रिष्टुप् प्रस्कण्वः ।
सूर्य्यः आद्या, नव गायत्र्यः ।
दशान्यादिचतस्रोऽनुष्टुभः अन्त्यतृचो रोगघ्नः ।
अन्त्योर्द्धर्चः शत्रुघ्नः । पश्यानं दशर्चस्य शाक्त्यः
पाराशरोऽग्निर्द्विपदा विराट् ।
शौनकमतेपञ्च पङ्क्तिः विराट् ।

रयिर्नत्रिचादशर्च्चं शाक्त्यः पाराशरोग्निर्द्विपदा विराट।
शौनकमते पञ्च पङ्क्तिः विराट् । वनेषुजायुर्दश शौनक मते पञ्च। श्रीणन्नुपदश शौनकमते पञ्च। वनेमपूर्व्वी एकादशर्चं शौनकमते षट्। उपप्रजिन्वन् दशर्चस्य शाक्त्यः पाराशरोग्निस्त्रिष्टुप्।

निकाव्यावेधसः। दश [शाक्त्यः। पराशरोऽग्निस्त्रिष्टुप्। रयिर्नयः पितृवित्तः दशर्चस्य।
पराशरोऽग्निस्त्रिष्टुप्।
उपप्रयन्तो नव राहुगणो गौतमोऽग्निर्गायत्री ।

हिरण्यकेशो रजसो द्वादशर्चस्य गौतमोऽग्निः आद्यास्तिस्र स्त्रिष्टुभः ।
तासु मध्यस्थानो वा शुद्धोवाऽग्निःचतुर्थ्याद्यास्तिस्र उष्णिहः ।
ततः षट्गायत्र्यः ।
त्वं सोम प्रचिकेतोमनीषेतित्रयोविंशत्यृचस्य ।
गौतमः सोमः आद्यचतसृणां त्रिष्टुप् ।
ततो द्वादशानां गायत्री ।
सप्तम्युष्णिक् । ततःषण्णां त्रिष्टुप् ।

प्रपन्दिने एकादशर्चस्य । आङ्गिरसः कुत्सः मरुत्वानिन्द्रः ।
आद्याः सप्त जगत्यः आद्या गर्भस्राविणी उपनिषत् ।
ततश्चतस्रस्त्रिष्टुभः ।

इमा रुद्रायतपसे इत्येकादशर्चस्य ।

कुत्सो रुद्रः नवानां जगती ।

दशम्येकादश्योस्त्रिष्टुप् ।

उभेपुनामीति सप्तर्चस्य । पारुच्छेप इन्द्रः आद्या त्रिष्टुप् ।
द्वितीयाद्यास्तिस्रोऽनुष्टुभः पञ्चमी गायत्री षष्ठी धृतिः सप्त
म्युष्णिक् । येदेवासः पारुच्छेप विश्वेदेवास्त्रिष्टुप् ।

पितुन्नुस्तोषं एकादशर्चं 'अगस्तोन्न'* प्रथमा अनुष्टुप् ।
गर्भोष्णिक् । द्वितीयचतुर्थ्योर्गायत्री तृतीया अनुष्टुप् ।
पञ्चम्यादितिस्रोऽनुष्टुभः ततस्तिस्रोगायत्र्यः अन्त्या बृहत्यनुष्टुभः

अग्नेनयेत्यष्टर्चं । अगस्त्योऽग्निस्त्रिष्टुप् ।

अनर्व्वाणं वृषभमित्यष्टर्चस्य । अगस्त्यो बृहस्पतिस्त्रिष्टुप्
उपेमसृक्षीति पञ्चदशर्चं । गृत्सद अपोनप्ता । त्रैष्टुभम् ।
कद्रिक्रदज्जनुषमितित्र्यचस्य गृत्समदः शकुन्त इन्द्रस्त्रिष्टुप् ।
इन्द्रापर्व्वता चतुर्विंशत्यृचं । आद्यायां इन्द्रपर्व्वतौ । तत-
श्चतुर्दशीपर्य्यन्तानामिन्द्रः ।
ततो द्वयोः ससर्परीवाक् । सप्तदश्यादिचतसृषु रथाङ्गानि
इन्द्रश्च । अन्त्यानां चतसृणामिन्द्रः ।

---

* अगस्त्योऽग्निमिति पुस्तकान्तरे पाठः ।

आद्या नव त्रिष्टुभः दशमी जगती। एकादशी त्रिष्टुप्।

द्वादश्यनुष्टुप्। त्रयोदशी गायत्री। ततो द्वे त्रिष्टुभौ। षोडशी जगती। सप्तदशी त्रिष्टुप्। अष्टादशी बृहती। एकोनविंशी त्रिष्टुप्। विंशी द्वाविंशी चानुष्टुप। एकविंशी त्रयोविंशी चतुर्विंशी च त्रिष्टुप्।

अग्निनेन्द्रेणेति चतुर्विंशदृचस्य सूक्तस्य

श्यावाश्व आत्रेयः अश्विनौ उपरिष्टाज्ज्योतिषं।

द्वाविंशी चतुर्विंश्यौ पंक्ती त्रयोविंशी महाबृहती।

अवितासीति सप्तर्चस्य श्यावाश्व इन्द्रः शक्वरी।

अन्त्या महापङ्क्तिः।

अग्निमस्तोषीति दशर्चस्य। नाभाकः। काण्वोग्निर्महापङ्क्तिः।

इमेविप्रस्येति। त्रयस्त्रिंशदृचस्य सूक्तस्य आङ्गिरसो विरूपाग्निर्गायत्री।

समिधाग्निमिति त्रिंशदृचस्य विरूपाग्निर्गायत्री।

आप्यायेति। द्विचत्वारिंशदृचस्य सूक्तस्य। त्रिशोकः काण्व इन्द्रो गायत्री।

महिवः। अष्टादशर्चस्य। त्रितआप्त्यः आदित्यो देवता।

अन्त्याः पञ्च उपस्यः महापंक्तिः दुःस्वप्नघ्नम्।

प्रतिते। पञ्चर्चं। पृषघ्न काण्वः ऐन्द्रं गायत्रं आग्नि सौरी-अन्त्या पंक्तिः।

प्रोअस्मै द्वादशः प्रगाथकाण्वः ऐन्द्रम् पांक्तम्।

* उपस्येति क्वचित् पाठः।

सप्तम्यष्टमीनवम्यो बृहत्यः त्यान्नृचनियान्।

एक विंशत्नृचस्य। मत्स्यः साम्मदः अगस्त्यः।

बहवोजालबद्धा मत्स्याश्च ऋषयः आदित्यो देवता दशम्येकादशी द्वादशीष्वा दितिः। गायत्रीच्छन्दः।

यो राजा पञ्चदशर्चं। पुरुहन्मा आङ्गिरसः ऐन्द्रं वार्हतम्।

द्वितीया चतुर्थी षष्ठ्यः सतोबृहत्यः त्रयोदश्युष्णिक्।

चतुर्दश्यनुष्टुप्। पञ्चदशी पुरउष्णिक्।

त्वन्नो अग्ने महोभिरिति पञ्चदशर्चस्य सूक्तस्य।

सुदीति पुरमोडावन्यतरो वा।

अग्निः गायत्री दशम्याद्याः समा बृहत्यः एकादशाद्याः विषमाः सती बृहत्यः। कन्याऽवाः सप्तर्चस्य आत्रेय इन्द्रोऽनुष्टुप् आद्ये द्वे पंक्ती। उद्विदभि। चतुस्त्रिंशत्। सूक्तञ्च इन्द्रो गायत्री ऐन्द्राभवी अन्त्या।

आपोहिष्टेति नवर्चस्य। आम्बरीषः सिन्धुद्वीप आपोगायत्री

पञ्चमी वर्धमाना सप्तमी प्रतिष्ठा अन्त्ये द्वे अनुष्टुभौ। परेपिवांसमिति षोड़शर्च स्य।

यमी वैवस्वतो यमः षष्टी लिङ्गोक्तदेवता। सप्तम्यादितिस्रः पित्रा वा याम्या वा।

दशम्यादितिस्तषु श्वाणी त्रिष्टुपच्छन्दः त्रयोदशी चतुर्दशी च अनुष्टुप्। पञ्चदशी बृहती। परमृत्याविति चतुर्दशर्चस्य

सङ्कुसुकोयामः आद्यानां चतसृणां मृत्युः। पञ्चम्याधाता। षष्ठ्यां त्वष्टा। परा: पितृयज्ञदेवत्य: अन्त्या प्राजापत्या वा त्रिष्टुप्। एकादशी प्रस्तारपङ्क्ति: त्रयोदशी जगती। अन्त्याऽनुष्टुप्। भद्रन्नइति दशर्चस्य। ऐन्द्रोविमदः प्राजापत्योवा वसुक्कद्दा सुक्त: अग्निर्गायत्री। आद्यैकपदा शान्त्यर्था द्वितीयानुऽष्टुप् नवमी विराट्। अन्त्यास्त्रिष्टुभ:। प्रदेवत्रेति पञ्चदशर्चस्य प्रलूष: कंषवः आपोवा आपोनप्तीवा त्रिष्टुप्। प्रावेपामामिति चतुर्द्द-शर्चं। मौजवानत्त्च: कवयोवा। आद्या सप्तमी नवमीषु कृषिस्तुति: द्वादश्यामत्तस्तुतिः शेषाष्वद्दर्निंदा। त्रैष्टुभं अस्व-प्नमिति चतुर्द्दशर्चस्य धानाकोलूषो विश्वेदेवा जगती अन्त्ये द्वे त्रिष्टुभौ। नमोमित्रस्येति द्वादशर्चस्य। सौर्योभितया: सूर्य्या-जगती दशमी त्रिष्टुप्। दिवस्परिद्वादशर्चस्य। वत्सप्रिरग्नि स्त्रिष्टुप् अन्त्येऽध्यर्च लिङ्गोक्ता देवता। माप्रगामेति षड्र्चस्य। बन्धुसुबन्धुश्रुतबन्धु विप्रबन्धव इन्द्रोगायत्री। यत्तेयममिति द्वादशर्चस्य बन्ध्वादयश्चत्वार ऋषयो यमादयो मनआवर्त्तनम-नुष्टुप्। इदमित्थां इति सप्तविंशत्यृचस्य। नाभानेदिष्टोमा-नवो विश्वेदेवास्त्रिष्टुप् वृहस्पतेइत्येकादशर्चस्य वृहस्पत-इत्याङ्गिरस: परमात्मा त्रिष्टुप् नवमी जगती यस्ते मन्यो इति सप्तर्चस्य। मनुस्तापसोमन्यु्स्त्रिष्टुप्। प्रथमा जगती। रक्षो-हणमिति पञ्चविंशत्यृचस्य॥ वायुर्भरद्वाजोऽग्निस्त्रिष्टुप्।

अन्त्याश्चतस्रोऽनुष्टुभ:। हविष्पान्तमित्येकोनविंशत्यृचस्य आङ्गिरसो वा वामदेव्यो वा मुर्धन्वान् सूर्य्यो वैश्वानर-स्त्रिष्टुप्। सहस्रशीर्षाषोड़शर्चस्य नारायण: परमात्मा त्रिष्टुप्।

या ओषधीरिति त्रयोविंशत्यृचस्य । आथर्वणोभिषगोषधीरनुष्टुप् । बृहस्पतिप्रतिमइति द्वादशर्चस्य । देवापि राष्टिषेणो । वृष्टिकामो विश्वे देवास्त्रिष्टुप् ।

कयानश्चित्रं द्वादशर्चस्य । वैखानसी चन्द्र इन्द्रस्त्रिष्टुप् ।

आशुःशिशान इति त्रयोदशर्चस्य । ऐन्द्रोऽप्रतिरथ इन्द्रस्त्रिष्टुप् ।

चतुर्थी बार्हस्पत्या उपान्त्या मारुती अन्त्या च मारुत्यनुष्टुप् ।

वैश्वाऽग्निमिति सप्तर्चस्य । क्रमेण सप्तर्चा जूति वातजूतिर्विप्रजूतिर्वृषाणकः ।

करिक्रतः ऐतशः ऋष्यशृङ्गः ऋषयः केशी देवता अनुष्टुप् ।

उतदेवा इति सप्तर्चस्य । भरद्वाज-कश्यप-गोतमा-त्रि-विश्वामित्र-जमदग्नि-वशिष्ठाः क्रमेण ऋषयो विश्वे देवाऽनुष्टुप् ।
अग्नेऽच्छषड्र्चस्य तापसोग्नि विश्वे देवाऽनुष्टुप् ।

इमां खनामीति षडर्चस्य इन्द्राणी ऋषिका ।

उपनिषद्रहविश्वादेवता सपत्नी बाधनमनुष्टुवन्त्या पंक्तिः । शासः पञ्चर्चस्य भरद्वाजः शास इन्द्रोऽनुष्टुप् । मुञ्चामि पञ्चर्चस्य यक्ष्मनाशनः प्रजापति इन्द्राग्नी इन्द्रोवा त्रिष्टुप् । अन्त्या बृहती वा ब्रह्मणाग्निसंविदानः षड्र्चस्य रक्षोहा ब्राह्मो । गर्भसमाधानोग्निरनुष्टुप् । अपेहिपञ्चर्चस्य आङ्गिरसः प्रचेतो विश्वेदेवाऽनुष्टुप् तृतीया त्रिष्टुप् । अन्त्यापंक्तिर्दुःखप्नं । देवाःकपोतः पञ्चर्चस्य नैर्ऋतः कपोतो

विश्वेदेवास्त्रिष्टुप् कपोती पद्याते प्रायश्चित्तम्। मयोभूःचतुष्कस्य। काक्षीवतः शबरो गौस्त्रिष्टुप्। पतङ्गमिति त्र्यृचस्य। प्राजापत्यः पतङ्गोमायभेद् स्त्रिष्टुप्। अपश्यन्त्वेति त्र्यृचस्य। प्रजापत्यः प्रजावां स्त्रिष्टुप्। विष्णुर्योनिमिति त्र्यृचस्य गर्भकर्त्ता त्वष्टा प्राजापत्योविष्णुर्वा विश्वेदेवाऽनुष्टुप्।

कस्यचिन्मते विष्णुर्योनिमिति पञ्चर्चम्।

महित्रीणामिति त्र्यृचस्य वारुणिः सत्यधृति गायत्री।

आयङ्गौस्त्र्यृचस्य सार्पराज्ञी आत्मा सूर्य्योवा गायत्री।

संसमित् चतूरिचस्य सम्बनन आङ्गिरसः संज्ञानमनुष्टुप् तृतीयात्रिष्टुप्।

वास्तोष्पते त्र्यृचस्य मैत्रावरुणी वशिष्ठोवास्तोष्पति स्त्रिष्टुप्।

तत्सवितुर्नवर्चस्य श्यावाश्वः सविता गायत्री प्रथमाऽनुष्टुप्।

मातारुद्राणामिति मन्त्रस्य जमदग्निर्भार्गवो गावस्त्रिष्टुप्।

शन्नोदेवीसूक्तस्य वशिष्ठो विश्वेदेवास्त्रिष्टुप्।

युवंवस्त्राणि सप्तर्चस्य दीर्घतमा मित्रावरुणौ त्रिष्टुप्।

समुद्रादूर्मिरित्येकादशर्चस्य वामदेवऋषिः अग्निः।

सूर्य्यः गावो घृतं वा देवताः अन्त्यास्त्रिष्टुप्।

उपान्त्या जगती।

स्वस्तिदाविशस्पतिः शासो भरद्वाज इन्द्रोऽनुष्टुप्।

सुदेवइत्यस्य प्रियमेध इन्द्रोऽनुष्टुप्।

वायोएते एकविंशत्यृचस्य गृत्समदः आद्ययोर्वायुः तृतीयाया इन्द्रावायू।

ततस्तिसृणां मित्रावरुणौ ततस्तिसृणां मित्रावरुणौ।

दशम्ये-कादशी-द्वादशीनामिन्द्रः ।

ततस्त्यृचस्य विश्वेदेवास्ततस्तिसृणां सरस्वती ।

एकोनविंश्याः द्यावापृथिव्यौ हविर्धानौ वा ।

तृतीयपादेऽग्निर्वा । अन्त्ययोर्द्वयोर्द्यावापृथिव्यौ हविर्धानौ वा । गायत्रीछन्दः सर्व्वासां । आदित्यानामितित्र्यृचस्य वशिष्ठ आदित्यस्त्रिष्टुप् ।

आदित्यास इत्यृचस्य तद्वत् । यो यजाति मनुः आशिष अन्द्रज्यास्तुतिद्वारा यजमानः प्रशंस्यः । पञ्चम्यां दम्पती । शिष्टादम्पत्याशिषः गायत्री ।

चतुर्दश्यनुष्टुप् । पञ्चदश्याद्याः पंक्तयः ।

शवोदेवा सप्तर्चस्य वैश्वामित्रो ऋषभोऽग्निरनुष्टुप् ।

क्राणाशिशुरित्यृचस्य । त्रितः सोमोऽनुष्णिक् ।

पिवासोममिति पञ्चदशर्च्चस्य भरद्वाज इन्द्रस्त्रिष्टुप् ।

अन्त्या द्विपदा । एषोउषाः पञ्चदशर्चस्य प्रस्कण्वाश्विनौ गायत्री । अग्निर्हुतमिति द्वादशर्चस्य काण्वो मेधातिथिरग्निर्गायत्री ।

अग्निनेति पादे निर्मन्थ्याहवनीयावग्नी ।

विष्णोर्नुकमिति षडर्च्चस्य दीर्घतमा विष्णुस्त्रिष्टुप् ।

तवश्रियेति मन्त्रस्य वसुश्रुतो विश्वेदेवा स्त्रिष्टुप् ।

द्यौर्वः पितेत्यस्य अगस्त्यो विश्वेदेवाः अनुष्टुप् ।

आवोराजानमिति षोडषर्च्चस्य वामदेव—

आद्या रौद्री द्वितीयादिषग्निस्त्रिष्टुप् ।

उत्तानपर्णेसुभग इत्यस्येन्द्राण्युपनिषद्विद्यानुष्टुप् ।

मित्रोजनानिति नवर्च्चस्य विश्वामित्रो मित्रः ।

आद्याः पञ्च त्रिष्टुभः सतश्चतस्रो गायत्र्यः।

अमन्दांस्तोमानिति सप्तर्चस्य कक्षीवान् स्वनयनस्तुतिस्त्रिष्टुप्।

अन्त्ये द्वेऽनुष्टुभौ। आवांरथो अश्विनाइत्येकादशर्चस्य कक्षीवानश्विनौ त्रिष्टुप्। स्वादिष्टयेति दशर्चस्य।

मधुच्छन्दा विश्वामित्रः सोमो गायत्री। पवस्वदेववीति।

दशर्चस्य मेधातिथिः काण्वः सोमो गायत्री।

एषदेवः दशर्चस्य शुनःशेफः सोमो गायत्री।

सनाचेति दशर्चस्य हिरण्यस्तूपः सोमो गायत्री।

समिद्धः एकादशर्चस्य। कश्यपः असितः देवलोवा ऋषिः।

ऋक्क्रमेण समिद्धोग्नि-तनूनपात् ईलः बर्हिः देव्योद्वारः उषासानक्ताई देव्यो होतारौ तिस्रोदेवीः त्वष्टा वनस्पतिः स्वाहाकृतयः गायत्रीच्छन्दः अन्त्याश्चतस्रोऽनुष्टुभः।

मन्द्रयेति नवर्चस्य असितो वा देवलो वा सोमो गायत्री। असृग्रमिति नवर्चस्य देवलः काश्यपो वा सोमो गायत्री। एते सोमा इति नवर्चस्य अतो वा देवलो वा सोमो गायत्री। परिप्रियादिवः नवर्चस्य प्रस्वानासः इति नवर्चं। उपास्मैनवर्चं। सोमा असृग्रं नवर्चं। सोमः पुनानो अर्षति नवर्चम्।

परिप्रासिष्यदशर्चं। एषधिया अष्टर्चं। एते सेतारः अष्टर्चं। प्रनिम्नेनेवाष्टर्चां परिसुवानः सप्तर्चं।

यत्सोमसप्तर्चं। प्रकविः सप्तर्चं। एते धावन्ति सप्तर्चं।

एते सोमासः सप्तर्चं । सोमा असृग्रं सप्तर्चं । प्रसोमासः सप्तर्चं

एतेसोमा इति वत्सर्षीणीमानि । एवं षड़र्चस्य ।

दृढच्युत आगस्त्यः सोमोगायत्री । तमसृचन्त ।

षड़र्चस्य दार्ढाच्यतेध्मवाहः सोमोगायत्री । एष कविः षर्णां ।

नृमेध आङ्गिरसः सोमोगायत्री । एषवाजीनां ।

प्रियमेध आङ्गिरसः सोमोगायत्री ।

प्रास्यधावाः षर्णां मामधमाङ्गिरः सोमोगायत्री । प्रास्य-धाराः ॥

षर्णां नृमेध आङ्गिरसः सोमो गायत्री ।

प्रधारा ॥ अस्य षर्णां विन्दुराङ्गिरसः सोमो गायत्री ।

प्रसोमासः ॥ षर्णां गौतमोराहुगणः सोमो गायत्री ।

प्रसोमासः ॥ षर्णां श्यावाश्व आत्रेयः सोमो गायत्री ।

प्रसोमासः ॥ षर्णान्त्रितआस्यः सोमो गायत्री ।

प्रसुवानः ॥ षर्णाङ्गौतमोराहुगणः सोमोगायत्री ।

त्रित आनःपवस्य ॥ षर्णां प्रभवसुः । असर्जिरथ्यः ॥ ३७ ॥ षर्णां प्रभूवसुः । ससुतः ॥ षर्णां राहुगणः । एष उत्थः ॥ षर्णां राहुगणः । आसुरषः ॥ षर्णां आङ्गिरसो बृहन्मतिः पुनानः ॥ षर्णां बृहस्पतिः । प्रयेगावः ॥

षर्णां । जनयन् ॥ षर्णां । यो अत्य इव ॥

षणाञ्च । मेधातिथिः सोमोदेवता । गायत्रीच्छन्दः सर्व्वत्र ॥

प्रया इन्दो इति षण्णामपास्यः। सयवस्वः षण्णां मयास्य आङ्गिरसः। अस्टग्र मितिषण्णामयास्यः। अयासोमः पञ्चानां भार्गवः कविः।

तत्वानृर्म्याणि पञ्चानां। पवस्व स्वष्टिमिति पञ्चानाञ्च कविः।

उत्तेशुष्मासःपञ्चानां। उतथ्य आङ्गिरसः अध्वर्योपञ्चानां।

परिद्युचः पञ्चानाञ्च उतथ्यः। उत्ते इतिचतुर्णां॥

अस्यप्रत्नामिति चतुर्णां।

वयं वयं चतुर्णाञ्च अवत्सारः परिसोमः।

चतुर्णामवत्सारः काश्यपः।

प्रतेधराः चतुर्णां। तरत्समन्दीचतुर्णां। पवस्यः॥ ६०॥

चतुर्णाञ्च अवत्सारः। सोमो देवता गायत्रीच्छन्दः सर्वत्र।

प्रगायत्रेण चतुर्णामवत्सारः सोमो गायत्री तृतीयापुर उष्णिक्॥

अयावीती॥ त्रिंशद्दृचस्य अमहीयुः सोमोगायत्री।

एते अस्टग्रन्निंशद्दृचस्य॥ भार्गवोजमदग्निः सोमो गायत्री।

आपवस्य त्रिंशद्दृचस्य निध्रुविः काश्यपः सोमोगायत्री।

पवस्व विश्वचर्षणे त्रिंशद्दृचस्य।

शत। वैखानसाः सोमः एकोनविंशाद्यास्तिस्त्र आग्नेय्यः गायत्री अष्टादश्यनुष्टुप्।

अत्रस्वादिष्ठयेति सूक्तमारभ्य हिक्तण्वन्तोति सूक्तपर्य्यन्तपवमानगुणविशिष्टएव सोमो देवता। त्वं सोमासीति द्वात्रिंशद्दृचस्य

आद्यचस्य भरद्वाजः चतुर्थ्यादितिसृणां कश्यपः सप्तम्यादिति-सृणां गौतमः ।

दशम्यादिभितिसृणामत्रिः । त्रयोदश्यादितिसृणां विश्वामित्रः ।

षोडश्यादितिसृणां जमदग्निः । एकोनविंश्यादितिसृणां वशिष्ठः ।

पञ्चविंश्यादितिसृणां सप्तविंश्यादिति पञ्चानां सप्तर्षयः ।

सोमोदेवता । दशम्यादितिसृणां पूषा वा सोमो वा अनुभोवा । त्रयोविंशोचतुर्विंश्योरग्निः पञ्चविंशो सावित्री ।

षड्विंश्यग्निसावित्री सप्तविंशी वैश्वदेवी । शेषेषु

सुसोमः । गायत्रोच्छन्दः। सप्तविंश्यनुष्टुप्। द्वादश्यादितिस्रो द्विपदा गायत्र्यः त्रिंशीपुरउष्णिक्।

अन्त्योऽनुष्टुभौ । त्रिरस्मै सप्तधेनवः दशस्यार्चरेणुर्वैश्वामित्रः।

सोमो जगती अन्त्या त्रिष्टुप्।

आदक्षिणा नवर्चस्य ऋषभो वैश्वामित्रः सोमो जगती अन्त्या त्रिष्टुप् ।

हरिमृजन्ति नवर्चस्य हरिमन्त आङ्गिरसः । सोमो जगती ।

स्नक्वेनवर्चस्य यवित्र आङ्गिरसः सोमो जगती ।

स्त्रिशुर्नवर्चस्य वच्चोवानो शिजः सोमो जगती अष्टमी त्रिष्टुप्।

अभिप्रियाणि पञ्चर्चस्य भार्गवः कविः सोमो जगती । धर्त्ता-दिवः पञ्चर्चस्य ।

एष प्रपञ्चर्चस्य। प्रराजापञ्चर्चस्य। अचोदसोनः पञ्चर्चस्य च कविः सोमो जगती ।

सोमस्यधारा पञ्चर्चस्य भारद्वाजो वसुः सोमो जगती।

प्रसोमस्य पञ्चर्चस्य वसुः सोमो जगती अन्त्या त्रिष्टुप्।

असो विसोमः पञ्चर्चस्य वसुः सोमो जगती अन्त्या त्रिष्टुप्।

पवित्रन्ते पञ्चर्चस्य आङ्गिरसः पवित्रः सोमो जगती।

पवस्वदेवमादनः पञ्चर्चस्य। वाच्यः प्रजापतिः सोमो जगती।

इन्द्राय सोम द्वादशर्चस्य भार्गवोवेनः सोमो जगती।

अन्त्ये द्वे त्रिष्टुभौ।

प्रतआशव: अष्टाचत्वारिंशदृचस्य सूक्तस्य। आद्यासु दशसु अकृष्टाभाषाः एकादश्यादिदशसु सिकता निवावर्षः। एकविंश्यादिदशसु पृश्नियोजाः। एकत्रिंश्यादिदशसु आत्रेयः एकचत्वारिंश्यादिपञ्चसु अत्रिः।

अन्त्यासु त्रिसृषु गृत्समदः सोमो जगती सर्व्वासां।

प्रतुद्रवर्चस्य उशना सोम स्त्रिष्टुप्।

अयं सोम इन्द्रा अष्टर्चस्य उशना सोम स्त्रिष्टुप्।

प्रोस्यवह्निः सप्तर्चस्य उशना सोमस्त्रिष्टुप्।

प्रहिन्वानः षडर्चस्य वशिष्ठः सोमस्त्रिष्टुप्।

असर्जिवक्वा षडर्चस्य कश्यपः सोम स्त्रिष्टुप्।

परिसुवानः षडर्चस्य कश्यपः सोमस्त्रिष्टुप्।

साकमुक्षः पञ्चर्चस्य नोधा गौतमः सोम स्त्रिष्टुप्।

अधियत् पञ्चर्चस्य कण्व आङ्गिरसो धौरः सोम स्त्रिष्टुप्।

कनिक्रन्ति पञ्चर्चस्य च स्कन्नः सोमस्त्रिष्टुप।

प्रसेनाणी ग्नुर्विं शत्यृचस्य दैवोदासिः प्रतर्दनः सोमः त्रिष्टुप्। इति सूक्तानि ।

अथ मन्त्राः । वायवाया ॥ १ ॥ २ ॥ १ ॥

मेधा तिथिः गायत्री । सदसस्पति ॥ १ ॥ ३५ ॥ १ ॥

मेधा तिथिकाण्वः सदसस्पतिर्गायत्री । युवाना ।२४१ ।

मेधातिथिः काण्व ऋभवो गायत्री स्योना पृथिवी ॥ २ ॥ ६ ॥ ५ ॥

मेधा तिथिः काण्वः पृथिवी गायत्री ।

आनोदेवा ॥ २ ॥ ७ ॥ १ ॥

मेधातिथिः काण्वो विष्णुर्गायत्री ।

इदं विष्णुः ॥ २ ॥ ७ ॥ २ ॥

मेधातिथिः काण्वो विष्णुर्गायत्री ।

तद्विष्णोः ॥ २ ॥ ७ ॥ ५ ॥

तद्वत् । वरुणः ॥ २ ॥ १५ ॥ १ ॥

मेधातिथिः कण्वो मित्रावरुणौ गायत्री ।

तत्वायामिन्द्र ॥ २ ॥ १५ ॥ १ ॥

शुनःशेफो अजीगर्त्तिर्वरुण स्त्रिष्टुप्।

उदुत्तम ॥ २ ॥ १५ ॥ ५ ॥

शुनः शेफोजीगर्त्तिर्वरुण स्त्रिष्टुप् ।

इमंमेवरुण ॥ २ ॥ १८ ॥ ४ ॥ शुनः शेफोऽजीगर्त्तिर्वरुणो गायत्री ।

कद्रुद्राय ॥ ३ ॥ २६ ॥ १ ॥ कण्वो घोरो रुद्रो गायत्री ।

आकृष्णेन ॥ ३ ॥ ३ ॥ २ ॥ हिरण्यस्तूपः सविता त्रिष्टुप्।

उदुत्यम् ॥ ४ ॥ ७ ॥ १ ॥ प्रस्कण्वः सूर्य्यो गायत्री।

एषोउषा ॥ ३ ॥ ३३ ॥ १ ॥ प्रस्कण्वोऽश्विनौ गायत्री।

शुक्रःशु ॥ ५ ॥ १२ ॥ १ ॥ पराशरः शुक्रो द्वैपदं वैराजम्। इम-मिन्द्रा ॥ ६ ॥ ५ ॥ ४ ॥ राहुगणो गौतम इन्द्र अनुष्टुप्। कोद्य युङ्क्त ॥ ६ ॥ ८ ॥ १ ॥ गौतमोराहुगण इन्द्रस्त्रिष्टुप्।

आनोभद्रा ॥ ६ ॥ १५ ॥ १ ॥ गौतमो राहुगणो विश्वे देवा स्त्रिष्टुप्।

अदितिर्द्यौः ॥ ६ ॥ १६ ॥ ५ ॥ तद्वत्।

ऋदुनीति ॥ ६ ॥ १७ ॥ १ ॥ गौतमोराहुगणो विश्वे देवा गायत्री।

मधुवाता ॥ ६ ॥ १८ ॥ १ ॥ गौतमोराहुगणो विश्वे देवा गायत्री।

आप्यायस्व ॥ ६ ॥ २२ ॥ ३ ॥ गौतमः सोमोगायत्री सन्त्वेप-यांसि गौतमो राहुगणः सोमस्त्रिष्टुप्।

सोमोधेनुम् ॥ ६ ॥ २२ ॥ ५ ॥ तद्वत्। तच्छंयोः ॥ ० ॥

शंयुर्विश्वे देवाः शक्करीरीम। जातवेदसे ॥ ७ ॥ ७ ॥ १ ॥

कश्यपोजातवेदाग्निस्त्रिष्टुप्।

इमारुद्राय ॥ ८ ॥ ५ ॥ ११ ॥ कुत्सोरुद्रोजगंत्यते त्रिष्टुभौ।

मानस्तोके ॥ ८ ॥ ६ ॥ ३ ॥ तद्वत्।

चित्रंदेवानां ॥ ८ ॥ ७ ॥ १ ॥ कुत्सःसूर्य्यस्त्रिष्टुप्।

गृहं गृहं ॥ ९ ॥ ३ ॥ ४ ॥ कक्षीवानुषस्त्रिष्टुप्।

ये देवासो ॥ १० ॥ ४ ॥ ६ ॥ पारुच्छेयो विश्वे देवास्त्रिष्टुप्।

युवं वस्त्राणि ॥१०॥२२॥१॥ दीर्घतमोमित्रावरुणौ त्रिष्टुप्।

विष्णोर्नुकम्॥ १०॥ २४॥ १॥ दीर्घतमाविष्णुः त्रिष्टुप्।
तद्विष्णोः॥ १०॥ २४॥ २॥ तद्वत्। प्रविष्णवे॥२४॥१०॥
२४॥ ३॥ तद्वत्।

यदक्रन्द॥ ॥ ११॥ ११॥ १॥ दीर्घतमाअश्वस्त्रिष्टुप्।
सप्तपुञ्जन्ति॥ ११॥ १४॥ २॥ दीर्घतमाअश्वरं त्रिष्टुप्।
हिंकृण्वती॥११॥१८॥ २॥ दीर्घतमाविश्वे देवास्त्रिष्टुप्।
सूयवसा॥ ११॥ २१॥ ३॥ तद्वत्!

गौरीमिमाय॥ ११॥ २२॥ १ दीर्घतमाविश्वे देवाजगती॥ १०॥

पितुंनुस्तोषं॥ १३॥ ६॥ १॥ अगन्त्योत्र पितरस्त्रिष्टुप्।
अग्नेनय॥ १३॥ १०॥ १॥ अगस्तिरग्निस्त्रिष्टुप्।
त्वमग्ने रुद्र॥ १३॥ १८॥ १॥ ग्टत्समदोऽग्निर्जगती।
घृतं मिमिक्षे॥ १३॥ २६॥ ६॥ ग्टत्समदोऽग्निः स्वाहान्तस्त्रिष्टुप्॥ १३॥

गणानां त्वा॥ १४॥ २८॥ १॥ ग्टत्समदो गणाधिपतिर्जगती।
त्वन्नोगोपा॥ १४॥ ३०॥ १॥ ग्टत्समदोबृहस्पतिर्जगती।
बृहस्पते॥ १४॥ ३१॥ ५॥ ग्टत्समदोबृहस्पतिस्त्रिष्टुप्।
ब्रह्मणस्पते॥ १४॥ ३२॥ ४॥ ग्टत्समदोब्रह्मणस्पति त्रिष्टुप्॥ १४॥

स्तुतिश्रुतम्*॥ ५॥ १८॥ १॥ ग्टत्समदोरुद्रोजगती॥ १५॥

---

* स्तुतिश्रुतमिति पुस्तकान्तरे पाठः।

कनिक्रदत् ॥ १६ ॥ ११ ॥ १ ॥ गृत्समदः शकुन्तस्त्रिष्टुप् ।

युवासुवासाः ॥ १७ ॥ ३ ॥ ५ ॥ विश्वामित्रोयूपस्त्रिष्टुप् ।

वनस्पते ॥ १७ ॥ ४ ॥ ६ ॥ विश्वामित्रोवनस्पतिस्त्रिष्टुप् ।

इन्द्राग्नी ॥ १७ ॥ १७ ॥ १२ ॥ विश्वामित्र इन्द्राग्नी गायत्री ।

अभितष्टे ॥ १८ ॥ २४ ॥ त्रिष्टुप् । विश्वामित्र इन्द्रस्त्रिष्टुप् ।

सद्योहजाइन्द्रः ॥ १९ ॥ ११ ॥ २ ॥ विश्वामित्र इन्द्रस्त्रिष्टुप् ।

त्वन्नो अग्ने ॥ २० ॥ १२ ॥ ५ ॥ विश्वामित्रोऽग्निस्त्रिष्टुप् ।

तेमन्वत् ॥ २० ॥ १५ ॥ १ वामदेवोऽग्निस्त्रिष्टुप् ।

आवोराजा ॥ २० ॥ २० ॥ १ ॥ तद्वत् ।

कयानः ॥ २२ ॥ २४ ॥ १ । वामदेवइन्द्रोगायत्री ।

दधिक्राव्णो ॥ १३ ॥ १३ ॥ ५ ॥ वामदेवोदधिक्रावणा-अनुष्टुप् । हंसःशुचिषत् ॥ २३ ॥ १४ ॥ ५ वामदेवः सूर्यो जगती ॥

वायोः शतं ॥ २३ । ५ । ३ । सदस्युर्वायुरनुष्टुप् । क्षेत्रस्य पतिना ॥ २४ । ९ । १ । पुरुमिन्द्राक्षेत्राधिपतिरनुष्टुप् ।

यस्त्वाहृदा । २४ । १९ । ५ । वसुस्रुतोऽग्निस्त्रिष्टुप् ॥

अग्निस्तुविश्र ॥ २५ । १० । ४ । वसूयवोग्निरनुष्टुप् ।

वीति होत्र ॥ २५ । १९ । ३ । वसूयवोऽग्निर्गायत्री ॥

ऋ ॥ धर्मं वो ॥ २८ । २ । १ । अर्चनामा मित्रावरुणा-वनुष्टुप् ॥

हिरण्यवर्णां । २८ । ३ । ८ । १ । आनन्दकर्दमचि-क्लीतन्दिरालक्ष्मीरनुष्टुप् ।

मूर्द्धानम् ॥ २८ ॥ ८ ॥ १ ॥ भरद्वाजोवैश्वानरस्त्रिष्टुप् । युगेयुगे ॥ २८ ॥ १० ॥ ५ ॥ भरद्वाजोविश्वे देवा जगती । अग्नआयाहि ॥ २८ ॥ २२॥ भरद्वाजोग्निर्गायत्री । पिबासोम । ३० ॥ १ ॥ १ ॥ भरद्वाज इन्द्र स्त्रिष्टुप् । आत्वावहन्तु ॥ १०॥ १ ॥ ८ ॥ मेधा तिथिरिन्द्रो गायत्री । महाँ इन्द्रो ॥ ३० ॥ ७॥ १ ॥ भरद्वाज इन्द्र स्त्रिष्टुप् । आगावः ॥ ३० ॥ २५ ॥ १ ॥ वीतहव्योगौस्त्रिष्टुप् । त्वां वृत्रेषु ॥ ३१ ॥ १७ ॥ १ ॥ शंयुरिन्द्रो बृहती । त्वामिद्धि ॥ ३१ ॥ २७॥ १ ॥ शंयुर्बार्हस्पत्य इन्द्रो बृहती । त्रातारमिन्द्रा ॥ ३१ ॥ ३३ ॥ १ ॥ गर्गइन्द्रस्त्रिष्टुप् । इन्द्रः सुत्रा ॥ ३१ ॥ ३३ ॥ २ ॥ तद्वत् । विश्वे देवाः ॥ ३२ ॥ १६॥ ६॥ सुहोत्रादयो विश्वे देवा भरद्वाजो विश्वे देवा स्त्रिष्टुप् । सरस्वती ॥३२॥ ३२ ॥ ४ ॥ कुर्मामात्समदः सरस्वती त्रिष्टुप् । धन्वनागा ॥ ३३ ॥ १८ ॥ २ ॥ पायुर्धनु स्त्रिष्टुप् । इन्द्रोनरो ॥ ३५ ॥ ११ ॥१॥ वसिष्ठोग्नि स्त्रिष्टुप् । अभित्वाशूर ॥ ३५॥२१॥ २ ॥ वशिष्ठ इन्द्रोबृहती ।

यन्न इन्द्राग्नी ॥ ३५ ॥ २८ ॥ १ ॥ वसिष्ठो विश्वे देवा-स्त्रिष्टुप् ।

अहिर्बुध्नः ॥ ३६ ॥ ५ ॥ ५ ॥ वशिष्ठः सविता त्रिष्टुप् ।

इमारुद्राय ॥ ३६ ॥ १३ ॥ १ ॥ कुत्सोरुद्रोजगती ।

समुद्रज्येष्ठा ॥ ३६ ॥ १६॥ १ ॥ वशिष्ठ आपस्त्रिष्टुप् ।

वास्तोष्पते ॥ ३६ ॥ २१ ॥ १ ॥ वशिष्ठवास्तोष्पति स्त्रिष्टुप ।

अम्बकम् ॥ ३६ ॥ ३० ॥ ६ ॥ वशिष्ठोरुद्रोऽनुष्टुप् ।

तच्चक्षुः ॥ ३७ ॥ ११ ॥ १ ॥ वशिष्ठः सूर्यउपर उष्णिक् ।

कुविदङ्ग ॥ ३८ ॥ १३ ॥ १ ॥ वसिष्ठो वायुस्त्रिष्टुप्।
आवायो ॥ ३८ ॥ १४ ॥ १ ॥ तद्वत्।
नतेविष्णो ॥ ३८ ॥ २४ ॥ २ ॥ वसिष्ठो विष्णुस्त्रिष्टुप्।
इरावती ॥ ३८ ॥ २४ ॥ ३ ॥ तद्वत्।
आदित्प्रत्नस्य ॥ ४० ॥ १४ ॥ ५ ॥ वत्स इन्द्रो गायत्री।
उशना ॥ ४० ॥ २३ ॥ ५ ॥ वत्सोमरुद्गायत्री।
यमग्निः ॥ ४१ ॥ २६ ॥ ४ ॥ इरिम्बिटिरग्निरुष्णिक्।
मित्रावरुणवन्ता ॥ ४३ ॥ १६ ॥ १ ॥ तद्वत्।
समिधाग्निं ॥ ४३ ॥ ३६ ॥ १ ॥ विरूपोग्निर्गायत्री।
अग्निर्मूर्द्धा ॥ ४३ ॥ ३८ ॥ १ ॥ विरूपोग्निर्गायत्री।
अग्निः शुचिः ॥ ४३ ॥ ३९ ॥ १ ॥ विरूपोग्निर्गायत्री।
तदग्नाया ॥ ४४ ॥ १० ॥ ३ ॥ हविर्द्धानाग्निस्त्रिष्टुप्।
त्वमित्सप्रथ ॥ ४४ ॥ १४ ॥ ५ ॥ भर्गोग्निर्बृहती।
यत इन्द्र भयामहे ॥ ४४ ॥ २० ॥ ३ ॥ भर्ग इन्द्रःप्रगाथम्
अस्मैरुद्रा ॥ ४४ ॥ २५ ॥ ६ ॥ प्रगाथ इन्द्र स्त्रिष्टुप्।
त्यान्नुचत्रियाअ ॥ ४४ ॥ ३३ ॥ १ ॥ मत्स्यस्सांमद आदित्या गायत्री।
सुदेवो असि ॥ ४५ ॥ ७ ॥ २ ॥ पृथुमेधावरुणोनुष्टुप्।
आतून इन्द्रा ॥ ४५ ॥ ३१ ॥ १ ॥ कुसीदीकाण्वः। इन्द्रो गायत्री।
आनोविश्वासुहव्यः ॥ ४६ ॥ १३ ॥ १ ॥ सुकक्ष इन्द्रो गायत्री।
त्वन्दाता ॥ ४६ ॥ १३ ॥ २ ॥ सुकक्षं इन्द्रो गायत्री।
योविश्वा ॥ ४७ ॥ १४ ॥ १ ॥ सौभरिरग्निर्बृहती।

योजिनाति ॥ ४९ ॥ १२ ॥ ४ ॥ अवत्सारः सोमः पवमानो गायत्री।

तरत् समन्दी ॥ ४९ ॥ १४ ॥ १ ॥ अयास्यः सोमो गायत्री।

यन्मे गर्भे ॥ ४९ ॥ १३ ॥ १ ॥ भृगुः सोमस्त्रिष्टुप्।

उच्चातिजातं ॥ ४९ ॥ १९ ॥ ५ ॥ अमहीयः सोमः पवमानो गायत्री।

अग्न आयूंषी ॥ ५० ॥ १० ॥ ४ ॥ वैखानसोग्नि र्गायत्री।

श्रियेजातः ॥५२॥४॥४॥ कण्वः सोमः पवमानस्त्रिष्टुप्।

इन्द्रायेन्दो ॥५२॥८॥३॥ कश्यपः सोमः पवमानो गायत्री।

त्राणाग्निशुः ॥ ५३ ॥ ४ ॥ १ ॥ त्वनु इन्द्र उष्णिक्।

पुनानः सोमधारया ॥ ५१ ॥ १२ ॥ ४ ॥ सप्तर्षयः सोमः पवमानो वृहती।

आपोहिष्ठा ॥ ५४ ॥ ५ ॥ १ ॥ सिन्धु द्वीप आपो गायत्री।

शन्नोदेवी ॥ ५४ ॥ ५ ॥ ४ ॥ तद्वत्।

इदमापः ॥ ५४ ॥ ८ ॥ सिन्धुद्वीप आपोनुष्टुप्।

यमस्यमायम्या ॥ ५४ ॥ ७ ॥ २ ॥ यमीयमः पंक्ती।

यमायसोमं ॥ ५४ ॥ १६ ॥ ३ ॥ यमीयमोऽनुष्टुप्।

यमायमधु ॥ ५४ ॥ १६ ॥ ५। तद्वत्।

आपो अस्मान् ॥ ५४ ॥ २५ ॥ ५ ॥ देवत्रवा। आपस्त्रिष्टुप्।

आनिवर्त्तनिवर्त्तय ॥ ५७ ॥ १ ॥ ६ ॥ पवमानो भार्गवः सोम आस्तारः पंक्तिः।

आम ॥ ५७ ॥ २६ ॥ ५ ॥ गर्ग इन्द्रास्त्रिष्टुप्।

सर्व्वे नन्दन्ति ॥ ५८ ॥ २४ ॥ ५ ॥ वृहस्पतिर्ज्ञानं त्रिष्टुप्।

वसूनां॥५८॥५॥१॥गौरवीतिरिन्द्रस्त्रिष्टुप्।

इमं मे गङ्गे॥५८॥६॥५॥पृथमेधानद्यो जगती।

विश्वतश्चचुः॥५८॥१६॥३॥विश्वकर्म्मा त्रिष्टुप्।

नवोनवो॥५८॥२३॥४॥विप्रचित्ती चन्द्रमा स्त्रिष्टुप्।

पुनःपत्नी॥५८॥२७॥४॥सूर्य्यात्मा अनुष्टुप्।

इहैवस्तं॥५८॥२८॥२॥साविची सूर्य्योनुष्टुप्।

इमान्त्वां॥५८॥३०॥५॥साविची आत्मानुष्टुप्।

रचोहणं॥६०॥५॥१॥पायुरग्नि स्त्रिष्टुप्।

चतस्त्रोअन्त्य अनुष्टुभः। सम्बाहुभ्यां॥६०॥१६॥२॥ विश्वकर्म्मा त्रिष्टुप्।

सहस्रशीर्षा॥६१॥७॥१॥नारायणः पुरुषोनुष्टुप् अन्त्या त्रिष्टुप्।

या ओषधी॥६१॥८॥१॥अथर्वणोभिषगोषधयोऽनुष्टुप्।

अश्वत्थे वो॥६१॥८॥५॥तद्वत्।

उद्बुध्यध्वं॥१६॥१७॥१॥बुधोबुध स्त्रिष्टुप्।

आयुः शिशानो॥६१॥२०॥१॥ऐन्द्रो प्रतिरथ इन्द्र स्त्रिष्टुप्।

बृहस्पते गृत्समदो॥६५॥२२॥४॥बृहस्पतिर्जगती।

इन्द्र आसां॥६१॥२३॥५॥अप्रतिरथं इन्द्र स्त्रिष्टुप्।

अस्माकं॥६१॥२४॥५॥तद्वत्।

अद्धादिन्द्रा॥६२॥२१॥३॥काश्यप इन्द्र स्त्रिष्टुप्।

हिरण्य गर्भ॥६३॥३॥१॥प्रजापतिरिन्द्रस्त्रिष्टुप्।

नाके सुपर्णं॥६१॥८॥१॥वेनोवेन स्त्रिष्टुप्।

रात्री व्यख्यदा ॥ ६३ ॥ १४ ॥ १ ॥ कुशिको रात्रीर्गायत्री ।

ममाग्नेवर्च्चः ॥ ६३ ॥ १५ ॥ १ विहव्यो वैश्वदेवस्त्रिष्टुप् ।

त्रायन्तां ॥ ६३ ॥ २५ ॥ ५ ॥ वशिष्ठो विश्वेदेवा स्त्रिष्टुप् ।

सवोरीजानं ॥ ६३ ॥ २८ ॥ ८ ॥ अग्निस्तापसाविश्वेदेवा अनुष्टुप् ।

उत्तानपर्णे ॥ ६४ ॥ ३ ॥ २ ॥ इन्द्राणी उपनिषदनुष्टुप् ।

स्वस्तिदाविशस्पति ॥ ६४ ॥ १८ ॥ २ ॥ शास इन्द्रोनुष्टुप् ।

सहस्राक्षेण ॥ ६४ ॥ १९ ॥ ३ ॥ यक्ष्मनाश इन्द्रस्त्रिष्टुप् ।

शतं जीव ॥ ६४ ॥ १९ ॥ ४ ॥ तद्वत् ।

अक्षिभ्यां ॥ ६४ ॥ २१ ॥ ११ ॥ कश्यपो यक्ष्मानुष्टुप् ।

अङ्गादङ्गात् ॥ ६४ ॥ २१ ॥ ६ ॥ तद्वत् ।

देवाः कपोतः ॥ ६४ ॥ २३ ॥ १ ॥ कपोतइन्द्रस्त्रिष्टुप् ।

विभ्राड् ॥ ६४ ॥ २८ ॥ १ ॥ भार्गवः सूर्यो जगती ।

अन्वाहार्षं ॥ ६४ ॥ ३१ ॥ १ ॥ ध्रुवा राजानुष्टुप् ।

ध्रुवाद्यौः ॥ ६४ ॥ ३१ ॥ ४ ॥ तद्वत् ।

अभावर्त्तन ॥ ६४ ॥ ३२ ॥ ५ ॥ श्रुतिदत्तं इन्द्रोनुष्टुप् ।

आपङ्गोः ॥ ६४ ॥ ४८ ॥ १ ॥ सार्पिरग्निः सर्पागायत्री ।

नमो ब्रह्मणे ॥ ६४ ॥ ४८ ॥ ० ॥ वामदेवो लिङ्गोक्तास्त्रिष्टुप् ।

अथ यजुर्व्वेदमन्त्राणाम् ।

इषेत्वा ॥ १ ॥ १ प्रजापतिः शाखानुष्टुप् ।

कुक्कुटोसि प्रजापतिर्व्वाक ।

भूरसि ॥ १ ॥ २ ॥ ४ ॥ प्रजापतिर्व्वाक ।

अत्युष्टं रक्षः॥ १०॥ १॥ प्रजापती रक्षः।

अतिम्रितोसि॥ १॥ ९०॥ १०॥ प्रजापतिः श्रुवः।

सवितुर्वः॥ १॥ २॥ ३॥ प्रजापति रायः।

कुरुविष्णो॥ २॥ ६॥ ८॥ वृहती विष्णुः।

चित्रावसोः॥ ३। ३॥ १०॥ ऋषयो रात्रिः।

एष ते रुद्रभागः॥ ३॥ ८॥ १॥ प्रजापतीरुद्रः।

इमाआपः॥ ४॥ १॥ २॥ प्रजापतिरापः।

अभित्यं देवं॥ ४॥ ८॥ ३॥ प्रजापतिः सविता।

वरुणस्योत्तम्भनमसि॥ ४॥ १०॥ ९॥ प्रजापतिर्वरुणः।

विष्णोरराटं॥ ५॥ ५॥ ९॥ प्रजापति र्विष्णुः।

उद्दिवंस्तः॥ ५॥ ७॥ २॥ प्रजापति रौदुम्बरी।

अपन्नो अग्निः॥ ५॥ ९॥ ३॥ प्रजापतिरग्निस्त्रिष्टुप्।

देवस्यत्वा॥ ६॥ १॥ १ प्रजापतिः लिङ्गोक्ता।

सुमित्रयान॥ ३॥ ५॥ ४॥ प्रजापतिरापः।

कार्षिरसि॥ ६॥ ७॥ ६॥ प्रजापतिरब्धोऽनुष्टुप्।

नमोस्तुसर्पेभ्यः॥ १४॥ १॥ ६॥ अश्विनौ नरुक्माकृतिः।

ब्रह्मयज्ञानं॥ १४॥ १॥ २॥ अश्विनावादित्य स्त्रिष्टुप्।

शुक्रज्योतिः॥ १८॥ ७॥ १॥ परमेष्ठी मरुतनुष्णिक्।

सूर्य्यस्था। परमेष्ठी प्रजापतिः सूर्य्यः। व्याहृतीनां परमेष्ठी प्रजापतिः। अग्नि वायुः सूर्य्य प्रजापतयः। उपप्रयन्तो वृहद्देवाग्निर्गायत्री। तनूया अग्ने वृहद्देवाग्निर्गायत्री। एष ते रुद्रभाग इतिद्वयोर्यजुषोः प्रजापतीरुद्रः प्रथमस्य वृहती साम पंक्तिर्व्वा। द्वितीयस्य यजुर्वृहती। अदस्विनत्वा परमेष्ठी प्रजा-

पति राज्यं । भेषजमसि प्रजापती । रुद्रः ककुप् । अम्बक-मिति द्वयोः प्रथमायाः वशिष्ठः द्वितीयायाः प्रजापतिरुभयोः रुद्रोऽनुष्टुप् । आकूत्यै, प्रयुजे, मेधायै । दीक्षायै, सरस्वत्यै । इत्येतेषां चतुर्णां मौञ्जभणानां प्रजापतिरग्निरासुरात्रिष्टुप् । यजुः पंक्तिर्वा । चिदसि मनासीत्यप्रजापतिः सोमक्रयणी गौः ब्राह्मी पंक्तिरतिशक्करी वा । अग्नेस्तनुपपरमेष्ठी प्रजा-पतिर्हविः । देवो वा विष्णुः प्रजापतिर्विष्णुरनुष्टुप् । विष्णो-र्नुकं । दिवो वा । प्रतद्विष्णुः । इतितिसृणां प्रजापतिर्विष्णु स्त्रिष्टुप् । आद्ये यजुरन्ते । विष्णोरराटमिति पञ्चयजुषां प्रजा-पतिर्विष्णुराद्यस्यदैवी जगती । ततश्चतुर्णां दैवी पंक्तिः । अग्ने-व्रतपा प्रजापतिरग्निर्ब्रह्मा त्रिष्टुप् । अयन्नःप्रजापतिरग्नि-र्यजुस्त्रिष्टुप् । इदमापः प्रजापतिरापोमहापंक्तिस्त्रिष्टुबव-साना पावमानश्चान्त्यः पादः । देवास्त्वशुक्रपा । देवास्त्वा मन्थिपा, इत्यनयोः प्रजापतिः क्रमेण शुक्रमन्थिनौ हविर्धानोऽग्नि र्यजुःपंक्ती । आदित्ययाकुवत्यै । मनुः सती बृहती । युञ्जा हिकेशिनेति मधुच्छन्दा इन्द्रोऽनुष्टुप् । अग्नेपवस्व वैखानसोऽ-ग्निर्गायत्री । उदुत्यञ्जातवेदसमिति देवाः सूर्योगायत्री । उदुत्यमस्कण्वः सूर्योगायत्री । चित्रन्देवानां कुत्स आङ्गि-रसः सूर्य्यस्त्रिष्टुप् । चत्वारि शृङ्गापरमेष्ठी यज्ञपुरुषस्त्रिष्टुप् देवायज्ञं प्रजापतिः सरस्वत्यः लिङ्गोक्तानुष्टुप् । पितृभ्यःप्रजा-पत्यः सरस्वत्यः पितरः । वसेन क्रतुना प्रजापतिः सरस्वती लिङ्गोक्तानुष्टुप् । सेना प्रजापतिरनुष्टुप् । अग्नयेऽम्निसपतये*

---

* ग्नसपतये इति पुस्तकान्तरे पाठः ।

दक्षिणाग्निरासुरीपंक्तिः अग्नेयत्तेशुक्रमित्यस्य प्रजापतिर-ग्निर्गायत्री। सुपर्णोसि गरुत्माऽनित्यस्य प्रजापतिर्गरुत्मान् कृतिः। द्रुपदादिवेति*। कोकिलोराजपुत्रोवा द्रुपदो वा आपो अनुष्टुप्। शतवन्तः आथर्वणओषधीरनुष्टुप्। याओषधीरित्या-द्यानां योअस्मैभिद्रासतीत्यन्तानां सप्तविंशतीनां आथर्वणपुत्रोभि-षगोषधीरापोऽनुष्टुप्। अश्वावतीर्गोमती: वशिष्ठउषास्त्रिष्टुप्। सीरा युञ्जन्तिभ्यः प्रजापतिः सापिरग्निः प्रजापतिरनुष्टुप्। कृणु-ष्वपाजइतिपञ्चानां देवा वामदेवोऽग्निस्त्रिष्टुप्। काण्डात् काण्डादिति द्वयोरग्निरिष्टिका अनुष्टुप्। अपाङ्म्भन् प्रजापति-र्वरुणः पंक्तिः। इमं माहिंसीरितिपञ्चर्चां†प्रजापतिरग्निस्त्रि-ष्टुप्। अपाला ओषधीरापोग्निरनुष्टुप्। नमस्तेरुद्रमन्यवइति रुद्राध्यायस्य प्रजापतिर्व्वामदेवा वा ऋषयः॥ आद्योऽनुवाकः षोडशर्चोरुद्रदैवतः। प्रथमा गायत्री। ततीयातेरुद्र इत्याद्यास्ति-स्रोऽनुष्टुभः। असौयस्ताम्रइत्याद्यास्तिस्रः पंक्तयः। नमोस्तु-नीलग्रीवायेत्याद्याः सप्तानुष्टुभः। तत इति द्वे जगती। मनोमन्तं मानस्तोके इतिद्वयोः कुत्सोऽन्यत्पूर्व्ववत्। द्रापेअन्धसस्पत इत्यन्तानुवाके सप्तऋचः। तत्राद्या उपरिष्टाद्बृहती द्वितीयाया कुत्सर्षि दृष्टा जगती। तृतीयाऽनुष्टुप्। परितोरुद्रस्य। मीढुष्ट मेति द्वे त्रिष्टुभौ। ततोद्वे अनुष्टुभौ असङ्ख्याताः सहस्राणि-त्याद्याः य एतावन्तइत्यन्ताः दशावतानसंज्ञका मन्त्राः बहुरुद्र दैवत्याः अनुष्टुप्छन्दस्काः। ततोन्याभिनमोस्तुरुद्रेभ्योयेदिवी

* इमं माहिंसीरिति पुस्तकान्तरे पाठः।

† दृपदादिवेः पुस्तकान्तरे पाठः।

ति त्रीणियजूंषि प्रत्यवरोहसंज्ञकानि बहुरुद्रदैवतानि इति छन्दस्कानि। आद्यान्त्यानुवाकयोर्मध्ये । नमोहिरण्यबाहव इत्यादीनि नमश्चानिर्हतेभ्य इत्यन्तानि सर्व्वाणि यजूंषि। तेषां सर्व्वेषान्तिस्रोगीतयो देवताः। तेषां मध्ये । नमो हिरण्यबाहवेसेनान्ये दिशाञ्च पतये नम इत्यादि । नमः एभ्यः श्व पतिभ्यश्च वो नम इत्यन्ता मन्त्राः उभयतो नमस्काराः । नमो भवायेत्यादयो नम आखिदते च प्रखिदतेचेत्यन्ताः अन्यतरतो नमस्काराः । नमः सभाभ्य इत्यादयो जातसंज्ञकाः रुद्राः । नमो वः किरिकेभ्य इत्याद्यास्तस्रोव्याहृतिसंज्ञकाः बहुरुद्रदैवता अग्नि, वायु सूर्य्य, हृदयभूताः । आशुशिशान इति पञ्चानां देवा वैश्वानरोऽग्निर्जगती। अपांफेन। प्रजापतिः सरस्वत्योऽग्निर्गायत्री अग्निश्च पृथिवी च आदित्योग्निः। ब्रह्मजज्ञानं प्रजापतिरादित्य स्त्रिष्टुप् कयानश्चित्रावामदेव इन्द्रोजगती। संवत्सरोसि प्रजा पतिः प्रजापतिर्गायत्री । अहिरिवभोगैः प्रजापतिर्हविस्त्रि- ष्टुप्। बह्वीनां प्रजापतिर्लिङ्गोक्ता त्रिष्टुप्। युञ्जन्तिब्रध्नं मधुछन्दा आदित्यो गायत्री। यमेन दत्तं भार्गवो जमदग्नि- र्दीर्घतमास्त्रिष्टुप्। आकृष्णेन हिरण्यस्तूपः । सविता त्रिष्टुप्। आनोमित्रावरुणा गृत्समदो मित्रावरुणौ गायत्री । यज्जाग्रत इति पञ्चानां षण्णां। शिवसङ्कल्पमनस्त्रिष्टुप्। पञ्चनद्यः गृत्समदो मित्रावरुणौ गायत्री। उभापिबन्तः प्रस्कण्वाश्विनौ गायत्री । यदाबध्नन्दचोहिरण्यं त्रिष्टुप्। इमं देवेभ्यः सङ्कुशिको मृत्युस्त्रिष्टुप्। यनोमो भरद्वाजः विदि- श्चिरिन्द्रस्त्रिष्टुप्। मनोमित्रः दध्यङाथर्वणो लिङ्गोक्ताऽनु-

ष्टुप्। मनसः कामं दध्यङ्ङाथर्वणः श्रीरनुष्टुप्। गणाना-न्त्वेति चतुर्णां यजुषां प्रजापतिर्लिङ्गोक्ताऽनुष्टुप्। समास्त्वा अग्निरग्निरनुष्टुप्। शन्नोदेवी दध्यङ्ङाथर्वण आपो गायत्री। एकाचमे। देवाअग्निर्जगती। उदुत्तमं शुनःशेफो वरुण स्त्रिष्टुप्। वनस्पते वीड्वङ्गोप्रजापतिर्वनस्पतिस्त्रिष्टुप्। भद्रंकर्णेभिस्तिसृणां गौतमोविश्वेदेवास्त्रिष्टुप्। शन्नो शन्नोमित्रः दीर्घतमा इन्द्राग्निस्त्रिष्टुप्। देवकृतस्येति षणां प्रजापतिरग्निस्त्रिष्टुप्। मानस्तोकेसङ्कुशिको रुद्रोजगती। तद्विष्णोः मेधातिथिर्विष्णुर्गायत्री। कातेः। प्रजापतिः काम स्त्रिष्टुप्। नमः सम्भवायेत्यादीनां नमो वाकिरेभ्य इत्यन्तानां ऋचां* परमेष्ठी रुद्रस्त्रिष्टुप्। आनो नियुद्भि स्त्यृचां† रुद्र स्त्रिष्टुप्। त्रातारमिन्द्रं प्रजापतिरिन्द्रस्त्रिष्टुप्। वृहस्पते अप्रतिरथइन्द्रस्त्रिष्टुप्। वय्यंसोमबन्धुः सोमोगायत्री। तमीशानं गौतमो विश्वे देवा गायत्री। स्योनापृथिवी मेधा तिथिः पृथिवी गायत्री। वरुणस्योत्तम्भनमसि प्रजापतिर्व-रुणः। समुद्रायत्वा। दध्यंङाथर्वणोवाताः। पुनन्तुमा-न्देवाः प्रजापतिः। अदितिर्द्यौः गौतमो विश्वेदेवा स्त्रिष्टुप्। पितुन्नुस्तोषं। अगस्त्योन्नउष्णिक्। स नःपितेव। विश्वामित्री मधुच्छन्दोग्निर्गायत्री। विश्वे देवा स आगतः। गृत्समदो विश्वे देवा गायत्री। विश्वतश्चक्षुर्विश्वकर्म्मा भौवनो विश्वकर्म्मा त्रिष्टुप्। यवोऽसि। प्रजापतिर्यवः। सोमउष्णिक्। तेजोसि पर-

* प्राणामिति पुस्तकान्तरे पाठः।

† स्त्रियां इति क्वचित् पाठः।

मेष्ठी प्रजापतिः। देवा वा। प्रजापतिर्व्वा आज्यं वापि देवा सोममोव्राताः वाक्यानां पानौ आयुष्यं वर्चस्यमिति तिसृणां दृचो हिरण्यं क्रमेणोष्णिक् ग्रक्करस्त्रिष्टुप्। तं यज्ञं नारायणः पुरुषः पुरुषोऽनुष्टुप्। सप्तऋषय इत्यध्यात्मवादिनी जगती। उपवह्वरे गिरीणां* वत्सोऽग्निर्गायत्री। ग्रन्नइन्द्राग्नी दध्यङ्ङाथर्वणलिङ्गोक्ता त्रिष्टुप्। इन्द्रोविश्वामधुच्छन्दा इन्द्रोऽनुष्टुप्। अभित्यन्देवं प्रजापतिः सविता अष्टिरग्निर्गायत्री। ध्रुवास्मि प्रजापतिरौदुम्बरी। अग्निन्दूतं विरूपोऽग्निर्गायत्री। ऋचं वाचं दध्यङ्ङाथर्वणः लिङ्गोक्ता। इशावास्यन्दध्यङ्ङाथर्वणः आत्मा अनुष्टुप्। सप्तते अग्ने सप्तर्षिऽग्निस्त्रिष्टुप्। यदक्रन्द इति त्रयोदशानां भार्गवोजमदग्निरश्वस्त्रिष्टुप्। आब्रह्मन् प्रजापतिर्ब्राह्मा यजुः। सजोषसा इन्द्र विश्वामित्र इन्द्रस्त्रिष्टुप्। कार्षिरसि अथर्वा ज्योतिरनुष्टुप्। चित्रावसोः स्वस्तिति ऋषयो रात्रिः। उद्दिवं प्रजापतिरौदुम्बरी। शंयुर्वार्हत इन्द्रोनुष्टुप्। आयङ्गौः सर्व्विरपिः परापररूपेण सर्पा गायत्री। सुमित्रियानः प्रजापतिरापः। उर्मित्रियानस्तथा। पृथिवी देव यजनं परमेष्ठी प्रजापतिः देवा वा प्रजापतिर्व्वा। वेदिर्विश्वकर्म्मा विमनाविश्वकर्म्मा त्रिष्टुप्। सुत्रामाणङ्गयस्तात अदितिः त्रिष्टुप्। अहं पितॄन् शङ्खः पितरस्त्रिष्टुप्। नमोस्तु नीलग्रीवाय परमेष्ठी रुद्रोऽनुष्टुप्। परितोर्ण† रुद्रस्य परमेष्ठी रुद्रस्त्रिष्टुप्। विकिरिद्विलोहितः परमेष्ठी रुद्रा-

---

* उपकरे वीणामिति क्वचित् पाठः।

† परिणो रुद्रस्येति क्वचित् पाठः।

ऽनुष्टुप्। उपप्रागाद्दीर्घतमाश्चस्त्रिष्टुप्। इन्द्रः सुत्रामाः प्राजापत्याश्विसरस्वतीरुद्रोजगती युञ्जतइत्यनुवाकस्य। श्यावाश्वः सावित्री वायुर्जगती। इदं विष्णुर्मेधातिथिर्वैष्णवी। गायत्री। इरावती वाशिष्ठी विष्णुस्त्रिष्टुप्। देव श्रुतावत्र धरौ प्राचीस्यक्त्रिष्टमत्र हविःस्थाने। विष्णोर्नुकमिति तिस्रो वैष्णव्यस्त्रिष्टुभः।

अथ कुष्माण्डमन्त्राः।

यद्देवास्ति,यदि दिवा। यदिजाग्रदिति तिसृणां प्रजापतिर्ऋषिः क्रमेणाग्निर्वायु सूर्य्यादेवताः सर्व्वासामनुष्टुप्। यद्ग्रामे इत्येतद्यजुर्लिङ्गोक्तदैवतं समुद्रेते द्विपदा विराड्दैवी। द्रुपदादिव। प्रजापतिरापोनुष्टुप्। उद्वयन्तमिति प्रस्कण्वः सूर्य्योऽनुष्टुप्। आपो अद्यन्नचारिषमिति प्रजापतिरग्निः पंक्तिः। एधोसि। समिदसीत्येते। अग्निदैवते यजुषी। समाववर्त्तीत्यस्याः अग्निरभिरुक्ता गायत्री। वैश्वानर ज्योतिरिति वैश्वानरं यजुः। अभ्यादधामीतितृचस्य। आश्वतराश्विरग्निरनुष्टुप्। अंशुना। इत्यस्याः सूर्य्योऽनुष्टुप। सिञ्चति परिषिञ्चतीत्यस्याः सूर्य्य इन्द्रोवा अनुष्टुप्। धानावन्तमित्यस्या विश्वामित्र इन्द्रो गायत्री। वृहदिन्द्राय नृमेध पुरुमेधसाविन्द्रो वृहती। नये मायावकानः सरस्वतीत्यस्य तृचस्य मधुच्छन्दाः सरस्वतीगायत्री। आमन्द्रोर्विश्वामित्र इन्द्रो वृहती। आनो विश्वासुहव्यं श्यावाश्व इन्द्रो वृहती। प्रसेनानीः सकुश्रस्कन्धः स्कन्दस्त्रिष्टुप्। पवित्रन्तइति द्वयोरक्षपृष्ठस्कन्धो जगती। एषा स्कन्धसंहिता नाम। यद्वा

उपविशति अगस्त्योऽग्निर्गायत्री । सनादग्ने शुतिर्यातुधानो गायत्री अच्चन्नमीमदन्तः यम इन्द्रः पञ्चपदा पंक्तिः । अविघृष्ठःशंयु वरुण स्त्रिष्टुप् अक्रात् समुद्रः वैखानसः सोमस्त्रिष्टुप् । कनिक्रन्त इति द्वयोः सोमः स्वधा त्रिष्टुप् । एषामितरा नाम संहिता । ये ते पन्था अजितस्य जित्यन्ता गायत्री । एतोन्विन्द्रग्रुद्विय इन्द्रो विराट् । शुक्रन्ते अन्यत् । पूषाग्निस्त्रिष्टुप् महतत्सोमा वशिष्ठः पवमानस्त्रिष्टुप । अग्निस्तिअग्निनेति वामदेवाग्निर्गायत्री । परितोषिञ्चता सुतमच्छिद्रः सोमो बृहती पवस्वसोमेति धर्म इन्द्रोत्तरपंक्तिः । चक्रं यदस्य भारद्वाज इन्द्रो बृहती । घृतवतीति वरुणो द्यावा पृथिव्यावविर्जगती । अद्यानो देवसवितः सउच्च सविता गायत्री । त्रातारमिन्द्रं मैत्रइन्द्रो बृहती । महित्रीणां पष्ठोह इन्द्रो गायत्री । विश्वामित्रस्य बृहदिन्द्राय बृहती । यो भूतानामित्यस्याः नारायणीयकौण्डिन्य ऋषिः रुतत्चमाण ब्रंह्मो देयता पंक्तिः छन्द आत्मप्रवादरूपेयं प्राणायामे । अग्निन क्षतस्येति द्वे अनुष्टुप् परास्ताबृहत्यो लिङ्गोक्तदैवत्ये । समिद्ध इन्द्र इत्येकादशानामाप्री संज्ञकानामाङ्गिरसऋषिः क्रमेण । इन्धास्तनूपात् । नाराशंसोईडो बर्हिर्द्वारउषसानक्ता दैव्या रातिस्त्रो देवीस्त्वष्टा वनस्पतिः स्वाहा क्षतय इत्येता देवताः अत्र उरूप्रथाः प्रथमानं व्यूहः । सुवीरावीरं द्वादशकः । अच्छिन्नं द्वादशकः ।

इति यजुर्विधानं ।

अथ साम्नां ऋषि दैवत छन्दांसि ।

इदं विष्णुः प्रच्छकस्य विष्णोः प्रकाव्य मुशनेव भूवाणा इति वागहृभं पुरुष व्रतेचैषा वैष्णवी नाम। तत्र इदं विष्णुः प्रजापतिर्गायत्री। त्वचस्यं विष्णो विष्णुर्विष्णुर्जगती। प्रकाव्यमुशनेव भ्रुवाणः वरोहे विष्णुस्त्रिष्टुप्। पुरुष व्रते पुरुषौ नारायणोऽनुष्टुप्। इदं ओं ह्यत्वोजसेति प्रथमे तेन यो मधुच्छन्दा इन्द्रो गायत्री। सप्तव्योमघोनां मधुच्छन्दाः विमेदेवा अनुष्टुप् पुरासिन्धुर्नुवा कवि दुःमरुत इन्द्रोऽनुष्टुप्। उपचेम मधुमती चिपन्तः मधुच्छन्दा इन्द्रो द्विपदा विराट। तवस्व सोमं। मधुच्छन्दाः पवमानस्त्रिष्टुप्। सुरूपकृत्नु मधुच्छन्दा गायत्री। उदुत्तमं वरुणपाशमिति गौतमो वरुणोऽनुष्टुप्। शुक्रं चन्द्रो शुक्रश्चन्द्रमाः गायत्री। शुद्धाशुद्धा शुद्धीय इन्द्रोऽनुष्टुप्। नृत सूक्तस्वः अग्निः श्येनस्त्रिष्टुप्। इन्द्रस्त्रिधातु इन्द्रे इन्द्रो बृहती। विश्वा पृतना त्रिशाक इन्द्रो जगती। सोमं राजानं बृहस्पतिरग्नया, दित्य वरुण विष्णवः। चरुषणी घृतं वार्हत्वः सर्पं प्रसर्पं उत्सर्पा जगती। समिन्धायन्ति जनिधानं अयां गर्भं आपस्त्रिष्टुप्। इन्द्राहो नृपमग्निर्गायत्री। सन्ते पयांसि सोम व्रते सोमः सोमस्त्रिष्टुप्। सोमव्रतेऽपि देवव्रते ऋषिव्रते रुद्रः। तृतीये विश्वेदेवा। यज्ञपदिन्द्रोऽनग्रदने नेति पूषा पूषा गायत्री। भगो न चित्रेति सान्तनिक अग्निर्व्विराट। सामद्वयेऽपि। इममिन्द्रेति वर्गद्वयस्य वशिष्ठ इन्द्रोऽनुष्टुप्। परिप्रिया कविरिति। अर्णापवः कवि गायत्री। रथन्तरे वशिष्ठः। ईशान इन्द्रो बृहती। वामदेव्ये वामदेवः सर्व्वदेवा गायत्री। यशः समेति। यशा इन्द्रोबृहती। इन्द्रमिहासिनः काण्वइन्द्रोबृहती।

रथन्तरं पूर्व्ववत् गीर्वाणा पाहि नः सुत मिति । हरिः श्री निं-
धनं इन्द्रो गायत्री । अत्राविश्वन्त्विन्दवः आश्रित इन्द्रो गायत्री
इन्द्रोहिमत् सिन्धवः पूषा इन्द्रो गायत्री । त्रायन्तीह त्रायन्ति ये
इन्द्रोवृहती । गव्येषु गोद्दये श्यावाश्व इन्द्रो गायत्री । इदं
मोघन्त्विति मधुच्छन्दा इन्द्रो गायत्री । भद्रानो अग्निराहुत
इति । गीतमो भग इन्द्रो गायत्री । वैरूप्याष्टके विरूप इन्द्रो-
वृहती । अत्राष्टके क्रमादृषयः । आद्ययोः शिखण्डी । तदुत्त-
रयोरतिः । तदुत्तरयोः महास्त्रवेतसः । तदुत्तरयोः शिरीषः ।
सर्व्वत्रेन्द्रोदेवता जगतीच्छन्दः । अग्ने विवस्वदुषसः इडिमाण्ड-
व्यो जातवेदाऽनुष्टुप् । एवस्पते सोम इन्द्रस्त्रिष्टुप् । त्रिरस्मैमरुतां
धन्वन्धेनवो जगतीस्त्वात्वाहिन्विति ॐसहस्र इति इन्द्रो यजुः ।
धानावन्तं करम्भिणमिति अभिषव इन्द्रो गायत्री वास्तोष्पते
इति प्रजापति र्वास्तुयजुः । अभ्रातृव्य इति अभ्रातृव्य इति
अभ्रातृव्य इन्द्रः ककुप् । वातआवातुभेषजं काश्यिनो वायुर्गायत्री
पञ्च निधानं वामदेव्यो वामदेव्यः । राहुर्गायत्री । असित्वा
पूर्व्वपीतय इति । वषट्कारः प्रजापतिरिन्द्रो वृहती । अभि
त्वाशूरनोनुमरहस्येन हिशब्देन अजिति इन्द्रो वृहती । इन्द्र
मिद्देवतातये क्रतुव इन्द्रो वृहती । गवाव्रते प्रजापतिर्गावस्त्रि-
ष्टुप् । पुरुष व्रते पुरुषोनारायणोऽनुष्टुप् । रात्रे व्रते प्रजापति
रात्रिरनुष्टुप् । इन्द्र सानसिंरोहितकुलाय इन्द्रो गायत्री ।
भारुण्डसामनि भारुण्डो जातवेदाग्निः जगती । गायत्रं सापो
ष्कलमाग्नेयगायत्री । रैवत कुम्भवरैवत इन्द्रो गायत्री । त्रिसुपर्णं
त्रिसुपर्णः सूर्य्यो गायत्री । महावैश्वानरव्रते वैश्वानरोऽग्नि

त्रिष्टुप्। मानिगेति मानिवषुः इन्द्रः नानाछन्दांसि। बृहत् सामनि भारद्वाज इन्द्रो बृहती।

इति सामविधानं।

अथ अथर्व्वमन्त्राणां ऋषि दैवतछन्दांसि॥

शान्तातीयगणस्य शान्तातीयाश्च इन्द्रः सर्व्वाणि छन्दांसि॥

भैषज्यगणस्य भैषज्यं आयुरुष्णिक्।

रौद्रगणस्य, ब्रह्मारौद्रः सर्व्वाणि छन्दांसि।

अथ दशगणः।

शान्तिगणस्य ब्रह्मा सोमोऽनुष्टुप्।

कृत्यादूषणगणस्य।

शुक्रः कृत्यादूषणः सर्व्वाणि छन्दांसि।

चातनगणस्य चातागणोऽग्निः सर्व्वाणि छन्दांसि।

मातृनामगणस्य मातृनामा ऋषिः मातृनामदेवता उष्णिक्छन्दः।

वास्तोष्पतिगणस्य।

ब्रह्माऋषिर्वास्तोष्पतिर्देवता सर्व्वाणि छन्दांसि।

पाप्मन गणस्य॥

ब्रह्मा ऋषिः पाप्महा देवता।

गायत्र्युष्णिक्। ककुदनुष्टुप्।

यक्ष्मनाशनगणस्य, मातृनामाऋषिः * यक्ष्मनाशनो देवता सर्व्वाणि छन्दांसि।

दुःस्वप्ननाशनगणस्य।

यमऋषिः दुःस्वप्ननाशनो देवता सर्व्वाणि छन्दांसि।

आयुष्यगणस्य, ब्रह्मा आयुर्गायत्र्यादि सप्तछन्दांसि।

सर्व्वस्यगणस्य, अथर्वा ऋषिः वृहस्पति र्देवता।

अनुष्टुप् वृहती पंक्तिरनुष्टुप्।

अष्टादश गणानां अथर्वाचन्द्रमाः सर्व्वाणि छन्दांसि।

शन्नो देवीसूक्तस्य सिन्धुद्दीप आपोगायत्री। हिरण्यवर्णाः शुचयः अथर्वाभ्युक्तस्त्रिष्टुप्।

अथर्व्वाणानुवाकादीनां अथर्वाचन्द्रः सर्व्वाणि छन्दांसि।

याओषधीः, ब्रह्मा वृहस्पतिरनुष्टुप्।

ममाग्ने वर्च्च इत्यादीनां चतुर्दशानां कुवेरस्त्रिष्टुप्।

नदीपं त्वप्सरोबादरायणीरप्सरोजगती।

सोदक्रामन्त्वादेवानां अपरिव्रत इन्द्रोतिच्छन्दाः॥

सुपर्णोसि सौपर्णोगरुत्मानानुष्टुप्।

इन्द्रजीववेति हृदयसूक्तस्य ब्रह्मा इन्द्रो गायत्री।

यत्त्वं मृत्युरभ्यतृस्व वृहस्पतिः मृत्युरनुष्टुप्।

मातृनामगणः सुपर्णस्त्वागरुत्मानानुष्टुप्।

यथेदंभूम्यश्मोतिसूक्तम्।

अथर्व्वाभूमिः पंक्तिः पृथिव्यामग्ने, अग्निः पृथिव्यन्तरिचं

* यविनामेति क्वचित् पाठः।

द्यौश्चन्द्रमसो देवताः पङ्क्त्यतिजगतीछन्दः। उत्तमोऽसीति मन्त्रस्य प्रतिसर इन्द्रो विष्णुः। सविताग्न्द्रौ अग्निः प्रजापति देवता आद्या पंक्तिः तदुत्तराणां सप्तानामनुष्टुप्।

उदुम्बरेति, मणिनेति, सूक्तम्।

ब्रह्मा कुवेरः पञ्चमादीनां त्रयाणां त्रिष्टुप्।

शेषाणां त्रयोदशानामनुष्टुप्।

योनस्त्वइति ब्रह्मा ईश्वर अनुष्टुप्।

इन्द्रेण वृत्तमिति।

वरुण इन्द्रस्त्रिष्टुप्। हिरण्यवर्णाः शुचयः पावकाः ब्रह्मा आपस्त्रिष्टुप्॥

इयं वेदिरिति ब्रह्मा इन्द्रस्त्रिष्टुप्।

अभितव्यमे तातस्य अथर्वा आपः पंक्तिः।

सरस्वतीव्रतेषुते इति सूक्तं।

ब्रह्मासरस्वती अनुष्टुप्।

सौरसामानि विषासहि सहमानमित्यादीनिआथर्व्वण आदित्याजगती।

पिशाचक्षयो गमक्षियातनः पिशाचक्षगौ गायत्री।

यमस्य लोकादध्या, ब्रह्मा यमस्त्रिष्टुप्।

अग्निर्वैशनायदवाय अग्निरिन्द्रस्त्रिष्टुप्।

ऊर्ध्वो भवेत् अग्नि कृत्या प्रतिहरणोऽनुष्टुप्।

इन्द्र वय वाणिजं अथर्व्वा ईशानस्त्रिष्टुप्।

कामोमेराजन्त्विति, ब्रह्मा, कामस्त्रिष्टुप् ।

भद्रायकर्णंभद्रव्येति कौशिकाश्विनावनुष्टुप् ।

तुभ्यमेव जनिमन्त्विति शंयुर्जरिमा त्रिष्टुप् ।

आयातु मित्र इति ।

मित्रावरुणावापोऽग्नय स्त्रिष्टुप् । आशानामाशापालेभ्यः, वाचस्पतिराशापाला अनुष्टुप् । इदञ्जनासो विदथ ब्रह्मा द्यावापृथिव्यावनुष्टुप् । अग्नेगोभिरित्येतत् ब्रह्मा अग्नि स्त्रिष्टुप् । शान्ता द्यौरितिसूक्तस्य ब्रह्मा पृथिव्यन्तरिक्षं दिवोऽनुष्टुप् । अयन्तेयोनिर्ऋत्विजः अथर्वाग्निरनुष्टुप् । विविधानश्चेति अथर्व्वाग्नि स्त्रिष्टुप् । ध्रुवंध्रुवेणेति अथर्व्वा सोमनं अनुष्टुप् । अधुते राजन्निति, चतसृणां अथर्व्वं एक स्त्रिष्टुप् । ययो देवीष्विति ब्रह्मा शास्त्रानुष्टुप् युनक्तिसीरा वियुगा । अथर्व्वा सीता त्रिष्टुप् । सुयवसादिति अथर्व्वा ब्रह्मा त्रिष्टुप् । यदाग्रइति वाक्देवता एकवर्चं अग्निरनुष्टुप् । अर्हते भग इत्येतत् अथर्व्वा सीता* त्रिष्टुप् । एते पन्थाः पन्थां पन्था अतिजगती । अवितस्त्वइति । ब्रह्मा उन्मोचनः पंक्तिः । यो नस्त्वो अरणो अथर्व्वा ईश्वरस्त्रिष्टुप् । अहन्नहंन्निति षडर्च्चं इन्द्र स्त्रिष्टुप् । त्वमुत्तममिति अवर्व्वा सोमोऽनुष्टुप् । यथा यशश्चन्द्रमसि । वरुणश्चन्द्रमा जगती । आनोअग्निइति पतिवेदनः सोमस्त्रिष्टुप् । येन देहीति अयमपामर्य्यमा अथर्व्वा अर्य्यमानुष्टुप् । यत्पृथिव्यामनावृत्तं । कल्पमन्त्र । छन्दर्षि देवता नाह । शिवःशिवेभिरित्येत् ब्रह्मा शिवस्त्रिष्टुप् । कृत्या

* सूर्य्य इति पुस्तकान्तरे पाठः ।

दूषणे। ब्रह्मा कृत्यादूषणोऽनुष्टुप्। बृहस्पते नः परिपातु-मिहेति बृहस्पति स्त्रिष्टुप्। मामानो विन्दन्तीति सूक्तं, ब्रह्मा ईश्वरोऽनुष्टुप्। अयमोऽग्निरध्वचः कौशिकोऽग्निरनुष्टुप्। पूषामितसीति तिसृणां शुक्रो देवता। प्रथमायाः पंक्तिः तदु-त्तरयोरनुष्टुप्। अन्त्या गायत्री। प्रगोनयइति सूक्तानि त्रीणि प्राणैः सर्व्वैरनुष्टुप्। देवा मारुतइति, ब्रह्मा मरुत स्त्रिष्टुप्। मुञ्चामि त्वाइति सूक्तस्य, यक्ष्मनाशन इन्द्राग्नि-स्त्रिष्टुप्। अथर्व्वशिरांसि। अग्निरिति भस्मवायुरिति भस्म जलमिति भस्मस्थलमिति भस्म सर्व्वं ह्वा भस्मेति।

इत्यथर्व्वणो विधानम्।

अथोङ्कारस्य छन्दर्षिदेवतानि। याजुषसर्व्वानुक्रमे। ॐ मिति परमाक्षरस्य योगिनामालम्बभूतस्य परस्य ब्रह्मणः प्रणवा-ख्यस्य स्थूलादिगुणयुक्तस्य ब्रह्मा ऋषिःच्छन्दो गायत्रं परमात्मा देवता ब्रह्मारम्भे विरामे च यागहोमादिषु शान्तिषु कर्म्मषु चान्येष्वपि कर्म्मसु नित्यनैमित्तिकादिषु सर्व्वेषु विनियोगस्येति। तथा च शाट्यायनः। दान यज्ञ तपः स्वाध्याय जपाध्यानसन्ध्यो-पासन प्राणायाम होम दैव, पित्र्यमन्त्रोच्चारणब्रह्मारम्भादिति प्रणवेषु धार्य्यं। प्रवर्त्तयेदिति मन्त्राणां छन्दर्षिदेवता ज्ञाना-वश्यकत्वमुक्तं। याजुषसर्व्वानुक्रमे ऋषिदैवतछन्दसां स्वरूप मुक्त्वा एतान्यविदित्वा योऽधीतेऽनुब्रूते जपते जुहोति यजते याजयते तस्य ब्रह्मचं न चिरं यातयामं भवति स्थाणुं वर्च्छति प्रदूयते वा पापीयान् भवतीति छन्दोगब्राह्मणे योह

वा अविदितार्षेयब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुंवर्च्छति गर्त्तं वा यजते प्रच्छामीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति।

अथ नानाद्रव्यदानमन्त्राः।

तत्र नवग्रहदक्षिणा दान मन्त्राः।

मात्स्ये।

कपिले सर्व्वभूतानां पूजनीयासि रोहिणि।
सर्व्वतीर्थमयी यस्मादतः शान्तिं प्रयच्छ मे॥

कपिलायाः।

पुण्यस्त्वं शङ्खपुण्यानां मङ्गलानाञ्च मङ्गलं।
विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे॥

शङ्खस्य।

धर्म्मस्त्वं वृषरूपेण जगदानन्दकारकः।
अष्ट मूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे॥

रक्तावृषस्य।

हिरण्यगर्भगर्भस्थं हेमवीजं विभावसोः।
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे॥

सुवर्णस्य।

पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं।
प्रदानात्तस्य मे विष्णुरतः शान्तिं प्रयच्छतु॥

पीतवस्त्रयुग्मस्य।

यस्मा द्विष्णु स्वरूपेण यस्मादमृतसम्भवः।

चन्द्रार्कवाहनं नित्यमतः शान्तिं प्रयच्छ मे ॥

श्वेताश्वस्य ।

यस्मात्त्वं पृथिवीसर्व्वाधेनुः केशवसन्निभाः ।
सर्व्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ॥

कृष्णवर्णगोः ।

यस्मादायसकर्म्माणि त्वदधीनानि सर्व्वदा ।
लाङ्गलाद्यायुधादीनि ततः शान्तिं प्रयच्छ मे ॥

लोहस्य ।

यस्मात्वं छागयज्ञाना मङ्गत्वेन व्यवस्थितः ।
यानं विभावसो र्नित्यमतः शान्तिं प्रयच्छ मे ॥

छागस्य ।

शरण्यं सर्व्वलोकानां लज्जाया रक्षणं परं ।
सुवेशधारि त्वं यस्माद्दासः शान्तिं प्रयच्छ मे ॥

श्वेतवस्त्रस्य ।

रक्तवस्त्रयुगं यस्मादादित्यस्य प्रियं सदा ।
प्रदानादस्य मे सूर्य्यो ह्यतः शान्तिं प्रयच्छ मे ॥

रक्तवस्त्रयुग्मस्य ।

धर्म्मराजेन विधृतं कृष्णवस्त्रं सुशोभनं ।
सर्व्व क्लेशविनाशाय कृष्णवस्त्रं ददाम्यहं ॥

कृष्णवस्त्रस्य ।

अन्नमेव यतो लक्ष्मीरन्नमेव जनार्द्दनः ।
अन्नं ब्रह्माखिल प्राण मस्तु मे जन्मजन्मनि ॥

अन्नस्य ।

चन्द्रमण्डलमध्यस्थं चन्द्राम्बुजसमप्रभं ।
दध्यन्नं तस्य दानेन प्रीयतां वामनो मम ॥
दध्यन्नं सोपदंशञ्च ब्रह्म विष्णु शिवात्मकं ।
प्रीयतां धर्म्मराजोहि तद्दानान्मम सर्व्वदा ।

सोपदंशदध्यन्नस्य ।

पानीयसहितञ्चैतत् सदध्योदनपात्रकं ।
समर्च्चितं तत् सफलं सदक्षिणं गृहाण दध्योदनपात्रकं मम ।
सपानीय दध्यन्नस्य ॥
सर्व्वात्मा सर्व्वलोकेशः सर्व्वव्यापी सनातनः ।
नारायणः प्रसन्नःस्यात् कृषरान्नप्रदानतः ॥

कृषरान्नस्य ।

पायसं परमान्नञ्च सर्व्वदानोत्तमोत्तमम् ।
सर्व्वदैवतयोग्यञ्च श्रेयःपुष्टिं प्रयच्छतु ॥

पायसान्नस्य ।

आदित्यतेजसा भक्तं जातिश्रैष्ठकरं परं ।
तदन्नं मम विप्र त्वं प्रतीच्छ पूपमुत्तमं ॥

अपूपान्नस्य ।

प्राजापत्या यतः प्रोक्ताः शक्तवो यज्ञकर्म्मणि ।
तस्मात् शक्तून् प्रयच्छामि प्रीयतां मे प्रजापतिः ॥

अक्षूनां।

असुरेषु समुद्भूतं रजतं पितृवल्लभं।
तस्मादस्य प्रदानेन रुद्रः सम्प्रीयतां मम॥

रजतस्य।

परापवादपैशून्यादभक्ष्यस्य च भक्षणात्।
तत्प्रजातस्य यत् पापं ताम्रपात्रं प्रणाश्यतु॥

ताम्रपात्रस्य।

यानि पापानि काम्यानि कामोत्थानि कृतानि च।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा॥

कांस्यपात्रस्य।

देव देव जगन्नाथ वाञ्छितार्थफलप्रदः।
तिलपात्रं प्रदास्यामि तवाङ्गे संस्थितेरहं॥

स्वर्णादितिलपात्रस्य।

दर्शनेन त्वमादर्श नृणां मङ्गलदायकः।
शौर्य्य-सौभाग्य, सत्कीर्त्ति, निर्म्मलज्ञानदो भव॥

दर्पणस्य॥

ताम्रपर्ण्यर्णवोत्पन्ना वर्णाढ्या कल्पवर्णिताः।
मुक्ताः शुक्त्युद्भवाः सन्तु भुक्तिमुक्ति प्रदा मम॥

मुक्तानां।

त्वदुद्भवो जगत्स्रष्टुर्वेधसो हेमपङ्कजः।
पद्मवासहरेर्नाभिजातं मां पाहि सर्व्वदा॥

सुवर्णपद्मस्य।

कान्तारवनदुर्गेषु चोरव्यालाकुले पथि।
हिंसकास्तु न हिंसन्तु सिंहदानप्रभावतः।

सिंहस्य।

हिरण्यगर्भसम्भूतं सौवर्णमङ्गुलीयकं।
धर्म्मप्रदं प्रयच्छामि प्रीयतां कमलापतिः॥

अङ्गुलीयकस्य।

काञ्चनं हस्तवलयं रूपकान्तिसुखप्रदं।
विभूषणं प्रदास्यामि विभूषयति मां सदा॥

वलयस्य।

क्षीरोदमथने पूर्व्वमुद्भूतं कुण्डलद्वयं।
श्रिया सह यदुद्भूतं ददे श्रीः प्रीयतां मम॥

कुण्डलद्वयस्य।

मणिकाञ्चन पुष्पाणि मणिमुक्तामयानि च।
तुलसीपत्रदानस्य कलां नार्हन्ति षोड़शीं।
तुलसीपत्रदानाद्वा ब्रह्मणः कायसम्भवम्।
पापप्रशमनं यातु सर्व्वे सन्तु मनोरथाः॥

तुलसीदानमन्त्रः।

अलक्ष्मीहरणं नित्यं नित्यं सौभाग्यवर्द्धनम्।
क्षीरं मङ्गलमायुष्यं ततः शान्तिं प्रयच्छ मे॥

दुग्धस्य।

कामधेनोः समुद्भूतं विष्णोस्तुष्टिकरं परं।

नवनीतं प्रदास्यामि बलं पुष्टिञ्च देहि मे ॥

नवनीतस्य ।

कामधेनुसमुद्भूतं देवानामुत्तमं हविः ।
आयुर्विवर्द्धनं दातूराज्यं पातु सदैव मां॥

आज्यस्य ।

तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम् ।
अमाङ्गल्यहरं पुण्यमतः शान्तिं प्रयच्छ मे ॥

तैलस्य ।

कण्टकोच्छिष्ट,पाषाण,वृश्चिकादि,निवारणे ।
पादुके सम्प्रदास्यामि विप्र प्रीत्या प्रगृह्यताम् ॥

पादुकामन्त्रः ।

शशाङ्ककरसङ्काशं हिमडिण्डीरपाण्डुरम् ।
प्रोत्सारयाशु दुरितं चामरामरवल्लभं ॥

चामरस्य ।

चन्दनावासमन्दारसखे वृन्दारकार्च्चितं ।
चन्दन त्वत्प्रसादान्मे सान्द्रानन्दप्रदो भव ॥

चन्दनखण्डस्य ।

श्रीखण्डकाण्डकर्पूरकस्तुरी कुङ्कुमान्वितम् ।
विलेपनं प्रयच्छामि सौख्यमस्तु सदा मम ॥

चन्दनाद्यनुलेपनस्य ।

समस्तेभ्योऽपि वस्तुभ्यः संस्तुतासि सुरासुरैः ।
विन्यस्ताङ्गेषु कस्तूरी सुखदास्तु सदा मम ॥

कस्तूर्य्याः ।

कन्दर्पदर्पदो यस्मात् कर्पूरं प्राणतर्पणम् ।
आद्यमते भवस्तापस्त्वद्दानादपसर्पतु ॥

कर्पूरस्य ।

यदभूदङ्गसंलग्नं कुङ्कुमादिविलेपनम् ।
जलक्रीड़ासु गोपीनां द्वारवत्यां जलार्पितं ॥
गोपीचन्दनमित्युक्तं मुनीन्द्रैः किल्बिषापहं ।
तस्मादस्य प्रदानेन विष्णुर्दिशतु वाञ्छितम् ।

गोपीचन्दनस्य ।

त्वया सुराणाममृतं विधाय
हालाहलं संहृतमेव यस्मात् ।
तथा सुराणां त्रिपुरञ्च दग्ध
मेकेषुणा लोकहितार्थमीश ॥
त्वत्प्रदानादहमप्यदोषी
दोषैर्विमुक्तास्तु गणान् प्रपद्ये ।
तथा कुरु त्वं शरणं प्रपद्ये
मयि प्रभो देव वर प्रसीद ॥

शिवप्रतिमायाः ।

प्रसीदतु भवोनित्यं कृत्तिवास महेश्वरः ।

पार्व्वत्या सहितोदेवोजगदुत्पत्तिकारकः॥

उमामहेश्वरयोः।

शिवशक्त्यात्मकं यस्मात् जगदेतच्चराचरं।
तस्मादनेन सर्व्वं मे करोतु भगवन् शिवं॥
कैलासवासी गौरीशो भगवान् भगनेत्रभित्॥
चराचरात्मकोलिङ्गरूपो दिशतु वाञ्छितम्।

लिङ्गस्य।

इदं मरकतं लिङ्गं रौप्यपीठसमन्वितं।
धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितम्॥
सम्पदद्याद्विधानेन यथोक्तं फलमस्तु मे॥

मरकतलिङ्गस्य।

काश्मीरलिङ्गपक्षे तु इन्द्रकाश्मीरजं वदेत्।

काश्मीरलिङ्गस्य।

सर्व्वभूताश्रया भूमिर्व्वराहेण समुद्धृता।
अनन्तसस्यफलदा अतः शान्तिं प्रयच्छ मे॥

सस्यभूमेः।

ऊर्णामेषसमुत्पन्ना शीतवातभयापहा।
यस्मात्तुषारहारीस्यादतः शान्तिं प्रयच्छ मे॥

ऊर्णायाः।

और्णपदमनुध्येयं स्वर्णवीजं तव प्रभो।

दत्तं गृहाण देवेश पापं संहर सत्वरम् ॥

ऊर्णापदस्य ।

धान्यं करोषि दातारमिह लोके परत्र च ।
तस्मात् प्रदीयतां धान्यमतः शान्तिं प्रयच्छ मे ॥

धान्यस्य ।

यस्मादन्नमयो जम्बूद्वीपो गोधूमसम्भवः ।
गन्धर्व्वसौख्यधनदः अतः शान्तिं प्रयच्छ मे ॥

गोधूमानाम् ।

मुद्गवीजानि वै यस्मात् प्रियाणि परमेष्ठिनः ।
तस्मादेषां प्रदानेन प्रीतिः सिद्ध्यतु मे सदा ॥

मुद्गानां ।

पुरा गोवर्द्धनोद्धारसमये हरिभच्चिताः ।
चणकाः सर्व्वपापघ्ना अतः शान्तिं प्रयच्छ मे ॥

माषाणाम् ।

रसानामग्रजं श्रेष्ठं लवणं वलवर्द्धनं ।
ब्रह्मणा निर्म्मितं साचादतः शान्तिं प्रयच्छतु ॥

लवणस्य ।

धान्यराजाश्च माङ्गल्या द्विजप्रीतिकरा यवाः ।
तस्मादेषां प्रदानेन ममास्त्वभिमतं फलम् ॥

यवानां।

तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः।
तिलदानेन सर्व्वं मे पापं नाशय केशव॥

तिलानां।

अमृतस्य कुलोत्पन्नाः इक्षुधारातिशर्व्वरी।
सूर्य्यप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे॥

शर्करायाः।

मनोभवधनुर्मध्यादुद्भूता शर्करा इति।
तस्मादस्य प्रदानेन मम सन्तु मनोरथाः॥

खण्डस्य।

प्रणवः सर्व्वमन्त्राणां नारीणां पार्व्वती सदा।
तथा रसानां प्रवरः सदैवेक्षुरसोमतः।
मम तस्मात् परां लक्ष्मीं-ददस्व गुड़ सर्व्वदा।

गुड़स्य।

यस्मात्पितृणां श्राद्धे त्वं पीतं मध्वमृतोद्भवं।
तस्मात्तवप्रदानेन रक्ष मां दुःखसागरात्॥

मधुनः।

वारिपूर्णघटीपेतं देवत्रयमयं यतः।
प्रीयतां धर्म्मराजोऽस्तु दानेनानेन पुण्यद॥

उदकुम्भस्य ।

उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।
सर्व्वस्थानेषु सुखदा व्रतः शान्तिं प्रयच्छ मे ॥

उपानहोः ।

पत्रिका सर्व्वजन्तूनां शैत्यानन्दकरी शुभा ।
पितृणां तृप्तिदा नित्यमतः शान्तिं प्रयच्छ मे ॥

व्यजनस्य ।

महाकोशनिवासेन चक्राद्यैरुपशोभितम् ।
अस्य देवप्रदानात्तु मम सन्तु मनोरथाः ॥

शालग्रामस्य ।

महाकोशनिवास त्वं महादेवो महेश्वरः ।
प्रीयतां तव दानेन अतः शान्तिं प्रयच्छ मे ॥

शिवनाभस्य ।

यमद्वारे महाघोरे या सा वैतरणी नदी ।
तान्तर्त्तुकामो यच्छामि उत्तारय सुखेन मां ॥

वैतरण्याः ।

यस्मात्त्वं पृथिवी सर्व्वाधेनु वैष्णवसन्निभा ।
सर्व्वपाप हरा नित्यमतः शान्तिं प्रयच्छ मे ॥

लवणधेनोः ।

मृत्यु क्रान्तौ प्रवृत्तस्य सुखक्रान्तिविवृद्धये।
तुभ्यं सम्प्रददे नाम्ना गां समुत्क्रान्तिसंज्ञितां॥

उत्क्रान्तिधेनोः।

वाङ्मनः, काय,जनितं यत् किञ्चिन्मम दुष्कृतम्।
तत् सर्व्वं विलयं यातु त्वद्दानेनोपसेवितम्॥

मेष्याः।

भगवन् शूलहस्तेश दचाद्यरिविनाशन।
तवायुधप्रदानेन शूलं नश्यतु मे सदा॥

शूलस्य।

यानि पापन्यनेकानि मया कामकृतानि च।
लोहपात्रप्रदानेन तानि नश्यन्तु सर्व्वदा॥

लोहपात्रस्य।

अगम्यागमनं चैव परदाराभिमर्षनम्।
रौप्यपात्रप्रदानेन तानि नश्यन्तु मे सदा॥

रौप्यपात्रस्य।

तिलाः सर्व्वा समायुक्ता दुरितचयकारकाः।
विष्णुप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे॥

सहिरण्यतिलदानानां।

तिलाः पुण्याः पवित्राश्च सर्व्वकामकराः शुभाः।

शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः ॥
यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

सहिरण्यतिलपात्रस्य ।

ब्रह्महत्यादिपापघ्नं ब्रह्मणा निर्म्मितं पुरा ।
कुष्माण्डबहुबीजात्मन् अतः शान्तिं प्रयच्छ मे ॥
कुष्माण्डस्य ।

इदं फलं मया विप्र प्रभूतं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

फलस्य ।

आदित्यतेजसोत्पन्नाः सर्व्वमङ्गलकारकाः ।
मण्डकाः सर्व्वपापघ्नो अतः शान्तिं प्रयच्छ मे ॥
मण्डकानां

जन्मान्तरसहस्रेषु यत् कृतं दुरितं मया ।
स्वर्णपात्रप्रदानेन शान्तिः किञ्चिदिहास्तु मे ॥

व्यतीपातस्य ।

यायालक्ष्मीर्यदङ्गे न सर्व्वगात्रे व्यवस्थितं ।
तत् सर्व्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥
आरोग्यार्थाज्यस्य ।

पाज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतम् ।

आज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिताः॥

पापक्षयार्थाज्यस्य।

त्वं देवानां मनुष्याणां रक्षमामायुधो ह्यसि।
यस्मात् सर्व्वप्रयत्नेन शान्तिर्भवतु सर्व्वदा॥

आयुधस्य।

केशवप्रीतिदा भक्त्या शम्भ ब्रह्मा,र्क,तुष्टिदा।
पृथग्विधापूपकायाः यच्छन्तु वलमीरसम्॥

भक्ष्याणां।

सोमोद्भवानि दारूणि जातवेदःप्रियाणि च।
तस्मादेषां प्रदानेन श्रियं देहि विभावसोः॥

काष्ठानां।

अग्निवर्णोद्भवा नाम वलकीर्त्तिप्रवर्द्धनाः।
कुलत्थः सर्व्वपापघ्न अतः शान्तिं प्रयच्छ मे॥

कुलत्थानां।

यदारोहति वीजानि काले कृष्टे महीतले।
तव प्रदानात्सकला मम सन्तु मनोरथाः॥

कृष्णलेतस्य।

सर्व्वग्रहर्क्षतारेश सर्व्वेश त्वं हि भास्कर।
संक्रान्तिशूलदोषन्मे निवारय दिवाकर॥

संक्रान्तिशूलस्य ।

सर्व्वविद्या,श्रम, ज्ञान. करणं ललिताचरं ।
पुस्तकं सम्प्रयच्छामि प्रिया भवति भारती ॥

पुस्तकस्य ।

अनेन जायते विश्वप्राणिनां प्राणरक्षणं ।
तन्दुला वैश्वदेवत्याः पाकेनान्ने भवन्ति ये ॥
पावनाः सर्व्वयज्ञेषु प्रशस्ता होमकर्म्मणि ।
तस्मात्तन्दुलदानेन प्रीयतां विश्वदेवताः ॥

तण्डुलानां ।

आश्रयन्ति मनो यस्मात् तस्मात् सुमनसः स्मृताः ।
दत्ता ददतु मे नित्यमत्याह्लादं सतीं श्रियम् ॥

पुष्पाणां ।

जीरानो जायते यस्मान्मण्डलं शुभकर्म्मसु ।
तस्माज्जीरकदानेन प्रीयतां गिरिजा मम ॥

जीरकस्य ।

ताम्बूलं श्रीकरं भद्रं ब्रह्म,विष्णु,शिवात्मकम् ।
अस्य प्रदानात् ब्रह्माद्याः शिवन्ददन्तु पुष्कलम् ॥

ताम्बूलस्य ।

पूरित पूगपूरेण नागवल्लीदलान्वितम ।

पूर्णेन चूर्णपात्रेण कर्पूरपूरकेण च ॥
सपूगखण्डनं दिव्यं गन्धर्व्वाप्सरसां प्रियं।
कण्टक त्वं निरासकन्त्वत् प्रसादात् कुरु क्षमाम् ॥

ताम्बूलकरस्य।

लक्ष्मीप्रिया या लक्ष्मीदा लक्ष्मीव वसनप्रिया।
सौभाग्यक्कद्वरस्त्रीणां हरिद्रा श्रीमदस्तु मे ॥

हरिद्रायाः।

कञ्चुकीवस्त्रयुग्मैश्च तथा कर्णावतंसकैः।
कण्ठसूत्रैश्च भूषाभिः प्रीयतां गिरिनन्दिनी ॥

सौभाग्य द्रव्ययुग्मस्य।

रामपत्नि महाभागे पुण्यमूर्त्ते निरामये।
गृहाणेमानि शूर्पाणि मया दत्तानि जानकि ॥

शूर्पस्य।

कमण्डलुजलैः पूर्णः स्वर्णगर्भः सुलक्षणः।
अर्पितस्ते महासेन प्रसन्नश्च सदा भव ॥

कमण्डलोः।

ब्रह्मसूत्रं महादिव्यं मया यत्नेन निर्म्मितम्।
ब्राह्मं जन्मास्तु मे देव ब्रह्मसूत्रसमर्पणात् ॥

यज्ञोपवीतस्य।

अष्टात्रिंशतिसंख्याकैरुद्राक्षैर्योजिता मया।
अर्पिता तव हस्ते च गृहाण सुरसैन्यक॥

अक्षमालायाः।

विधुन्तुद नमस्तुभ्यं सिंहिकानन्दनोऽव्यय।
दानेनानेन नागस्य रक्ष मां वेधजाद्भयात्॥

स्वर्णनागस्य।

इक्षुदण्डं महापुण्यं रसालं सर्व्वकामदम्।
तुभ्यन्दास्यामि तेनाशु प्रीयतां परमेश्वरः॥

इक्षुदण्डस्य।

कर्पूरः कदलीभूतो देव देव प्रियः सदा।
भाग्योत्तमो नृपाणाञ्च तद्दानात् सुखमश्नुते॥
जरामांस्कभवं देवो मणिनाभि समुद्भवाम्*।
भक्त्याहं संप्रदास्यामि मम सन्तु मनोरथाः।

गन्धद्रव्यस्य।

ददाति भानुर्भवते सर्वोपस्करसंयुतम्।
मनोभिलषितावाप्तिं करोतु मम भास्करः॥

सूर्य्यमूर्त्तेः।

यमाननन्ति विश्वेशं विश्वनाथमुमासुतम्।
विघ्नेश्वरं क्षिप्रचर तुभ्यन्दास्याम्यभीष्टदं॥

* मुरामांसी भवं देवं मृगनाभि समुद्भव मिति पुस्तकान्तरे पाठः।

गणेश प्रतिमायाः।

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्द्दश।
यस्मात् तस्माच्छिवं मे स्यादिह लोके परत्र च॥

गोदानमन्त्रः।

यस्मादशून्यं शयनं केशवस्य शिवस्य च।
शय्या ममाप्यशून्यास्तु तस्माज्जन्मनि जन्मनि॥
यथा रत्नेषु सर्व्वेषु सर्व्वे देवा व्यवस्थिताः।
तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः॥

रत्नमन्त्रः।

यथा भूमि प्रदानस्य कलां नार्हन्ति षोड़शीं।
दानान्यन्यानि मे शान्ति र्भूमिदानाद्भवत्विह॥

भूदानमन्त्रः।

इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता।
तदा कर्म्मकरी भोग्या यथेष्टं भद्रमस्तु मे॥

दासीमन्त्रः।

रथाय रथनाथाय नमस्ते विश्वकर्म्मणे।
विश्वभूताय नाथाय अरुणाय नमोनमः॥

---

* प्रया इति पुस्तकान्तरे।

रथस्य ।

इहामुत्रोभयत्राणं कुरु केशव मे प्रभो ।
छत्रन्त्वत्प्रीतये दत्तं ब्राह्मणाय मया शुभम् ॥

छत्रमन्त्रः ।

देवदेव जगन्नाथ विश्वात्मन् दत्तयानया ।
प्रभो शिविकया देव प्रीतो भव जनार्द्दन ॥

शिविकामन्त्रः ।

इदं गृहं गृहाण त्वं सर्व्वोपस्करसंयुतम् ।
तव विप्र प्रसादेन ममास्त्वभिमतं फलम् ॥

गृहमन्त्रः ।

ममाश्रयं प्रयच्छामि प्रीत्यर्थं मे जगन्निधिः ।

आश्रयमन्त्रः ।

गौरी कन्यामिमां विप्र यथाशक्ति विभूषितां ।
गोत्राय शर्म्मणे तुभ्यं विप्र त्वं तां ममाश्रय ॥

कन्यामन्त्रः ।

चन्द्रादिलोकपालानां या राजमहिषी शुभा ।
महिषीदानमाहात्म्यमस्तु मे सर्व्वकामदं ॥
धर्म्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः ।
महिषासुरस्य जननी सा स्तु मे सर्व्वकामदा ॥

महिष्याः।

महिषीं वत्ससंयुक्तां-सुशीलाञ्च पयस्विनीं।
रक्तवस्त्रेण पुष्पेण दत्त्वा मृत्युञ्जयेन्नरः॥

मृत्युमहिष्याः।

त्वागत्वङ्मांसमज्जाद्यैः सर्व्वोपकरणैः शुभा।
जगतः सम्प्रदत्तासि त्वामतः प्रार्थये शिवम्॥

मेषस्य।

देवानां योमुखं हव्यवाहनः सर्व्वपूजितः।
तस्य त्वं वाहनं पूज्यं देवैः सेन्द्रैर्महर्षिभिः॥
अग्निमान्द्यं पूर्व्वकर्म्मविपाकोत्थन्तु यन्मया।
तत्सर्व्वं नाशय क्षिप्रं जठराग्निं विवर्द्धय॥
त्वं पूर्व्वं ब्रह्मणा सृष्टाः पवित्रा भवती परा।
त्वत्प्रसूतोत्थिता यज्ञा तस्माच्छान्तिकरी भव॥

अजामन्त्रः।

अथ ऋत्विगादिवरणविधिः।

तत्र ब्रह्माण्डदानमधिकृत्योक्तं।

पद्मपुराणे।

बालाग्निहोत्रिणं विप्रं सुरूपञ्च गुणान्वितं।
सपत्नीकञ्च सम्पूज्य भूषयित्वा च भूषणैः॥

पुरोहितं मुख्यतमं कृत्वान्यांश्च तथर्त्विजः ।
चतुर्विंशद्गुणोपेतान् सपत्नीकान्निमन्त्रितान् ॥
अहताम्बरसंछन्नान् स्रग्विणः शुचिभूषितान् ।
अङ्गुलीयकानि तथा कर्णवेष्टान् प्रदापयेत् ॥
एवं विधांश्च सम्पूज्य तेषामग्रे स्वयं स्थितः ।
अष्टाङ्गप्रणिपातेन प्रणम्य च पुनः पुनः ॥
पुरोहिताय पुरतः कृत्वा वै करसम्पुटम् ।
यूयं वै ब्राह्मणा धाता मितत्वेनानुगृह्णता ॥
सौमुख्येनेह भवतां भवेत् पूतोनरः स्वयम् ।
भवतास्प्रीतियोगेन स्वयं प्रीतः पितामहः ॥

तुला पुरुषमधिकृत्योक्तं ।

लिङ्ग पुराणे ।

शतनिष्काधिकं श्रेष्ठन्तदर्द्धं मध्यमं स्मृतम् ।
तस्याप्यर्द्धं कनिष्ठंस्या त्रिविधं तत्र कल्पितम् ॥
वस्त्रयुग्ममथोष्णीषं कुण्डले कण्ठभूषणम् ।
अङ्गुलीभूषणं चैव मणिवन्धस्य भूषणम् ॥
एतानि चैव सर्व्वाणि प्रारम्भे सर्व्वकर्म्मणां ।
पुरोहिताय दत्त्वार्द्धं ऋत्विग्भ्यः सम्प्रदापयेत् ॥
पूर्व्वोक्तभूषणं सर्व्वं सोष्णीषं वस्त्रसंयुतम् ।
दद्यादेतत्प्रयोक्तृभ्य आच्छादनपटं तथा ।

तत्र अन्यांश्चतुर्व्विंशदृत्विजः कृत्वेत्यत्यचच विंशति ब्राह्मणा

वरणीयाः ।

ते च प्रतिष्ठामधिकृत्य।

मत्स्य पुराणे भेदेनोक्ताः।

शुभास्तत्राष्ट होतारो द्वारपालास्तथाष्ट वै।
अष्टौ तु जापकाः कार्य्याः ब्राह्मणा वेदपारगाः॥
सर्व्वलक्षणसम्पूर्णा* मन्त्रवन्तो जितेन्द्रियाः।
कुलद्वयसमायुक्ताः स्थापकाः स्युर्द्विजोत्तमाः॥
हेमालङ्कारिणः कार्य्याः पञ्चविंशतिरृत्विजः।
दक्षयेच्च समं सर्व्वानाचार्य्यो द्विगुणं भवेत्॥

निष्कादीनामत्र शतं पञ्चाशतः पञ्चविंशति र्वा मूल्यं ज्ञेयं वस्त्रालङ्काराणां एतत्प्रयोक्तृभ्यः सदस्येभ्यः। वरणवाक्यन्तु अ-द्यामुकयज्ञेनाहं यक्ष्ये तदङ्गभूतममुककर्म्मार्थममुकगोत्रममुकश-र्म्माणममुकवेदाध्यायिनममुकं त्वामहं वृणोमीति वृतोऽस्मीति प्रतिवचनम्।

कर्म्मभेदश्चोक्तो मत्स्यपुराणे।

गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्ततः।
यजध्वमितितान् ब्रूयादाचार्य्यस्त्वभिपूजयेत्॥
यजध्वमितितान् ब्रूयाद्धोतृकान् पूज्य एव तु।
उत्सृष्टं मन्त्रजप्येन तिष्ठध्वमिति जापकान्॥

प्रारम्भधर्म्मकर्म्मणामिति वचनादस्य सर्व्वगतदानपूजा होमादि ऋत्विक्साध्ये धर्म्मकर्म्मणि साधारण्यं ज्ञेयम्॥

अथ वृतानां मधुपर्कमाह जाबालः।

---

* सम्पन्ना इति पुस्तकान्तरे पाठः।

वैवाह्यमृत्विजं चैव श्रोत्रियं गृहमागतम् ।
अर्हयेन्मधुपर्केण स्नातकं प्रियमेव च ॥

विश्वामित्रः ।

सम्पूज्य मधुपर्केण ऋत्विजः कर्म्म कारयेत् ।
अपूज्य कारयन् कर्म्म किल्बिषेणैव युज्यते ॥

अथ होमविधिः ।

देवीपुराणे ।

परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य्य प्रणीय परिस्तीर्य्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणी संस्कृत्यार्थवत् प्रोक्ष्य निरूप्याज्यमधिश्रित्य पर्य्यग्नी कुर्य्यात् । स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्व्ववदुपयमनकुशानादाय समिधोभ्याधाय पर्य्युक्ष्य जुहुयात् । एष एव विधिर्यत्र क्वचिद्धोमेऽथ-परीसमूहनादिषु देवताप्रविभागमन्त्रान् व्याख्यास्यामः ॥

यद्देवादेवहेडनमिति परिसमूहनम् । मानस्तोकेत्यनुलेपनम् । त्वां हृतैरिन्द्र सत्पतिमित्युल्लिख्य । व्रजं गच्छेत्युद्धृत्य । देवस्यत्वेत्यभ्युक्ष्य । अग्निमूर्द्धेत्यग्निमुपसमाधाय । समिधाग्निं दुवस्ततेति समिधमादध्यात् ॥

अपि गृह्णामीत्यग्नेरक्षणं कृत्वा
हिरण्यगर्भेति दक्षिणतो ब्रह्मा ।
आपोहिष्ठेत्युत्तरतः प्रणीताः

कयानश्चित्र इति प्रणीताप्रस्तरणम्॥
पवित्रे स्थोवैष्णव्ये इति पवित्रे
ईषेत्वेत्याज्यनिरूपणम्।
त्रातारमिन्द्रमिति स्रुवं प्रतप्य
अतिग्निनोसि सपत्नोनिति मार्जनम्॥
प्रत्युष्णरच्च इति पुनः प्रतपनं
सविनुर्वः प्रसव उत्पुनामीत्युत्पवनम्।
तदेवाग्निरित्युदिङ्गनं भूरसीति पर्य्युचणं

प्रजापतये स्वाहा इन्द्राय स्वाहा। अग्नये स्वाहा। अन्तरिचाय स्वाहा। ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। मूलहोमाहुतयः। एवं दैदिकोह्यग्निः संस्कृतो भवति॥

एवं लचणसंयुक्तं सर्व्वहोमेषु याज्ञिकम्।
विधानं विहितं तत्र ब्रह्मणामिततेजसा॥
अन्यथा वै प्रकुर्व्वन्ति सूत्रमाश्रित्य केवलम्।
निराशास्तत्र गच्छन्ति सर्वे देवा न संशयः॥

अथातः परिस्तरणदेवताः कथ्यन्ते।

परिसमूहने काश्यपः, उपलेपने विश्वेदेवाः। उल्लिखने मित्रावरुणौ। उद्धरणे पृथ्वी। अभ्युचणे गन्धर्वाः। अग्न्यासादने सर्व्वः। दचिणासाधने ब्रह्मा। उत्तरतः प्रणीते आपराः। अर्थवदासादने शतक्रतुः। पवित्रबन्धने पितरः। प्रोचणीसंस्करणे मातरः। जुहूस्रुवे स्रुवायां च ब्रह्मविष्णुमहेश्वराः। आज्यस्थापने वसवः। अधिश्रयणे वैवस्वतः। पर्य्य-

ग्निकरणे मरुतः । उद्वासने स्कन्दः । उत्पवने प्रत्युत्पवने चन्द्रा-दित्यौ । आज्यावेक्षणे दिशः । सर्व्वाः पवित्राधाने प्रणीताना-मुमा देवी । दर्भे लक्ष्मीः । विश्वस्य विश्वा भूतानि ॥

पूर्व्वोक्तानां सुवक्तीनामेकमादाय पावकम् ।
होमकर्म्म प्रकर्त्तव्यं विधिं ज्ञात्वा महामुने ॥
एता वै देवताः प्रोक्ता ब्राह्मणानां हिताय वै ।
यज्ञेष पशुबन्धेषु सर्व्वकर्म्मक्रियासु च ॥

ब्रह्मोवाच ।

वह्नेर्विधानं परमं सर्व्वकर्म्मप्रसाधनम् ।
कथयामि नृपश्रेष्ठ नाम,भेद, क्रियादिभिः ॥
अग्नेः परिग्रहः कार्य्यः सर्व्वशास्त्रार्थवेदकैः ।
वामदक्षिणसिद्धान्त वेदान्त गृह्यपारगैः ॥
कार्य्यः परिग्रहो वह्नेः सर्व्व सम्पत्तिवेदिभिः ।
अन्यथा अन्तरायास्तु भवन्ति धनआयुषे ॥
नित्यव्याधिरधन्योवा सर्व्वलोकतिरस्कृतः ।
अविदित्वा यथा वह्नि ज्ञात्वा सर्व्वसुखाय च ॥
तस्मात् सर्व्वप्रयत्नेन वह्न्याधेयक्रिया मताः ।
कुण्डाष्टकं समाख्यातं त्रिभेदन्तु मया तव ॥
वहुवह्निविधानञ्च एकस्यै वोपचारतः ।
स्त्री,वाल,शूद्र मूर्खैस्तु होतव्यं प्रत्यहं यथा ॥
महानसे तथा वापि न कुम्भे तु कदाचन ।
संस्कृतैर्नामभेदैश्च रचयित्वा हुताशनम् ॥

महाविद्यार्थकुशलै र्होतव्यं फलकाङ्क्षिभिः।
श्रूयते च पुरा वत्स अविदित्वा वसोः सुताः॥
संस्कृते हूयमानास्तु राज्यभ्रंशमवाप्नुवन्।
तथा ह्यग्नि होता च अचिरान्मृत्युमाप्तवान्॥
तस्मादस्थिरवह्नौ तु न होतव्यं न वेदिना।
वेदनं ते प्रवक्ष्यामि येन सिद्धिः प्रजायते॥
चतुष्कोणेष्वहङ्कुण्डे कुण्डले मधुसूदनः।
धनुराकृतिके रुद्रः सर्व्वदेवनमस्कृतः॥
चतुरस्रे भवेदग्निर्मण्डले तु हुताशनः।
अर्द्धचन्द्रे नलोह्यग्निरग्निरेवं प्रतिष्ठितः॥
द्विजानां देवता सत्यमाचार्य्योयोगिदैवतः।
उदके वरुणो देवोदर्भेषु च महोरगाः॥
स्रुवायाश्च महादेवो स्रुवे देवस्त्रिलोलनः।
तत् संयोगे परो देवः सर्व्वदेवनमस्कृतः॥
प्रणीता पृथिवी ज्ञेया स्वाहाकारे महामखाः।
पुष्पेषु क्रतवो विद्धि पात्रेषु च महोदधिः॥
वेदीमध्ये तु गायत्री सोमस्त्वभ्युत्त्क्षणे स्थितः।
इन्धने मणिभद्रस्तु शिखां वज्रधरस्तथा॥
होतारस्तु विजानीयाच्चमसादिषु पर्व्वतान्।
उषायां देवतारुद्रस्तालवृन्ते च वायवः॥
मन्त्रेषु च गणाः सर्व्वं भस्म भूयेपि शङ्करः।
लोकपालास्तु सर्व्वेषु कोणेषु सर्व्वदेवताः॥
मातरो होमभागेषु पूतनादिस्फुलिङ्गकाः।

आदित्योऽधिष्ठितस्तेजे लये देवः परः शिवः ॥
देवानां प्रातर्होमस्तु प्रहरार्द्धेन भूतिदः ।
मध्याह्ने तु मनुष्याणां मोक्षहेतोस्त्रियामिकः ॥
अपराह्ने पितृणाञ्च सन्ध्यायां गुह्यभौतिकम् ।
रात्रौ-पापविनाशार्थं दिवासिद्धिप्रसाधने ॥
प्रहरार्द्धे तु होतव्यमर्द्धरात्रे तदायुषम्* ।
प्रत्यूषे पुत्रदं वत्स उदये सार्व्वकामिकम् ॥
क्षणादौ सर्व्वकार्य्येषु सर्व्वप्राप्तिप्रदायकम् ।
क्षणाधिदेवता देया प्रथमा च वराहुतिः ॥
अन्यथा विफलं विप्र भवते हवनं तव ।
वार्क्षमृन्मयताम्रोत्थै रौप्यैर्हैमसमख्रुद्भवैः ॥
दशधा पुण्यवृद्धिस्तु हवनस्नानभोजनैः ।
देवाङ्कैः शूलपद्माङ्कैः शङ्खचक्रशुभाननैः ॥
घृत-क्षीर-रसादीनि गृह्णीयात्तानि बुद्धिमान् ।
देवान् स्थाप्य तु यत्नीयैर्वंसोर्धाराप्रतापितैः ।
द्रव्यैर्होमः प्रकर्त्तव्यो अन्यथा वा विधानतः ॥
आत्मवेलासु सन्तृप्तिं पुष्टिं यच्छन्ति देवताः ।
वेलामन्त्रगणानाञ्च अधिदैवतजं फलम् ॥
एतत्ते कथितं वत्स सर्व्वलोक सुखावहम् ।
होताचेन्मन्त्रहीनः स्यादशुचिर्भवते सदा ॥
तस्मात्त्वसंस्कृते वह्नौ न होतव्यमवैदिकैः ।
मन्त्रवैदिकहोतारः आप्याययन्ति देवताः ॥

* तदायुषमिति क्वचित् पाठः ।

अवैदिकास्तु होतारो नैव प्रीणन्ति वै सुरान्।
होमात् सर्व्वफलावाप्तिः सर्व्वेषामपि जायते॥
तस्मान्मन्त्रविधानज्ञः प्रातरेव शुभप्रदः।
पूर्वेऽग्निदेवता विष्णुर्दक्षिणेन हरःस्थितः॥
पश्चिमेन स्थितो ब्रह्मा एता वै अग्निदेवताः।
तेजे रुद्रं विजानीयाज्ज्वालायां वापि चर्च्चिका॥
त्रियायुषे च विप्राणां लक्ष्मीस्तत्राधिदेवता।
एवं प्रतिष्ठिते होम अग्नयश्च त्रयः स्थिताः॥
त्रयो देवास्त्रयो लोकास्त्रिरग्निस्त्रिगुणाः स्थिताः।
गार्हपत्योदक्षिणाग्निराहवनीयश्च ते त्रयः॥
एकस्यैव समुत्पन्ना बहुभेदा द्विजोत्तम।
हस्तादिलक्षिते कुण्डे समखाते समीकृते॥
ओष्ठमेकाङ्गुलं कार्य्यं नाभी द्वादश वा यता।
ओष्ठविस्तारसामान्या गजोष्ठसदृशा शुभा॥
चतुरङ्गुलमानेन प्रथमा मेखला भवेत्।
एकोर्द्धोना द्वितीया एवं कुण्डं शुभावहं॥
चतुरस्रञ्च पूर्व्वादि अश्वत्थदलसन्निभं।
अर्द्धन्तु कुक्कुटाकारं वृत्तपद्मकमष्ट वा॥
पद्माकारं प्रकर्त्तव्यं कुण्डन्त्वैशानगोचरे।
शाखाश्वत्थाम्रश्रीपर्णीसुचिर्वैकङ्कती तथा॥
खादिरासनबिल्वाद्यैः स्रुवोहस्तादिदैर्घ्यतः।
षडङ्गुलपरिणाहाढ्यं दण्डं कुम्भकभूषितं॥
पुष्करं पुष्करी होतु मध्यरेखाङ्कितांङ्कितः।

स्रुक्च-सार्द्धकरा कार्य्या दण्डं वृत्तं सुशोभनं ।
षडङ्गुल परिणाहं भूमियन्त्रविनिर्णतं ॥
दशाङ्गुलं मूलदेशेतु कुम्भं पुष्करमूलगम् ।
शण्डिकान्तवज्ज्ञानीया द्विभागेतु च पुष्करं ॥
वेदी समाङ्गुला कार्य्या पञ्चवृत्तां प्रकल्पयेत् ।
श्रोणि खातं समङ्कार्य्यमथ कुर्य्यात् षडङ्गुलं ॥
गोकर्णाकृतिशोभाढ्यं कन्यसाङ्गुलिरन्ध्रकं ।
घृतनिःक्रमणं कार्य्यं यवत्रयसुरेखितं ॥
एवं स्रुवञ्च कृत्वा वै ताभ्यां होमः सुखावहः ।
शमीगर्भारणी कार्य्या दैर्घ्याद्धस्तप्रमाणिता ॥
वितस्तिपरिणाहा सा मध्ये वै षोडशाङ्गुलं ।

गोकर्णा कृतिशोभाढ्यम् ।

वृत्तङ्करद्वयोपेतं दशाङ्गुल सुवृत्तिगं ॥
आपीडसुसमङ्कार्य्यं मध्यमायसबन्धनं ।
अटिकाङ्करहोमार्थं बालरज्वाप्रमाणकम् ॥
सुदृष्टां वह्निमन्त्रेण पूजयित्वा तु पातयेत् ।
अभावे सूर्य्यकान्ते वा तदभावे करीषजा ॥
सामान्यायतनागारे आनयेत्ताम्रभाजने ।
त्रपुजे मृन्मये पात्रे कुण्डे पूजान्विते न्यसेत् ॥
अग्निचक्रविधानेन सर्व्वकर्माणि कारयेत् ।
हेम-राजत-ताम्राणि-काष्ठशैलपदीपिवा ॥

रत्नानि चैव पात्राणि शुभदेवाञ्छितानि च।
अर्घ-नैवेद्य पूजार्थं बलिदानञ्च कल्पयेत्॥
पश्चादेवं विधानेन होमं कुर्य्याद्यथाविधि॥

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकर-
णाधीश्वरश्रीहेमाद्रि विरचिते चतुर्व्वर्गचिन्ता-
मणौ व्रतकाण्डे * परिभाषा प्रकरणम्।

---

* व्रतखण्डे इति पुस्तकान्तरे पाठः।

अथ द्वितीयोऽध्यायः ॥

अथ व्रत प्रशंसा ।

तत्र भविष्यत्पुराणे ।

अनग्नयस्तु ये विप्रास्तेषां श्रेयो विधीयते ।
व्रतोपवासनियमैर्नानादानैस्तथा नृप ॥
देवादयो भवन्त्येवं तेषां प्रीता न संशयः ।

महाभारते ।

नास्ति वेदात्परं शास्त्रं नास्ति मातृसमो गुरुः ।
न धर्म्मात्परमस्तीह* तपोनोपोषणात्परम् ॥

अत्रार्थे शतपथी श्रुतिः ।

एतद्वै सर्व्वं तपो यदनाशक इति ।

पद्मपुराणेऽपि ।

ब्राह्मणेभ्यः परं नास्ति पावनं दिवि चेह च ।
उपवासैस्तथा तुल्यं तपः कर्म्म न विद्यते ॥
दिव्यं वर्षसहस्रन्तु विश्वामित्रेण धीमता ।
तपसाक्रान्तमेकेन भक्तेनसच विप्रत्वमागतः ॥

---

* परमोऽस्तौ इति पुस्तकान्तरे पाठः ।

उपोष्य विधिवद्देवास्त्रिदिवं प्रतिपेदिरे।
ऋषयश्च परां सिद्धिमुपवासैरवाप्नुयुः॥
क्षुद्धर्म्मसंस्थान् प्राणांश्च प्रदत्तैर्नैर्थ्यमेव च।
यो दुर्जयांस्तान् जयति स्वर्गस्तेन जितो भवेत्॥
तथा। नाग्निचिन्नरकं याति सत्पुत्री नच सद्व्रती।
नास्ति मेधादियाजी च गोसहस्रप्रदो न च॥
ये कुर्व्वन्त्युपवासांश्च विधानेन शुभान्विताः।
न यान्ति ते मुनिश्रेष्ठ नरकान् भीमदारुणान्।

विष्णुधर्म्मोत्तरे।

व्रतोपवासैर्यैर्व्विष्णुर्नान्यजन्मनि तोषितः।
ते नरा मुनिशार्दूल ग्रहरोगादिबाधिनः॥

स्कन्दपुराणे।

न पूजितो भूतपतिः पुरा यै
र्व्रतं न चीर्णं न च सत्यमुक्तम्।
दारिद्र्यशोका-मय-दुःख-दग्धाः
प्रायोऽनु शोचन्ति त एव मर्त्याः॥
गो-भू-गृह-क्षेत्र-कलत्र-भृत्य-
पुत्रार्थसम्पन्नमताभितप्ताः।
लोभग्रह-ग्रस्तधियोऽत्र मर्त्या
भजन्ति देवं न च सद्व्रतानि॥
त्यक्त्वा च तस्मायोपभोगान्
विषोपमान्मोहकराननित्यान्।

प्रध्वस्तकामो विमदश्च धीरः
सेवेत् स्वधर्म्मञ्च शिवं व्रतञ्च ॥
स्ववर्णधर्म्माभिरतश्च भीतः
शिवव्रती त्र्यम्बकपूजकश्च ।
प्राप्नोत्यवश्यं परमं पदन्तु
न्निरामयं यत् प्रवदन्ति सन्तः ॥

राज्यं श्रियं जगति साधुजनोपभोग्य
माप्नोति चापि शिवलोकमथामृतत्वम् ।
नावाप्यमस्ति भुवनेषु दृढव्रतानां
तस्मात्सदा व्रतपरेण नरेण भाव्यम् ॥
ये सर्व्वदा व्रतपराश्च शिवं स्मरन्ति
तेषां न दृष्टिपथमप्युपयान्ति दूताः ।
याम्या महाभयकृतोऽपि च पाशहस्ताः
दंष्ट्राकरालवदना विकटोग्रवेषा इति ॥

तथा स्कान्दपुराणे ।

शिवं प्रति पार्व्वतीवाक्यं ।

यदि तेऽहमनुग्राह्या यदि ते मयि सौहृदं ।
यत्पृच्छामि महादेव तन्मे ब्रूहि यथातथम् ॥
यांश्च वै नियमान् कुर्य्युर्ब्राह्मणाः क्षत्रिया विशः ।
ये चान्ये नियमाः केचित्तेषां वै ब्रूहि यत् फलम् ॥

नियमोव्रतम् ।

नियमानां हि दृश्यन्ते समृद्धाः फलसिद्धयः ।

यथा विनिमयानाश्च घोरा व्यापत्तयोऽनघ ॥

ईश्वर उवाच।

एष एषैव नियमो नियमस्थैः सुलोचने।
बहुधा क्रियते पुम्भिः कायक्लेशकरः परः ॥
नियमस्तत्र कर्त्तव्यो यद्यद्वै यस्य रोचते।
दुष्करं देवि कुर्व्वाणः सहस्रफलमश्नुते ॥
अनित्ये सुखवित्ते हि मानुष्यं बुद्बुदोपमं।
तेन वैचित्यमापन्नोभिनत्ति नियमं बुधः ॥
दुष्करो नियमः कर्त्तुं मनुष्येण विशेषतः।
रागलोभाभिभूतानरा धर्म्माभिशङ्किनः ॥
वर्त्तमानसुखासक्ता अधर्म्मरुचयोऽबुधाः।
उद्यमाद्यश्च नियमं करोत्यतिमना नरः ॥
स तु वर्षसहस्राणि बह्वलं फलमश्नुते।
असिधाराव्रतं यद्वत्तद्वन्नियमशीलनं ॥
तेन धारणशीलेन नियमस्यानुपालनं।
देवत्वं देवता प्राप्ता नियमान्नियमान्विते ॥
तारारूपा ज्वलन्त्येते नियमात्तु तपोधने।
नियमेन वरारोहे-वेलान्न क्रमतेऽर्णवः ॥
नियमाज्ज्वलते-चाग्निस्तपते नियमाद्रविः।
नियमाद्वर्त्तते वायुर्नियमाद्ध्रियते जगत् ॥
निष्कल्मषं तपः कृत्वा नियमस्य यथातथं।
मान्नियन्निममात् प्राप्ता त्वं शुभे नात्र संशयः ॥

वर्षञ्च नियमं यस्तु कुरुते मत्परोनरः।
स लोके देवतानां हि रमते देववत्सुखं॥

वाराह पुराणे।

अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्मषं।
एतानि मानसान्याहु र्व्रतानि व्रतधारिणि॥
एकभक्तं तथानक्तमुपवासादिकञ्च यत्।
तत्सर्व्वं कायिकं पुंसां व्रतं भवति नान्यथा॥

उपवासोऽत्राहोरात्राभोजनं, आदिशब्दादयाचितादि।

तथा।

किञ्चिद्व्रतं वा क्रियते पूज्यते यत् त्रिलोचन।
विप्रेभ्योदीयते सर्व्वमेतज्जन्मतरोः फलं॥

गरुड़ पुराणे।

तपोगतिर्हि भूतानां तप एव परायणं।
तपसा विजिता लोकास्तपसा निर्व्वृतिः सतां॥
तपसा पूतपाप्मानो निर्व्वाणं परमङ्गताः।
तपसा परमायुश्च शान्तिं वापि तथाप्नुयात्॥
तपसा विन्दते लोकानखिलानपि पूरुषः।
तपसा परमिच्छन्ति निर्व्वाणमपि शाश्वतं॥
तपसा चैहिकीं सिद्धिं विपुलामपि विन्दति।

लभन्ते च सुतादींस्तु तपसा मर्त्यजातयः॥
अक्षयञ्च धनञ्चाहुस्ततस्यन्ते नरा भुवि।
व्रतोपवासनियमैः शरीरोत्तापनन्तपः॥
उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि।
एतद्वीरासनं प्रोक्तं महापातकनाशनं॥
एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः॥

कूर्म्मपुराणे।

व्रतोपवासनियमैर्होमब्राह्मणतर्पणैः।
आराधय महायोगैर्योगिनं हृदि संस्थितं॥
तथा। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तमा।
अर्च्चयन्ति महादेवं यज्ञ-दान-समाधिभिः॥
व्रतोयवासनियमैर्होमैः स्वाध्यायतर्पणैः।
तेषां वै रुद्रसायुज्यं सामीप्यञ्चातिदुर्लभं॥
सलोकता च सारूप्यं जायते तत्प्रसादतः।

गरुड़पुराणे।

धुन्धुमारस्तु राजर्षिर्लेभे पुत्रशतं पुरा।
दानेन नियमेनैव तपसा च व्रतेन च॥
सगरो नाम राजर्षिर्दिक्षु सर्व्वासु विश्रुतः।
पुत्राणाञ्च शतं प्राप्तं तेन राज्ञा महात्मना॥
तथा दशरथो राजा व्रतेषु निरतः सदा।

यज्ञ दान तपो योगैः सन्तुष्टः पुरुषोत्तमः।
स्वयं पुत्रत्वमापेदे तस्य राज्ञो महात्मनः॥
जनको नाम राजर्षिस्तपोव्रतनिधिः स्वयम्।
ऐश्वर्य्यमतुलं प्राप्य योगिनां गतिमाप्नुयात्॥
एवमेव महाराज राजानो ब्राह्मणास्तथा।
ऐश्वर्य्यलक्षणं प्रापुर्गतिं वै व्रतवैभवात्॥
अतः कुरुष्व सततं तपः सञ्चयमात्मवान्।
व्रतोऽपवासनिरतस्तीर्थानि नृपसत्तम॥

तथा। विनिग्रहश्चेन्द्रियाणां कुर्व्वीत नियमात्मवान्।
उपवास जप,ध्यान तीर्थस्नाना,दिकैरपि॥
व्रतैर्यज्ञेन दानेन तपसा तीर्थसेवया।
अनेकजन्मसंसिद्धिमेनःक्षपयति द्विजः॥

व्रतादीनां चातुर्व्वर्णसाधारणत्वाभिधानात् द्विजग्रहण मत्र वर्णमात्रोपलक्षणार्थं। नचैवंसति शूद्रस्य यज्ञेऽनधिकाराद्यज्ञशब्दविरोध इति वाच्यं। यज्ञैरनेकार्थत्वेन देवतापूजाद्यर्थसम्भवात्।

कायिकं मानसञ्चैव वाचिकञ्च त्रिधा मतं।
यज्ञोदानं तपश्चैव वदतस्तच्छृणुष्व मे॥
अहिंसा व्रतचर्य्या च तपः कायिकमुच्यते।
वाचिकं सत्यवचनं भूतद्रोहविवर्जितम्॥
मानसं मनसः शान्तिः सर्व्ववैराग्यलक्षणं।

आदित्यपुराणे।

व्रतोपवासान् खलु यो विधत्ते
दारिद्र्यपाशं स भिनत्ति चाशु ।
व्रतोपवासेषु रतस्य पुंस
स्त्वैवापदः शान्ति वदन्ति तज्ज्ञाः ॥

इति श्री हेमाद्रि विरचिते चतुर्वर्गचिन्तामणौ
व्रतखण्डे व्रतप्रशंसा प्रकरणम् ।

अथ तृतीयोऽध्यायः ।

—:○:—

अथ व्रतसामान्यधर्म्मा स्तदधिकारिणश्च निरूप्यन्ते ।

स्कन्दपुराणे ।

निजवर्णाश्रमा-चार-निरतः शुद्धमानसः ।
व्रतेष्वधिकृतोराजन्नन्यथा विफलः श्रमः ॥
अलुब्धाः सत्यवादी च सर्व्वभूतहिते रतः ।
व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः ॥
श्रद्धावान्नग्रायभीरुश्च मदम्भविवर्जितः ।
व्रतेष्वधिकृतोराजन्नन्यथा विफलः श्रमः ॥
समः सर्व्वेषु भूतेषु शिवभक्तो जितेन्द्रियः ।
व्रतेष्वधिकृतोराजन्नन्यथा विफलः श्रमः ॥
पूर्व्वं निश्चित्य शास्त्रार्थं यथावत् कर्म्मकारकः ।
अवेदनिन्दको धीमानधिकारी व्रतादिषु ॥

महाभारते ।

श्राद्धकर्म्म तपश्चैव सत्यमक्रोध एव च ।
स्वेषु दारेषु सन्तोषः शौचं नित्यानसूयता ॥
आत्मज्ञानन्तितिक्षा च धर्म्मः साधारणो नृप ।

देवलोऽपि ।

व्रतोपवासनियमैः शरीरोत्तापनैस्तथा ।
वर्णाः सर्व्वेऽपि मुच्यन्ते पातकेभ्यो न संशय इति ॥

तदेवंवचनसन्दर्भणोक्तनियमवतां चतुर्णामपि वर्णानां स्त्रीपुं-साधारणेन व्रतेष्वधिकार इति प्रतिपाद्यते ।

तथा च महाभारते ।

मामुपाश्रित्य कौन्तेय येऽपिस्युःपापयोनवः ।
स्त्रियो वैश्यास्त्र शूद्रास्त्र तेऽपि यान्ति पराङ्गतिमिति ॥

तत्रायं परोविशेषो यत्स्त्रीणां भर्त्तुराज्ञां विना न स्वातन्त्र्येण व्रतादिष्वधिकार इति ।

तथा च मार्कण्डेय पुराणे ।

नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषणं ।
भर्तृशुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि ॥
यद्देवेभ्यो यच्च पित्रादिकेभ्यः
कुर्य्याद्भर्त्ताभ्यर्च्चनं सत्क्रियाञ्च ।
तस्यार्द्धं वै सा फलं नान्यचित्ता
नारी भुंक्ते भर्तृशुश्रूषयैव ॥
धर्म्मार्थकामसंसिद्धेर भवेद्भर्तुः सहायिनी ॥

आदित्य पुराणे ।

नास्ति स्त्रीणां पृथग्यज्ञोन व्रतं नाप्युपोषणं ।
पतिं शुश्रूषतेया तु तेन स्वर्गे महीयते ॥
पत्युरभ्यधिकं नारी नोपवासव्रतञ्चरेत् ।

अनायुष्यं द्विजश्रेष्ठ पत्युस्तस्यास्तदुच्यते ॥
देवताराधनङ्कुर्य्यात् कामं वा ब्राह्मणोत्तमः ।
नारी पतिव्रता नाम प्राप्यानुज्ञान्तु भर्त्तृतः ॥
नारी खल्वननुज्ञाता पित्रा भर्त्रा सुतेन वा ।
विफलन्तद्भवेत्तस्या यत्करोत्यौर्द्ध्वदेहिकं ॥

पित्रेति कन्यात्वे । भर्त्रेति सौभाग्यदशायां । सुतेनेति वैधव्यदशायां । और्द्ध्वदेहिकं व्रतानि ।

अथवा सर्व्वमुत्सृज्य पतिपूजनतत्परा ।
केशवाराधनङ्कुर्य्यात् साध्वी स्त्री पुरुषर्षभा ॥
विनैव सर्गमाप्नोति यत् किञ्चिन्मनसेच्छति ।
अफलं सर्व्वमेव स्यात् भर्त्तनुज्ञां-विना कृतं ॥
केशवाराधनं यच्च तथापि सफलं स्त्रियः ॥

तथा हरिवंशे ।

अरुन्धतीं प्रतिपार्व्वतीवचनं ।

सतीत्वधर्म्मचरणं यस्या नित्यमखण्डितं ।
पुण्यकानां विधिस्तस्याः पुराणे परिकीर्त्तितं ॥
दानोपवासपुण्यानि सुकृतान्यप्यरुन्धति ।
निःफलान्यसतीनां हि पुण्यकानि तथा शुभे ॥

पुण्यकानि व्रतानि ।

या नर्च्चयन्ति भर्त्तारं योनिदुष्टाश्च याः स्त्रियः।
योनिदोषात् पुण्यफलं नाश्नन्ति निरयङ्गमाः॥
साध्व्यो जगद्धारयन्ति सुशीलाः पतिदेवताः।
अनन्यधर्म्मनित्याश्च सतां पन्थानमाश्रिताः॥
अवाक्दुष्टाः शौचयुक्ताः धृतिमत्यः शुचिव्रताः।
सततं साधुवादिन्यो धारयन्ति जगत् खलु॥
व्याधितः पतितोवापि निर्द्धनोवा कथञ्चन।
न त्यक्तव्यः स्त्रिया भर्त्ता धर्म्म एष सनातनः॥
अकार्य्यकारिणं वापि निर्गुणं स्त्री पतिं तथा।
तारयत्येव साध्वी सा तथात्मानं शुभानने॥
योनिदुष्टस्त्रियोनास्ति प्रायश्चित्तं हतैव सा।
वाक्दुष्टे विहितं सद्भिः प्रायश्चित्तं पुरातनैः॥
भर्त्तुः छन्देन कर्त्तव्यं व्रतकं सर्व्वदा स्त्रियाः।
उपवासोऽपि वा सत्ये काङ्क्षन्त्यास्तु शुभाङ्गतिं॥
कल्पान्तरसहस्रेषु न स्त्री सा लभते गतिं।
तिर्य्यग्योनिसहस्रेषु पच्यते योनिविभ्रमात्॥
यदि स्यान्नाम मानुष्यं स्त्री लभेदसती सती।
चण्डालयोनौ दुर्म्मेधा जायते कुक्कुरानना॥
भर्त्ता देवः सदा स्त्रीणां स्त्रीभिर्दृष्टः सनातनः।
यस्याहि तुष्यते भर्त्ता सा सती धर्म्मचारिणी॥
कौतूहलहतानान्तु स्त्रीणां लोकेन शोभनः।
भर्त्तर्य्येव मनो यासां सद्भावेन व्यवस्थितं॥
कर्म्मणा मनसा वाचा पतिं नातिचरन्ति याः।

तासां पुण्यफलं सौम्ये पुण्यकैः समुदाहृतम् ॥
पुण्यकानां विधिं कृत्स्नं सर्व्वलोकं प्रति शोभने ।
निबोध स हि सर्व्वाद्भि दृष्टोऽयं तपसा मया ॥
स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत्सती ।
उपवासार्थमथवा व्रतकार्य्यं धृतव्रते ।
स्पृष्ट्वा कराभ्यां चरणौ सततं सत्तमस्य च ॥
गृहीत्वौदुम्बरं पात्रं सकुशं साक्षतं तथा ।
गोशृङ्गं दक्षिणं सिच्यं प्रतिगृह्णीत तज्जलम् ॥
ततो भर्त्तुः सती दद्यात् स्नातस्य प्रयतस्य च ।
आत्मनोऽथ निषेक्तव्यं ततः शिरसि तज्जलम् ॥
त्रैलोक्ये सर्व्वतीर्थेषु स्नानमेतदुदाहृतम् ।
उपवासेषु कर्त्तव्यमेतद्धि व्रतकेषु च ॥
स्नानमेतद्धि सामान्यं स्त्रीणां पुंसाञ्च भामिनि ।
अरुन्धति मया दृष्टं तपसा हरतोषकम् ॥
अमूल्यं विद्धि शयनमासनञ्च तथा विधम् ।
स्वयं प्रक्षालणं चापि पादयोरनुशब्दितम् ॥

अनुशब्दितं व्रतोपयोगितया कथितम् ।

अश्रुप्रपातो रोषश्च कलहस्य कृतिः सति ।
उपवासात् व्रताच्चापि सद्यो भ्रंशयति स्त्रियम् ॥
शुक्लमेव सदा वासः प्रशस्तं चन्द्रसम्भवे ।
अन्तर्वासोऽपरश्चैव उपवासव्रते तथा ॥
पादुकार्थस्तृणैः कार्य्यः सर्व्वदा व्रतके सति ।

उपवासेऽपि च विधिरेष एव प्रकीर्त्तितः ॥
अञ्जनं रोचनञ्चापि गन्धान् सुमनसस्तथा ।
व्रतके चोपवासे च नित्यमेव विवर्ज्जयेत् ॥
'रोचनं कुङ्कुमादिना, मुखोज्ज्वलीकरणम् ।
दन्तकाष्ठं शिरःस्नानमुद्वर्त्तनमथापि वा ।
विवर्जितां मृदं सर्व्वां शौचार्थन्तु विधीयते ॥
तिलामलकफलैर्नित्यं श्रीफलैश्च समाचरेत् ।
प्रक्षालनञ्च शिरसः सदाम्भिमिश्रितैर्जलैः ॥
शिरसोऽभ्यञ्जनं सौम्ये नैवमेतत् प्रशस्यते ।
न पादयोर्न गात्रस्य स्नेहेनेति स्थितिः स्मृता ॥
गोयानमुष्ट्रयानञ्च कथञ्चिदपि नाचरेत् ।
खरयानञ्च सततं व्रते चाप्युपवासके ॥
नदीजलं प्रस्रवजं शस्तं वै सोमनन्दिनि ।
शुभे तडागे वाप्यादौ विस्तीर्णे जलजाप्लुते ॥
गत्वा स्नानं प्रशस्तन्तु सदैव खलु सर्व्वथा ।
अलाभे त्ववरुद्धा स्त्री घटस्नानं समाचरेत् ॥
नवैश्च कुम्भैः स्नातव्यं विधिरेष सनातनः ।
स्नानञ्च कार्य्यं शिरसा तपःफलमवाप्नुयात् ॥

भविष्यत्पुराणे ।

क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः ।
देवजाग्निहवनं सन्तोषः स्तेयवर्ज्जनम् ।
सर्व्वव्रतेष्वयं धर्म्मः सामान्यो दशमः स्थितः ॥

अत्र क्षमादीनां स्वतन्त्रतया चतुर्वर्गसाधनत्वेन विहितानां व्रताङ्गतयाभिधानं खादिरं वीर्य्यकामस्येत्यादिवत्संयोगपृथ-क्त्वन्यायादुपपन्नम् ।

मत्स्यपुराणे ।

तस्मात् व्रतोपवासेन स्नानमभ्यङ्गपूर्व्वकम् ।
वर्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप ॥

यत्तूक्तं गरुडपुराणे ।

गन्धा-लङ्कार-वस्त्राणि पुष्पमाला-नुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनमिति ॥

यच्च व्यासोक्तम् ।

दन्तधावनपुष्पाणि व्रतेपि स्यान्न दुष्यति ॥

तदेतत्सभर्त्तृकोपवासविषयं ।

भविष्यत्पुराणे ।

अञ्जनञ्च सताम्बूलं सिन्दूरं रक्तवाससी ।
विभृयात्तोपवासापि अवैधव्यकरं परं ।
विधवा यतिमार्गेण कुमारी वा यदृच्छया ॥

पद्मपुराणे ।

गर्भिणी सूतकादिस्थ कुमारी वाथ रोगिणी ।

यदाशुद्धा तदान्येन कारयेत् प्रयता स्वयं॥

गर्भिण्यादिरुपवासे कर्त्तव्ये नक्तं कुर्य्यात्।

सूतकादिभिरशुद्धा अन्येन व्रतं कारयेत्। प्रयता शुद्धा, स्वयं कुर्य्यात्, पूंसोप्येषविधिः। लिङ्गस्याविवक्षितत्वात् तदेवं स्त्रीणां कन्यादशायां पित्रादेराज्ञया, विवाहानां भर्तृराज्ञया, विधवानां पुत्राद्याज्ञयैव व्रताधिकारोनान्यथेति सिद्धं।

अग्निपुराणे।

व्रीहिषष्टिकमुद्गाश्च कलायाः सलिलं पयः।
श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः॥
कूष्माण्डालावुवार्त्ताकीपालङ्क्य ज्योत्स्निकास्त्यतेत्।
चरुभैक्ष्यं शक्तुकणाः शाकन्दधि घृतं मधु॥
श्यामाकाः शालि नीवारा यावकं मूलतन्दुलं।
हविष्य व्रतनक्तादावग्निकार्य्यादिकं हितं॥
मधु मांसं विहायान्यद्व्रते च हितमीरितं॥

'ज्योत्स्निका, कोशातकी।

छन्दोगपरिशिष्टे।

कात्यायनः।

हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः।
माषकोद्रवगौरादीन् सर्व्वाभावेऽपि वर्जयेत्॥

भविष्योत्तरे।

हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ।
कन्दः सैन्धव सामुद्रे* लवणे मधुसर्पिषी† ॥
पयोऽनुद्धृतसारञ्च पनसा,म्र,हरीतकी ।
पिप्पली जीरकञ्चैव नागरङ्गञ्च तिन्तिटी ॥
कदली लवली धात्री फलान्यगुडमैक्षवम् ।
अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ॥

सर्पिः पयश्चात्र गव्यं। अतैलपक्वमित्येतत् कथितहविष्याणामेव विशेषणमिदं ।

पद्मपुराणे ।

हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्यां नक्तभोजी षडाचरेत् ॥

अग्निकार्य्यमत्र महाव्याहृतिमन्त्रैराज्यहोमः ।

स्कन्दपुराणे ।

अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हवि र्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥

पयःपानादीनामव्रतघ्नत्वं स्त्री-बाला-त्यन्तन्तपीडित-व्रतविषयम् ।

---

* लवणे सैन्धरसामुद्रे इति पुस्तकान्तरे पाठः ।

† लवणे च दधिसर्पिषीति पुस्तकान्तरे ।

सर्व्वभूतभयञ्चैव प्रमादो गुरुशासनम्।
अव्रतघ्नानि कथ्यन्ते सकृदेतानि शास्त्रतः॥
सर्व्वभूत भयं सर्व्वेभ्यो भूतेभ्यः सकाशाद्व्रतकर्त्तुर्भयम्।
मोहात् प्रमादाल्लोभाद्वा व्रतभङ्गोभवेद्यदि।
तदा त्रिरात्रं नाश्नीयात् कुर्य्याद्वा केशमुण्डनम्।
प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्॥

इति श्रीमहाराजाधिराज श्रीमहादेवस्य समस्त करणाधीश्वर श्रीहेमाद्रिपण्डितकृते चतुर्व्वर्ग-चिन्तामणौ व्रतखण्डे व्रताधिकारित-धर्म्मनिरूपणं नाम प्रकरणम्।

अथ चतुर्थोऽध्यायः।

—०✳०—

गुणानामाधारो मलयजरसालेपसुहृदां
प्रसिद्धो हेमाद्रिः स्फुरदमलशास्त्रार्थनिलयः।
स लोकानां कर्त्तुं सुकृतनिपुणानामुपकृतिं
व्रतव्रातं कृत्स्नं कथयति तिथीनां क्रमवशात्॥
वदति सम्प्रति सम्मतिपत्तये
सुकृतिनां कृतिनामपि सम्मतम्।
व्रतसमुच्चयसमुच्चयशस्करं
प्रतिपदाश्रित पदाश्रित कामधुक्॥

अथ व्रतान्यभिधीयन्ते।

तत्र तिथिव्रतप्रकरणे प्रतिपद्व्रतानि तावदुच्यन्ते।

शतानीक उवाच।

द्विजैतास्तिथयः प्रोक्ताः संक्षेपानतु विस्तरात्।
विस्तरेणैव मे ब्रूहि भूयोद्विजवरोत्तम॥
रहस्यं यत्तिथीनाञ्च देवतानाञ्च चेष्टितम्।
यानीष्टानि च देवानां भोज्यानि नियमास्तथा॥
तानि मे वद धर्म्मज्ञ येन पूतो भवाम्यहम्।
निर्धनोऽपि यथा विप्र लभेदिष्ट फलानि* च॥

---

* द्विव्यफलानीति पुस्तकान्तरे पाठः।

सुमन्तुरुवाच।

रहस्यं यत्तिथीनाञ्च भोजनं फलमेव च।
यावांश्च यस्य नियमो विशेषात् स्त्रीजनस्य च॥
एवन्तु सर्व्वमाख्यानं रहस्यं तन्निबोध मे।
पद्मासनोक्तं पूर्व्वन्तु कथञ्चित् स्वप्रियस्य तु॥
ततोऽहं संप्रवक्ष्यामि यस्य देवस्य या तिथिः।
देवतानां रहस्यानि व्रतानि नियमास्तथा॥
तान् शृणुष्व महाभाग गदतोमम मानद।
ब्रह्मा नारायणश्चैव सृष्टिं कर्त्तुं समुद्यतौ॥
ताभ्यां तदानीमखिलद्यावाभूमी च निर्म्ममे।
दिशश्च प्रदिशश्चैव लोकपालाष्टकावृताः॥
तिथिं पूर्व्वामिमां राजन् चकाराधिपतिः स्वयम्।
तिथीनां प्रवरा यस्मात् ब्रह्मणा समुदाहृता॥
प्रतिपादिता पदे पूर्व्वे प्रतिपत्तेन कथ्यते।
अस्यान्ते कथयिष्यामि चोपवासविधिं परम्॥
कार्त्तिक्यामथ सप्तम्यां वैशाख्यां वा युगादिषु।
नियमोपवासं प्रथमं ग्राहयेत विधानवित्॥

कार्त्तिके वैशाखे वा मासि प्रतिपत्तिथिव्रतस्यारम्भः। सप्तमीव्रते माघे। युगादि तिथि व्रतस्य माघ वैशाख भाद्रपद कार्त्तिकेष्वन्यतमे आरम्भः।

या तिथिर्नियमं कर्त्तुं शक्या समनुगच्छति।
तस्यां तिथौ विधानं यत्तन्निबोध जनाधिप॥

नियमोपवासं प्रथमं ग्राहयेद्विधिवन्नरः ।
यदा वै प्रतिपद्यादौ गृह्णीयान्नियमं नृप ॥
चतुर्द्दश्यां कृताहारः सङ्कल्प्य परिकल्पयेत् ।
अमावास्यां न भुञ्जीत त्रिकालं स्नानमाचरेत् ॥
पवित्राणि जपेन्नित्यं गायत्रीं शिरसा सह ।
अथवेदपवित्राणि वक्ष्याम्यहमतःपरम् ॥
येषां जपैश्च होमैश्च पूयन्ते तमसावृताः ।
अघमर्षणं देवकृतः शुद्धवत्यस्तरत्समाः ।
कुष्माण्डाः पावमान्यश्च दुर्गासावित्रिरेव च ॥
भारुण्डानि च सामानि गायत्रं रैवतं तथा ।
शतपर्वाथर्वशिरस्त्रिसुपर्णं महाव्रतम् ॥
अभिषङ्गापदस्तोभः सामानि व्याहृतिस्तथा ।
अग्लिङ्गावार्हस्पत्यञ्च वाक्सूक्तं मध्वृतस्तथा ॥
तथा । पुरुषसूक्तमघनाशञ्च तथा देवव्रतानि च ।
गोसूक्तमश्वसूक्तञ्च ऐन्द्रशुद्धे च सामनी ॥
त्रीण्याज्यदोहानि रथन्तरञ्च
अग्निव्रतं वामदेव्यं बृहच्च ।
एतानि जप्तानि पुनन्ति जन्तून्
जातिस्मरत्वं लभते य इच्छन् ॥
अर्च्चयित्वा विधानेन गन्धमाल्यैर्द्विजोत्तमान् ।
शक्त्या क्षीरं प्रदद्यात्तु ब्रह्मा मे प्रीयतां विभुः ॥
ततो भुञ्जीत गोक्षीरमनेन विधिना नृप ।
एष एव विधिः प्रोक्तः सर्व्वासु तिथिषु नृप ॥

सर्व्वासु तिथिषु मार्गशीर्षादिप्रतिपत्सु।
संवत्सरगते काले व्रतमस्य समाप्यते।
व्रतान्ते यत् फलं यस्य तन्निबोध नराधिप॥
विमुक्तपापशुद्धस्य दिव्यदेहस्य देहिनः।
ब्रह्मा ददाति सन्तुष्टो विमानममितौजसम्॥
अव्याहतगतिं दिव्यमप्सरःकिन्नरैर्व्वृतम्।
रमित्वा सुचिरं तत्र देवतैः सह देववत्॥
इह चागत्य विप्रत्वं दशजन्मान्यसौ लभेत्।
वेदवेदाङ्गविद्यज्ञो विद्वान् दीर्घायुरेव च॥
भोगी धनपतिर्दाता जायतेऽसौ कृते युगे।
क्षत्रियो वैश्यः शूद्रो वा ब्राह्मणत्वमवाप्नुयात्॥
हैहयैस्तालजङ्घैश्च तुरुष्कैर्य्यवनैः शकैः।
उपोषिता इहाचैव ब्राह्मणत्वं लभन्ति ते॥

इति भविष्यत्पुराणे क्षीरप्रतिपद्व्रतम्।

सनत्कुमार उवाच।

अथ त्वं प्रतिपत्कल्पं शृणु सम्पत्करं व्रतम्।
यत् कुर्व्वाणः श्रियं विन्देद्दुर्लभं मानुषैरिह॥
शालितन्दुलसंसिद्धे मण्डले चतुरस्रके।
श्रीशं श्रियमथावाह्य पूजयेत्सपुरःसरम्॥

अप्रच्छन्नदलैः पद्मैरयुतैस्तं प्रपूजयेत् ॥
अप्रच्छन्नदलैः विकसितैः।
सहस्रैर्वा यथा योगं पयसा पायसेन च।
ततश्च विधिनाभ्यर्च्य पार्श्वे देवीं सरस्वतीम् ॥
अथातः पूजयेदिन्दुं गुरुं पश्चादनन्यधीः।
परिवारनियोगेन तांश्च सत्कारयेदथ ॥

प्रार्थनामन्त्रः।

मम विद्यां प्रदिश तु देवो वागीश्वरो हरिः।
विद्याधिदैवतं देवी विद्यां दिशतु मेन्दिरा ॥
सरस्वती प्रदिश तु वाग्बुद्धिमतिशालिनीम्।
शीतांशुरपि मे पुष्टिं सर्व्वभोगप्रपूरिणीम् ॥

पूजा-प्रणवादिनमोन्तैर्नाममन्त्रैरेव कर्त्तव्या।

इत्येवं कारयेत्साध्यं प्रसन्नः पूजितो गुरुः ॥

साध्यं शिष्यमुपदेश्यम्।

विधिना चोपवासन्तु कारयेन्नियमान्वितम्।
समभ्यर्च्य द्वितीयायां देवदेवं श्रियःपतिम्।
भुञ्जीत पयसान्नेन शुचिराचम्य सन्निधौ ॥

साध्य इपि शेषः।

आचार्य्याय वरं दत्त्वा कुर्य्यात् सुप्रीणनं पुनः।

वरशब्देन हिरण्यमभिधीयते।

अनधीतमनारब्धं तदानीमारभेत ह।
विद्याव्रतप्रदं नित्यं गुरुं दैवतमित्यपि॥

मन्येतेतिशेषः।

तन्मुखाद्धि तदा तस्य निश्चयसमागमम्।

निःश्रेयसमतिशयितं श्रेयः।

तदा तदुक्तकारी स्यान्नस्यात्तच्छासनातिगः।
तिष्ठेत्तिष्ठतु गुरुषु न चासीत तदग्रतः॥
न शयीत तदासीने कुर्व्वीत वचनान्यपि।
न लङ्घयीत वचनं गुरोः कृच्छ्रगतेन च।
निवेद्य गुरवे सर्व्वं कुर्य्यादादौ हिताहितम्॥
एवमाचार्य्यनिष्ठस्तु मतिमान् प्राज्ञसम्मतः।
उत्पन्नज्ञानवैराग्यो दीर्घमायुरवाप्य च॥
यशश्च विपुलं लब्ध्वा सदाचारप्रवर्त्तनम्।
पुत्र पौत्र श्रिया जुष्टः* पुण्याङ्गतिमवाप्नुयात्॥
एवं समापयेद्विद्वान्विद्याव्रतमुदारधीः।
दद्यात् फलानि विप्रेभ्यो ह्युत्कृष्टानि बहून्यथ॥
कदली-चूत-पनस-सम्भवानि शुचीनि च।
यस्त्वेवं कुरुते विद्वान् विद्याव्रतमनन्यधीः।
समस्तविद्यानिपुणो वैष्णवं पदमृच्छति॥

---

* यक्त इति पुस्तकान्तरे पाठः।

इति गरुड़ पुराणोक्तं विद्याप्रतिपद्व्रतम् ।

—:○:—

पुष्कर उवाच ।

संवत्सरावसाने तु पञ्चदश्यामुपोषितः ।
प्रातःप्रतिपदि स्नातः कुर्य्याद्व्रतमनन्यधीः ॥
पूजयेद्भास्करं देवं वर्णकैः कमले कृते ॥

शुचौ स्थण्डिलदेशे नानावर्णैः कमलं विधाय तत्र भास्करं ध्यात्वा पूजयेदित्यर्थः ।

शुक्लेन गन्धमाल्येन चन्दनेन सितेन च ।
तथा कुन्दुरुधूपेन घृतधूपेन भार्गव ॥

'कुन्दुरुः, सल्लकीनिर्य्यासः ।

अपूपैः सैकतैर्दध्ना परमान्नेन भूरिणा ॥

सैकतैः शर्कराविकारैः ।

ओदनेन च शुक्लेन सता लवणसर्पिषा ।

'सता, उत्तमेन ।

क्षीरेण च फलैः शुक्लैर्व्विक्लिन्नाह्मण तर्पणैः ।
पूजयित्वा जगद्धाम दिनभागे चतुर्थके ॥
आहारं प्रथमं कुर्य्यात्सघृतं मनुजोत्तम ।
सर्व्वञ्च मनुजश्रेष्ठ घृतहीनं विवर्जयेत् ॥

भुक्त्वा च सकृदेवान्नमाहारञ्च समाचरेत्।
पानीयपानं कुर्व्वीत ब्राह्मणानुमते पुनः॥

प्रथममाहारं प्रथमग्रासं। सर्व्वं प्रथममप्रथमञ्चाहारं सकृदेवान्नं भुक्त्वा एकमेव ग्रासं भक्षयित्वाऽवशिष्टमन्नं त्यजेत्। ब्राह्मणानुमत्या पुनराहारमवशिष्टान्नभोजनं पुनः पानीयपानञ्च कुर्य्यादित्यर्थः। ब्राह्मणानुमत्या भुञ्जानोऽपि घृतहीनं न भुञ्जीत घृतहीनं विवर्जयेदिति निषेधात्।

संवत्सरमिदं कृत्वा ततः साक्षात् त्रयोदशम्।
पूजनं देवदेवस्य तस्मिन्नहनि भार्गव॥

संवत्सरं प्रतिमासं शुक्ल प्रतिपदि ततः साक्षात् त्रयोदशमितिलिङ्गदर्शनात्।

समापयेत् व्रतं पुण्यं राम इत्यभिधीयते।
हे राम, शास्त्रे एवमभिधीयतइत्यर्थः।
स हिरण्यं सवस्त्रञ्च तथा दद्या द्विजोत्तम॥

सूर्य्यायेति शेषः।

व्रतेनानेन धर्म्मज्ञ रोगमेवं व्यपोहति॥

आरोग्यमाप्नोति गतिं तथाग्र्यां
यशस्तथाग्र्यां विपुलांश्च भोगान्।
व्रतेन सम्यक् पुरुषोऽथ नारी
संपूजयेद्यस्तु जगत्प्रधानं॥

इति विष्णुधर्मोत्तरे सोद्यापनमारोग्य-प्रतिपद्व्रतम् ।

—०*०—

मार्कण्डेय उवाच ।

अष्टपत्रन्तु कमलं विन्यसेद्वर्णकैः शुभैः ।
ब्रह्माणं कर्णिकायान्तु तस्य संपूजयेद्विभुम् ॥

'तस्य, कमलस्य ।

ऋग्वेदं पूर्व्वपत्रे तु यजुर्व्वेदन्तु दक्षिणे ।
पश्चिमे सामवेदन्तु उदक् चाथर्व्वणं तथा ॥
आग्नेये च तथाङ्गानि धर्म्मशास्त्राणि नैर्ऋते ।
पुराणञ्चैव वायव्ये ऐशान्ये न्यायविस्तरौ ॥
एवं विन्यस्य धर्म्मज्ञः सोपवासस्तु पूजयेत् ।
चैत्र शुक्लमथारभ्य सोपवासो जितेन्द्रियः ॥
सदा प्रतिपदं प्राप्य शुक्लपक्षस्य यादव ।
संवत्सरं महाभाग शुक्लगन्धानुलेपनैः ।
भूरिणा परमान्नेन धूपदीपैरतन्द्रितः ॥
संवत्सरान्ते गान्दद्यात् व्रते चीर्णे नरोत्तमः ।

इदं व्रतं यस्तु करोति राजन्
स वेदविल्याद्भुवि धर्म्मनिष्ठः ।
कृत्वा तदा द्वादशवत्सराणि
विरिञ्चिलोकं पुरुषः प्रयाति ॥

इति विष्णुधर्म्मोत्तरोक्तं सोद्यापनं विद्याव्रतम्।

मार्कण्डेय उवाच।

एक एव जगत्सर्व्वं प्रकृतिः पुरुषः स्मृतः।
चैत्रशुक्लसमारम्भे सोपवासो जितेन्द्रियः॥

समारम्भे, वर्षारम्भे।

पूर्व्ववत् पञ्चदश्यामुपवासः।

पुरुषं पूजयेद्विष्णुं स्थले वा यदि वा जले।
गन्ध-माल्य-नमस्कार-धूप-दीपान्न-सम्पदा॥
पौरुषन्तु तथा सूक्तं जपेदन्तर्जले नरः।

शुचौ जले विष्णुं ध्यायन् गन्धादिभिः पूजयेदित्यर्थः।

तथार्च्चनं प्रत्यृचञ्च धूपं दद्याज्जलाञ्जलिम्।
तथा पुष्पाणि धर्म्मज्ञ फलानि च महाभुज॥
धूपं दत्त्वा च नैवेद्यं जपेच्च तथा तथैव तत्।
जुहुयाच्च तथाज्येन द्विजे दद्याच्च काञ्चनम्॥
आहारं पयसा दद्यान्निशाकाले च भार्गव।
दद्यात्संवत्सरं कृत्वा नित्यव्रतमतन्द्रितः।
पञ्चयोरुभयोर्वीर सर्व्वपापैः प्रमुच्यते॥

प्रसादमासाद्य च वासुदेवात्
सर्व्वेश्वरात्सर्व्वगतादचिन्त्यात्।
लोकेश्वरादेव पदं प्रयाति
यां यान्ति सिद्धाः पुनरेव सिद्धिम्॥

इति विष्णुधर्म्मोत्तरे पौरुषप्रतिपद्व्रतम् ।

उद्यापनमन्त्रः पूर्व्ववत् ।

सुमन्तुरुवाच ।

पौर्णमास्युपवासन्तु कृत्वा भक्त्या नराधिप ।
अनेन विधिना यस्तु विरिञ्चिं पूजयेन्नरः ॥

पौर्णमासीग्रहणं पूर्व्वदिनोपलक्षणं तेन यदा शुक्लप्रतिपदि व्रतं क्रियते तदामावास्यायामुपवासः ।

अनेन वक्ष्यमाणेन ।

प्रतिपद्यां महावाहो स्नातश्चैव समाहितः ।
अग्निर्विशेषतो देवो विरिञ्चिर्वात्र देवता ॥
कार्त्तिके मासि देवस्य रथयात्रा प्रकीर्त्तिता ।
यः कुर्य्यान्मानवो भक्त्या याति ब्रह्मसलोकताम् ॥
कार्त्तिके मासि राजेन्द्र पौर्णमास्यां चतुर्म्मुखम् ।
मार्गेण मुदितः सर्व्वं नानावासैः समन्वितम् ॥
स्थापयेद्भ्रामयित्वा तु सलोकं नगरं नृप ।
ब्राह्मणान् भोजयित्वा तु शाण्डिलेयं प्रपूज्य च ॥

शाण्डिलेयो वैश्वानरः ।

आमोदयेद्देवदेवं ब्रह्मवादित्रनिस्वनैः ।
रथाग्रे शाण्डिलीपुत्रं पूजयित्वा विधानतः ॥
ब्राह्मणानर्च्चयित्वा तु कृत्वा पुण्याहमङ्गलम ।

ध्वमारोपयित्वा तु रात्रौ कुर्य्यात् प्रजागरम्॥
नानाविधैः प्रचपैश्च ब्रह्मघोषैश्च पुष्कलं।
कृत्वा प्रजागरन्त्वेवं प्रभाते ब्राह्मणान् नृप॥
पूजयित्वा यथाशक्त्या भक्ष्यभोज्यैरनेकशः।
पूजयित्वाजनं वीर वर्ण्णेण विधिना नृप॥
वाजेन च महाबाहो पयसा पायसेन च।

वर्ज्जमाज्यम्, वाजमन्नम्।

ब्राह्मणान्वाचयेद्रात्रौ नागेन विधिना नृप।
कृत्वा पुण्याहशब्देन रथञ्च भ्रामयेत्पुनः॥
चतुर्व्वेदविद्वैर्विप्रैर्भ्रामयेत् ब्राह्मणीरथम्।
बह्वृचा यजुषा वीर छन्दोगाथर्व्वभिस्तथा॥
भ्रामयेद्देवदेवस्य शुभश्रेष्टस्य तं रथम्।
प्रदक्षिणं पुरं सर्व्वं मार्गेण सुसमेन च॥
आरोढव्यं रथं वीर शूद्रेण शुभमिच्छता।
नारोहयेद्रथं प्राज्ञो मुक्तकं भोजकं नृप॥
ब्रह्मणो दक्षिणे पार्श्वे सावित्रीं स्थापयेन्नृप।
भोजको वामपार्श्वे तु पुरतः पङ्कजं न्यसेत्॥
एवं रूपं निनादैश्च शङ्खशब्दैश्च पुष्कलैः।
भ्रामयित्वा रथं वीर पुरं सर्व्वं प्रदक्षिणम्॥
स्थापयेत् स्थापयेद्वीर कृत्वा नीराजनं बुधः।
एवं यः कुरुते यात्रां भक्त्या यश्चापि पश्यति॥
रथं वा कर्षयेद्यस्तु दीपं यस्तु प्रदापयेत्।

शालायां ब्राह्मणः कुर्य्यात् समिच्छेत्परमं पदम्॥
प्रतिपत् ब्रह्मणश्चापि गुडमिश्रैः प्रपूजयेत्।
वासोभिरहतैश्चापि स गच्छेत् ब्रह्मणः पदम्॥
गन्धैः पुष्पैर्नैवेद्यैस्तैरात्मानं पूजयेच्च यः।
तस्यां प्रतिपदायान्तु स गच्छेत् ब्रह्मणः पदम्॥
महापुण्या तिथिरियं बल्ली राज्यप्रवर्त्तिनी।
ब्रह्मणस्तु प्रिया नित्यं बालेयी सा प्रकीर्त्तिता॥
ब्राह्मणान् पूजयेद्योऽस्यामात्मानञ्च विशेषतः।
स याति परमं स्थानं विष्णोरमिततेजसः॥
चैत्रमासे महाबाहो पुण्या प्रतिपदा वरा।
तस्यां योश्वपचं दृष्ट्वा स्नानं कुर्य्यान्नरोनृप॥
न तस्य दुरितं किञ्चिदाधयोव्याधयस्तथा।
भवन्ति कुरुशार्दूल तस्मात् स्नानं हि तैलतः॥
नारीनीराजनं तत्र सर्व्वरोगनिवारणम्।
गोमहिष्यादि यत्किञ्चित्तत्सर्व्वं भूषयेन्नृप॥
तैलवस्त्रादिभिः पुष्पैस्तोरणानि पुरानयेत्।
ब्राह्मणानां तथा भोज्यं दद्यात् कुरुकुलोद्वह॥
तिस्रो ह्याद्याः पुरा प्रोक्तास्तिथयः कुरुनन्दन।
कार्त्तिके चाश्वयुग्मासे चैत्रे मासि समाचरेत्॥
स्नानं दानं शतगुणं कार्त्तिके या तिथिर्नृप।
बलिराज्यात्तु शुभदा यामूलाशुभनाशिनी॥

आमूलमशुभहन्त्री।

इति भविष्यत्पुराणे बलिप्रतिपत्रथयात्रा व्रतम् ।

——:०:——

युधिष्ठिर उवाच ।

अब्रह्मेश केशवादीनां गौर्य्या गणपते स्तथा ।
दुर्गा सोमाग्नि सूर्य्याणां व्रतानि मधुसूदन ॥
शास्त्रान्तरेण दृष्टानि भवेद्गुडिगतानि च ।
तानि सर्व्वाणि मे देवदेव देवकिनन्दन ॥
प्रतिपत्क्रमयोगेन विहिता यस्य या तिथिः ।
देवस्य यस्यां तत्कार्य्यं तद्विशेषेण मे वद ॥

कृष्ण उवाच ।

वसन्ते किंशुकाशोकशोभिते प्रतिपत्तिथिः ।
शुक्ला तस्यां प्रकुर्व्वीत स्नानं नियममास्थितः ॥
नारी नरो वा राजेन्द्र संतर्प्य पितृदेवताः ।
नद्यास्तीरे तड़ागे वा गृहे वा तदलाभतः ॥
पिष्टातकेन विलिखेद्वत्सरं पुरुषाकृतिम् ।

'पिष्टातकं, पटवासको गन्धद्रव्यचूर्णविशेषः ॥

ततश्चन्दनचूर्णेन पुष्पधूपादिनार्च्चयेत् ।
मासर्त्तुनामभिः पश्चान्नमस्कारान्तयोजितैः ॥

मासर्त्तुनामभिश्चैत्र वसन्तादिनामभिः ।

पूजयेत् ब्राह्मणो विद्वान् मन्त्रैर्वेदोदितैः शुभैः ।

संवत्सरोसीतियजुर्मन्त्रैः । ब्राह्मणोत्र द्विजः मन्त्रस्तु । संवत्सरोसि परिवत्सरोसीदावत्सरोसि अनुवत्सरोसि उदावत्सरोसि ।

उषसस्ते कल्पन्तां अहोरात्रास्ते कल्पन्तां अर्द्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पन्तां संवत्सरास्ते कल्पन्ताम् ।

संवत्सरोसीति पठन् मन्त्रं वेदोदितं द्विजः ।
नमस्कारेण मन्त्रेण शूद्रोपि त्वां प्रपूजयेत् ॥

नमस्कारेण मन्त्रेण, संवत्सरोसीत्यादिना ।

एवमभ्यर्च्य वासोभिः पश्चात्तमभिवेष्टयेत् ॥
कालद्रव्यैर्मूलफलैर्नैवेद्यैर्मोदकादिभिः ।
ततस्तं प्रार्थयेत्पश्चात्पुरःस्थित्वा कृताञ्जलिः ॥
भगवंस्त्वत् प्रसादेन वर्षाङ्क महिमास्तु मे ।
संवत्सरोपसर्गा मे विलयं यान्त्वशेषतः ॥
एवमुक्त्वा यथा शक्त्या दद्याद्विप्राय दक्षिणाम् ।
ललाटपट्टे तिलकं कुर्य्याच्चन्दनपङ्कजम् ॥

चन्दनपङ्कोघृष्टचन्दनम् ।

ततः प्रभृत्यनुदिनं तिलकालङ्कृतं मुखम् ।
धार्य्यं संवत्सरं यावच्छशिमेव नभस्तलम् ॥
एवं नरो वा नारी वा व्रतमेतत्समाचरेत् ।
सदैव पुरुषव्याघ्र भोगान् भुवि भुनक्त्यसौ ॥
भूत प्रेत पिशाचाद्याः दुर्व्वारा वैरिणो ग्रहाः ।
निरर्थका भवन्त्येते तिलकं वीक्ष्य तत्क्षणात् ॥
पूर्व्वमासीन्महीपालो नाम्ना शत्रुञ्जयोजयो ।
चित्रलेखेति तस्याभूद्भार्य्या चारित्रभूषणा ॥
तया व्रतमिदं चैत्रे गृहीतं द्विजसन्निधौ ।

संवत्सरं पूजयित्वा ध्यात्वा हृदि जनार्द्दनम् ॥
हन्तुमाचेष्टुकामो वा समागच्छति यः पुरः ।
प्रयाति प्रियकृत्तस्याः दृष्ट्वा तु तिलकं नरः ॥
सपत्नीदर्पापहरा वशीकृतमहीतला ।
भर्त्तुर्दृष्ट्वा प्रहृष्टा तु सुखमास्ते निराकुला ॥
यावत् करिण्याभिभूतौ भर्त्ता पुनः सवेदनः ।
शिरोर्त्तिना संप्रयातः सुहृदां सुखदायकः ॥
शिरोर्त्तिना संप्रयातः शिरो वेदना युतः ।
धर्म्मराजपुरात्प्राप्ताः सर्व्वभूतापहारकाः ।
तस्मिन् क्षणे महाराज आगत्य यमकिङ्कराः ॥
तस्य द्वारमनुप्राप्ताः प्रविष्टा गृहमञ्जसा ।
प्रनुष्ठयं समानेतुं कालमृत्युपुरःसराः ॥
पार्श्वस्थितां चित्रलेखां तिलकालङ्कृताननाम् ।
दृष्ट्वा प्रनष्टसङ्कल्पाः परावृत्य गताः पुनः ॥
गतेषु तेषु स नृपः पुत्रेण सह भारत ।
नीरुजोबुभुजे भोगान् पूर्व्वकामार्जितान् शुभान् ॥
अक्रूरेण समख्यातं मम पूर्व्वं युधिष्ठिर ।
एतत् त्रिलोकी तिलकाख्यभूषणम्
पुण्यं व्रतं सकलदुष्टहरं परञ्च ।
दूच्छन् समाचरति यः स सुखं विहृत्य
मर्त्यः प्रयाति पदमच्युतमिन्दुमौलेः ॥

इति भविष्योत्तरे चैत्र शुक्ल प्रतिपदि विहित तिलकव्रतम्

——:○:——

श्रीकृष्ण उवाच ।

अश्वयुक् शुक्लपक्षस्य प्रथमेह्नि दिनोदये ।
अशोकं पूजयेत् वृक्षं प्ररूढशुभपल्लवम् ॥
प्ररूढैः सप्तधान्यैश्च गुणकैर्मोदकैः शुभैः ।
फलैः कालोद्भवैर्दिव्यैर्नारिकेलैः सदाडिमैः ॥
धूपदीपादिना तत्र पूजयेत्तरुमुत्तमम् ।
अशोकं पाण्डवश्रेष्ठ शोकं नाप्नोति कुत्रचित् ॥
पितृभ्रातृपति श्वश्रू सुत जामातृणां तथा ।
अशोकशोक शमनो भव सर्व्वत्र नः कुले ॥
इत्युच्चार्य्य ततो दद्यादर्घ्यं श्रद्धासमन्वितः ।
पताकाभिरलङ्कृत्य प्रच्छाद्य च सुवाससा ॥
दमयन्ती यथा स्वाहा यथा देवी च जानकी ।
तथा शोक व्रतादस्माज्जायते पतिवल्लभा ॥
वने वसन्त्या सद्धर्मः सीतया संप्रदर्शितः ।
दृष्ट्वाशोकं वने पार्थ पल्लवालङ्कृतं तरुं ॥
कृत्वा समीपे भर्त्तारं देवरञ्च तिलाक्षतैः ।
दीपालक्तकनैवेद्यैर्धूप सूत्र फलार्चनैः ॥
अर्चयित्वाभ्यर्थितौ तौ रक्ताशोकौ युधिष्ठिर ।
मैथिली प्राञ्जलिं कृत्वा शृण्वतो राघवस्य च ॥

प्राञ्जलिं, बद्धमञ्जलिम् ।

चिरञ्जीव तु मे वृद्धः श्वशुरः कोशलेश्वरः॥
भर्त्ता मे देवराश्चैव जीवन्तु भरतादयः।
कौशल्यामपि जीवन्ती यश्चेयमिति मैथिली॥
ययाचेदं महाभागाद्रमंवनविभूषणम्।
प्रदक्षिणमुपावृत्य ततः सा प्रययौ गृहम्॥
एवमन्यापि या नारी पूजयेद्वनीनगम्।
तिलतन्दुल संमिश्रैर्यवगोधूमसर्षपैः॥
समाप्य सेचयेन्मूले पाद्यं रक्तपल्लवम्।
तदभावे च सौवर्णं राजतं वा स्वशक्तितः॥
वर्णकैर्वा समालिख्य पूजितं विधिवत्ततः।
मन्त्रेणानेन प्रणम्य या स्त्री कुर्य्यात् पतिव्रता॥
महावृक्ष महाशाख मकरध्वजमन्दिर।
प्रार्थये त्वां महाभाग सर्व्वकाम प्रदोभव॥
एव माभाष्य तं वृक्षं दत्त्वा विप्राय दक्षिणाम्
तस्य वृक्षं कृतं दत्त्वा वस्त्रयुग्मसमन्वितम्॥

कृतं सुवर्णादिघटितम्।

सखीभिः सहिता साध्वी भुञ्जीत ब्रह्मचारिणी॥
याः शोकनाशनमशोकतरुं युवत्यः
सम्पूजयन्ति कुसुमाक्षतधूपदीपैः।
ताः पार्थ सौख्यमतुलं भुवि भर्तृजातं।
गौरीपदं प्रमुदिताः पुनराप्नुवन्ति॥

इति भविष्योत्तरेऽशोकप्रतिपद्व्रतम्।

—:o:—

भगवानुवाच।

ज्यैष्ठे मासे शुभे पक्षे प्रथमेऽह्नि दिनोदये।
देवोद्यानभवं ह्यर्घ्यं करवीरं समर्चयेत्॥
रक्ततन्तुपरीधानं गन्ध-धूपविलेपनैः।
प्ररूढसप्तधान्यैश्च नारङ्गैर्बीजपूरकैः॥
गुग्गुकैर्बदरैर्भक्ष्यैर्नारिकेलैः सुशोभनैः।
अभ्युक्ष्याक्षततोयेन मन्त्रेणेत्थं क्षमापयेत्॥
करवीर विषावास नमस्ते भानुवल्लभ।
मौलिमण्डन दुर्गादिदेवानां सततं प्रिय॥
आकृष्णेनेति वेदोक्तमन्त्रेणाभ्यर्च्य भक्तितः।
एवं भक्त्या समभ्यर्च्य दत्त्वा विप्राय दक्षिणाम्॥
प्रदक्षिणं ततः कुर्य्यात्ततः स्वभवनं व्रजेत्।
एतद्व्रतं पुरा पार्थ सूर्य्याराधनकाम्यया॥
दमयन्त्या सरस्वत्या गायत्र्या गङ्गया तथा।
अन्याभिरपि नारीभिर्मर्त्यलोकेऽप्यनुष्ठितम्॥
करवीरव्रतं पार्थ सर्व्वसौख्यफलप्रदम्।

संपूज्य रक्तकुसुमार्चितसर्व्वशाखं
नीलैर्दलैस्तततनुं करवीरमुत्तमम्।
भुक्त्वा मनोभिलषितान् भुवि भव्यभोगा
नन्ते प्रयान्ति भवनं सरताग्र्यभामाः॥

इति भविष्योत्तरे करवीर प्रतिपत व्रतम्।

—:○:—

ब्रह्मोवाच।

अग्निमिष्ट्वाच हुत्वा च प्रतिपद्यामिति स्मृतम्।
हविषा सर्व्वधान्यानि प्राप्नुयादमृतं धनम्॥

इष्ट्वा पूजयित्वा। प्रतिपद्यां प्रतिपदि। इतिस्मृतं कामानुसारेण हिरण्यरेतस्त्वतया विदितं। हविषा घृतेन। सर्व्वधान्यानि हुत्वेत्यन्वयः।

मूलमन्त्राः स्वसंज्ञाभि रङ्गमन्त्राश्च कीर्त्तिताः।
पूर्व्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः॥

मूलमन्त्राः प्रधानमन्त्राः। अङ्गमन्त्राः। परिवार देवता मन्त्राः अग्नये हृदयाय नम इत्येवमादयः। स्वसंज्ञाभिः ॐ अग्नये नम इत्यादिपूजायां। ॐ अग्नये स्वाहा इत्यादि होमे। पूर्व्ववत् सूर्य्यव्रतवत्। पद्ममध्यस्थः कर्णिकायां स्वमूर्त्या पत्रेषु परिवारमूर्त्या स्थितः। तिथीश्वरोऽत्र वह्निः। स च जटाश्मश्रुधारी त्रिलोचनो रक्ताङ्गश्चतुर्व्वाहुः प्रदक्षिणे शूलं तदपरे ज्वाला। उत्सङ्गगताया अन्नपात्रहस्तायाः स्वाहायाः स्कन्धे च न्यस्तपरोवरः। चत्वारः शुका रथस्य वोढारः। वायुः सारथिरित्येवं विष्णुधर्म्मोत्तराभिहितो वेदितव्यः।

गन्ध पुष्पोपहारैश्च यथा शक्ति विधीयते।
पूजाऽशाठ्येन शाठ्येन कृतापि तु फलप्रदा॥

अशाठ्येन, अकपटेन, शाठ्येनेत्यादिस्तुतिः।

आज्यधारासमिद्भिश्च दधि क्षीरान्नमाक्षिकैः ॥
पूर्व्वोक्तफलदो होमो विहितः शान्तचेतसा ।

आज्यधारादिभिः षड्भिः पृथक्कृतो होमः पूर्व्वोक्तफलदोधनदः । माक्षिकं मधु । आदौ पूजा ततो घृताक्तधान्यहोमस्ततो आज्यधारादिहोमः ।

इति भविष्ये वैश्वानरव्रतम् ।

—:०:—

अगस्त्य उवाच ।

अथातः संप्रवक्ष्यामि धन्यव्रतमनुत्तम ।
येन सद्यो भवेद्धन्योऽधन्योऽपि हि यो भवेत् ॥
मार्गशीर्षेऽमले पक्षे प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्व्वीत रात्रौ विष्णुञ्च पूजयेत् ॥
वैश्वानराय आदौ तु अग्नये चोत्तरन्तथा ।
हविर्भुजे तथोरुश्च द्रविणोदाय वै भुजे ॥
सम्बर्त्तायेतिच शिरो ज्वलनायेति सर्व्वतः ।
अभ्यर्च्चैवं विधानेन देवदेवं जनार्द्दनं ॥
तस्यैव पुरतः कुण्डं कारयित्वा विधानतः ।
होमान्ते व्रतं कुर्व्वीत एतैर्मन्त्रैर्विचक्षणः ॥

एतैर्मन्त्रै, वैश्वानरायेत्यादिप्रागुक्तैः ।

ततस्तु यावकं चान्नं भुञ्जीत घृतसंयुतम् ।
कृष्णपक्षेप्येवमेव चातुर्मास्यान्तु यावकम् ॥

चत्वादिषु तु भुञ्जीयात् पायसं सघृतं बुधः।
श्रावणादिषु सक्तूंश्च ततश्चैव समाप्यते॥
समाप्ते च व्रते वह्निकाञ्चनं कारयेन्नृपः।

वह्निरूपं पूर्व्वोक्तं।

रक्तवस्त्रयुगच्छन्नं रक्तपुष्पानुलेपनम्॥
कुङ्कुमेन तथा लिम्पेत् ब्राह्मणं त्वेवमेव तु।
सर्व्वावयवसम्पूर्णं गुणिनं प्रियदर्शनम्॥
पूजयित्वा विधानेन रक्तवस्त्रयुगेन च।
पश्चात् प्रदद्यात्तत्तस्य मन्त्रेणानेन मन्त्रवान्॥
धन्योसि धन्यधर्म्मा च धन्योस्मि धन्यवान् भवान्।
धन्येनानेन चीर्णेन व्रतेन स्यां सदा सुखी॥
एवमुच्चार्य्य तं विप्र न्यस्य कोशमिवात्मनः।
सद्यो धन्यत्वमाप्नोति योऽपिस्याद्भाग्यवर्ज्जितः।
इह जन्मनि सौभाग्यं धन्यं धान्यञ्च पुष्कलम्॥
अनेन कृतमात्रेण जायते नात्र संशयः।
वाङ्मनःसञ्चितं पापं वह्निर्दहति तस्य वै॥
दग्धपापः स शुद्धात्मा अमुत्रेहच विन्दति।

इति वराह पुराणोक्तं धन्यव्रतम्।

—:○:—

पुलस्त्य उवाच।

प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः।

वैश्वानरपुरं याति व्रतं वैश्वानरन्त्विदम् ॥

पद्मपुराणे वैश्वानर व्रतमिति ।

पृथिवीं भाजनं कृत्वा यो भुङ्क्ते पञ्चसन्धिषु ।
अहोरात्रेण चैकेन त्रिरात्रफलमश्नुते ॥

इति पद्मपुराणे पञ्चसन्धि व्रतं ।

नन्दिकेश्वर उवाच ।

वैदिकेन विधानेन व्रतं पुण्यं महत्तमम् ।
कस्मिंस्तिथौ तु कर्त्तव्यं विधानं तद्वदस्व मे ॥

स्कन्द उवाच ।

मासि भाद्रपदे शुक्ले पक्षे च प्रतिपत्तिथौ ।
नैवेद्यन्तु पचेन्मौनी षोडशन्त्रिगुणानि च ॥
फलानि पिष्टपक्वानि दद्याद्विप्राय षोडश ।
देवाय षोडशैतानि दातव्यानि प्रयत्नतः ॥
भुञ्जन्ते षोडश तथा व्रतस्य नियमाश्रयात् ।
सौवर्णं कारयेद्देवं यथा शक्त्या हिरण्मयम् ॥
सुवर्णं कर्षस्तद्घटितं यथा शक्त्या च कृतम् ।
नेत्रत्रय समायुक्तं जटा मण्डल मण्डितम्* ॥
पञ्चवक्त्रं चतुर्बाहुं षडाराजस्य मध्यगम् ।

* जटाखण्डेन्दुमण्डितं इति पुस्तकान्तरे ।

त्रिशूलं चाक्षसूत्रञ्च वहन्तं दक्षिणे करे॥
कपालं कुण्डिकां वामे शिखायां चन्द्रधारिणम्।
पञ्चामृतेन स्नपनं कृत्वा संस्थापयेत्ततः॥
कुम्भस्योपरि देवेशः शुक्लवस्त्रयुगान्वितः।
गन्धपुष्पैः समभ्यर्च्य फलैर्नानाविधैस्तथा॥
प्रसीद देवदेवेश चराचरजगद्गुरो।
वृषध्वज महादेव त्रिनेत्राय नमोनमः॥

पूजामन्त्रः।

देवस्य च परीधानं दद्यात् धेनुं पयस्विनीम्।
अनेन तु विधानेन यः कुर्य्यात् व्रतमुत्तमम्॥
स राजा लभते देव दीर्घमायुस्तथैव च।
सर्व्वपापविनिर्मुक्तः शिवलोके महीयते॥
भुक्ता तु विविधान भोगान् ततः शिवपुरं व्रजेत्।
इति स्कन्दपुराणोक्तं महत्तमव्रतं सोद्यापनम्।

श्रीभगवानुवाच।

श्रावणे मासि कृष्णपक्षे शङ्करः प्रथमेऽहनि।
त्रिपर्वणा त्रिशल्येन त्रिमुखेन शरेण च॥
मुखानि त्रीणि चिच्छेद यज्ञस्य मृगरूपिणः।
तैः शिरोभिस्तपस्तप्त्वा वरः प्राप्तोऽथ शङ्करात्॥
त्रिशल्येन त्रिमुखेन शल्यरूपत्रिमुखेनेत्यर्थः।
मृगरूपिणस्त्रिमुखमृगरूपिण इत्यर्थः॥
*स्त्रीभिः पूज्यानि तानीति न मनुष्यैः कदाचन।

---

* स्त्रिभिरिति पुस्तकान्तरे पाठः।

मृगशीर्षन्ततः कृत्वा लिङ्गाकारन्तु मृन्मयम् ॥
क्षीरेण तपनीयं वै पूजनीयं यथाविधि ।
अर्घ्यैः पुष्पैश्च धूपैश्च नैवेद्यैर्विविधैरपि ॥
शाकैः सौवर्च्चलाभिश्च कृतैः पिष्टमयैः शुभैः ॥
सौवर्चलाभिः अतसीमिश्रपिष्टविकृतिभिः ।
कांस्यभाजनवाद्यैश्च पश्चात् कार्य्यञ्च भोजनम् ॥

इति श्रीहेमाद्रि व्रतकाण्डे प्रतिपत् व्रतप्रकरणे पद्म
पुराणोक्तं मृगशीर्षव्रतम् ।

अथ पञ्चमोऽध्यायः ।

—:○:—

श्रीभगवानुवाच ।

चैत्रे मासि जगत्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ॥
प्रवर्त्तयामास तथा कालस्य गणनामपि ।
ग्रहान्नागानृतून्मासान् वत्सरान् वत्सराधिपान् ॥
ददौ स भगवान् ब्रह्मा सर्व्वदेवसमागमे ।
ब्राह्मयां सभायां ब्रह्माणमनुद्दिश्यवपुस्ततः ॥
यथोक्तास्ते नमस्यन्तः स्तुवन्तश्च उपासते ।
ततस्तैः कृतशुश्रूषास्ततो गत्वा स्वमालयम् ॥
स्वानि स्वान्यथ कर्म्माणि ते नियुक्ताश्च चक्रिरे ।
ब्राह्मी सभा कामरूपा विशेषेण तदा नृप ॥
धारयन्त्यमलं रूपमनिर्द्देश्यं मनोहरम् ।
ततः प्रभृति यो धर्म्मः पूर्व्वैः पूर्व्वतरैः कृतः ॥
अद्यापि रूढः सुतरां कर्त्तव्योऽसौ प्रयत्नतः ।
तत्र कार्य्या महाशान्तिः सर्व्वकल्मषनाशिनी ॥
सर्व्वोत्पातप्रशमनी कलिदुःस्वप्ननाशिनी ।
आयुःप्रदा पुष्टिकरी धनसौभाग्यवर्द्धिनी ॥
मङ्गल्या च पवित्रा च लोकद्वयसुखावहा ।
तस्यामादौ तु संपूज्यो ब्रह्मा कमलसम्भवः ॥

पाद्याद्यैश्चैव धूपैश्च वस्त्रालङ्कारभोजनैः ।
होमैर्व्वल्युप्रहारैश्च तथा ब्राह्मणतर्पणैः ॥
ततः क्रमेण देवेभ्यः पूजा कार्य्या पृथक् पृथक् ।
कृत्वोङ्कारनमस्कारौ कुशोदकतिलाक्षतैः ॥
पुष्प धूप प्रदीपाद्यैर्भोजनैश्च यथाक्रमम् ।

ॐकार नमस्कारौ कृत्वा ॐ ब्रह्मणे नम इत्यादि । मन्त्रं संपूजनार्थन्तु बहुरूपं परिस्पृशेत् मन्त्रमित्येक* वचनं बहुरूपं मन्त्रं नानारूपान्मन्त्रान् परिस्पृशेत् पठेदित्यर्थस्तथा च ब्रह्मणेनम इत्युपक्रम्य विष्णवे परमात्मने नम इत्यन्त वाक्य वृन्दोपात्तदेवतानामानि प्रणवादिचतुर्थ्यन्तनमोन्तानि मन्त्रत्वेन ग्राह्याणि ।

ॐ नमो ब्रह्मणे तुभ्यं कामाय च महात्मने ।
नमस्तेस्तु निमेषाय त्रुटये च नमोस्तु ते ॥
लवाय च नमस्तुभ्यं नमस्तेऽस्तु क्षणाय च ।
नमो नमस्ते काष्ठायै कलायै चाथ सर्व्वदा ॥
नाभिकायै सुसूक्ष्मायै मुहूर्त्ताय नमो नमः ।
नमो निशाभ्यः पुण्येभ्यो दिवसेभ्यश्च नित्यशः ॥
पक्षाभ्याञ्चाथ मासेभ्यो ऋतुभ्यः षड्भ्य एव च ।
अयनाभ्याञ्च पञ्चभ्यो वत्सरेभ्यश्च सर्व्वदा ॥
नमस्कृत्य युगादिभ्यो ग्रहेभ्यश्च नमोनमः ।
नमः पुरन्दरेभ्यश्च तत्संख्येभ्यो नमोनमः ॥
पञ्चाशते नमोनित्यं दक्षकन्याभ्य एव च ।

* मन्त्रमिति नामाधेक वचनमिति क्वचित् पाठः ।

नमोदेव्यै सुप्रभायै जयायै चाथ सर्व्वदा॥
श्रद्धास्त्राय नमस्तुभ्यं सर्व्वास्त्रजनकाय च।
नमस्ते बहुपुत्राय पत्नीभिः सहिताय च॥
नमोवृद्ध्यै तथा वृद्ध्यै निद्रायै धनदाय च।
नलकूबरयक्षाय गुह्यकस्वामिने नमः॥
नमोस्तु शङ्खपद्माभ्यां निधिभ्यामथ नित्यशः।
भद्रकाल्यै नमोनित्यं सुरभ्यै च नमोनमः॥
वेदवेदाङ्गवेदान्त विद्यासंख्याभ्य एव च।
नागयक्षसुपर्णेभ्यो नमोऽस्तु गरुडाय च॥
सप्तभ्यश्च समुद्रेभ्यः सागरेभ्यश्च सर्व्वदा।
उत्तरेभ्यः कुरुभ्यश्च नमोहैरण्यताय च॥
भद्राश्वकेतुमालाभ्यां नमः सर्व्वत्र सर्व्वदा।
इलावृताय च नमो हरिवर्षाय चैव हि॥
नमः किंपुरुषेभ्यश्च भारताय नमोनमः।
नमो भारतदेशेभ्यो नवभ्यश्चैव सर्व्वदा॥
पातालेभ्यश्च सप्तभ्यो नरकेभ्यो नमोनमः।
कालाग्निरुद्रशेषाभ्यां हरये क्रोधरूपिणे॥
सप्तभ्यस्त्वथ लोकेभ्यो महाभूतेभ्य एव च।
नमस्ते बुद्धये चैव नमः प्रकृतये तथा॥
पुरुषायाभिमानाय नमोस्त्वव्यक्तमूर्त्तये।
हिमवत्प्रमुखेभ्यश्च पर्व्वतेभ्यो नमस्तथा॥
पौराणीभ्यश्च गङ्गाभ्यः सप्तभ्यश्च नमोनमः।
नमोस्त्वाद्यमुनिभ्यश्च सप्तभ्यश्चाथ सर्व्वदा॥

नमोस्तु पुष्करादिभ्यस्तीर्थेभ्यश्च पुनःपुनः ।
निम्नगाभ्यो नमोनित्यं वितस्ताद्याभ्य एव च ॥
चतुर्दशभ्यो दीर्घाभ्यो धारिणीभ्यो नमोनमः ।
नमोधात्रे विधात्रे च छन्दोभ्यश्च नमोनमः ॥
सुरभ्यैरावणाभ्याञ्च नमो भूत्यै नमोनमः ।
नमस्तथोच्चैःश्रवसे ध्रुवाय च नमोनमः ॥
नमोस्तु धन्वन्तरये शस्त्रास्त्राभ्यां नमोनमः ।
विनायककुमाराभ्यां विघ्नेभ्यश्च नमः सदा ॥
शाखाय च विशाखाय निगमेशाय वै नमः ।
नमस्कन्दग्रहेभ्यश्च स्कन्दमातृभ्य एव च ॥
ज्वराय रोगपतये भस्मप्रहरणाय च ।
ऋषिभ्यो वालखिल्येभ्यः कश्यपाय नमः सदा ।
अगस्त्याय नारदाय व्यासादिभ्यो नमोनमः ॥
अप्सरोभ्यः सोमपेभ्यो देवेभ्यश्च तथा नमः ।
असोमपेभ्यश्च नमस्तुषितेभ्यो नमःसदा ॥
आदित्येभ्यो नमोनित्यं द्वादशभ्यश्च सर्व्वशः ।
एकादशेभ्यो रुद्रेभ्यस्तपस्विभ्यो नमोनमः ॥
नमोनासत्यदस्राभ्यामश्विभ्यां नित्यमेव हि ।
साध्येभ्यो द्वादशेभ्यश्च पौराणेभ्यश्च सर्व्वदा ॥
एकोनपञ्चाशते च मरुद्गाय नमोनमः ।
शिल्पाचार्य्याय देवाय नमस्ते विश्वकर्म्मणे ॥
अष्टभ्यो लोकपालेभ्यः सानुगेभ्यश्च सर्व्वदा ।
आयुधेभ्यो वाहनेभ्यो धर्म्मेभ्यश्च नमः सदा ॥

आसनेभ्यो दुन्दुभीभ्यो देवेभ्यश्च नमःसदा।
दैत्यराक्षस गन्धर्व्व पिशाचेभ्यश्च नित्यशः॥
पितृभ्यः सप्तभेदेभ्यः प्रेतेभ्यश्च नमोनमः।
सुसूक्ष्मेभ्यश्च देवेभ्यो भावगम्येभ्य एव च॥
नमस्ते बहुरूपाय विष्णवे परमात्मने।
अथ किं बहुनोक्तेन मन्त्रेणानेन चार्च्चयेत्॥
प्राङ्मुखोदङ्मुखान्विप्रान् देवानुद्दिश्य पूर्व्ववत्।

अथ वा किं मन्त्रविस्तरेण ब्राह्मणानेव देवतोद्देशेन पूजयेदित्यर्थः। पूर्व्ववत् मन्त्रोक्तक्रमेणेत्यर्थः।

अर्घैः पुष्पैश्च धूपैश्च वस्त्रैर्माल्यैः सहृष्टकम्।

सहृष्टकं सरोमाञ्चं हृष्टरोमा सन्नर्च्चयेदित्यर्थः॥

धनधान्याश्वविभवैर्दक्षिणाभिश्च सर्व्वदा।
इतिहास पुराणाभ्यां तद्वक्तृंश्च द्विजोत्तमान्॥

इतिहास पुराणाभ्यां तत् पुस्तकदानेनेत्यर्थः।

कालज्ञान् वेदवेदज्ञान् भृत्यान् सम्बन्धि, बान्धवान्॥
अनेनैव तु मन्त्रेण स्वाहान्तेन पृथक्पृथक्।
यविष्टायाग्नये होमः कर्त्तव्यः सर्व्वतृप्तये॥
वेदविच्चक्षुषीदत्त्वा स्थाने प्राधानिके सति।

यविष्ठोऽग्निरग्निविशेषः। वेदविद्दोक्तविधिज्ञः। चक्षुषी, आज्यभागौ। प्राधानिके स्थाने प्रधानहोमारम्भे।

होमारम्भे ततः कुर्य्यान्मङ्गलालम्भनं नरः॥
भोजयित्वा द्विजान् सर्व्वान् सुहृत्सम्बन्धि बान्धवान्।

विशेषेण च भोक्तव्यं कार्य्यश्चापि महोत्सवः ॥
नवसंवत्सरारम्भः सर्व्वसिद्धिप्रवर्त्तकः ।
इति ब्रह्मपुराणोक्तः संवत्सरारम्भविधिः ॥

इति श्रीमहाराजाधिराज श्रीमहादेवस्य समस्तकरणा-
धीश्वर सकलविद्या-विशारद श्रीहेमाद्रि पण्डित
विरचिते चतुर्वर्गचिन्तामणौ व्रतखण्डे
प्रतिपत्व्रतानि ।

अथ षष्ठोऽध्यायः ।

—०*०—

अथ द्वितीयाव्रतानि ।

ब्राह्म्यं तेजो दिनकर करस्पर्द्धया वर्द्धमानं
प्रौढं यस्य स्फुरति परितो रोदसीत्यंशुषानं ।
प्रांशुर्वंशो जगति विजयी यस्य हेमाद्रिनामा
वक्ति व्यक्तं क्रममुपगतं स द्वितीयाव्रतानाम् ।

शतानीक उवाच ।

ऋषेऽहं तव पृच्छामि भगवन् ब्रूहि तद्व्रतम् ।
यथा व्रतप्रभावेन स्वर्गं प्राप्नोति मानवः ॥
अल्पायासम्बहुफलं व्रतानामुत्तमं व्रतम् ।
प्रसादं कुरु मे देव येन व्रतं करोम्यहम् ॥

ऋषिरुवाच ।

अस्ति व्रतं महापुण्यमशून्यशयनं नृप ।
चन्द्रोदयेचार्घदानं पूजनीयो जनार्द्दनः ॥

शतानीक उवाच ।

कस्मिन्मासे प्रकर्त्तव्यं पक्षश्चैव तिथिश्च का ।
किं दानं भोजनञ्चैव कथयस्व महाप्रभो ॥

ऋषिरुवाच।

चातुर्मास्ये भवेद्राजन् वर्षायां व्रतमुत्तमम्।
श्रावणस्य द्वितीयायां कृष्णपक्षे नराधिप॥
श्रावणादि कार्त्तिकान्तं कुर्य्यात् तत्व्रतमुत्तमम्॥
पुष्पं धूपञ्च नैवेद्यं दीपमालाविशेषतः।
नानाफलं सनैवेद्यं नानारससमन्वितम्॥
मौक्तिकं रजतञ्चैव शङ्खं दुग्धसमन्वितम्।
ब्राह्मणाय प्रदातव्यं पूजनीयो जनार्द्दनः॥
ततो भाद्रपदे मासे यवदानं ददाति च।
दुग्धं दद्याच्च विप्राय दक्षिणाञ्च विशेषतः॥
दधि चैव फलञ्चैव बीजपूरसमन्वितम्।
जनार्द्दनस्त्वातिभक्त्या पूजनीयो नराधिप॥
एवं यः कुरुते राजन् प्राप्नोति परमं पदम्।
ततश्चाश्विद्वितीयायां शय्यादानं विशेषतः॥
न तस्य शून्यं शयनमपुत्रो न भवेन्नरः।
जलमध्ये स्थितो विष्णुः पूजनीयो जनार्द्दनः॥
श्वेत पुष्पैः फलैर्वस्त्रैः सताम्बूलं सदक्षिणम्।
विप्राय भोजनं दद्यात् फलं शृणु नराधिप॥
एवं यः कुरुते राजन् लभते काञ्चनीं पुरीं।
ततश्च कार्त्तिके मासि द्वितीयायां नराधिप॥
शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।
उपहारं भगवते दद्यात्सर्व्वं प्रयत्नतः॥

पुष्पं फलं सनैवेद्यं गीतवाद्यसमन्वितम्।
छत्रं कमण्डलुं दद्यादुपानहौ विशेषतः॥
चतुर्वर्षं प्रकुर्वन्तु पुरुषाश्च तथा स्त्रियः।
एवं यः कुरुते राजन्नशून्यशयनव्रतम्॥
न च दुःखं न दारिद्रं न च कष्टं भवेत् क्वचित्।
न तस्य शून्या शय्या स्यादपुत्रो न भवेन्नरः॥
शोक व्याधि भयं दुःखं न भवन्ति कदाचन।
न भवेद्विधवा नारी निर्धना न भवेत् क्वचित्॥
व्रतस्यास्य प्रभावेन स्वर्गं प्राप्नोति मानवः।

शतानीक उवाच।

अत्यद्भुतं व्रतं कृष्ण न दृष्टं न श्रुतं मया।
अशून्यशयनं नृणां नारीणां यत् प्रकीर्त्तितम्॥
केन चेदं पुरा चीर्णं मर्त्यलोके प्रकाशितम्।
फलञ्च कीदृशं प्राप्तं तत्सर्व्वं कथयस्व मे॥

ऋषिरुवाच।

राजन् रुक्माङ्गदो नाम सत्यवादी जितेन्द्रियः।
कदाचिन्मृगखेटेन गतोऽसौ गहनं वनम्॥
भव्यं सरोवरं दृष्टं जलपूर्णं मनोहरम्।
हंससारस सङ्कीर्णं चक्रवाकोपशोभितम्॥
आलोलं बुद्बुदाकारैर्नानाऋषिसमन्वितम्।
तत्र स्नानं स कृत्वा तु चलितो वनगह्वरात्॥

द्वौ करौ संपुटौ कृत्वा गतो सौ वामनाश्रमम् ।
उग्रं व्रतं चरन्नघंपाद्यसत्कृतवानृषिः ॥
नमस्कारं विधायाशु स्थितोऽसौ वामनाग्रतः ।

वामदेव उवाच ।

किं ते कार्य्यं समुत्पन्नं येन त्वमिदमागतः ।
वनं मे गह्वरं स्थानं पर्वतश्चातिदुर्गमम् ।
किमर्थं भवता राजन् मम पार्श्वे समागतम् ॥

रुक्माङ्गद उवाच ।

भगवन् त्वाञ्च पृच्छामि वार्त्तामेकां सविस्मयाम् ।
केन पुण्यप्रभावेन लब्धो धर्म्माङ्गदः सुतः ॥
सन्ध्यावलीसमा भार्य्या मम प्राणस्य वल्लभा ।
सप्तद्वीपवती राजा सत्पुत्रो नवखण्डपः ॥
केन कर्म्मप्रभावेन सत्यं ब्रूहि महामुने ।

वामदेव उवाच ।

अहो नृपवरश्रेष्ठ सत्यवादिन् जितेन्द्रियः ।
पृष्टवान् गहनं प्रश्नं दुर्विज्ञेयमबुद्धिभिः* ॥
मनोनुकूला प्रवणा भार्य्या पुत्रश्च तादृशः ।
नह्यल्पपुण्यैः राजेन्द्र प्राप्यते पुरुषैः क्वचित् ॥
येन पुण्येन सकलं प्राप्यते भुवि मानवैः ।
तत्सर्व्वं शृणु भूपाल यथा राज्यन्त्वमाप्तवान् ॥
पुरा जन्मनि शूद्रस्त्वं सत्यं न वदसि क्वचित् ।

---

* गह्वरं प्रश्नमिति पुस्तकान्तरे पाठः ।

हव्यं कव्यं न जानासि तव भार्य्या पतिव्रता॥
तव समीपे विप्राश्च चत्वारो वेदपारगाः।
सत्कर्म्मनिरताः शान्ता विद्वांसश्च जितेन्द्रियाः॥
चत्वारो वेदधर्म्मज्ञास्तव ते प्रतिवेशिनः।
तेषां कृतवतामेतदशून्यशयनव्रतम्॥
श्रुत्वा महाफलं दृष्ट्वा त्वयाप्येतदनुष्ठितम्।
अर्घ्यं दत्त्वा तु चन्द्रस्य उदये द्वितीयादिने।
उदकञ्च घृतञ्चैव माषक्षारविवर्जितम्॥
प्राशनन्ते कृतं दत्त्वा ब्राह्मणाय विशेषतः।
चतुर्वर्षसमायुक्तं चातुर्मास्ये सदा नृप॥
व्रतस्यास्य प्रभावेन सुतो लब्धोऽभिवाञ्छितः।
सन्ध्यावलीसमा भार्य्या धर्म्माङ्गदसमः सुतः॥
अन्ये ये च करिष्यन्ति फलं सर्व्वं लभन्ति ते।
पुत्र पौत्र समायुक्तो धन धान्य समाकुलः॥
व्रतस्यास्य प्रभावेन स्वर्गं प्राप्नोति मानवः।
गच्छ त्वं नृप शार्दूल भोक्ष्यसे सकलां महीम्॥
जाया पुत्र समायुक्तः स्वर्गं गच्छसि नान्यथा।

शतानीक उवाच।

कथयस्व व्रतं देव प्रकारेण समन्वितम्।
उद्यापनं कथं कुर्य्यात्परिपूर्णे व्रतोत्तमे॥

ऋषिरुवाच।

चन्द्रोदये व्रतं कुर्य्याच्चतुर्वर्षमिदं नृप।

आचार्य्यं वेदविदुषं धर्म्मज्ञं वरयेदथ ॥
ऋत्विजैश्च* समायुक्तं ब्राह्मणैर्वेदपारगैः ।
यज्ञोपवीतं वस्त्रञ्च उपानहसमन्वितम् ॥
सुवर्णं रौप्यमुद्राश्च हैमं कृत्वा तु वैष्णवम् ।
सौवर्णीं विष्णुमूर्त्तिञ्च रूक्मलक्ष्मीसमन्विताम् ।
शय्याञ्च तुलिकाञ्चैव सप्तधान्यसमन्विताम् ॥
गोप्रदानञ्च दातव्यमनुज्ञानी भवेन्नरः ।
ब्राह्मणान् भोजनं दद्यात् घृतपूरैः सशर्करैः ।
एवं यः कुरुते पार्थ प्राप्नोति परमं पदम् ॥

इति भविष्यत्पुराणोक्तमशून्यशयनद्वितीयाव्रतम् ।२

——:○:——

भविष्योत्तरात् ।

युधिष्ठिर उवाच ।

भगवन् भवता प्रोक्तं धर्म्मार्थादिः सुसाधनम् ।
गार्हस्थ्यं तच्च भवति दम्पत्योः प्रियमाणयोः ॥
पत्नीहीनः पुमान् पत्नी भर्त्रा विरहिता न च ।
धर्म्मार्थकाम संसिद्ध्यै तस्मात् तु मधुसूदन ॥
तच्छ्रोष्ये देव देवेश विधवा स्त्री न जायते ।
व्रतेन येन गोविन्द पत्न्या विरहितो नरः ॥

---

* ऋत्विग्भिश्चेति क्वचित् पाठः ।

कृष्ण उवाच।

अशून्यशयनां नाम द्वितीयां शृणु भारत।
यामुपोष्य न वैधव्यं स्त्री प्रयाति नराधिप॥
पत्नीवियुक्तश्च नरो न कदाचित् प्रजायते।
अत्रोपवासदिने न पुनरशनं नक्तं भुञ्जीतेत्यग्रेऽभिधानात्।
शेते जगत्पतिः कृष्णः श्रिया सार्द्धं यदा नृप।
अशून्यशयना नाम तदा ग्राह्या तु सा तिथिः॥
उपवासेन नक्तेन तथैवायाचिते न च।
कृष्णपक्षे द्वितीयायां श्रावणे मासि भारत।
यदा शेते तदेयं ग्राह्या शयनीसन्निहिता ग्राह्येत्यर्थः।
तेन श्रावणोऽत्र पौर्णमान्तपक्षेण ज्ञेयः।
स्नानं नदीतडागे वा गृहे वा नियतात्मवान्।
स्थण्डिलं चतुरस्रञ्च मृन्मयं कारयेत्ततः॥
ततस्थं श्रीधरं श्रीशं भक्त्याभ्यर्च्य श्रिया सह।
नैवेद्यैः पुष्प धूपाद्यैः फलैः कालोद्भवैः शुभैः॥
इदमुच्चारयेन्मन्त्रं प्रणम्य च जगत्पतिम्।
श्रीवत्सधारिन् श्रीकान्त श्रीवास श्रीपतेऽव्यय।
गार्हस्थ्यमाप्रनाशं मे यातु धर्म्मार्थकामदम्॥
शुचयो माप्रणश्यन्तु मा प्रणश्यन्तु निर्जराः।
याम्यगा मा प्रणश्यन्तु मत्तो दाम्पत्यभेदतः॥
शुचयोऽग्नयः निर्जराः देवाः याम्यगाः पितरः।
लक्ष्म्या वियुज्यते देव न कदाचिद्यथा भवान्।
तथा कलत्रसम्बन्धो देव मा मे वियुज्यताम्॥

लक्ष्म्या न शून्यं वरद यथा ते शयनं सदा ।
शय्या ममाप्यशून्यास्तु तथात्र मधुसूदन ॥

विष्णुरहस्ये पुनरिमे मन्त्राः ।

पत्नी भर्त्तृ वियोगञ्च भर्त्ता भार्य्यासमुद्भवम् ।
नाप्नुवन्ति यथा दुःखं दाम्पत्यानि तथा कुरु ॥
यथा श्रिया वियुक्तस्त्वं लक्ष्मीर्देव त्वया यथा ।
प्रसादात्तव देवेश स्थितिरस्तु तथावयोः ॥
मात्मपुत्राः प्रणश्यन्तु मा धनं माकुलक्रमः ।
अग्नयो मा प्रणश्यन्तु गृहभङ्गोस्तु मावयोः ॥

शेषोशन्यो भविष्योत्तरेण तुल्यार्थः ।

एवं प्रसाद्य पुजाञ्च कृत्वा लक्ष्म्यास्तथा हरेः ।
फलानि दद्यात् शय्यायामपीष्टानि जगत्पतेः ॥
नक्तं प्रणम्यायतने हरिं भुञ्जीत वाग्यतः ।
चन्द्रोदये स्नानपूर्व्वं पञ्चगव्येन संयुतम् ॥
विप्राय दक्षिणां दत्त्वा स्वशक्त्या फलसंयुतम ।

हरिं प्रणम्य नक्तं भुजीतेत्यन्वयः ।

अनेन विधिना राजन् यावन्मासचतुष्टयम् ।
कृष्णपक्षे द्वितीयायां प्रागुक्तविधिनाचरेत् ॥
कार्त्तिकेत्वथ संप्राप्ते शय्यां श्रीकान्तसंयुताम् ॥
सोपस्करां सोदकुम्भां सान्नां दद्यात् द्विजातये ।
प्रतिमांसञ्च सोमाय अर्घं दद्यात्समन्त्रकम् ॥

दध्यक्षतैर्मूलफलैः रत्नैः सौवर्णभाजनैः।
गगनाङ्गणसम्भूत दुग्धाब्धिमथनोद्भव॥
भाभासितदिगाभोग रमानुज नमोऽस्तु ते।
ब्राह्मणाय द्वितीयेऽह्नि शक्त्या देया च दक्षिणा॥
यानि तत्र महाबाहो काले सन्ति फलानि च।

फलानि दद्यात् शय्यायामित्यनेन सामान्येनोपात्तफलानां यानीत्यादिना विशेषाभिधानं।

मधुराणि न तीव्राणि न चापि कटुकानि च।
दातव्यानि नृपश्रेष्ठ स्वशक्त्या शयने नृप॥
मधुराणि च दत्त्वा तु मनोवल्लभतां व्रजेत्।
तस्मात् कटुकतीव्राणि स्त्रीलिङ्गानि च वर्जयेत्।
खर्जूर मातुलङ्गानि स्थितेन शिरसा सह।
फलानि शयने राजन् यज्ञभागं हरस्य तु॥

स्थितेन शिरसा सह नालिकेरं यथास्थितं वर्जयेत्। अन्तर्गोलं दद्यात् हरस्य यज्ञभागं वर्जयेत्। रुद्र प्रीत्यर्थं कतिचिदवशेष्य परितस्त्यजेदित्यर्थः।

एतान्येव तु विप्राय गाङ्गेयसहितानि च।
द्वितीयेऽह्नि प्रदेयानि भक्त्या शक्त्या च भारत॥
वासोदानं तथा धान्यफलदानसमन्वितम्।
एतान्येव यानि शयने दत्तानि गाङ्गेय मत्र सुवर्णम्।
एवं करोति यः सम्यक् नरो मासचतुष्टयम्।
तस्य जन्मत्रयं वीर गृहभङ्गो न जायते॥
मासचतुष्टयं कृष्णद्वितीयास्विति शेषः॥

बोधिन्यनन्तर द्वितीयायां समाप्तिरित्यर्थः ।
तस्य जन्मत्रयं यावत् गृहभङ्गो न जायते ।
अशून्यशयनश्चैव धर्म्मकामार्थसाधकः ॥
भवत्यव्याहतैश्वर्य्यः पुरुषो नात्र संशयः ।
नारी च पार्थ धर्म्मज्ञा व्रतमेव यथाविधि ॥
या करोति न सा शोच्या बन्धुवर्गस्य जायते ।
वैधव्यं दुर्भगत्वञ्च भर्त्तृत्यागञ्च सत्तम ॥
प्राप्नोति जन्मत्रितयं न सा पाण्डुकुलोद्वह ।

एषाह्य शून्यशयना नृपते द्वितीया
ख्याता समस्त कलुषापहरा द्वितीया ।
एनां सदाचरति यः पुरुषोऽथ योषित्
प्राप्नोत्यसौ शयनमग्र्यमहार्हभोगम् ॥

पद्मपुराणे तु तदेव सकलं मन्त्रादिकमभिधाय

शङ्कर उवाच ।

गीत वादित्र निर्घोषैर्देव देवस्य कारयेत् ।
घण्टावादनशक्तस्य सर्व्वदेवमयीं नमः ॥
एवं संपूज्य गोविन्दमश्नीयात्तैलवर्जितम् ।
नक्तमक्षारलवणं यावत्तत्स्याच्चतुष्टयम् ॥
यामुपोष्येति तु तैलादिवर्जनाद्दिवाभोजनवर्जनाच्च ।
ततः प्रभाते सञ्जाते लक्ष्मीपतिसमन्विताम् ।
दीपान्नभोजनैर्युक्तां शय्यां दद्याद्विचक्षणः ॥
पादुकोपानहच्छत्र चामरासनसंयुताम् ।
तथाभरण धान्यैश्च यथा शक्त्या समन्विताम् ॥

अव्यङ्गाङ्गाय विप्राय वैष्णवाय कुटुम्बिने ॥
दातव्या वेदविदुषे न बकव्रतिने क्वचित्।
ततोपविश्य दाम्पत्यमलङ्कृत्य विधानतः ॥
पत्न्याश्च भोजनं दद्याद्भक्ष्यभोज्यसमन्वितम्।
ब्राह्मस्यापि सौवर्णीमुपस्करसमन्विताम् ॥
प्रतिमां देव देवस्य सोदकुम्भां निवेदयत्।
एवं यस्तु पुमान् कुर्य्यादशून्यशयन व्रतम् ॥
न तस्य वित्तविरहः कदाचिदपि जायते।
नारी वाविधवा ब्रह्मन् यावच्चन्द्रार्कतारकम् ॥

मत्स्यपुराणात्।

न विरूपं न शोकार्त्तं दाम्पत्यं जायते क्वचित्।
न पुत्रपशुरत्नानि क्षयं यान्ति नृपोत्तम ॥
सप्तकल्प सहस्राणि सप्तकल्पशतानि च।
कुर्व्वन्नशून्यशयनं विष्णुलोके महीयते ॥

भविष्यत्पुराणे।

अशून्यशयनं तस्य धर्म्म कामार्थ साधकम्।
भवत्यव्याहतैश्वर्य्यः पुरुषो नात्र संशयः ॥
नारी च राजन्धर्म्मज्ञा व्रतमेतद्यथा विधि।
या करोति न शोच्यासौ बन्धुवर्गस्य जायते ॥
वैधव्यं दुर्भगत्वञ्च भर्त्तृत्यागञ्च सत्तम।
नाप्नोति जन्मत्रितयमेतत् कृत्वा महाव्रतम् ॥

इत्येषा कथिता राजन् द्वितीया तिथिरुत्तमा ।
यामुपोष्य नरो राजन्नृद्धिहृद्धिं स्वयं व्रजेत् ॥

इति अशून्यशयनद्वितीयाव्रतम् ।

———:०:———

ब्रह्मा उवाच ।

ब्रह्माणञ्च द्वितीयायां संपूज्य ब्रह्मचारिणम् ।
भोजयित्वा तु विधिना सर्व्वासां पारगो भवेत् ॥
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः ।
पूर्व्ववत्पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः ॥

तिथीश्वरो ब्रह्मा ।

गन्ध पुष्पोपहारैश्च यथा शक्त्या विधीयते ।
पूजाऽशाठ्येन शाठ्येन क्रतापि च फलप्रदा ॥
आज्यधारा समिद्भिश्च दधि चीरान्न माच्चिकैः ।
पूर्व्वोक्त फलदो होमः क्रतः शान्तेन चेतसा ॥
एतद्व्रतं वैश्वानरप्रतिपत् व्रतवत् व्याख्येयम् ।

इति भविष्यत्पुराणोक्तं ब्रह्मव्रतम् ।

अगस्त्य उवाच ।

अतःपरं प्रवक्ष्यामि कान्तिव्रतमनुत्तमम् ।

द्वितीयायान्तु राजेन्द्र कार्त्तिकस्य सिते दिने॥
नक्तं कुर्व्वीत यत्नेन अर्च्चयेद्बलकेशवौ।
बलदेवाय पादौ तु केशवाय शिरोऽर्चयेत्।
एवमभ्यर्च्च मेधावी वैष्णवं रूपमुत्तमम्॥
परस्वरूपं सोमाख्यं द्विकलन्तद्दिनेऽर्चयेत्।

सोमरूपं विष्णुरूपं कृत्वा तस्य पादौ बलदेवायेत्यर्चयेत्। शिरः केशवायेति एवमङ्गद्वयमभ्यर्च्य शेष रूपमर्चयेत्। तद्दिने द्वितीयादिने द्विकालं तत् द्वेकले यस्य तत् द्वेकले बलदेवकेशवाख्ये निग्रहानुग्रहशक्ती व्यक्ते भवतः।

दद्यादर्घ्यञ्च मतिमान् मन्त्रेण परमेष्ठिनः।
परमेष्ठिनः चन्द्ररूपस्य विष्णोः तमेव मन्त्रमाह।
नमस्त्वमृतरूपाय सर्व्वौषधिधराय च।
यज्ञलोकाधिपतये सोमाय परमात्मने॥
अनेन खलु मन्त्रेण दत्त्वार्घ्यं शशिने नृप।
रात्रौ स विप्रो भुञ्जीत यवान्नं सघृतं नृप।

स विप्रः स ब्राह्मणस्तेन ब्राह्मणाय भोजनं कृत्वा स्वयं भोक्तव्यमित्यर्थः सिध्यति।

फाल्गुनादि चतुष्कन्तु पायसं सघृतं शुचिः।
तिलहोमं प्रकुर्व्वीत कार्त्तिकादौ यवैस्तथा॥
आषाढादिचतुष्के तु घृतहोमञ्च कारयेत्।
नक्तं तिलान्नं भुञ्जीत एष एव विधिक्रमः॥
कार्त्तिकादिचतुष्के यवान्नं भुञ्जीतेत्यर्थसिद्धम्।
अतः संवत्सरे पूर्णे सोमं कृत्वा तु राजतम्॥

सितवस्त्रयुगच्छन्नं सितपुष्पानुलेपनम्।
एवमेव द्विजं पूज्य ततस्तं प्रतिपादयेत्॥
कान्तिमानखिललोके तु सर्व्वज्ञः प्रियदर्शनः।
त्वत्प्रसादात्सौम्यरूपी नारायणनमोऽस्तु ते।
अनेन खलुमन्त्रेण दत्त्वा विप्राय वाग्यतः॥
कृतमात्रे ततस्तस्मिन् कान्तिमान् जायते नरः।
आत्रेयेणापि सोमेन कृतमेतत् पुरा नृप।
तस्य व्रतान्ते तत्तुष्टः स्वयमेव जनार्द्दनः॥
इति वराह पुराणोक्तं सोद्यापनं कान्तिद्वितीयाव्रतम्।

श्रीकृष्ण उवाच।

कथयामि परं पार्थ सर्व्वविघ्नोपशान्तिदम्।
शृणुष्वाभिनवस्येन्दोरर्घ्यदानविधिं परम्॥
रवेर्द्वादशभिर्भागैर्वारुण्यां दृश्यते शशी।
प्रदोषसमये पार्थ अर्घ्यं दद्यात्तथा विधोः।
चन्द्रात् द्वादश भागान्तरिते सूर्य्ये अर्घ्यं दद्यात् प्रतिपद्युतायां द्वितीयायामित्यर्थः।
द्वितीयायां सितेपक्षे सन्ध्याकाले ह्युपस्थिते।
संस्थाप्याभिनवं चन्द्रं कृत्यं गोमयमण्डले॥
रोहिणीसहितं देवं चन्दनेनाभिलेखयेत्।
पुष्पचन्दन कर्कन्धु फलैस्तन्दुल मिश्रितैः।
दूर्व्वाङ्कुरै रत्नवरैः फलैर्वस्त्रैश्च पाण्डुरैः॥
मन्त्रेणानेन राजेन्द्र अर्घ्यं दद्याद्विचक्षणः।

कर्कन्धु फलानि बदराणि।

नवो नवोसि मासान्ते जायमानः पुनः पुनः।
आप्यायस्वसमेत्येवं सोमराज नमोऽस्तुते॥
अनेन विधिनाचार्घ्यं सर्व्वकाम फलप्रदम्।
यः प्रयच्छति सोमाय मासि मासि समाहितः॥
सर्व्वकामानवाप्नोति दीर्घमायुश्च विन्दति।
दत्त्वार्घ्यं विप्र सहितः शाल्यन्नं चीरसंयुतम्॥
नक्तं भुञ्जीत कौन्तेय प्रसन्नवदनेच्चणः।
युक्तःसुकीर्त्त्या यशसा कान्त्या पुष्ट्या च मानवः॥
पुत्र पौत्रैः परिवृतो गोधान्यधनसङ्कुलः।
स्थित्वा वर्षशतं मर्त्ये मृतः शशि पुरं व्रजेत्॥
तत्रास्ते दिवि दिव्यांस्तु भोगान् भुञ्जन्नृपोत्तमः।
वरस्त्रीभिः सहात्यर्थं यावदाभूतसंप्लवम्॥
सर्व्वां समृद्धिमतुलां यदि वाञ्छसि त्वं
मासानु मासमिह मद्वचनं कुरुष्व।
सोमस्य सोम कुलनन्दन चन्दनाद्यै
रर्घ्यं प्रयच्छ नवजातनवोदितस्य॥

इति भविष्योत्तरे नवोदितचन्द्रार्घ्यदानविधिः।

———

मार्कण्डेय उवाच।

इमां तथान्यां वक्ष्यामि द्वितीयां सर्व्वकामदाम्॥

यामुपोष्य नरः कामान् सर्व्वानाप्नोत्यभीप्सितान् ।
चैत्रशुक्लद्वितीयायां संप्राप्य नृप मानवः ॥
दिनावसाने कुर्व्वीत सम्यक् स्नानं नदीजले ।
बालेन्दुमण्डलं कृत्वा पूजयेच्छेतवर्णकैः ॥
श्वेतैः पुष्पैः फलैश्चैव परमान्नेन भूरिणा ।
इक्षुणेक्षुविकारैश्च शुभ्रेण लवणेन च ॥
दिनावसाने देवेशं पूजयेद्वा निशाकरम् ।
अथवा मण्डलं कृत्वा गगनस्थं प्रपूजयेत् ॥
घृतेन हवनं कृत्वा नक्तं भुञ्जीत वाग्यतः ।

नाम मन्त्रेण पूजा होमौ ततस्तैलेन पचितं भक्षयेन्न स द्वैवतत् । तैलपक्कं संवत्सरं वर्जयेत् ।

एतद्व्रतं नरः कृत्वा सम्यक् संवत्सरं शुचिः ।
सौभाग्यं महदाप्नोति स्वर्गलोकं स गच्छति ॥

एतत्पवित्रं रिपुनाशकारि
सौभाग्यदं रोगहरञ्च राजन् ।
प्रोक्तं व्रतं यादववंशमुख्य
कार्य्यं प्रयत्नेन तथा स्त्रियापि ॥

इति विष्णुधर्म्मोत्तरे बालेन्दु द्वितीया व्रतम् ।

——:○:——

कृष्ण उवाच ।

रूपं सुरूपं यो वाञ्छेत्सौभाग्यं प्रवराः स्त्रियः ।

कार्त्तिके शुक्लपक्षे तु द्वितीयायां नराधिप ॥
पुष्पाहारी वर्षमेकं वसेत्संनियतात्मवान्।

कार्त्तिकशुक्लपक्ष द्वितीयायां व्रतमारभ्यान्यास्वपि शुक्लपक्ष द्वितीयास्वेव वर्षपर्य्यन्तं पुष्पाहारी व्रतं कुर्य्यादित्यर्थः।

कालप्राप्तानि यानि स्यु र्हविष्यकुसुमानि तु ॥
भुञ्जीत तानि दत्त्वा तु ब्राह्मणेभ्यो नराधिप।

हविष्य कुसुमानि पूजार्हाणि भक्षणे चाविरुद्धानि। अश्विनौ चात्र नाममन्त्रेण पूजनीयौ तयोः फलदातृत्वेन श्रवणात्।

सुवर्णस्य च पुष्पाणि गवा सह ददाति यः।
व्रतान्ते तस्य सन्तुष्टौ देवौ त्रिभुवनेश्वरौ ॥
दद्युः कामांस्तथा दिव्यान्विमानमपि तैजसम्।
सुचिरं देवनारीभिर्लोकं रमयताश्विनौ ॥
इह चागत्य कल्पान्ते द्विजोविप्रपुरस्कृतः।
वेदवेदाङ्गविद्वान् स्यात् सप्तजन्मान्तराण्यसौ ॥
दाता दान्तमति र्वाग्मी आधिव्याधिविवर्जितः।
पुत्र पौत्रैः परिवृतः सह पत्न्या रमेच्चिरम् ॥
मध्यदेशे सुरम्ये च धर्म्मिष्ठे राज्यभाग्भवेत्।
कथिता ते मया तुभ्यं द्वितीया पुष्पसंज्ञिता ॥

इति भविष्यत्पुराणोक्तं पुष्पद्वितीयाव्रतम्।

कृष्णउवाच।

सन्त्येतास्तिथयः पार्थ द्वितीयाद्याश्च विश्रुताः।
मासैश्चतुर्भिश्चतस्रः प्रावृट्काले महामहाः ॥

गौ पताश्चियथः पार्थ न प्रोक्ताश्च मया क्वचित्।
प्रकाशयामि ताः सम्यक् शृणु सर्व्वाः समाहितः॥
प्रथमा श्रावणे मासि तथा भाद्रपदे परा।
तृतीयाश्वयुजे मासि चतुर्थी कार्त्तिके भवेत्॥
श्रावणे कलुषा नाम तथा भाद्रे च गोर्म्मिला।
आश्विने प्रेतसञ्चारा कार्त्तिके याम्यका मता॥

युधिष्ठिर उवाच।

कस्मात् सा कलुषा प्रोक्ता कस्मात्सा गोर्म्मिला मता।
कस्मात्सा प्रेतसञ्चारा कस्माद्याम्या प्रकीर्त्तिता॥

कृष्ण उवाच।

पुरा वृत्रवधे वृत्ते प्राप्तराज्ये पुरन्दरे।
ब्रह्महत्यापनोदार्थमश्वमेधे प्रवर्त्तिते॥
क्रोधादिन्द्रेण वज्रेण ब्रह्महत्या निसूदिता।
षड्विधा सा क्षितौ क्षिप्ता वृक्षतोयमहीतले॥
नारी, ब्रह्महणे, वह्नौ संविभज्य यथा क्रमम्।
तत्पापं श्रावणे व्यूढं द्वितीयायामिनोदये॥
नारीं वृक्षं नदीं भूमिं वह्निं ब्रह्महणं तथा।
निर्म्मलीकरणं जातमतोर्थं कलुषा स्मृता॥
मधुकैटभयोरक्ते पुरामग्ना हि मेदिनी।
अष्टाङ्गुलाऽपवित्राश्मानारीणान्तु रजोमलम्॥
नद्यो जलमलाः सर्व्वा वह्नेर्धूमशिखामलम्।
कलषाणिं चरन्त्यस्यां तेनैषा कलुषा मता॥

चरन्ति कृत प्रायश्चिताान् परित्यज्या कृतप्रायश्चितान् ग्रहीतुं विचरन्ति। अतएव तस्यां प्रतिसंवत्सरं किञ्चित् प्रायश्चित्तं कर्त्तव्यम्।

गौर्गिरां भारतीवाणी वारामेधा सरस्वती।
गौर्म्मलं वहते यस्मा द्वितीया गौर्म्मला मता॥
देवर्षि पितृधर्म्माणां निन्दका नास्तिकाः शठाः।
तेषां सा वाग्मलं व्यूढा द्वितीया तेन गौर्म्मला॥
अनध्यायेषु शास्त्राणि पाठयन्ति पठन्ति च।
शाब्दिकास्तार्किकाः श्रौतास्तेषां ये शब्दजा मलाः॥
ते च व्यूढा द्वितीयायां ततोर्थं गौर्म्मला च सा।
अतस्तस्यां सरस्वती पूजा कार्य्येत्यर्थः।
प्रेतास्तु पितरः प्रोक्तास्तेषां तस्यां तु सञ्चरः।
द्वितीयायाञ्च लोकेषु तेन सा प्रेतसञ्चरा॥
अग्निष्वत्ता बर्हिषद आज्यपाः सोमपास्तथा।
पितॄन् पितामहान् प्रेतान् सञ्चारात् प्रेतसञ्चराः॥
पुत्रैः पौत्रैश्च दौहित्रैः स्वधामन्त्रैस्तु पूजिताः।
श्राद्धदान मखैस्तृप्ता यान्त्यतः प्रेत सञ्चरा॥
अतस्तस्यामपि श्राद्धं कर्त्तव्यमित्यर्थः।
कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर॥
यमो यमुनया पूर्व्वं भोजितः स्वगृहे* सदा।
द्वितीयायां महोत्सर्गे नारकीयाश्च तर्पिताः॥
पापेभ्योपि विमुक्तास्ते मुक्ताः सर्व्वनिबन्धनात्।

* स्वयमिति क्वचित् पाठः।

भ्रंगिताश्चातिसन्तुष्टाः स्थिताः सर्व्वे यदृच्छया।
तेषां महोत्सवो वृत्तो यमराष्ट्रसुखावहः॥
अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर।
अस्यां निजगृहे पार्थ न भोक्तव्यमतोबुधैः॥
स्नेहेन भगिनीहस्ता*द्भोक्तव्यं पुष्टिवर्द्धनम्।
दानानि च प्रदेयानि भगिनीभ्योविधानतः॥
स्वर्णालङ्कारवस्त्राणि पूजा सत्कारभोजनैः।
सर्व्वाभगिन्यः संपूज्या अभावे प्रतिपन्नकाः॥

प्रतिपन्नकाः, मित्रभगिन्य इत्यर्थः।

पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर।
मातुलस्य सुताहस्तात् द्वितीयायां तथा नृप॥
पितुर्मातुःस्वसुः कन्ये तृतीयायां तयोः करात्।
भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परम्॥

पितृव्यभगिनी, पितृव्यसम्बन्धेन भगिनी पितृव्यकन्येत्यर्थः।

सर्व्वस्वभगिनीहस्ताद्भोक्तव्यं बलवर्द्धनम्†॥
धन्यं यशस्यमायुष्यं धर्म्मकामार्थसाधकम्।
व्याख्यातं सकलं पार्थ सरहस्यं मया तव॥
यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितः प्रतिजगत्स्वसृसौहृदेन।
तस्यां स्वसृकरतलादिह यो भुनक्ति

---

* यत्नेनभगिनी हस्तादिति पुस्तकान्तरे पाठः।

† पुष्टि वर्द्धनमिति पुस्तकान्तरे पाठः॥

प्राप्नोति रत्नशुभगन्धनमुत्तमं सः‡॥

इति भविष्योत्तरे यमद्वितीयाव्रतम्।

—:०:—

सनत्कुमार उवाच।

अनन्तरं द्वितीयायां यत्कार्य्यं तच्छृणुष्व मे।
सर्व्वविद्याप्रदं पुण्यं बुद्धिप्रभवदोषहृत्॥
सुस्नातः कृतजप्यश्च कृतपूर्व्वाह्निकक्रियः।
ब्रह्मचारी जितक्रोधो जितवाक्कायमानसः॥
मण्डलं चतुरस्रन्तु कुर्य्यात्तच्छ्वेततण्डुलैः।
तन्मध्येऽष्टदलं पद्मं विधाय कुसुमोत्करैः॥
कर्णिकायां श्रियं देवीं पद्महस्तां हरिप्रियाम्।
पद्माननां पद्मनेत्रां पद्मकिञ्जल्कसन्निभाम्॥
सरस्वती रति-भूति-र्दीप्तिः कान्तिश्च सर्व्वदा।
मैत्रीविद्येति चाख्याता दिव्यास्ताश्चाष्टशक्तयः॥
तद्दलेषु यथायोगं न्यसेदष्टसु योजिताः।
तत्तदाद्यर्णयुक्तेन नाममन्त्रेण पूजिताः॥

तत्तदाद्यर्णयोगेनेति, तत्तन्नामादिवर्णकृतमन्त्रेणेत्यर्थः यथा सं सरस्वत्यैनम इति एवं वक्ष्यमाणेष्वपि ज्ञेयम्।

प्रज्ञां मेधां प्रभां सत्वा,मुत्तरस्यामितिक्रमात्।
स्मरेद्विदिक्षु छायाद्या मिश्रवर्णाः पृथक्पृथक्॥

---

‡ शुभगन्धमनुत्तमं स इति क्वचित् पाठः।

नन्दी दण्डोऽरुणः सिद्ध इति दिक्पतयःक्रमात् ।
विष्णुः शेषोवरूथखण्ड इति कोणाधिपाः स्मृताः ॥
द्वारपाला बहिश्चाष्टौ दिक्षु वै इन्द्रशः स्थिताः ।

इन्द्रशः दिशि द्वौ द्वौ ।

वक्रतुण्डो महादंष्ट्रो नीलजिह्वो वृहच्छिराः ॥
क्रोधेक्षणो दीप्तमुखो दीप्ताक्षः काल इत्यपि ।
शङ्ख-पद्मनिधी-दिक्षु-पङ्कजोपरि संस्मरेत् ॥
दिक्षु प्रतिदिशं निधिद्वयम् ।
व्यासः क्रतु-र्मनु-र्दक्ष-श्चत्वारो गुरवः स्मृताः ॥

'दिक्षु, इत्यनुवर्त्तते ।

अत्रिर्दुमत् कविः काण्ड इति दिक्कोणतः स्थिताः ॥

'दिक्कोणतो, विदिक्षु ।

वशिष्ठो वामदेवश्च जीमूतश्च पराशरः ।
शाण्डिलकोहरः कान्तो मित्रइत्यपि विश्रुताः ॥
एवमादि सुसंयुक्तं मण्डलं कारयेत् सुधीः ।
चन्दनागुरुधूपेन श्वेतपुष्पैः समर्च्चयेत् ॥
पायसञ्च पयःसिद्धं निवेद्य च यथोदयम् ।
श्रीलता पद्म कुसुमैः सितपुष्पैश्च तण्डुलैः ॥
फल पुष्पदलैर्विल्वैः नन्द्यावर्त्तप्रसूनकैः ।
जाति केशर पुष्पैश्च मल्लिका चम्पकोद्भवैः ॥

श्रीलता पद्मिनी, पद्मन्तु पुष्पं कुशुमन्तु केसरन्तयोः पृथक्-

ग्रहणं फलाधिक्यार्थं। सितं पुण्डरीकं नन्द्यावर्त्तं तगरं केसरी बकुलः, मल्लीका मुद्गरकः।

श्रीबीजेन यथा योगमर्च्चयेदीश्वरप्रियाम्।
द्वारपालान् वहिश्चाष्टौ दिक्षु वै द्वादशस्थिताः॥
वक्रतुण्डो महादंष्ट्रो नीलजिह्वो हृस्वच्छिराः।
क्रोधेच्चणो दीप्तमुखो दीप्ताक्षः कालदूत्यपि॥
शङ्खपद्मनिधी दिक्षु पङ्कजोपरि संस्मरन्।
व्यासः क्रतु-मुनि-दक्ष-श्चत्वारो गुरवः स्मृताः॥
शक्तीश्च तत्तन्मन्त्रेण सर्व्वत्रैवं विधिःस्मृतः।
प्रातरेवं विधिः कार्य्यो नापराह्णे कदाचन॥
एवमभ्यर्च्च्य विधिना देवीं शक्त्यादिसंयुताम्।
प्रदक्षिणं नमस्कारान् स्तोत्रालापादि कारयेत्॥
श्रीसूक्तमन्यसूक्तानि वैष्णवानि च कीर्त्तयेत्।
'श्रीसूक्तं, हिरण्यवर्णां हरिणीमित्यादि प्रसिद्धम्॥

'अन्यसूक्तानि, पुरुष सूक्तानि।

एवं समाप्य विधिवत्सपर्य्यामथानन्यधीः।
गामघ्नामुदकुम्भञ्च गुरुभ्यः प्रतिपादयेत्॥
गामघ्नामिति गौर्वृषः, अघ्ना धेनुः, वृषधेनू प्रतिपादयेदित्यर्थः।
लाजापूर्णानि पात्राणि तिलपूर्णानि पञ्च च।
हरिद्राचूर्णपूर्णानि योषिद्वा प्रतिपादयेत्॥
दद्यात् कुटुम्बिने हेम, अन्नं हि क्षुधिताय च *।

* अन्नं रिक्ताय दापयेत् रिक्ताय क्षुधिताय इति पुस्तकान्तरे पाठः।

अथ विद्याप्रदं शिष्यं आचार्य्यमभिवाद्य च ॥
देहि विद्यां प्रपन्नायेत्यर्थयेत विचक्षणः ॥
एवमभ्यर्थितः पूर्व्वमाचार्य्यो देवसन्निधौ ।
विद्यामुपदिशेत्तस्मै शिष्याय व्रतचारिणे ॥
नियमो विद्याधिगतिकारणम् ।
सम्यगुक्तो मया ब्रह्मन् येन पारम्यमृच्छति ।
पारम्यं परमता
यो विद्यया वा कुलभूतिमुच्चैः ।
प्राप्तुं पदम्बा परमस्य पुंसः
इत्थं द्वितीयानियमप्रभाव
प्राप्तात्मविद्यः स परं समेति ॥

इति गारुड पुराणोक्तं विद्याव्रतम् ।

———:○:———

दद्यात्सितद्वितीयायामिन्दोर्लवणभोजनम् ।
समाप्ते गोप्रदो याति विप्राय शिवमन्दिरम् ॥
विप्राय लवणभोजनं दद्यादित्यन्वयः । सोमस्यात्र देवानां सोमव्रतमिदं स्मृतमिति सोमस्य देवतात्वं गम्यते ।
कल्पान्ते राजराजस्य सोमव्रतमिदं स्मृतम् ।

इति पद्म पुराणोक्तं सोमव्रतम् ।

———:○:———

पुष्कर उवाच ।

पौषशुक्लद्वितीयायां गवां शृङ्गोदकेन तु ।

स्नात्वा शुक्लाम्बरो भूत्वा सूर्य्यैत्वस्तमुपागते ॥
बालेन्दोः पूजनं कृत्वा गन्धमाल्यानुलेपनैः ।
दीप धूप नमस्कारैस्तथाचैवान्नसम्पदा ॥
दध्ना च परमान्नेन गुडेन लवणेन च ।
पूजनैर्ब्राह्मणानाञ्च पूजयित्वा निशाकरम् ॥

सोमरूपं कान्ति द्वितीयायां नाममन्त्रेणपूजा यावदस्तं न यातीन्दुस्तावदेव समाचरेत् ।

आहारं गोरसप्रायमधःशायी निशान्नयेत् ।
एवं संवत्सरे पूर्णे सौम्ये मासि द्विजोत्तम ॥

एवमिति प्रतिमासं शुक्लद्वितीयायां-सूर्य्यचन्द्रपूजनं विधिनेत्यर्थः ।

'सौम्यो, मार्गशीर्षः ।

बालेन्दोः पूजनं कृत्वा पूर्व्वस्मृतिविशेषतः ।
वाससी रसकुम्भञ्च काञ्चनञ्च द्विजातये ॥
दत्त्वा तु पूर्व्ववद्भक्त्या व्रतपारगतो भवेत् ।

पूजा, भोजनं, पूजयेत् ।

व्रतारम्भ इति, गोरसः ।

क्षीरादि ।

व्रतेनानेन धर्म्मज्ञो रोगमेवं व्यपोहति ।
सौभाग्यमाप्नोति तथा पुष्टिञ्च मनुजोत्तम ॥
कामं समाप्नोत्यथचैकमिष्टं
यशस्तथाग्र्यं प्रचुरं स धर्म्मम् ।

अभ्यासतस्तस्य समस्तकामान्
नरस्तथाप्नोत्यथ वापि नारी ॥

इति विष्णु धर्म्मोत्तरारोग्यद्वितीयाव्रतम् ।८

——ः○ः——

मार्कण्डेय उवाच ।

पुरुषः प्रकृतिश्चोभौ जगत्सर्व्वं प्रकीर्त्तितम् ।
अग्नीषोमात्मकं सर्व्वं तथा तच्च प्रकीर्त्तितम् ॥
वासुदेवश्च लक्ष्मीश्च ताविव परिकीर्त्तितौ ।
चैत्रशुक्ल द्वितीयायां सोपवासो जितेन्द्रियः ॥
पुरुषेण च सूक्तेन वह्निं संपूजयेन्नरः ।

सोपवास इति प्रतिपदि कृतोपवासो द्वितीयायां वह्निं पूजयेदित्यर्थः । उपरिष्टाच्च चीर घृत भोजनस्य विहितत्वात् ।

गन्धमाल्य नमस्कार दीप धूपान्न सम्पदा ।
लक्ष्मीञ्च वरदं देवं पूजयेदुदकंहरिम् ॥
श्रीसूक्तेन च धर्म्मज्ञ तथार्चेन्मनुजोत्तमम् ।

हरि सोमौ वह्निं जलकुम्भञ्च प्रतिष्ठाप्य पुरुषमग्निं वासुदेवञ्चैकोपरि पूजयेत् ।

काञ्चनं रजतं ताम्रं दद्यात् विप्रेषु दक्षिणाम् ।
प्राणयात्रां बुधः कुर्य्यात् चीरेण सघृतेन च ॥
प्राणयात्रामिति, प्राणनिर्व्वहणम् ।
संवत्सरमिदं कृत्वा व्रतं सम्यगुपोषितः ।
मुच्यते पातकैः सर्व्वैं मोक्षोपायञ्च विन्दति ।

कामानवाप्नोत्यथ वाञ्छितांश्च
लोकांश्च पुण्यान् वसुधां-समग्रां।
विरूपवान् रूपमथापि वाग्र्यं
यशस्तथाग्यन्तनयांश्च मुख्यान्॥

इति श्रीविष्णुधर्मोत्तरोक्त प्रकृतिपुरुषद्वितीयाव्रतम्।१२

——:○:——

मार्कण्डेय उवाच।

नासत्यौ देवभिषजावश्विनौ परिकीर्त्तितौ।
तावेव कथितौ लोके सूर्य्यताराधिपौ नृप॥
अश्वयानरतौ यस्मादश्विनौ परिकीर्त्तितौ।
चैत्रशुक्ल द्वितीयायां सोपवासो जितेन्द्रियः॥
नासत्यौ देवभिषजौ पूजयेत् प्रयतः शुचिः।
गन्धमाल्यनमस्कारधूपदीपान्न सम्पदा॥
कृत्वा च रूपनिर्म्माणं नासत्यौ पूजयेन्नरः।
नासत्यमूर्त्तिस्तु विश्व कर्म्मोक्ता
द्विभुजौ देवभिषजौ कर्त्तव्यावश्ववाहनौ।
तयोरोषधयः कार्य्या दिव्या दक्षिणहस्तयोः॥
वामयोः पुस्तकौ कार्य्यौ दर्शनीयौ तथा द्विजाः।
दीपमालां तथा दद्यात्तयोर्निशि विशेषतः॥
कनकं रजतं चोभे दद्याद्विप्रेषु दक्षिणाम्।
स-पूज्य तत्रयुगलं विष्णोः संवत्सरं ततः॥

प्रदीप्ततेजा भवति चक्षुष्मांश्चैव जायते ।
प्राणयावान्तु कुर्व्वीत दध्ना घृतयुतेन च ॥
नेत्र व्रतं द्वादश वत्सराणि
कृत्वा भवेद्भूमिपतिः प्रतीतः ।
ततः* सुरूपोऽरिगणप्रमाथी
धर्म्माभिरामो नृपवर्गमुख्यः ॥

इति विष्णुधर्म्मोत्तरे नेत्रव्रतम् ।

———:○:———

इति श्रीमहाराजाधिराज श्रीमहादेवस्य समस्तकरणाधीश्वर सकल-विद्या-विशारद श्रीहेमाद्रिविरचिते चतुर्वर्ग-चिन्तामणौ व्रतखण्डे द्वितीयाव्रतानि ।

———

* घदपरूपोऽरिगण प्रमाथीति पुस्तकान्तरे पाठः ।

अथ सप्तमोऽध्यायः ।

——:○:——

अथ तृतीयाव्रतानि ।

परोपकाराय गृहीतसृष्टिः
*सर्व्वत्र भूतेषु समानदृष्टिः ।
हेमाद्रि राख्याति पुराणदृष्टं
कृती तृतीयाव्रतजातमिष्टम् ॥

युधिष्ठिर उवाच ।

चैत्रे भाद्रपदे माघे रूपसौभाग्यसौख्यदम्† ।
तृतीयात्रय ‡ मेतन्मे कृष्ण कस्मान्न कीर्त्तितम् ॥
किमहं भक्तिरहितः त्रयीमार्गातिगोऽथवा ।
सुप्रसिद्धं जगत्येतत् गोपितं केन हेतुना ॥

कृष्ण उवाच ।

भवान् धर्म्मार्थकुशलः सर्व्वज्ञ इति मे मतिः ।
व्रतञ्चैतत् जगत्ख्यातं नाख्यातं तेन ते मया ॥
यद्यस्ति श्रवणे बुद्धिः श्रूयतां कुरुनन्दन ।
कोवा¶ श्रोता जगत्यस्मिन् भवता सदृशो मम ॥

---

* स सर्व्वभूतेषु समान दृष्टिरिति क्वचित् पाठः ।

† सम्पदमिति पुस्तकान्तरे पाठः ।

‡ तृतीया यच मे इति पुस्तकान्तरे पाठः ।

¶ कोऽन्य इति क्वचित् पाठः ।

जया च विजयाचैव उमायाः परिचारिके।
आगत्य मुनिकन्याभिः पृष्टोऽभीष्टफलेच्छया॥
भवत्यौ सर्व्वदा देव्याश्चित्तवृत्तिविदौ किल।
केन व्रतोपवासेन कस्मिन्नहनि पार्व्वती॥
पूजिता तोष मायाति मन्त्रैः कैश्चिद्वरानने।
तासां तद्वचनं श्रुत्वा जया प्रोवाच सादरं।
व्रतमुत्सवसंयुक्तं नरनारीमनोरमम्॥
श्रूयतामभिधास्यामि सर्व्वकामफलप्रदम्॥
चैत्रे मासि तृतीयायां दन्तधावनपूर्व्वकम्।
उपवासस्य नियमान् गृह्णीयाद्भक्तिभावतः॥
अञ्जनं च सताम्बूलं सिन्दूरं रक्तवाससी।
बिभृयात्सोपवासापि अवैधव्यकरं परम्॥
विधवा यतिमार्गेण कुमारी च यदृच्छया।
कुर्य्याद्दार्थ्यार्च्चनविधिं श्रूयतामत्र च क्रमः॥
नेत्रपट्टपटीवस्त्रैः वस्त्रमण्डयिकां शुभाम्।
कारयेत् कुसुमामोदवासितां भूषितां शुभाम्॥
प्रवालालम्बितप्रोतामन्तर्दिव्य वितानकम्।
विन्यस्तपूर्णकलसां पीठसंविष्टसद्विजाम्॥
पुरतः कारयेत् कुण्डं हस्तमात्रं समेखलम्।
यतः* स्नात्वा शुचिर्भूत्वा परिधाय सुवाससी॥
देवान् पितृन् समभ्यर्च्य ततो देवीगृहं व्रजेत्।

---

* तत इति पुस्तकान्तरे पाठः।

नामाष्टकेन संपूज्य गौरीं गोभर्त्तृवल्लभाम् ॥

नामाष्टकेन वक्ष्यमाणेन, गोभर्त्तृवल्लभान् वृषध्वजवल्लभाम् ।

तत्कालप्रभवैः पुष्पैः गन्धाढ्यैरलिकुलाकुलैः ।
कुङ्कुमेन समालभ्य कर्पूरागुरुचन्दनैः ॥
एवं सम्पूज्य विधिवत् सुधूपेनाधिवासयेत् ।
पार्व्वती ललिता गौरी गायत्री शङ्करी शिवा ॥
उमा सती समुद्दिष्टं नामाष्टकमिदं सदा ।
लड्डुकैः खण्डवेष्टैश्च गुणकैः सिंहकेशरैः ॥
सोमालङ्कैश्चेक्षुरसैः दधिभक्तैः सपूपकैः ।
घृतपक्वैर्बहुविधैः शुचिभिः परिकल्पयेत् ॥
दृष्टिप्राणप्रियैर्हृद्यैर्नैवेद्यैः पूजयेदुमां ।

सिंहकेसरैः, सिंहकेसरवद्दलिताकृतिभिः ।

धान्यकं जीरकं भव्यं कुङ्कुमं लवणं गुडम् ।
कुसुम्भं वेक्षुकाण्डं च हरिद्राश्च पुरोन्यसेत् ॥

भव्यमुत्कृष्टं ।

नालिकेरसनारङ्गं बीजपूरञ्च दाडिमम् ।
कुष्माण्डं त्रपुसं वृत्तं दधित्थं पनसं तथा ॥

वृत्तं वृत्तवत् नातिपक्वमित्यर्थः ।

त्रपुसं कर्क्कटीफलं दधित्थं कपित्थं ।

कालोद्भवान्यथान्यानि फलानि पुरतोन्यसेत् ।
यन्त्रकोलूखल शिला सूर्पाणान्ततिभिः सह ॥

नेत्राञ्जनं शलाकाञ्च नखसाधनकारि च।
दर्पणं विमलं घण्टां भवान्यै विनिवेदयेत्॥
शङ्खतूर्य्यनिनादैश्च गीतमङ्गलनिस्वनैः।
भक्त्या शक्त्या च संपूज्य देवीं शङ्करवल्लभाम्॥
ततोऽस्तसमये भानोः कुमार्य्यः करकैर्नवैः।
स्नानं कुर्य्युर्मुदायुक्ताः सौभाग्यभाग्यवृद्धये॥

कुमार्य्य इति व्रतचारिणीनामुपलक्षणम्।

यामे यामे गते स्नानं देवीपूजनमेव च।
तैरेव नामभिर्होमस्तिलाज्येन प्रशस्यते॥
पद्मासनस्थिता साध्वी तेनैवार्द्रेण वाससा।
गौरीवक्त्रेक्षणपरा तां रात्रिमतिवाहयेत्॥
काश्चिद्गायन्ति संहृष्टाः काश्चित् नृत्यन्ति हर्षिताः।
कथयन्ति कथाः काश्चिद्धर्म्मकामार्थसंश्रयाः।
गीत तालानुसंवद्धमनुद्धतमनाकुलम्।
नृत्यन्ति च पुरो देव्याः काश्चिद्विभ्रसितभ्रुवः॥
नृत्येन तुष्यति हरो गौरी गीतेन तुष्यति।
सद्भावेनाथ वा सर्व्वे गृह्णन्ति त्रिदिवौकसः॥
सुवासिनीभ्यस्ताम्बूलं कुङ्कुमं कुसुमानि च।
प्रदेयं जागरवतामन्येषामथ वारितम्॥
नटैर्विटैर्भटैः श्वेटैः प्रेरणैः प्रेक्षणोत्सवैः।
सखीभिः सह तां रात्रिं गीतनृत्यहसैर्नयेत्॥
एवं प्रभातसमये स्नात्वा संपूज्य पार्व्वतीम्।

शक्त्या तुलां समारोहेद्वस्त्रालङ्कारभूषिताम् ॥
तोलयेत् शितयात्मानं* सितेन लवणेन च।

शितया शर्करया।

कुङ्कुमेनाथ वा शक्त्या कर्पूरागुरुचन्दनैः।
पर्व्वतानामपीच्छन्ति दानं केचिच्च सूरयः॥
कुण्डमण्डपसम्भारमन्त्रैरत्रैवमेव तत्।
लवणेन सहात्मानं तोलयन्त्या गुडेन च॥
कयापि शक्तिपरया सौभाग्यमतुलीकृतम्।
एवं देवीं प्रणम्याथ चमाप्य गृहमाविशेत्॥
आमन्त्र्य द्विजदम्पत्यं वासोभिर्भूषणैस्तथा।
संपूज्य भोजयित्वा च दद्यात्तेभ्योऽपि दक्षिणां॥
यद्यदात्माभीष्टतमं शयनं यानमेव च।
वस्त्रमाभरणं गावः सर्व्वन्तेभ्यो निवेदयेत्।
हैमं पत्रं रत्नफलं मुक्ताचूर्णविचूर्णितम्॥
ताम्बूलं केचिदिच्छन्ति दीयमानं सखीजने।
पत्रस्थाने सुवर्णपत्राणि, पूगफलस्थाने रत्नानि।
चूर्णस्थाने मुक्ताफलानि एवं विधं ताम्बूलं सखीजने देयम्।
अनम्लं मधुरप्रायं भोजयित्वा सुवासिनी॥
स्वयं भुञ्जीत सहिता ज्ञातिबन्धुजनैःस्वकैः।
यच्च देव्याः पुरोदत्तं नैवेद्यादि सुशोभनम॥
प्रतिगेहं नयेत्सर्व्वं विभज्याश्रान्तमानसा।

---

* गुडेनेति पुस्तकान्तरे पाठः।

दत्त्वा वायनकं दिव्यं कृतकृत्यो भवेत्ततः ॥

वायनकं वायनमिति लोके* ।

विधिर्भाद्रपदे ह्येष सर्व्वसौख्य प्रदायकः ।
सप्त धान्य विधिश्चास्य सूर्पस्थां पूजयेदुमां ॥

पूर्णकलशस्थाने सूर्पमिति शेषः ।

गोमूत्रं प्राशनं यस्मात्तस्माद्गोमूत्रसंज्ञिता ।
माघमासे तृतीयायां विशेषः श्रूयतां मया ॥
पूर्व्वोक्तं सकलं कृत्वा प्रभाते यवसंस्तरे ।
स्थापयित्वा कुन्दपुष्पैः पूजयेत् ससुतामुमाम् ॥
एतेन कारणेनोक्ता चतुर्थी कुन्दसंज्ञिता ।

पूर्व्वोक्तं सकलं तृतीयायां कृत्वा प्रभात इति चतुर्थीदिवसे । ससुतां विनायकसहितामुमां पूजयेदित्यर्थः ।

उमारूपन्तु कर्त्तव्यं सौधासनगतं† शुभम् ।
सौवर्णञ्च महाराज साक्षसूत्रकमण्डलुम् ॥
विनायकश्च कर्त्तव्यो गजवक्त्रश्चतुर्भुजः ।
तृतीयात्रयमेतत्ते कथितं सर्व्वकामदम् ॥
जयया मुनि कन्यानां यत्पुरा समुदाहृतम् ।
एवं या कापि कुरुते नारी व्रतमिदं शुभम् ॥
सा रूपसौभाग्ययुता मृता स्वर्गे महीयते ।
न दुर्भगा कुले तस्याः काचिद्भवति भारत ॥

---

* वायनकं वाणमिति पुस्तकान्तरे पाठः ।

† गोधासनगतमिति क्वचित् पाठः ।

न दुर्विनीतश्च सुतो न भृत्यो विप्रकल्पवेत्।
न दारिद्रं गृहे तस्मिन् न व्याधिरुपजायते॥
यत्र सा रमते नारी धौतचामीकर प्रभा।
अन्याश्च याश्चरिष्यन्ति ब्राह्मणानुमते व्रतम्॥
संपूज्य वाचकं भक्त्या भूषणाच्छादनादिभिः।
तास्ताःस्युः सुखसम्पन्ना अविपन्नमनोरथाः॥
भविष्यन्ति कुरुश्रेष्ठ कुलज्येष्ठ नमोऽस्तु ते।
माघे महार्हमणिमण्डितपादपीठां॥
चैत्रे विचित्रकुसुमोत्कर चर्चिताङ्गीं *।
सूर्य्यप्ररूढ नवशष्पमयीं नभस्ये।
संपूज्य शम्भुदयितां प्रभवन्ति नार्य्यः।

इति भविष्योत्तरे चैत्रभाद्रमाघतृतीयाव्रतम्।

कृष्ण उवाच।

बहुनात्र किमुक्तेन किं वह्वक्षरमालया।
वैशाखस्य सितामेकां तृतीयामक्षयां† शृणु॥
तस्यां स्नानं जपो होमः स्वाध्यायः पितृतर्पणम्।
दानञ्च क्रियते किञ्चित् तत्सर्व्वं स्यादिहाक्षयम्।
आदिः कृत युगस्येयं युगादिस्तेन कथ्यते॥
सर्व्वपाप प्रशमनी सर्व्व सौख्यप्रदायिनी।

---

* नृप इति पुस्तकान्तरे पाठः।

† भुक्तीनधाचितितत्ते दयिता समृद्धिमिति पुस्तकान्तरे पाठः।

पुरा महोदये पार्थ वणिगासीत् सुनिर्द्धनः ।
प्रियंवदः सत्यवृत्ति र्देव ब्राह्मण पूजकः ॥
पुण्याख्यानैकचित्तोऽभूत् कुटुम्बव्याकुलोपि सन् ।
तेन श्रुता वाच्यमाना तृतीया रोहिणीयुता ॥
यदा स्यात् बुधसंयुक्ता तदा सा सुमहत्फला ।
तस्यां यद्दीयते किञ्चिदक्षयं स्यात्तदेव हि ॥
इति श्रुत्वा स गङ्गायां सन्तर्प्य पितृदेवताः ।
गृहमागत्य करकान् सान्नानुदकसंयुतान् ॥
अम्बुपूर्णान् बृहत्कुम्भान् जलेन विमलेन च ।
यवगोधूमचणकान् सक्तुदध्योदनं तथा ॥
इक्षुक्षीरविकारांश्च सहिरण्यांश्च शक्तितः ।
शुचिः शुद्धेन मनसा ब्राह्मणेभ्यो ददौ वणिक् ॥

अन्नोदकाभ्यां उदकेन अन्नेन च पूर्णान् कलशान् अम्बुजल मध्ये पूर्णान् न तूद्धृतोदकेन ।

भार्य्यया वार्य्यमाणोऽपि कुटुम्बासक्तिचित्तया ।
तावत्तस्थौ स्थिते साच मत्वा सर्व्वं विनश्वरम् ॥
धर्म्मासक्तमतिः पार्थ कालेन बहुना ततः ।
जगाम पञ्चत्वमसौ वासुदेवमनुस्मरन् ॥
ततः स क्षत्रियोजातः कुशावत्यां युधिष्ठिर ।
वभूव चाक्षया तस्य समृद्धिर्धर्मसंयुता ॥
इयाज स महायज्ञैः समाप्तवरदक्षिणैः ।
सदा ददौ गोहिरण्यादिदानान्यन्यान्यहर्निशम् ॥
वुभुजे कामतो भोगान् दीनान्धांस्तर्पयन्धनैः ।

तथाप्यक्षयमेवास्य क्षयं यान्ति न तद्धनम्।
अश्रद्धापूर्व्वं तृतीयायां यद्दत्तं विभवं विना॥
इत्येतत्ते समाख्यातं श्रूयतामत्र यो विधिः।
तृतीयान्तां समासाद्य स्नात्वा सन्तर्प्य देवताः॥
एकभक्तं तदा कुर्य्यात् वासुदेवं प्रपूजयेत्।
उदकुम्भान् सकनकान् सान्नान् सर्व्वरसैः सह॥
ग्रैष्मिकं सर्व्वमेवात्र शस्यं दाने प्रशस्यते।
छत्रोपानत्प्रदानं वै गोभूकाञ्चनवाससाम्॥
यद्यदिष्टतमं चान्यत्तद्देयमविशङ्कया।
एतत्ते सर्व्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि॥
अनाख्येयं न मे किञ्चि दस्ति स्वस्त्यस्तु तेऽनघ।

अस्यां तिथौ क्षय मुपैति हुतं न दत्तं
तेनाक्षयेति कथिता मुनिभिस्तृतीया।
उद्दिश्य यत् सुरपितॄन् क्रियते मनुष्यै
स्तच्चाक्षयं भरतभारत सर्व्वमेव॥

इति भविष्योत्तरोक्तमक्षय तृतीयाव्रतम्॥९

युधिष्ठिर उवाच।

केन धर्म्मेण नारीणां व्रतेन नियमेन च।
सौभाग्यं जायतेऽतीव पुत्राश्च बहवः शुभाः॥

धनधान्यं हिरण्यञ्च वस्त्रालङ्कारमेव च ।
अवियोगश्च सततं भर्त्तृपुत्रैः सुहृज्जनैः ॥
सम्यगाख्याहि मे कृष्ण दयातीव हि ते मयि ॥

कृष्ण उवाच ।

शृणु पार्थ प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
यच्चीर्त्वा सुभगा नारी बह्वपत्या च जायते ॥
धनधान्यहिरण्यादिदासीदासैः समन्विता ।
लोके हितार्थं पार्वत्या उमामाहेश्वरव्रतम् ॥
समाख्यातं पुरा पार्थ नाद्यापि ग्रथितं भुवि ।
मार्गशीर्षे सिते पक्षे तृतीयायां समाहिता ॥
कृतोपवासा राजेन्द्र सर्व्वभोगविवर्जिता ।
संवेष्ट्य श्वेतवस्त्रेण शिवं रक्तेनचाम्बिकाम् ॥
पश्चाद्रूपं दहेन्नारी भक्तिभावेन भाविता ।
भोजयेच्छिवभक्तांश्च ब्राह्मणान् वेदपारगान् ॥
भक्तेभ्यो दक्षिणां दद्याद्भक्त्या शाठ्यं विना कृताम् ।
कृतोपवासा संकल्पितोपवासा ।
स्नात्वा संपूज्य ललितां हरकायार्द्धवासिनीं ।
गीतवाद्यादिकं कृत्वा क्षपयित्वा क्षितौ क्षणं ॥
ततः प्रभातसमये स्नानं चाकृत्रिमे जले ।
धृत्वा शुक्लाम्बरन्नारी वाक्यमेतदुदीरयेत् ॥
नमोनमस्ते देवेश उमादेहार्द्धधारक ।
महादेव नमस्तुभ्यं हरकायार्द्धवासिनीम् ॥

हृदि कृत्वा शिवं देवी जपेत् यावद्गृहं व्रजेत्।
पूजयेद्देवमीशानं पुष्पैः कालोद्भवैस्ततः॥
वामपार्श्वे स्थितां देवीं दक्षिणे तु महेश्वरम्।
धूपं सगुग्गुलुं चाग्ने दहेत्ध्यानपरायणा॥
नैवेद्यं विविधं देयं घृतपक्वं स्वशक्तितः।
कारयेद्वैश्वदेवन्तु तिलाज्येन सुसंस्कृतम्॥
पञ्चगव्यं ततः प्राश्य हव्यं भुञ्जीत वाग्यता।
एवं द्वादशमासांस्तु पूजयित्वा महेश्वरौ॥
उद्यापनं ततः कुर्य्यात् प्रहृष्टेनान्तरात्मना।
शिवं रौप्यमयं कुर्य्यादुमां हेममयीन्तथा॥
आरूढौ वृषभे * गौरी सर्व्वालङ्कारभूषिता।
चन्दनेन शिवं चर्च्य कुङ्कुमेन तु पार्व्वतीम्॥
अर्च्चयेत् कुसुमैः पश्चात् सुगन्धैः सुमनोहरैः।
ततः प्रदक्षिणं कृत्वा मन्त्रमेतदुदीरयेत्॥
उमामाहेश्वरौ देवौ सर्व्वलोकपितामहौ।
व्रतेनानेन सुप्रीतौ भवतां मम सर्व्वदा॥
एवमुक्त्वा जितक्रोधा ब्राह्मणे वेदपारगे।
व्रतं निवेदयेद्भक्त्या वाचके वा गुणान्विते॥
एवं कृत्वा व्रतं नारी महेशार्पितमानसा।
प्रयाति परमं स्थानं यत्र देवी शिवप्रिया॥
तत्रैव सा वसेत्तावद्यावदिन्द्राश्चतुर्द्दश।
अप्सरोभिः परिवृता किन्नरीभिस्तथैव च॥

* रौप्ये इति पुस्तकान्तरे पाठः।

यदा मानुषतां याति जायते विमले कुले * ।
नृप सौख्ये समाप्नोति पुत्र पौत्रसुतादिभिः ॥
मृता शिवपुरं याति शिवया सह मोदते ।
हैमीमुमां रजतपिण्डमयं महेशम्
रौप्ये सुरूपवृषभे समुपस्थितौ तौ ।
संपूज्य रक्तसितवस्त्रयुगोपगूढौ
नारी भवत्यविधवा सुतसौख्ययुक्ता ॥

इति भविष्योत्तरोक्तमुमामाहेश्वर व्रतम् ।

——:○:——

युधिष्ठिर उवाच ।

शुक्लपक्षे तृतीयासु बहवः समुदाहृताः ।
आनन्तर्य्यव्रतं ब्रूहि तृतीयोभयसंयुता ॥
हिताय व्रतशीलानां नारीणाञ्च विशेषतः ।
नाम प्राशन नैवेद्यं मासि मासि पृथग्विधम् ॥

कृष्ण उवाच ।

ब्रह्म विष्णु महेशाद्यैर्यन्नोक्तं सुरसत्तमैः ।
अपूर्व्वं सर्व्वं तन्त्राणामानन्तर्य्यव्रतं शृणु ॥
मार्गशीर्षे महाराज व्रतमेतत्समारभेत् ।
नक्तं कुर्य्यात् द्वितीयायां तृतीयायामुपोषिता ॥

* रूपयौवन सम्पन्ना बहु पुत्रापतिव्रता ।
धन धान्य समायुक्ता शिवया सहमोदते इति पुस्तकान्तरे पाठः ।

उमां देवीं समभ्यर्च्य पुष्पधूपादिभिः क्रमात्।
घर्घरापुत्रिकां दद्याद्यथाशक्त्या च भक्तितः॥
दधि सं प्राशयेद्रात्रौ स्वपेदेकाकिनी भुवि।
प्रभाते विप्रवद्विप्र मिथुनं भोजयेन्नृप॥
अश्वमेधफलावाप्तिर्जायते नात्र संशयः।
तथा कृष्णतृतीयायां सोपवासो जितेन्द्रियः॥
यजेत् कात्यायिनीं नाम नारिकेलं निवेदयेत्।
क्षीरं प्राश्य स्वपेद्रात्रौ काम क्रोध विवर्जिता॥
भोजयेद्विप्रदाम्पत्यं गोमेधफलमाप्नुयात्*।
पौषमासे तृतीयायां सोपवासो जितेन्द्रियः॥
गौरीं नाम्ना तु संपूज्य खण्डवर्त्तिं निवेदयेत्†।
खण्डवर्त्तिः शर्करा निर्म्मितो वलिताकृतिर्भक्ष्यः॥
ततः कुशोदकं प्राश्य स्वपेद्भूमौ जितेन्द्रियः।
प्रभाते रूपसम्पन्नं मिथुनं भोजयेत्ततः॥
क्षमाप्य तं नमस्कृत्य वहुस्वर्णफलं लभेत्।
पुनरेव तुलामाघे कृष्णपक्षे यतव्रता॥
आर्य्यां नाम्नाथ संपूज्य स्वाद्यकञ्च निवेदयेत्।
स्वाद्यकं स्वस्तिकादि।
मधुं प्राश्य स्वपेद्रात्रौ सर्व्वभोग विवर्जिता।
मिथुनं भोजयित्वा तु वाजपेयफलं लभेत्॥
तथैव फाल्गुने मासि सोपवासा शुचिव्रता।

---

* पुण्डरीक मवाप्नुयादिति पुस्तकान्तरे पाठः।

† कटुकञ्च निवेदयेदिति पुस्तकान्तरे पाठः।

भव्यां नाम्ना प्रपूज्याथ कासांङ्गं विनिवेदयेत्।
शर्करां प्राशयित्वा तु स्वपेद्राचौ विमत्सरा॥
प्रभाते मिथुनं भोज्य सौत्रामणिफलं लभेत्।
पुनः कृष्णतृतीयायां फाल्गुनस्यैव भारत॥
विशालाक्षीं समभ्यर्च्य पूरिकां विनिवेदयेत्।
संप्राश्य तण्डुलजलं स्वपेद्राचौ मनस्विनी॥
भोजयेन्मिथुनं प्रातरग्निष्टोमफलं लभेत्।
चैत्रस्यादितृतीयायां शुचिःस्नाता जितेन्द्रिया।
श्रियं नाम्ना तु संपूज्य वटकान् विनिवेदयेत्॥
बिल्वपत्रं ततः प्राश्य स्वपेत् ध्यानपरायणा।
ततः प्रभाते विमले द्विजदाम्पत्यपूजनात्॥
प्रणिपाताच्च तस्यैव राजसूयफलं लभेत्॥
ततः कृष्ण तृतीयायां चैत्रे सम्यगुपोषिता।
कालीं नाम्ना तु सम्पूज्य पिष्ट प्राश्य स्वपेन्निशि॥
पूपकान् विनिवेद्याथ कुर्य्याद्धर्मकथां शुभाम्।
भक्त्या संभोज्य मिथुनमतिरात्रफलं लभेत्॥
एवं वैशाखमासन्तु सोपवासा जितेन्द्रिया।
पूजयेच्चण्डिकां देवीं मधुकार्य्यां निवेदयेत्॥

मधुकार्य्या मधुकपूरणपूरिकाः।

श्रीखण्डं निशि संप्राश्य स्वपेद्देव्यग्रतोभुवि।
भोजयित्वा च दम्पत्यं चान्द्रायणफलं लभेत्॥
तथा कृष्ण तृतीयायां सोपवासा विमत्सरा।

पूजयेत् कालरात्रिन्तु पुष्पधूपैर्मनोरमैः ॥
गुडाढ्यं यावकं दत्त्वा तिलान् प्राश्य स्वपेन्निशि ।
प्रभाते मिथुनं भोज्यमतिकृच्छ्रफलं लभेत् ॥
ज्यैष्ठे सिततृतीयायां सोपवासा यतव्रता ।
स्कन्दमातेति संपूज्य इन्द्रज्योति निवेदयेत् ॥
प्राशयेत्पञ्चगव्यञ्च देवीं ध्यात्वा स्वपेन्निशि ।
प्रभाते मिथुनं भोज्य कन्यादानफलं लभेत् ।
आषाढमासे संप्राप्ते तृतीयायां युधिष्ठिर ॥
नाम्ना यशोधरां देवीं पूजयेत् भक्तितत्परः ।
करम्भकञ्च नैवेद्यं गोशृङ्गाम्भिः पिबेन्निशि ॥

करम्भकं दधिमिश्रा सक्तवः ।

प्रभाते मिथुनं भोज्य भूमिदानफलं लभेत् ॥
तथा कृष्ण तृतीयायां कुष्माण्डीं नाम पूजयेत् ।
सक्तून् खण्डाज्यसंयुक्तान् पुरतो विनिवेदयेत् ।
कुम्भोदकञ्च संप्राश्य स्वपेद्देव्याः पुरःक्षितौ ॥
प्रभातेमिथुनं भोज्य गोप्रदानफलं लभेत् * ।
श्रावणे सोपवासाथ चण्डघण्टां प्रपूजयेत् ॥
कुल्माषांस्तत्र नैवेद्यं पिबेत्पुष्पोदकं निशि ।

कुल्माषाः अर्द्धस्विन्नानि धान्यानि ।

प्रभाते भक्तितो विप्र मिथुनं भोजयेत् नृप ।
द्विजानामविदुषां प्राशनाणफलं लभेत् ॥

---

* पावदान फलं लभेदिति पुस्तकान्तरे पाठः ।

तद्वत् कृष्णतृतीयायां रुद्राणीं नाम पूजयेत् ।
सिद्धपिण्डानि दिव्यानि नैवेद्यं सम्प्रदापयेत् ॥

सिद्धपिण्डानि पिण्डीकृताः सक्तवः ।

पिण्याकं प्राशयित्वा तु स्वपेद्रात्रौ विमत्सरा ॥
संपूज्य द्विजदाम्पत्यमिष्टापूर्त्तफलंलभेत् ।
तथाभाद्रपदस्यादौ तृतीयायामुपोषिता ॥
पुष्पैर्नानाविधैर्हव्यैः पूजयेत् कमलाभयां ।
कर्णावर्त्तन्ततोदेव्या नैवेद्यं पललाचितम् ॥

कर्णावर्त्तं वर्णाकृतिभक्ष्यः पललन्तिलपिष्टम् ।

गन्धोदकं ततः प्राश्य स्वपेत् संहृष्टमानसा ॥
प्रभाते मिथुनं भोज्य ग्रामदानफलं लभेत् ।
तद्वत् कृष्णतृतीयायां दुर्गान्देवीं समर्च्चयेत् ॥
दद्यान्नन्दीफलं देव्या गुड़ाज्यपरिपूरितम् ।

नन्दीफलं नन्दीवृक्षफलम् ।

प्राशयित्वा च गोमूत्रं स्वपेत् कान्तेन चेतसा ।
प्रभाते मिथुनं भोज्य सदा सत्रफलं लभेत् ॥
मासिचाश्वयुजे भक्त्या नाम्ना नारायणीं यजेत् ।
सोपवासा खण्डखाद्यनैवेद्यं परिकल्पयेत् ॥

खण्डखाद्यं शर्करानिर्मितं खाद्यम् ।

सम्प्राश्य चन्दनं रक्तं नक्तं स्वप्यात्तदाग्रतः ॥
प्रभाते द्विजदाम्पत्यं भोजयित्वा पतिव्रता ।
निदाघे निर्जले मार्गे प्रपादानफलं लभेत् ।

तथा कृष्णं तृतीयायां स्वस्ति नाम्ना प्रपूजयेत् ॥
शाल्योदनं गुडोपेतं नैवेद्यं विनिवेदयेत्।
कुसुम्भबीजतोयञ्च सम्प्राश्य प्रयतः स्वपेत् ॥
सम्भोज्य मिथुनं प्रातरग्निहोत्रफलाप्तये।
कार्त्तिकस्य तृतीयायां स्वाहा नाम प्रपूजयेत् ॥
पायसं घृतखण्डाद्यं नैवेद्यमुपकल्पयेत्।
स्वपेद्रात्रौ जितक्रोधा प्राश्य कुङ्कुमजं जलम्।
प्रभाते मिथुनं भोज्य प्रणिपत्य क्षमापयेत् ॥
अतीवदुर्द्धरे वर्षे गवाह्निकफलं लभेत्।
तथा कृष्णतृतीयायां सोपवासा कृतव्रता ॥
विज्ञाप्य स्वगुरुं भक्त्या धर्म्मशास्त्रार्थकोविदं।
मण्डलञ्च ततो लिख्य नवनाभं वरप्रदं ॥
सौवर्णं कारयेद्देवमुमया सहितं शिवम्।
तेभ्योनेत्रेषु दातव्यं मौक्तिकं तिलमेव च * ॥
प्रवालमोष्ठयोर्दद्यात् कर्णयोरेव कुण्डले।
उपवीतन्तु देवस्य देव्या हारं समुज्ज्वलम् ॥
रक्ताम्बरधरां देवीं सितवस्त्रं महेश्वरम्।
चन्दनेन समालभ्य पुष्पैर्धूपैः समर्चयेत् ॥
मण्डलं पूजयित्वा च होमं कुर्य्यात्ततो गुरुः।
तत्रापराजितां-नाम्ना देवीं भक्त्या प्रपूजयेत् ॥
मधूच्छिष्ट सम्प्राश्य कुर्य्याद्रात्रौ च जागरम्।
नटयाद्युत्सवोपेतं वीणावेणुमनोहरम् ॥

---

* मौक्तिकं बीजमेव चेति पुस्तकान्तरे।

माङ्गल्य गीत-निनदैः प्रेक्षणैरतिशोभितम् ।
ताम्बूलाशन सिन्दूर पुष्प कुङ्कुमदीपकैः ॥
सखीजनैः सुवेषैश्च समन्तात् परिपूजितम् ।
उत्सवं कारयित्वेत्थं नयेद्रात्रिं विमत्सरा ॥
ततः प्रभाते विमले कृतकौतुकमङ्गला ।
कृत्वा तु नूतनान्तूलीं कन्दुकादिसमन्विताम् ॥
मण्डले देवमुद्धृत्य पर्य्यङ्कोपरि विन्यसेत् ।
वितानध्वजमालाभिः कुम्भदर्प्पणशोभना ॥
पुष्पमण्डयितां कृत्वा धूपगुग्गुलुवासिता ।
तस्याग्रे भोजयेद्भक्त्या मिथुनानि यथेच्छया ॥
प्रीणयेद्भक्ष्यभोज्यैश्च पक्वान्नैर्मधुरै रसैः ।
ततोदत्त्वा कृतं हस्ते ताम्बूलं चन्दनं तथा ॥
इदमुच्चारये न्नाम्ना देवस्य च पुरोगुरोः ॥
प्रीयतां मे उमाकान्तः पार्वत्या सहितस्तदा ।
उच्छिष्टं शोधयित्वा च ततो भोज्यसमन्वितां ॥
रक्तवर्णां सुशीलां च सुरूपां सुपयस्विनीं ।
शृङ्गाभ्यां दत्तकनकां राजतखुरसंयुताम् ॥
कांस्यदोहनकोपेतां रक्तवस्त्रां च गुण्ठिताम् ।
घण्टाभरणशोभाढ्यां सितचन्दनचर्चिताम् ॥
पूजितां पुष्पमालाभिः देवस्य पुरतः स्थिताम् ।
पादुकोपानहच्छत्रभक्ष्यभोजनसंयुताम् ॥
त्रिधा प्रदक्षिणीकृत्य गुरोः सर्व्वं निवेदयेत् ।
पुनश्चोदाहरेदेवं गुरोरग्रे कृतव्रता ॥

उमामहेश्वरं यद्वदवियोगं सुरार्चितम्।
अवियोगः स्वभर्त्ता मे तद्वदस्तु सुसम्पदा॥
प्रणम्य शिरसा भूमौ नमस्येति गुरुं वदेत्।
एवं समाप्यते सम्यगानन्तर्य्यव्रतोत्तमं।
यः कुर्य्यात्पुरुषः स्त्रीवा तस्य पुण्यफलं शृणु।
गन्धर्व्वयक्षसिद्धानां विद्याधरमहोरगैः॥
देवदैत्य, मुनीनां च कन्याभिः परिवारितः।
कामगेन विमानेन क्रीडयित्वा यथेप्सितम्॥
समुद्धृत्य कुलं भर्त्तुः पितुश्चामरपूजिता।
ब्रह्मादिभिरनुक्रान्ता विष्णुलोकं सनातनम्॥
प्रयाति पुरुषो वापि नात्र कार्य्या विचारणा।
भुक्त्वा भोगांस्ततो दिव्यान् पुण्यशेषेण पार्थिव॥
पार्थिवो जायते भूमौ सार्वभौमोपराजितः॥
नारी वा महिषी राज्ञः सर्व्वभौमस्य जायते।
तरेतर्पं यथा देवी भोगांश्च पतिना सह॥
त्रैलोक्यपतिना भुङ्क्ते तथा स्वपतिना तु सा।
हरिः शच्या हरिर्लक्ष्म्या समं पत्न्या यथा सुखम्॥
भुङ्क्ते निरन्तरं तद्वत्तया सार्द्धं नरेश्वर।
मुनिनारुन्धती यद्व सतां सत्रा हृदि स्थिता॥
तद्वद्भुनक्ति सौभाग्यं नैरन्तर्य्येण पाण्डव।
येनैव पतिना सार्द्धं करोत्येतद्व्रतोत्तमम्॥
सप्तजन्मनि तेनैव न वियोगमवाप्नुयात्।
एतत्ते सम्यगाख्यातमानन्तर्य्यव्रतं महत्॥

भक्तोऽसि मे सखाचेति रहस्यं परमं मया।
नाविनीताय दातव्यं नाभक्ताय कथञ्चन॥
नास्तिके हैतुके पापे दाता भवति किल्विषी।
एषा विशेष विधिना सहसा तृतीया
यानोकरोत्यविधवाभिरदाहृतोच्चैः।
एतामुपोष्य विधिवत् प्रतिपद्ययोगा-
न्नैवान्तरं सुतसुहृत्स्वजनैरुपेति॥

इति भविष्योत्तरोक्तमानन्तर्य्यतृतीयाव्रतम्॥८

युधिष्ठिर उवाच।

किमर्थं मधुवृक्षस्थमर्चयन्ति वरस्त्रियः।
गौरीं जगद्गुरोर्भार्य्यां भगवं स्तद्ब्रवीषि मे॥

श्रीकृष्ण उवाच।

पुरा क्षीरोदमथने मधूद्यो विनिर्गतः।
स इहारोपितो मर्त्त्यैर्मधुना मुनिकारणात्॥
विषदर्पोपहाराय व्याधिसंघवधाय च।
स्त्रीणां सौभाग्यदानाय यत्र पुष्पफलार्चितः।
शोभितस्तवकैरम्यैः दृष्टोललितया वने॥
तत्राश्रिता महादेवी पार्वती शङ्करप्रिया।
विजयाजयागणेशेन संयुता पर्व्वतात्मजा॥
तत्रस्था देवताभिः सा पूजिता कुसुमैः फलैः।
भक्ष्यैर्बहुविधैराजन् मनसेप्सितकारणात्॥

स्वयं लक्ष्म्या सरस्वत्या सावित्र्या गङ्गया तथा।
रोहिण्या रम्भया राजन् अरुन्धत्या सुशीलया॥
स्त्रीभिरेताभिरागत्य पूजिता मूलशङ्करी।
तासां प्रसन्ना वरदा ददावभिमतं फलम्॥
फाल्गुनस्य सिते पक्षे तृतीयायामुपोषिता।
स्नाता स्थिता ब्रह्मचर्य्ये ततोऽन्यस्मिन् दिने पुनः॥
व्रजेन्मधुवनं गौरीं पूजयेत् यतमानसा*।
मन्त्रेणानेन ध्यायन्ती पार्व्वतीप्रतिमां शुभाम्॥
मृगाजिनावृतकुचां जटामुकुटशोभिताम्।
गोधारथगतां देवीं रुद्रध्यानपरायणां॥
पूजयेत् गन्ध कुसुमैर्दीपालक्तकचन्दनैः।
केसरैर्म्मधुरद्रवैः स्वर्णमाणिक्यसंयुतैः॥
अम्बिका ऋषिका देवी मूषिका ललिता उमा।
तपोवनरता गौरी सौभाग्यं मे प्रयच्छतु॥
काली कासी सती देवी रुद्राणी पार्वती शिवा।
अष्टाङ्गैः प्रणता भक्त्या पतिपुत्रान् प्रयच्छतु॥
सौभाग्यं मे प्रयच्छन्तु सुप्रसन्नाननाः सदा।
अवैधव्यकुले जन्म ददातु प्रति जन्मनि॥
अङ्ग प्रत्यङ्ग देशेषु प्रतिपर्व्व स्थितामृता।
सुखदृष्टिस्पर्श-रसं गौरी सौभाग्य मृच्छतु।
एव मुच्चार्य्य मन्त्रेण नारी ज्ञानवती सती॥
पूजयेत् ब्राह्मणीनाञ्च भव्या मुख्याः सुवासिनी।

* पूजयेत्तथाताम्मनेति पुस्तकान्तरे पाठः।

कुसुम्भैर्जीरकैश्चैव लवणैर्गुडसर्पिषा ॥
अग्वैरागैः फलैश्चूर्णैः मनोज्ञैश्च सचन्दनैः।
अंद्यैः मद्यैः चुर्णपक्वैः, रागैः, पुष्पचन्दनैः
चम्पकादि पुष्पवासितैश्चन्दनैः।
कुसुम्भैः कुङ्कुमैर्गन्धैः कालेयागुरुचन्दनैः ॥
कालेयं पीतचन्दनं चन्दनं, श्वेतचन्दनम्।
सिन्दूरेणाभिरक्तेन वस्त्रैर्नानाविधैः शुभैः ॥
पवित्रकैः पीतवर्णैः पूपकैस्तिलतन्दुलैः।
अशोकवर्त्तिगुणकैः घृतपूरैः मलड्डुकैः ॥
अशोकवर्त्तिभिश्चविशेषः पूजयित्वा महाद्रुमः।
प्रदक्षिणं ततः कृत्वादद्याद्विप्राय दक्षिणाम् ॥
एतत् व्रतं समाख्यातं कांस्यायेन पुरा नृप।
यास्तरिष्यन्ति सर्व्वास्ता भविष्यन्ति निरामयाः ॥
अङ्गप्रत्यङ्गसुगभा लोके दृष्टिमनोहराः।
स्थित्वा वर्षशतं मर्त्ये ततोरुद्रपुरं शुभम् ॥
यास्यन्ति हंसयानेन किङ्किणीशब्दनादिना।
तत्र गत्वा रमिष्यन्ति कल्पमेकं युधिष्ठिर।
पुनरभ्यागता मर्त्ये सर्व्वसौख्यकभाजना ॥
नार्य्योभवन्ति संपूज्या मधूद्रक्षं सुशोभनम्।
अर्घ्यं महार्घ्यमणिकुङ्कुमकेसराढ्यं ॥
पर्य्यङ्कलुब्ध मुखरालिकुलोपगीतम्।
दत्त्वा फलाक्षतयुतं मधुपादपस्य
गौरीव कामसदृशा भवतीह नारी ॥

इति भविष्योत्तरोक्तं मधूकव्रतम्।

—ः○ः—

युधिष्ठिर उवाच।

मेघपालीव्रतं कृष्ण कदाचित् क्रियते नृभिः।
किं पुण्यं किमनुष्ठानं कीदृक्षी स्मृता नु सा॥

श्रीकृष्ण उवाच।

आश्वयुक् शुक्लपक्षे च तृतीयायां युधिष्ठिर।
मेघपाली प्रदातव्या भक्त्या स्त्रीभिर्नृभिस्तथा॥
अर्घैः विरूढैः गोधूमैः सप्तधान्यसमन्वितैः।
तिलतण्डुलमिश्रैश्च दातव्या धर्म्मलिप्सुभिः॥

युधिष्ठिर उवाच।

कीदृशीं सा भवेद्वल्ली मेघपाली जनार्दन।
लक्षणं कीदृशं तस्याः कोमन्त्रइति मे वद॥

श्रीकृष्ण उवाच॥

ताम्बूलसदृशैः पत्रैरक्तावल्ली समञ्जरी।
वाटीषु या न मार्गेषु प्रेक्षिता पर्वतेषु वा॥
यत्र वा दृश्यते राजन् शुचौ देशे समुत्थिता।
मेघपाली समभ्यर्च्य फलैः पुष्पैस्तथाक्षतैः॥
खर्जूरैर्नालिकेरैश्च नारङ्गैर्दाडिमैस्तथा।
वीजपूरैः कपित्थैश्च सप्तधान्यैर्विरूढकैः॥

त्रपुसीर्व्वाचीनकैस्तु पिण्डैस्तु तिलपिष्टजैः।

त्रपुसम्बालकम् इर्व्वा,कर्कटी चीनकं प्रसिद्धं॥

ततस्तैः प्रथमे पात्रे दूर्व्वादधि समन्वितम्।

तिलतण्डुलमिश्रन्तु चन्दनेन सुगन्धिना॥

सुगन्धैर्जातिपुष्पैश्च फलैकर्कन्धुकैरपि।

कृत्वार्च्चनं प्रदातव्यं मन्त्रेणानेन भारत॥

अनेन भद्राइति जपेत् मन्त्रं वेदोक्तमादरात्।

स्त्रीशूद्रैः पूजयेत्ताञ्च नमस्कारेण भारत॥

इत्येवं पूजयित्वा तां मेघपालीं पुमांस्ततः।

नारी वा पुरुषव्याघ्र प्राप्नोति परमां गतिं॥

हन्ति पापान्यसङ्ख्यानि* प्रमादादन्यजान्यपि।

अन्यजानि अपण्यजानि, अविक्रेयजानि

पूजिता मेघपालीयं ददाति हृदयेप्सितम्॥

स्थित्वा वर्षशतं मर्त्ये तस्यां सौभाग्यगर्विता।

त्रिषु लोकमवाप्नोति पुनर्जाता कुलोत्तमे॥

नारीनरोनरकभीरुतया ददाति
योऽर्घं फलात् शुभतनुर्ननु मेघपाल्यै।
उन्मादकूटकपटानि कृतानि यानि
पापानि हन्ति सवितेव भवप्रदोषात्॥

इति भविष्योत्तरोक्तमेघपालीय तृतीयाव्रतम्॥

———ः०ः———

युधिष्ठिर उवाच॥

---

* हन्तिपापानिसंख्यानि।

अहमन्यच्च पृच्छामि व्रतं द्वादशमासिकम्।
ललिताराधनं नाम कीदृक्मासक्रमेण तु॥

श्रीकृष्ण उवाच।

शृणु पाण्डवयत्नेन यथा व्रतं* पुरातनम्।
शङ्करस्य महादेव्याः सम्वादं पुण्यवर्द्धनम्॥
कैलासशिखरे रम्ये बहुपुष्पफलाकुले।
तत्र देवी स्वभर्त्तारं जगद्भर्त्तारमब्रवीत्॥

देव्युवाच।

स्वामिन् लोकोपकाराय मम प्रीति विवृद्धये।
कथयस्व प्रयत्नेन तृतीयाव्रतमुत्तमम्।
भक्तास्त्रियो हि मान्देवं पूजयन्ति सदा भुवि॥
दुर्भगानिरपत्याश्च पुरुषा निर्द्धनास्तथा†।
आर्त्तिं तासां परिच्छेत्तुमतः पृच्छाम्यहं विभो॥
येन ताः सुखसंयोगरूपलावण्यसम्पदा।
पुत्रसौभाग्यवित्तोघैः प्रयुक्ताः सुरसत्तम॥
तन्मे कथय यत्नेन नूनं नारीसुखव्रतम्।

ईश्वर उवाच।

माघमासे सिते पक्षे तृतीयायां यतव्रता।
पादौ प्रक्षाल्य हस्तौ च मुखञ्चैव समाहितः॥
उपवासञ्च नियमं दन्तधावनपूर्व्वकम्।

---

* कृतमिति पुस्तकान्तरे पाठः।

† कुरूपा इति पुस्तकान्तरे पाठः।

मध्याह्ने तु नदीं गत्वा तिलैरामलकैः शुभैः ॥
स्नात्वोत्तीर्य्य जलात् शुक्ले वाससी परिधाय च ।
सुगन्धैश्च सुपुष्पैश्च मनोज्ञैः कुङ्कुमादिभिः ॥
अर्चयीत तथा देवीं त्वां भक्त्या भक्तिवत्सले ।
कर्पूराद्यैः सुगन्धैश्च नैवेद्यैः शर्करादिभिः ॥
यथा विभवसम्पन्नै र्गीतवाद्यैर्मनोरमैः ।
इशानीनाम जल्पन्ती प्रतिच्छेत् घटिकाजलम् ॥
पात्रं ताम्रमयं शुभ्रञ्जलाचतसमन्वितम् ।
सहिरण्यं द्विजस्याग्रे कुर्य्यात् वाञ्जलिभिस्तथा ॥
द्विजोभिषिकन्तेनैव कुर्य्यात्तस्यै समन्त्रकम् ।
जलेन दर्भपूतेन शिवध्यानं परं पठन् ॥
नारी च ध्यायमाना त्वां शुभाभिध्यानतत्परा ।
रागादीन् दूरतस्त्यक्त्वा प्रतीच्छेच्छिरसा जलम् ॥
ब्रह्मावर्त्तात् समायाते ब्रह्मयोनिसमुद्भवे ।
भद्रेश्वरि महादेवि ललितेशङ्करप्रिये ॥
गङ्गाद्वाररते मातर्गङ्गाजलविशोधिते ।
सौभाग्यारोग्यपुत्रांश्च तथैवार्थान्मनेप्सितान् ॥
प्रयच्छास्यै सुप्रसन्ना भवदेवि नमोनमः ॥

अभिषेकमन्त्रः ।

अभिषिक्ता ततो भक्त्या प्रीयमाणेन चेतसा ।
दत्त्वा हिरण्यं तत्तस्मै प्राशयीत कुशोदकं ॥
आचम्य प्रयता भूत्वा भूशय्यां चपयेत् चपाम् ।
ईशानी ध्यायमाना च आस्ते सा दर्भसंस्तरे ॥

द्वितीयेह्नि ततः स्नात्वा तथैवाभ्यर्च्य पार्व्वतीम् ॥
यथा शक्त्या द्विजाः पूज्या भोजयित्वा सुवासिनीम् ।
ततः कुटुम्बं शेषान्नं स्वयं भुञ्जीत वाग्यता ॥
एवं हि प्रथमे मासि ईशानीं नामपूजयेत् ।
द्वितीयं पार्वतीनाम तृतीये शङ्करप्रिया ॥
भवान्यथा चतुर्थे तु स्कन्दमाता तु पञ्चमे ।
दक्षस्य दुहिता षष्ठे मैनाकी सप्तमे स्मृता ॥
अष्टमे ललिता नाम सती च नवमे तथा ।
दशमे मासि विख्याता देवी सौभाग्यदायिनी ।
उमात्वेकादशे मासि गौरीति द्वादशे स्मृता ॥
कुशोदकं पयः सर्पिर्गोमूत्रं गोमयं फलम् ।
निम्बपत्रं कदम्बं वा गवां शृङ्गोदकं दधि ॥
पञ्चगव्यं तथा शाकं प्राशनानिह्यनुक्रमात् ।
प्रतिमासमुपोष्यैव यथा शक्त्या तु दक्षिणाम् ॥
ददाति श्रद्धयोपेता वाचके ब्राह्मणोत्तमे ।
कुसुम्भमार्द्रलवणं जीरकं गुडमेव च ॥
सिन्दूरञ्च हरिद्राञ्च शूर्पस्थं देवमादिशेत् ।
मासि मासि भवेन्मन्त्रो गकारो द्वादशाक्षरः ॥
ओङ्कार पूर्व्विकां देवी नमस्कारान्तयोजितां ।

ॐ गं ईशान्यै नमः गो पार्वत्यै नमः ।

ॐ गुं शङ्कर प्रियायैनम इत्यादि एभिस्तु पूजितैर्मन्त्रै स्तुष्यति ब्राह्मणेः प्रिये ।

तुष्टात्वभीप्सितान् कामान् दास्यामि प्रीति पूर्वकान् ।
समाप्ते तु व्रते ह्यस्मिन् ब्राह्मणं वेदपारगम् ।
सहितं भार्य्ययाभ्यर्च्य गन्धधूपादिभिस्तथा ॥
द्विजं महेश्वरं विद्धि भार्य्यां गौरीं तथैव च ।
इति दत्त्वा ब्राह्मणानान्दपत्योः पूजयेत् प्रिये ॥
अन्नं सदक्षिणं देयं तथा शुक्ले च वाससी ॥
ब्राह्मण्यै रक्तवासांसि देयानि ममवल्लभे ।
एवं चीर्णं व्रतं सम्यक् यत्फलं लभते शृणु ॥
भुक्त्वा भोगान् समस्तांश्च व्रजेत् भूपतिना सह ।
शतवर्षसहस्राणां प्राप्य लोकान् परावरान् ॥
मोदते भर्तृसहिता यथेन्द्रेण शची तथा ।
मानुषत्वं पुनः प्राप्य तेन भर्त्रा सहैव सा ॥
पुण्ये कुले श्रियायुक्ते निरजा श्वशुसत्कृता ।
सप्तजन्मानि यावच्च न वैधव्यमवाप्नुयात् ॥
पुत्रान् भोगान् तथा रूपं सौभाग्यारोग्यमेव च ।
एकपत्नी तथाभर्तुः प्राणेभ्यो भ्यधिकाभवेत् ॥
शृणुयाद्वाच्यमानन्तु भक्ताय ललिताव्रतम् ॥
मया स्नेहेन कथितं सापि सौभाग्यमृच्छति ।

संपूज्यपूज्यपूज्यललिताङ्गयष्टिं
गन्धोदसंभृतघटां शिरसि क्षिपेद्या ।
सासप्यमर्त्यललनासु ललामभूता
भूताधिपं पतिमवाप्य भुवं भुनक्ति ॥

———

इति भविष्योत्तरोक्तं ललिताव्रतम् ॥१८

———:○:———

भीष्म उवाच।

सौभाग्यारोग्यफलदं विपचक्षपणं विभो।
भुक्ति मुक्ति प्रदं किञ्चित् व्रतं ब्रूहि महामुने॥

पुलस्त्य उवाच।

यदुमायाः पुरादेवः प्रोवाचासुरसूदनः।
कथासु संप्रवृत्तासु ललिताराधनं प्रति॥
तदिदानीं प्रवक्ष्यामि भुक्तिमुक्तिप्रदं शुभम्।

ईश्वर उवाच।

शृणुष्वावहिता देवि तथैवानन्तपुण्यकृत्।
नराणामथ नारीणामाराधनमनुत्तमम्॥
नभस्ये वाथ वैशाखे मार्गशीर्षेऽथवा पुनः।
शुक्लपक्षे तृतीयायां स्नातः सन् गौरसर्षपैः॥
गोरोचनाथ गोमूत्रं मुस्तागोःशकृतं दधि।
चन्दनेन च संमिश्रं ललाटे तिलकं न्यसेत्॥
सौभाग्यारोग्य कृद्यस्मात्सदा च ललिताप्रियम्।
प्रतिपक्ष तृतीयासु पुमान् वाथ सुवासिनी॥
धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च।

मत्स्य पुराणे।

पुरुषस्य रक्त वस्त्र धारण मुक्तम्।
प्रतिपक्ष तृतीयायां पुमान् वै पीतवाससी॥

त्वनेन वस्तु पुरुषस्य रक्त

वस्त्र धारण मुक्तमतस्तयोः

पुरुषे विकल्पः ।

विधवा शुक्ल वसननेकमेव हि धारयेत् ।

कुमारी सूक्ष्मसूक्ते च वाससी परिधाय वै ॥

देव्यर्च्चां पञ्चगव्येन ततः चीरेण केवलम् ।

स्नापयेन्मधुना तद्वत् पुष्प-गन्धोदकेन* तु ॥

पूजयेत् शुक्लवस्त्रैस्तु फलै र्नानाविधै रपि ।

धान्यकाजाजिलवणगुडचीर घनान्वितैः ।

शुक्लाचतैस्तिलै रर्च्चां ललितायै सदार्च्चयेत् ॥

धान्यकं कुस्तुवुरु । अजा जीरकम् । अर्च्चा प्रतिमा ।

आपादादर्च्चनं कुर्य्यात् प्रतिपच्चं समाधिना ।

वरदायै नमः पादौ शिवायै गुल्फयो नमः ॥

अशोकायैनमोजङ्घे भवान्यैजानुनी तथा ।

गुह्यं मङ्गलकारिण्यै वामदेव्यै तथा कटीम् ॥

पद्मोदरायै जठर मुरः कामश्रियै नमः ।

करौ सौभाग्यं दायिन्यै बाहू शशिमुखप्रियै ॥

मुखं दर्पणवासिन्यै पार्वत्यैनु स्मितं तथा ।

गौर्य्यै नमस्तथानासां सुनेत्रायैच लोचने ॥

तुष्ट्यै च ललाटफलकं कात्यायन्यै शिरस्तथा ।

नमो गौर्य्यै नमस्तुष्ट्यै नमः कान्त्यैनमः श्रियै ॥

---

* पुष्पै रिति पुस्तकान्तरे पाठः ।

रम्भायै ललितायै च वासुदेव्यै नमो नमः ।
इति सर्व्वाङ्गपूजामन्त्रः ।

एवं संपूज्य विधिवदग्रतः पद्ममालिखेत् ।
पत्रैर्द्वादशभिर्युक्तं कुङ्कुमेन सकर्णिकम् ॥
पूर्व्वेण विन्यसेत् गौरीमपर्णाञ्च ततः परम् ।
भवानीं दक्षिणे तद्वद्रुद्राणीञ्च ततः परम् ॥
विन्यसेत्पश्चिमे सौम्यं ततो मदन वासिनीं ।
वायव्ये पाटलामुग्रा मुत्तरेण ततोह्युमाम् ॥
लक्ष्मीं स्वाहा स्वधान्तुष्टिं मङ्गलां कुमुदां सतीं ।
रुद्राणीं मध्यतः स्थाप्य ललितां कर्णिकोपरि ॥
अतर्द्दन चतुष्कोणे गौर्य्याद्यष्टदिशो लिखेत् ।
बहिर्द्दलाष्टके उमामेमेकमेक शोलिखेत् ॥
कुसुमैरक्षतैः शुभ्रैः नमस्कारेण विन्यसेत् ।
गीतमङ्गलघोषांश्च कारयित्वा सुवासिनी ॥
पूजयेद्रक्तवासोभिरक्तमाल्यानुलेपनैः ।
सिन्दूरमालिकां श्रेष्ठं वासः शिरसि दापयेत् ।
सिन्दूरं कुङ्कुमं स्नान मिष्टं देव्याः सदा यतः॥
नभस्ये पूजयेत् गौरीमुत्पलैरसितैः सदा ।
बन्धुजीवै राश्वयुजे कार्त्तिके शतपत्रकैः ॥
जातिपुष्पै मार्गशीर्षे पुष्पैः पीतै कुरुण्टकैः ।
माघेतु पूजयेद्देवीं कुन्दपुष्पैः सुभक्तितः ॥
सिन्धुवारेण जात्यावा फाल्गुने पूजयेदुमां ।
चैत्रेतु मालिकाशाकैः वैशाखे गन्धपाटलैः ॥

सिन्दुवाराणि गुण्डिमल्लिका मुद्गवकः।
ज्यैष्ठे कमलमन्दारैराषाढे च नवार्चनम्॥
कदम्बैरथमालत्या श्रावणे पूजयेदुमाम्।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्॥
बिल्वपत्रार्ककुसुमं यवगोशृङ्गवारि च।
तिलोदकं पञ्चगव्यं प्राशयेत् क्रमशस्तदा॥
एतद्भाद्रपदाद्यन्तप्राशनं समुदाहृतम्।
प्रतिपक्षं तृतीयायां कर्त्तव्यञ्चारुलोचने॥
ब्राह्मणं ब्राह्मणीञ्चैव शिवं गौरीं प्रकल्पयेत्।
भोजयित्वार्च्चयेद्भक्त्या वस्त्रमाल्यानुलेपनैः॥
पुंसः पीताम्बरे दद्यात् स्त्रियः कौसुंभवाससी।
निष्पावाजाजिलवणमिक्षुदण्डगुडान्वितम्॥
स्त्रियै दद्यात् फलं पुंसे सुवर्णोत्पलकं तथा।
यथा न देवि देवेशस्त्वां परित्यज्य गच्छति॥
तथा मां संपरित्यज्य पतिर्नान्यत्र गच्छतु।
कुमुदा विमला नन्दा भवानी वसुधा शिवा॥
ललिता कमला गौरी सती रम्भाथ पार्व्वती।
नभस्यादिषु मासेषु प्रीयतामित्युदीरयेत्॥
व्रतान्ते शयनं दद्यात् सुवर्णकमलान्वितम्।
मिथुनानि चतुर्विंशत्तद्वद्वाथ शक्तितः॥
अष्टावष्टौ च मासान्ते चातुर्म्मास्येऽथवार्च्चयेत्।
तथोपदेष्टारमपि पूजयेच्च ततो गुरुं॥
न पूज्यते गुरुर्यत्र सर्व्वास्तत्राफलाःक्रियाः।

उक्तानन्ततृतीयैषा कृतानन्तफलप्रदा ॥
सर्व्वपापहरा देवी सौभाग्यारोग्यवर्द्धनी ।
न चैनां वित्तशाठेयन कदाचिदपि लङ्घयेत् ॥
नरो वा यदि वा नारी यतः शाठ्यात् पतत्यधः ।
गर्भिणी सूतिका नक्तं कुमारीवाथ रोगिणी ॥
यदा शुद्धा तदान्येन कारयेत् प्रयता स्वयम् * ।
इमामनन्तफलदां या तृतीयां समाचरेत् ॥
कल्पकोटिशतं सेयं गौरीलोके महीयते ।
वित्तहीनापि कुर्व्वीत वर्षत्रयमुपोषणैः ॥
पुष्पमन्त्रविधानेन सापि तत् फलमश्नुते ।
इति पठति शृणोति वा य इत्थं
गिरितनयाव्रतमण्डले लोकसंस्थः ।
मतिमपि च ददाति सोपि देवी
ममरवधूजन किन्नरैश्च पूज्यः ॥

† इति पद्म पुराणोक्त मनन्ततृतीया व्रतम् ।

——:◯:——

युधिष्ठिर उवाच ।

स्त्रीणां सम्पद्यते येन मर्त्यलोके स्पृहे शुभम् ।

---

* क्रियतेऽथवेति पुस्तकान्तरे पाठः ।

† भविष्योत्तरोक्तमिति पुस्तकान्तरे पाठः ।

सर्व्वोपस्करसंयुक्तं सुख सौभाग्य वृद्धिमत्॥
सपत्नीरहितं कान्तं महिमानमनुत्तमम्।
एतदाचक्ष मे कृष्ण प्रसादात् सुमुखो भव॥

कृष्ण उवाच।

कैलाशशिखरे रम्ये नानाधातुविचित्रिते।
शङ्करः पार्व्वतीं प्राह किं त्वया सद्व्रतं कृतम्॥
येन सौभाग्यमत्यन्तं प्रियासि वरवर्णिणी।

देव्युवाच।

पुराहं देव तिष्ठामि कुमारी पितुरन्तिके।
तत्र पृष्टा मया नाथ जननी सुखमास्थिता॥
कथयस्वाम्ब मे किञ्चित् व्रतं सौभाग्यवर्द्धनम्।
एवमुक्ता मया देवी जननी मामथाब्रवीत्॥
भद्रे कुरुष्व यत्नेन रम्भाव्रतमनुत्तमम्।
मनोऽभिलषितं कामं येन प्राप्नोषि शङ्कर।
ज्यैष्ठशुक्लतृतीयायां स्नाता नियमतत्परा।
कुरु पार्श्वेषु पञ्चाग्नीन् ज्वालमालान ज्वलाहुतीन्॥
गार्हपत्यं दक्षिणाग्निं सभ्यकाहवनीयकम्।
पञ्चमं भास्करं तेजइत्येते पञ्च बह्नयः॥
इत्येषां मध्यमा भूत्वा तिष्ठ पूर्व्वामुखी भवत्।
चतुर्मुखं ध्यायमानं पङ्कजोपरिसंस्थितम्॥
मृगाजिनच्छन्नकुचां जटावल्कलधारिणीं।
सर्व्वाभरणसम्पन्नां देवीमभिमुखं कुरु॥

महाकाली महालक्ष्मीर्महाकाया महामना:।
महामाया महादेवी महामहिषनाशिनी॥
सरस्वती वतरणी सैव प्रोक्ता महासती।
तदास्यप्रेक्षणपरा भवती भावभाषिता।
होमं कुर्य्युर्महात्मानो ब्राह्मणाः सर्व्वतोदिशम्॥
देव्याः पूजा च कर्त्तव्या पुष्पधूपादिना ततः।
बहुप्रकारं नैवेद्यमनिन्द्यं घृतपाचितम्॥
दापयेदग्रतो देव्याः सौभाग्याष्टकमेव च।
कुस्तुम्बरीं जीरकञ्च कुसुम्भं कुङ्कुमं तथा॥
निष्पावाः पञ्चमी पुत्रि लवणं शर्करा गुडम्।
पुष्पमण्डपिका कार्य्या गन्धधूपादिवासिता॥
पद्मासनेतिसन्तिष्ठेद्यावत् परिणतो रविः।
ततः प्रणम्य रुद्राणीं मन्त्रमेतमुदीरयेत्॥
वेदेषु सर्व्वशास्त्रेषु दिवि भूमौ रसातले।
दृष्टः श्रुतश्च बहुशो न शक्त्या रहितः शिवः॥
त्वं शक्तिस्त्वं स्वधा स्वाहा त्वं सावित्री सरस्वती।
पतिं देहि गृहं देहि सुतान् देहि नमोऽस्तु ते॥
एवं समाप्य तां देवीं प्रणिपत्य पुनः पुनः।
देहि शक्त्या गृहं रम्यं विचित्रं बहुभूमिकम्॥
छाद्य कल्हारकेदारप्रतोलीभिरलङ्कृतम्।
कुड्यं स्तम्भगवाक्षाढ्यं मणिमण्डिततोरणम्॥
पद्मराग महानीलमणि, वैदूर्य्य, शोभितम्।
गृहधानाविधानेन ब्राह्मणाय यशस्विने॥

सपत्नीकाय संपूज्य सर्व्वोपस्करसंयुतम्।
प्रयच्छ प्रयता भूत्वा मनोवाञ्छितदायकम्॥
सुवासिनीभ्यस्तद्देयं नैवेद्यं सूर्पसंस्थितम्।
निर्व्वर्त्य विधिनानेन ततः पश्चात् क्षमापयेत्॥
दम्पत्यानि च संपूज्य सम्पत्या मधुरैः रसैः।

देव्युवाच।

इत्युक्तया मया चीर्णं देव रम्भाव्रतं पुरा।
व्रतान्ते देवदत्तस्य दत्तं गृहवरं मया।
लोपामुद्रा सभर्त्तृकाचास्मिन् वेश्मनि पूजिता *।
व्रतेन तेन देवेश भर्त्ता लब्धोसि शङ्कर॥
अर्द्धकायेस्थिता तेऽहं सौभाग्यबलगर्व्विता।
एवमेतन्मयाख्यातं यन्मात्रा कथितं मम॥
नीलकण्ठ नमस्तुभ्यं ममार्त्तिहर शङ्कर।

श्रीकृष्णउवाच॥

पूर्व्वमेव मया चीर्णं याश्चरिष्यन्ति योषितः।
पुरुषास्त्वथ कौन्तेय ख्यातं रम्भाव्रतं भुवि॥
भार्य्यां पुत्र गृहं भोगान् कुलवृद्धिमवाप्नुयुः।
स्त्रीणां चारुत्वसौभाग्यं गार्हस्थ्यं सार्व्वकामिकम्॥
बाल मध्यस्थ वृद्धानां रूप लावण्यबृंहणम्॥
अनेन व्रतधर्म्मेण परलोके युधिष्ठिर।
काम-यान विमानेन वाञ्छितार्थप्रदेन तु॥

---

* पूजिता च वरारोहा लोपामुद्रा इति पुस्तकान्तरे पाठः।

रुद्रलोके महाभोगान् भुक्त्वा पाण्डवनन्दन ।
मर्त्यलोके शुभे देशे धन धान्य समाकुले ॥
हिमवद्विन्ध्ययोर्मध्ये आर्य्यावर्त्ते मनोहरे ।
कुले च धर्म्मशीलानां पार्थिवानाञ्च पाण्डव ॥
उत्पत्स्यते न सन्देहो रूपसौभाग्यसंयुतः ।
नारीवेत्थं महाभागा प्राप्नोत्यविकलं फलम् ॥
व्रतस्यास्य प्रभावेन शिवधर्म्मपरो भवेत् ।
भुक्त्वा भोगान् सुविपुलान् रुद्रैकगतमानसः ॥
मृतोऽत्र कर्म्मनिर्मुक्तो रुद्रस्यानुचरो भवेत् ।
भद्रं भवेद्भवभयापहरं नृलोके
गौर्य्याः समाढभवन स्थितया च चीर्णं ।
या स्त्री व्रतं भुवि करोति रता स्वधर्म्मे
व्रह्मेश केशव समं पतिमालभेत् सा ॥

इति भविष्योत्तरोक्तं पञ्चाग्निसाधनरम्भाव्रतम् ।२

———:○:———

कृष्ण उवाच ।

रम्भातृतीयां वक्ष्यामि सर्व्वपापप्रणाशनीम् ।
सुख सौभाग्य फलदं सर्व्वामयनिवारिणीं ॥
सर्व्वदुःखहरां पुण्यां पुत्रपौत्रप्रदां तथा ॥
सपत्नीदर्पदलनां रूपैश्वर्य्यकरीं शुभाम् ॥
शङ्करेण पुराख्याता पार्व्वत्याः प्रियकाम्यया ।
तामिमां शृणु भूपाल भूतानां परमं हितम् ॥

उपवासस्य नियमं गृह्णीयात् भक्तिभाविता ।
देवी सम्वत्सरं यावत् तृतीयायामुपोषिता ॥
प्रतिमासं करिष्यामि पारणञ्चापरेऽहनि ।
तदविघ्नेन मे यातु समाप्तिं व्रतमुत्तमम् ।
शरणं त्वां प्रपन्नास्मि दौर्भाग्यादुद्धरस्व माम् ॥
एवं सङ्कल्प्य विधिवत् कौन्तेय कृतनिश्चया ।
भक्त्या नारी ध्यानपरा स्नानं कृत्वा जितेन्द्रिया ॥
नद्यां तड़ागे वाप्यां वा गृहे वा नियतेन्द्रिया ।
पूजयेत्पार्व्वतीं नाम्ना रात्रौ प्राश्य कुशोदकम् ॥
प्रभाते भोजयेत्द्विप्रान् शिवभक्तान् विशेषतः ।
सहिरण्यञ्च लवणं दत्त्वा तेषां तु दक्षिणाम् ।
गौरीण्याश्च यथा शक्त्या भोजयेत् प्रयता सती ॥

गौरीण्याः सुवासिनीः ।

अनेन विधिना राजन् यः कुर्य्यात् पार्व्वतीव्रतम् ।
स कुलानां शतं सार्द्धन्तारयेन्नात्र संशयः ॥
इह लोके सुखं भुक्त्वा शिवलोके महीयते ।
पौषे मासे तृतीयायां गिरिजां नाम पूजयेत् ॥
गोमूत्रं प्राशयेद्रात्रौ प्रभाते भोजयेद्द्विजान् ।
हिरण्यं जीरकञ्चैव स्वशक्त्या दापयेत्ततः ॥
शक्रलोके वसेत् कल्पं ततः शिवपुरं व्रजेत् ।
माघमासे तृतीयायां सुदेवीं नाम पूजयेत् ॥
गोमूत्रं प्राशयेद्रात्रौ स्वपेद्रात्रौ विमत्सरा ।

हिरण्यञ्च कुसुम्भन्तु दिवा दद्यात् द्विजातये॥
विष्णुलोके चिरं स्थित्वा प्राप्नोति शिवमन्दिरम्।
गौरीतिफाल्गुने नाम गोक्षीरं प्राशयेन्निशि॥
प्रभाते भोजयेद्विप्रान् यथाशक्त्या सुवासिनीम्।
कुस्तुम्बुरीः सकनकास्तेभ्यो दत्त्वा विसर्ज्जयेत्॥
वाजपेयातिरात्राभ्यां फलं प्राप्य दिवं व्रजेत्।
चैत्रे राजन् विशालाक्षीं पूजयेद्भक्तितत्परा॥
दधि प्राश्य स्वपेत् प्रातर्दद्यात् हेमसकुङ्कुमम्।
शुभसौभाग्यसम्पन्ना मृता शिवपुरं व्रजेत्॥
वैशाखस्य तृतीयायां श्रीमुखीं नाम पूजयेत्।
घृतञ्च प्राशयेद्रात्रौ पुनर्द्दद्यात् द्विजातये।
कनकं शर्क्कराञ्चैव पूजयित्वा क्षमापयेत्॥
सर्व्वान् कामानवाप्नोति मृता शिवपुरं व्रजेत्।
ज्यैष्ठे नारायणीं नाम पूजयेत् पुष्पदीपकैः॥
प्राशयेल्लवणं रात्रौ ततश्चैका निशि स्वपेत्।
शिवभक्तान् द्विजान् प्रातर्भोजयित्वा यथेप्सितान्।
सुवासिनीर्य्यथाशक्त्या भक्ष्यभोज्यैश्च भोजयेत्॥
ताम्बूलङ्कनकं दद्यात् प्रनिपत्य विसर्ज्जयेत्।
घृतञ्च प्राशयेद्रात्रौ पुनर्द्दद्यात् द्विजातये।
कनकं शर्कराञ्चैव पूजयित्वा क्षमापयेत्॥
सर्व्वान् कामानवाप्नोति मृता शिवपुरं व्रजेत्।
मार्गशीर्षे शुभे मासि तृतीयायां नराधिप।
शुक्लायां प्रातरुत्थाय दन्तधावनपूर्व्वकम्॥

अन्तकाले सुखं याति यत्र देवो महेश्वरः॥
आषाढे माधवीं नाम प्राशयित्वा तिलोदकं।
प्रभाते भोजयेद्विप्रान् हेमयुक्तं गुडं ददेत्॥
सर्व्वसम्पत्सुखं भुक्त्वा देव्याश्चानुचरी भवेत्।
श्रावणे तु श्रियं पूज्य पिबेद्गोशृङ्गजञ्जलम्।
प्रभाते ब्राह्मणं भोज्य दद्याद्धेम तिलैः सह॥
भोगान् भुक्त्वा महीपृष्ठे गोलोकमधिगच्छति।
तथा भाद्रपदे मासि सुभद्रां नाम पूजयेत्॥
विल्वपत्ररसं प्राश्य स्वपेत्तु ब्रह्मचारिणी।
प्रभाते विप्रमुख्याय दद्याद्धेम फलैः सह॥
सर्व्वलोकेश्वरी भूत्वा भुक्त्वा भोगाननेकधा॥
प्राप्नोति ब्रह्मसदनं व्रतस्यास्य प्रभावतः॥
आश्विनस्य तृतीयायां पूजयित्वा शिवप्रियां।
प्राशयेत्तण्डुलजलं प्रातर्विप्रांश्च भोजयेत्॥
दक्षिणाचात्र निर्द्दिष्टा चन्दनञ्च सकाञ्चनम्।
सर्व्वयज्ञफलं प्राप्य गौरीलोके महीयते॥
पद्मोद्भवां कार्त्तिके च पञ्चगव्यं पिबेन्निशि।
रात्रिं जागरं कृत्वा प्रभाते भोजयेत् द्विजान्॥
सपत्नीकान् सुभाचारान् माल्यवस्त्रैर्व्विभूषणैः।
भूषयेद्रत्नश्रेष्ठ गौरिणीर्भोजयेत्तथा॥
उमामाहेश्वरं हैमं समाप्ते कारयेत् शुभम्।
उमामाहेश्वरंरूपं विष्णुधर्मोत्तरोदितम्॥
वामार्द्धे पार्वती कार्य्या शिवः कार्य्यश्चतुर्भुजः।

अक्षमालां त्रिशूलञ्च दर्पणञ्च करे दधत्॥
एकवक्त्रस्त्रिनेत्रश्च वामार्द्धदयितातनुः।
यथा विभवसारेण वितानं पञ्चवर्णकम्॥
शय्या चात्र विनिर्द्दिष्टा सर्व्वोपस्करसंयुता।
सवत्सां शीलसम्पन्नां गाञ्च दद्यात् पयस्विनीम्॥
आसनञ्च मृदु दद्यात् श्वेतछत्रं कमण्डलुम्।
पादुकोपानहौ दिव्ये वस्त्रयुग्मञ्च पाण्डुरम्॥
पीतयज्ञोपवीतञ्च पट्टसूत्रसमुद्भवम्।
शङ्खशुक्तिसमोपेतं दर्प्पणञ्च समुज्ज्वलम्॥
रक्तं सकञ्चुकं देयं स्त्रियाश्च परिधानकम्।
उमामाहेश्वरं स्थाप्य आसने ताम्रजे नृप *॥
पूजां विरचयेद्भक्त्या ध्यायमाना महेश्वरम्।
नानादिव्यैः सुगन्धैश्च पुष्पैः पत्रैः फलैस्तथा॥
घृतपक्कैश्च नैवेद्यैर्दीपमालाविभूषितैः।
कूष्माण्डैर्नालिकेरैश्च दाडिमैर्बीजपूरकैः॥
जीरकैर्लवणैश्चैव कुसुम्भैः कुङ्कुमैस्तथा।
रसपात्रैः सुमृष्टैश्च गीतवाद्यैरनेकधा॥
पूजयेद्देवदेवेशं सपत्नीकं क्षमापयेत्।
ततो द्विजं समाहूय वेदवेदाङ्गपारगम्॥
वेदध्वनिसमायुक्तमुपवेश्य वरानने।
सपत्नीकं नृपश्रेष्ठ दिव्यचन्दनचर्च्चितम्॥
परिधापयित्वालङ्कृत्य सर्व्वं तस्मै निवेदयेत्।

---

* शुभे इति पुस्तकान्तरे पाठः।

एवं कृते फलं यत्स्यात्तन्न शक्यं मयेरितुम् ॥
सर्व्वोक्तफलसंयुक्ता सर्व्वदेवैः सुपूजिता ।
जाता जाता महाकल्पे सर्व्वान् कामानवाप्नुयात् ॥
तदन्ते शिवसायोज्यं नारी प्राप्नोत्यसंशयम् ।
पुरुषो वा नृपश्रेष्ठ शिवभक्तिश्च सुव्रत ॥
सोऽपि तत्फलमाप्नोति नान्यथा शिवभाषितम् ।
सौभाग्यार्थं पुरा चीर्णं रम्भया राजसत्तम ॥
तेन रम्भातृतीयेयं परं सौभाग्यदायिनी ।
योऽहं स एव भूतेशो गौरी सैव न संशयः ।
इतिमत्वा महाभाग शरणं व्रज पार्व्वतीम् ॥
एषा हिमाद्रिदुहितुर्दयिता तृतीया
रम्भाभिधानमभवत् भुवि मत्कृतेति ।
संप्राशनैरचितनामयुतामुपोष्य
प्राप्नोति वाञ्छितफलान्यबला बहूनि ॥

इति भविष्योत्तरोक्तरंनामव्रतम् ।*

युधिष्ठिर उवाच ।

भगवन् हरिकालीति का देवी प्रोच्यते भुवि ।
आर्द्रधान्ये स्थिता कस्मात् पूज्यते स्त्रीजनेन सा ।
पूजिता किं ददातीह सर्व्वं मे ब्रूहि केशव ॥

श्रीकृष्ण उवाच ।

पार्थ पौराणिकीं दिव्यां मत्तः शृणु कथामिमाम् ।

आसीद्दक्षस्य दुहिता काली नाम सुकन्यका ॥
वर्णेनापि च सा कृष्णा नवनीलोत्पलप्रभा।
त्र्यम्बकाय च सा दत्ता महादेवाय शूलिने ॥
विवाहिता विधानेन शङ्खतूर्य्यनिनादिता।
यज्ञयात्रां गतैर्द्देवैः ब्राह्मणानाञ्च निस्वनैः ॥
निर्व्वर्त्तिते विवाहे तु कन्यासार्द्धं त्रिलोचनः।
क्रीडते विविधैः कामैर्म्मनसः प्रीतिवर्द्धनैः ॥
अथ देवसमाजे तु कदाचित् वृषभध्वजः।
आस्थानमण्डपे रम्ये आस्ते विष्णुसहायवान् ॥
तत्रस्थानाह्वयामास नर्म्मणा त्रिपुरान्तकः।
काली, नीलोत्पलश्यामां गणमातृगणान्विताम् ॥
एह्येहि त्वं मतिः काली भिन्नकृष्णाञ्जनप्रभे।
कालमप्यतिसौन्दर्य्यात्तवरूपं मम प्रियं ॥
इत्येवमुक्ता सा देवी व्रीडिता क्रोधमानसा *।
निश्वासोच्छ्वासताम्राची वाष्पगद्गदया गिरा ॥
करोद सस्वनं वाला प्रोवाच स्फुरिताधरा।
किं देव नाम्ना या गौरी सा गौरीत्यभिधीयते ॥
यस्मात्ममोपमा दत्ता भिन्नकृष्णाञ्जनं विभो।
समाजे देवसिद्धानां वासुदेवस्य सन्निधौ ॥
तस्माद्देहमिमं कृष्णं जुहोमि ज्वलितेऽनले।
इत्युक्ता वार्य्यमाणापि हरिकाली रुषान्विता ॥
मुमोच हरितच्छायां कान्तिं हरति शाद्वले।

* क्रीडितेति पुस्तकान्तरे पाठः।

चिक्षेप देहं रोषेण ज्वलिते हव्यवाहने ॥
पुनः पर्व्वतराजस्य गृहे गौरी बभूव सा ।
महादेवस्य देहार्द्धे स्थिता संपूज्यते सुरैः ॥
या मुक्ता शाद्वले देव्या कालीकान्तिः स्वदेहजा ।
सा बभूव महावीर्य्या देवी कात्यायनी पुनः ॥
तया कृतानि भूरीणि देवकार्य्याणि पाण्डव ।
तुष्टैर्द्देवगणैर्द्दत्तो वरस्तस्यै शृणुष्व मे ॥
यच्च शाद्वलसंस्था वै कालीति वरदायिनी ।
पूजयिष्यन्ति पुरुषा नार्य्योवापि विशेषतः ॥
सर्व्वपापविनिर्मुक्ताः सुखसौभाग्यगर्व्विताः ।
चिरायुषो भविष्यन्ति भर्त्तृपुत्त्रसमन्विताः ॥
एवं सा हरिकालीति गौरी शस्ये व्यवस्थिता ।
पूजनीया महाराज मन्त्रेणानेन भक्तितः ॥
हरेर्न्नाम्नः समुत्पन्ने हरिकालि हरिप्रिये ।
सर्व्वदा शस्य मूर्त्तिस्थे प्रणतार्त्तिहरे नमः ॥
इत्थं संपूज्य तां देवीं दत्त्वा विप्राय दक्षिणाम् ।
ततो जलाशये रम्ये मन्त्रेणैवं विसर्जयेत् ॥
अर्च्चितासि मया भक्त्या गच्छ देवि सुरालयम् ।
मम दौर्भाग्यनाशाय पुनरागमनाय च ॥
एवं यः पाण्डवश्रेष्ठ हरिकालीव्रतं चरेत् ।
प्रतिवर्षं विधानेन नारी वा भक्तितत्परा ॥
नीत्वा यत् फलमाप्नोति तदन्येन न लभ्यते ।
मर्त्यलोकात् चिरं जीवेत सर्व्वकामैः सुपूरिता ॥

पुत्र पौत्र सुहृन्मित्र नप्तृदौहित्र सङ्कुलम्॥
सार्द्धं वर्षशतं जीवेत् भोगान् भुक्त्वा महीतले।
ततोऽवसाने देहस्य शिवलोके महीयते॥
वीरभद्र महाकाल नन्दीश्वर विनायकाः।
सर्व्वे प्रसादसुमुखा भवन्ति व्रतयोगतः॥
संपूज्य शूर्प गतसप्तनिरूढशस्यां
देवीं हिमाद्रितनयां हरिकालिकाख्यां॥
नैवेद्य जागर समुद्यतगीत वाद्यैः
संप्राप्नुवन्ति मनुजाः सुचिरं सुखानि॥

कृष्ण उवाच।

शुक्लभाद्रपदस्यैवं तृतीयायां समाचरेत्।
रत्नधान्यैः स वैरूढैः कृत्वा विहितशाद्वले॥
खर्ज्जूरैर्नारिकेलैश्च फलैश्च मधुरैस्तथा।
मातुलाङ्गकुसुम्भैश्च धान्यकैर्जम्बिकैस्तथा॥
गन्धैः पुष्पैः फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः।
प्रीणयित्वा समासाद्य पद्मरागेण भाविता॥
घण्टावाद्यादिभिर्गीतैः शुभैर्दिव्यैः कथानकैः।
पूजनीया महाराज मन्त्रेणानेन भक्तितः॥
हरेर्नाम्नः समुत्पन्ने हरकालि हरप्रिये।
सर्व्वदा शस्य मूर्त्तिस्थे प्रणतार्त्तिहरे नमः॥
इत्थं संपूज्य तां देवीं दद्याद्विप्राय दक्षिणाम्।
कृत्वा जागरणं रात्रौ प्रभाते किञ्चिदुद्गते॥

रात्रौ सुवासिनीभिश्च सा नेया तु जलाशये।
ततो जलाशये रम्ये मन्त्रेणैव विसर्ज्जयेत्॥
अर्च्चिता च मया भक्त्या गच्छ देवि सुरालयम्।
मम दौर्भाग्यनाशाय पुनरागमनाय च॥
एवं यः पाण्डवश्रेष्ठ हरिकालीव्रतं चरेत्।
प्रतिवर्षं विधानेन नारी वा भक्तितत्परा॥
नीत्वा यत् फलमाप्नोति तदन्येन न लभ्यते।
मर्त्यलोके चिरञ्जीवेत् सर्व्वकामैः सुपूजितः॥
पुत्र पौत्र सुहृद्भिश्च नप्तृ दौहित्र सङ्कुलम्।
साग्रं वर्षशतं जीवेद्भोगयुक्ता महीतले॥
ततोवसाने देहस्य शिवलोके महीयते।
वीरभद्र महाकाल नन्दीश्वर विनायकाः॥
सर्व्वे प्रसादसुमुखा भवन्ति व्रतयोगतः।
संपूज्य शूर्पगत सप्तविरूढ़शस्यां
देवीं हिमाद्रितनयां हरिकालिकाख्याम्।
नैवेद्यजागर समुद्धतगीतवाद्यैः
संप्राप्नुवन्ति मनुजाः सुचिरं सुखानि॥

इति भविष्योत्तरोक्तं हरिकालिव्रतम्।५

——:०:——

तृणविन्दुरुवाच।

येनावियोग मासाद्य व्रतेन नियमेन वा।
सदा नारी सुतान् येन व्रजेद्येन पदञ्च तत्॥

विधवा च परे लोके भत्रैव मुनिपूज्यते।
सुखेनापि सदा ब्रह्मन् वद येन धनेन च॥

अनिलाद उवाच।

उमया चरितं यच्च भवान्या ललिताव्रतम्।
बाल्ये हिमवतो जन्म दक्षकोपाद्विमुच्यया॥
महासौभाग्यसन्दोहं दृष्ट्वा देव्या महात्मना।
अरुन्धत्या वशिष्ठेन कथितं तत् व्रतं शृणु॥

वशिष्ठ उवाच।

अरुन्धति शृणुष्वेदं व्रतं सौभाग्यवर्द्धनम्।
अवैधव्यपदं स्त्रीणामवियोगव्रतन्त्विदम्॥
मार्गशीर्षे सिते पक्षे स्नाता शुक्लाम्बरप्रिया।
दृष्ट्वे चन्द्रं द्वितीयायां नक्तं भुञ्जीत पायसम्॥
आचम्य च शुचिर्भूत्वा दण्डवच्छङ्करन्नमेत्।
मुदान्विता नमस्कृत्य विज्ञाय परमेश्वरम्॥
ॐ उदुम्बरमयं वृक्षं ग्राह्यमष्टाङ्गुलं शुभम्।
उत्तराशागतं साग्रं सत्वचं निर्व्रणं दृढम्॥
वाग्यता प्राङ्मुखी भूत्वा भक्षयेद्दन्तधावनम्।
द्वितीयायां ततः स्वप्याद्भूमौ तद्गतमानसा॥
तृतीयायां समुत्थाय मुहूर्त्ते ब्रह्मणः शुभे।
कृतकार्य्या च सुस्नाता शुक्लमाल्याम्बरा ततः॥
शालिपिष्टमये कृत्वा स्त्रीपुंसःप्रतिमे शुभे।
वेणुपात्रे तु संस्थाप्य पूजयेद्भक्तितत्परा॥

उपवासञ्च कुर्व्वीत सर्व्वभोगविवर्ज्जितम् ।
पाषण्डादिभिरालापं कृत्वा स्नाता विवर्ज्जयेत् ॥
ततो निशायां सुश्रोणि कृतपूजां कृतोत्सवाम् ।
कृतवादित्रनिर्घोषां जागरं तत्र कल्पयेत् ॥
विधिवत् पूजयित्वा तत् पैष्टिकं पुत्रिकाद्वयम् ।
सुप्रभाते द्विजाग्राय सहिरण्यं प्रदापयेत् ॥
यथा शक्त्या महाभागे वित्तशाठ्यं विवर्जयेत् ।
उमामाहेश्वरं ह्येतत् कल्पयित्वा तु चेतसि ॥
ब्राह्मणोऽपि जलेऽगाधे पैष्टन्तन्मिथुनं क्षिपेत् ।
एवं कृते स्वस्त्ययना मिथुनानि तु भोजयेत् ॥
शिवभक्तान् द्विजान् भोज्य मिष्टान्नेन स्वशक्तितः ।
प्रतिमासं प्रकुर्व्वीत विविधान्नेन सयुतं ॥
मार्गशीर्षे पुनर्म्मासि कार्त्तिकान्ते समुद्यते ।
नामानि ते प्रवक्ष्यामि प्रतिमासक्रमेण तु ॥
पूजाजपनिमित्तञ्च सिद्ध्यर्थं चिन्तितस्य च ।
शङ्करं मार्गशीर्षे तु नाम गौरीसमन्वितम् ॥
गौरीं वा पार्व्वतीञ्चैव पुष्यमासे तु पूजयेत् ।
भवञ्चैव भवानीञ्च माघमासे प्रपूजयेत् ॥
फाल्गुने तु महादेवमुमया सहितं यजेत् ।
चैत्रे त्रिलोचनं देवं ललिताञ्च प्रपूजयेत् ॥
स्थाणुं वैशाखमासे तु लोलनेत्रा समन्वितम् ।
रुद्राण्या सहितं रुद्रं ज्यैष्ठे मासे यजेत च ॥
आषाढे पशुनाथञ्च सत्या सार्द्धं सुचिस्मिते ।

श्रीकण्ठं श्रावणे देवं सुभद्रां परमेश्वरीम्॥
भीमं भाद्रपदे तद्वत् कालरात्रिसमन्वितम्।
शिवमाश्वयुजे भक्त्या गङ्गया सहितं यजेत्॥
ईशानं कार्त्तिके मासि शिवां देवीं प्रपूजयेत्।
प्रतिमासे विना नाम्ना व्रतसिद्धिर्न विद्यते॥
प्रतिमासेषु पुष्पाणि यानि पूजासु योजयेत्।
तानि ते संप्रवक्ष्यामि सद्यः प्रीतिकराणि वै॥
आदौ नीलोत्पलं योज्यं तदभावेऽपराण्यपि।
पवित्राणि सुगन्धीनि योजयेद्भक्तितो वने॥
करवीरं बिल्वपत्रं किंशुकं कुन्दमल्लिकाम्।
पाटलीं च कदम्बञ्च तरगन्द्रोणमालतीं॥

अशुं कुङ्कुमं द्रोणं कुरवकः।

एतान्युक्तक्रमेणैव मासेषु द्वादशेष्वपि।
भक्त्या योज्यानि शम्भोः देवस्य प्रियकाम्यया॥
तथा च पञ्चगव्यन्तु प्राशनं प्रतिमासिकम्।
नान्यद्धि पावनं किञ्चित् पञ्चगव्यात्परं स्मृतम्॥
एवं व्रते कृते भद्रे शिवभक्तिसमन्विता।
वस्त्रान्नं वितानञ्च ध्वजं किङ्किणिमालिकम्॥
घण्टां दीपं वस्त्रयुग्मं शिवभक्त्या निवेदयेत्।
स्नापयित्वानुलिप्ता च सौवर्णं विद्धि पङ्कजम्॥
यथा विभवतो देयं देवदेवस्य तुष्टये।
रौप्यञ्च रूपयुगलं देवस्य पुरतोन्यसेत्॥

बहुप्रकार नैवेद्यं गीतवाद्यसमन्वितम् ।
कुर्य्यात्नीराजनं शम्भोः स्नात्वा गच्छेत् गृहं स्वकम् ॥
चतुरस्रं महादेवमुमाञ्चैव त्रिकोणिकीं ।
स्नात्वाचार्य्याय तद्युग्मं मौक्तिकादियुतन्ददेत् ॥
व्रतिनो भोजयेत् पश्चाद्द्वादशैव द्विजोत्तमान् ।
मिथुनानि च यावन्ति भक्त्या शक्त्या च दश्चयेत् ॥
कर्षैकैकप्रमाणेन शातकुम्भमयं शुभम् ।
उमामाहेश्वरञ्चैव कारयित्वा सुशोभनम् ॥

उमामाहेश्वरं रूपं रम्भात्तृतीयाव्रतोक्तं वेदितव्यम् ।

मौक्तिकानि चतुःषष्टिस्तावन्तोऽपि प्रवालकाः ।
तावन्ति पुष्परागाणि* ताम्रपात्रोपरि न्यसेत् ॥
वस्त्रेण वेष्टयित्वा च गन्धपुष्पैः समर्च्चयेत् ।
एतत्सर्वं सारयुक्तमाचार्य्याय निवेदयेत् ॥
व्रतिनां ब्राह्मणानां वा विथुनानामथापि वा ।
अशक्तो निष्क्रयं दद्याद्वित्तशाठ्यविवर्ज्जितः ॥
दत्त्वा हिरण्यं वासांसि प्रणिपत्य क्षमापयेत् ।
चत्वारिंशत् तथाष्टौ च कुम्भान् छत्रमुपानहौ ॥
सहिरण्यान् क्षतान् सर्व्वान् दधिपुष्पोदकार्च्चितात् ।
दीनान्धबधिरादीनां तद्दिने बानिवारितम् ॥
कल्पयेदन्नपानञ्च सुमृष्टं रुच्यमात्मनः ।
न्यूनाधिकं न कर्त्तव्यं स्ववित्तपरिमाणतः ॥

---

* पद्मरागाणि इति पुस्तकान्तरे पाठः ।

संपूरयेत् कल्पनया यदि वित्तं न विद्यते।
अवियोगकरं वैतत् रूपसौभाग्यवित्तदम्।
आयुः पुत्र,प्रदं काम्यं शिवलोकप्रदायकम्॥

इति कालिकापुराणोक्तमवियोगतृतीयाव्रतम्।

—:○:—

मत्स्य उवाच।

तथैवान्यत् प्रवक्ष्यामि सर्व्वकामफलप्रदम्।
सौभाग्यशयनं नाम यत्पुराणविदोविदुः॥
पुरा दग्धेषु लोकेषु भुर्भुवःस्वर्म्महादिषु।
सौभाग्यं सर्व्वलोकानामेकस्थमभवत्तदा॥
तच्च वैकुण्ठमासाद्य विष्णुवक्षस्थले स्थितम्।
ततः कालेन महता पुनः सर्गविधौ नृप॥
अहङ्कारावृते लोके प्रधानपुरुषान्विते।
विवादे संप्रवृत्ते च कमलासनकृष्णयोः॥
लिङ्गाकारा समुद्भूता ज्वलतीवोग्ररूपिणी।
तयाभितप्तदेहस्य विष्णोर्व्वक्षस्थलाश्रितम्॥
सौभाग्यात् यत् द्रवीभूतं न्यायतत्तस्य वक्षसः।
रसरूपं न तद्यावत् प्राप्नोति वसुधातलम्॥
उत्क्षिप्तमन्तरिक्षस्थं ब्रह्मपुत्रेण धीमता।
दक्षेण पीतमात्रन्तु रूपलावण्यकारकम्॥
बलं तेजो महज्जातं दक्षस्य परमेष्ठिनः।

शेषं तदपतद्भूमावष्टधा तदजायत ॥
इक्षव*स्तरुराजञ्च निष्पावाजाजिधान्यकम् ।
विकारवच्च गोक्षीरं कुसुम्भं कुङ्कुमं तथा ।
लवणं चाष्टमन्तत्र सौभाग्याष्टकमुच्यते ॥
तवराजमत्युत्तमा शर्करा
विकारवत् विकाररसहितम् ।
पीतं यत् ब्रह्मपुत्रेण योगज्ञानविदा तथा ।
दुहितास्याभवत्तस्माद्या सतीत्यभिधीयते ॥
लोकानतीत्य ललिता ललिता तेन चोच्यते ।
त्रैलोक्यसुन्दरी राजन् उपयेमे पिनाकधृक् ॥
या सौभाग्यैकनिष्पन्ना भुक्ति मुक्ति फल प्रदा ।
तामाराध्य पुमान् भक्त्या नारी वा किं न विन्दति ॥

मनुरुवाच ।

कथमाराधनं तस्या जगद्धात्र्या जनार्द्दन ।
तद्विधानञ्च जगतो जायते तद्वदस्व नः ॥

मत्स्य उवाच ।

वसन्तमासमासाद्य तृतीयायां जनप्रियाम् ।
शुक्लपक्षस्य पूर्वाह्णे तिलैःस्नानं समाचरेत् ॥
तस्मिन्नहनि सा देवी किल विश्वात्मना सती ।
पाणिग्रहणकैः मन्त्रैरुदूढा वरवर्णिनी ।
तया सहैव देवेशं तृतीयायां समर्चयेत् ॥

---

* स्तवराजमिति पुस्तकान्तरे पाठः ।

फलैर्नानाविधैर्धूपैर्दीपैर्नैवेद्यसंयुतैः ।
प्रतिमां पञ्चगव्येन तथा गन्धोदकेन च ।
स्नापयित्वार्च्चयेद्गौरीमिन्दुशेखरसंयुतां ॥

प्रतिमामित्यविशेषोक्तावपि गौरीशयोः सौवर्णमेव प्रतिमाद्वयं कर्त्तव्यम् ।

सौवर्णप्रतिमाद्वयं प्रतिपादयेदित्यग्रे वक्ष्यमाणत्वात् ।

नमोऽस्तु पाटलायै तु पादौ देव्याः शिवस्य तु ।
शिवायेति च संकीर्त्य जयायै गुल्फयोर्द्वयोः ॥
त्रिगुणायेति रुद्रस्य भवान्यै जङ्घयोर्युगम् ।
शिवं रुद्रेश्वरायेति जयायै इति जानुनी ॥
संकीर्त्य हरिकेशाय तथोरू वरदे नमः ।
ईशायै शङ्कटिं रत्यै शङ्करायेति शङ्करे ॥
कुक्षिद्वये च कोटव्यै शूलिनं शूलपाणये ।
मङ्गलायै नमस्तुभ्यमुदरं वापि पूजयेत् ॥
सर्व्वात्मने नमोरुद्रमीशान्यै च कुचद्वयम् ।
शिवं वेदात्मने तद्वद्रुद्राण्यै कण्ठमर्च्चयेत् ॥
त्रिपुरघ्नाय विश्वेशमनन्तायै करद्वयं ।
त्रिलोचनायेति हरं बाहू कालानलप्रिये ।
सौभाग्यभवनायेति भूषणाहिं समर्च्चयेत् ॥

'भूषणाहिं, शिवं ।

स्वाहा स्वधायै च मुखमीश्वरायेति शूलिनः ।
अशोकमधुवासिन्यै पूज्या वोष्ठौ च कामदौ ॥

स्थाणवे च हरन्तद्वदास्यञ्चन्द्रमुखप्रिये।
नमोऽर्द्धनारीशहरमसिताङ्गीति नासिकम्॥

अर्द्धनारीशाय नम इति हरं पूजयेदित्यर्थः।

नम उग्राय लोकेशं ललितेति पुनर्भ्रुवौ।
शर्वाय पुरहन्तारं वासुदेव्यै तथालकं॥
नमः श्रीकण्ठनाथाय शिवं केशांस्तथार्च्चयेत्।

तथा अलक पूजामन्त्राभ्यामुमेशयोः केशानर्च्चयेदित्यर्थः।

भीमोग्रसौम्यरूपिण्यै शिरः सर्व्वात्मने नमः।
शिवमभ्यर्च्य विधिवत्सौभाग्याष्टकमग्रतः॥
स्थापयेद्घृत,निष्पाव,कुसुम्भ,चीर,जीरकम्।
तवराजेचुलवणं कुस्तुम्बुरमथाष्टकम्॥
दत्तं सौभाग्यकृद्यस्मात्सौभाग्याष्टकमित्यतः।

अत्र घृतचीरयोरेककोटिता।

विकारवच्चगोचीरमिति सौभाग्याष्टकमध्ये मत्स्यपुराणएव पूर्व्वत्राभिधानात्।

कुस्तुम्बुरं, धान्यकम्।

तवराजः शर्कराविशेषः।

एवं निवेद्य तत्सर्वमग्रतः शिवयोःपुरः।
चैत्रे शृङ्गोदकं प्राश्य स्वपेत् भूमावरिन्दम॥
पुनः प्रभाते उत्थाय कृतस्नानजपः शुचिः।
सम्पूज्य द्विजदाम्पत्यं माल्यवस्त्रविभूषणैः॥

सौभाग्याष्टकसंयुक्तं सुवर्णप्रतिमाद्वयम् ।
प्रीयतामत्र ललिता ब्राह्मणाय निवेदयेत् ॥
एवं संवत्सरं यावत्तृतीयायां सदा मनो ।
प्राशने दानमन्त्रे च विशेषोऽयं निबोध मे ॥
गोशृङ्गोदकमाद्यं स्याद्वैशाखे गोमयं पुनः ।
ज्यैष्ठे मन्दारकुसुमं विल्वपत्रं शुचौ स्मृतम् ॥
श्रावणे दधि सम्प्राश्य नभस्ये च कुशोदकम् ।
क्षीरमाश्वयुजे मासि कार्त्तिके पृषदाज्यकम् ॥
पृषदाज्यं दधिमिश्रं घृतम् ।
मार्गशीर्षे तु गोमूत्रं पौषे सम्प्राशयेद्घृतम् ।
माघे कृष्णतिलांस्तद्वत् पञ्चगव्यञ्च फाल्गुने ॥
ललिता विजया भद्रा भवानी कुमुदा शिवा ।
वासुदेवी तथा गौरी मङ्गला कमला सती ॥
उमा च दानकाले तु प्रीयतामिति कीर्त्तयेत् ।
मल्लिका, शोक, कमल, कदम्बो,त्पल, मालतीं ॥
कुलत्थं करवीरञ्च वाण,मम्लान, कुङ्कुमम् ।
सिन्दुवारञ्च सर्व्वेषु मासेषु क्रमतः स्मृतम् ॥

वाणं नीलकुरण्टकं, अम्लानं महासहापुष्पं, सिन्दुवारं निर्गुण्डीपुष्पम् ।

जपा-कुसुम्भ-कुसुम-मालती-शतपत्रिकाः ।
यथालाभं प्रशस्तानि करवीरञ्च सर्व्वदा ॥
एवं सम्वत्सरं यावदुपोष्य विधिवन्नरः ।

स्त्री वा भक्त्या कुमारी वा शिवावभ्यर्च्य शक्तितः।
व्रतान्ते शयनं दद्यात्सर्व्वोपस्करसंयुतम्॥
उमामाहेश्वरं हैमं वृषभञ्च गवा सह।
स्थापयित्वा च शयने ब्राह्मणाय निवेदयेत्॥

उपस्करमुपधानादि।

गोमिथुनमपि हैममेव मुख्यस्य शयने स्थापनासम्भवात्।

अन्यान्यपि यथा शक्त्या मिथुनान्यम्बरादिभिः॥
धान्यालङ्कारगोदानैरभ्यर्च्य धनसञ्चयैः।
वित्तशाठेयन रहितः पूजयेद्गतविस्मयः॥
एवं करोति यः सम्यक् सौभाग्यशयनव्रतं।
सर्व्वान् कामानवाप्नोति पदमानन्त्यमश्नुते।
फलस्यैकस्य च त्यागमेतत् कुर्व्वन् समाचरेत्॥
यत्र कीर्त्तिं समाप्नोति प्रतिमासं नराधिप।
सौभाग्यारोग्यरूपायुर्वस्त्रालङ्कारभूषणैः॥
न विमुक्तो भवेद्राजन्नब्दार्वुदशतत्रयं।
यस्तु द्वादशवर्षाणि सौभाग्यशयनव्रतम्॥
करोति सप्त वाष्टौ वा श्रीकण्ठभवनेऽमरैः।
पूज्यमानो वसेत्सम्यक् यावत् कल्पायुतत्रयम्।
नारीवा कुरुते वापि कुमारी वा नरेश्वर॥
सापि तत्फलमाप्नोति देव्यानुग्रहलालिता।
शृणुयादपि यश्चैव प्रदद्यादथवा मतिम्॥
सोऽपि विद्याधरो भूत्वा स्वर्गलोके चिरम्वसेत्।

इति मत्स्यपुराणोक्तं सौभाग्यशयनव्रतम् ।

———:○:———

गौरीव्रतमथो वक्ष्ये स्त्रीणां सौभाग्यवर्द्धनम् ।
चैत्रशुक्लतृतीयायां गौरीव्रतं,-समाचरेत् ।
उपोष्य तु प्रयत्नेन विधानमिदमाचरेत् ॥
रक्ताम्बरधरो भूत्वा क्रोधलोभविवर्ज्जितः ।
स्थण्डिले हस्तमात्रे तु कर्त्तव्यं गन्धमण्डलम् ॥
कुङ्कुमेन्दुशीतेन वर्त्तुलं परिवर्त्तयेत् ।
इन्दुः,कर्पूरं शीतं चन्दनम् ।
तत्र मध्ये पूजितव्या प्रतिमा हेमसम्भवा ।
मधुजा तदभावे तु पुरा केनापि निर्म्मिता ॥
रक्तचन्दनजा वाथ कर्त्तव्या सा प्रमाणतः ।
पञ्चामृताथवा पूज्या तत्र मासं विधानतः ॥
पञ्चामृता पञ्चामृतजा ।
रक्तपुष्पैस्तु संपूज्या जातीचम्पकसंयुतैः ।
पाटलाकरवीरैश्च रक्तपद्मैर्यथातथा ॥
पारिजैर्म्मल्लिकाकुन्दै स्तथा रक्तोत्पलैरलम् ।
स्थलपद्मैः किंशुकैश्च सुमनोत्पलकेतकैः ॥
एवं पुष्पै स्तथान्यैश्च पूजनीया प्रयत्नतः ।
इन्दुना कुङ्कुमेनैव भूयोभूयः समालभेत् ॥
नानाविधानि रत्नानि मुकुटाङ्गदकानि च * ।
कुण्डलाभरणान्यत्र रशनादीनि दापयेत् ॥

---

* मुकुटाङ्गदकान्नि च पुस्तकान्तरेपाठः ।

भक्ष्याणि यत्नात् कल्पानि घृतकुण्डयुतानि च।
शीतलञ्च घनं दुग्धं मुग्धञ्च दधि पिच्छिलम्॥
करम्भं नवनीतञ्च तथा शिखरिणीं पुनः।
पानकञ्चैव पानीयं सचन्द्रं दापयेत्ततः॥
रक्तवस्त्राणि देयानि सम्भारादीनि चाग्रतः।
आचार्य्यञ्चैव पूजान्ते पूजनीयः प्रयत्नतः॥
हेमवस्त्रान्नपानैश्च वित्तशाठ्यं विना ततः।
रात्रौ जागरणं कार्य्यं कुमारीर्भोजयेत्तथा॥
देवीनामानि वक्ष्यामि मासि मासि यथाक्रमम्।
प्राशनन्तु विशेषेण यथावदनुपूर्व्वशः॥
गौरी उमा च ललिता सुभगा भगमालिनी।
मनोन्मनी भवानी च कामदा भोगवर्द्धनी॥
अम्बिका च तथा कृष्णा रुद्राणी पूजयेत् क्रमात्।
इत्येताः सितपक्षे तु कृष्णपक्षे तथा शृणु॥
रतिर्धृतिर्व्वुद्धिर्म्मतिः पुष्टिश्च परिकीर्त्तिताः।
प्रज्ञा मेधा तथा चर्य्या श्रीरक्ता कीर्त्तिरेव च॥
सिताशिताभ्यां पक्षाभ्यां व्रतं यत्नात्समाचरेत्।
अशक्तत्वादभावाच्च द्रव्याणान्तु स्थितं हितम्॥
प्राशनं तत्र कर्त्तव्यं शास्त्रोक्तेनैव वर्त्मना।

तत्तन्मासोक्तद्रव्यस्यालाभे रोगादिजनकत्वेन प्राशनाशक्तौ च क्रमेण क्रमेण द्वादशेषु मासेषु यत् स्थितं लब्धं यच्च हितं तत् प्राशनीयमित्यशक्तत्वादित्यादेरर्थः।

प्रति मासि प्रवक्ष्यामि शुक्लपक्षे क्रमेण तु।

क्षीरं दधि घृतञ्चैव गोमूत्रञ्च कुशोदकम्॥
बिल्वपत्रोदकञ्चैव तथान्यच्चन्दनोदकम्।
जातीपत्रोदकञ्चैव पद्मकेसरमेव च॥
नागकेसरसक्तञ्च लवङ्गं चन्द्रमेव च।
शुक्लपक्षे तु कथितं चैत्रात् प्रभृति षण्मुख॥
प्राशनं कृष्णपक्षे तु कथ्यमानं शृणुष्व तत्।
वलाकं कोलकञ्चैव प्राशयेत्तु शतावरीम्॥
वनं लघुसुरं दारु सारिवां शङ्खपुष्पिकाम्।
शिरीषं सुरभीयुक्तं रक्तञ्च मौक्तिकं तथा॥
भारोदकं द्वादशमं प्राशनं कथितं तव *।
इतिगौरीव्रतं ख्यातं सौभाग्यं स्त्रीषु पुत्रदम्॥
आयुरारोग्यदं स्त्रीणामिह लोके परत्र च।
इदं व्रतवरन्त्यक्त्वा स्त्रीषु नान्यद्व्रतं हितम्॥
तस्मात् सर्व्वप्रयत्नेन गौरीव्रतमुपाचरेत्।
अञ्जनं रक्तवस्त्रञ्च ताम्बूलं कुङ्कुमं तथा॥
दर्प्पणं व्यजनं छत्रमासनं यानमुत्तमम्।
गृहोपकरणं सर्व्वं हेमजं वाथ ताम्रजम्॥
व्रतान्तेचैव दातव्यमाचार्य्याय प्रयत्नतः।
स्त्रीणाञ्चैव कुमारीणां वस्त्राण्याभरणानि च॥
दातव्यानि प्रयत्नेन यदीच्छेत् भूतिमात्मनः।
इत्येतत्तरहस्यन्तु गौरीव्रतमुदाहृतम्॥

---

* तारोदकमिति पुस्तकान्तरे पाठः।

इतिकालोत्तरोक्तं गौरीव्रतम् ।१२

——ः○ः——

मार्कण्डेय उवाच ।

शुक्लपक्षे तृतीयायां सोपवासोजितेन्द्रियः ।
मण्डलत्रितयं कुर्य्याद्वर्णकेन पृथक् पृथक् ॥
तथा मण्डलं दक्षिणे भागेश्वेतं कुर्य्यात्ततो नरः* ।
रक्तं मध्ये रवेः कुर्य्यात् तादृक्श्वेतं ध्रुवस्य तु ॥
विष्णोः पदत्रयं तेषु पूज्यं स्यात् मण्डलेन तु ।
भूमौ तु प्रथमं पादं द्वितीयं सूर्य्यमण्डले ॥
तृतीये तु ध्रुवे देवे पूजयेत् प्रयतः शुचिः ।

होममन्त्रेण पूजा ।

यथा मण्डलवर्णोक्तगन्धमाल्यादिभिर्द्विज ।
तद्विष्णोः परमित्येव होममन्त्रोविधीयते ॥
त्रिविक्रमायेति तथा स्त्रीशूद्रस्य द्विजोत्तम ।
अक्षतानि तिलानाज्यं होमयेत् संयुतत्रयं ॥
ताम्ररूप्य सुवर्णानि शक्त्या दद्यात्तु दक्षिणाम् ।
भोजनञ्च त्रिमधुरं भोजयेत् ब्राह्मणोत्तमान् ॥
प्राणयात्रान्तु कुर्व्वीत त्रिगव्येन तु तद्दिने ।

तद्दिने व्रतदिने व्रतिना †
उपवासित्वमितरान्नवर्ज्जनात् ।

---

* पौत मिति पुस्तकान्तरे ।

† तद्दिने व्रतिन उपवासित्व इतरान्नवर्जनात् द्वितीयभोजन वर्जनार्थं ति पुस्तकान्तरे पाठः ।

द्वितीयायामुपोष्य तृतीयायां त्रिगव्य
प्राशनं गव्यमिति दधि चीर घृतम् ॥
एवं वर्षत्रयं कृत्वा व्रतान्ते च त्रिहायनीम्।
ब्राह्मणाय तु गां दत्त्वा सर्व्वकामानवाप्नुयात्।
त्रिहायनीं त्रिवर्षां।
भूमौ तथान्तरिक्षे च दिवि चैव नरोत्तम।
गतिस्तस्याप्रतिहता भवत्यरिनिसूदन॥
त्रीणि वर्षसहस्राणि त्रिविक्रमव्रतचारिणी।
मानसं वाचिकञ्चैव कायिकञ्च विमुञ्चति॥
सर्व्वपापं महाभाग मनुष्यो जायते तथा।
कुले धनाढ्ये महति रूपद्रविणसंयुतः॥
विरोगः सर्व्वसिद्धार्थस्त्रिवर्गस्य च साधकः।
कृत्वा द्वादशवर्षाणि शिवलोके महीयते॥
तत्रापि नित्यं वरदं वरेण्यं
लक्ष्मीसहायं पुरुषं पुराणम्।
पश्यत्यमोघं विभुमप्रतर्क्यं
सनातनं दुःख विनाशहेतुम्॥

इति विष्णुधर्म्मोत्तरोक्तं त्रिविक्रम तृतीयाव्रयम्। 12

—:०:—

मार्कण्डेय उवाच।
द्वितीयञ्च प्रवक्ष्यामि शृणु त्रैविक्रमं व्रतम्।
भूमिस्तु प्रथमः पादः अन्तरिक्षं तथा परः॥

अप्रमत्त इति पुस्तकान्तरे पाठः।

तृतीयादिविधिर्न्नयो देवदेवस्य चक्रिणः ।
भुवः पतिः स्मृतो वह्निरतिरिक्तस्य चानलः ॥
दिग्भांपतिस्तथा सूर्य्यस्तव विष्णोः पदत्रयम् ।
ज्येष्ठे शुक्लतृतीयायां सोपवासो जितेन्द्रियः ॥
कल्ये कूपजलं स्नातो वह्निं संपूयेन्नरः ।
सोपवासो द्वितीयायां कृतोपवासः कल्यं प्रातःकालः ।
गन्धमाल्यनमस्कारं दीपधूपान्नसम्पदा ।
नदीजले ततः स्नात्वा मध्यं प्राप्ते दिवाकरे ॥
वायोः संपूजनं कृत्वा सक्तून् दत्त्वाद्विजातये ।
स्नात्वा तुसारतोये च सायं सूर्य्यं समर्च्चयेत् ॥
ततश्च नक्तं प्राश्नीयाद्धविष्यं वाग्यतः शुचिः ।
एवं सम्वत्सरं राजन् कृत्वा व्रतमनुत्तमं ॥
समापयित्वा वैशाखे दद्याद्विप्रेषु दक्षिणाम् ।
ताम्रं रूप्यं सुवर्णञ्च त्रीणि लोहानि यादव ।
वासोयुगन्तथोष्णीषं त्रीणि चैतानि भक्तितः ।
एतत्सम्वत्सरं कृत्वा नरस्त्रैविक्रमं व्रतम् ॥
सर्व्वकाम समृद्धस्य यज्ञस्य फलमश्नुते ।
विमानेनार्कवर्णेन किङ्किणीजालमालिना ॥
देवरेण गुणाढ्येन वीणामुरजवादिना ।
स्वर्गलोकमवाप्नोति कामचारी विहङ्गमः ।
कामत्रयमुपासाद्य वरत्रय,मुपाश्नुते ॥
अक्षमायुः श्रुतस्यैव प्रसन्ने गरुडध्वजे ।
आक्रान्तलोक त्रितयस्य पूज्यः

पदत्रयं धर्म्मभृतांवरिष्ठं।
संप्राप्य कामान् दनुजातहर्त्तु
र्गतिं यथेष्टां पुरुषः प्रयाति॥

इति विष्णुधर्म्मोत्तरोक्तं त्रिविक्रमतृतीयाव्रतम्॥

——०※०——

मार्कण्डेयउवाच॥

वक्ष्यतस्ते महाभाग तव त्रैविक्रमव्रतम्।
तृतीयं नृपशार्दूल तन्मे निगदतः शृणु।
ज्यैष्ठे शुक्लतृतीयायां नरः सम्यगुपोषितः॥
भुवः सम्पूजनं कुर्य्याद्धूपमाल्यानुलेपनैः।
दीपैः रत्नैश्च विविधैर्दद्याद्विप्रेषु दक्षिणाम्॥
वीजपूर्णानि पात्राणि सहिरण्यानि भक्तितः।
पूजैव मन्तरिक्षस्य मास्याषाढे विधीयते।
दक्षिणा तत्र दातव्या तथा वासोयुगं द्विजः॥
दिवः पूजाच कर्त्तव्या श्रावणे प्रागवद्देव तु।
छत्त्रञ्चोपानहं युग्मं दक्षिणां तत्र दापयेत्॥
एवं मासत्रयेणेह पारणं प्रथमं भवेत्।
मासत्रयेण चान्येन ततोमासत्रये पुनः॥
ततोमासत्रयेचान्यदेवमन्यन्नचानघ।
विज्ञेयं नित्यधर्म्मस्य पारणानां चतुष्टयम्॥
प्रथमपारणन्यायेनैव देवतापूजनं।
दक्षिणादानादिना सर्व्वपारणसमापनम्॥

प्रथमं पारणं कृत्वा वह्निष्टोमफलं लभेत्।
अतिरात्रफलं राजन् द्वितीयपारणे तथा॥
तृतीये पारणे विश्वं वाजपेयफलं लभेत्।
चतुर्थे पारणे प्रोक्तं राजसूयस्य यत्फलं॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना।
हंसयुक्तेन दिव्येन* वीणामुरजवादिना॥
वराप्सरोगणाढ्येन कामगेनापि चारुणा।
यथेष्टकामो भवति बहुकालमसंशयम्॥
मानुष्यजन्म चासाद्य त्रीणि शुक्लान्यवाप्नुयात्।

शुक्लानि परिशुद्धानि।

विद्या जन्म तथा कर्म्म नात्र कार्य्या विचारणा॥

त्रिविक्रमस्याप्रतिमस्य तस्य
चराचरेशस्य पदत्रये तु।
यः पूजयेत्तस्य भवन्ति कामाः
सर्व्वे समृद्धिर्नहि संशयोऽत्र॥

इति विष्णुधर्म्मोत्तरोक्तं त्रिविक्रमव्रतम्।१२

मार्कण्डेयउवाच।

ज्यैष्ठे शुक्लतृतीयायां निराहारोनरः शुचिः।
त्रिमूर्त्तिपूजनं कृत्वा तृतीयायां यथाविधि॥

* देवरामागणाढ्येनेति पुस्तकान्तरे पाठः।

त्रिमूर्त्तिपूजनं तिसृणां मूर्त्तीनां वायु-सूर्य्य--चन्द्रमसां पूजनम्।

कूपनद्यतडागाद्यैर्मिश्रैः प्रातःशुचिर्जलैः।
प्रत्यूषे पूजयेद्वायुमनुलिप्ते शुभस्थले॥
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा।
होमं कुर्य्याद्यवैर्मुख्यैर्वस्त्रं दद्या द्विजातये॥
मध्याह्ने पूजयेद्वह्नौ तथा सूर्य्यमतन्द्रितः।
तिलांश्च जुहुयाद्वह्नौ दद्याद्विप्रेषु काञ्चनम्॥
सूर्य्यास्तमनवेलायां जले चन्द्रञ्च पूजयेत्।
जले चन्द्रमसमभिध्याय पूजयेदितियावत्।
वह्नावभिध्याय मध्याह्ने सूर्य्यं प्रपूजयेदिति यावत्।
घृतेन होमं कुर्व्वीत रजतं दक्षिणा स्मृतम्।
नक्तं भुञ्जीत धर्म्मज्ञः तैलहीनं ततो नरः॥
पूर्णं सम्वत्सरं कृत्वा व्रतमेतदतन्द्रितः।
स्वर्गलोकमवाप्नोति सहस्रं परिवत्सरं॥
मानुष्यमासाद्य ततोराजा भवति भूतले॥
व्रतं कृत्वा महाभाग पूर्णं सम्वत्सरत्रयम्।
पञ्चवर्षसहस्राणि स्वर्गलोके महीयते॥
मानुष्यमासाद्य ततोराजा भवति भूतले।
विरोगो दर्शनीयश्च सुभगोधनवान्नरः॥
कृत्वा द्वादशवर्षाणि व्रतमेतदनुत्तमम्।
व्रतावसाने विप्राणां सहस्रम्भोजयेत्ततः॥
भोज्यं त्रिमधुरप्रायं दद्याद्भक्त्या च दक्षिणाम्।

ततः स्वर्गमवाप्नोति वर्षाणाञ्च द्वयायुतम् ॥
ततो मानुष्यमासाद्य राजा भवति धार्म्मिकः ।
प्रदीप्तचक्रोधनवान् धर्म्मराजोजनप्रियः ॥

इति विष्णुधर्म्मोत्तरोक्तं राज्यव्रतम् ।

——:○:——

रम्भोवाच ।

देवलोके महादेवि गणिकाः सौख्यसंयुताः ।
मर्त्यलोके तथा सर्व्वाः स्त्रियः सौभाग्यवर्जिताः ॥
कथं भाग्यञ्च भोगांश्च लभन्ते परमेश्वरि ।
जन्मजन्मनि सौभाग्यं यथा भवति पार्व्वति ।
तथा मे सर्व्वमाख्याहि कारुण्याद्भक्तवत्सले ॥
उपवासे व्रतेचैव तथा नियमएव च ।
एतत्सर्वं यथान्यायं ब्रूहि मे परमेश्वरि ॥

पार्व्वत्युवाच ।

शृणु भद्रे परं गुह्यं सर्व्वकामफलप्रदं ।
दुर्भगानाञ्च नारीणां सौभाग्यकरणं परम् ॥
लक्षेश्वरीति विख्यातं ततः कोटीश्वरीव्रतम् ।
तृतीया शुक्लपक्षे तु मासि भाद्रपदे भवेत् ॥
तस्यां व्रतं तु संग्राह्यं यावद्वर्षचतुष्टयम् ।
उपवासेन कर्त्तव्यं वर्षे वर्षे तु सुन्दरि ॥
अखण्डानां तण्डुलानां तिलानां वा सुलोचने ।
लक्षमेकं विरच्याथ क्षिपेत् पयसि शोभने ॥

क्षीरसंमिश्रितैः कार्य्या देव्यामूर्त्तिः सुलोचना।
कृत्वा तु पुष्पप्राकारं पुष्पमालाभिमण्डितम्॥
संस्थाप्य पार्व्वतीं देवीं पूजयेद्भक्तिभावितः।
पूजयेद्विविधैः पुष्पैः कुङ्कुमागुरुचन्दनैः॥
गन्धैर्धूपैश्च नैवेद्यैः फलैश्च विविधैस्तथा।
वस्त्रेण चतुरेणैव पूजयेत्परमेश्वरीं॥
नमोनमस्ते देवेशि लक्षेश्वरि नमोस्तु ते।
कोटीश्वरि नमस्तुभ्यं नमस्तेहरवल्लभे॥
उमादेवि नमस्तुभ्यं कात्यायनि नमोस्तु ते।
नमः कालि महाकालि शिवदुर्गे नमोस्तु ते॥
नमः सर्व्वाणि रुद्राणि अपर्णे शङ्करप्रिये।
सर्व्वभूतहिते देवि त्राहि संसारसागरात्॥

पूजामन्त्रः।

नमो लक्षेश्वरी देवि कोटीश्वरि नमोस्तु ते।
गृहाणार्घ्यं मया दत्तं शङ्करेण समं मम॥

अर्घ मन्त्रः।

पुरा व्रतमिदं भद्रे इन्द्राण्या च कृतं शुभम्।
सन्ध्यावल्या च साविच्या अरुन्धत्या कृतं पुरा॥
दमयन्त्या च रोहिण्या कृतं व्रतवरं शुभे॥
गौरिणीर्भोजयेद्भक्त्या इज्यान्ते च सुदीक्षिताः।

गौरिणीः, सुवासिनीः।

एवंविधविधानेन करोति नियता व्रतम्।

ततोऽस्याः स्याच्च दारिद्र्यं नच इष्टवियोजनम्॥
अष्टपुत्रा भवेन्नारी भर्त्तारञ्च गुणाधिकम्।
सुरूपं गुणिनं कान्तं पण्डितं प्रियदर्शनम्।
ईश्वरं चैव राजानं भवेद्दीर्घायुषं प्रियम्॥

भवेत्, प्राप्नुयात्।

दातारञ्चैव भोक्तारं समस्तजनवल्लभम्।
सुशीलं धार्म्मिकं शूरं चन्द्रवत्प्रियदर्शनम्॥
सुरूपा सुभगा साध्वी भर्तृराज्यप्रदर्शिनी।
धर्म्मशीला सुचरिता वाचयामृतभाषिणी॥
दयाप्रदा च सर्व्वस्य सौभाग्यमतुलं भवेत्।
सह पत्या वरारोहा कुरुते राज्यमुत्तमम्॥
अन्तकाले समं तेन मोदते त्रिदिवे तथा।
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च॥
इदं कृत्वा पुरेन्द्राणीन्द्रं लेभे पतिमुत्तमम्।
रोहिणी पतिमालेभे चन्द्रव्रतनिषेवणात्।
रण्या देवी सुभर्त्तारमादित्यं प्राप्य सत्पतिम्॥
इदन्ते कथितं भद्रे व्रतं कोटीश्वरञ्चर।
लक्षेश्वरीतिविख्यातं कुरु रम्भे मनोहरं॥

इति स्कन्दपुराणोक्तं कोटीश्वरीव्रतम्॥५

—:०:—

पुलस्त्यउवाच।

अन्यामपि प्रवक्ष्यामि तृतीयां पापनाशनीम्।

रसकल्याणिनीमेतां पुराकल्पविदोविदुः।
माघमासे तु संप्राप्य तृतीयां शुक्लपक्षतः॥
प्रातर्गव्येन पयसा तिलैः स्नानं समाचरेत्।
स्नापयेन्मधुना देवीं तथैवेक्षुरसेन च॥
गन्धोदकेन च पुनः पूजनं कुङ्कुमेन वै।
दक्षिणाङ्गानि संपूज्य ततो वामानि पूजयेत्॥
ललितायैनमो देव्याःपादौ गुल्फं ततोऽर्चयेत्।
जङ्घाजानु तथाशान्त्यै तथैवोरुं श्रियै नमः॥
मदालसायै तु कटिं मङ्गलायै तथोदरम्।
स्तनं मदनवासिन्यै कुमुदायै च कन्धरं॥
भुजं भुजाग्रं माधव्यै कमलायै मुखस्मिते।
भ्रूललाटञ्च रुद्राण्यै शङ्करायै तथालकान्॥
मुकुटं विन्ध्यवासिन्यै पुनः कान्त्यै तथालकान्।
मदनायै ललाटन्तु मोहनायै पुनर्भ्रुवम्॥
नेत्रे चन्द्रार्द्धधारिण्यै तुष्ट्यै च वदनं-पुनः।
उत्कण्ठिन्यै नमः कण्ठमभयायै नमः स्तनम्॥
रम्भायै वामबाहुञ्च विशोकायै नमः करम्।
हृदयं मदनगामिन्यै पाटलायै तथोदरम्॥
कटिं सुरतवासिन्यै तथोरू चम्पकश्रियै।
जानुजङ्घे नमो गौर्य्यै गुल्फं गायत्रिकै नमः॥
धराधरायै पादन्तु विशोकायै नमः शिरः।
नमो भवान्यै कामिन्यै कामदेव्यै जगत्श्रियै॥
आनन्दायै सुनन्दायै सुभद्रायै नमोनमः।

एवं संपूज्य विधिवत् द्विजदम्पत्यमर्च्चयेत् ॥
भोजयित्वान्नपानेन मधुरेण विमत्सरः।
सलड्डुकं वारिकुम्भं शुक्लाम्बरयुगद्वयम् ॥
दत्त्वा सुवर्णकमलं गन्धमाल्यैरथार्च्चयेत्।
प्रीयतामत्र कुमुदा गृह्णीयाल्लवणव्रतम् ॥

कुमुदाप्रीयतमितिमन्त्रेण कुम्भत्रयं सुवर्णकमलं दत्त्वा मासं लवणं न भक्षयामीति व्रतं गृह्णीयात्।

अनेन विधिना देवीं मासि मासि सदार्च्चयेत्।
लवणं वर्जयेन्माघे फाल्गुने च गुडं पुनः ॥
तवराजं तथा चैत्रे वर्ज्यञ्च मधु माधवे।
पानकं ज्यैष्ठमासे तु तथाषाढे च जीरकम् ॥
श्रावणे वर्ज्जयेत् क्षीरं दधि भाद्रपदे तथा।
घृतमाश्वयुजे तद्वदूर्ज्जे वर्ज्याथ मज्जिका ॥

'ऊर्ज्जे', कार्त्तिके। 'मज्जिका, रसाला। लोके शिखरिणीतिप्रसिद्धा।

धान्यकं मार्गशीर्षे तु पौषे वर्ज्याथ शर्करा।
व्रतान्ते करकं पूर्णमेतेषां मासि मासि च।
दद्याद्दिकालवेलायां भक्ष्यपात्रेण संयुतं ॥

व्रतान्ते करकमित्यादि। एतेषां लवणगुडादीनां मध्ये यस्मिन्मासे यत्त्यक्तं तन्मासव्रतान्ते तेन लवणादिना पूर्णं करकं वक्ष्यमाणलड्डुकादि भक्ष्यपात्रयुक्तं दद्यादित्यर्थः ॥

लड्डुकान् श्वेतवर्त्तींश्च संयावमथपूरिकाः।
पारिकाघृतपूराश्च पिष्टापूपांश्च मण्डकान् ॥

क्षीरशाकञ्च दध्यन्नं* इन्दुर्थौशोकवर्त्तिकं।
माघादिक्रमशो †दद्यादेतानि करकोपरि॥
कुमुदा माधवी गौरी रम्भा भद्रा जया शिवा।
उमा रतिः सती तद्वन्मङ्गला रतिलालसा॥
क्रमान्माघादिसर्व्वत्र प्रीयतामिति कीर्त्तयेत्।
सर्व्वत्र पञ्चगव्यन्तु प्राशनं समुदाहृतम्॥
उपवासी भवेन्नित्यमशक्तो नक्तमिष्यते।
पुनर्म्माघे तु सम्प्राप्ते शर्करा करकोपरि॥
कृत्वा तु काञ्चनीं गौरीं पञ्चरत्नसमन्विताम्।
हैमीयाङ्गुष्ठमात्राञ्च साक्षसूत्रकमण्डलम्॥
चतुर्भुजामिन्दुयुतां सितनेत्रपटावृताम्।
तद्वद्गोमिथुनं शुक्लं सुवर्णाढ्यं सिताम्बरम्॥
सवस्त्रं भोजनं दद्याद्भवानी प्रीयतामिति।
अनेन विधिना यस्तु रसकल्याणिनीव्रतम्।
कुर्य्यात् स सर्व्वपापेभ्यस्तत्क्षणादेव मुच्यते॥
भवार्व्वुदसहस्रन्तु न दुःखीजायते क्वचित्।
अग्निष्टोमसहस्रेण यत्फलं तदवाप्नुयात्॥
नारी वा कुरुते या तु कुमारी वा वरानने।
विधवा च वराकी वा सापि तत्फलभागिनी।
सौभाग्यारोग्यसम्पन्ना गौरीलोके महीयते॥
इति पठति य इत्थं यः शृणोति प्रसङ्गात्।

---

* धारिका इति पुस्तकान्तरे पाठः।

† चीराग्रमथ फेणिका इति पुस्तकान्तरे पाठः।

सकलकलुषमुक्तः पार्व्वती लोकमेति।
मतिमपि च जनानां योददाति व्रतार्थं॥
विपुलगतिजनानां नायकः स्यादमोघः।

इति पद्मपुराणोक्तं रसकल्याणिनीव्रतम्॥१०

—:○:—

सनत्कुमार उवाच।

तृतीयायां महाभाग कर्त्तव्यञ्च व्रतं शृणु।
येनानन्तभवारब्धमेनः क्षपयति द्विजः॥
ग्रहपीडादिकैरन्यैरुपसर्गैः प्रपीड़ितः।
अस्यां शान्तिं प्रकुर्व्वीत यतवाक्कायमानसः॥
स्थण्डिलं * रचयित्वा तु नरोवीजप्रसूनकैः।
चक्राब्जं मण्डलं कुर्य्यादखिन्नसिततण्डुलैः॥
तत्र चावाहयेद्देवं नरसिंहाकृति विभुं।
प्रसन्नमधुरोदारवीक्षणक्षपितार्त्तिकं।
अशेषभयविध्वंसचतुरं पुरुषं हरिम्।
अभयं भयतप्तानां ददतां ददतांवरम्॥
प्रपन्नार्त्तिमुषां तत्र प्रसादपरमेण च †।
वदनेन च सुस्रोणि नयनेन विराजितम्॥
विपक्षपक्षविक्षोदचतुरानन्तवाहुकम्।
विद्युन्मालावृतोत्तुङ्गरजताद्रिमिवापरम्॥
किरीटहारकेयूरवनमालाविभूषितम्।

---

* मण्डलञ्चेति पुस्तकान्तरे पाठः।

† प्रयतानिमुखा इति पुस्तकान्तरे पाठः।

शङ्खचक्र गदा शार्ङ्गनन्दनाद्यैरलङ्कृतम्॥
जातिप्रसूनकैश्चित्रैः* सिताम्भोजैरखण्डितैः।
अच्युतैर्मल्लिकाद्यैश्च नन्द्यावर्त्तप्रसूनकैः॥
अक्षतैर्बिल्वपत्रैश्च तत्फलैश्च तदङ्कुरैः।
तिलैः सतण्डुलैः सिद्धैः तुलसीश्रीलताङ्कुरैः॥
नीलोत्पलैः कुवलयैः कुमुदैश्च सकेसरैः।
काश्मीरचन्दनक्षोदकर्पूरागुरुमिश्रितैः॥

चित्रैः अपूर्वगन्धैश्च अखण्डितैः संवृतैः, अक्षतैरनुपहतैः, नन्द्यावर्त्तन्तगरम्, अक्षतैरपृथक्कृतैः, सिद्धैः साधितैः,श्रीलतापद्मिनी, कुवलयैरुत्पलैः, केसरं वकुलम्। काश्मीरं केसरं क्षोदश्चूर्णं।

पयसा पायसान्नेन गुडत्रैर्मधुरोल्वणैः।
आद्यगीतिपदैश्चारुनृत्यवाद्यप्रदर्शनैः।
प्रदक्षिणं नमस्कारस्तोत्राद्यैर्भक्तिभावितैः॥
सम्यगभ्यर्च्य देवेशं विधिदृष्टेन कर्म्मणा।
नानौषधिसमायुक्तं नानातीर्थोदकान्वितम्॥
नानारससमायुक्तं नानाकुसुमसंश्रितम्।
नानाबीजोपरिच्छिन्नं नानावस्त्रसमन्वितम्॥
नानाकूर्चयुतं पूर्णकुम्भं संस्थापयेत् पुरः।
तस्मिन्नावाहयेद्देवं सुदर्शनमनन्यधीः।
पूर्वोक्तेनैव मार्गेण सम्यगभ्यर्च्य शक्तितः॥
पूर्व्वादिक्रमयोगेन संस्थाप्य चतुरो घटान्।
कोणेषु च तथा तेषु क्रमादेतांश्च संस्मरेत्॥

* चित्रैरिति पुस्तकान्तरे पाठः।

तेषु अष्टकुण्डेषु, तान् नन्दकादीन् ।

नन्दकं मुषलं पद्मं गदा शार्ङ्गञ्च शङ्खकम् ।
पाशश्च शक्तिरित्येते तद्वाह्येऽपि तथैव च ॥
लोकपालप्रतिष्ठानं कृत्वा सर्व्वंत्र पूजयेत् ।
तथा च मध्यमे कुम्भे तथान्येष्वप्यलंकृतम् ॥
एवं समाप्य विधिवत् पूजां तत्र विचक्षणः ।
जपेद्दशसहस्रञ्च सुदर्शनमनन्यधीः ॥
जपेत्सहस्रमन्यत्र प्रतिकुम्भं विचक्षणः ।
अथ कुण्डप्रतिष्ठानमग्न्याधानं यथाविधि ॥
विधाय संस्कृते चाग्नौ जुहुयात्सर्व्वशान्तये ।
त्रिमध्वक्तैस्तिलैः शुद्धैराज्येन पयसापि च ॥
श्रीलताकुसुमापाणिविल्वपत्रप्रसूनकैः ।
दूर्व्वाङ्कुरैस्त्रिमध्वक्तैः वीजतण्डुलसर्षपैः ॥
आयुःकामस्तु दर्व्वाभिः श्रीकामो विल्वसम्भवैः ।
सौभाग्यकामो लक्ष्मीवान् श्रीलतापर्णसूनकैः ॥

'लक्ष्मीवान्, लक्ष्मीकामः ।

आरोग्यकामः पयसा गव्याज्येन तथा तिलैः ॥
पुष्टिकामस्त्वपामार्गैरपमृत्युर्गुडूचिभिः ।

अपमृत्युः अपमृत्युयुक्तः ।

पद्मैश्चाव्याहता लक्ष्मीः पुष्टिश्च कुमुदैरपि ।
जातिपुष्पैर्धरालाभो नन्द्यावर्त्तप्रसूनकैः ॥
एकपत्रैः सितैः पद्मैरधिराजं समृच्छति ॥
रजतं मल्लिकाद्यैश्च सुवर्णंचम्पकोद्भवैः ।

बीजानतण्डुलाद्यैश्च तत्तल्लाभो भविष्यति॥
एतेष्वन्यतमैर्द्दृष्टैर्य्यं कामयते वरं।
दशसाहस्रयोगेन तत्तं विन्दत्यसंशयम्॥
होमाच्च द्विगुणं प्राहुस्तर्पणं मन्त्रनिश्चयः।
तस्य तद्द्विगुणं प्राहुर्जपएष विधिक्रमः॥
नियोगारम्भसमये नियमान् प्रतिपालयेत्।
त्रयं वाहरहः कुर्व्वन् नक्तकालं समापयेत्॥

नियोगा मण्डले खनयः, नियमान्मौनादीन्।

त्रयच्चाहरहः पूर्व्वं नक्तकालान् समापयेत्।

त्रयं होम तर्प्पण जपान्।

अहरहः प्रतिदिनं संख्या च सङ्कल्पित होमसंख्या निक्षेपापेक्षया।

हविष्याशी जितक्रोधो यतवाक्कायमानसः।
नित्यं त्रिःसवणं स्नायात्सदाचाररतोमुनिः॥
नचानृतकथोनग्नि र्ब्रह्मचारी जितश्रमः।
गौरी विमत्सरी नित्यं स्वाध्यायनिरतः शुचिः।
अनश्नन् वाथशाकाशी फलस्य गुरुलाघवम्॥
मत्वाददीत नियमानासमाप्तिः प्रयत्नतः।

'नियमान्, हविष्यान्नाशनं। शाकाशनमनशनं च।

तथा संख्या समुत्कर्षः फलगौरवहेतुकः॥
अयुतञ्च वरं वाहु स्तद्दृद्धिस्तत्फलानुगा।
कृत्वैवं सम्यगाचार्य्यं समानीय च साधकम्।
मध्यमं कुम्भमादाय स्नापयेद्देवसन्निधौ॥

'साधकं, यजमानं ।

सुदीपित महाज्वालाविदीपितदिगन्तरम्* ।

त्रायस्वचैनमापद्भ्यो भद्रं प्रदिशते नमः ॥

अन्यैरपि यथा योगं कुर्य्यात्तस्याभिषेचनम् ।

तत्तन्मन्त्रेण वाचार्य्यस्तत्समच्चं महामतिः ॥

ॐ दैतेयनिकराभोग शैलनिर्भेददीचितः ।

पद्मशङ्खमनोनन्द चाद्येनमपि नन्दक ॥

ॐ विपच्चकायमथनतच्छिरोलुलितानन ।

कमलाकान्तदयितपाह्येनं मुषलायुध ॥

विश्वोद्भवभयत्राणलीलस्य परमात्मनः ।

लीलारविन्दसुभग पाह्येनमपि पङ्कजः ॥

कौमोदकीगदा सा वै देवी दिशतु मङ्गलम् ।

या मुकुन्दकराम्भोजविलसद्भूषणायते ॥

ॐ स्वविष्फारहृताशेषरचोदनुजजीवितम् ।

येनासौ रचतादेनं विष्णोःशार्ङ्गं धनुर्व्वर ॥

दैत्यसीमन्तिनीगर्भनिर्भेदचतुरस्वन ।

स्रवदव्यक्तरक्ताजमधुपूर्णमुख स्वराट् ॥

दैत्यरचोधिपप्राणवसारुधिरभोजन ।

एनं सर्व्वत्र रचन्तु शार्ङ्गपाणेःशरोत्कराः ॥

अरातिहेतिप्रमुखशक्त्योजःचपणचमा ।

आपद्भ्यःरचतादेनं शक्तिः श्रीःसवरायुध ॥

एवं स्नात्वा हतैर्व्वस्त्रै र्भूषणाद्यैरलङ्कृतं ।

*सुदर्शनमहाज्वालविदीपितदिगन्तरमिति पुस्तकान्तरे पाठः ।

नीराजनविधिर्दद्योद्दद्यात् द्विप्राय दक्षिणाम् ॥
गुरवे च वरं दत्त्वा बन्धुभ्यो दक्षिणादिकम् ।
अन्यथापि तदार्थिभ्यो दद्याद्भूरि यथोदयम् ॥
द्विजमध्यमथानीय तैः स्नातोमङ्गलाकृतिः ।
तिलचन्दनलाजाअक्षतसर्षपचन्दनैः ॥
ब्राह्मणैः स्वस्तिमावाच्यमाशीरपिच कारयेत् * ।
कूर्चोदकेन चाचार्य्यः कुर्य्याद्भद्रवचः कृती ॥
ॐ आयुश्च विपुलं देव श्रियञ्च विपुलां भुवि ।
अक्षय्यमपि चारोग्यं मनःशान्तिमथाक्षयां ॥
विद्यामानकुलवृद्धिरोगाद्यैरप्यनाहतम् ।
विद्याधिकं तथात्यर्थं श्रीशो दिशतु मङ्गलम् ॥
स्वस्तिचास्तु शिवं चास्तु भद्रमस्तु सदा तव ।
आपद्भ्यश्च भयेभ्यश्च रक्षन्तु त्वां श्रियःपतिः ॥
इति रक्षाविधिं कृत्वा लोकपालबलिं क्षिपेत् ।
पूर्व्वंच तन्दुलैः कार्य्यः कृशरान्नेन दक्षिणा ॥
पश्चिमे पायसेनैव शुद्धान्नेन तथोदरे ।
कोणेषु शक्तिभिः कुर्य्यात् गुड़मिश्रैस्ततोबहिः ॥
सर्व्वार्थंच बलिन्दद्यात् सर्वैर्द्रव्यैर्महामतिः ।
इति शान्तिव्रतं प्रोक्तं तृतीयायां महामते ॥
सर्व्वदुःखप्रशमनं सर्व्वरोगविनाशनम् ।
सर्व्वसौख्यप्रदं स्त्रीणामन्नकामफलप्रदम् ।
सर्व्वार्त्तिशमनं धन्यं सर्व्वपापप्रणाशनम् ॥

---

* ब्राह्मणैः स्वस्ति वचनभाशीर्भिरपि कारयेदिति पुस्तकान्तरे पाठः ।

यस्त्वेतत् कुरुते मर्त्त्यः श्रद्धाभक्तिसमन्वितः।
स सर्व्वार्त्तिविनिर्मुक्तो शान्तिमाप्नोति नैष्ठिकीम्॥
दुःस्वप्ने वामयग्रासे उग्रपीडाद्युपद्रवे।
विषाद्युपनिपाते च पुत्रनाशधनक्षये॥
राज्यनाशे जनक्षोभे दुर्भिक्षे शत्रुपीडने।
ज्वरादिरोगार्त्तिघोरप्लीहकुष्ठभगन्दरैः॥
क्षयापस्मरणाद्यैश्च तीव्रदुःखचये सति।
स्नानमेतत् प्रकुर्व्वीत प्रज्ञासारस्तु पूरुषः॥
मुक्तावारक्तपुरुषः प्रज्ञावाञ्छास्त्रसम्मतः।
अत्युपद्रवसाहस्रमतीत्यसुखमेधते॥

इति गरुडपुराणोक्तं शान्तिव्रतम्।१०

——०*०——

पुलस्त्य उवाच।

तथैवान्यां प्रवक्ष्यामि तृतीयां पापनाशिनीं।
लोके तु नाम्ना विख्यातां, सान्द्रानन्दकरीमिमाम्॥
यदा शुक्लतृतीयायामाषाढ़र्क्षं भवेत क्वचित्।
ब्राह्मर्क्षं वाथ वाप्यं वा हस्तो मूलमथापि वा॥
आषाढर्क्षं उत्तराषाढा, ब्राह्मर्क्षं, अभिजित्।
'आप्यं',पूर्व्वाषाढा।
दर्भगन्धोदकैः स्नानं तदा सम्यक् समाचरेत्।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः॥

भवानीमर्च्चयेद्भक्त्या शुक्लपुष्पैःसुगन्धिभिः।
भवेन सहितां राजन् उपविष्टाम्बरासने *॥
वासुदेव्यै नमः पादौ शङ्कराय ततोहरम्।
जङ्घे शोकविनाशिन्यै आनन्दाय नमः प्रभो॥
रम्भायै पूजयेदूरू शिवाय च पिनाकिने।
आनन्दिन्यै कटिं देव्याः शूलिने शूलपाणये॥
माधव्यै च तथा नाभिं तथा शम्भोर्भवाय च।
स्तनावानन्दकारिण्यै शङ्करायेन्दुधारिणे॥
उत्कण्ठिन्यै नमः कण्ठं नीलकण्ठाय वै हरम्।
करावुत्पलधारिण्यै रुद्राय यजतां पतौ॥
बाहुञ्च परिरम्भिण्यै नृत्यशीलाय वै हरम्।
देव्या मुखं विनाशिन्यै वृषेशाय पुनर्व्विभो॥
स्मितञ्च स्मरशीलायै विश्ववक्त्राय तत्परे।
नेत्रे दमनवासिन्यै विश्वधात्रे त्रिशूलिने॥
भ्रुवौ नेत्रप्रियायै च ताण्डवेशाय वै विभो।
देव्या ललाटमिन्द्राण्यै हव्यवाहाय वै विभो॥
स्वाहायै मुकुटन्देव्याः शम्भोर्गङ्गाधराय वै।
विश्वकायौ विश्वमुखौ विश्वपादकरौ शिवौ॥
प्रसन्नवदनौ वन्दे पार्व्वतीपरमेश्वरौ।
एवं संपूज्य विधिवदग्रतः शिवयोः पुनः॥
पद्मोत्पलानि रजसा नानावर्णानि वा लिखेत्।
शङ्खं चक्रं स्वस्तिकञ्च तथा चैवार्द्धनाणकम्।

---

* उपविष्टां वरानने इति पुस्तकान्तरे पाठः।

यावन्तः पांशवस्तत्र रजसः पतिता भुवि ॥
तावद्वर्षसहस्राणि शिवलोके महीयते ।
चत्वारि घृतपात्राणि सहिरण्यानि भक्तितः ॥
दद्याद्द्विजाय करकमुदकेन समन्वितं ।
प्रतिपक्षं चतुर्मासं यावदेतान्निवेदयेत् ॥
ततस्तु चतुरो मासान् पूर्व्ववत् करकोपरि ।
चत्वारिंशत्तु पात्राणि तिलपात्राणि तत्परम् ॥
पूर्व्ववत्सहिरण्यानि करकोपरिधाय दद्यात् ।
गन्धोदकं पुष्पवारि चन्दनं कुङ्कुमोदकं ।
अपक्वं दधि दुग्धं वा गोशृङ्गोदकमेव च ॥
पिष्टोदकं तथा वारि कुष्ठचूर्णान्वितं पुनः ।
उशीरसलिलं तद्वत् यववल्गुदकं तथा ॥
तिलोदकञ्च सम्प्राश्य स्नपेन्मार्गशिरादिषु ।
मासेषु पक्षद्वितये प्राशनं समुदाहृतम् ॥
सर्व्वत्र शुक्लपुष्पाणि प्रशस्तानि शिवार्च्चने ।
दानकालेषु सर्व्वेषु मन्त्रमेतमुदीरयेत् ॥
गौरी मे प्रीयतां नित्यमनघा सर्व्वमङ्गला ।
सौभाग्याय सुललिता भवानी सर्व्वसिद्धये ॥
सम्वत्सरान्ते लवणं गुड़कुम्भसमन्वितम् ।
चन्दनं नेत्रपट्टञ्च* सहिरण्याम्बुजं तथा ॥
उमामहेश्वरं हैमं तद्वदिक्षुफलैर्युतम् ।
सुशुक्लामास्तृतां शय्यां सोपधानां निवेदयेत् ॥

---

* नेत्रपदर्ष्वेति पुस्तकान्तरे पाठः ।

सपत्नीकाय विप्राय गौरी मे प्रीयतामिति।
आर्द्रानन्दकरी नाम तृतीयैषा सनातनी॥
यामुपोष्य नरोयाति शम्भोस्तत्परमं पदम्।
इह लोके सदानन्दं प्राप्नोति च न संशयः॥
आयुरारोग्यसम्पन्नो न क्वचित् शोकमाप्नुयात्।
नारी वा कुरुते या तु कुमारी विधवा तथा।
सापि तत्फलमाप्नोति प्रसादाच्छूलपाणिनः॥
प्रतिपत्तमुपोष्यैवं मन्त्रार्च्चनविधानतः।
रुद्राणीलोकमाप्नोति पुनरावृत्तिदुर्लभम्॥
य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः।
रुद्राणीलोकमाप्नोति पुनरावृत्तिदुर्लभं॥
य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः।
शक्रलोकैः सगन्धर्वैः पूज्यतेऽब्दायुतावधि॥
आनन्ददां सकलदुःखहरां तृतीयां
या स्त्री करोति विधवा सधवाथवा वा।
सा स्वे गृहे सुखसुखान्यनुभूय भूयो
गौरीपुरं सदयिता मुदिता प्रयाति॥

इति पद्मपुराणोक्तमार्द्रादानव्रतम्।

——oo——

सुमन्तुरुवाच।

पतिव्रता पतिप्राणा पतिशुश्रूषणे रता।

एवंविधा प्रियायुक्ता शुचिसम्भोजना सती ॥
सोपवासा तृतीयायां लवणं परिवर्ज्जयेत् ॥

सोपवासेति व्रतारम्भे द्वितीयायां कृतोपवासा तृतीयायां लवणं परिवर्ज्जयेत्।

सा वै गृह्णातु वै भक्त्या व्रतमामरणान्तिकम्।
गौरी ददाति सन्तुष्टा रूपसौभाग्यमेवच ॥
लावण्यलवणं हृद्यं श्लाघ्यं पुंसां मनोनुगन्।
पुंसां मनोरमा नारी भर्त्ता भार्य्यामनोरमः ॥
गौरीव्रतेन लभते राजन् लवणवर्ज्जनात्।
उमया च पुरा प्रोक्तं यद्वा तच्च निवोधत ॥
इतिव्रतं प्रतिविभो धर्म्मराजस्य शृण्वतः।
मयानन्तमिदं सृष्टं सौभाग्यकरणं नृणाम् ॥
मर्त्त्ये तु नियता नारी व्रतमेतच्चरिष्यति।
सह मोदिष्यते भर्त्रा यावद्भर्त्ता हरोमम ॥
या वै कल्याणभर्त्तारं विन्दते शोभना सती।
सात्विदं व्रतमुद्दिश्य भवेदच्चारभोजना ॥
मच्चित्ता मन्मना कुर्य्यान्मदभ्क्त्ता मत्परिग्रहा।
गौरीं संस्थाप्य सौवर्णीं गन्धालङ्कारभूषिताम् ॥
वस्त्रैः सुसूक्ष्मैः सम्वीतां पुष्पमण्डनमण्डिताम्।
लवणामृतं गुडं तैलं देव्याः शुक्ले निवेदयेत् ॥
कटुखण्डं जीरकञ्च शङ्कं पनञ्च भारत।

शुक्ले पक्षे इति शेषः।

'कटुखण्डं, आर्द्रकम्।

गुडपूपास्तथा पूपाः खण्डवेष्टास्तथा नृप।
ब्राह्मणे वेदसम्पन्ने प्रदेयाः सुवरूश्रुते॥
शुक्ले शुक्ले सदा देया यथा शक्त्या हिरण्मयी।
धनहीनैस्तु शक्त्या वै मधुक्षीरमयी नृप॥
अक्षारलवणं रात्रौ भुङ्क्ते वीर सुवाग्यता।
गौरी सन्निहिता नित्यं भूमौ संस्तरशायिनी॥
भर्त्तारं लभते कन्या या वाञ्छति मनोनुगम्।
सुचिरं सह भर्त्रा वै क्रीडयित्वा स हैव सा॥
सन्ततिञ्च प्रतिष्ठाप्य सह तेनैव गच्छति।
इह लोकान् परे लोके भोगश्चित्तशिखण्डिनाम्॥
विधवा तु महाराज देव्या व्रतपरायणा।
भर्त्तारं नियता नित्यं सदार्चनपरायणा॥
इह वोत्सृज्य देहस्य दत्त्वा हरपुरे प्रियम्।
आकृष्य यमदूतेभ्यः सा भर्त्तारं रमेद्दिवि॥
वर्षकोटिं शतगुणां परीत्वा पुनरागता।
भर्त्रा सहैव पूर्वोक्तं लभते फलमीप्सितम्॥
इत्येषा तिथिरित्येवं तृतीया लोकपूजिता।
सदा विशेषतः पुण्या वैशाखे मासि वा भवेत्॥
पुण्यभाद्रपदे मासि माघस्यैव न संशयः।
माघभाद्रपदे वापि स्त्रीणां धन्यां प्रचक्षते॥
साधारणा तु वै पूर्व्वा सर्व्वलोकस्य भारत।
माघमासे तृतीयायां गुडस्य लवणस्य च॥
दानं श्रेयस्करं राजन् स्त्रीणाञ्च पुरुषस्य च।

गुडेन तुष्यते देवी लवणेन तु शङ्करः ॥
गुडपूपास्तु कर्त्तव्या मासि भाद्रपदे तु या।
तृतीया साच्चया लोके गीर्वाणै रुपशब्द्यते ॥
योऽस्यां ददाति करकान् वारिधारासमन्वितान् ।
स याति पुरुषो वीर लोकान् वै हेतिमालिनः ॥
वारिदानं प्रशस्तं वै मोदकानाञ्च भारत।
वैशाखे मासि राजेन्द्र तृतीया चन्दनस्य च ॥
वारिणा तुष्यते देवी मोदकैर्भवएव हि।
दानात्तु चन्दनस्येह* नरयोनावसम्भवः ॥
यात्वेषा कुरुशार्दूल वैशाखे मासि या तिथिः।
तृतीया साच्चया लोके गीर्वाणैरिह शस्यते ॥
योऽस्यां ददाति करकान् वारिधान्यसमन्वितान् ।
स याति पुरुषो वीर लोकान् वै हेतिमालिनः† ॥
इत्येषा कथिता वीर तृतीया तिथिरुत्तमा।
यामुपोष्य नरो राजन् वृद्धिवृद्धिं श्रियं व्रजेत् ॥

इति भविष्यत्पुराणोक्तं अलवणतृतीयाव्रतम्।

———:○:———

ब्रह्मोवाच।

गौरी काली उमा भद्रा दुर्गा कान्तिः सरस्वती।

---

* वंजनोनावसंशय इति पुस्तकान्तर पाठः। कंपयौनावसम्भवा इति क्वचितपाठः।

† हेममालिन इति पुस्तकान्तरे पाठः।

मङ्गला वैष्णवी लक्ष्मीः शिवा नारायणी क्रमात्॥

मार्गतृतीयामारभ्य पूजयेत् स्वर्गभाक् भवेत्,

मार्गशीर्षतृतीयामारभ्य प्रतिमासमेकैकेन नाम्ना पूजयेदित्यर्थः

अर्द्धनारीश्वरं रुद्रमथवा उमाशङ्करम्।

पूजयेद्विधिवन्नारीमवियोगमवाप्नुहात्।

यथा वा विष्णुरूपेण पूजयेदीश्वरं सदा॥

ईशस्य वामभागस्थां सर्व्वान् कामानवाप्नुयात्॥

अर्द्धनारीश्वरमूर्त्तिमुमामहेश्वरम्

वा सुवर्णादिमयं विधाय वामभागस्थां देवीं गौर्य्यादिभिः पूजयेत्। अथवा विष्णुरूपेण संयुतं ईश्वरमिति। हरिहर मूर्त्तिं कृत्वा वामार्द्धस्यकेशवादिनामभिः प्रत्येकं पूजयेत्। केशव नारायण माधव गोविन्द विष्णु मधुसूदन श्रीधर हृषीकेश पद्मनाभ दामोदराख्यान् देवान् धूपस्रग्दीपाद्यैरुपोष्य पूज्य दक्षिणाभिर्नामभिः। अश्वमेधादिसर्व्वमखानां गोलक्षदानस्यापि नित्यसर्व्वनामस्मरणादभिमतफलमाप्नोति।

इति भविष्यत्पुराणोक्तं नाम तृतीयाव्रतम्।

ब्रह्मोवाच।

तृतीयायान्तु वित्तेशं वित्ताढ्यो जायते ध्रुवम्।

पूजयित्वेति शेषः।

क्रयादिव्यवहारे च लाभोऽद्विगुणो भवेत्।

मूलमन्त्राःस्वनामभिरङ्गमन्त्राश्च कीर्त्तिताः ॥
पूर्व्वतः पद्मपतस्य कर्त्तव्यश्च तिथीश्वरः ।
गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते ॥
पूजाशाठ्येन शाठ्येन कृतापि तु फलप्रदा ।
आज्यधारा समिद्भिश्च दधिक्षीरान्नमाक्षिकैः ।
पूर्वोक्तफलदो होमो भवेच्छान्तेन चेतसा ॥
एतत् व्रतं वैश्वानरप्रतिपद्व्रतवत् व्याख्येयम् ।

इति भविष्यत्पुराणोक्तं कुवेरव्रतम् ।

—ः○ः—

अगस्त्य उवाच ।

अतःपरं महाराज सौभाग्यकरणं व्रतम् ।
शृणु येनाशु सौभाग्यं स्त्रीपुंसामभिजायते ॥
फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षतः ।
उपोषितेन नक्तेन शुचिना सत्यभाषिणा ।
सश्रीकञ्च हरिं पूज्य रुद्रं वा उमया सह ॥

अत्र देवताया इति प्रतिमालक्षणविधानं ततस्तं ब्राह्मणे दद्यादिति वक्ष्यमाणत्वात् । सा च प्राधान्येन सुवर्णमयी प्राप्नोति ।

गम्भीरायेति पादौ तु सुभगायेति वै कटिम् ।
उदरं देवदेवेति श्रीकण्ठेति च वै उरः ।
त्रिलोचनायेति शिरो रुद्रायेति समन्ततः ।
एवमभ्यर्च्य मेधावी विष्णुं लक्ष्मीसमन्वितम् ॥
विष्णु पूजायान्तु वैष्णवमन्त्रप्रयोगः ।

हरं वा गौरीसंयुक्तं गन्धपुष्पादिभिः क्रमात्।
ततस्तस्याग्रतो होमं कारयेन्मधुसर्पिषा॥
तिलैः सह महाराज सौभाग्यपतयेति च।
ततस्त्वक्षारसंयुक्तं निःस्नेहं धरणीतले॥
गोधूमान्नं तु भुञ्जीत कृत्वाप्येवं विधिः स्मृतः।
आषाढादिद्वितीया तु पायसं तत्र भोजयेत्॥
यवान्नन्तु ततः पश्चात् कार्त्तिकादिषु पार्थिव।
श्यामाकान्नं हविर्वापि यथा शक्त्या प्रसन्नधीः॥
ततस्तं ब्राह्मणे दद्यात् पात्रभूते विचक्षणे।
अनङ्गहीने वेदानां पारगे साधुवर्त्तिनि॥
सदाचारयुते दद्यादल्पवित्तेऽपि भूपते।
खड्गैः पात्रैरुपेतश्च ब्राह्मणाय निवेदयेत्॥
एकं मधु घृतं पात्रं द्वितीयं घृतपूरितम्।
तृतीयं तिलतैलस्य चतुर्थं गुडसंयुतम्।
पञ्चमं लवणापर्णं षष्ठं गोक्षीरसंयुतं॥
एतान् दत्त्वा रसान् राजन् सप्तजन्मान्तरे भवेत्।
सुभगो दर्शनीयश्च नारी वा पुरुषोऽपि वा॥

इति श्रीवराह पुराणोक्तं सौभाग्य तृतीयाव्रतम्।

—:○:—

नारद उवाच।

भगवन् श्रोतुमिच्छामि व्रतानामुत्तमं व्रतम्।
सौभाग्यजननञ्चैव अभीष्टफलदायकम्॥

ब्रह्मोवाच।

शृणु विप्र विधानेन तृतीयां प्रहरात्मिकाम्।
या योषितो विधानेन स्वर्गसौभाग्यदा भवेत्॥
माघे शुक्लतृतीयायामुपवासन्तु कारयेत्।
रात्रौ सम्भारमाहृत्य गौरीयागस्य मण्डपे॥
अष्टपत्रं लिखेत्पद्मं मण्डपे मुनिपुङ्गव।
उमामहेश्वरं तत्र पूजयेत्सुसमाहितः॥
पूर्व्वपत्रे न्यसेद्गौरीमाग्नेय्यां ललितां न्यसेत्।
दक्षिणे तु उमानाम नैर्ऋत्ये च स्वधां तथा॥
पश्चिमे वामदेवीन्तु वायव्यां मूलगौरिकां।
उत्तरे तु शुभगान्तु ऐशान्यां गिरिजां तथा॥
उमामहेश्वरं मध्ये गन्धपुष्पैः प्रपूजयेत्।
भृङ्गारञ्चैव संस्थाप्य तण्डुलैः परिपूरयेत्॥

'भृङ्गारः, कलशः।

ततस्तस्याग्रतः कुण्डं हस्तमात्रं समेखलम्।
घण्टां कोणे तु संस्थाप्य चत्वारो वारिसंभृताः॥
घृतेनाज्याहुतीर्हुत्वा तिलहोमन्तु कारयेत्।
आहुतीनां शतं हुत्वा गायत्र्या तु समाहितः॥
अथवा गौरीनाम्ना तु जुहुयात् ब्राह्मणो मुने।
कुण्डस्य चोत्तरे भागे व्रती स्नानं समाचरेत्॥
आग्नेय्यां दिशि संस्थेन घटेन प्रथमे विभो।
यामे वै द्विजशार्दूल ततो होमं समाचरेत्॥

एवं यामानुयामन्तु स्नानं होमन्तु कारयेत्।
प्रभाते विमले जाते सपत्नीकं द्विजोत्तमम्॥
पूजयित्वा विधानेन वस्त्रालङ्कारभूषणैः।
रक्तवस्त्रे गुरोः पत्न्यै गुरवे सितवाससी॥
एवं कृत्वा विधानेन मुने वर्षचतुष्टयम्।
आराधनन्तु देव्याश्च सौभाग्यजननं परम्॥
उद्यापनं ततः कुर्य्यात्तस्मिन्नेव ततोदिने।
उमामहेश्वरं हैमं स्वच्छन्दे मण्डके स्थितम्॥
वस्त्रैर्गन्धैश्च धूपैश्च दीपमालादिभिस्तथा।
भक्ष्यैर्नानाविधैः सम्यक् पूज्य भक्त्या ततो मुने॥
तद्वद्गुरुं सभार्य्यञ्च पूजयेत् द्विजमुत्तमम्।
गाञ्चैव गुरवे दद्यात् वस्त्रालङ्कारसंयुताम्॥
मिथुनानीह चत्वारि भोजयेत्सुसमाहिता।
उमामहेश्वरं हैमं दत्त्वा भक्त्या समापयेत्॥
या चरेद्विधिना सम्यक् सौभाग्यारोग्यभाग्भवेत्।
इह जन्मनि सौभाग्यं मृता शिवपुरं व्रजेत्॥
विधिहीना न कर्त्तव्या तृतीया फलमिच्छता।
व्यर्थः परिश्रमस्तस्य पर्व्वते खननं यथा॥
नारी वा नरशार्दूल नरो वा विधिना मुने *।
फलं यथोक्तं प्राप्नोति सत्यमुक्तं मया द्विजाः॥

---

* विधवाविधया मुने इति पुस्तकान्तरेपाठः।

इति स्कन्दपुराणोक्तं हरतृतीयाव्रतम्।१०

——०*०——

फाल्गुनादितृतीयायां लवणं यस्तु वर्ज्जयेत्।
समान्ते शयनं दद्यात् गृहं सोपस्करान्वितम्॥

'समान्ते, वत्सरान्ते।

संपूज्य विप्रमिथुनं भवानी प्रीयतामिति।
गौरीलोकप्रदं नित्यं सौभाग्यव्रतमुच्यते॥

इति गरुड पुराणोक्तं सौभाग्यव्रतम्*।

——०*०——

कार्त्तिकादि तृतीयायां प्राश्य गोमूत्रयावकम्।
नक्तञ्चरेदब्दमेकं तदन्ते गोप्रदो भवेत्॥
गौरीलोके वसेत् कल्पं ततोराजा भवेदिह।
एतद्भद्राव्रतं नाम सर्व्वकल्याणकारकं॥

इति पद्मपुराणोक्तं भद्राव्रतम्।

——ः०ः——

आलेपनञ्च यः कुर्य्यात् तृतीयायां शिवालये।

'शिवा, पार्व्वती।

समान्ते धेनुदेयाति भवानीव्रतमित्युत॥

---

* इति पद्मपुराणोक्तमिति पुस्तकान्तरे पाठः।

इति पद्मपुराणोक्तं भवानीव्रतम्।

—:०:—

अनग्निपक्कमश्नाति तृतीयायान्तु योनरः।
गान्दत्त्वा शिवमभ्येति पुनरावृत्तिदुर्लभं॥
वृहदानन्दकृत्पुंसां शीलव्रतमिदं स्मृतं।

इति पद्मपुराणोक्तं शीलव्रतम् *।

—:०:—

माघेमास्यथवा चैत्रे गुडधेनुप्रदोभवेत्।
गुडव्रतस्तृतीयायां गौरीलोके महीयते॥
'गुड़व्रतः, गुड़वर्ज्जी।
महाव्रतमिदं नाम परमानन्दकारकं॥

इति पद्मपुराणोक्तं महातृतीयाव्रतम्।

—:०:—

ब्रह्मोवाच।

तृतीयायान्तु शुक्लायां लिखेद्धस्तयुगे शुभे।
रोचनासितकर्पूरैः शिवोमां पूजयेत्ततः॥
हेमरत्नस्रजैर्वस्त्र मन्त्रयुग्ममुदीरयेत्।
समस्तकामफलदं यत्तत् पूर्व्वमुदाहृतं॥
तदेव मन्त्रद्वयं लिख्यते।
नमः समस्तभुवनसर्गस्थित्यन्तकारक।

---

* इति पद्मपुराणोक्तं महाव्रतमिति पुस्तकान्तरे पाठः।

ईशान ध्यानपरम योगिगम्यायते शिव॥
नमः शिवायै विश्वेशशरीरार्द्धापहारिणि।
सत्यं चराचरस्येह जनन्यै कामदायिनि॥
ततोजपार्च्चनं होमं कर्त्तव्यं द्विजसत्तम।
अवियोगाय नारीणां व्रतराजं सदा हितं॥
सहेमपुष्परत्नाढ्यं सवस्त्रं दापयेत्तु तं।
महापुण्यं महाभाग्यं सर्व्वकामप्रदायकं॥
सुतभ्रातृवियोगस्तु नभवेत्तेन भो द्विज।
न व्याधिर्नोपसर्गाश्च यावत्तन्तुरजो भवेत्।
तावत्कालमुमालोके राजते मोदते* चिरं॥

इति श्रीदेवीपुराणोक्तं व्रतराज तृतीयाव्रतम्† ।

——00——

सूत उवाच।

अत्र वः कीर्त्तयिष्यामि इतिहासं पुरातनं।
यद्वृत्तं काशिराजस्य भार्याया द्विजसत्तम॥
काश्यांराजः पुराह्यासीत् ज्जयमेन इति स्मृतः।
तस्य भार्यासहस्रन्तु आसीद्रूपसमन्वितं॥
तथैवान्या प्रिया तेन लब्धा भार्य्या शुशोभना।
सुता मद्राधिराजस्य विश्वकोनस्य धीमतः॥
सा स्वप्नात् प्रातरुत्थाय गत्वा गङ्गातटं शुभम्।

---

* क्रीडते इति पुंस्तकान्तरे पाठः।

† इति व्रतराजव्रतमिति पुस्तकान्तरे पाठः।

पञ्चपिण्डात्मिकां गौरीं कृत्वा कर्द्दमसम्भवाम्॥
यदा तु प्रभया भावो तदात्मानं करोत्यसौ।
पृथिव्यापश्च तेजश्च वायुराकाशमेव च॥
सृष्ट्यर्थं सृजतीत्येषा तत स्तत्पञ्चपिण्डिका।
ततः संपूजयामास मन्त्रैः पञ्चभिरेवच॥
ततो गन्धैः फलैर्म्माल्यै र्धूपैर्वस्त्रैः सुशोभनैः।
नैवेद्यैः परमान्नैश्च गीतैर्नृत्यैः प्रचोदितैः॥
ततो विसृज्य तां देवीं तदुद्देशेन वै ततः।
दत्त्वा दानानि भूरीणि गौरिणीनां द्विजन्मनाम्॥
ततश्च गृहमभ्येत्य भूरिवादित्रनिस्वनैः।
यथा यथा सतीपूजां तस्या गौर्य्याः करोति या॥
तथा तथा तु सौभाग्यं तस्याः प्रत्यधिकं भवेत्।
अथ तस्याः सपत्न्यो याः सर्व्वा दुःखसमन्विताः॥
दृष्ट्वा सौभाग्यवृद्धिं तां तस्या एव दिने दिने।
एकाः प्रोचुर्व्वाचं च वैनां यदेषा कुरुते सदा॥
मृन्मयीञ्च समादाय पूजयेत् पञ्चपिण्डिकाम्।
अन्या प्रोचुर्म्मन्त्रसिद्धां तां वदन्ति महर्षयः॥
अन्या वदति पुण्यानि नास्याः पूर्व्वकृतानि च।
एवं तासां सुदुःखेन महाकालो जगाम ह॥
कस्यचित्त्वथकालस्य* सर्व्वाः संमन्त्र्य ता मिथः।
तस्याः सन्निधिमाजग्मु स्तस्मिन्नेव जलाशये॥
यत्र सा पूजयेद्गौरीं कृत्वा ताः पञ्चपिण्डिकाम्।

---

* क्षयकालस्येति पुस्तकान्तरे पाठः।

सा च सर्व्वाः समालोक्य त्यक्ता गौरीप्रपूजनम्॥
संमुखी प्रययौ तूर्णं कृताञ्जलिपुटस्थिता।
स्वागतं वो महाभागा भूयः सुस्वागतं वचः।
कृत्यं निवेद्यतां शीघ्रं येनाशु प्रकरोम्यहं॥

सपत्न्य ऊचुः।

वयं सर्व्वाः समायाताः कौतुकेन तवान्तिकम्।
दौर्भाग्यवह्निना दग्धास्तव सौभाग्यजेन च॥
तस्माद्वद महाभागे मृन्मयीं पञ्चपिण्डिकाम्।
नित्यमर्चयसीति त्वं सौभाग्यस्य विवर्द्धनम्॥
किं ते कारणमेतद्धि किं वा मन्त्रसमुद्भवः।
प्रभावोयं महाभागे गुह्यञ्चेत्तत् वदस्व नः॥

पद्मावत्युवाच।

रहस्यं परमं गुह्यं यत्पृष्टास्मि शुभाननाः।
अव्यक्तव्यं वदिष्यामि भवतीनां तथापि च॥
गौरीपूजनकाले तु यस्माच्चैव समागताः।
सर्व्वा मम भगिन्यस्तु ईर्ष्या धर्म्मोनमेऽस्तिवा॥
अहमासं पुरा कन्या पुरे कुसुमसंज्ञिते।
वीरसेनस्य शूद्रस्य वणिक्पुत्रस्य धीमतः॥
तेन दत्तास्मि धर्म्मेण विवाहार्थं महात्मना।
ततो विवाहसमये मम दत्तानि हृदये॥
पञ्चाक्षराणि श्रेष्ठानि योषितां दीक्षया सह।
गौरीपूजा तथा चैव प्रोक्ता चाहं ततः परम्॥

यावत्तु पुत्रि गौरीं त्वमेतैः पूजयसेऽम्बरैः।
जलपानं न कर्त्तव्यं तावच्चैव कथञ्चन॥
येन संप्राप्स्यसेऽभीष्टं तत्प्रभावात् यथेप्सितम्।
तथेति च मया प्रोक्तं तस्मात् प्रीता शुभानना:॥
ततो विवाहे निर्व्वृत्ते गताहं पतिना सह।
श्वशुरस्तिष्ठते यत्र श्वश्रूश्चैव सुदारुणा॥
गौरीपूजाकृते माञ्च निवारयति सर्व्वदा।
ततोऽहं भयसन्त्रस्ता गौरीभक्तिपरायणा॥
जलार्थं यत्र गच्छामि तस्मिंश्चैव जलाशये।
तत्र कर्द्दममादाय मन्त्रैः पञ्चभिरेव च॥
पञ्चपिण्डात्मिकां गौरीं विनिर्म्माय ततः पुनः।
तैरेव पूजयाम्येतां गौरीभक्तिपरायणा॥
प्रक्षिपामि पुनस्तोये ततो गच्छामि मन्दिरम्।
कस्यचित्त्वथ कालस्य भर्त्ता मे प्रथितः शुभाः॥
देशान्तरं वणिग्वृत्या सोऽपि मार्गं समाश्रितः।
सगच्छन्मरुमार्गेण मां समादाय स्नेहतः* ॥
संप्राप्तोनिर्जलं देशं सुरौद्रं मरुमण्डलम्।
तथा रौद्रतमे काले वृषस्थे दिवसाधिप॥
ततः सार्थः समग्रश्च विश्रान्तः स्थलमध्यगः।
कूपमेकं समाश्रित्य गम्भीरं दूरतोदकम्॥
एतस्मिन्नेव काले तु मया दृष्टं समीपगम्।
तोयाकारं मरुदेशं ततस्तोयं विचिन्तितम्॥

---

* देवत इति पुस्तकान्तरे पाठः।

एतच्च दृश्यते तोयं समीपस्थं तथा बहु ।
तत्र स्नात्वा शुचिर्भूत्वा गौरीमभ्यर्च्य भक्तितः ॥
पिबामि सलिलं पश्चात् सुस्वादु सुरसी* भवेत् ।
ततः संप्रस्थिता यावत् प्रयच्छामि पदात्पदम् ॥
ततो दूरतरं याति क्षणेन मृगतृष्णिका ।
एतस्मिन्नन्तरे प्राप्ते नभोमध्यं दिवाकरः ।
वृषस्थस्तेन दग्धास्मि† उपरिष्टात् शुभानना: ॥
अधोभागे तु तप्ताभिर्वालुकाभिः समन्ततः ।
भ्रममाणा ततस्तस्मिन्मरुदेशे समाकुला ॥
ततश्च पतिता भूमौ विस्फोटकसमावृता ॥
ततो मया स्मृता चित्ते कथा भारतसम्भवा ।
एतेन तु पुरा पञ्चवालुकाभिर्विनिर्मिता ।
कूपे तु क्षिप्यमाणेन वन्ध्वभ्यान्तोयवर्त्तिते ॥
भक्तिग्राह्यास्ततो देवास्तुष्टास्तस्य महात्मनः ।
तद्देवं वालुकाभिश्च पूजयामि हरिप्रियाम् ॥
तेन तुष्टा तु सा देवी मम राज्यं प्रयच्छति ।
अन्य देहतरं संस्थे मन्येभोऽहमनन्तकम् ॥
ततस्तु पञ्चभिर्मल्लैस्तैरेव स्मृतिमागतैः ।
पञ्चभिर्मुष्टिभिर्देवी वालुकोत्थैः प्रपूजिता ॥
ततः पञ्चत्वमापन्ना तत्कालेऽहं वराङ्गना: ।
दशार्णाधिपतेर्जाता सदने लोकविश्रुते ॥
जातिस्मरणसंयुक्ता तस्या देव्याः प्रभावतः ।

---

* सुरभीति पुस्तकान्तरे पाठः ।　　† दह्यमानास्मीति पुस्तकान्तरेपाठः ।

भवतीनां कनिष्ठास्मि ज्येष्ठा सौभाग्यतः स्थिता ॥
एतस्मात् कारणाद्गौरीं कृत्वैतां पञ्चपिण्डिकान्।
कर्द्दमेन विधायाथ पूजयामि दिने दिने ॥
एतत् गुह्यं समाख्यातं भवतीनामसंशयम्।
क्रमेनानेन मे गौरी मनोभीष्टं प्रयच्छतु ॥

लक्ष्मीरुवाच।

ततः सर्व्वाः सपत्नास्ताः कृताञ्जलिपुटस्थिताः।
तामूचुर्द्दीनया वाचा प्रणिपत्य मुहुर्मुहुः ॥
प्रसादं कुरुचास्माकं दीयतां मन्त्रपञ्चकम्।
तदेव येन ते गौरी सन्तुष्टा परमेश्वरी ॥
त्वया प्रोक्ता च यं सर्व्वाः प्रार्थयध्वं यथेच्छया।
अहं सर्व्वं प्रदास्यामि तत्सत्यं वचनं कुरु ॥
ततो देव मया प्रोक्तं तासां तन्मन्त्रपञ्चकम्।
शिष्यत्वं गमितानान्तु वाग्म,नः,काय,कर्म्म,भिः ॥

विष्णुरुवाच।

ममापि वद देवेशि कीदृक् तन्मन्त्रपञ्चकं।
यत्त्वयानुष्ठितं पूर्व्वं तासां गौर्य्या निवेदितम् ॥

लक्ष्मीरुवाच।

नमः पृथिव्यै धान्यै ते नम आपोमये शुभे।
तेजस्विनि नमस्तुभ्यं नमस्ते वायुरूपिणि ॥
आकाशरूपसम्पन्ने पञ्चरूपे नमोनमः।
एभिर्मन्त्रैर्मया पूर्व्वं पूजिता परमेश्वरी ॥
तेन राज्यं पुरा प्राप्तं सर्व्वस्त्रीणां सुदुर्लभम्।

ततः स्वस्थापितां देवीं कृत्वा रत्नमयीं शुभाम् ॥
हाटकेश्वरजे क्षेत्रे मया तत्र सुरेश्वर।
तां या पूजयते नारी साचापि * पतिवल्लभा।
जायते नात्र सन्देहः सर्व्वपापविवर्ज्जिता ॥

लक्ष्मीरुवाच।

एवं राज्यं मया प्राप्तं गौर्य्याः पूजाकृते विभो।
सौभाग्यं परमञ्चैव दुर्लभं सर्व्वयोषिताम्।
नचापत्यं मया लब्धं तथापि परमेश्वर ॥
तादृशेऽपि च सौभाग्ये तारुण्ये तादृशि स्थिते।
तथापि तेन दुःखेन दिवानक्तं सुखेन मे ॥
कस्यचित्त्वथ कालस्य दुर्व्वासा मुनिपुङ्गवः।
आनर्त्ताधिपते र्हर्म्ये संप्राप्ते गौरवाय सः ॥
चातुर्म्मासीकृतेचैव कृत्तिकाग्रहणाय च।
ततः संपूजितो राज्ञा आनर्त्तेन यथाक्रमम् ॥
दत्त्वार्घं मधुपर्कञ्च ततः प्रोक्तः प्रणम्य च।
स्वागतन्ते मुनिश्रेष्ठ भूयः सुस्वागतञ्च ते ॥
मान्योधन्यतमोलोके भूपोऽस्ति सदृशो मया।
यत्ते पादौ रजोग्रस्तौ केशैर्म्मे निर्म्मलीकृतौ ॥
तद्ब्रूहि किङ्करोम्यद्य गृहायातस्य ते मुने।
अपि राज्यं प्रयच्छामि का वार्त्तान्येषु सुव्रत ॥

दुर्व्वासा उवाच।

चातुर्म्मासीविधानन्ते करिष्ये नृप मन्दिरे।

---

* वल्लभापौति पुस्तकान्तरे पाठः।

मृत्तिकाग्रहणं यावत् शुश्रूषा क्रियतां मम ॥
स तथेति प्रतिज्ञाय* मामूचे पार्थिवोत्तमः।
शुश्रूषा चास्य कर्त्तव्या सर्व्वदैव वरानने ॥
चातुर्म्मासीकृतं यावद्दैवतार्च्चनपूर्व्वकम्।
वाढमित्येवमुक्ताथ मया सर्व्वमनुष्ठितम् ॥
शुश्रूषार्थञ्च यत् कर्म्म दुहिता तु पितुर्य्यथा।
चातुर्म्मास्यांव्यतीतायां यदा संप्रस्थितो मुनिः।
तदा प्रोचे स मां तुष्टः पुत्रि किं करवाणि ते ॥
ततः स भगवान् प्रोक्तः प्रणिपत्य मया गुरुः।
अपत्यं नास्ति मे ब्रह्मन् तेन दग्धास्म्यहर्निशम् ॥
तादृशे फलिते राज्ये यौवनेऽपि महत्तरे।
तन्मेवद मुनिश्रेष्ठ येन स्यान्मम सत्कृतिः ॥
व्रतेन नियमेनाथ दानेन च हुतेन वा।
ततः स सुचिरं ध्यात्वा मामुवाच स्मयन्निव ॥
अन्यदेहान्तरे पुत्रि त्वया गौरी प्रपूजिता।
तप्ताभिर्वालुकाभिश्च मृत्युकाल उपस्थिते ॥
तद्भक्त्या लब्धराज्योऽपि तापेन परिभूयसे।
गौरी यत्तापसंयुक्ता वालुकाभिः कृता त्वया ॥
न देवो विद्यते काष्ठे पाषाणे मृत्तिकासु च।
भावेषु विद्यते देवो मन्त्रसंयोगतस्ततः ॥
तव भक्तिसमायुक्ता मन्त्रसंयोजनेन च।
देवी तत्र समायाता त्वया वालुकयार्च्चिताः।

* मामूचे इति पुस्तकान्तरे पाठः।

तत्पयानेन सन्तापा भवत्यः सर्व्वदा स्थिताः ॥
तस्माद्रत्नमयीं कृत्वा देवीं त्वं पञ्चपिण्डिकां ।
हाटकेश्वरजे क्षेत्रे संस्थापय शुभानने ।
वृषस्थे भास्करे पश्चात्तस्या उपरि स्नाविं यत् ॥
जलयन्त्वं दिवानक्तं धारयस्व प्रयत्नतः ।
ततो यथा यथा तस्याः शैत्यभावो भविष्यति ॥
तथा तथा च ते देहः शान्तिं यास्यत्यसंशयं ।
देहान्ते भविता गर्भस्ततः पुत्त्रमवाप्स्यसि ॥
राज्यभारक्षयं श्रेष्ठं सुरलोकेषु विश्रुतम् ।
अन्यापि कामिनी यात्र एवं तां पूजयिष्यति ।
ज्यैष्ठे मासि तथा सापि यथा त्वं प्रभविष्यसि ॥

लक्ष्मीरुवाच ।

ततो मया पुनः प्रोक्तो भगवान् स मुनीश्वरः ।
मानुषत्वे च मे रागविरक्तिर्म्महती स्थिता ॥
नदीवेगोपमं दृष्ट्वा जीवितं सर्व्वदेहिनाम् ।
तन्मे वद महाभाग किञ्चिद्व्रतमनुत्तमम् ॥
मानुषत्वं न येन स्यात् सम्यक् चीर्णेन स द्विजः ।
ततः स सुचिरं ध्यात्वा मा याहि परमेश्वरि ॥
अस्ति पुत्त्रि व्रतं पुण्यं गौरीतुष्टिकरं परम् ।
येन चीर्णेन वै सम्यक् योषिद्देवत्वमाप्नुयात् ॥
गोमयाख्या महादेवी कृता गोमातृभिः पुनः ।
ततो गोलोकमापन्नाः सर्व्वास्ता वरवर्णिनि ॥
तास्त्व कुरुष्व कल्याणि ततोदेवत्वमाप्स्यसि ।

ततो मया पुनः प्रोक्तः स मुनिः सुरसत्तम॥
कस्मिन् काले प्रकर्त्तव्या विधिना केन सन्मुने।
सर्व्वं विस्तरतो ब्रूहि येन तां प्रकरोम्यहम्॥

दुर्व्वासा उवाच।

नभस्ये च सिते पक्षे तृतीयादिवसे स्थिते।
प्रातरुत्थाय पश्चाच्च भक्षयेत् दन्तधावनम्॥
ततश्च नियमं कुर्य्यादुपवाससमुद्भवम्।
गौरीनाम समुच्चार्य्य श्रद्धापूतेन चेतसा॥
ततो निशागमे प्राप्ते कृत्वा गौरीचतुष्टयम्।
मृन्मयं याद्दृशञ्चैव तद्दिहैकमनाः शृणु॥
एका गौरी प्रकर्त्तव्या पञ्चपिण्डा यथोचिता।
प्रहरे प्रहरे प्राप्ते तासु पूजां समाचरेत्॥
यैर्मन्त्रैस्तान्निबोध त्वं एकैकस्याः पृथक् पृथक्।
हिमाचलगृहे जाता देवि त्वं शङ्करप्रिया॥
मेनागर्भे समुद्भूता पूजां गृह्ण नमोऽस्तु ते।
धूपं दद्यात्ततश्चैव कर्पूरं श्रद्धया सह॥
रक्तसूत्रेण दीपञ्च घृतेन परिकल्पयेत्।
जातीपुष्पैः समभ्यर्च्य नैवेद्यं मोदकान्यसेत्॥
रक्तवस्त्रञ्च सम्पाद्य अर्घ्यं दद्यात्ततः परम्।
यस्य वृक्षस्य विहितं तस्य स्याद्दन्तधावनम्॥
मातुलङ्गेन चार्घ्यन्तु मन्त्रेणानेन भक्तितः।
शङ्करस्य प्रिये देवी हिमाचलसुते शुभे॥
अर्घ्यन्तेन मया दत्तं परिगृह्ण नमोस्तुते।

तदेव प्राशनं कार्य्यं ततः कायविशुद्धये॥

तदेव मातुलङ्गमेव।

द्वितीये प्रहरे प्राप्ते अर्द्धनारीश्वरं ततः।
सुरभ्या पूजयेद्भक्त्या मन्त्रेणानेन पार्व्वतीम्॥
रमाद्दाराद्दिणीचैवं या हरस्य व्यवस्थिता।
सा मे पूजां प्रगृह्णातु तस्यै देव्यै नमोनमः॥
अगुरुञ्च ततो दद्याद्धूपं दद्यात्तदासुते।
नैवेद्यं गुणकांश्चैव नालिकेरेणचार्घकम्॥
मन्त्रेणानेन दातव्यं तदेव प्राशनं स्मृतम्।
अर्द्धनारीश्वरौ यौ च संस्थितौ परमेश्वरौ॥
अर्घं मे तु प्रगृह्णानां स्यातां सर्व्वसुखप्रदौ।
तृतीये प्रहरे प्राप्ते शतपत्रा प्रपूजयेत्॥
उमामाहेश्वरौ देवौ मन्त्रेणानेन सुन्दरि।
उमामहेश्वरौ देवौ यौ तौ सृष्टिलयात्मकौ॥
तौ गृह्णीतामिमां पूजां मया दत्तां प्रभक्तितः।
गुग्गुलूत्थं ततो धूपं नैवेद्यं धारिकात्मकम्॥
जातीफलेन चार्घञ्च तदेव प्राशनं स्मृतम्।
ततश्चार्घः प्रदातव्यो मन्त्रेणानेन भक्तितः।
उमामहेश्वरौ देवौ सर्व्वकाम सुखप्रदौ॥
गृहीत्वा दत्तमर्घं मे दयां कृत्वा महेश्वरौ।
चतुर्थे प्रहरे प्राप्ते गौरीं पञ्च च पिण्डिकाम्॥
भृङ्गराजेन संपूज्य मन्त्रेणानेन भक्तितः।
पृथिव्यादीनि भूतानि यानि प्रोक्तानि पञ्च च॥

पञ्चरूपाणि देवेशि पूजां गृह्ण नमोस्तु ते।
नैवेद्यं घृतपूरञ्च दद्याद्दिव्याः प्रभक्तितः॥
ग्रन्थिचूर्णेन धूपञ्च अर्घ्यं मदनजं फलम्।
तदेव प्रथमं कार्य्यं अर्घ्यमन्त्रइति स्मृतः॥
पञ्चभूतमयी देवी पञ्चधा या व्यवस्थिता।
अर्घ्यमेनं मया दत्तं सा गृह्णातु सुरेश्वरी॥
एवं सर्व्वां निशां वापि गीतवाद्यादिनिःस्वनैः।
तासां चैवाग्रतो नेया नैव निद्रां समाचरेत्॥
ततः प्रभाते विमले प्रोद्गते रविमण्डले।
स्नात्वा संपूजयेद्विप्रं सह पत्न्या सुभक्तितः॥
वस्त्रैराभरणैश्चैव स्वशक्त्या नृपनन्दिनि।
गौरीभक्ते च दातव्यं मिष्टान्नञ्च शुचिस्मिते॥
ततः करेणुमानीय वडवां वा सुमध्यमे।
गौरीचतुष्टयं तच्च समारोप्य तदोपरि॥
गीतवादित्रशब्देन वेदध्वनियुतेन च।
नद्यां वाथ तडागे वा वाप्यां वाथ परिक्षिपेत्॥
मन्त्रेणानेन सद्भक्त्या तत्तेऽहं वच्मि सुन्दरि।
आगतासि महादेवि पूजितासि मया शुभे॥
मम सौभाग्यदानाय यत्रेष्टं तत्र गम्यताम्।

लक्ष्मीरुवाच।

एवं मया कृता देव सा तृतीया यथोदिता।
नभस्ये मासि संप्राप्ते भक्त्या परमया विभो॥
द्वितीये तु तथा प्राप्ते तृतीये तु विशेषतः।

तावद्व्योमगता वाणी समुत्तस्थौ सुरेश्वर।
मा पुत्रि जलमध्ये त्वं मम मूर्त्तिचतुष्टयम्॥
परिक्षिपाद्य मद्वाक्यं श्रुत्वा चैवं विधीयताम्।
हाटकेश्वरजे क्षेत्रे स्थापयैतत्सदाक्षयात्॥
अक्षयं जायते येन सर्व्वस्त्रीणां हिताय च।
त्वं प्रार्थय यदाभीष्टं वरं सर्व्वं ददाम्यहम्॥
ततः सा प्रणिपत्योच्चैर्म्मया प्रोक्ता सुरेश्वरी।
यदि यच्छसि मे देवी वरन्तुष्टा सुरेश्वरि॥
तदहं मानुषे गर्भे मा भूयासं कथञ्चन।
भर्त्ता भवतु मे विष्णुः शाश्वतोऽभीष्टदः सदा॥
नान्यत् किञ्चिदभीष्टं मे चेद्राज्यं त्रिदशोद्भवम्।
अन्यापि कुरुते या तु व्रतमेतत् समाहिता॥
सर्व्वव्रतैर्य्यदा तुष्टिस्तव देवि प्रजायते।
तथा तस्याः प्रकर्त्तव्या एकेनानेन पार्व्वति॥
एवं भविष्यतीत्युक्ता ततश्चादर्शनं गता।
स्वदेवी च मया तत्र तच्च देवीचतुष्टयम्॥
हाटकेश्वरजे क्षेत्रे मया संस्थापिता प्रभो।
तत्प्रभावान्मया लब्धो भर्त्तायं परमेश्वरः॥
शाश्वतश्चाक्षयश्चैव सुखप्रेप्सुश्च सर्व्वदा।

इति पद्मपुराणीयनागरखण्डे पञ्चपिण्डिकागौरीव्रतम्।७

——000——

गुडेन तुष्यते देवी पार्व्वती सर्व्वमङ्गला।
यावत्पश्यामि प्रत्यूषं तावद्गौरीचतुष्टयम्॥

जातरत्नमयं तच्च मया तत्परिवर्जितम्।
प्रस्थिता तत्समादाय परिक्षेप्तुं जलाशये॥
गुड़पूपास्तु दातव्या मासि भाद्रपदे तु या।
तृतीया पायसेनापि वामदेवस्य प्रीतये॥

इति भविष्यत्पुराणोक्तं गुड़तृतीयाव्रतम्।५

———000———

साध्या द्वादश प्रोक्ताः

ब्रह्माण्डपुराणात्।

मनोऽनुमन्ता प्राणश्च नरयानश्च वीर्य्यवान्।
वित्तिर्हयो* नयश्चैव हंसो नारायणस्तथा॥
प्रभवो विष्णुर्विश्वश्च साध्या द्वादश यज्ञिरे।
तृतीयायां महाभाग पूजयेत्तानुपोषितः॥
प्रतितृतीयायां यावद्वर्षं सोपवास इति शेषः।

इतिविष्णुधर्म्मोत्तरोक्तद्वादशाश्वमेधयज्ञफलावाप्तितृतीयाव्रतं।*

———000———

तृतीयायां तथाभ्यर्च्य ब्रह्म विष्णु महेश्वरान्।
पृथक् पृथक् नाम मन्त्रैर्नैवेद्यादि निवेदयेत्॥
त्रीन् लोकांश्च तदा नाम सम्यक् संपूजयेन्नरः।
ऐश्वर्य्यं महदाप्नोति गतिमग्र्याञ्च विन्दति।

---

* हर्य्य इति पुस्तकान्तरे पाठः।

इति विष्णुधर्म्मोक्तमैश्वर्य्यतृतीयाव्रतम् ।

——000——

तृतीया श्रावणे कृष्णा या स्यात् श्रवणसंयुता ।

श्रावणोऽत्र पौर्णमास्यन्तोमासो ग्राह्यः अतःश्रावणकृष्ण तृतीयायाः श्रवणयुक्तत्वं न दुर्घटं ।

तस्यां संपूज्य गोविन्दं तुष्टिमग्र्यामवाप्नुयात् ।

पूजादि प्रणवादिनमोन्तैर्नाममन्त्रैः ।

इति विष्णुधर्म्मोक्त तुष्टि प्राप्ति तृतीयाव्रतम ।

——000——

वैशाखशुक्लपक्षे तु तृतीयायामुपोषितः ।

अक्षयं फलमाप्नोति सर्व्वस्य सुकृतस्य तु ॥

सा तथा कृत्तिकोपेता विशेषेण च पूजिता ।

तत्र दत्तञ्च जप्तञ्च सर्व्वमक्षयमुच्यते ॥

अक्षया सा तिथिस्तस्मात्तस्यां सुकृतमक्षयं ।

अक्षतैः पूजितोविष्णुस्तेन साथाक्षता स्मृता ॥

अक्षतैस्तु नरः स्नातो विष्णोर्दत्त्वा तथाक्षतान् ।

शक्तून् सुसंस्कृतांश्चैव हुत्वा चैव तथाक्षतान् ॥

विप्रेषु दत्त्वा तानेव तथा शक्तून् सुसंस्कृतान् ।

पक्वान्नन्तु* महाभाग फलमक्षयमश्नुते ।

एकामप्युक्तां यः कृत्वा तृतीयां भृगुनन्दन ।

एतावत्तु तृतीयानां सर्व्वासान्तु फलं लभेत् ॥

---

* पक्वान्नमिति पुस्तकान्तरे पाठः ।

इति विष्णुधर्म्मोत्तरोक्तमक्षयफलावाप्ति अक्षयतृतीयाव्रतं।

———000———

ईश्वर उवाच।

फलतृतीयां या नारी कुरुते तत्र भाविता।
वर्षमेकं सिते पक्षे देवीं पूज्य विधानतः॥
फलानि ब्राह्मणे दद्यादभीष्टानि च यानि तु।
फलानि वर्जयेत् नक्तं अश्नाति सुरसुन्दरि॥
निष्पावानाढकीं मुद्गान् माषांश्चैव कुलत्थिकान्।
मसूरान् राजमाषांश्च गोधूमान् त्रिपुटांस्तथा॥
चणकान् वर्त्तुलान् वापि मुकुटां भक्तितोऽश्नतिजः।
नरो वा यदि वा नारी यावज्जीवं व्रतं चरेत्॥
तस्याः पुण्यफलं वक्ष्ये कथ्यमानं शृणुष्व मे।
धनं धान्यं गृहे तस्य न कदाचित् क्षयं व्रजेत्॥
दुःखिता दुर्भगा दीना सदा जन्मनि नो भवेत्।
कथानकञ्च श्रोतव्यं देव्या माहात्म्यसंयुतम्॥
कृतपातकनाशाय सर्व्वकामसमृद्धये।

इति पद्मपुराणीयप्रभासखण्डोक्तं फलतृतीयाव्रतं।

इति श्रीमहाराजाधिराजश्रीमहादेवस्य सकलकरणा-
धीश्वर सकलविद्याविशारद श्रीहेमाद्रिविरचिते
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
तृतीयाव्रतानि।

———

अथ चतुर्थीव्रतानि ।

——000——

अनाथलोकोद्धरणैकबन्धुरगण्यपुण्यामृतसारसिन्धुः ।
हेमाद्रिरज्ञानसमुद्रसेतुं ब्रूते चतुर्थीव्रतमिष्टहेतुं ॥

स्कन्दउवाच ।

केन भोगानवाप्नोति निर्विघ्नं पुरसूदन ।
पुत्रपौत्रांस्तथारोग्यं व्रतेनाप्नोति शङ्कर ॥

ईश्वर उवाच ।

पुरा देवासुरे युद्धे असुरैर्निर्जिता रणे ।
शक्राद्या देवताः सर्व्वास्त्रिपुरावासिभिर्यदा ॥
तदा विवर्णवदनास्ते सर्व्वे मामुपागताः ।
त्राहि त्राहि वदन्तस्ते मयाप्याश्वासितास्तदा ॥
विघ्नैरुपहतानाञ्च समादिष्टं व्रतं मया ।
तत्कृतं तैस्तदास्कन्द तेषां तुष्टो गणाधिपः ॥
गणेशेन तु तुष्टेन विघ्नानां संचयः कृतः ।

स्कन्द उवाच ।

विधिना केन देवेश व्रतमेतन्महाफलं ।
कृतं भवति देवेश तन्मे ब्रूहि वृषध्वज ॥

ईश्वर उवाच ।

मार्गशीर्षे शुभे मासि सिते पक्षे तु षण्मुख ।

चतुर्थ्यां नियमं गृह्य विघ्नेशं पूज्य भक्तितः॥
पुष्पैर्गन्धैश्च नैवेद्यैः लड्डुकैश्च सुसंस्कृतैः।
पललैस्तिलपिष्टैश्च तथा सोहालकैः प्रभुं॥
पललं तिलपिष्टं षडेते पिष्टादिमयाः*।
पूजयित्वा विधानेन प्रार्थयेत्तत्र मानवः॥
त्वत्प्रसादेन देवेश व्रतं व्रतचतुष्टयं।
निर्विघ्नेन तु मे या तु प्रमाणं तु खगध्वज†॥
संसारार्णवदुस्तारं सर्व्वविघ्नसमाकुलं।
तस्मात् ध्यानजगन्नाथ त्राहि मां गणनायक॥
एवं प्रार्थ्य गणाध्यक्षं भुञ्जीयाद्वाग्यतस्ततः।
एवं क्रमेण संपूज्य एकभक्तो नरोत्तमः॥
गणेशं मनसा ध्यायंस्ततोरात्रौ स्वपेद्बुधः।
एवं संवत्सरं कृत्वा चतुर्थीव्रतं षण्मुख॥
ततो मार्गशिरे मासि विधिना तस्य पूजनं।
नक्ताशी च भवेत्तद्वद्यावत्संवत्सरंपुनः॥
मार्गशीर्षे तु संप्राप्ते तथैवायाचितो भवेत्।
अयाचितेनाब्दमेकं ततो मार्गशिरे पुनः॥
आरभ्योपवसेदब्दमेकं तद्वच्च पूजनं।
एवं क्रमेण विधिवच्चत्वार्य्यब्दानि मानवः॥
समाप्य तु ततोह्यन्ते व्रतस्नातो महाव्रत।
कारयेद्धेमघटितं स्वशक्त्याखुरथं शुभं॥

---

* पललोडुकैश्चैवतथा सोमालिकैः प्रभुं। पललं तिलपिष्टं, उडुरकापिष्टादिमय्या इति पुस्तकान्तरे पाठः।

† प्रमाणं कनक ध्वज इति पुस्तकान्तरे पाठः।

आखुरथं, गणेशं ।

तद्रूपं विष्णुधर्म्मोत्तरात् ।

विनायकस्तु कर्त्तव्यो गजवक्त्रश्चतुर्भुजः ।
शूलकञ्चाक्षमाला च तस्य दक्षिणहस्तयोः ॥
पात्रञ्चोदकपूर्णञ्च परशुञ्चैव वामतः ।
दन्तश्चास्य नकर्त्तव्यो वामो रिपुनिषूदन ॥
पादपीठकृतः पादोदकश्चामनगो भवेत् ।
लम्बोदरस्तथाकार्य्यस्तन्तुकर्णश्च यादव ॥
व्याघ्रचर्म्मधरः सर्पव्यालयज्ञोपवीतवान् ।
कारयेद्वर्णकैः शुभ्रैररविन्दं सपत्रकं ॥
तस्योपरि घटं स्थाप्य ताम्रपात्रेण संयुतं ।
पूरयेत् शुभ्रशालेयैस्तन्दुलैरेव वा खग ॥
तस्योपरि न्यसेद्देवं वासोभिर्व्वेष्ट्य सुव्रत ।
पूजयेत् पुष्पधूपाद्यैर्नैवेद्यैर्विविधैस्तथा ।
मोदकैश्च ततः शुभ्रैः पक्वान्नैर्घृतपाचितैः ॥
नैवेद्यं कल्पयेत्तत्र गणेशः प्रीयतामिति ।
जागरं कारयेद्विद्वान् गीतवादित्रनिस्वनैः ।
पुराणाख्यापनञ्चैव तां रात्रिं क्षपयेद्बुधः ॥
प्रभाते विमले स्नातो होमकार्य्याणि कारयेत् ।
तिलव्रीहियवैश्चैव तथा सिद्धार्थकैः शुभैः ॥

ॐगणेशाय स्वाहा । ॐगणपतये स्वाहा । ॐमेघवर्णाय स्वाहा । ओंकुष्माण्डाय स्वाहा । ॐत्रिपुरान्तकाय स्वाहा । ॐएकदन्ताय स्वाहा । ॐलम्बोदराय स्वाहा । ॐरुक्मदंष्ट्राय

स्वाहा। ॐविघ्नेश्वराय स्वाहा। ॐब्रह्मणे स्वाहा। ॐइन्द्राय स्वाहा। ॐयमाय स्वाहा। ॐवरुणाय स्वाहा। ॐसोमाय स्वाहा*। ओंगणेशपरमेष्ठिने स्वाहा। गणपति मन्त्रेण होमयेत्।

अष्टोत्तरं शतं हुत्वा ततो व्याहृतिभिर्हुनेत्।
यावत् शक्यं महावाहो ततो होमं समाप्यते॥
ततस्तमर्चयेद्विद्वान् आचार्य्यं भक्तिभावितः।
वस्त्रैराभरणैर्द्दिव्यैः पूजयित्वा क्षमापयेत्॥
तत्पत्नी पुरुषो भक्त्या रत्नैराभरणैः शुभैः।
शय्या देया ततो राजन् सोपधानां सलङ्कां॥
गां सवत्सां ततो दद्यात् सर्व्वालङ्कारभूषितां।
प्रीयतां गणनाथोऽत्र इति मन्त्रमुदाहरेत्॥
ब्राह्मणान् भोजयेद्भक्त्या चतुर्व्विंशतिसंख्यया।
तेभ्यस्तु करकान् दद्यात् तिलपात्रसमन्वितान्॥
अनेन विधिना यस्तु करोति व्रतमुत्तमम्।
न विघ्नैरभिभूयेत गणनाथप्रसादतः॥
यः करोति समारम्भं निर्विघ्नं तत्फलप्रदम्।
पूर्व्वं तथा कृतं सर्वैरिन्द्राद्यैस्त्रिदशैर्विभो॥
रुद्रेण ब्रह्मणा पूर्व्वं विष्णुना च पुरा कृतम्।
अन्यैश्चैव महीपालै राजभिर्बहुभिः कृतम्॥
एतदेव व्रतं चीर्णं मनुष्यैर्भूतले मुने।
अनेन क्रियमाणेन न विघ्नैरभिभूयते।
स्वर्गलोकात्परिभ्रष्टस्ततो याति पराङ्गतिम्॥

---

* सूर्य्यायस्वाहेति पुस्तकान्तरे पाठः।

इति स्कन्दपुराणोक्तं सोपधानं कृष्णचतुर्थी व्रतम् ।

———000———

मार्कण्डेय उवाच ।

इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तदा ।
चैत्रस्यामलपक्षे तु सोपवासो जितेन्द्रियः ॥
चतुर्थ्यां वासुदेवस्य कृत्वा संपूजनं शुभम् ।
काञ्चनं दक्षिणां दद्यात् द्विजाय ब्रह्मचारिणे ॥
तथा सङ्कर्षणं देवं पूजयित्वा जगद्गुरुं ।
वैशाखे तु गृहस्थाय दद्याच्छय्यां सुसंस्कृतां* ॥
संपूज्य देवं प्रद्युम्नं† ज्यैष्ठे मासि यथा विधि ।
वनस्थाय तदा दद्यात् फलमूलन्तु गोरसम् ।
अनिरुद्धं यथाषाढे पूजयित्वा जगद्गुरुं ॥
दद्यादलावुपात्रन्तु योगस्थाय द्विजाय तु ।
इत्येव पारणं‡ प्रोक्तं स्वर्गलोके महीयते ॥
द्वितीये पारणे प्राप्ते शक्रलोके महीयते ।
सालोक्य मायात्यथ केशवस्य
प्राप्ते तृतीये त्वथ पारणास्यात् ।
पारण त्रय विधानात् व्रतावृत्तिः
इत्याश्रमाणां व्रतमुत्तमं ते
मयेरितं कल्मषनाशकारि ।

* दद्याच्छय्य सुसंस्कृतमिति पुस्तकान्तरे पाठः ।

† पुत्रमिति पुस्तकान्तरे पाठः । ‡ पारणे प्राप्ते इति पुस्तकान्तरे पाठः ।

इति विष्णुधर्मोत्तरोक्तमाश्रमव्रतम्।

मार्कण्डेय उवाच।

इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव।
चतुरात्मा हरिः प्रोक्तश्चत्वारश्च हुताशनाः॥
आहिताग्निर्द्विजो यस्य विद्यतेऽग्निचतुष्टयम्।
सोपवासश्चतुर्थ्यान्तु शुक्लपक्षस्य फाल्गुने॥
अभ्यर्च्च्य चतुरात्मानं वासुदेवमतन्द्रितम्।
तस्मै दद्याद्द्विजेन्द्राय तिलप्रस्थानि षोडश॥
सुवर्णस्य सुवर्णञ्च वस्त्रं घृततुलामपि।

सूवर्णं कर्षोनं।

एवं संवत्सरं कृत्वा व्रतमेतदतन्द्रितः।
सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते॥
विमानेनार्कवर्णेन स्वर्गलोकञ्च गच्छति।
मनुष्यो दीप्ततेजाःस्यात् दीप्ताग्निः प्रमदाप्रियः॥
रिपून् जयति संग्रामे धनवांश्च तथा भवेत्।
ये त्वग्नयो वै चतुरप्रविष्टाः
स वासुदेवः कथितश्चतुर्द्धा।
यः पूजयेत् ब्राह्मणमाहिताग्नि-
र्देवः स तेनाप्यथ पूजितः स्यात्॥

इति विष्णुधर्म्मोत्तरोक्तमग्निव्रतम्।११

—✻✻✻—

इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव ॥
वासुदेवांशकात् जाताः सर्व्वे देवगणा नृप।
अधिकेन तु देशेन साध्या जातास्तथा सुराः ॥
तत्रापि वाधिकांशेन* चतुरात्मा हरिः स्मृतः।
नरो नारायणश्चैव हरिः कृष्णश्च वीर्य्यवान् ॥
चतुरात्मा हरिर्जातो गृहधर्म्मस्य यादव।
आदित्येषु तु यावुक्तौ मित्रावरुणसंज्ञकौ।
तावेव नान्यौ जानीहि हरिकृष्णौ च यादव ॥
आदित्येषु तु या वुक्तौ शक्रविष्णू सुरोत्तमौ।
तावेव सिद्धसाध्येषु नरनारायणौ पुनः ॥
चैत्रशुक्लचतुर्थ्यान्तु सोपवासस्तु पूजयेत्।
देवेशं चतुरात्मानं वित्तशक्त्या नराधिप ॥
व्रतमेतन्नरः कृत्वा पूर्णं द्वादशवत्सरम्।
न दुर्गतिमवाप्नोति मोक्षोपायञ्च विन्दति ॥

ततः समासाद्य वनिप्रभुत्वं
परेण पुंसा समसत्वमेति।
सर्व्वेश्वरस्याप्रतिमप्रभावो
विमुक्तदुःखो भुवनस्य गोप्ता ॥

---

* वाधिकांशेनेति पुस्तकान्तरे पाठः।

इति विष्णुधर्म्मोत्तरोक्तं चतुर्मूर्त्तिव्रतम्।72

———000———

शुक उवाच।

चतुर्थ्यङ्गारकदिने यदा भवति भारत।
मृदा स्नानं तदा कुर्य्यात् पद्मरागविभूषितः॥
अग्निर्मूर्द्धा दिवो मन्त्रं जपंस्तिष्ठेदुदङ्मुखः।
शूद्रस्तुष्णीजपं भौममास्ते भोगविवर्ज्जितः॥
अथास्तमितआदित्ये गोमयेनोपलिप्य च।
प्राङ्गणं पुष्पमालाभिरच्चताभिः समन्ततः॥
अभ्यर्च्चाभिलिखेत्पद्मं कुङ्कुमेनाष्टपत्रकम्।
कुङ्कुमस्याप्यभावे तु रक्तचन्दनमिष्यते॥
चत्वारः करकाः कार्य्या भक्ष्यभोज्यसमन्विताः।
तण्डुलैरक्तशालेयैः पद्मरागैश्च संयुताः॥
चतुःकोणेषु तान् कृत्वा फलानि विविधानि च।
गन्धमाल्यादिकं सर्व्वं तथैव विनिवेदयेत्

सुवर्णशृङ्गीं कपिलामथार्च्य
रौप्यैः खुरैः कांस्यदोहां सवस्त्राम्।
धुरन्धरं रक्तमतीव सौम्यं
धान्यानि सप्तावरसंयुतानि॥

सप्त धान्यानि, यव गोधूम धान्यकम्
कङ्गुश्यामा चणक चीनकानि।
अङ्गुष्ठमात्रं पुरुषं तथैव

सौवर्णमत्यायतबाहुदण्डम् ।
चतुर्भुजं हेममये निविष्टं
पात्रे गुडस्योपरि सर्पिषायुतम् ॥
सामस्वरज्ञाय जितेन्द्रियाय
पात्राय शीलत्रयसम्भवाय ।
दातव्यमेतत्सकलं द्विजाय
कुटुम्बिने नैव च दम्भयुक्ते ॥
भूमि पुत्र महातेजः स्वेदोद्भव पिनाकिनः ।
रूपार्थी त्वां प्रपन्नोऽहं गृहाणार्घ्यं नमोऽस्तु ते ॥
मन्त्रेणानेन दत्त्वार्घ्यं रक्तचन्दनवारिणा ।
ततोऽर्चयेद्विप्रवरं रक्तमाल्यांबरादिभिः ॥
दद्यान्मन्त्रेण तेनैव भौमं गोमिथुनान्वितम् ।
शय्यां च शक्तितो दद्यात्सर्वोपस्करसंयुताम् ॥
यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥
प्रदक्षिणं ततः कृत्वा विसर्ज्य द्विजपुङ्गव ।
नक्तमक्षारलवणमश्नीयात् घृतसंयुतम् ।
भक्त्या यस्तु पुमान् कुर्य्यादेवमङ्गारकाष्टकम् ॥
अङ्गारकाष्टकमिति, अङ्गारकचतुर्थ्यष्टकम् ।
चतुरोवाथ वा तस्य यत् पुण्यं तद्वदामि ते ॥
रूपसौभाग्यसम्पन्नः पुनर्जन्मनि जन्मनि ।
वैष्णवोऽथ शिवोभक्तः सप्तद्वीपाधिपो भवेत् ॥
सप्तकल्पसहस्राणि रुद्रलोके महीयते ।

इति मत्स्यपुराणोक्तं *अङ्गारकचतुर्थीव्रतम् ॥

——000——

ब्रह्मोवाच।

गणेशपूजनं कुर्य्यात् चतुर्थ्यां सर्व्वकर्म्मसु।
अविघ्नं सुरलोके च गतिमिष्टां प्रयच्छति॥
कर्म्मस्वविदुषं विघ्नं कुर्य्याच्चैव न संशयः।
सर्व्वेषां कर्म्मणामादौ ततः पूज्यो गणाधिपः॥
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः।
पूर्व्ववत्पश्चपत्रस्थः कर्त्तव्यश्चतिथीश्वरः॥

तिथीश्वरोऽत्र गणेशः।

तद्रूपप्रकारस्तु कृच्छ्रचतुर्थीव्रते विलोकनीयः।

गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते।
पूजाशाठेऽन शाठेन कृतापि तु फलप्रदा॥
आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः।
पूर्व्वोक्त फलदा होमो यस्तु शान्तेन चेतसा॥

एतद्व्रतं वैश्वानर प्रतिपद्व्रतवद्व्याख्येयं।

इति भविष्यत्पुराणोक्तं गणेशव्रतम्।

——0*0——

सूत उवाच।

चतुर्थ्यां न तु भुञ्जीत स्नात्वा नद्यां नृपोत्तम।

---

* पद्मपुराणोक्तमिति पुस्तकान्तर पाठः।

रक्ताम्बरधरो भूत्वा रक्तगन्धानुलेपनः॥
रक्तचित्तो गणाधीशं विनायकमथार्च्चयेत्।
रक्तचन्दनतोयेन स्नानपूर्व्वविधानतः॥
विलिप्य रक्तगन्धेन रक्तपुष्पैः प्रपूजयेत्।
ततोऽसौ दत्तवान् भूयः साज्ययुक्तं च चन्दनम्॥
नैवेद्यं चैव हारिद्रं गुडखण्डं घृतप्लुतम्।
एवं सम्वत्सरं पूज्य विनायकमथ स्तुवन्॥
नमस्कृत्य महादेवं स्तोष्येऽहं त्वां विनायकम्।
महागणपतिं शूरमजितं जयवर्द्धनम्॥
एकदन्तं द्विदन्तञ्च चतुर्दन्तं चतुर्भुजम्।
त्र्यक्षत्रिशूलहस्तञ्च रक्तनेत्रं वरप्रदम्॥
आम्बिकेयं शङ्कुवर्णं प्रचण्डं दण्डनायकम्।
आरक्तं दण्डिनं चैव वह्निवक्त्रं हुतप्रियम्॥
अनर्च्चितो विघ्नकरः सर्व्वकार्य्येषु यो नृणाम्।
तं नमामि गणाध्यक्षं भीममुग्रमुमासुतम्॥
मदमत्तं विरूपाक्षं भववक्त्रसमुद्भवं।
सूर्य्यकोटिप्रतीकाशं रक्ताञ्जनसमप्रभम्॥
बुधं सुनिश्चलं शान्तं नमस्यामि विनायकम्॥
नमोऽस्तु ब्रह्मरूपाय विष्णुरूपाय ते नमः।
नमोऽस्तु गजरूपाय गजानां पतये नमः।
मेरुमन्दररूपाय* नमः कैलासवासिने॥
नमो विघ्नविनाशाय नमस्ते ब्रह्मचारिणे।

---

* विरूपाय सुरूपायेति पाठान्तरं।

भक्तस्तुताय देवाय नमस्तुभ्यं विनायक।
त्वया पुराणं सर्व्वेषां देवानां कार्य्यसिद्धये॥
गजरूपं समास्थाय त्रासिताः सर्व्वदानवाः।
ऋषीणां देवतानाञ्च कृताः सर्व्वे मनोरथाः॥
यतस्ततः सुरैरग्रैः पूज्यसे त्वं भवात्मज।
त्वामाराध्य गणाध्यक्षं सर्व्वज्ञं कामरूपिणम्॥
कार्य्यार्थं रक्तकुसुमैः रक्तचन्दनवारिभिः।
रक्ताम्बरधरो भूत्वा चतुर्थ्यामर्च्चयेज्जपन्॥
त्रिकालमेककालं वा नियतो नियतात्मनाः।
राजानं राजपुत्रं वा राजमन्त्रिणमेव च॥
राज्यं वा सर्व्वविघ्नेशो वशी कुर्य्यात्सराष्ट्रकम्।
अविघ्नं कुरु मे नित्यं कुरु विघ्नविनायक॥
मया त्वं संस्तुतो भक्त्या पूजितश्च विशेषतः।
यत् फलं सर्व्वतीर्थेषु सर्व्वयज्ञेषु यत्फलम्॥
तत् फलं सर्व्वमाप्नोति स्तुत्वा देवं विनायकम्।
विषमं न भवेत्तस्य नच गच्छेत्पराभवम्॥
न च विघ्नो भवेत्तस्य जातो जातिस्मरो भवेत्।
य इदं पठति स्तोत्रं षड्भिर्मासैर्वरं लभेत्॥
सम्वत्सरेण सिद्धिञ्च लभते नात्र संशयः।

इति नरसिंहपुराणोक्तं गणेशचतुर्थीव्रतम्।

——000——

सुमन्तुरुवाच॥

शिवा शान्तासु खी राजन् चतुर्थी त्रिविधा स्मृता।

मासि भाद्रपदे शुक्ला शिवा लोकेशपूजिता ॥
तस्यां स्नानं तथा दानमुपवासोजपस्तथा ।
क्रियमाणं शतगुणं प्रसादाद्दन्तिनो नृप ॥
गुड लवण घृतानान्तु दानं शुभकरं स्मृतम् ।
गुडपूपा* स्तथा वीर पुण्यं ब्राह्मणभोजनम् ॥
चतुर्थ्यां नरशार्दूल पूजयेत सदा स्त्रियः ।
गुड लवण पूजाभिः श्वश्रुश्वशुरमातरः ॥
ताः सर्व्वा सुभगाःस्युर्वै विघ्नेशस्यानुमोदनात् ।
कन्यकाश्च विशेषेण विधिनानेन पूजयेत् ॥

इति भविष्यत्पुराणोक्तं शिवाचतुर्थीव्रतम् ।

---०*०---

सुमन्तुरुवाच ।

माघमासि तथा शुक्ला या चतुर्थी महीपते ।
सा सर्व्वशान्तिदा नित्यं शान्तिं कुर्य्यात्सदैव हि ॥
स्नानं दानं बलिः कर्म्म सर्व्वमस्यां कृतं विभो ।
भवेत्सहस्रगुणितं प्रसादाद्दन्तिनः सदा ॥
कृत्वोपवासं यस्तस्यां पूजयेद्विघ्ननायकम् ।
तस्यां होमादिकं कर्म्म भवेत्साहस्रिकं नृप ॥
लवणं गुडपूर्णञ्च घृताक्तं तच्च भारत ।
दत्वा भक्तो तु विघ्नेशं फलं साहस्रिकं लभेत् ॥

---

* गुडपूजेति पुस्तकान्तरे पाठः ।

विशेषतः स्त्रियोराजन् पूजयेत् स्वगुरुं नृप।
गुड लवण घृतै र्वीर सदास्यां कुरुनन्दन॥

इति भविष्यत्पुराणोक्तं शान्ताचतुर्थीव्रतम्॥

—:०:—

सुमन्तुरुवाच।

सुखावहां शृणु सुखां सौभाग्यकरिणीं* शुभां।
चतुर्थीं कुरुशार्दूल रूपसौभाग्यदां शुभां॥
सुखव्रतं महापुण्यं रूपारोग्यप्रदायकम्।
सुसूक्ष्मं सुकरं धन्यमिदं पुण्यं सुखावहं॥
परत्र फलदं वीर दिव्यरूपप्रदायकम्।
विलासं विभ्रमाक्षेपं हसितं चेष्टितं शुभम्।
सुखव्रतेन सर्व्वं स्यात् शुभं कुरुकुलोद्वह।।
कृतपूजे तु देवेशि विप्रेश शिवयोः सुते।
यदा शुक्लचतुर्थ्यान्तु वारो भौमस्य भाक् भवेत्॥
तदा सा सुखदा ज्ञेया चतुर्थी वै सुखेति च।
पुरा मैथुनमाश्रित्य स्थिताभ्यान्तुहिनाचले॥
भौमोमाभ्यां महाबाहो† रवि रिन्दुश्युतः क्षितौ*
मेदिन्या सुप्रयत्नेन सुखेन तु भृतो यथा।

---

* परामिति पुस्तकान्तरे पाठः।

† रक्तबिन्दु रिति पुस्तकान्तरे।

जातस्तस्यां महावीर रक्तो रक्तसमुद्भवः॥
उमया भार्त्तवोत्पन्नस्तस्मादङ्गारको ह्ययम्।
अङ्गदोऽङ्गारकान्तिश्च अङ्गानान्तु सदा नृप॥
सौभाग्यादिकरो यस्मात्तस्मादङ्गारको मतः।
भक्त्या चतुर्थ्यां नक्तेन* यो वै श्रद्धासमन्वितः॥
उपोष्यति नरो राजन् नारी वानन्यमानसा।
पूजयेच्च कुजं भक्त्या रक्तपुष्पविलेपनैः॥

अङ्गारकस्वरूपञ्च वक्ष्यमाणमत्स्यपुराणोक्ताङ्गारकचतुर्थी व्रते द्रष्टव्यम्।

गणेशं प्रथमं पूज्य भक्त्या श्रद्धासमन्वितः।
स तु तुष्टः प्रयच्छेत सौभाग्यं रूपसम्पदम्॥
पूर्व्वन्तु कृतसङ्कल्पः स्नानं कृत्वा यथाविधि।
गृहीत्वा मृत्तिकां वन्दे मन्त्रेणानेन भारत॥
इह त्वं वन्दिता पूर्व्वं कृष्णेनोद्धरता किल।
तस्मान्मे दह पाप्मानं यन्मया पूर्व्वसञ्चितं॥
इमं मन्त्रं पठन् वीर आदित्याय प्रदर्शयेत्।
आदित्यरश्मिभिः पूतां गङ्गाजलकणोक्षितां॥
दत्त्वा मृदं शिरसि तां सर्व्वाङ्गेषु नियोजयेत्।
ततः स्नानं प्रकुर्व्वीत मन्त्रपूर्व्वं जले शुभे॥
यूयमापःस्थ सर्व्वेषां दैत्यदानवसञ्चिताः।
स्वेदाण्डजोद्भिदानाञ्च जरायूणाञ्च योनयः॥

---

* भक्तेनेति पुस्तकान्तरे पाठः।

स्नातोऽहं सर्व्वतीर्थेषु सर्व्वप्रस्रवणेषु च।
तथा काश्यादितीर्थेषु मानसादिसरःसु च॥
नदीषु देवखातेषु स्नातोऽहं तेषु तेषु वै।
ध्यायन् पठन्निमं मन्त्रं ततः स्नानं समाचरेत्॥
ततः स्नातः शुचिर्भूतो गृहमागत्य च स्पृशेत्।
दूर्व्वाश्वत्थशमीः स्पृष्ट्वा गाञ्च मन्त्रेण मन्त्रवित्॥
दूर्व्वां नमोक्तमन्त्रेण अश्वत्थशमयस्तथा।
गां दृष्ट्वा तु ततो देवीं वन्द्यादीर प्रदक्षिणम्॥
समालभ्य तु हस्तेन ततो मन्त्रमुदीरयेत्।
सर्व्वदेवमयी देवी निर्म्मितिस्त्वं प्रपूजिता।
तस्मात् स्पृशामि वन्दे त्वां वन्दिता पापहा भव॥
ततो मौनेन चागच्छेत् वन्दिता गृहदेवता।
प्रक्षाल्य च मृदा पादावाचान्तोऽग्निगृहं विशेत्॥
होमं तत्र प्रकुर्व्वीत एतैर्मन्त्रपदैर्व्वरैः।
सर्व्वाय सर्व्वपुत्राय पार्व्वतीयसुताय च॥
कुजाय लोहिताङ्गाय ग्रहेशाङ्गारकाय च।
ओंकारपूर्व्वकैर्मन्त्रैः स्वाहाकारसमन्वितैः॥
अष्टोत्तरशतं वीर अर्द्धमात्रार्द्धमेव च*।
एतैर्म्मन्त्रपदैर्भक्त्या कामतोऽकामतोऽपि वा॥
खादिरैभिः समिद्भिश्च आज्यदध्यैयवैस्तिलैः।
भक्ष्यैर्नानाविधैश्चान्यैः शक्त्या भक्तिसमन्वितः॥

---

* चरु मद्द मिति पुस्तकान्तरे पाठः।

कृत्वा होमं ततो वीर देवं संस्थापयेत् चितौ ।
सौवर्णे राजतं ताम्रं भद्रदारुमयं नृप ॥
देवदारुमयं वापि श्रीखण्डघटितं तथा ।

भद्रदारुः, शरलः ।

गाङ्गेय पात्रे रौप्ये वा अर्च्चरः कुङ्कुमकेसरैः ।
अन्यैर्व्वा लोहितैर्भव्यैः पत्रैः पुष्पैः फलैरपि ॥
रत्नैश्च विविधैर्वीर अथवा भक्तितश्चरेत् ।
यावद्धि विभृतं वित्तं चित्तञ्च वीर शक्तितः ।
तावद्धिवर्द्धते पुण्यं दातुः शतसहस्रकम् ॥
यद्वा ताम्रमये पात्रे वंशजे मृन्मयेऽथवा ।
पूजयेत नरो भक्त्या शक्त्या कुङ्कुमकेसरैः ॥

ओं अङ्गारकाय नमः पादौ । ओं कुञ्जराय नमः वदनं । ओं भीमाय नमः स्कन्धयोः । ओं मङ्गलाय नमः वाह्वोः । ओं वज्राय नमः ऊर्व्वोः । ओं स्वेदजाय नमः जङ्घयोः । ओं लोहिताय नमः शिखायां ।

पुरुषाकृतिं कुञ्जपात्रे एतैर्म्मन्त्रपदैर्यजेत् ।
भूमिपुत्र महादेव, स्वेदोद्भव पिनाकिनः ।
कृपार्थी त्वां प्रपन्नोऽहं गृहाणार्घ्यं नमोऽस्तु ते ॥

अर्घमन्त्रः ।

महादेवाङ्गसम्भूत मेदिनीगर्भसम्भव ।
अङ्गारक महाराज लोहिताङ्ग नमोऽस्तु ते ॥

प्रार्थनामन्त्रः।

सुगन्धपुष्पधूपाद्यैर्ब्राह्मणो यः प्रपूजयेत्।
गुडोदनघृत चीर गोधूमान् शालितण्डुलान्॥
अपेच्य शक्तिं द्रव्याद्वै ब्राह्मणेभ्यो यतेन्द्रियः।
वित्तशाठ्यं न कुर्व्वीत विद्यमाने धने नृप।
वित्तशाठ्यञ्च कुर्व्वाणो नामुत्रफलभाग्भवेत्॥

शतानीक उवाच।

अङ्गारकेण संयुक्ता चतुर्थी नक्तभोजनैः।
उपोष्याः कतिसंख्यास्तु उताहो सकृदेव हि॥

सुमन्तुरुवाच।

चतुर्थीं तु चतुर्थीं तु यदाङ्गारकसंयुता।
उपोष्य तत्र तत्रैव प्रदेयो विधिवत् कुजः॥
उपोष्य नक्तेन विभो चतस्रः कुजसंयुताः।
चतुर्थ्यान्तु चतुर्थ्यान्तु विधानं शृणु यादृशम्॥

एकश्चतुर्थीशब्दः तिथिविशेषवचनः, अपरस्तत्संख्यापर इति

दशसौवर्णिके मुख्यं दशार्द्धे यथापि वा।
सौवर्णपात्रे रौप्ये वा भक्त्या ताम्रमयेऽपि वा।
विंशत्पलानि पात्राणि विंशत्यर्द्धपलानि च।
विंशत्कर्षाणि वा वीर अतोहीनं न कारयेत्॥
शक्त्या वित्तस्य भक्त्या च पात्रे ताम्रमयेऽपि वा।
प्रतिष्ठाप्य कुजपात्रे रक्तवस्त्रेण वेष्टयेत्॥

पुष्पमण्डयिकां कृत्वा दिव्यैर्धूपैस्तु धूपिताम्।
तत्रतत्स्थमर्च्चयेद्देवं पूर्व्वमन्त्रैः क्रमेण तु॥
भक्ष्य भोज्यैरनेकैश्च फलैरन्यैश्च संमतैः।
वस्त्रैः प्रावरणैः पात्रैः शय्योपानद्वरासनैः॥
छत्रैः पुष्पैर्गन्धवरैः शक्त्या वित्तानुसारतः।
ब्राह्मणाय च तं दद्याद्दक्षिणासहितं नृप॥
वाचकाय महाबाहो गुणिने श्रेयसेन च।
अङ्गारकेन संयुक्तां धेनुं शीलसमन्विताम्॥
अनेन विधिना दत्त्वा यथोक्तफलभाग्भवेत्।
इति ते कथिता पुराण तिथीनामुत्तमा तिथिः॥
यामुपोष्य नरो रूपं दिव्यमाप्नोति भारत।
कान्त्याचेयसमं वीर तेजसा रविसप्रभम्॥
प्रभया हरितुल्यश्च सर्व्वतो बलसस्मितः।
ईदृग्रूपं वरं प्राप्य याति सोमसदो नृप॥
प्रसादाद्विघ्नराजस्य गणेशस्य गणायते।
पठतां शृण्वतां राजन् कुर्व्वतांश्च विशेषतः॥
ब्रह्महत्यादिपापानि चीयन्ते नात्र संशय इति।

इति भविष्यत् पुराणोक्तं सुखव्रतम्।

——000——

चतुर्थ्यान्तु महाराज निराहारो व्रतान्वितः।
दत्त्वा तिलान्नं भुङ्क्ते यः स्वयं भुङ्क्ते तिलोदकम्॥

दिवा निराहारो रात्रौ भुङ्क्ते इति विरोध परिहारः।
वर्षद्वये समासिद्धिर्व्रतस्य तु यदा भवेत्।
विनायकस्तस्य तुष्टोददाति फलमीप्सितम्॥

इति भविष्यत् पुराणोक्तं गणपति चतुर्थीव्रतं।

स्कन्द उवाच।

केन व्रतेन भगवन् सौभाग्यमतुलं भवेत्।
पुत्र पौत्रधनैश्वर्य्यं मनुजः सुखमेधते॥
तन्मे वद महादेव व्रतानामुत्तमं व्रतं।
येन चीर्णेन देवेश नरो राज्यञ्च विन्दति॥
राज्ञीव जायते नारी अपि दासीकुलोद्भवा।
राजपुत्रो जयेच्छत्रून् गरुड़ः पन्नगानिव॥
ब्राह्मणो ब्रह्मवर्चस्वं प्राप्य सर्व्वार्च्चको भवेत्।
वर्णाश्रम विहीनोऽपि सोऽपि सिद्धिञ्च विन्दति॥

ईश्वर उवाच।

शृणु वत्स प्रवक्ष्यामि व्रतानामुत्तमं व्रतं।
अपूर्व्वं गणपते र्व्रतं यत् त्रैलोक्य विश्रुतं॥
भगवत्या पुरा चीर्णं पार्व्वत्या पद्मया सह।
सरस्वत्या महेन्द्रेण विष्णुना धनदेन च॥
अन्यैश्च देवैर्म्मुनिभिर्गन्धर्व्वैः किन्नरैस्तथा।

चीर्णमेतद्व्रतं सर्व्वैः पुराकल्पे षड़ानन ।
चतुर्थी या भवेदुक्ता नभोमासस्य पुण्यदा ॥
तस्यां व्रतमिदं कुर्य्यात् कार्त्तिक्यां वा षड़ानन ।
गजाननं चतुर्व्वाहुमेकदन्तं विपाटिनम् ॥

विपाटिनं, मदधारास्राविणं । आयुधानि कृच्छ्रचतुर्थी व्रतवद्विधाय हेम्ना विघ्नेशं हेमपीतासनस्थितं ।

तथा हैमौमयी दूर्व्वां तदाधारे व्यवस्थितां ।

तदाधारे, विघ्नेशासने ।

संस्थाप्य विघ्नहन्तारं कलसे ताम्रभाजने ।
वेष्टितं रक्तवस्त्रेण सर्व्वतोभद्रमण्डले ॥
पूजयेच्छुक्लकुसुमैः पत्रिकाभिश्च पञ्चभिः ।
विल्वपत्रमपामार्गं शमी दूर्व्वा हरिप्रिया ॥

हरिप्रिया, तुलसी ।

एता एव पञ्चपत्रिकाः ।

अन्यैः सुगन्धकुसुमैः पत्रिकाभिः सुगन्धिभिः ।
फलैश्च मोदकैः पश्चादुपहारं प्रकल्पयेत् ।
यथावदुपचारैश्च पूजयेद्गिरिजासुतं ॥

आवाहनमन्त्रः ।

उमासुत नमस्तुभ्यं विश्वव्यापि सनातन ।
विघ्नौघं छिन्दि सकलं अर्घ्यं पाद्यं ददामि ते ॥

अर्घ्यमन्त्रः।

गणेश्वराय देवाय उमापुत्राय वेधसे।
पूजामथ प्रयच्छामि गृहाण भगवन्नमः॥

गन्धमन्त्रः।

गणेश्वराय देवाय वरदाय गजानन।
उमासुताय देवाय कुमारगुरवे नमः॥
लम्बोदराय वीराय सर्व्वविघ्नविहारिणे।

पुष्पमन्त्रः।

उमामङ्गलसद्भूते* दानवानां वधाय वै।
अनुग्रहाय लोकानां स देवः पातु वैश्वसृक्॥

धूपमन्त्रः।

परंज्योतिःप्रकाशाय सर्व्वसिद्धिप्रदाय च।
दीपं तुभ्यं प्रदास्यामि महादेवात्मने नमः॥

दीपमन्त्रः।

गणानान्त्व गणपतिं हव महाकविं-कवीनां।
उपमन्त्रवस्रवं ज्येष्ठ रागं ब्रह्मणां ब्राह्मणस्यातिश्राणं शृण्वन्
ज्योतिभिः सिन्नदसादनं।

उपहारमन्त्रः।

गणेश्वर गणाध्यक्ष गौरीपुत्र गजानन।
व्रतं सम्पूर्णतां यातु त्वत्प्रसादादिमार्थना॥

---

* उमामङ्गलसमुद्भूते इति पुस्तकान्तरेपाठः।

प्रार्थना मन्त्रः।

एवं संपूज्य विघ्नेशं यथाविभवविस्तरैः।
सोपस्करं गणाध्यक्षमाचार्य्याय निवेदयेत्॥
गृहाण भगवन् ब्रह्मन् गणराज प्रदक्षिणं।
व्रतं तद्वचनादद्य सम्पूर्णं यातु सुव्रत॥

दानमन्त्रः।

एवं यः पञ्चवर्षाणि कृत्वोद्यापनमाचरेत्।
ईप्सितांल्लभते कामान् देहान्ते शाङ्करं पदम्॥
अथवा शुक्लपक्षस्य चतुर्थ्यां संयतेन्द्रियः।
कुर्य्याद्वर्षत्रयञ्चैवं सर्व्वसिद्धिमवाप्नुयात्॥
उद्यापनं विनायकस्य करोति व्रतमुत्तमम्।
तेन शुक्लतिलैः कार्य्यं प्रातःस्नानं षड़ानन॥
हेम्ना वा रजतेनापि कृत्वा गणपतिं बुधः।
पञ्चगव्यैस्तु संस्नाप्य दूर्व्वाभिः संप्रपूजयेत्॥
मन्त्रैस्तु दशभिर्भक्त्या दूर्व्वायुक्तैः शिखिध्वज।
दूर्व्वायुक्तैः पञ्चगव्यैःस्नपनं दूर्व्वायुक्तैर्दशभिर्मन्त्रैः पूजा एकस्य मन्त्रस्य दशत्वं।
इत्येवं कथितं वत्स सर्व्वसिद्धिप्रदं शुभं।
व्रतं दूर्व्वागणपतेः किमन्यच्छ्रोतुमिच्छसि॥

इति सौरपुराणोक्तं दूर्व्वागणपतिव्रतम्।

———000———

भरण्यान्तु चतुर्थ्यान्तु शनैश्चरदिने यमम्।

पूजयन् सप्तजन्मोत्थैर्मुच्यते पातकैर्नरः॥

इति कूर्म्मपुराणोक्तं यमव्रतम्।

——०*०——

अगस्त्यः।

अथ विघ्नहरं राजन् कथयामि तवानघ।
येन सम्यक्कृतेनेह न विघ्नमुपजायते॥
चतुर्थ्यां फाल्गुने मासि ग्रहीतव्यं व्रतन्त्विदम्।
नक्ताहारेण राजेन्द्र तिलान्नं पारणं स्मृतं॥

पारणं नक्तभोजनम्।

तदेव वह्नौ होतव्यं ब्राह्मणाय च तद्भवेत्।
दिव्याय शूराय गजाननाय
दंष्ट्राकरालाय नमः शिवाय।
नगात्मजादेहमलोद्भवाय
कुमारहस्ताय नभश्चराय॥
एवं संपूज्य मनुभिर्होमं कुर्य्याद्यथाविधिः।

मनुभिर्मन्त्रैः।

एकस्यैव वृथा बहुत्वं ब्रवीमि तत् होमं ब्रवीमि होम-
मन्त्रो होमद्रव्यञ्च तदेव वह्नौ होतव्यं इत्यादिनोक्तं वर्त्तमान
समीपे वर्त्तमानवदिहातीते लट्।

चतुर्म्मासव्रतञ्चैव कृत्वेत्थं पञ्चमे तथा।
सौवर्णं राजतं वापि कृत्वा विप्राय दापयेत्॥

ताम्रपात्रे पायसाद्यैश्चतुर्भिः सहितं नृप ।
पञ्चमेन तिलैः सार्द्धं गणशान्तिकरेण च ॥
मृण्मयानि हरिद्रैस्तु विधिनानेन कारयेत् ।
होमञ्च राजतं शक्त्या विधिनानेन दापयेत् ॥
इत्थं व्रतमिदं कृत्वा सर्व्वविघ्नात् स मुच्यते ।
हयमेधस्य यज्ञे तु सञ्ज्ञाते सगरः पुरा ॥
एतदेव हरश्चक्रे त्रिपुरं येन हन्ति* च ।
मया समुद्रमथने त्वेतदेव व्रतं कृतं ॥
अन्यैरपि महीपालैरेतदेव पुरा कृतं ।
ततो निर्व्विघ्नसिद्ध्यर्थं विघ्नोपशमनं परं ॥
अनेन कृतमात्रेण सर्व्वविघ्नैः प्रमुच्यते ।
ततो रुद्रपुरं याति वाराहवचनं यथा ॥
विघ्नानि तस्य न भवन्ति गृहे कदाचित्
धर्म्मार्थकामसुखसिद्धिविघातकानि ।
यः सप्तमीन्दुशकलाकृतिकान्तदृष्ट-
विघ्नेशमर्च्चयति नक्तं कृती चतुर्थ्यां ॥

इति वराहपुराणोक्तमविघ्नविनायकव्रतम् ।

——000——

ब्रह्मोवाच ।

माघमासे तु सम्प्राप्ते चतुर्थी कुन्दसंज्ञिता ।

---

* घातिचेति पुस्तकान्तरेपाठः

सोपोष्या तु सुरश्रेष्ठ ततो राज्यं भविष्यति॥
सर्व्वोपहारसम्पन्नं सर्व्वोपस्करमाहरेत्।
कन्दुपक्वं फलं शाकं लवणं गुड़शर्करा॥
खण्डं कुस्तुम्बरी जीरं धान्यानि विविधानि च।
दातव्यानि रघुश्रेष्ठ कन्यकानान्तु भक्तितः॥

खण्डं, शर्कराभेदः।

सूर्य्यपात्रं* तथा भाण्डं मृण्मयानि विशेषतः।
उद्दिश्य दापयेद्देवीं प्रीयतां मे सदा इति॥
अनेन विधिना शक्र सौभाग्यं पुत्रसन्ततिः।
वर्द्धते नात्र सन्देहो नान्यथा मम भाषितं॥

इति देवीपुराणोक्तं कुन्दचतुर्थीव्रतम्।

——000——

ऋषय ऊचुः।

निर्व्विघ्नेन तु कार्य्याणि कथं सिद्ध्यन्ति सूतज।
अप्रसिद्धिः कथं नृणां पुत्रसौभाग्यसम्पदां॥
दम्पत्योः कलहे चैक्यं वन्धुभेदे तथा नृणां।
उदासीनेषु लोकेषु कथं संमुखता भवेत्॥
विद्यारम्भे तथा नृणां वणिज्यायां कृषौ तथा।
नृपतेः परचक्रस्य जयसिद्धिः कथं भवेत्॥
कां देवतां नमस्कृत्य पूजासिद्धिकरी नृणां।

* सूर्पपात्रमिति पुस्तकान्तरे पाठः।

सूत उवाच।

सन्नद्धयोः पुरा विप्राः कुरुपाण्डवसेनयोः।
पृष्टवान् देवकीपुत्रं धर्म्मराजो युधिष्ठिरः॥
निर्व्विघ्नेन जयोह्येषां वद देव कथं भवेत्।
कां देवतां नमस्कृत्य समग्रां ह्यलभन्महीम्॥

श्रीकृष्ण उवाच।

पूजयस्व गणाध्यक्षं विघ्नेशं सिद्धिदायकं।
तस्मिन् संपूजिते राजन् सर्व्वान् कामानवाप्नुयात्॥

युधिष्ठिर उवाच।

देव केन विधानेन पूजनार्हो गणाधिपः।
पूजितश्च तिथौ कस्यां सिद्धिदो गणपो भवेत्॥

श्रीकृष्ण उवाच।

गजवक्त्रन्तु शुक्लायां चतुर्थ्यां पूजयेन्नृप।
यदा वोत्पद्यते भक्तिर्मासि पूज्यो गणाधिपः॥
प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप।
स्वशक्त्या गणनाथस्य स्वर्णरौप्यां यथाकृतिं॥
कृत्वा पूजां प्रयत्नेन स्नाप्य पञ्चामृतैः पृथक्।
गणाध्यक्षेति नाम्ना वै गन्धं दद्याच्च भक्तितः॥
विनायकेति पुष्पाणि धूपञ्चोमासुतेति च।
दीपं रुद्रप्रियायेति नैवेद्यं विघ्ननाशन॥
वस्त्रं सर्व्वप्रदे रक्तं पुष्पं दद्यात् शुभाह्वतं।
ततो दूर्व्वां कुशान् गृह्य विंशतिञ्चैकमेव च॥

पूजयेत प्रयत्नेन एभिर्नामपदैः पृथक्॥
गणाधिप नमोस्तेऽस्तु, उमापुत्राघनाशन।
विनायकेशपुत्रेति सर्व्वसिद्धिप्रदायक॥
एकदन्तेभवक्त्रेति नमो मूषिकवाहन।
कुमारगुरवेत्यन्तं पूजनीयः प्रयत्नतः॥
दूर्व्वायुग्मं गृहीत्वा तु गन्धयुक्तं प्रपूजयेत्।
एकैकेन च नाम्ना वै पूज्य एकेन सर्व्वतः॥
एकेन, दूर्व्वाङ्कुरेण, युग्मे नावशिष्टेन।
सर्व्वतः, सर्व्वैर्नामभिः पूजा कार्य्या॥
तथैकविंशतिर्गृह्य मोदकान् घृतपाचितान्।
स्थापयित्वा गणाध्यक्षं समीपे कुरुनन्दन॥
दश विप्राय दातव्या स्वयं चाद्यात्तथादश।
एकं गणाधिपे दद्यात् सनैवेद्यं नृपोत्तम॥
विप्राय भोजनं दद्याद्भुञ्जीयात्तैलवर्ज्जितं।
कृत्वा नैमित्तिकं कर्म्म पूजयेदिष्टदेवतां॥
एवं कृते धर्म्मराज विघ्ननाथस्य पूजने।
विजयस्ते भवेन्नूनं सत्यं सत्यं मयोदितः॥
विद्याकामो लभेद्विद्यां धनकामो धनं यथा।
जयं विजयकामस्तु, पुत्रार्थी विन्दते सुतान्॥
पतिकामा च भर्त्तारं सौभाग्यञ्च सुवासिनीम्।
विधवा पूजयित्वा तु वैधव्यं नाप्नुयात् क्वचित्॥
वैष्णवाद्यासु दीक्षासु आदौ पूज्यो गणाधिपः।
यस्मिन् संपूजिते विष्णुरीशो भानुस्तथा उमा॥

हव्यवाहमुखा देवाः पूजिताःस्युर्न संशयः।
चण्डिकाद्या मातृगणाः परितुष्टा भवन्ति च ॥
यस्मिन् संपूजिते भक्त्या विप्राः सिद्धिविनायके।
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥
सिद्ध्यन्ति सर्व्वकार्य्याणि सिद्धिदस्य प्रसादतः।

इति स्कन्दपुराणोक्तं सिद्धिविनायकव्रतम्।

——000——

अथास्यामेव भविष्योत्तरोक्तं कृत्यान्तरम्।
मासि भाद्रपदे शुक्ला शिवलोके प्रपूजिता ॥
तस्यां स्नानं तथा दानमुपवासोऽर्चनं तथा।
क्रियमाणं शतगुणं प्रसादाद्दन्तिनो नृपेति ॥

चतुर्थ्यामेवानुषङ्गः।

अस्यां चन्द्रदर्शनं न कर्त्तव्यम् ॥

अतएवोक्तं मार्कण्डेयेन।

सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चन्द्रदर्शनम्।
मिथ्याभिदूषणं कुर्य्यात्तस्मात् पश्येन्न तं तदेति* ॥

पराशरस्मृतावपि।

कन्यादित्ये चतुर्थ्यान्तु शुक्ले चन्द्रस्य दर्शनम्।
मिथ्याभिदूषणं कुर्य्यात्तस्मात् पश्येन्न तं तदा ॥

अत्र सिंहादित्यकन्यादित्यशब्दाभ्यां चान्द्रो भाद्रपद उपलक्ष्यते।

---

* चतुर्थ्यां न पश्येदित्यन्वयः प्रधानक्रियान्वयनात् तेन चतुर्थ्यामुदितस्य पञ्चम्यां न निषेध इति पुस्तकान्तरे पाठः।

सौरमासग्रहणे शिष्टाचारविरोधप्रसङ्गात्।

दोषस्य शान्तये सिंहः प्रसेनमिति वै पठेत्।

स च श्लोको विष्णुपुराणे।

सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः।

सुकुमारक मारोदीस्तवह्येष स्यमन्तक इति॥

अथ कार्त्तिकशुक्लचतुर्थ्यां कूर्मपुराणोक्तं नागव्रतम्।

कार्त्तिकशुक्लपक्षमुपक्रम्य।

तिथौ युगाद्ययायान्तु समुपोष्य यथाविधि।

शङ्खपालादिनागानां शेषस्य च महात्मनः॥

पूजा कार्य्या पुष्प-गन्ध-क्षीराप्यायनपूर्वकमिति।

युगाद्ययायाश्चतुर्थ्याः प्रातर्मध्याह्नव्यापिन्याश्च कर्त्तव्यम्।

तथा च स्कन्दपुराणे।

प्रातर्मध्यन्दिने तत्र तत्रोपोष्य फणीश्वरान्।

क्षीरेणाप्याय्य पञ्चम्यां पारयेत् प्रयतो नरः।

विषाणि तस्य नश्यन्ति न तं हिंसन्ति पन्नगाः॥

इति नागव्रतम्।

अथ मार्गशीर्षशुक्लचतुर्थ्यामारभ्य स्कन्दपुराणोक्तं वरचतुर्थीव्रतम्।

चतुर्थ्यां मार्गशीर्षे तु शुक्लपक्षे नृपोत्तम।

प्रारभ्य प्रतिमासञ्च चतुर्थ्यां गणनायकम्॥

संपूज्य विधिना कुर्य्यादेकभक्तं समाहितः।

अक्षारलवणं त्वेवं पूर्णसम्वत्सरे ततः॥

द्वितीये वत्सरे चाथ नक्तं प्रतिचतुर्थि च ।
कुर्य्याद्गणेशमभ्यर्च्य तृतीयेऽयाचितं तथा ॥
एवमेव प्रकुर्व्वीत चतुर्थे स्यादुपोषणम् ।
ततश्चतुर्थं संपूर्णं तदुद्यापनमाचरेत् ।
इदं वरचतुर्थ्याख्यं व्रतं सर्व्वार्थसाधकम् ॥

इति स्कन्दपुराणोक्तं वरचतुर्थीव्रतम् ।

अथास्यामेव ब्रह्मपुराणोक्तं गौरीचतुर्थीव्रतम् ।

उमाचतुर्थ्यां माघे तु शुक्लायां योगिनीगणैः ।
प्रागभ्यर्चयित्वा सृष्टा च भूयः स्वाङ्गात् स्वकैर्गुणैः ॥
तस्मात्सा तत्र संपूज्या नरैः स्त्रीभिर्व्विशेषतः ।
कुन्दपुष्पैः प्रयत्नेन सम्यग्भक्त्या समाहितैः ॥
कुङ्कुमालक्तकाभ्याञ्च रक्तसूत्रैः सकङ्कणैः ।
अर्घैः पुष्पैस्तथा धूपैर्दीपैर्व्बलिभिरेव च ॥
गुड़ार्द्रकाभ्यां पनसलवणाभ्याञ्च पालकैः ।
पूज्याः स्त्रियश्च विधवास्तथा विप्राश्च शोभनाः ॥
सौभाग्यवृद्धये पश्चात् भोक्तव्यं बन्धुभिः सहेति ।
पालकैः कुष्माण्डैर्म्र्म्भाण्डविशेषैरित्यर्थः ।

इति गौरीचतुर्थीव्रतम ।

लवणैर्धान्यकैर्युक्तं जीरकं मरीचानि च ।
हिङ्ग शुण्ठीं हरिद्राञ्च सर्व्वं परिकरं तथा ॥
चतुर्थ्यामेकभक्ताशी सक्तं दत्त्वा कुटुम्बिने ।
गृहेषु समस्तु तथा शिलायुक्तानि भारत ॥

शिला, मनःशिला।

एतच्छिलाव्रतं नाम लक्ष्मीलोकप्रदायकम्।

इति भविष्योत्तरोक्तं शिलाव्रतम्॥

———ooo———

चतुर्थ्यां नक्तभुग्दद्यादब्दान्ते हेमवारणम्।

वारणः, करी।

व्रतं वैनायकं नाम सर्व्वविघ्नोपशान्तिदम्।

इति पद्मपुराणोक्तं वैनायकव्रतम्।

———o*o———

नन्दिकेश्वर उवाच।

विनायकचतुर्थ्याख्यं व्रत वक्ष्यामि तेऽनघ।
धन्यं यशस्यमायुष्यं समीहितफलप्रदम्॥
विघ्नोपशमनायालं सर्व्वसिद्धिप्रदायकम्।
प्रियं गणपतेर्नित्यमृषिभिश्चाप्युपासितम्*॥
मार्गशुक्लचतुर्थ्यान्तु प्राह्यं व्रतमिदं महत्।
नक्ताहारेण विप्रेन्द्र तिलान्नं पारणं स्मृतम्॥
तदेव वह्नौ होतव्यं ब्राह्मणाय ददेत् सदा।
नद्यां नदे वा नैवेद्यं विघ्नराजाय संयमी॥
पूजयेत् गणपतिं रात्रौ गन्धैः पुष्पैर्यथाक्रमम्।
स्थापितं कुम्भ† संस्थं तं स्नापितं कुङ्कुमाम्भसा॥

---

* प्रियं हि विघ्नराजस्य इदं व्रतमुपासितमिति पाठान्तरम्।

† सिन्दूरासितकुम्भमिति पुस्तकान्तरे पाठः।

सुमार्गादिष्वथो तैस्तु नामभिश्चार्च्चयेत्ततः।
विनायकश्चैकदन्तः कृष्णपिङ्गो गजाननः॥
लम्बोदरो भालचन्द्रो हेरम्बो विकटस्तथा।
वक्रतुण्डश्चाखुरथो विघ्नराजो गणाधिपः॥
इत्येवं मासनाम्ना तु जपहोममथार्च्चनम्।
कृत्वैवं प्रार्थयेत् पश्चान्मन्त्रेणानेन भक्तिमान्॥
द्वैमातुराय वीराय परशुहस्ताय वै नमः।
विघ्नेशायैकदंष्ट्राय नमो लम्बोदराय च॥
नमस्ते गजवक्त्राय सर्व्वज्ञायाष्टमूर्त्तये।
समीहितार्थसंप्राप्तौ निर्विघ्नं कुरु मे सदा॥
भोजयित्वा ततो विप्रान् यथाशक्त्या विमत्सरः।
भुञ्जीत च स्वयं नक्तं वाग्यतोऽन्नमकुत्सयन्॥
सायम्प्रातश्च सर्व्वेषां भोजनं श्रुतिचोदितम्।
एकभक्तं पुनस्तस्मादुपवासस्ततोधिकः॥
उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचितम्।
अयाचितात्परं नक्तं तस्मान्नक्तं तपो भवेत्॥
देवैस्तु भुक्तं पूर्व्वाह्णे मध्याह्ने मानुषैस्तथा।
अपराह्णे च पितृभिः सन्ध्यायां प्रेतराक्षसैः॥
वेलास्वेता अतिक्रम्य नक्तभोजी च यो भवेत्।
स तैस्तु तर्पितैः सर्व्वैर्यत्पुण्यं तदवाप्नुयात्॥
हविष्यभोजनं स्नानमाहारस्य च लाघवम्।
अधिकार्थमधः शय्यां नक्तभोजी समाचरेत्॥
एवं संवत्सरस्यान्ते व्रते पूर्णे गजानन।

अत्रापि कथ्यचतुर्थ्यामुक्तरूपं निर्म्मापणम्।

सौवर्णरौप्ये वारौप्यमधिवास्य प्रयत्नतः।
ताम्रपात्रैर्द्दादशभिर्म्मूर्त्तैर्व्वाथ वैणवैः॥
तिलसंमोदकभृतैः प्रातर्व्विप्राय दापयेत्।
दद्याच्च विधिवद्भक्त्या वृषभञ्च गवा सह॥
अष्टाङ्गपदसंयुक्तसप्तधान्यसमन्वितम्।
भोजयेत् ब्राह्मणान् पश्चात् वित्तशाठ्यविवर्ज्जितः॥
इत्थं व्रतमिदं चीर्त्वा सर्व्वविघ्नैः प्रमुच्यते।
विद्यां श्रियं यशः सौख्यं प्राप्नोत्यविकलं सदा*॥
अपुत्रो लभते पुत्रं दरिद्रस्तूत्तमं धनम्।
कन्यार्थी लभते कन्यां परत्र च शुभां गतिम्॥
श्रूयतेऽत्र पुरावृत्तं पुष्पधूपादिसाधनम्।
मल्लिकारक्तमम्भोज जातितगरमेव च॥
पुष्पिकां केतकीं वानसुवर्णकुसुमानि च।
प्रति मासन्तु कार्य्याणि पुष्पाण्येतानि नारद॥
फलानामप्यभावे तु वीजपूरं प्रशस्यते।
अलाभेतूक्तपुष्पाणां शतपत्रं विशिष्यते॥
नारिकेलं वीजपूरं नारङ्गं दाड़िमं तथा।
सारिवां पनसञ्चैव सहकारं तथैव च॥
चीरीफलं वामलकं कुष्माण्डं त्रपुषं तथा।
भूमीफलं† क्रमाच्चात्र अर्घकाले प्रयोजयेत्॥

---

* फलमिति पुस्तकान्तरे पाठः।

† पुमीफलमिति पाठान्तरं।

एकदन्त महादन्त गौरीसुत गणाधिप ।
चतुर्थीव्रतपूजार्थं अर्घं गृह्ण नमोऽस्तु ते ॥

अर्घमन्त्रः ।

शतपत्रं तथा कुन्दं मरुकङ्कणवीरकम् * ।
स्फारविन्दं बकुलाशोकानादाय पूजयेत्ततः ॥
अर्थान् सम्वर्द्धयति वर्द्धयतीह धर्म्मं
कामं प्रसाधयति तस्य पिनष्टि पापम् ।
यः पूजयन्निखिललोकनुताङ्घ्रिपद्मम्
गौरीसुतं फणितनूदरमादिदेवम् ॥
विघ्नाश्च तस्य न भवन्ति गृहे कदाचित्
धर्म्मार्थकामसुखसिद्धिविधायकाय ।
यः सप्तमीन्दुशकलाकृतिकान्तिदन्तम्
विघ्नेशमर्च्चयति तं सुकृती चतुर्थ्यां ॥
आनन्ददां सकलपापहरां चतुर्थीं ।
या स्त्री करोति विधवा सधवा च कन्या ।
सा स्वे गृहे सुखशतान्यनुभूय भूयो
हेरम्बमातृभवनं मुदितः प्रयाति ॥
एवञ्च यः प्रकुरुते वरदां चतुर्थीं
वैनायकीं विविधपुत्रसुकान्तिकीर्त्तिः ।
शम्भोः शशाङ्ककलिकाङ्कितशेखरस्य
स्थानं प्रयाति परमैकसुखस्वरूपम् ॥

---

* मरुकं करवीरकमिति पुस्तकान्तरे पाठः ।

स्थविरगणपतिं पूजयन्तुरञ्जयन्त्यां
सकृदपि समुपेत्य ध्वस्तदोषास्तु मर्त्याः।
द्विरदवदनमाद्यं ते प्रयान्तीह धन्याः
सुरनगरपुरन्ध्रीलोचनैः प्रीयमानाः॥

इति स्कन्दपुराणोक्तं नक्तचतुर्थीव्रतम्।

इति श्रीमहाराजाधिराज महादेवस्य समस्तकरणाधी-
श्वर-सकलविद्याविशारद श्रीहेमाद्रिविरचिते
चतुर्व्वर्गचिन्तामणौ व्रतखण्डे
चतुर्थीव्रतानि॥

अथ नवमोऽध्यायः।

———ooo———

अथ पञ्चमीव्रतानि।

चेतो लक्ष्मीरमणचरणद्वन्द्वराजीवलीनं।
हर्षोत् कर्षाद्दमिरसलसङ्गृङ्गभङ्गीमुपति॥
यस्य स्फारस्फुरितमतिना तेन हेमाद्रिणेह।
प्रस्तूयन्ते विपुलफलकृत्पञ्चमीषु व्रतानि॥

युधिष्ठिर उवाच।

कथं सा प्राप्यते लक्ष्मीर्दुर्लभा यामरैः* र्विभो।
दानेन तपसा वापि व्रतेनापि† वदस्व तत्॥
जप-होम-नमस्कारैः संस्कारैर्वा पृथग्विधैः।
एतद्वद यदुश्रेष्ठ सर्व्वं वित्त्वं मतिर्मम॥

कृष्ण उवाच।

भृगोः ख्याता समुत्पन्ना पूर्वं स्त्री श्रीपतेः शुभा।
वासुदेवाय दत्ता सा मुनिना मम हृदये॥
वासुदेवोऽपि तां प्राप्य पीनोन्नतपयोधरां।
पद्मपत्रविशालाक्षीं पूर्णचन्द्रनिभाननां॥
भाभासितदिगाभोगामर्काङ्गानोः प्रभामिव।

---

* नरैरितिपुस्तकान्तरे पाठः।

† नियमेनेति पुस्तकान्तरे पाठः।

नितम्बाडम्बरवतीं मत्तमातङ्गगामिनीं।
रेमेसह मया राजन् विभ्रमोद्भ्रान्तचिन्तया॥
सा च विष्णुं जगज्जिष्णुं पतिं श्रीजगतां पतिं।
प्राप्य कृतार्थमात्मानं मेने मानयशोधरा॥
कृष्ण कृष्ण जगत्सर्वं भगवन् धारितं त्वया।
लक्ष्मि मां पाल पञ्चम्यां सहृष्यैव महीतलम्॥
क्षेमं सुभिक्षमारोग्यमनाक्रन्दमनामयान्।
रसाज्जलं जायतेऽस्मात् हविर्व्वह्नौ हुनेत्ततः॥
चातुर्वर्ण्यं ससङ्कीर्णं पाल्यते पार्थ पार्थिवैः।
विरोचनप्रभृतिभिर्दृष्टैव दैत्यसत्तमैः॥
तपसस्तमथाभ्यर्च्यमग्निमाश्रित्य संयमैः।
सोमसंस्था हविः संस्था पाकसंस्थादिभिर्मखैः॥
समाचारैः समभ्यर्च्चा येषु भक्तिप्रकारिभिः।
पञ्चधर्म्मप्रधानैस्तैर्द्देवदानवराक्षसैः॥
जगदासीत्समाक्रान्तं विक्रमेन क्रमेण च।
लक्ष्मी विलासप्रभवो देवानाञ्च सदा मदः॥
शीलं धर्म्मञ्च सत्यञ्च सद्योलक्ष्मीश्च सङ्गृहे।
सत्यशौचविहीनां स्तान् देवान् सन्त्यज्य चञ्चला॥
जगाम दीना वाकूलं कुदेवानुरागतः।
लक्ष्म्या भावितदेहैस्तैः पुन रुद्धतमानसैः॥
व्यवहर्त्तुं समारब्धामन्यायेन मदोद्धतैः।
वयं देवा वयं यज्ञाः वयं विप्रा वयं जगत्॥
ब्रह्मविष्णू सयक्षाद्या वयं सर्व्वदिवौकसः।

अहङ्कारविमूढांस्तान् ज्ञात्वा दानवसत्तमान् ॥
सागरे सलिले पार्थ भ्रान्तचित्ता भृगोः सुता ।
क्षीरोदमध्ये गतया लब्धः क्षीणार्थसम्भ्रमम् ॥
निरामदं गतश्रीकमभवद्भुवनत्रयम् ।
गतश्रीकमथात्मानं मत्वा शम्बरसूदनम् ॥
पप्रच्छाङ्गिरसं विप्रं ब्रूहि किञ्चित् व्रतं मम ।
येन संप्राप्यते लक्ष्मीर्लब्धा न चलते पुनः ॥
निश्चलापि सुहृन्मित्र भोग्या भवति सा मुने ।
न सा स्त्रीत्यभिमन्तव्या कन्या सा पाल्यते गृहे ॥
परार्थं या सुहृन्मित्र भृत्यैर्नैवोप भुज्यते ।
शक्रस्यैतद्वचः श्रुत्वा बृहस्पतिरुदारधीः ।
कथयामास सञ्चिन्त्य शुभं श्रीपञ्चमीव्रतम् ॥
यत् पुरा कस्यचित् नोक्तं व्रतानामुत्तमं व्रतम् ।
तदहं कथयामास सरहस्यमशेषतः ॥
तच्छ्रुत्वा कर्त्तुमारब्धं शुभं नरवरैः सह ।
दैत्यदानवगन्धर्वैर्यक्षैः प्रक्षीणकल्मषैः ॥
सिद्धैः प्रसिद्धचरितैर्विष्णुना प्रभविष्णुना ।
ब्राह्मणैर्ब्रह्मतत्त्वज्ञैः समर्थैः पार्थिवैः सह ।
कैश्चित् सात्विकभावेन राजसेनापरैरपि ॥
तामसेन तथा कैश्चित् कृतं व्रतमिदं तथा ।
व्रते समासभूयिष्ठे निष्ठया परया प्रभो ॥
देवानां दानवानाञ्च युधि चासीदमोघता ।
निर्मथ्य भुजवीर्येण सागरं सरितां पतिम् ।

समाहरामोह्यमृतं हित्वा यतिदिवौकसः॥
इत्येतत्समयं कृत्वा समन्युर्वरुणालयं।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिं॥
मथ्यमाने जलाज्जातश्चन्द्रः शीतांशुरुज्ज्वलः।
अनन्तरे समुत्पन्ना लक्ष्मीः चीराब्धिमध्यतः॥
तया चालोकिताः सर्वे दैत्यदानवसत्तमाः।
आलोक्य तान् जनामासौ विष्णोर्वक्षस्थलं शुभम्।
विधिना विष्णुना चीर्णं व्रतं तेनाब्धिसम्भवा॥
शरीरस्था बभूवास्य विभ्रमोद्भ्रान्तलोचना।
किञ्च राजसभावेन शक्रे णैव कृतं यतः॥
तेन स्वर्गवलैश्वर्यं प्राप्यतेस्म महर्द्धिमत्।
तमसावृतचित्तैस्तु सञ्चीर्णं दैत्यदानवैः॥
तेन तेषामथैश्वर्य्यं दृष्टनष्टमभूत् किल।
एवं स श्रीकमभवत् सदेवासुरमानुषं॥
जगति जगतांश्रेष्ठ व्रतस्यास्य प्रभावतः।

युधिष्ठिर उवाच।

कथमेतद्व्रतं कृष्ण क्रियते मनुजैः कदा।
प्रारभ्यते पार्थ कस्मिन् सर्व्वं वद जनार्दन॥

कृष्ण उवाच।

यदिन्द्रेण पुरा चीर्णं श्रीवियुक्तेन पार्थिव।
श्रीसमृद्धिकरं तद्धि शृणु श्रीपञ्चमीव्रतम्॥
मार्गशीर्षे सिते पक्षे पञ्चम्यां पन्नगोत्सवे।

उपवासस्य नियमं कुर्य्यात् पद्मां स्मरेद्धृदि॥
स्वर्णरौप्यां यथा शक्त्या ताम्रां मृत्काष्ठजामथ।
चित्रपट्टगतां देवीं लक्ष्मीं क्ष्मापाल कारयेत्॥
पद्मासनां पद्महस्तां पद्मां पद्मदलेक्षणाम्।
दिग्गजेन्द्रैः स्नाप्यमानां काञ्चनैः कलसोत्तमैः॥
लक्ष्मीरूपनिर्म्माणन्तु विष्णुधर्म्मोत्तरोक्तं वेदितव्यम्।

तद्यथा।

समुत्थिता श्रीः कर्त्तव्या शङ्खाम्बुजकरा शुभा।
सुखस्थिता महाभाग पद्मे पद्मकरा शुभा॥
द्विभुजा चारुसर्व्वाङ्गी सर्व्वाभरणभूषणा।
द्वौ च मूलकरौ मूर्द्ध्नि कार्य्यौ विद्याधरौ शुभाविति॥
ततो यामत्रये याते निम्नगायाः मृदाथवा।
स्नानं कुर्य्यादसंभ्रान्तः शक्तिमदुपचारतः॥
देवान् पितॄंश्च सन्तर्प्य ततो देवगृहं व्रजेत्।
तत्रस्थां पूजयेद्देवीं पुष्पैस्तत्कालसम्भवैः॥
चपलायै नमः पादौ चञ्चलायै च जानुनी।
कटीं कमलवासिन्यै नाभिं ख्यात्यै नमो नमः॥
स्तनौ मन्मथवासिन्यै ललितायै भुजद्वयं।
उत्कण्ठितायै कम्बुञ्च माधव्यै मुखपङ्कजम्॥
नमः श्रियै शिरः पूज्य दद्यान्नैवेद्यमादरात्।
फलानि च यथालाभं विरूढं धान्यसञ्चयम्॥
ततः सुवासिनी पूज्या कुङ्कुमैः कुसुमैन च।
भोजयेन्मधुरान्नेन प्रणिपत्य विसर्ज्जयेत्॥

ततस्तु तण्डुलप्रस्थं घृतपात्रेण संयुतम्।
ब्राह्मणाय प्रदातव्यं सा श्रीर्मे प्रीयतामिति॥
निर्व्वर्त्यैतदशेषेण ततो भुञ्जीत वाग्यतः।
मासानुमासं कर्त्तव्यं विधिनानेन भारत॥
श्रीर्लक्ष्मीः कमला सम्पत् पद्मा नारायणी तथा।
पद्मधृतिः स्थितिः पुष्टिस्तुष्टिः* सिद्धिः क्षमा क्रमात्॥
मासानुमासं राजेन्द्र प्रीयतामिति कीर्त्तयेत्।
ततो द्वादशमे मासि सम्प्राप्ते पञ्चमीदिने॥
वस्त्रमण्डयिकां कृत्वा पुष्पगन्धादिवासितां।
शय्यायां स्थापयेल्लक्ष्मीं सर्व्वोपस्करसंयुताम्॥
सौभाग्याष्टकसंयुक्तां नेत्रपट्टावृतस्तनीं।
सप्तधान्यसमोपेतां रसधातुसमन्विताम्॥
पादुकोपानहच्छत्रभाजनासनसंस्कृताम्।
देवीं संपूज्य विधिवद्ब्राह्मणाय कुटुम्बिने॥
व्यासाय वेदविदुषे यस्मै वा रोचते स्वयं।
सोपस्करां सवत्साञ्च धेनुं दत्त्वा क्षमापयेत्॥
क्षीराब्धिमथनोद्भूते विष्णोर्वक्षस्थलालये।
सर्व्वकामप्रदे देवि सिद्धिं यच्छ नमोस्तु ते॥
ततः सुवासिनीः पूज्या वस्त्रैराभरणैः शुभैः।
भोजयित्वा स्वयं पश्चाद्भुञ्जीत सह बन्धुभिः॥
य एवं कुरुते पार्थ भक्त्या श्रीपञ्चमीव्रतं।
तस्य श्रीर्भवने भाति कुलानामेकविंशतिम्॥

---

* शान्तिरिति पुस्तकान्तरेपाठः।

नारी वा कुरुते या तु प्राप्यानुज्ञां स्वभर्तृतः ।
सुभगा दर्शनीया च बहुपुत्रा च जायते ॥
यः पञ्चमीव्रतमिदं दयितं मुरारे-
र्भक्त्या समाचरति पूज्य भृगोस्तनूजाम् ।
राज्यश्रियं स भुवि भव्यजनोपभोग्यं
भुक्त्वा प्रयाति भवनं मधुसूदनस्य ॥

इति श्रीभविष्यपुराणोक्तं श्रीपञ्चमीव्रतं सम्पूर्णम् ।

——000——

श्रीकृष्ण उवाच ।

माहात्म्यमभिवक्ष्यामि पञ्चम्यास्तव भारत ।
जयेति या च विख्याता व्रतिनां जयदायिनी ॥
यस्माज्जया जयाशब्दं कुर्व्वन्ति व्रतिनो बुधाः ।
परिपूर्णं व्रतं यस्यां सा ज्ञेया जयपञ्चमी ॥
जया च विजया चैव जयन्ती पापनाशिनी ।

जया, कार्त्तिकशुक्लपञ्चमी ।

केशवो भगवान् शम्भुर्गङ्गाद्याः सरितस्तथा ।
प्रभासाद्यानि तीर्थानि जम्बूद्वीपसरांसि वा ॥
प्रयागं पुष्करं गङ्गां गयाक्षेत्रं कुरुष्वथ ।
एतान्यन्यानि तीर्थानि व्रतिनः स्नापयन्त्युत ॥
तस्मात् सर्व्वप्रयत्नेन स्नानं कुर्य्याज्जयादिने ।
स्नेहेनोद्वर्त्तनेनैव द्विजान् संस्नापयेद्बहून् ॥
तीर्थे प्रस्रवणे गत्वा स्नापयेत स्वयं हरिं ।

जयासहितमित्यर्थः।

शङ्ख-चक्र-गदापाणिं वामभागे जयां स्थितां।
वरदाभयहस्ताञ्च श्वेतां हंसोपरिस्थिताम्॥
पूजयेद्विविधैः पुष्पैर्धूपनैवेद्यजादिभिः।
एभिर्मन्त्रैस्तु तं देवं जयाञ्च प्रतिपूजयेत्॥
पादौ वै पद्मनाभाय जानुभ्यो माधवीति च।
ऊरू वै नारसिंहाय मध्ये वै मन्मथाय वा॥
दामोदरायेत्युदरं वक्षुः श्रीवत्सधारिणे।
श्रीकण्ठायेति कण्ठं वा बाहू सर्व्वास्त्रधारिणे॥
मुखं पद्ममुखायेति शिरः सर्व्वात्मने नमः।
अनेन विधिना चैव पूजयेद्गरुड़ध्वजम्॥
अनन्तरं तु तां देवीं वेणुपात्रोपरिस्थिताम्।
जातीलताधोभागस्थितां देवीं प्रपूजयेत्॥
नमः पृष्ठे पादयुग्मे जानुभ्याञ्च श्रिये नमः।
नदायै च कटीदेशे विजयायै च वक्षसि॥
शिरः सर्व्वार्थदायिन्यै सर्व्वाङ्गे विजयां तथा।
विधिनानेन संपूज्य अर्च्चयेद्विजयां हरिं॥
ॐ जयायै जयरूपाय जयगोविन्द रूपिणे।
जय दामोदरायेति जय सर्व्वनमोऽस्तुते॥

अर्घ्य मन्त्रः॥

वेणुपात्राणि सर्व्वाणि सप्तधान्यभृतानि च।
रक्तसूत्रेण सम्पूज्य सफलानि निवेदयेत्॥
तथा वेणुफलं दृष्टा तुष्यते मधुसूदनः।

तथा मे अशुभं सर्व्वं वेणुपात्रप्रदानतः ॥

वेणुपात्रदानमन्त्रः ।

अनेन विधिना चैव दत्त्वा पात्राणि गोसुरे ।

गोसुरे, ब्राह्मणे ।

रक्षाबन्धमतः कुर्य्यात् सुहृत् स्वजन बन्धुषु ।
अक्षताः सर्षपा दूर्वा रक्षामर्थ्ये च रोचना ॥
ओं येन बद्धो वलीराजा दानवेन्द्रो महावलः ।
तेन त्वामाशु बध्नामि रक्षे माचल माचल ॥

रक्षाबन्धनमन्त्रः ।

रक्षाबन्धं नरो यस्तु कुर्य्याद्भक्तिसमन्वितः ।
न तस्य ग्रहपीडा स्यात् न च मृत्युभयं भवेत् ॥
भूतवेतालरक्षाद्यैः पिशाचैर्नाभिभूयते ।
रक्षायाबन्धनं कृत्वा संग्रामे प्रविशेत्तु यः ॥
जयते स रिपून् सर्व्वान् जीयते न स केनचित् ।
तस्मात्सर्व्वप्रयत्नेन रक्षाबन्धं तु कारयेत् ॥
यस्तु वै भक्तिसंयुक्तः स्नानं कुर्य्याज्जयादिने ।
कुतस्तस्यैव पापानि माघमासप्लवे यथा ॥
यथाश्वमेधावभृथं* तादृशं कारयेद्बुधः ।
जलाञ्जलिस्तु व्रतिना क्षिप्यते यस्य मूर्द्धनि ॥
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ।
अपुत्री लभते पुत्रान् बन्ध्या गर्भं विविन्दति ॥

* यथाश्वगन्धाक्तृपन्नमिति पुस्तकान्तरे पाठः

रोगी रोगैर्विमुच्येत प्रयाति हरिमन्दिरम्।

इति भविष्योत्तरोक्तं जयापञ्चमीव्रतम्॥

———000———

भरद्वाज उवाच।

आचक्षतो विधिं ब्रह्मन् पञ्चम्याः परमं व्रतम्।
स एष महिमा यस्य सर्व्वान् कामान् प्रवर्षति॥

सनत्कुमार उवाच।

शृणु वक्ष्यामि भगवन् पञ्चम्याः परमं विधिं।
यस्य श्रवणमात्रेण नरः पापात् प्रमुच्यते॥
श्रवणेन यदा युक्ता शुक्लपक्षे तु पञ्चमी।
उत्तराफाल्गुनी यस्यामिन्दुवारसमागमः॥
आरभेत नरस्तस्यां व्रतं पूर्व्वमुपोषितः।
चतुर्थ्यामेकभक्ताशी ब्रह्मचारी जितेन्द्रियः*॥
धृतिमान् कृतसंकल्पो भवेन्नियमवान्नरः।
ततःकल्यं समुत्थाय स्नात्वा नियतमानसः॥
धृतसङ्कल्पया पत्न्या कुर्य्याद्बिल्वस्य चार्च्चनम्।
विल्वमूले ततः कुर्य्याद्वेदिं पुष्पाक्षतैर्युतां॥
स्थापयेत् कलशानष्टौ तस्यामष्टसु दिक्षु वा।
तन्मध्ये विल्वमूलं तु स्थापयेच्च महाघटान्।
सौवर्णं राजतं ताम्रमार्त्तिकं वा शुभान्वितम्॥

---

* चतुर्थ्यां विधिना स्नात्वा ब्रह्मचारी विजितेन्द्रिय इति पुस्तकान्तरे।

वस्त्रयुग्मेन सञ्छन्नं नवरत्नसमन्वितम् ॥
कलसांश्च तथा कुर्य्यात्तीर्थोदकसमन्वितान् ।
दूर्व्वा च विष्णुपर्णी च श्रीलता पङ्कजं सितम् ।
शालपत्रमपामार्गस्तुलसी जातिरित्यपि ॥
विष्णुपर्णी, प्रश्निपर्णी, श्रीलता, पद्मिनी ।

शालपत्रं शालवृक्षपत्रं ।

विल्वाम्र-ताल-तिन्दूक-धात्री-रम्भा-फलान्यथ ।
तिन्दूकं, टिवुरुणीफलं ।
जम्बूपनसजातानि वुद्धिः शक्तिः सरस्वती ।
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिरित्यष्ट शक्तयः ।
एलासर्षपकक्कोलतिलकर्पूरपद्मकाः ॥

पद्मको, वृक्षविशेषः ।

लोध्रमांसीसमायुक्तान् इति सर्व्वान् विनिक्षिपेत् ।
पूर्व्वादीशानपर्य्यन्तं कलशेषु महामतिः ॥
मध्यमे तु क्षिपेत् सर्व्वं दूर्व्वादि यदुदीरितम् ।
अथ तत्र श्रियं देवीमष्टशक्तिसमन्विताम् ॥
श्रीबीजेन समावाह्य तत्र पूजादि साधयेत् ।
एवं सर्व्वत्र शक्तीनां बीजेनावाहनं विदुः ॥
स्वनामाद्याक्षरं वीज मनुस्वारसमन्वितम् ।
तत्र तत्र च तत्पूजां विधिना सम्यगाचरेत् ॥
श्रीलताजातिबकुलैर्नन्द्यावर्त्तप्रसूनकैः ।

नन्द्यावर्त्तं, तगरम्।

एला पत्र सिताब्जजैः मल्लिकाकुसुमान्वितैः।*
श्रीसूक्तेन श्रियं देवीमर्चयेत् प्रत्यहं सुधीः॥

श्रीसूक्तं, हिरण्यवर्णां हरिणीमित्यादि।

गुड़ान्नपायसापूपमुद्गान्नदधिसंयुतैः॥
शाल्यन्नैःक्षीरमधुरैः श्रियं देवीं समर्च्चयेत्।

बुद्ध्यादिशक्त्यर्च्चनं नाममन्त्रैः।

एवं कृत्वा यथा योगं ततः संप्रार्थयाद्वरम्।
देवि पद्मपलाशाक्षि नमस्ते श्रीधरप्रिये॥
सिद्धार्थं मां कुरुष्व त्वं व्रतेनानेन सुव्रते॥
बोध्यं बुद्ध्या च भूतानां बोधयन्ति हृदि स्थिते।
सिद्धार्थं मां कुरुष्व त्वं व्रतेनानेन सुव्रते।
शक्तिः सती सती देविविष्टयन्त्यनिशं प्रजाः॥
सिद्धार्थं मां कुरुष्व त्वं व्रतेनानेन सुव्रते।
सिद्धाश्रयेऽमृतकले† पद्मवासे सरस्वती॥
सिद्धार्थं मां कुरुष्व त्वं व्रतेनानेन सुव्रते।
श्रद्धे श्रद्धावतीशानि सत्त्वानि कुर्व्वतीवशे॥
सिद्धार्थं मां कुरुष्व त्वं व्रतेनानेन सुव्रते।
लक्षितासि सतीलक्ष्मी र्दीव्यन्ती स्वस्तिमज्जगत्।
सिद्धार्थं मां कुरुष्व त्वं व्रतेनानेन सुव्रते।
धृत्येमां बृंहति धात्री मन्दिरे दिवसे शुभे।

---

* मल्लिकाकुसुमाचतै रिति पुस्तकान्तरे पाठः।

† सिद्धाश्रयेऽमृतकल इति पुस्तकान्तरे पाठः।

सिद्धार्थं मां कुरुष्व त्वं व्रतेनानेन सुव्रते ।
सती तोषयतांतुष्टिप्रदाचीकमलेऽमले ।
सिद्धार्थं माङ्कुरुष्व त्वं व्रतेनानेन सुव्रते ॥
सम्भुञ्चसि सुसंपृष्टमङ्गलायतनं जगत् ।
सिद्धार्थं मांकुरुष्व त्वं व्रतेनानेन सुव्रते ॥
इति मन्त्रीतसकलाः संपूर्णा मे मनोरथाः ।
इन्दिरायाः प्रसादेन व्रतेनासमहं सुखी ॥
ततः परिसमाप्यैवं श्रियः पूजां समाहितः ।
मध्यमस्य समीपे तु महितं स्थापयेद्घटं ॥
तस्मिन्नावाहयेद्देवं श्रीधरं श्रीपतिं प्रभुं ।
वस्त्रयुग्मेन सञ्छन्नं सर्व्वरत्नसमन्वितम् ॥
विधाय विधिना कुम्भं तत्र पूजां समाचरेत् ।
अथावस्थापिते पूर्व्वं देवमावाह्य पूजयेत् ॥
समाप्य विधिवत् पूजां ततश्च श्रृणुयाद्धरम् ।
भगवन् श्रीपते श्रीश श्रीनिवास जगन्मय ॥
प्रसादात्तव ते सन्तु संपूर्णा मे मनोरथाः ।
अत्र संपूजयेद्विद्वान् ब्राह्मणान् वेदपारगान् ॥
नवकं मिथुनं कृत्वा तत्र मन्त्रेण वैष्णवान् ।
तेभ्योदद्याद्यथायोग्यं भूषणानि धनं बहु ॥
वहिं तुस्तत्तदाशीर्भिर्व्विसृज्य द्विजसत्तमान् ।
ततस्तु लोकपालानां बलिं दिक्षु विनिक्षिपेत् ॥
उपवासश्च कर्त्तव्यः सहवध्वा वरेण वा ।
पाषण्डादिभिरालापो न कर्त्तव्यः कथञ्चन ॥

यदि स्यात्पतनं गच्छेन्निरयञ्चाप्यधोमुखः।
वृथाजल्पपरो नस्यात् वृथारम्भो वृथामतिः॥
न स्वपेत्तु दिवारात्रौ नाद्यादपि कथञ्चन।
न क्रीड़ां नोपहासञ्च न मिथ्याभाषणं क्वचित्॥
श्रीधराय नमोनित्यं श्रियै नम इतीरयेत्।
एवमेव दिनं नीत्वा ततः षष्ठ्यां समाहितः॥
समभ्यर्च्य श्रियं देवीं तथा देवं यथा पुरा।
ब्राह्मणान् भोजयेत् पश्चाद्विधिवत्सपरिग्रहात्॥
दत्त्वा धनादिक मथ स्नात्वा कुम्भोदकेन वा।
पत्न्या सह हविःशेषं ततो भुञ्जीत वाग्यतः॥
तथा दानं दरिद्रेभ्यो योषिद्भ्यश्चान्नमुत्तमम्।
गुरवे दक्षिणान्दद्यात् पितृभ्यश्च स्वधामपि।
बिल्वञ्च दृष्ट्वा प्रणमेत् तदग्रे प्रणतो व्रजेत्॥
न कुर्य्यात्ताड़नं तस्य तथा पादाभिमर्शनं।
न लङ्घयीत तच्छायां नाद्यात्तस्य फलादिकं॥
प्रशस्तं बिल्वपात्राणां धारणं मूर्द्ध्नि नित्यशः॥
शतपत्रं चैकपत्रं श्रीलताकुसुमान्यपि।*
दूर्व्वाञ्च कूर्चकुसुमं तिलसर्षपतण्डुलान्॥
शिरसा धारयेन्नित्यं श्रियमिच्छन्ननाकुलः।
आयुर्विद्यां श्रियन्तुष्टिमारोग्यं कान्तिमुत्तमाम्॥
सौभाग्यं क्षेमसम्पत्तिं व्रतेनाप्नोति मानवः।
विन्दते व्रतकृद्राजा राज्यं श्रियमनुत्तमाम्॥

* जातिकुसुममिति पुस्तकान्तरे पाठः।

देशे च लभते वित्तं* शूद्रः सुखमवाप्नुयात् ।
कन्या च लभते सौम्यं पतिं हृदयहारिणम् ॥
वन्ध्या वाभिमत पुत्रं विन्देताशु न संशयः ।
योषित्परममाङ्गल्यं प्राप्नुयात् व्रतसम्पदा ।
अपत्यङ्गर्भिणी नारी यावद्बहुसुतार्थिनी ॥†
पायसेन श्रियं देवीं देवेशञ्चसमर्च्चयेत् ।
श्रियं कामयमानेन पूर्व्वोक्तविधिनार्चनं ।
सौभाग्यमिच्छता कार्य्यं घृतान्नेन समर्च्चनं ॥
हविष्यफलमूलाद्यं कार्य्यं राजन्यपार्थिवैः ॥‡
विद्यार्थिना च देयानि हवींषि मधुराणि च ।
आयुःकामेन विधिना पयसा कार्य्यमर्च्चनं ॥
एवमेव च वर्षान्तमनुतिष्ठेत्तु पञ्चमीं ।
अथवा सकृदुक्तेन विधिना कार्य्यमिष्यते ॥
अथ यावत् फलप्राप्तिः कार्य्यमेतत् व्रतं मतं ।
सर्व्वं भाग्यवशादेव फलं भुङ्क्ते नरो भुवि ॥
तद्योगात्तत्क्षणात्तावदचिरं स्याच्चिरं फलं ।
अपि च क्षीणभाग्यानामसतामपि सम्पदः ॥
भवेयुः सर्व्वसत्त्वानां व्रतेनानेन वै ध्रुवं ।
एवमुक्तेन विधिना व्रतञ्च व्रतिनाम्बरः ॥
सर्व्वसिद्धिकरं पुंसामुक्तमेतन्महाव्रतं ।

---

* नित्यञ्च लभतेवित्त मिति पुस्तकान्तरे पाठः ।

† अपत्यं प्रार्थयेत्तावत् पूजाकाले सुतार्थिनीति पुस्तकान्तरे पाठः॥

‡ राज्ञो जयार्थिनेति पुस्तकान्तरे पाठः ।

इति श्रीगरुड़पुराणोक्तं श्रीपञ्चमीव्रतम्।

——000——

श्रीमार्कण्डेय उवाच

अतःपरं प्रवक्ष्यामि पञ्चमूर्त्तेस्तथार्चनं।
पृथिव्यापस्तथातेजो वायुराकाशमेवच॥
एता वै देवदेवस्य* कथिताः पञ्चमूर्त्तयः।
चैत्रे तु पञ्चमीं शुक्लां समासाद्य विचक्षणः॥
सोपवासो हरिं देव पञ्चात्मानं समर्च्चयेत्।
पञ्चमण्डलकाःकार्य्याः पञ्चभिर्व्वर्णकैः पृथक्॥
पार्थिवं मण्डलं कार्य्यं शुक्लवर्णं महीपते।
वारुणञ्च तथा श्वेतं रक्तमाग्नेयमिष्यते॥
पीतं भवति वायव्यं कृष्णमाकाशदैवतं।
समानवर्णगन्धैश्च† पुष्पैस्तानर्च्चयेत् पृथक्॥
शक्त्या च धूपदीपान्नैर्यथालाभमरिन्दम।
यवैर्माषैस्तिलैश्चैव सर्षपैश्च घृतेन च॥
पञ्चभिर्जुहुयान्मन्त्रैः सर्व्वेषाञ्च पृथक् पृथक्।

हुत्वा ॐ पृथिव्यप्तेजोवायुाकाशेभ्यः स्वाहेति सर्व्वेषां मिश्रैर्जुहुयात्।

तल्लिङ्गैरेव मन्त्रैश्च अथवा नृप नामभिः।
ॐकारपूर्व्वकैर्हुत्वा शक्त्या विप्रांश्च भोजयेत्॥
एवं संवत्सरं कृत्वा पूर्णसंवत्सरे ततः।

---

* वासुदेवस्य देवस्येति पाठान्तरम्।

† समानवर्णगन्धैश्चेति पुस्तकान्तरे।

दत्त्वा विप्रेषु वस्त्राणि देवरङ्गसमानि तु ॥
महाभूतव्रतमिदं यः करोत्यथ पञ्चकम् ।
पञ्चयज्ञानवाप्नोति क्रमशो ये तु कीर्त्तिताः ॥
बहून्यब्दसहस्राणि स्वर्गलोके महीयते ।

मानुष्यमासाद्य भवत्यरोगो
बलान्वितो वैरिगणादिहन्ता ।
श्रुतेन रूपेण धनेन युक्तो
जनाभिरामः प्रमदाप्रियश्च ॥

इति विष्णुधर्म्मोत्तरोक्तं पञ्चमहाभूतंव्रतं ।

———0*0———

श्रीभीष्म उवाच ।

मधुरा भारती केन व्रतेन मधुसूदन ।
तथैव जनसौभाग्यं सर्व्वविद्यानुकौशलं ॥
अभेदश्चापि दम्पत्योस्तथाबन्धुजनैः सह ।
आयुश्च विपुलं पुंसां तन्मे कथय सत्तम ॥

पुलस्त्य उवाच ।

सम्यक् पृष्टं त्वया राजन् शृणु सारस्वतं व्रतं ।
यस्य सङ्कीर्त्तनादेव तुष्यतीह सरस्वती ॥
यो यद्भक्तः पुमान् कुर्य्यादेतद्व्रतमनुत्तमं ।
तद्वासरादौ संपूज्य विप्रानेतत्समारभेत् ॥
अथवादित्यवारेण ग्रहतारावलेन च ।

पायसम्भोजयित्वा तु कुर्य्याद्ब्राह्मणवाचनं ॥
शुक्लवस्त्राणि दद्याच्च सहिरण्यानि शक्तितः।
गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः ॥
एभिर्मन्त्रपदैः पश्चात् सर्व्वं कुर्य्यात् कृताञ्जलिः।
यथा न देवि भगवान् ब्रह्मा लोकपितामहः ॥
त्वां परित्यज्य सन्तिष्ठेत् तथा भव वरप्रदा।
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत् ॥
न विहीनं त्वया* मातस्तथा मे सन्तु सिद्धयः।
लक्ष्मीर्म्मेधा धरा पुष्टि† गौरी तुष्टिः प्रभा मतिः ॥
एताभिः पाहि तनुभिरष्टाभिर्म्मां सरस्वती।
एवं संपूज्य गायत्रीं वीणाक्षमणिधारिणी ॥
शुक्लपक्षेऽक्षतैर्भक्त्या सकमण्डलुपुस्तकां।
मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्म्मवित् ॥
पञ्चम्यां प्रतिपक्षे च पूजयित्वा सुवासिनीः।
तस्यां तु तण्डुलप्रस्थं घृतपात्रेण संयुतं ॥
क्षीरं दद्यात् हिरण्यञ्च गायत्री प्रीयतामिति।
सन्ध्ययोश्च तथा मौनमेतत् कुर्व्वन् समारभेत् ॥
नान्तरा भोजनं कुर्य्याद्यावन्मासास्त्रयोदश।
समाप्ते तु व्रते दद्यात् भाजनं शुभतण्डुलैः ॥
पूर्णं सवस्त्रयुग्मन्तु गां सवत्सां सुशोभनां।
विप्राय वेदविदुषे वाचकायाथ पार्थिव ॥

---

* त्वयादेवी पुस्तकान्तरे पाठः।

† धृतिरिति पुस्तकान्तरे पाठः।

देव्यै वितानं घण्टाञ्च सितचामरसंयुतां ।
चन्दनं वस्त्रसंयुग्मञ्च दध्यनं शिखरं तथा ॥
शिखरं दधि क्षीर घृतानां सन्तानिका शिवा ।
शिखरं चिर संस्थस्य द्रवस्योपरिपीडिकेत्यायुर्व्वेदस्मृतिः ।
तथोपदेष्टारमपि भक्त्या संपूजयेद्गुरुं ॥
वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः ।
अनेन विधिना यस्तु कुर्य्यात् सारस्वतं व्रतं ॥
विद्यावान् धनयुक्तश्च रक्तकण्ठश्च जायते ।
सरस्वत्याः प्रसादेन व्यासवत्सकविर्भवेत् ॥
नारी वा कुरुते या तु सापि तत्फलभागिनी ।
ब्रह्मलोके वसेत्तावद्यावद्युगशतत्रयं ॥
सारस्वतं व्रतं यस्तु शृणुयाच्छ्रावयेत्तथा ।
विद्याधरपुरं सोपि प्राप्नोति गतकल्मषः ॥
सारस्वतव्रतवरेण सरस्वतीं ये
संपूजयन्ति विधिवज्जगतो जनित्रीं ।
विद्यावदातहृदया मधुरस्वरास्ते
रूपान्विता बहुगुणाः कुशला भवन्ति ॥
अत्र व्रते शुक्लपक्षे स्वेष्टदेवतातिथौ ।
रविदिने शुभदिने वा आरम्भः प्रतिदिनं सन्ध्ययोर्भोजने च मौनं शुक्लपञ्चम्यां सरस्वतीपूजा सुवासिनी पूजा च ।

इति पद्मपुराणोक्तं सारस्वतं व्रतम्।

——०*०——

अगस्त्य उवाच।

शान्तिव्रतं प्रवक्ष्यामि शृणुष्वैकमना नृप।
येन चीर्णेन शान्तिः स्यात् सर्व्वदा गृहमेधिनः॥
पञ्चम्यां शुक्लपक्षस्य कार्त्तिके मासि पार्थिव।
आरभ्य वर्षमेकन्तु भुञ्जीयादम्लवर्जितं॥
नक्तन्तु पूजयेद्देवं हरिं शेषोपरिस्थितं।

देव प्रतिमा शेषोपरिसुप्ता चतुर्भुजा लक्ष्म्युत्सङ्गगतस्तत्रैकपादः,शेषोपरिस्थित एवापरो, जानूपरि तस्यैकः करो, नाभिदेशस्थो अपरः शीर्षधरः, सन्तानमञ्जरीधरश्चान्यः नाभौ पद्मं, पार्श्वेऽस्त्राणीति।

अनन्तायेति पादौ तु धृतराष्ट्राय वै कटीं।
तक्षकायेति जठरमुरः कर्कोटकस्य तु॥
पद्माय कण्ठं संपूज्य महापद्माय दोर्युगं।
शङ्खपालाय वक्त्रन्तु कुलिकायेति वै शिरः॥
विष्णुं सर्व्वाङ्गमप्येवं पृथक् चैव प्रपूजयेत्।

पृथक्चैवेति अनन्ताद्यानष्टौ नागान् पृथगपि पूजयेदित्यर्थः।

क्षीरेण स्नपनं कुर्य्याद्धरिमुद्दिश्य वाग्यतः।

नागानपि हरिबुद्ध्या स्नापयेत्।

तदग्नौ होमयेत् क्षीरं तिलैः सह नृपोत्तम।
एवं संवत्सरस्यान्ते कुर्य्यात् ब्राह्मणतर्पणं॥

नागन्तु काञ्चनं कृत्वा स्वकर्णेन विधारयेत्।
गां सवत्सां वस्त्रयुगां कांस्यपात्रां पयस्विनीं॥
हिरण्यञ्च यथा शक्त्या ब्राह्मणाय निवेदयेत्।
एवं यः कुरुते भक्त्या व्रतमेतन्नराधिप।
तस्य शान्तिर्भवेन्नित्यं नागेभ्यश्चाभयं तथा॥

शेषाहिभोगशयनस्थमपां प्रसूतिं
संपूज्य यज्ञपुरुषं पतगेन्द्रकेतुं।
येऽन्नन्त्यनन्तमधुरं सितपञ्चमीषु
तेषां न नागजनितं भयमस्ति किञ्चित्॥

इति वराहपुराणोक्तं शान्तिव्रतम्।

———000———

सुमन्तुरुवाच।

पञ्चमी दयिता राजन् नागानां नन्दवर्द्धिनी।
पञ्चम्याः किल नागानां भवतीत्युत्सवो महान्॥
वासुकिस्तक्षश्चैव कालियो* मणिभद्रकः।
धृतराष्ट्रश्चैरावतःकर्कोटकधनञ्जयौ॥
एते प्रयच्छन्त्यभयं प्राणिनां प्राणदाः सदा।
पञ्चम्यां स्नापयन्तीह नागान् क्षीरेण ये नराः॥
तेषां कुले प्रयच्छन्ति अभयं प्राणदक्षिणां।
शस्ताः† नागा यदा मात्रा दह्यमाना दिवानिशं।

* कालिकइति पुस्तकान्तरे पाठ।

† शप्ताइति पुस्तकान्तरे पाठः।

निर्व्वापिता गवां क्षीरैस्तेषां क्षीरन्तु दुर्लभं॥

शतानीक उवाच।

माता तासां कथं नागाः किमुद्दिश्य च कारणं।
कथं शापस्य शापस्य विनाशो वै महामुने॥

सुमन्तुरुवाच।

उच्चैश्रवोश्वराजा च श्वेतवर्णोऽमृतोद्भवः।
तं दृष्ट्वा धवलं कद्रुर्नागानां जननीस्वसा॥

उवाचेतिशेषः।

अश्वरत्नमिदं श्वेतं पश्य पश्यामृतोद्भवं।
कुलस्य यस्य ते बालाः सर्व्वेश्वेतयुतास्तथा॥
सर्व्वश्वेताकृतिवरो नायं कृष्णो न लोहितः।
कथं त्वं यस्य तत्कृष्णं विनतोवाच तत्स्वसां॥

कद्रुरुवाच।

यस्याहमेकनयनं कृष्णत्वचसमन्वितं।
छिनेद्वा त्वं सविनते यदि पश्य पणं कुरु॥

विनतोवाच।

अहं दासी भवित्री ते कृष्णे केशप्रदर्शितं।
न च दर्शयसे कद्रुर्म्ममदासी भविष्यसि॥
एवं ते च पणं कृत्वा गते क्रोधसमन्विते।
शयिते प्राक्प्रदेवोपि कद्रुर्जिह्मामचिन्तयत्॥
आहूय पुत्रान् प्रोवाच वालोभूत्वा हयोत्तमे।

तिष्ठध्वं विपक्षं ज्येष्ठां विनतां जयवर्द्धिनीं ॥
प्रोचुस्ते जिष्णुवृद्धीनां नागमातां विगृह्य च ।
स्वधर्म्मपृष्ठः सुमहान न करिष्यामि तं वचः ॥
एवं पुत्रवचः श्रुत्वा कद्रूः क्रोधसमाकुला ।
शशाप पुत्रान् सकलान् वाचकीयं प्रधक्ष्यति ॥
गते बहुतिथे काले पाण्डवो जनमेजयः ।
सर्पसत्रस्य कर्त्ता वै यदन्यैर्भुवि दुष्करं ॥
तस्मिन् यज्ञे पावको वै दहिष्यति न संशयः ।
एवमुक्त्वाभवत्तुष्णीं कद्रुः क्रोधपरायणा ॥
तानुवाच तदा सर्व्वान् ब्रह्मलोकपितामहः ।
पञ्चम्यां शुक्लपक्षे तु सत्रस्योपरमिष्यति ॥
तत्र वो भविता नन्दस्तेनानन्दो भविष्यति ।
इत्युक्त्वा पन्नगान् सर्व्वान् देवदेवपितामहः ।
जगाम त्रिदिवं भूयो नागाः स्वस्थानमास्थिताः ॥
तस्मादियं महाराज पञ्चमी दयिता सतां ।
नागानां हर्षजननी दत्ता वै ब्रह्मणा पुरा ॥
अपरं ते प्रवक्ष्यामि नियमं पञ्चमीं प्रति ।
यं कृत्वा न बिभेति स्म नरो नागकुलात् क्वचित् ॥
नागान् सौवर्णरौप्यान् वा अथवा मृण्मयान् नृप ।
नागान् वासुकिस्तक्षकश्चेत्यादिप्रथमश्लोकपठितान् ।
करवीरैः शतपत्रैः जातीपत्रैश्च सुव्रत ।
तथा गन्धप्रधूपैश्च पन्नगान् पूज्य चोत्तमान् ।
ब्राह्मणान् भोजयेत् पश्चात् घृतपायसमोदकैः ॥

कृत्वा तु भोजनं पूर्व्वं ब्राह्मणानान्तु कामतः।
विसृज्य नागा प्रीयन्तां ये केचित् पृथिवीतले॥
हिमाचले तु ये विन्ध्ये येऽन्तरिक्षे दिविस्थिता।
ये नदीषु समुद्रेषु ह्रदेषु च सरःसु च॥
ये वापीषु तडागेषु तेभ्यः सर्व्वेषु वै नमः।
नागानिति नमस्कृत्य विप्रान् पूज्य विसर्जयेत्॥
ततः स्वयञ्च भुञ्जीयात्सह भृत्यैर्नराधिप।
प्रथमं मधुरं भोज्यं स्वेच्छया तदनन्तरं॥
एवं नियमयुक्तस्य यत्फलं तन्निबोध मे।
मृतो नागपुरं याति पूज्यमानोऽप्सरोगणैः॥
विमानवरमारूढो रमते सूर्य्यपर्य्ययं।
इह चागत्य राजासौ मण्डलाधिपतिर्भवेत्॥
सर्व्वरत्नसमृद्धस्तु वाहनाढ्यश्च जायते।
पञ्चजन्मानि भूपालो द्वापरे द्वापरे भवेत्॥
आधिव्याधिविनिर्मुक्तः पुत्रपौत्रसहायवान्।
तस्मात् पूज्याश्च मान्याश्च घृतपायसगुग्गुलैः॥

इति भविष्यत् पुराणोक्तमानन्दपञ्चमीव्रतं।

———000———

सुमन्तुरुवाच।

नागदष्टो नरो राजन् प्राप्य मृत्युं व्रजत्यधः।
अधोगत्वा भवेत्सर्पो निर्व्विषो नात्र संशयः॥

शतानीक उवाच ।

नागदष्टः पिता यस्य भ्राता च दुहितापि वा ।
माता पुत्रोऽथवा भार्य्या कर्त्तव्यं तद्वदस्व मे ॥
मोक्षाय तस्य विप्रेन्द्र दानं व्रत मुपोषितं ।
ब्रूहि मे द्विजशार्द्दूल येन तद्वै करोम्यहं ॥

सुमन्तुरुवाच ।

उपोष्य पञ्चमीं सम्यक् नागानां वलवर्द्धनं ।
वर्षमेकमेकं यावच्च विधानं शृणु भारत ॥

वर्षमेकं, सम्वत्सरम् ॥

मासि भाद्रपदे राजन् शुक्लपक्षे तु पञ्चमी ।
सापि पुण्यतमा प्रोक्ता ग्राह्यासौ गतिकाम्यया ॥
चतुर्थ्यामेकभक्तञ्च तस्यां नक्तं प्रकीर्त्तितं ।
तस्यां पञ्चम्यामुपोष्येति दिवा भोजनवर्जनात् ।
कुर्य्याच्चान्द्रमसं नागमथवा कलधौतजं ।
अथ दारुमयं भव्यं मृण्मयं वाप्यशक्तितः ॥
चान्द्रमसं, सौवर्णं, कलधौतजं, रूप्यमयं ।
पञ्चम्यामर्च्चयेद्भक्त्या नागं पञ्चफणन्तथा ॥
करवीरैस्तथा पद्मैः जातीपुष्पैः सुगन्धिभिः ।
गन्धैर्धूपैः सनैवेद्यैः स्नाप्य क्षीरादिभिर्नृप ॥
ब्राह्मणान् भोजयेत्पश्चात् घृतपायसमोदकैः ।
अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च ॥
तथा कर्कोटकं नागं नागमश्वतरं नृप ।

धृतराष्ट्रं शङ्खपालं कालियं तक्षकं तथा॥
पिङ्गलञ्च महानागं मासि मासि क्रमाद्यजेत्।
पूजयित्वा प्रयत्नेन पञ्चम्यां नक्तभुग्भवेत्॥
एवं द्वादश कृत्वा वै मासि भाद्रपदे नृप।
वत्सरान्ते यथाशक्त्या महाभाव्यन्तु कारयेत्॥
ब्राह्मणानां यतीनाञ्च नागानुद्दिश्य भक्तितः।
इतिहासविदे नागं काञ्चनं रत्नचित्रितं॥
गाञ्च दद्यात्सवत्साञ्च सर्व्वोपस्करसंयुतां।
दानकाले पठेदेतत् स्मरन्नारायणं विभुं॥
सर्व्वगं सर्व्वधातारमनन्तमपराजितं।
येकेचिन्मे कुले सर्पैः दष्टाः प्राप्ताह्यधोगतिं॥
व्रतदानेन गोविन्द मुक्तिभाजो भवन्तु ते।
इत्युच्चार्य्याक्षतैर्युक्तं तिलचन्दनमिश्रितं॥
वासुदेवाग्रतो भूयस्तोयं तोये विनिक्षिपेत्।
अनेन विधिना सर्व्वे येऽर्चयिष्यन्ति चामृताः॥
सर्पतस्तेऽपि यास्यन्ति स्वर्गतिं नृपसत्तम।
कृत्वा सर्व्वान् समुद्धृत्य कुलजान् कुलनन्दन॥
प्रयाति विष्णुसान्निध्यं सेव्यमानोऽप्सरोगणैः।
वित्तशाठ्यविहीनो यः सर्व्वमेतत् फलं लभेत्॥

नक्तेन भक्तिसहिताः सितपञ्चमीषु
ये पूजयन्ति भुजगान् कुसुमोपहारैः।
तेषां गृहेष्वभयदा हि भवन्ति सर्पा-
दर्पान्विता मणिमयूखविभाषिताङ्गाः॥

इति भविष्योत्तरपुराणोक्तं नागदष्टोद्धरणपञ्चमी व्रतं।

सुमन्तुरुवाच।

तद्वद्भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः।
यस्तामालिख्य नरो नागान् कृष्णवर्णादिवर्णकैः॥
पूजयेद्गन्धधूपैस्तु सर्पिर्गुग्गुलपायसैः।
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः॥
आसप्तमात्कुलात्तस्य न भयं नागतो भवेत्।
तस्मात्सर्व्वप्रयत्नेन नागान् संपूजयेद्बुधः॥
तथा चाश्वयुजे मासि पञ्चम्यां कुरुनन्दन।
कृत्वा कुशमयान्नागानिन्द्राण्या सह पूजयेत्॥

नागान्, पूर्व्वव्रतोक्तानमन्तादीन्।

शची द्विबाहुः सन्तानमालाहस्ता गजस्थिता।
घृतोदकाभ्यां पयसा स्नापयित्वा विशाम्पते॥
गोधूमैः पयसा स्विन्नैर्भक्ष्यैश्च विविधैस्तथा॥
यस्तस्यां विधिवन्नागान् शुचिर्भक्त्या समन्वितः।
पूजयेत् कुरुशार्द्दूल तस्य शेषादयो नृप।
नागाः प्रीता भवन्तीह शान्तिमाप्नोति वा विभो॥
प्रशान्तिलोकमासाद्य मोदते शाश्वतीः समाः।
यत्रायं कथ्यते मन्त्रः सदा विषनिषेधतः॥

ओँ कुरुकुल्ले हुं फट् स्वाहा।

मत्तो न भक्तिमहितं सितपञ्चमीषु

ये पूजयन्ति भुजगान् कुसुमोपहारैः।
तेषां गृहेष्वभयदा हि भवन्ति नागाः
सर्वे फणामणिमरीचिरुचो भवन्ति॥

इति भविष्यत्पुराणोक्तं शान्तिपञ्चमीव्रतं।

——0*0——

ईश्वर उवाच।

यो नरः पूजयेद्दिव्यं पञ्चम्यां फाल्गुने सिते।
पञ्चोपचारविधिना मिताहारो जितेन्द्रियः॥
न तं दशन्ति फणिनो दशवर्षाणि पञ्च च।
विषं न क्रमते तस्य कुले मातृकुलेऽपि च॥
तस्मात्तं पूजयेद्यत्नात् पञ्चम्याञ्च विशेषतः।

इति स्कान्दे प्रभासखण्डोक्तमनन्तपञ्चमीव्रतं

——0*0——

ईश्वर उवाच।

श्रावणे मासि पञ्चम्यां शुक्लपक्षे वरानने।
आरभ्योभयतो लेख्याः गोमयेन विषोल्बणा॥
कृत्वा च कौस्तुभान्नागान्विद्रालीच प्रपूजयेत्।
घृतोदकाभ्यां पयसा स्नापयित्वा वरानने॥
गोधूमैः पयसा पूज्य लाजभिर्विविधैस्तथा।
पूजयेत् विधिवद्देवि दधिदूर्वाङ्कुरैः क्रमात्॥

गन्धपुष्पोपहारैश्च ब्राह्मणानाञ्च तर्पणं ।
अथवा श्रावणे मासि पञ्चम्यां श्रद्धयान्वितः ॥
यथालिख्य नरो नागान् कृष्णवर्णादिवर्णकैः ।
गुरुकल्पान् तथा वीथ्यां स्वगृहे विलिखेत् बुधः ॥
पूजयेद्गन्धधूपैश्च पयसा पायसेन च ।
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः ॥
आसप्तमात् कुलं तस्य न भयं नागतो भवेत् ।
प्रमुच्यते मन्त्रः सर्पविषस्य प्रतिषेधकः ॥
तस्य प्रजपमात्रे तु न विषं क्रमते सदा ।

ॐ कुकुलं हुं फट् स्वाहा ।

इत्येवं कथितं देवि नागव्रतमनुत्तमं ॥
यत् श्रुत्वा च पठित्वा च मुच्यते सर्व्वपातकैः ।

इति स्कान्दे प्रभासखण्डोक्तं सर्पविषापह पञ्चमीव्रतं ।

——000——

ईश्वर उवाच ।

मासि भाद्रपदे यापि शुक्लपक्षे तु पञ्चमी ।
सा तु पुण्यतमा प्रोक्ता ख्याता स्वर्गतिकाम्यया ॥
या च द्वादशवर्षैस्तु पञ्चम्याञ्च वरानने ।
चतुर्थ्यामेकभक्तन्तु तस्यां नक्तं प्रकीर्त्तितम् ॥

तस्यां पञ्चम्यां ।

भूरिचन्द्रमयं नागमथवा कलधौतजं ।

कृत्वा धातुमयं वापि अथवा मृन्मयं प्रिये ॥
पञ्चम्यामर्च्चयेत् भक्त्या नागं पञ्चफणं स्मृतं ।
करवीरैः शतपत्रैः जातीपुष्पैश्च शोभनैः ॥
गन्धैः पुष्पैश्च धूपैश्च पूजयेन्नागमुत्तमं ।
ब्राह्मणान् भोजयेत्पश्चात् घृतपायसमोदकैः ॥
अनन्तं वासुकिं शङ्खं पद्मकम्बलमेव च ।
तथा कर्कोटकं नाम नागमश्वतरं नरः ।
धृतराष्ट्रं शङ्खपालं कालिकं तक्षकं तथा ॥
पिङ्गलञ्च महानागं मासि मासि प्रकीर्त्तितं ।
व्रतस्यान्ते पारणं स्यात् क्षीरैर्ब्राह्मणभोजनैः ॥
सुवर्णतारनिष्पन्नं नागं दद्याच्च गां तथा ।
तथा वस्त्राणि देयानि विप्रायामिततेजसे ॥
पूजयेत्पन्नगान् सर्व्वान् सदा भक्त्या समन्वितः ।
विशेषतस्तु पञ्चम्यां पञ्चम्यां पायसेन च ॥

इति स्कान्दे प्रभासखण्डे नागपञ्चमीव्रतम् ।

सुमन्तुरुवाच ।

पञ्चमी सा तिथिर्धन्या सर्व्वपापहरा शुभा ।
एतस्यां सर्व्वतो यस्तु कर्म्माणि परिवर्जयेत् ॥
क्षीरेण स्नापयेन्नागान् ते च यास्यन्ति मित्रतां ।

इति भविष्यत्पुराणे नागमैत्रीव्रतं।

———000———

सुमन्तुरुवाच।

तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः।
समालिख्य नरो राजन् कृष्णवर्णादिवर्णकैः॥
पूजयेद्गन्धधूपैश्च सर्पिभिः फलपायसैः।
पायसेन घृताढ्येन पूजयित्वा द्विजोत्तमं॥
नक्तं स्वयं तदश्नीयात् यतवाक् वीतमत्सरः।
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः॥
आसप्तमं कुलन्तस्य न भयं नागतो भवेत्।

इति भविष्यत् पुराणोक्तमालेख्यपञ्चमीव्रतं।

———000———

पयोव्रतन्तु पञ्चम्यां दत्त्वा नागं द्विजातये॥
सौवर्णं सर्पजनितं भयं तस्य न जायते।
एतत् सर्पव्रतं प्रोक्तं सर्व्वमैत्रीकरं परं॥

इति भविष्यत् पुराणोक्तं सर्पपञ्चमीव्रतम्।

———000———

तिलपिष्टमयं कृत्वा गजं हैमविभूषितं।
कक्षाङ्कुशयुतं तद्वदारोहकसमन्वितं॥
तद्ददिति निरन्तरव्रतोक्तमन्त्रगजस्वरूपं ग्राह्यत।

नक्षत्रमालासहितं चामरापीठधारिणं॥
दशनाग्रवङ्नेत्रं रक्तवस्त्रयुगावृतं।
ताम्रपात्र्यां कुण्डके वा कृतदन्ताग्रमोदकं।
प्रदद्याद्विजदम्पत्योः पूज्य मालाविभूषणैः॥
कर्णाभरणकं दद्यात् वस्त्रञ्च मलवर्जितं।
कान्तारतरव्रतं ह्येतत् कथितं हि युधिष्ठिर॥
कान्तारगिरिदुर्गेषु तारयत्यपि दुःखितान्।
इह लोके परे चैतन्नात्र कार्य्या विचारणा॥
ये कुर्व्वन्ति दिने पुण्ये व्रतं पौरन्दराह्वयं।
तेषां पौरन्दरे लोके वासः स्यात् सुचिरं नृप॥
दिनेपुण्ये, पञ्चम्यां प्रकरणवशात्।

इति भविष्योत्तरोक्तं पौरन्दरव्रतं।

——·OOO——

लक्ष्मीमभ्यर्च्य पञ्चम्यामुपवासो भवेन्नृपः॥
समाप्ते हेमकमलं दद्याद्धेनुसमन्वितं।
स वैष्णवं पदं याति लक्ष्मीर्जन्मनि जन्मनि॥
एतल्लक्ष्मीव्रतं नाम दुःखशोकविनाशनं।

इति यमपुराणोक्तं लक्ष्मीव्रतम्।

सिताश्व उवाच।

श्रुतानि देव देवश व्रतानि सुबहूनि च।
साम्प्रतं मे समाचक्ष्व व्रतं पापप्रणाशनम्॥

ब्रह्मोवाच ।

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमीति विख्यातं सर्व्वपापहरं परम् ॥
येन चीर्णेन राजेन्द्र नरकानि व्यपोहति ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥
वैदेहेऽत्र द्विजवर उतङ्को नामनामतः ।
तस्य भार्य्या सुशीलेति पतिव्रतपरायणा ॥
तस्या अपत्ययुगलं पुत्री हि सुविभूषणं ।
अधीतवान् सुतस्तस्य वेदान् साङ्गपदक्रमात् ॥
समाने च कुले तेन सुता चापि विवाहिता ।
विवाहितैव सा दैवात् वैधव्यं प्राप सत्वरं ॥
तां पालयति ह्यास्ते सा सुतांनिजपितुर्गृहे ।
तस्या दुःखेन सन्तप्तः सुतं,संस्थाप्य वेश्मनि ॥
गङ्गातीरे वनं प्राप्तः सकलत्रस्तया सह ।
स तत्राध्यापयामास शिष्यान्वेदान् द्विजोत्तमः ॥
सुता वहुमतं तस्य पितुः शुश्रुषणे रता ।
शुश्रूषणं ततः कृत्वा परिश्रान्ता कदाचन ॥
निशीथे किल संसुप्ता कृमिराशिरजायत ।
तथाविधाञ्च तां दृष्ट्वा विवस्त्रां प्रस्तराम्बिना ॥
शिष्या निवेदयामासुस्तन्मातुः करुणान्विताः ।
न जानीमो वयं किञ्चिद्देवीं साध्वीं तथाविधां ॥
कृमिराशिरथोजाता मातः सम्प्रति दृश्यते ।
वज्रपातसदृक्षं तत् श्रुत्वा शिष्यैरुदीरितम् ॥

सम्भ्रान्तमनसा शीघ्रं तत्समीपमुपागता।
सा तां तथाविधां दृष्ट्वा विललाप सुदुःखिता।
उरश्च ताडयामास सुतरां सा मोहमाप च॥
क्षणेन प्राप्य चैतन्यं तामुत्थाप्य प्रमृज्य च।
समालम्ब्य च बाहुभ्यां निन्ये तत्पितुरन्तिकम्॥
स्वामिन् कथय मे साध्वी केन दुष्कृतकर्म्मणा।
निशीथे संप्रसुप्तेयं जायते कृमिसंकुला॥
एतत् श्रुत्वा ततो वाक्यमृषिर्ध्यानपरायणः।
ज्ञात्वा निवेदयामास तस्याः प्राग्जन्मचेष्टितम्॥

ऋषिरुवाच।

प्रागियं सप्तमेऽतीते जन्मनि ब्राह्मणी ह्यभूत्।
तद्भाग्या द्रुपदे* संजाता च रजस्वला॥
अस्या स्तत्पापभावेन जायते कृमिवद्वपुः।
रजस्वला च भावेन युक्ता भवति सानघ॥
प्रथमेऽहनि चाण्डाली द्वितीये ग्रामशूकरी।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति॥
तथानया सखीसंगाद्व्रतं दृष्ट्वावमानितम्।
दृष्टव्रतप्रभावेन जाता द्विजकुलेऽमले॥
अवमानाद्व्रतस्यास्य कृमिरोगिभयाधुना।
एतत्ते कथितं सर्व्वं कारणं कन्यकाकृते॥

सुशीलोवाच

दर्शनेनापि यस्य स्याद्विप्राणां निर्म्मले कुले।

---

* न प्रासा च साद्रेष्य इति पुस्तकान्तरे पाठः।

जन्मभुक्मविधानां हि जायते ब्रह्मतेजसां ॥
अयत्नया प्रजायन्ते विग्रहे कमिराशयः।
महाश्चर्य्यकरं नाथ तद्व्रतं कथयस्व मे ॥

ऋषिरुवाच।

सुशीले शृणु तत् सम्यक् व्रतानामुत्तमं व्रतम्।
येन चीर्णेन सहसा पापान्मादिमुच्यते ॥
दुःखचयाभिघातश्च जायते नात्र संशयः।
कल्याणानि विवर्द्धन्ते सम्पदश्च निरापदः ॥
नभस्ये शुक्लपक्षे तु यदा भवति पञ्चमी।
नद्यादिषु तदा स्नानं कृत्वा नियममेव च ॥
विधाय नित्यकर्म्मादि गत्वा द्वारवतीमृषीन्।
स्नापयेद्विधिवद्भक्त्या पञ्चामृतरसैः शुभैः ॥

द्वारवतीं, अग्निहोत्रशालां
धूमनिर्गमद्वारैर्व्वहुभिर्युतत्वात्।

चन्दनागुरुकर्पूरैर्विलिप्य च सुगन्धिभिः।
पूजयेद्विविधैः पुष्पैर्गन्धधूपादिदीपकैः ॥
समाच्छाद्य शुभैर्वस्त्रैः सोपवीतैर्यथाविधि।
ततो नैवेद्यसंपन्नमर्घ्यं दद्याच्छुभैः फलैः ॥

अर्घ्यमन्त्रः

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रस्तु गौतमः।
जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः ॥
श्रोतव्यमिदमाख्यानं शाकाहारं प्रकल्पयेत्।
स्थातव्यं ब्रह्मचर्य्येण ऋषिध्यानपरायणैः ॥

अनेन विधिना सम्यग्व्रतञ्चैतत् समाचरेत्।
यस्य यज्जायते पुण्यन्तद्‌गृणुष्व समाहितः॥
सर्व्वव्रतेषु यत् पुण्यं सर्व्वतीर्थेषु यत्फलम्।
सर्व्वदानेषु दत्तेषु तदस्य व्रतपारणात्॥
कुरुते या व्रतं चैतत्सा नारी सुखभागिनी।
रूपलावण्यसंयुक्ता पुत्रपौत्रादिसंयुता॥
इह लोके सदैव स्यात् परत्राप्यक्षया गतिः।
व्रतस्यास्य प्रभावेन जातिं स्मरति पौर्व्विकीं॥

इति ब्रह्माण्डपुराणोक्तं ऋषिपञ्चमीव्रतम्।

——०*०——

ब्रह्मोवाच।

नागानिष्टा तु पञ्चम्यां न विषैरभिभूयते।
स्त्रियं च लभते पुत्रं परमां श्रियमाप्नुयात्॥
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः।
पूर्व्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः॥

तिथीश्वरोऽत्र नागः।

गन्धपुष्पोपहारश्च यथाशक्ति विधीयते।
पूजा शाठ्येन शाठ्येन कृतापि तु फलप्रदा॥
आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः।
पूर्व्वोक्तफलदो होमो यतः शान्तेन चेतसा॥

एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयं।

इति भविष्यत्पुराणोक्तं नागव्रतम् ।

——000——

अश्वराडमृताज्जातो वातरंहा मनोजवः ।
उच्चैःश्रवाः पूजनीयश्चैत्रशुक्लस्य पञ्चमी ॥
तत्रैव पूज्या गन्धर्व्वास्तुरङ्गाणान्तु बान्धवाः ।
पत्रवाणधराः केचित् केचित् पत्रैश्च संयुताः ॥*
भीमश्चित्ररथश्चैव विख्यातः सर्व्वविद्दृषम् ।†
तथा सालिशिराः श्रीमान् प्रद्युम्नश्च महायशाः ॥
नारदश्च कलिन्दश्च गन्धर्व्वश्च हाहा हुहुः ।
सुबाहुस्तुम्बुरुश्चैव तथा चित्ररथः प्रभुः ॥
चित्राङ्गदश्च विख्यातश्चित्रसेनश्च वीर्य्यवान् ।
सिद्धपूर्णश्च ८द्री पर्णाशश्च महायशाः ॥
ब्रह्मचारी रतिगुणः सुपर्णोऽतिबलस्तथा ।
विश्वावसुः सुरेन्द्रश्च गन्धर्व्वोऽतिपराक्रमः ॥
इत्येते पूजनीयाः स्युर्गीतैर्वाद्यैः शुभैः ।
मोदकैः पोलिकाभिश्च परमान्नेनचाचतैः ॥
दध्ना गुडेन पयसा शालिपिष्टेन भूरिशः ।
धूपैर्माल्यैस्तथा दीपैर्द्दिजानां स्वस्तिवाचनैः ॥
एवं हि पूजिताः सम्यक् तुरगाणां हि बान्धवाः ।
बलमायुः प्रयच्छन्ति संग्रामेष्वपराजयम् ॥
आरोग्यं परमां पुष्टिं तथैव च विधीयते ।

---

* पत्रवानाः काश्चित् पत्रै संयुताश्च महायशाः इति पुस्तकान्तरे पाठः ।

† सर्व्वविद्दिशमिति पुस्तकान्तरे पाठः ।

इति शालिहोत्रहयपञ्चमीव्रतम्।

———000———

सर्व्वौषध्युदकस्नातः पञ्चम्यां पूज्य पद्मजम्।
सर्व्वोपस्करदानञ्च यः करोति गृहाश्रमे॥
गृहाटोदूखलं शूर्पं शिलां स्थालीञ्च पञ्चमीं।
गृहाटः, पेषणयन्त्रं उदूखलं, धान्यकण्डनम्॥
उदकुम्भञ्च पूर्सञ्च एतेषामनुगच्च यत्।
एतानि गृहिणां गेहे प्रस्थाप्य पुरुषोत्तम॥
उपस्करकृते नारी न सीदति कदाचन।
एतद्गृहव्रतं नाम सर्व्वसौख्यप्रदायकं।

इति भविष्योत्तरोक्तं गृहपञ्चमीव्रतं।

———000———

पञ्चम्यां पूजनं कृत्वा तथा चन्द्रमसो नरः।
आयुश्च विपुलां लक्ष्मीं यशश्चाग्र्याञ्च विन्दति॥

इति विष्णुधर्म्मोत्तरोक्तं सौभाग्यव्रतं।

———0*0———

पञ्चम्यां पृथिवीं देवीं तथा सम्पूजयेन्नरः॥
तमेवाप्नोति यत्नेन नात्र कार्य्या विचारणा।

इति विष्णुधर्म्मोक्तं पृथिवीव्रतं।

———000———

विश्वेदेवाश्च ये प्रोक्ताः पूर्व्वमेव मया दश।
तेषां संपूजनं कृत्वा पञ्चम्यां दिवमाप्नुयात्॥

वायु पुराणात्।

क्रतुर्द्दक्षो वसुः सत्यः कालकामौ विरोचनौ।
पुरूरवा भाद्रवाश्च विश्वेदेवाः प्रकीर्त्तिताः॥

इति विष्णुधर्म्मोत्तरोक्तं रूपावाप्तिव्रतं।

——000——

वारुणैः पुष्करण्यां यः पूजाञ्चैव समाचरेत्।
सर्व्वकाम समृद्धस्य यज्ञस्य तु फलं लभेत्॥

वारुणैः, पुष्पैः।

पुष्करं, उत्तमं तथा पूजामपि कुर्य्यात्।

इति विष्णुधर्म्मोत्तरोक्तं श्रीप्राप्तिव्रतं।

——:०:——

चैत्रशुक्लस्य पञ्चम्यां पूजयित्वा यथाश्रियं।
सकृदेवाप्नुयादेतत् फलं सम्वत्सरोदितं॥

इति विष्णुधर्म्मोत्तरोक्तं श्री व्रतम्।

——000——

उमां मेधां भद्रकालीं तथा कात्यायनीमपि।
धृतिं स्वाहां स्वधामृद्धिं मनस्युं तथा चमां॥
सुरभीं देवसेनाञ्च वेलां ज्योत्स्नां तथा शचीं।
गौरीं वरुणपत्नीञ्च धूम्राणीञ्च तथैव च॥

अभीष्टदेवजननीं देवपत्नीं तथैव च॥
पूजयन् काममाप्नोति वीतशोको न संशयः।

इति विष्णुधर्मोत्तरोक्तं कामाप्तिव्रतं।

———000———

ऐरावणं वायतुण्डमुच्चैःश्रवस मेव च।
तदा संपूजयन् राजन् विजयं समुपाश्नुते॥

इति विष्णुधर्म्मोत्तरोक्तं विजयव्रतं।

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकरणाधीश्वर-सकलविद्याविशारद-श्रीहेमाद्रि-विरचिते चतुर्व्वर्गचिन्तामणौ व्रतखण्डे पञ्चमीव्रतानि।

———

अथ दशमोऽध्यायः ॥

——०००——

अथ षष्ठीव्रतानि ।

अध्यास्ते सततं यदीयरसना*सिंहासनं भारती
यस्योत्फुल्लमनःसरोजनिलयं क्षीरोदशायी विभुः ।
श्लाघ्यं दक्षिणपाणिपल्लवतलं यस्यापि कल्पद्रुमो
हेमाद्रिः स निरूपयत्यभिमतं षष्ठीव्रतानां गणं ॥

विक्रान्त उवाच ।

रूपसम्पदमारोग्यं स्वर्गवासञ्च† पुष्कलं ।
प्राप्नुवन्ति नरा येन नियमं तं वदस्व मे ॥

अगस्त्य उवाच ।

साधु साधु महाप्राज्ञ यत् पृष्टोऽहन्त्वयानघ ।
तत्सर्व्वं कथयिष्यामि ततः श्रेयो भविष्यति ॥
शृणु पार्थिव वक्ष्यामि सर्व्वमोक्षप्रदं नृणां ।
यच्च गुप्तं पुरा राजन् ब्रह्म-विष्णिन्द्रदैवतैः‡ ॥
असुराणाञ्च सर्व्वेषां राक्षसानां तथैव च ।
शङ्करेण पुरा चैतत् षण्मुखाय निवेदितम् ॥
षण्मुखेन समाख्यातं महापातकनाशनम् ।

---

* अध्यास्ते सप्तजप्रदीपरसनेति पुस्तकान्तरे पाठः ।

† धनं धान्यञ्चेति पाठान्तरं ।

‡ ब्रह्मविष्ण्वन्द्र देवतैरिति पुस्तकान्तरे पाठः ।

यत्कृत्वा ब्रह्महा गोघ्नः सुरापो गुरुतल्पगः॥
अगारदाही गरदः सर्व्वपापरतोऽपि वा।
मुच्यते सर्व्वपापेभ्यो व्रतं श्रुत्वा नरोत्तम* ॥
सर्व्वपुण्यं पवित्रञ्च नृणामद्भुतनाशनं।
उपकाराय लोकानां तथा तव नृपोत्तम॥
शृणु भूप महापुण्यं व्रतमाहात्म्यमुत्तमं॥
प्रोष्ठपदामिते पक्षे षष्ठी भौमेन संयुता।
व्यतीपातेन रोहिण्या सा षष्ठी कथिता स्मृता॥

प्रोष्ठपदो, भाद्रपदः

सचात्र दर्शान्तीयाह्यः, रोहिणीयोगस्य तत्रैव सम्भवात्।

द्वितीया तु महापुण्या दुर्लभा व्रतिनः क्वचित्।
षष्ठी संवत्सरस्यान्ते सा पुनस्तेन संयुता॥
चैत्रवैशाखयोर्मध्ये सिते पक्षे शुभोदया।
वैशाखेऽपि च राजेन्द्र द्वारवत्यां परा स्मृता॥
यदि हस्ते सहस्रांशुस्तदा कार्य्यं व्रतं बुधैः।
अस्यां चैव हुतं दत्तं यत् किञ्चित् प्रतिपादितम्॥
तस्य सर्व्वस्य पुण्यस्य संख्यां कर्त्तुं न शक्यते।
यस्मिन् काले भवेदेतैर्गुणैः षष्ठी युता तदा॥
पञ्चम्यामेकभक्तन्तु कुर्य्यात्तत्र विचक्षणः।
षष्ठ्यां प्रातः समुत्थाय कृत्वादौ दन्तधावनम्॥
जलपूर्णाञ्जलिं कृत्वा इमं मन्त्रमुदीरयेत्।
निराहारोऽद्य देवेश त्वद्भक्तस्त्वत्परायणः॥

---

* स्वर्गलोकञ्च गच्छतीति पाठान्तरं

पूजयिष्याम्यहं भक्त्या शरणं भव भास्कर।
अर्घ्यं दत्त्वेति संकल्पं कृत्वा तत्र शुचिस्ततः॥
स्नानं कृत्वा प्रयत्नेन नद्यां तीर्थेऽथवा ह्रदे।
तड़ागे दीर्घिकायां वा गृहे वा नियतात्मवान्॥
देवदारु तथोशीर कुङ्कुमैलामनःशिलाः।
पत्रकं पद्मकं यष्टीमधु गव्येन पेषयेत्॥
क्षीरेणालोड्य कल्केन स्नानं कुर्य्यात्समन्त्रकं।
ॐ आपस्त्वमसि देवेश ज्योतिषां पतिरेव च॥
पापं नाशय मे देव वाङ्मनःकायकर्म्मजम्।
पञ्चगव्यकृतस्नानः पञ्चभङ्गैस्तु मार्ज्जयेत्॥

पञ्चभङ्गैः, पञ्चपल्लवैः।

आनयेन्मृत्तिकां शुद्धां स्नानार्थन्तु प्रयत्नतः।
मृत्तिके ब्रह्मपूतासि काश्यपेनाभिमन्त्रिता॥
पवित्रं कुरु मां नित्यं सर्व्वपापात्समुद्धर।
मन्त्रेणानेन वरुणं पूजयेद्द्विजमात्ररः॥
पाशाग्रहस्त वरुण सर्व्ववारीश्वर प्रभो।
अद्याहं प्रार्थयामि त्वां पूतं कुरु सुरेश्वर॥
आदित्यो भास्करो भानूरविः सूर्य्यो दिवाकरः।
प्रभाकरोऽसि तिमिरो देवः सर्व्वेश्वरो हरिः॥
गोमयेनानुलिप्तायां भूम्यां वै कुङ्कुमेन तु।
मण्डलं सर्व्वतोभद्रमालिखेद्द्विजमात्ररः॥
तत्र मध्ये लिखेत्पद्ममष्टपत्रं सकर्णिकं।

पूर्व्वपत्रे न्यसेत् सूर्य्यमाग्नेये तपनं न्यसेत्।
सुवर्णरेतसं याम्ये नैर्ऋत्ये च न्यसेद्रविं॥
आदित्यं वारुणे पत्रे वायव्ये च दिवाकरं।
सौम्ये प्रभाकरं तत्र सूर्य्यमीशानपत्रके॥
तीव्ररश्मिधरं देवं ब्रह्माणञ्चैव विन्यसेत्।
आधाररूपिणं देवं मध्यन्तु वरुणं न्यसेत्॥
सहस्ररश्मिं सूर्य्यञ्च सूक्ष्म स्थूल गुणान्वितं।
सर्व्वगं सर्व्वरूपञ्च मध्ये भास्करमेव च॥
सप्ताश्वरथमारूढं पद्महस्तं दिवाकरं।
अक्षसूत्रधनुःपाणिं कुण्डलैर्मुकुटेन च॥
रत्नैर्नानाविधैर्युक्तं सौवर्णं तत्र कारयेत्।
शक्तितस्तु पलादूर्द्धं तदर्द्धं कर्षतोऽपि वा॥
सौवर्णमारुतं कुर्यात् रौक्यञ्चैव तथा रथं।
सप्ताश्वैर्भूषितं कृत्वा रथं तस्याग्रतः स्थितं॥
अरुणं विनतापुत्रं गृहीताश्वमनूरुकं।
एवं रूपं रथं कृत्वा पद्मस्योपरि विन्यसेत्॥
तस्योपरि न्यसेद्देवं रक्तवस्त्रविभूषितं।
रक्तचन्दनमाल्यादिमण्डितं वातिशोभितं॥
अग्रतः सारथिं कृत्वा पूजयेदरुणं शुचिः।
रक्तपुष्पैः सुगन्धैश्च तथान्यैरपि शक्तितः॥
ॐ विनतातनयो देवः कर्मसाक्षी तमोनुदः।
सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु॥
मन्त्रेणानेन संपूज्य सारथिं तदनन्तरं।

देवस्य वाचनं कल्प्य प्रभूतादिकपञ्चकं ॥
प्रभूतं विमलं सारमाराध्यं परमंशुभं ।
दीप्ताभिःशक्तिभिश्चैव ततोभानुं प्रपूजयेत् ॥
दीप्ता सूक्ष्मा तथा भद्रा विनता विमलानघा ।
अमोघा वैद्युताचेति नवमी सर्व्वतोमुखी ॥
अपवित्रः पवित्रोवा सर्व्वावस्थां गतोऽपि वा ।
यःस्मरेद्भास्करं देवं स वाह्याभ्यन्तरः शुचिः ॥
शिखायां भास्करंन्यस्य ललाटे सूर्य्यमेव च ।
चक्षुर्म्मध्ये न्यसेद्भानुं मुखे तत्र रविं न्यसेत् ॥
कण्ठे न्यसेद्भानुमन्तं पद्मगर्भं द्विहस्तयोः ।
तिमिरं चयकद्देवं स्तनयोरेव विन्यसेत् ॥
जातवेदोभिधं नाभ्यां कट्यां भानुं तथा न्यसेत् ।
उग्रसूर्य्यं गुह्यदेशे तेजोरूपं द्विजङ्घयोः ॥
पादयोः सर्व्वरूपं तु सूक्ष्मस्थूलगुणान्वितं ।
एवं यथोक्तं विन्यस्य पात्रं गृह्य तथार्च्चयेत् ॥
करवीरार्ककुसुमैरक्तचन्दनचम्पकैः ।
पुष्पैःसुगन्धैर्धूपैश्च कुङ्कुमैरुपशोभितं ॥
मार्त्तण्डं भानुमादित्यं भास्करं तपनं रविं ।
हंसं दिवाकरं चेति पादतो मुकुटावधि ॥
पादौ जङ्घे तथा जानुद्वयमूरुं कटिन्तथा ।
नाभिवक्षस्थलं शीर्षमितेष्वङ्गेषु पूजयेत् ॥
आनयेदर्घ्यपात्रन्तद्रौप्यं वा ताम्रमेव च ।
अर्घ्यार्थं दैवतं पात्रमुदकेन प्रपूरयेत् ॥

पूजयेत्तत्र प्रागादिदेवतास्ताः समाहितः।
दिग्देवतास्ततः पूज्य गन्धपुष्पानुलेपनैः॥
पात्रे तोयं समादाय सपुष्पं फलचन्दनं।
जानुभ्यामवनीं गत्वा सूर्य्यायार्घ्यं निवेदयेत्॥
वेदगर्भ नमस्तुभ्यं वेदगर्भ नमोस्तु ते।
अव्यक्तमूर्त्तये तुभ्यमर्घं ग्टहाण नमोस्तु ते॥
ब्रह्ममूर्त्तिधरोमेश चतुर्वक्त्र सनातन।
सृष्टिस्थितौ संस्थिताय ग्टहाणार्घं नमोस्तु ते॥
विष्णुरूपधरो देवः पीतवस्त्रश्चतुर्भुजः।
प्रभवः सर्वलोकानामर्घ्यं ग्टहाण नमोस्तु ते॥
यं रुद्ररूपिणं देवं भगवन्तं त्रिशूलिनं।
यो दहेच्च त्रिलोके वै अर्घ्यं ग्टहाण नमोस्तु ते॥
त्वं ब्रह्मा त्वञ्च विष्णुश्च रुद्रस्त्वञ्च प्रजापतिः।
त्वमेव सर्वभूतात्मा अर्घ्यं ग्टहाण नमोस्तु ते॥
कालात्मा सर्व्वभूतात्मा वेदात्मा सर्वतोमुखः।
जन्ममृत्युजराशोकसंसारभयनाशनः॥
दारिद्र्यव्यसनध्वंसी श्रीमान् देवो दिवाकरः।
सुवर्णस्फटिको भानुः स्वर्णरेता दिवाकर॥
हरिदश्वोऽंशुमाली च अर्घ्यं ग्टहाण नमोस्तु ते।
चतुर्भिर्मूर्त्तिभिः संस्थामष्टाभिः परिगीयते॥
चतुर्भिर्मूर्त्तिभिः संस्थामष्टाभिः परिमीयते।
सामध्वनिस्त्रयो यस्य अर्घ्यं ग्टहाण नमोस्तु ते॥
अथ गन्धञ्च पुष्पञ्च तथा धूपञ्च दीपकं।

नैवेद्यञ्च यथाशक्त्या प्रार्थयेत्सूर्य्यदेवतां ॥
अग्निमीले नमस्तुभ्यं नमस्ते जातवेदसे।
इषेचैव नमस्तुभ्यमग्नेचैव नमोनमः॥
शन्नोदेवीनमस्तुभ्यं जगज्जन्म नमोनमः।
आत्मरूपिन्नमस्तुभ्यं विश्वमूर्त्ते नमोनमः॥
त्वं ब्रह्मा त्वञ्च वै विष्णुस्त्वन्धाता त्वं हुताशनः।
मुक्तिकाममभीप्सामि प्रार्थयामि सुरेश्वर॥
विश्वतश्चक्षुराख्यातो विश्वतश्चरणानन।
विश्वात्मा सर्व्वतो देवः प्रार्थयामि सुरेश्वर॥
इति मन्त्रं समुच्चार्य्य नमस्कुर्व्वीत भास्करं।
संवर्च्चसेति पाणिभ्यां तोयेन विरजेन्मुखं॥
हंसःशुचिषदित्यृचा सूर्य्यस्यैवावलोकनं।
उदुत्यं चित्रमित्येतत् सूक्तं देवाग्रतो जपेत्॥
प्रथमे चैवकोणे तु फलञ्चैव च कारयेत्।
फलैः पुष्पैरक्षतादिभक्ष्यैर्नानाविधैरपि॥
शय्यां तत्र च देवस्य शुभे देशे प्रकल्पयेत्।
षट्धान्यं षड्रसं देवं रौप्यञ्चैव महाप्रभुं॥
पुरुषं खड्गहस्तञ्च कारयेच्चैव बुद्धिमान्।
वस्त्रयुग्मेन सञ्छन्नं लवणोपरि विन्यसेत्॥
अनेनैव च मन्त्रेण स्नानमर्घार्चनन्ततः।
नमस्ते क्रोधरूपाय खड्गहस्तजिघांसवे॥
जिघांसकामस्त्वां दृष्ट्वा जुहुवुः सर्व्वदेवताः।
त्वया व्याप्तं मेरुपृष्ठं चण्डभास्करसुप्रभं॥

अतस्त्वां पूजयिष्यामि अर्घ्यं गृह्ण नमोस्तु ते।
क्षपयित्वा ततो रात्रिं गीतवादित्रनिस्वनैः॥
ततस्त्वभ्युदिते सूर्य्ये होमं कुर्यात् स्वशक्तितः।
पूजयेत्तत्र शक्त्या च देवांश्च विधिवद्गुरुं॥
होमोऽर्कस्य समिद्भिश्च घृतमिश्रैस्तिलैस्तथा।
संसिद्धचरुकश्चैव घृतञ्च जुहुयात् द्विजः॥
आकृष्णेनेतिमन्त्रेण शतमष्टोत्तरं शतं।
होमो व्याहृतिभिश्चाथ स्विष्टकृत्तदनन्तरं।
कपिलां पूजयेद्देवीं सवत्सां पापनाशिनीं॥
वस्त्रयुग्मां सघण्टाञ्च स्वर्णशृङ्गविभूषितां।
सुवर्णास्यां रौप्यखुरां कांस्यदोहनकल्पितां॥
मन्त्रेणानेन तां दद्याद्ब्राह्मणाय च शक्तितः।
कपिले सर्व्वदेवानां पूजनीयासि रोहिणी॥
सर्व्वतीर्थमयी यस्मादतः शान्तिं प्रयच्छ मे*।
या लक्ष्मीः सर्व्वदेवानां या च देवेष्ववस्थिता॥
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु।
देहस्था या च रुद्राणां शङ्करस्य च या प्रिया॥
धेनुरूपेण सा देवी मम पापं व्यपोहतु।
विष्णोर्व्वक्षसि या लक्ष्मीः स्वाहा चैव विभावसोः॥
चन्द्रार्कानलशक्तिर्या धेनुरूपास्तु सा श्रिये।
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च॥

---

* शान्तिं प्रयच्छतु इति पुस्तकान्तरेपाठः।

लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे ॥
स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजामपि ।
वषट् या प्रोच्यते लोके सा धेनुस्तुष्टिदास्तु मे ॥
गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥

गोपूजनमन्त्रः ।

गावः स्पृष्ट्वा नमस्कृत्य यो वै कुर्य्यात् प्रदक्षिणं ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥
नमस्ते कपिले देवि सर्व्वपापप्रणाशिनि ।
संसारार्णवमग्नं मां गोमातस्त्रातुमर्हसि ॥

गोदानमन्त्रः ।

हिरण्यगर्भगर्भस्त्वं हेमवीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

अलङ्कारदानमन्त्रः ॥

रक्तवस्त्रयुगं यस्मादादित्यस्य च वल्लभम् ।
प्रदानात्तस्य मे सूर्य्य अतः शान्तिं प्रयच्छतु ॥

वस्त्रदानमन्त्रः ।

सुवर्णं वस्त्रयुग्मञ्च परिधानं च कारयेत् ।
सुवर्णमलङ्कारं परिधानं यथास्थानधृतं कारयेत् परिग्राहकेण ॥
एतैः प्रकारैः संयुक्तां दद्याद्धेनुं द्विजातये ।
भानुं सदक्षिणं दद्यान्मन्त्रेणानेन यत्नतः ॥*

---

* कपिलां कपिलषष्ठीं च धेनुं दद्यात् अतस्त्रापि देवताफलादिति क्वचित् पुस्तकान्तरे पाठः ।

भास्करो विधितो जातो द्रव्यस्थो भास्करः स्वयम्।
भास्करस्य प्रदाता च तेन वै भास्करो मम॥

दानमन्त्रः।

भास्करं प्रतिगृह्णामि भास्करो वै ददाति च।
भास्करस्तारकोभाभ्यां तेन वैभास्करो मम॥

प्रतिग्रहमन्त्रः।

ब्राह्मणान् भोजयेत्पश्चात्पायसेन गुडेन च।
शक्त्या च दक्षिणां दद्यात्तेभ्यश्चैव विशेषतः॥
अल्पवित्तोऽपि यः कश्चित् सोऽपि कुर्य्यादिमं विधिं।
आत्मशक्त्यनुसारेण सोऽपि तत्फलमाप्नुयात्॥
आचार्य्यस्य ततो भक्त्या सर्व्वप्राणैर्विनिक्षिपेत्।
गोभूहिरण्यवासांसि व्रीहयो लवणं तिलाः॥
एतत्सर्व्वं प्रदत्त्वा च कपिलां प्रार्थयेत्ततः।
कपिले पुण्यकर्म्मासि निष्पापे पुण्यकर्म्मणि* ॥
मां समुद्धर दीनं वाददती ह्यभयं कुरु।

अददतो अदातुरपि।

दिव्यवादित्रशब्दैश्च सेव्यसे कथिता सदा।
तथा विद्याधराः सिद्धा भूतनागगणा ग्रहाः॥
कपिला रोमसंख्यातास्तत्र देवाः प्रतिष्ठिताः।
पुष्पवृष्टिं प्रमुञ्चन्ति नित्यमाकाशमाश्रिताः॥
ब्रह्मणोत्पादिता देवी अग्निकुण्डा तु सुप्रभा।
नमस्ते कपिले पुण्ये सर्व्वदेवनमस्कृते॥

---

* पुण्यवहनीति पुस्तकान्तरे पाठः।

जय नित्यमहासत्वे सर्व्वतीर्थादिमङ्गले ।
दातारं स्वजनोपेतं ब्रह्मलोकं नयाशु वै ॥

दातारं व्रताङ्गानां ।

प्रदक्षिणं ततः कृत्वा नत्वा ब्राह्मणपुङ्गवान् ।
आशीर्व्वादान्वदेयुस्ते पुत्रपौत्रधनागमान् ॥
आरोग्यं रूपसौभाग्यं सर्व्वदुःखविवर्जितः ।
अन्ते गोलोकमासाद्य चिरायुः सुखभाग् भवेत् ॥
यदा स्वर्गात् प्रपतति राजा भवति धार्म्मिकः ।
सप्तद्वीपवतीं भुङ्क्ते भुक्त्वा राज्यमकण्टकम् ॥
अहो व्रतमिदं पुण्यं सर्व्वदुःखप्रणाशनम् ।
अतः परं प्रवक्ष्यामि दानस्य फलमुत्तमम् ॥
महावेदमये पात्रे सद्वृत्ते चाक्षयं भवेत् ।
व्रतं सर्व्वव्रतश्रेष्ठमिदमग्र्यं महाफलं ॥
तारयिष्यति दातारं नूनमक्षयमव्ययम् ।
एवं देवगणाः सर्वे भूतसंघाश्च हर्षिताः ॥
आकाशस्थाः प्रनृत्यन्ति पुण्येऽस्मिन् दिवसागमे ।
पात्रभूताय ऋषये श्रोत्रियाय कुटुम्बिने ॥
एवं यः कपिलां दद्यात् विधिदृष्टेन कर्म्मणा ।
स याति परमं स्थानं* यावन्न च्यवते पुनः ॥

स्कान्दे प्रभासखण्डे तु विशेषः ।

उपलिप्ते शुभे देशे पुष्पाक्षतविभूषिते ।
स्थापयेद्व्रणं कुम्भञ्चन्दनोदकपूरितं ॥

---

* यस्मादिति पुस्तकान्तरे पाठः ।

पञ्चरत्नसमायुक्तं दूर्वापुष्पाक्षतान्वितम्।
रक्तवस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतम्॥
रथो रौक्मफलस्यैव एकचक्रः सुचित्रितः।
सौवर्णफलसंयुक्तां मूर्त्तिं सूर्य्यस्य कारयेत्॥
कुम्भस्योपरि संस्थाप्य गन्धपुष्पैस्तथार्चयेत्।
आदित्यं पूजयेद्देवं नामभिः स्वैर्यथोदितैः॥
आदित्य, भास्कर,रवे भानो सूर्य्य दिवाकर।
प्रभाकर नमस्तुभ्यं संसारान्मां समुद्धर॥
भुक्ति मुक्ति प्रदो यस्मात्तस्माच्छान्तिं प्रयच्छ मे।

प्रार्थनमन्त्रः।

नमो नमस्ते वरद ऋक्सामयजुषां पते।
नमस्ते विश्वरूपाय विश्वधाम्ने नमो स्तु ते॥
एवं संपूज्य विधिवद्देवदेवं दिवाकरम्।
पूजयेत् कपिलां धेनुं वस्त्रमाल्यानुलेपनैः॥

दानमन्त्रः।

दिव्यमूर्त्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः।
कपिलासहितो देवो मम मुक्तिं प्रयच्छतु॥
तस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी।
प्रदत्ता सह सूर्य्येण मम मुक्तिप्रदा भव॥

इति स्कन्दपुराणोक्तं कपिलाषष्ठीव्रतम्।

——0*0——

ईश्वर उवाच।

चैत्रशुक्लात्समारभ्य व्रतार्थमधुनोच्यते।
उपोष्य विधिना षष्ठीं विशेषात् षण्मुखं यजेत्॥

मृण्मयीं प्रतिमां रम्यां तदा कुर्य्याद्विशेषतः ।
षण्मुखं द्वादशभुजं बालवत् काञ्चनप्रभम् ॥
मयूरवाहनं देवं सौम्यं लावण्यपूरितम् ।
शक्तिघण्टा पताकास्त्र पाशकुक्कुटभूषितम् ॥
दण्डाभयं सवरदं खड्गं पुधिशरासनम् ।
संपूज्य परया भक्त्या शुक्लपुष्पोपचारकैः ॥
नैवेद्यं गन्धवस्त्राणि शुक्लान्येव प्रदापयेत् ।
ब्राह्मीरसं समादाय कपिलाज्यपलं तथा ॥
सारस्वणमनुनामन्त्र्य सहस्राष्टोत्तरेण तु ।

सारस्वणमनुना सरस्वतीमन्त्रेण ।

आचार्य्यं पूजयेद्भक्त्या वस्त्रहेमान्नवाहनैः ।
ब्राह्मीरसघृतं पश्चाद्व्रतान्ते प्राशनं हितम् ॥
मासि मासि प्रकर्त्तव्यं यावत्सम्वत्सरावधि ।
ब्रह्मचर्य्येण शुचिना षब्दमेकं समाचरेत् ॥
महाकविर्भवेत्सोऽपि भुवि वाचस्पतिर्यथा ।
सप्तकृत्वाति शास्त्राणि वादिनां मूर्द्ध्नि तिष्ठति ॥
रक्षोविनायकास्तस्य न हिंसन्ति कदाचन ।
स्कन्दग्रहा महाघोरास्तथापस्मारदुर्ग्रहाः ॥
न हिंसन्ति महासेनव्रतस्यास्य प्रभावतः ।
इदं व्रतोत्तमं श्रेष्ठं कर्त्तव्यं भूतिवर्द्धनम् ॥
षण्मुखं पार्वतीपुत्रं गुहं स्कन्दं कुमारकम् ।
कार्त्तिकेयं तथा बालं तथा क्रौञ्चनिसूदनम् ॥
तारकारातिसंज्ञञ्च तथान्यं कृत्तिकासुतं ।

वैशाखञ्च विशाखञ्च मासि मासि प्रपूजयेत्॥
सूर्य्यं सूर्य्यकलायुक्तं शशिना मूर्द्ध्नि भूषितम्।
क्रमेण मन्त्रा वोद्धव्या द्वादशानां शिखिध्वज॥

इति कालोत्तरोक्तं कुमारषष्ठीव्रतम्।

——0*0——

स्कन्द उवाच।

प्राप्तराज्यं च राजानं धर्म्मपुत्रं युधिष्ठिरम्।
कदाचिदाययौ द्रष्टुन्दुर्व्वासा मुनिसत्तमः॥
तं पप्रच्छ महातेजा धर्म्मसूनुः कृताञ्जलिः।
तद्व्रतं श्रोतुमिच्छामि कर्त्तुञ्च मुनिसत्तम॥

दुर्व्वासा उवाच।

शृणु राजन्महाभाग व्रतानामुत्तमं व्रतम्।
अस्तीह यच्चीर्णमात्रात् सर्व्वकामांस्तु पूरयेत्॥
सर्व्वपापक्षयं कुर्य्यादखण्डितव्रतोह्यपि*।
यदि लभ्येत जीवेऽङ्गि दैवेन नृपसत्तम॥
षष्ठी भाद्रपदे शुक्ला वैधृतेन समन्विता।
विशाखा भौमयोगेन साचम्पेतीह विश्रुता॥
देवासुरमनुष्याणां दुर्लभा षष्टिहायनी।
कृते त्रेतायां पञ्चाशद्धायनी द्वापरे पुनः॥
चत्वारिंशत् कलौ त्रिंशद्धायनी दुर्लभा ततः।
आदौ कृतयुगे पूर्व्वं या चीर्णा विश्वकर्म्मणा॥
तत्फलाद्विश्वकर्तृत्वं प्राजापत्यमवाप्तवान्।

* अखण्डितव्रताच्चपि इति पुस्तकान्तरे पाठः।

पृथुना कार्त्तवीर्य्येण भुवा नारायणेन च ॥
ईश्वरेणोमया सार्द्धमितरेतरलिप्सया ।
यश्चैनां विधिवत् कुर्य्यात् सोऽनन्तं फलमश्नुते ॥

युधिष्ठिर उवाच ।

तद्विधिं श्रोतुमिच्छामि विस्तराद्वदतो मुने ।
के मन्त्राः के च नियमाः सापि किंलक्षणा भवेत् ॥

दुर्व्वासा उवाच ।

द्विदैवत्यर्क्षभौमेन वैधृतेन समन्विता ।
नभस्ये वासिता षष्ठी सा चम्पेति निगद्यते ॥

द्विदैवत्यर्क्षं विशाखा ।

पञ्चम्यां नियमङ्कुर्य्यादुपवासस्य च व्रती ।
उपवासस्याङ्गभूतनियममेकभक्तं कुर्य्यादित्यर्थः ॥
चम्पाषष्ठीव्रतं कुर्य्याद्यथोक्तवचनान्नरोः ।
ततः प्रभाते विमले दन्तधावनपूर्व्वकम् ॥
कृत्वा सम्यक् व्रतं तस्य सङ्कल्पं कुरुते नरः ।
सम्यक्कृत्वा सर्व्वाङ्गोपेतव्रतनिःपादनशक्तिं निर्द्धार्य्य ।
निराहारोऽद्य देवेश त्वद्भक्तस्तत्परायणः ॥
पूजयिष्याम्यहं भक्त्या शरणं भव भास्कर ।

संकल्पमन्त्रः ।

ततः स्नानं प्रकुर्व्वीत नद्यादौ विमले जले ।
मृदमालभ्य मन्त्रैश्च तिलैः शुक्लैश्च मन्त्रवित् ॥
सावित्रः परमस्त्वं हि परं धाम जले मम ।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ॥

प्रार्थनमन्त्रः ।

आपस्त्वमसि देवेशज्योतिषां पतिरेव च ।
पापं नाशय मे देव वाङ्मनःकर्म्मभिः कृतम् ॥

स्नानमन्त्रः ।

ततः सन्तर्पयेद्देवानृषीन् पितृगणानपि ।
ततश्चेत्य गृहं मौनी पाषण्डालापवर्जितः ॥
स्थण्डिलं कारयेत्कुम्भश्चतुरस्रं सुशोभनम् ।
स्थापयेदव्रणं कुम्भं पञ्चरत्नसमन्वितम् ॥
रक्तवस्त्रयुगच्छन्नं रक्तचन्दनचर्च्चितं ।
तस्योपरि न्यसेत्पात्रं सौवर्णं ताम्रमेव वा ॥
कुङ्कुमेन लिखेत्पद्मं द्वादशारं सकर्णिकं ।
तस्योपरि न्यसेत् सूर्य्यं सौवर्णं सरथारुणम् ॥
शक्त्या वा वित्तसारेण वित्तशाठ्यविवर्जितः ।
तमर्च्चयेद्गन्धपुष्पैर्विधिमन्त्रपुरःसरं ॥
पञ्चामृतेन स्नपनं कुर्य्यादर्कस्य संयतः ।
ततस्तु गन्धतोयेन परां पूजां समाचरेत् ॥
गन्धैर्नानाविधैर्दिव्यैः कर्पूरागुरुकुङ्कुमैः ।
फलैस्तदनु सम्भूतैरनेकैश्च सुगन्धिभिः ॥
मण्डपं कारयेत्तत्र पुष्पमालाविभूषितम् ।
यथाशोभं प्रकुर्व्वीत अधश्चोपरिसर्व्वतः ॥
ततस्तु पूजयेद्देवं भास्करं कमलोपरि ।

आदित्याय नमः । तपनाय नमः । पुष्णे नमः । भानुमते नमः । भानवे नमः । अर्य्यम्णे नमः । विश्वकर्म्माय नमः । अंशुमते नमः ।

सहस्रांशवे नमः। खनायकाय नमः। सुकरायनमः। सूर्य्याय नमः। खगाय नमः।

एषु प्रथमेन मन्त्रेण मध्ये पूजनं इतरैर्द्वादशभिः पूर्व्वादिदलक्रमेण पूजनम्।

आदित्यपूजामन्त्रः।

जन्मान्तरसहस्रेण दुष्कृतं यन्मया कृतं।
तत् सर्व्वं नाशमायातु दिवाकर तवार्च्चनात्॥

प्रार्थनमन्त्रः।

विनतातनयो देवः कर्म्मसाक्षी तमोनुदः।
सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु॥

रथपूजामन्त्रः।

ततः संपूजयेद्देवमच्युतन्तद्रथस्थितं।
अष्टाक्षरेण मन्त्रेण गन्धपुष्पादिभिः क्रमात्॥
अष्टाक्षरो, घृणिमन्त्रः सम्प्रदायादवगन्तव्यः।
कालात्मा सर्व्वभूतात्मा वेदात्मा विश्वतोमुखः।
जन्म-मृत्यु-जरा-रोग-संसारभयनाशनः॥

सूर्य्योदये अर्घ्यमन्त्रः।

ततः संपूजयेच्छुक्लां सवत्सां गां पयस्विनीं।
सवस्त्रकण्ठाभरणां सुघण्टाभिरलङ्कृतां॥
ब्रह्मणोत्पादिते देवि सर्व्वपापविनाशिनि।
संसारार्णवमग्नं मां गोमातस्त्रातुमर्हसि॥

सुरूपा बहुरूपाश्च मातरो लोकमातरः।
गावोमामुपसर्पन्तु सरितः सागरं यथा॥
या लक्ष्मीः सर्व्वदेवानां या च देवेषु संस्थिता।
धेनुरूपेण सा देवी मम पापं व्यपोहतु॥
या लक्ष्मीर्लोकपालानां या लक्ष्मीर्धनदस्य च।
चन्द्रार्कशक्रशक्तिर्या सा धेनुर्व्वरदास्तु मे॥

धेनुपूजामन्त्रः।

तिलहोमं ततः कुर्य्यात् सावित्राष्टोत्तरं शतम्।
ततस्तां कल्पयेद्धेनुमर्को मे प्रीयतामिति॥
आचार्य्याय ततो दद्यादादित्यं सरथारुणं।
सकुम्भरत्नवस्त्रैश्च सर्व्वोपस्करणैः सह॥
ददामि भानुं भवते सर्व्वोपस्करसंयुतं।
मनोभिलषितावासं करोतु मम भास्करः॥

दानमन्त्रः।

गृह्णामि भास्कर रवे अनन्त विश्वतो मुख
मनोऽभिलषितावाप्तिमुभयोः कर्त्तुमर्हसि

प्रतिग्रहमन्त्रः।

सर्व्वतीर्थमयीं धेनुं सर्व्वयज्ञमयीं शुभां।
सर्व्वदानमयीं देवीं ब्राह्मणाय ददाम्यहम्॥

गोदानमन्त्रः।

गृह्णामि सुरभिं देवीं सर्व्वयज्ञमयीं शुभां।

उभौ पुनीहि वरदे उभयोस्तारिका भव ॥

प्रतिग्रहमन्त्रः ।

ततस्तु भोजयेद्विप्रान् द्वादशैव स्वशक्तितः ।
दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य विसर्जयेत् ॥
अवैकल्यं व्रतं तस्य सा धेनुर्द्विजसत्तमः ।
अभिनन्दतु ह्याशीर्भिरभिरम्यैरनिन्दिता ।
ततस्तु स्वयमश्नीयात् द्विजानां शेषमिष्टवान् ॥
सह पुत्रैः कलत्रैश्च अन्यैर्बहुजनैर्वृतः ।
एवं यः कुरुते चम्पां सोऽत्यन्तं फलमश्नुते ॥
प्रभूणाञ्चविधिः प्रोक्तस्तत्प्रभूणाञ्च गोचरः ।
सर्व्वैश्चैतद्व्रतं कार्य्यं स्वशक्त्या दुःखभीरुभिः ॥
प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते ।
विफलं तस्य तत्र स्यादनीशस्त्वानुकल्पिकः* ॥
पञ्चम्यां नियमं कुर्य्यादाचार्य्यवचनाद्व्रती ।
षष्ठ्यां स्नानं प्रकुर्व्वीत सन्तर्प्य पितृदेवताः ॥
अभ्येत्य स्वगृहं मौनी सूर्य्यं मनसि चिन्तयेत् ।
स्थापयेदव्रणं कुम्भं मृत्पात्रञ्च तथोपरि ॥
तस्योपरि न्यसेत् सूर्य्यं पलैकेन विनिर्मितम् ।
सौवर्णं भक्तिसंयुक्तं वित्तसारं† तथारुणं ॥
तमर्च्चयेज्जगन्नाथं गृहीत्वाज्ञां गुरोः स्वयम् ।
षडक्षरेण मन्त्रेण गन्धपुष्पानुसम्भवम् ॥

---

* न साम्परायिकं तस्य दुर्म्मतेर्व्विद्यते फलमिति पाठान्तरं ।

† वित्तशाठ्यमिति पुस्तकान्तरे पाठः ।

ॐ नमः सूर्य्यायेतिमन्त्रः।

संपूज्य विधिवद्देवं फलपुष्पादिकञ्च यत्।
सूर्य्यायावेदयेत् सर्व्वं सूर्य्यो मे प्रीयतामिति॥
ततः प्रभाते विमले गत्वा गुरुगृहं व्रती।
सर्व्वोपकरणैः सूर्य्यमाचार्य्याय निवेदयेत्॥
धान्यं पुष्पं फलं वस्त्रं रत्नं गवादिकञ्च यत्।
गवां कोटिसहस्रेण कुरुक्षेत्रेऽर्कपर्व्वणि॥
चम्पादानस्य राजेन्द्र कलां नार्हन्ति षोड़शीं।
सर्व्वतीर्थप्रदानानि तथान्यान्यपि षोड़श॥
चम्पायास्तुलना पार्थ चम्पैकात्वतिरिच्यते।
आदित्यस्तपनः पूषा भानुमान् भानुरर्य्यमा॥
विश्ववक्त्रोंऽशुमान्† देवः सहस्रांशुःखनायकः।
सूरःसूर्य्यः खगः पूज्यः पूर्व्वपत्रादिषु क्रमात्॥

देवइत्यंशुमतो विशेषणं।
आदित्यो मध्ये पूज्यस्तपनादयः पूर्व्वपत्रादिषु पूज्या इत्यर्थः।
पञ्चम्यामित्यादिना पुनर्व्रतविधिर्धनहीनविषयः।

इति स्कन्दपुराणोक्तचम्पाषष्ठीव्रतं।

———000———

कृष्णउवाच।

मार्गशीर्षे सिते पक्षे षष्ठी भरतसत्तम।
पुण्या पापहरा ज्ञेया शिवा प्रीता गुहप्रिया॥

---

† विश्वचक्रोऽंशुमानिति पुस्तकान्तरे पाठः।

निहत्य तारकं षष्ठ्यां गुहस्तारकराजवत्‡।
रराज तेन दयिता कार्त्तिकेयस्य सा तिथिः॥
स्नानदानादिकं कर्म्म तस्यामक्षयमुच्यते।
येऽस्यां पश्यन्ति गाङ्गेयं दक्षिणाशां समाश्रितं॥
ब्रह्महत्यादिपापैस्ते मुच्यन्ते नात्र संशयः।
तस्मादस्यां सोपवासः कुमारं स्वर्णसम्भवं॥
राजतञ्च महाराज मृण्मयञ्चाथ दारुजं।
कारयित्वार्थसारेण कामामर्षविवर्जितः॥
अपराह्ने ततः स्नात्वा सम्यगाचम्य बुद्धिमान्।
पद्मासनस्थं गाङ्गेयं ध्यायंस्तिष्ठेच्च शक्तितः॥
ब्राह्मणस्तु ततो विद्वान् गृहीत्वा करकन्नवं।
दक्षिणास्यः स्वशिरसि धाराञ्चैव निपातयेत्॥
चन्द्रमण्डलसम्भूता भवभूतिपवित्रिता।
गङ्गाकुमार धारेयं पातिता तव मस्तके॥
एवं ध्यात्वा समभ्यर्च्य मार्त्तण्डमण्डलं द्विजः।
पुष्पधूपादिना पश्चात् पूजयेत् कृत्तिकासुतं॥
देव सेनापते स्कन्द कार्त्तिकेय भवोद्भव।
कुमार गुह गाङ्गेय शक्तिहस्त नमोस्तु ते॥
एभिर्नामपदैः पूज्य नैवेद्यं विनिवेदयेत्।
फलानि पनसादीनि दक्षिणाशाभवानि वै॥
चन्दनं मलयोद्भूतं कर्पूरं स्वामिवल्लभं।
पार्श्वस्थौ पूजयेच्छागकुक्कुटौ सर्व्वदा प्रियौ॥

---

‡ गुहस्तारापतिर्यथेति पाठान्तरं।

सकलापम्मयूरञ्च प्रत्यत्रं हेमजन्तथा।
कृत्तिका, शकटं पार्श्वे सम्पूज्य स्कन्दवल्लभं॥
तैरेव नामभिर्होमः कार्य्यः साज्यैस्तिलैस्ततः।
एवं निर्व्वर्त्य विधिवत् फलमेकं युधिष्ठिर॥
प्राशयित्वा स्वपेद्रात्रौ चितिस्थे दर्भसंस्तरे।
नालिकेरम्मातुलङ्गं नारङ्गम्पनसन्तथा॥
जम्बीरन्दाडिमन्द्राचां श्रीफलामलकन्तथा।
कदल्याश्च फलं हृद्यं त्रपुषं क्रमशो नृप॥
प्रतिमासम्प्राशयित्वा मासमेकं विवर्जयेत्।
अलाभे देशकालोत्थैःफलैर्द्वादशभिः क्रमात्॥
सम्पूर्णं जायते राजन् नक्तभुक्तस्य नान्यथा।
प्रत्यचो हेमघटितः छागो वा कुक्कुटोऽथवा॥
प्रातर्दद्यात् वाचकाय सेनानीः प्रियतामिति।
सेनानीश्वरसम्भूतः क्रौञ्चारिः षण्मुखो गुहः॥
गाङ्गेयः कार्त्तिकेयश्च स्वामी बालो ग्रहाग्रणीः।
छागप्रियः शक्तिधरः कुमारो द्वादश स्मृताः॥
प्रीयतामिति सर्व्वेषु क्रमान्मासेषु कीर्त्तयेत्।
ब्राह्मणान् भोजयित्वादौ पश्चाद्भुञ्जीत वाग्यतः॥
एवं सम्वत्सरस्यान्ते कार्त्तिके मासि भारत।
कार्त्तिकेयं समभ्यर्च्य वासोभिर्भूषणैस्तथा॥
प्रतिमासमशक्तोयः सकृदेतत्समाचरेत्।
सम्वत्सरविधानेन पूजाहोमपुरःसरं॥
दद्यात्सर्व्वं द्विजेन्द्राय वाचकाय विशेषतः।

पारितेऽस्मिन् व्रते पार्थ तीर्णः स्याद्भवसागरात्॥
य एवं कुरुते भक्त्या नरो योषिदथापि वा।
संप्राप्येह शुभान् कामान् गच्छतीन्द्रसलोकतां॥
सदैव पूजनीयस्तु कार्त्तिकेयो महाभुजः।
कार्त्तिकेयादृतेनान्योराज्ञां पूज्यः प्रचक्षते॥
संग्रामे गच्छमानो यः पूजयेत् कृत्तिकासुतम्।
स जयेच्छत्रुसंघातान् यथेन्द्रो दानवान् रणे॥
तस्मात् प्रतिकृतिं कृत्वा कार्त्तिकेयस्य शोभनां।
दक्षिणाशास्थितस्यैव* सम्यग् वीक्ष्य विचक्षणः॥
हेमादिकां यथा शक्त्या गृहे संस्थाप्य पूजयेत्।
पूज्यमानस्तु तां भक्त्या सर्व्वान् कामानवाप्नुयात्॥
यस्तु षष्ठ्यां सदा नक्तं कुर्य्यादुद्दिश्य तं विभुं।
सर्व्वपापविनिर्मुक्तो गाङ्गेयस्य प्रियो भवेत्॥
त्रिःकृत्वो दक्षिणामाशां गच्छेत् श्रद्धासमन्वितः।
यः पश्येद्देवदेवेशं पुत्रं पशुपतेः स्वयं॥
विहाय दुर्म्मतिं सद्यः प्रशान्तात्मा स जायते।
विमुक्तो दुःखदौर्गत्या सुखमास्ते चिरायुषा॥
मृतः शिवपुरङ्गत्वा मोदते स्कन्दवच्चिरम्।
ततः कुले द्विजाग्र्याणां वेदवेदाङ्गपारगे॥
समृद्धे धर्म्मशीले च यज्वनां दानशीलिनाम्।
गुणैर्युक्तः समस्तैस्तु वेदवेदाङ्गपारगः॥
सर्व्वभूतदयालुश्च स्कन्दैकगतमानसः।

---

* दक्षिणाशार्पितस्येति पुस्तकान्तरे पाठः।

जायते भरतश्रेष्ठ पुराणार्थैकनिष्ठितः।
विमुक्तकर्म्मबन्धश्च प्रयाति परमं पदं॥
इति सर्व्वं मयाख्यातं स्कन्दमाहात्म्यमुत्तमम्।
यः पठेत् शृणुयाद्भक्त्या सोऽपि पापैः प्रमुच्यते॥
यः पूजयेच्छरवणोद्भवमादिदेवं
शम्भोः सुतञ्च दयितं गिरिराजपुत्र्याः।
स्वर्गे निरर्गलसुखान्यनुभूय भूयः
सेनापतिर्भवति राज्यधुरन्धरोऽसौ॥

इति भविष्योत्तरे कार्त्तिकेयषष्ठीव्रतं॥

———000———

युधिष्ठिर उवाच।

षष्ठीविधानमधुना कथयस्व जनार्द्दन।
सर्व्वव्याधिप्रशमनं सर्व्वकामफलप्रदं॥
श्रुतम्मया पूज्यमानो भानुः कामान् प्रयच्छति।
दिवाकराराधनं मे तस्मात् कथय केशव॥

श्रीकृष्ण उवाच।

विशोकषष्ठीमधुना वक्ष्यामि मनुजोत्तम।
यामुपोष्य नरः शोकं न कदाचिदिह स्पृशेत्॥
माघे कृष्णतिलैः स्नानं पञ्चम्यां शुक्लपक्षतः।
कृताहारः कृशरया दन्तधावनपूर्व्वकं॥

कृशरया, तिलतण्डुलान्नेन।

उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि।

ततः प्रातः समुत्थाय कृतस्नानजपः शुचिः॥
कृत्वा तु काञ्चनं पद्ममर्कोऽयमिति पूजयेत्।
करवीरेण रक्तेन रक्तवस्त्रयुगेन च॥
यथा विशोकं भुवनमुदिते त्वयि जायते।
तथा विशोकता मे स्यात्त्वद्भक्तेः प्रतिजन्मनि॥
एवं सम्पूज्य षष्ठ्यान्तु द्विजान् शक्त्या प्रपूजयेत्*।
सुप्त्वा संप्राश्य गोमूत्रं समुत्थाय ततः शुचिः॥
संपूज्य विप्रान् दानेन गुड़पात्रेण संयुतं।
वस्त्रेणाच्छाद्य गुरवे सर्व्वमेतन्निवेदयेत्॥
अतैललवणं भुक्त्वा सप्तम्यां मौनसंयुतः।
ततः पुराणश्रवणं कर्त्तव्यं भूतिमिच्छता॥
अनेन विधिना सर्व्वमुभयोरपि पक्षयोः।
कुर्य्याद्यावत् पुनर्माघशुक्लपक्षस्य सप्तमी॥
व्रतान्ते कलशं दद्यात् सुवर्णकमलान्वितं।
शय्यां सोपस्करां तद्वत् कपिलाञ्च पयस्विनीं॥
यस्त्वनेन विधानेन वित्तशाठ्यविवर्जितः।
विशोकषष्ठी नाम्नीयं कृत्वा याति पराङ्गतिं॥
इह लोके समायातः शोकभागी न जायते।
जन्मद्वादशकं यावन्नात्र कार्य्या विचारणा॥
यं यं प्रार्थयते कामन्तं तं प्राप्नोति पुष्कलम्।
निःकामः कुरुते यस्तु स याति परमं पदम्॥
यः पठेत् शृणुयाद्वापि षष्ठी शोकविनाशिनी।

* द्विजं सम्पूज्य शक्तित इति पुस्तकान्तरे पाठः।

सोऽपि पापविनिर्मुक्तः सुखी स्याद्भानुभक्तितः ॥
ये भास्करं करकदम्बकपूरिताशं
संपूजयन्ति मनुजाश्च कृतोपवासाः।
ते दुःखशोकरहिताः स्वजनैः सुहृद्भि-
र्भूमौ विहृत्य रविलोकमवाप्नुवन्ति ॥

इति भविष्योत्तरोक्तं विशोकषष्ठीव्रतम्।

——0*0——

कृष्णउवाच।

अन्यामपि प्रवक्ष्यामि फलषष्ठीं शुभां तथा।
यामुपोष्य नरः पापैर्विमुक्तः फलभाग् भवेत् ॥
मार्गशीर्षे सिते पक्षे पञ्चम्यां नियमस्थितः।
कृत्वा तु दन्तधावनं स्वपेद्रात्रौ विमत्सरः ॥
ततः प्रभाते विमलेकारयित्वा तु काञ्चनम्।
कमलञ्च फलन्त्वेकं स्वशक्त्या शाठ्यवर्जितः ॥
ततस्तु सङ्गमे स्नातो मध्याह्ने कृतनित्यकः।
आगत्य भवनं देवं पूजयित्वा जगद्गुरुम् ॥
कृत्वा तु कमलं पात्रे सफलं शर्करान्वितं।
औडुम्बरे मृण्मये वा यथाशक्त्या नृपोत्तमः ॥
पूजयेत् पुष्पधूपाद्यैर्नैवेद्यैर्विविधैः फलैः।
गीतनृत्योत्सवैर्युक्तं कारयित्वा तु जागरम् ॥
स्नात्वा प्रातः शुचिर्भूत्वा कृतकृत्यस्त्वनातुरः।
गुरुं संपूज्य यत्नेन वस्त्रमाल्यविभूषणैः ॥

देयं तत्सकलं तस्मै भानुर्मे प्रीयतामिति ।
भक्त्या विप्रांस्तु संभोज्य स्वयं भुञ्जीत वाग्यतः ॥
सप्तम्यां कुरुशार्दूल यदभीष्टं स्वदेवताः* ।
तावद्वर्ज्यं फलं त्वेकं यावत् कृष्णा तु पञ्चमी ॥
पुनः प्राक्कथितं हुत्वा फलपञ्चक† संयुतम् ।
षष्ठ्यामुपोष्य दातव्यं सप्तम्यां तद्विधानतः ॥
पुनरन्यत् फलन्त्याज्यं यावच्छुक्ला तु पञ्चमी ।
एवं षष्ठ्योर्द्वयोराजन् वर्षमेकं यतव्रतः ॥
उपोष्य दत्त्वा क्रमशः सूर्य्यमन्त्रमुदीरयेत् ।
सोपस्करं यथा शक्त्या ताम्रवर्णां पयस्विनीं ॥
तद्वर्णानि च दम्पत्योर्व्वासांस्याभरणानि वा ।
भानुरर्कोरविर्ब्रह्मा सूर्य्यः शक्रो हरिः शिवः ॥
श्रीमान्विभावसुस्त्वष्टा वरुणः प्रीयतामिति ।
प्रतिमासञ्च सप्तम्यामेकैकं नाम कीर्त्तयेत् ॥
यथा न विफलाः कामास्त्वद्भक्तानां सदा रवे ।
तथानन्तफलावाप्तिरस्तु मे प्रतिजन्मनि ॥
इमामनन्तफलदां फलषष्टीं करोति यः ।
सर्व्वपापविनिर्मुक्तः सूर्य्यलोके महीयते ॥
इह चागत्य राजासौ पुत्रपौत्रसमन्वितः ।
सर्व्वत्र सफलारम्भो जायते नात्र संशयः ॥
क्रियमाणन्तु यः पश्येद्यस्तथा चानुवर्त्तयेत् ।

---

* स्वचेतसा इति पुस्तकान्तरे पाठः ।

† फलपङ्क्जेति पुस्तकान्तरे पाठः ।

शृणुयाद्वा पठेद्वापि सोऽपि कल्याणभाग् भवेत् ॥
हैमं फलं सकमलं कलशं वितानं
षष्ठ्यामुपोष्य विधिवद्द्विजपुङ्गवाय।
दद्यात् सुरासुरशिरोमणिघृष्टपादं
भानुं प्रणम्य फलसिद्धिमुपैति मर्त्यः॥

इति श्रीभविष्योत्तरोक्तं फलषष्ठीव्रतम्।

——000——

षष्ठ्यां फलाशनो राजन् विशेषात् कार्त्तिके नृप।
राज्यच्युतो विशेषेण स्वराज्यं लभतेऽचिरात्॥
षष्ठीतिथिर्महाराज सर्व्वदा सर्व्वकामदा।
उपोष्या सा प्रयत्नेन सर्व्वकालं जयार्थिना॥
कार्त्तिकेयस्य दयिता एका षष्ठी महातिथिः।
देवसेनाधिपत्यं हि प्राप्तमस्यां महात्मना॥
अस्यां हि श्रीसमायुक्तो यस्मात् स्कन्दो भवेत् पुरा।
तस्मात् षष्ठ्यां न भुञ्जीत प्राप्नुयाद्भार्गवीं सदा॥

भार्गवी, लक्ष्मीः।

दत्त्वार्घ्यं कार्त्तिकेयाय स्थित्वा वै दक्षिणामुखः।
दध्ना घृतोदकैः पुष्पैर्मन्त्रेणानेन सुव्रत॥
सप्तर्षिदारज स्कन्द सेनाधिप महाबल।
रुद्रोमाग्निज षड्वक्त्र, गङ्गागर्भ नमोऽस्तु ते॥
प्रीयतां देव सेनानीः सम्पादय सुहृद्वृतं।
दत्त्वा विप्राय वामान्नं यच्चान्यदपि वर्त्तते॥

पश्चाद्भुङ्क्ते त्वसौ रात्र्यां भूमिं कृत्वा तु भाजनं
एवं षष्ठीव्रतस्यास्य उक्तं स्कन्देन यत् फलम् ॥
तन्निबोध महाराज प्रोच्यमानं मयाखिलम् ।
षष्ठ्यां फलाशनो यस्तु नक्ताहारी भविष्यति ॥
शुक्लायामथ कृष्णायां ब्रह्मचारी समाहितः ।
तस्य सिद्धिर्धृतिः पुष्टिः राज्यमायुर्निरामयम् ॥
पारत्रिकं चैहिकञ्च दद्यात् स्कन्दो न संशयः ।
अशक्तो ह्युपवासस्य स नक्तेन व्रती भवेत् ॥
तैलं षष्ठ्यां न भुञ्जीत न दिवा कुरुनन्दन ।
यस्तु षष्ठ्यां नरो नक्तं कुर्य्याद्भरतसत्तम ॥
सर्व्वपापैर्विनिर्मुक्तो गाङ्गेयस्य सदा व्रजेत् ।

गाङ्गेयोत्र स्वामिकार्त्तिकेयः ।

स्वर्गे च नियतं वासी भवते नात्र संशयः ।
इह चागत्य कालेन यथोक्तफलभाग्भवेत् ॥
देवानामपि वन्द्योऽसौ राजराजो भविष्यति ।

इति भविष्योत्तरपुराणोक्तं स्कन्दषष्ठीव्रतम् ।

——०*०——

ब्रह्मोवाच ।

संपूज्य कार्त्तिकेयन्तु द्विजश्रेष्ठः प्रजायते ।
मेधावी रूपसम्पन्नो दीर्घायुःकीर्त्तिवर्द्धनः ॥
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः ।

तिथीश्वरोऽत्र कार्त्तिकेयः॥

पूर्व्ववत्पञ्चपचस्य: कर्त्तव्यश्च तिथीश्वरः॥
गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते।
पूजाशाठेन शाठेन कृतापि च फलप्रदा॥
आज्यधारा समिद्भिश्च दधिचीरान्नमाचिकैः।
पूर्व्वोक्तफलदो होमः कृतः शान्तेन चेतसा॥
एतत् व्रतं वैश्वानरप्रतिपद्व्रत वद्व्याख्येयम्।

इति भविष्यत्पुराणोक्तं कार्त्तिकेयव्रतम्।

——000——

कृष्णउवाच।

शृणु पार्थ प्रवक्ष्यामि सर्व्वपापप्रणाशिनीं।
सर्व्वकामप्रदां पुण्यां षष्ठीं मन्दारसंज्ञितां॥
माघस्यामलपचे तु पञ्चम्यां लघुभुक् नरः।
दन्तकाष्ठं ततः कृत्वा स्वपेद्रात्रौ जितेन्द्रियः॥
सर्व्वभोगविहीनस्तु षष्ठीमुपवसेन्नरः।
प्राप्यानुज्ञां द्विजश्रेष्ठं मन्दारं प्रार्थयेन्निशि॥

मन्दारो, राजार्कः।

ततः प्रभाते उत्थाय कृतस्नातः पुनर्द्विजान्।
संपूज्य संहतं कृत्वा मन्दारं कुङ्कुमान्वितम्॥
सौवर्णं पुरुषं तद्वत् पद्महस्तं सुशोभनम्।
पद्मं कृष्णतिलैः कृत्वा ताम्रपात्रे दलाष्टकम्॥

पूज्य मन्दारकुसुमैः भास्करायेति पूर्व्वतः।
नमस्कारेण तद्वच्च सूर्य्यायेत्यानलेदले॥
दक्षिणे तद्वदर्काय यमेशाय च नैर्ऋते।
पश्चिमे वसुधाम्नेति वायव्ये चण्डभानवे॥
कृष्णेत्युत्तरतः पूज्य आनन्दायेत्यतः परम्।
कर्णिकायां च पुरुषं पूज्य सर्व्वात्मना हरिम्॥
शुक्लवस्त्रैः समावेष्ट्य भक्ष्यमाल्यफलादिभिः।
एवमभ्यर्च्य तत् सर्व्वमुपाध्याये निवेदयेत्॥
भुञ्जीतातैललवणं वाग्यतः प्राङ्मुखः स्थितः।
अनेन विधिना सर्व्वं सप्तम्यां मासि मासि च॥
कुर्य्यात् संवत्सरं यावत् वित्तशाठ्यविवर्जितः।
एतदेव व्रतान्ते तु निधाय कलशोपरि॥
रवियुक्तं द्विजेन्द्राय दातव्य भूतिमिच्छता।
रवियुक्तमिति सौवर्णरवियुक्तमित्यर्थः॥
नमोमन्दारनाथाय मन्दारभवनाय च।
त्वं रवे तारयस्वास्मानस्मात् संसारसागरात्॥
विधिनानेन तत् कुर्य्यात् षष्ठीं मन्दारसंज्ञितां।
विपाप्मा ससुखी धन्यो मृतः स्वर्गे महीयते॥
इमां सम्मोहपटलध्वान्तोद्दासनदीपिकां॥
प्रगृह्य गच्छन् संसारगर्त्तायां न स्खलेन्नरः।
मन्दारषष्ठीं विख्यातामीप्सितार्थफलप्रदां॥
यः पठेच्छृणुयाद्वापि सर्व्वपापैः प्रमुच्यते।
षष्ठीमुपोष्य तिलपङ्कजकर्णिकायां

संपूज्य भास्करमहस्कर वृत्तपुष्पैः।
ये प्राप्नुवन्ति पुरुषा नहि तत् कदाचित्
गोभूहिरण्यतिलदाः फलमाप्नुवन्ति ॥

इति श्रीभविष्योत्तरोक्तं मन्दारषष्ठीव्रतम्।

---0*0---

युधिष्ठिर उवाच।

आरोग्य रूप-सौभाग्य-विपत्तक्षयकारकम्।
भुक्ति-मुक्तिप्रदं नृणां व्रतं मे ब्रूहि केशव ॥

कृष्ण उवाच।

यदुमायाः पुरा देव उवाच त्रिपुरान्तकः।
कथासु सुवृत्तासु भास्कराराधनं प्रति ॥
तदिदानीं प्रवक्ष्यामि धर्म्मकामार्थसिद्धिदम्।
नराणामथ नारीणा समाराधनमुत्तमम् ॥
शृणुष्वावहितो भूत्वा सर्व्वपापप्रणाशनं।
मासि भाद्रपदे शुक्ले एकभक्ताशनो भवेत् ॥
दन्तधावनपूर्व्वन्तु षष्ठ्यामुपवसेन्नरः।
गौरसर्षपकल्केन स्नायात् कायविशुद्धये ॥
रोचना-कृष्णगोमूत्र-मुस्ता-चन्दन-गोसकृत्।
दधिकालागुरुञ्चैव ललाटे तिलकं न्यसेत्॥
शिलारुणदलैश्चैव सौभाग्यारोग्यकृद्यतः।
स्रजं कुङ्कुमताम्बूलं सिन्दूरं रक्तवाससी॥
वितरेत् सोपवासाद्धि नारीमङ्गल्यवर्द्धनम्।

विधवा तु विविक्तानि कुमारी शुक्लवाससी।
ततः स्वभवने भानुं पूजयेत् शीतलोदकैः* ॥
अपराह्णे ततः स्नात्वा सुमौनी नियतव्रतः।
प्रतिमां स्थापयेद्भानोः पञ्चगव्येन वारिणा ॥
रक्तचन्दनपङ्केन कुङ्कुमेन समालभेत्।
अगस्त्यकुसुमैरक्तैः करवीरैः प्रपूजयेत् ॥
दद्यात्तु गुग्गुलं धूपं तथा कुन्दुरकेण च।
रक्तांशुकैरलङ्कृत्य कालागुरुविभूषितैः ॥
तत्र ताम्रमयं पात्रं पुष्पाक्षतजलान्वितं।
सदूर्व्वाकुङ्कुमं कृत्वा रक्तचन्दनमिश्रितं।
करवीरोत्पलैरक्तैर्म्मिश्रं कोरण्डकैः शुभैः।
रक्तागस्त्यजवापुष्पैर्म्मालती कुन्दमुद्गरैः ॥
मुचुकुन्दैरथान्यैश्च शतपत्रैः सुगन्धिभिः।
गोरोचना कुशाग्राणि सिद्धार्थतिलपङ्कजैः।
यथासम्भवसंलब्धैर्दधिकुङ्कुमकेसरैः ॥
एभिरर्घ्यः प्रदातव्यः उच्चैः कृत्वा करौ नृप।
देवदेव जगन्नाथ सहस्रांशो दिवाकर ॥
पूजेयं परिपूर्णास्तु गृहाणार्घ्यं नमोस्तु ते।
भक्ष्यैर्नानाविधैर्युक्तं पायसं मधुसर्पिषा ॥
नैवेद्यं विनिवेद्याथ ततो नीराजयेद्रविम्।
धातारमिति संपूज्य प्रणिपत्य पुनःपुनः ॥
पुष्पमण्डयिकां कृत्वा रात्रौ जागरणं तथा।

* शीतदोलदे इति पुस्तकान्तरे पाठः।

श्रवणञ्च पुराणस्य वाचनं वास्य शस्यते ॥
श्रोतव्यं ब्राह्मणादेतद्वाचकादन्यतः क्वचित्।
गीतनृत्यैश्च वाद्यैश्च क्षपयेत्सकलां निशाम् ॥
एवमाश्वयुजे मासि अर्य्यमेति प्रपूजयेत्।
मित्रेति कार्त्तिके पूज्यो वरुणो मार्गशीर्षके ॥
पुष्येऽंशुमान् सुसंपूज्योमाघे पूज्योभगेतिच।
इन्द्रेति फाल्गुने* मासि विवस्वानिति चैत्रके ॥
पूषेति पूज्योवैशाखे ज्येष्ठे पर्य्यण्यमर्च्चयेत्।
पूज्यस्त्वष्टेति चाषाढे श्रावणे विष्णुमर्च्चयेत् ॥
ततः प्रभाते विमले सप्तम्यां स्नानमाचरेत्।
देवं संपूजयेद्भक्त्या गन्धपुष्पाक्षतादिभिः ॥
ततः प्रणम्य देवेशं सर्व्वाङ्गेष्वधिपूजयेत्।
पादौ धात्रे ततः पूज्यो नमः कण्ठं विवस्वते ॥
पूष्णे नम इति घ्राणं पर्य्यन्यायेति लोचने।
नमस्त्वष्ट्रे ललाटन्तु विष्णवेति शिरोऽर्च्चयेत् ॥
वाचकं पूजयेत् पश्चात् व्रतमार्गोपदेशकम्।
भूम्या हिरण्यवासोभिर्व्वित्तशाठ्यं विवर्ज्जयेत् ॥
वाचके पूजितेचैव सदा तुष्यति भास्करः।
एवं संपूजयेद्यावद्वत्सरं मासि मासि च ॥
ब्राह्मणान् भोजयेत् पश्चात्पायसं सर्पिषा सह।
दक्षिणाञ्च यथा शक्त्या भास्करः प्रीयतामपि ॥
ततो हविष्यमश्नीयात्स्वयं बन्धुजनैः सह।

* चन्द्रेति पुस्तकान्तरे पाठः।

अथोद्यापनमाख्यामि श्रूयतामत्र च क्रमः ॥
नेत्रपट्टैः शुभैर्व्वस्त्रैः कृत्वा मण्डयिकां शुभाम् ।
कुङ्कुमामोदितां कुर्य्याद्दिव्याभरणभूषिताम् ॥
कृत्वा देयं विमानन्तु प्रान्तलम्बितपल्लवम् ।
तन्मध्ये रक्तकलशीं पञ्चरत्नसमन्वितां ॥
घटस्योपरि विन्यस्य ताम्रपात्रसमन्वितां ।
पद्मं कृष्णतिलैः कार्य्यमष्टपत्रं सकर्णिकम् ।
सौवर्णं भास्करं कृत्वा पद्महस्तं रथे स्थितम् ।
कर्णिकायां न्यसेत्तन्तु स्नापयित्वा घृतादिभिः ॥
ततःस्नातोऽनुलिप्तश्च परिधाय सुवाससी ।
देवान् पितॄन्* समभ्यर्च्य ततोदेवगृहं व्रजेत् ॥
पञ्चगव्येन संस्नाप्य नामद्वादशकेनच ।
पूजयित्वार्च्चयेत्पश्चात् नैवेद्यं परिकल्पयेत् ॥
तर्पयेत्पायसैः साज्यैः लड्डुकैः खण्डहारकैः ।
सोमालकैः कोकरसैः* शीघ्रघ्राणप्रियैः शुभैः ॥
श्रीफलैर्मातुलङ्गैश्च नारिकेलैः सदाड़िमैः ।
कुष्माण्डैः कर्कटैर्व्वृत्तैर्नारङ्गपनसादिभिः ॥
कालोद्भवानि सर्व्वाणि फलानि विनिवेदयेत् ।
शङ्खतूर्य्यनिनादेन गीतनृत्यैः समर्च्चयेत् ॥
ततः प्रभातसमये भास्करं कलशैर्नवैः ।
स्नापयित्वा व्रतोपेतः सौभाग्यारोग्यकाङ्क्षतः ॥

---

* सन्तर्प्येति पुस्तकान्तरे पाठः ।

* हृष्टिघ्राणेति पुस्तकान्तरे पाठः ।

तैरेव नामभिर्होमस्तिलाज्येन प्रशस्यते।
ततः सूर्य्यस्य पुरतः सूर्य्ययागं समाचरेत्॥
रक्तचन्दनपङ्केन विलिखेत्समभूतलम्।
हस्तमात्रं द्विहस्तन्तु चतुर्हस्तमथापि वा॥
मनःशिलाभिः सिन्दूरैः सूर्य्यमण्डलमालिखेत्।
रक्तपुष्पैः सुगन्धैश्च धूपैः कुङ्कुमकादिभिः॥
संपूज्य दद्यान्नैवेद्यं विधिवत् घृतपायसम्।
पुरतः स्थापयेत् कुम्भं सहिरण्यं सवाससं॥
दद्यात् कन्याभ्यस्ताम्बूलं कुङ्कुमं कुसुमानि च।
वस्त्रैश्चैव सुहृद्भिश्च वन्धुभिस्तां क्षमापयेत्॥
एवं षष्ठ्यावसाने तु सप्तम्यामुषसि व्रती।
द्रव्यैः प्राक्विहितैः स्नात्वा द्विजैर्होमञ्च कारयेत्॥
आकृष्णेनेतिमन्त्रेण समिद्भिस्तार्कजादिभिः।
तिलैराज्यगुड़ोपेतैर्दद्यादष्टशताहुतीः॥
ततस्तु दक्षिणा देया ब्राह्मणेभ्यो युधिष्ठिर।
भोजयित्वा द्विजान् वस्त्रैर्विविधैः परिधापयेत्॥
द्वादशात्र प्रशंसन्ति गावो वस्त्रान्विताः शुभाः।
छत्रोपानद्युगैः सार्द्धं दद्याद्विप्रेषु संयतः॥
यदाशक्तस्तदैकान्तु दद्याद्धेनुं पयस्विनीं।
ततः संपूज्य गन्धाद्यैर्ब्राह्मणं शीलसंयुतम्॥
तस्मै तां प्रतिमां दद्यान्मन्त्रेणानेन पाण्डव।
ॐ नमोऽर्काय सकलध्वान्तविच्छित्तिकारिणे॥
त्वद्दानेन रवेः सन्तु मम सर्व्वे मनोरथाः।

रथवस्त्रयुताङ्गांश्च भूमिं सस्योचितामपि ॥
हिरण्यसहितां दद्यात् भास्करः प्रीयतामिति।
छत्त्रोपानद्युगञ्चैव मण्डलस्याग्रतो न्यसेत् ॥
अरुणं तत्पुरीन्यस्य तस्याग्रे सप्त वाजिनः।
तदन्तरे तु रेवन्तं तत्पश्चादश्विनौ न्यसेत् ॥
तद्दक्षिणे शनिं विन्ध्यादि*ककालांश्च यथाक्रमम्।
दानानि च प्रदेयानि शयनानि गृहाणि च ॥
श्राद्धानि पितृदेवानां शाश्वतीं तृप्तिमिच्छता।
एवमेषा तिथिः प्राप्त सर्व्वकामप्रदा नृणां ॥
वरा सुखप्रदा सौम्या भानुलोकप्रदायिनी।
अल्पवित्तोऽपि कुर्व्वीत षष्ठ्यां षष्ठ्यामुपोषणम् ॥
सप्तम्यां भोजयेद्विप्रं यावत्संवत्सराष्टकम्।
व्रतान्ते सुरभिं यच्छेद्विप्रायोज्ज्वलवृत्तये।
अखण्डकरणाद्राजन् सोऽपि तत्फलमाप्नुयात्।
उत्पद्यते सदा भक्ति र्भानोरुपरि शाश्वती ॥
एवं यः कुरुते पार्थ व्रतमेतदनुत्तमं।
सूर्य्यकोटिप्रतीकाशैर्व्विमानैः सर्व्वकामिकैः ॥
अप्सरोगणसम्पन्नैर्द्देवगन्धर्व्वसेवितैः।
हंससारससंयुक्तैर्वाद्यगीतरवाकुलैः ॥
दोधूयमानचमरैर्नाना*रत्नसमन्वितैः।
सर्व्वैः सुहृद्भिः संयुक्तोनानाकिन्नरभास्करैः ॥

---

* दिक्पतिश्चेति पुस्तकान्तरे पाठः

* नानारत्नैति पुस्तकान्तरे पाठः

विमानवरमारूढ़ो विद्याधरगणैः सह।
स याति परमं स्थानं यत्रास्ते रविरंशुमान्॥
यावच्चन्द्रार्कतारागि यावच्च कुलसप्ततिः।
तावद्युगसहस्राणि सूर्य्यलोके महीयते॥
त्रिभिस्तु पुरुषैः सार्द्धं भोगान् भुक्त्वा यथेप्सितान्।
ब्रह्मविष्णुहरादीनां लोके स्थित्वा सुखी चिरं॥
पुण्यक्षयादितो राज्ञां राजा चैव ध्रुवं भवेत्।
पश्चाच्च* कीर्त्तियुक्तश्च लोचनानन्दकारकः॥
पुत्रपौत्रसमायुक्तोयज्ञदानक्रियारतः।
प्रज्ञावान् धार्म्मिकः शूरः सर्व्वशास्त्रविशारदः॥
ब्रह्मण्यः* सत्कविश्चैव सत्यवक्ता जितेन्द्रियः।
वक्ता शरण्यः सुमना दीनानाथदयापरः॥
भुनक्ति वसुधां चीर्णां विग्रहेवाजितः परैः।
नारी वा कुरुते पार्थ सापि तत्फलभागिनी॥
भवितव्याहतैश्वर्य्या महिषी चक्रवर्त्तिनः।
सपत्नीदलनीचैव सौभाग्यारोग्यपुत्रिणी॥
मोदते सुचिरं कालं सुखेन वसते गृहे।
योदासो वा भवेत् कश्चिद्व्रतमेतत् समाचरेत्॥
तस्य श्रीर्व्विजयश्चैव त्रिवर्गश्च प्रवर्द्धते।
मृतः स्वर्गमवाप्नोति विमानवरमास्थितः॥
सूर्य्यलोकेषु निवसेत् सर्व्वकामसमन्वितः।

---

* रूपवानिपाठान्तरं।

* सत्यवांश्चेति पुस्तकान्तरेः पाठः।

सेवितः सुरनारीभिः सिद्धगन्धर्व्वसेवितः ॥
वादित्रगेयनिनदैर्म्मन्वन्तरगणान्वहन् ।
ध्यानयोगन्तु संप्राप्य सूर्य्यमण्डलमाविशेत् ॥

एतां नरेन्द्र समुपोष्य नभस्यमासे
षष्ठीं सितान्तरणिमर्च्चयितुं यदीच्छेत् ।
गोभूहिरण्यवसनैर्द्दिजपुङ्गवानां
प्रीतिं विधाय स रवेर्भवनं प्रयाति ॥

इति भविष्योत्तरे सोद्यापनसूर्य्यषष्ठीव्रतम् ।

——o*o——

अगस्त्य उवाच ।

कामव्रतं महाराज शृणु मे गदतोऽधुना ।
येन कामाःसमृध्यन्ति मनसा चिन्तिता अपि ॥
षष्ठ्यां फलाशनो यस्तु वर्षमेकं व्रतं चरेत् ।
माघमासे सिते पक्षे पञ्चम्यां नक्तभोजनः ॥
षष्ठ्यान्तु प्राशयेद्धीमान् फलमेकन्तु पार्थिवं ।
ततो भुञ्जीत यत्नेन वाग्यतः शुद्धमोदनं ॥
ब्राह्मणैः सह राजेन्द्र अथवा केवलं फलम् ।
तमेकं दिवसं स्थित्वा सप्तम्यां पारणं नृप ॥
अग्निकार्य्यं च कुर्व्वीत गुहरूपेण केशवम ।
पूजयित्वा विधानेन वर्षमेकं व्रतं चरेत् ॥

गुहरूपेण केशवमिति कार्त्तिकेयरूपं विष्णुं पूजयेदित्यर्थः ।

वैष्णवपुराणेषु

सर्व्वे देवा विष्णोरेकरूपा इति निरूपणादियं युक्तिः।

षट्वक्त्रः कार्त्तिको गुहः सेनानी पावकात्मजः॥

कुमारः स्कन्द इत्येवं पूज्यो विष्णुश्च नामभिः।

समाप्तौ तु व्रतस्यास्य कुर्य्याद्ब्राह्मणभोजनं॥

षण्मुखं सर्व्वसौवर्णं ब्राह्मणाय निवेदयेत्।

सर्व्वे कामाः समृध्यन्तां मम देव षड़ानन॥

त्वत्प्रसादादिदं भक्त्या गृह्यतां विधिनाचिरम्।

अनेन दत्त्वा मन्त्रेण ब्राह्मणाय सयुग्मकम्॥

वस्त्रयुग्मसहितं।

ततः कामाःसमृध्यन्ते सर्व्व एवेह जन्मनि।

अपुत्रो लभते पुत्रानधनो लभते धनं॥

भ्रष्टराज्यो लभेद्राज्यं नात्र कार्य्या विचारणा।

इति वराहपुराणोक्तं कामषष्ठीव्रतम्।

——000——

ब्रह्मोवाच।

भाजनं यत्र संपूर्णं मधुना च समन्वितम्।

दद्यात् कृष्णतिलानां तु प्रस्थमेकन्तु मागधं॥

त्रिगुणं तण्डुलानां च पृथक् प्रस्थं च कारयेत्।

भाजनं प्रस्थचतुष्टयपूरणीयं पात्रं, त्रिगुणं प्रस्थत्रयं। पृथगिति घृतमधुतिलतण्डुलपात्राणि पृथक् कुर्य्यात्। मागध प्रस्थपरिमाणं परिभाषायामुक्तं॥

गन्धपुष्पैस्तथा धूपैर्नानावाद्यैर्विशेषतः ।
ततः संपूजयेत् सूर्य्यं नानावाद्यसमन्वितम् ॥
सूर्य्यं गगनस्थं ।
पूजयेच्च ततो व्योम बलिं दिक्षु प्रपूजयेत् ।
व्योमदेव गृहे चैव सर्व्वभूतानि योजयेत् ।
व्योमदेवगृहे तत्र यत्र व्योम प्रतिष्ठितम् ॥

व्योमनिर्म्माणं विष्णुधर्म्मोत्तरात् ॥

चतुरस्रं भवेन्मूले तद्वृत्तं महाभुजम् ।
ततोन्यत् चतुरस्रञ्च प्रथमे संस्थितं शुभं ॥
भद्रपीठमये प्रोक्तो व्योमभागस्तुरीयकः ।
स्तम्भे वैश्वानरोथास्तु मध्यभागः प्रकीर्त्तितः ॥
भद्रपीठवदन्यच्च तत्र पद्मं निवेशयेत् ।
शुभाष्टपत्रं तन्मध्ये कर्णिकायां दिवाकरः ॥
पत्राष्टके न्यसेत्तस्य दिक्कालान् सर्व्वतोदिशमिति ।
य एवं कुरुते षष्ठ्यां सन्ध्याकाले बलिं रवेः ॥
स सूर्य्यलोकमासाद्य मोदते शाश्वतीः समाः ।
पुण्यक्षयादिहागत्य समृद्धे जायते कुले ॥
मेधावी सुभगः श्रीमान् पुण्यवान् दानशीलवान् ।
पुनर्लोकमवाप्नोति भास्करस्य न संशयः ॥

इति भविष्यत्पुराणोक्तं व्योमषष्ठीव्रतम् ।

——000——

कृष्ण उवाच ।

भाद्रभाद्रपदे मासि शुक्ले षष्ठ्यां सुसंयता ।

नारी स्नात्वा प्रभाते च शुक्लमाल्याम्बरप्रिया॥
सुवेषाभरणोपेता भूत्वा संगृह्य वालुकाः।
नवे वेणुमये पात्रे गृहं गच्छेदवाङ्मुखी॥
सोपवासा प्रयत्नेन तत्र देवीं प्रपूजयेत्।
कृत्वा वस्त्रयुगं रम्यं पुष्पमालाविचित्रितं॥
तत्र संस्थाप्य तां देवीं पुष्पैः संपूजयेद्धरिं।

तां देवीमिति जलान्तरगतां वालुका-मानीय वंशपात्रे पञ्चपिण्डाकृतिं वालुकामयीं देवीं पूजयेदिति।

ध्यात्वा तु ललितां देवीं तपोवननिवासिनीम्।
पङ्कजं करवीरञ्च नेपालीं मालतीं तथा॥

नेपाली पुष्पविशेष', गृहीत्वा पूजयेदितिशेषः।

नीलोत्पलं केतकीञ्च संगृह्य तगरं वरम्।
एकैकाष्टशतं ग्राह्यमष्टाविंशतिरेव वा॥
अक्षताः कलिका गृह्य ताभिर्देवीं समर्चयेत्।
प्रार्थयेत व्रती भूत्वा गिरिजां गिरिशप्रियाम्।
गङ्गाद्वारे कुशावर्त्ते विल्वके नीलपर्वते।
स्नात्वा कनखले तीर्थे हरिं पद्मावतीपतिम्॥
ललिते ललिते देवि सौख्यसौभाग्यदायिनि।
अनन्तं देहि सौभाग्यं भवत्वघहरं परम्॥
मन्त्रणानेन कुसुमैश्चम्पकस्यातिशोभनैः।
एवमभ्यर्च्य विधिना नैवेद्यं पुरतोन्यसेत्॥
त्रपुषैर्वालुकुष्माण्ड-नालिकेरैः सदाडिमैः।
वीजपूरैःसतुण्डीरैः कारवेल्लैः सवर्व्वटैः॥

फलैस्तत्कालसम्भूतैः कृत्वा शोभां तदग्रतः।

त्रपुषं वालुकम्। एलवालुः कर्कटी। तुण्डीरम् ह्वचभेदः।

विरूढैर्धान्यसम्भूतैर्दीपालीभिः समन्ततः।

सार्द्धं सगुणकेर्धूपैः सोमालककरङ्ककैः॥

गुडपुष्पैः कर्णवेष्टैर्मोदकैरूपमोदकैः।

बहुप्रकारैर्नैवेद्यैर्यथाविभवसारतः॥

एवमभ्यर्च्य विधिवद्रात्रौ जागरणोत्सवा।

गीतवाद्यनटैर्नृत्यैः प्रेक्षणीयैरनेकधा॥

सखीभिः सहिता साध्वी तां रात्रिं प्रशयन्नयेत्।

न च सम्मीलयेन्नेत्रे नारी यामचतुष्टयम्॥

दुर्भगा दुर्गता बन्ध्या नेत्रसम्मीलनाद्भवेत्।

एवं जागरणं कृत्वा सप्तम्यां सरितन्नयेत्॥

गन्धधूपैरथाभ्यर्च्य गीतवाद्यपुरःसरम्।

तच्च दद्याद्द्विजेन्द्राय नैवेद्यादि नरोत्तम॥

स्नात्वा गृहं समागत्य हुत्वा वैश्वानरं क्रमात्।

देवान् पितन् मनुष्यांश्च पूजयित्वा सुवासिनीः॥

कन्यकाश्चैव सम्भाज्या ब्राह्मण्यो दश पञ्च च।

भक्ष्यभोज्यैर्बहुविधैर्दत्त्वा दानानि भूरिशः॥

ललिता मेऽस्तु सुप्रीता इत्युक्त्वा तु विसर्जयेत्।

यः कश्चिदाचरेदेतद्व्रतं सौभाग्यसम्पदम्॥

ललिताषष्ठीसंज्ञञ्च सर्व्वपापनिवर्हणम्॥

नरो वा यदि वा नारी तस्य पुण्यफलं शृणु।

यद्दलभ्यं व्रतैश्चान्यैर्दानैर्वा नृपसत्तम॥

तपोभिर्नियमैर्वापि तदेतेन हि लभ्यते।
इह चैवातुलं सम्पत्सौभाग्यमनुभूय च॥
कृत्वा मूर्द्ध्नि पदं पार्थ सपत्नीनां यशस्विनी।
मृता शिवपुरं प्राप्य दैवैरसुरपन्नगैः॥
प्राप्नोति दर्शनं देव्या तया तु सह मोदते।
पुण्यशेषादिहागत्य पुण्या सौभाग्यभाजना॥
सत्य-त्रेता-युगे नारी* सीतेव प्रियवल्लभा।
इदं यः शृणुयात्पार्थ पठेद्वा साधुसंसदि।
सोऽपि पापविनिर्मुक्तः शक्रलोके महीयते॥
षष्ठ्यां जलान्तरगतां वरवंशपात्रे
संगृह्य पूजयति या सिकतां क्रमेण।
नक्तञ्च जागरमनुव्रतवेषशीला
कुर्य्यादसौ त्रिभुवने ललितेव भाति॥

इति भविष्योत्तरोक्तं ललिताषष्ठीव्रतम्।

सनत्कुमार उवाच।

अथ षष्ठ्यान्तु राजन्यः समुपोष्य यथाविधि।
चक्राब्जमण्डलं कृत्वा कर्णिकायां सुदर्शनम्॥

---

* राज्ञीति पाठान्तरम्।

दलेषु लोकपालानामायुधानि समर्च्चयेत् ॥

चक्राव्जं चक्रनाभिघटिताङ्गं

स्वान्यायुधानि पुरतः प्रतिष्ठाप्य प्रपूजकः ।
रक्तचन्दनसिद्धार्थरक्तपद्माङ्कुरैरपि ॥
रक्तवस्त्रैः सुगन्धाद्यैर्भूषणादिभिरर्च्चयेत् ।
अपूपफलसंयुक्तं गुड़ान्नञ्च निवेदयेत् ।
सुदर्शन महाचक्र ज्वालाव्याप्तदिगन्तरं ।
दैत्यारिचक्रोन्मथन विद्विषो मे निवर्हय ॥
अनिशं लोकपालानां सर्व्वप्रहरणाण्यपि ।
अभयं विजयं युद्धे मङ्गलं प्रदिशन्तु नः ॥
यथा विष्णुर्व्वरः पुंसां यथा लक्ष्मीश्च योषिताम् ।
तथा शत्रुहरं चक्रं विजयं मे करोत्वलं ॥
चक्रप्रतिमरूपाणि शस्त्राण्यव्याकुलान्यपि ।
आयुधानि समस्तानि भवन्तु मम सर्व्वदा ॥
मत्तमातङ्गनिकररथवाजियुतं मम ।
हृष्टपुष्टपदात्योघं वलं रक्ष सुदर्शन ॥
इति सम्प्रार्थ्य तद्भक्त्या सालभेतायुधं स्वकम् ।
ततश्च पुरतो वृत्तमण्डलङ्कारयेत्सुधीः ॥
तण्डुलेन समायुक्तान् तिलवीजेन पूरितान् ।
अव्रणान् वस्त्रसंछन्नान् सर्वौषधिसमन्वितान् ॥
चतुरः स्थापयेद्दिक्षु कलसांश्च चतुर्ष्वपि ।
मध्ये सर्व्वौषधियुतं पञ्चरत्नसमन्वितम् ॥
वस्त्रयुग्मेन संछन्नं कुम्भं तत्र निधाप्य च ।

तस्मिन्नावाहयेद्देवं सुदर्शनमनन्यधीः॥
शङ्खञ्च नन्दकञ्चैव शार्ङ्गं कौमोदकीं गदाम्।
न्यसेत् प्राच्यादिकुम्भेषु तत्र तत्र प्रपूजयेत्॥
पायसञ्च गुड़ान्नञ्च मुद्गान्नं दधिसम्भवं।
निवेदयेत् यथा योगं मध्यमे सकलं मतम्॥
अथवा पञ्चकुम्भेषु पूज्या वै पञ्च हेतयः।
चक्रं शङ्खं तथा पद्मं शार्ङ्गञ्च नन्दकं गदां।
बहिस्तु लोकपालानामायुधानि न्यसेद्युगमिति॥

युगमिति प्रतिकुम्भं द्वे द्वे।

तदग्रे महतीं यष्टिं पीतकौशेयसंवृताम्॥
संस्थाप्य तार्क्ष्यसंस्थानं ध्वजमग्रे निबध्य च।
तार्क्ष्यं सम्पूजयेत्पश्चाद्गन्धपुष्पाक्षतादिभिः॥
अपूपफलमूलान्नं भूरि तत्र निवेदयेत्।
प्रदक्षिणनमस्कारस्तोत्रालापादि कारयेत्॥
घनं घनानां पटलं द्रावयन्ननिलो यथा।
तथा मयि च विद्विष्टून् विद्रावयतु पक्षिराट्॥
इति सम्प्रार्थ्य विधिवत्पूजां परिसमाप्य च।
लोकपालबलिं दद्यात् कृशरान्नेन साधकः॥

कृशरान्नेन तिलतण्डुलान्नेन।

तदग्रे ब्रह्ममानीय सौवर्णं सिंहविष्टरम्।

सिंहविष्टरं, सिंहासनं।

तस्मिन्नृपं समारोप्य सर्व्वालङ्कारसंयुतम्।
सौवर्णपात्रमानीय तस्मिन्देवं सुदर्शनम्॥

तन्मन्त्रेण समावाह्य गन्धपुष्पादिनार्च्चयेत्।
वर्त्तिं सिद्धार्थसंयुक्तां रक्तवस्त्रेण वेष्टिताम्॥

सिद्धार्थाः, सर्षपाः।

प्रज्वाल्य तत्र संस्थाप्य पूजां कुर्य्याद्यथाविधि।
मूर्द्ध्नि त्रिःपरिवृत्याथ प्राच्यां योषिद्विनिक्षिपेत्॥

परिवृत्य, नीराजनं कृत्वा।

आयुधानां प्रदानञ्च हेतिराजस्य मन्त्रतः।

हेतिराजस्य सुदर्शनस्य।

तत्तन्मन्त्रेण चावाह्य वाहनादिसमर्पणम्।
तत्रैवंभूषणादीनामेष एव विधिः स्मृतः॥
युद्धारम्भे महोत्पाते परसेनाप्रपीडने।
राज्यभ्रंशपरिक्लेशे शोकव्याध्यादिपीड़िते॥
इष्टदारवियोगे च सुतनाशे बलक्षये।
स्नानमेव प्रकुर्व्वीत शुक्लषष्ठ्यां समाहितः॥
निमित्ते लक्षिते चास्याज्जन्मर्क्षेवाप्ययं विधिः।
तार्क्ष्यध्वजञ्च सम्पूज्य युद्धारम्भे च भूपतिः॥
रणप्रमुखतः कृत्वा सुध्वजत्रयमावहेत्।
ध्वजस्य चलनादादौ फलाफलविनिश्चयः॥
जयं शक्रचलाद्व्रूयुर्द्दक्षिणे च पराजयम्।
पश्चिमे परसैन्यानामुत्तरे च पलायनम्॥
आग्नेय्यामधिपोनश्येत् नैर्ऋत्यां बलनाशनं।
वायव्ये वाजिमरणं ऐशान्यां धनसंचयम्॥

अन्यद्दिदिशि लाभःस्यात्*ध्वजस्येति परीक्षणम्।
छिन्ने बन्धे स्वमरणं यष्टिच्छेदे परस्य वा॥
तत्तत्तच्च स्वदेहस्थं विद्यादेवं विचक्षणः।
आदौ सर्व्वं परीक्ष्यैव कुर्व्वीत रणपण्डितः॥
कार्य्यान्तरेष्वेवमेव भावो भवविनिश्चयः।
ब्राह्मणैः स्वस्तिवचनं पश्चाद्ब्राह्मणभोजनम्॥
एवं नाम्ना ततः कुर्य्यात् पूजां चैत्रापरेऽहनि।
विप्रशेषेण तत् कुर्यादशनं बान्धवैः सह॥

विप्रशेषेण ब्राह्मणभोजनावशेषेण

गुरवे दक्षिणां दद्यादृत्विग्भ्योभुरिदक्षिणाम्॥
वित्तशाठ्यं न कुर्व्वीत यावद्व्रतं समापयेत्।
न ब्रूयादनृतं कुर्य्याद्ब्रह्मचर्य्यस्य दक्षिणाम्॥
एतत्स्वस्त्ययनं प्रोक्तं सर्व्वरोगविनाशनम्।
सर्व्वदुःखप्रशमनं सर्व्वस्य विजयावहम्॥
एतद्व्रतं पुष्टिकरं शृण्वतां कुर्व्वतामपि।
एतत्सर्व्वाधिकारः स्याद्रात्नां श्रेयो ददात्यलं।
षष्ठीव्रतं समाख्यातं सर्व्वकामफलप्रदम्॥

इति श्रीगारुडपुराणोक्तं सुदर्शनषष्ठी व्रतम्।

——ooo——

आदित्य उवाच।

कृष्णषष्ठ्यां प्रयत्नेन कृत्वा नक्तं विधानतः।
मासि मार्गशिरस्यादावंशुमानिति पूजयेत्॥

---

* वर्षतीति पुस्तकान्तरे पाठः।

विधिवत् प्राश्य गोमूत्रमनाहारो निशि स्वपेत्।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः॥
पुण्येष्वेवं सहस्रांशुं भानुमन्तमुशन्ति वै।
वाजपेयफलं तत्र प्राप्तव्रते लभेन्नरः॥
माघे दिवाकरं नाम कृष्णषष्ठ्यां नियोजयेत्।
निशीथे चाश्ति गोमूत्रं गोमेधफलमाप्नुयात्॥
तिलैस्तु फाल्गुने मासि पूजयेद्भक्षयेत्तिलान्।
राजसूयस्य यज्ञस्य तुल्यं फलमवाप्नुयात्॥
चैत्रे च हंसनामानं कृष्णषष्ठ्यां प्रपूजयेत्।
शुक्लपुष्पव्रतः प्राश्य अश्वमेधफलं भवेत्॥
वैशाखे सूर्य्यनामानं कृष्णषष्ठ्यां प्रपूजयेत्।
पीत्वा कुशोदकं पुण्यं जितक्रोधो जितेन्द्रियः।
महामेधस्य यज्ञस्य वैनतेय फलं लभेत्॥
ज्यैष्ठे दिवस्पतिं पूज्य गवां शृङ्गोदकं पिबेत्।
गवां कोटिप्रदानस्य निखिलं फलमश्नुते॥
आषाढ़े अर्क्कनामानमिष्ट्वा प्राश्य च गोमयम्।
प्रयात्यर्क्कसलोकत्वं वर्षाणां द्विशतं शतम्॥
श्रावणेऽर्य्यमनामानं पूजयित्वा पयः पिबेत्।
वर्षाणामयुतं साग्रं मोदते भास्करालये॥
मासि भाद्रपदे षष्ठ्यां भास्करं नाम पूजयेत्।
दूर्व्वाङ्कुरं सकृत् प्राश्य राजसूयफलं लभेत्॥
आश्विने देवदेवस्य सप्ताश्वमिति पूजयेत्।
दधि संप्राश्य विधिवत् पुण्डरीकफलं लभेत्॥

मासे तु कार्त्तिके षष्ठ्यां शक्राख्यं नाम पूजयेत्।
गोमूत्रफलमश्नीयादश्वमेधफलं लभेत्॥

गोमूत्रभावितफलं गोमूत्रफलम्॥

वर्षान्ते भोजयेद्विप्रान् सूर्य्यभक्तिपरायणान्।
पायसं मधुसंयुक्तमाज्येन सुपरिप्लुतम्॥
शक्त्या हिरण्यवासांसि भक्त्या तेभ्यो निवेदयेत्।
निवेदयेत्तु सूर्य्याय गाञ्च कृष्णां पयस्विनीम्॥
वर्षमेकञ्चरेदेवं नैरन्तर्य्येण यो नरः।
कृष्णषष्ठीव्रतं भक्त्या तस्य पुण्यफलं शृणु॥
सर्व्वपापविनिर्म्मुक्तः सर्व्वकामसमन्वितः।
मोदते सूर्य्यलोके तु स नरः शाश्वतीः समाः॥

इति भविष्योत्तरोक्तं कृष्णषष्ठी व्रतम्।

——ooo——

षष्ठीनामतिथिर्याज्या सामान्या दैवतैरपि।
एकभक्तेन नक्तेन तथैवायाचितेन च॥
उपवासेन दानेन तैलक्षारविवर्जितः।
अयं हि भगवान् देवो भास्करस्य परद्युतिः॥
येन शीघ्रेण दृश्येत तद्गुह्यं कथयाम्यहम्।
गोपनीयं व्रतं दिव्यमिह लोके फलप्रदम्॥
यस्मिन् कृते व्रते चैव दरिद्रो न भवेत् कुले।
षष्ठीतिथिं समुद्दिश्य ब्राह्मणस्य च भोजनम्॥

शाल्योदनञ्च पयसि कृत्वा च शर्करायुतम् ।
बाहुल्यघृतसंयुक्तं वर्षमेकं प्रदापयेत् ॥
कुले तस्यैव ये जाता ये भविष्यन्ति मानवाः ।
इह तस्यैव ये सन्ति तान् दारिद्र्यं न गच्छति ॥

इति स्कन्दपुराणोक्तमदारिद्र्यषष्ठीव्रतम् ।

——०*०——

स्तुतिजप्योपहारेण पूजया च विवस्वतः ।
उपवासेन षष्ठ्यां वै सर्व्वपापैः प्रमुच्यते ॥

इति ब्रह्मपुराणोक्तं षष्ठीव्रतम् ।

——०*०——

कृतोपवासः पञ्चम्यां षष्ठ्यां योऽर्च्चयते रविं
नियमव्रतचारी च रवेर्भक्तिसमन्वितः ।
सप्तम्यां वा महाभाग सोऽश्वमेधफलं लभेत् ॥

इति ब्रह्मपुराणोक्तं षष्ठीव्रतम् ।

——०*०——

षष्ठ्याञ्च शुक्लपक्षस्य ये नरा भौमवासरे ।
व्रतञ्चरति यत्नेन तथा तासां पृथक् पृथक् ॥
न तेषां दुर्लभं किञ्चित् भविष्यति सुरोत्तम ।
द्वियोगे हि गुणं तेषां फलं स्कन्द भविष्यति ॥
त्रियोगे पूजनं कृत्वा मासेषु सुरसत्तम ।

अक्षयं जायते पुण्यं नात्र कार्य्या विचारणा॥

इति विष्णुधर्म्मोत्तरोक्तं षष्ठीव्रतम्।

——000——

वैशाखमासादारभ्य पञ्चम्यां य उपोषितः।
भवन्तं पूजयेत् षष्ठ्यां संवत्सरमतन्द्रितः॥
पुत्रार्थी प्राप्नुयात् पुत्रान् धनकामो धनी भवेत्।
स्वर्गार्थी प्राप्नुयात् स्वर्गमपि तुष्टो ममात्मजः॥
स्तोत्रेण च मदीयेन ये स्तोष्यन्ति नरः प्रभोः।
लोकद्वयेऽपि ते कामान् प्राप्नोति तमसः प्रियान्॥
कुमारश्च तथा स्कन्दो विशाखश्च गुहस्तथा।
चतुरात्मा विनिर्द्दिष्टो भगवान् क्रौञ्चसूदनः॥
तमभ्यर्च्च्य नरःषष्ठ्यां पुत्रान् प्राप्नोत्यभीप्सितान्।
बालकानां ग्रहेभ्यो यो नरः प्राप्नोत्यसंशयम्॥

इति विष्णुधर्म्मोत्तरोक्तं पुत्रप्राप्तिव्रतम्।

——0*0——

ऋषीणां पूजनं कृत्वा षष्ठ्यां सुखमवाप्नुयात्॥

इति विष्णुधर्म्मोत्तरोक्तं सुखव्रतम्।

——0*0——

स्कन्दपार्श्वचरान् राजन् रुद्रपार्श्वचरानघ।
यमपार्श्वचरां श्चैव रोगमुक्तिमवाप्नुयात्॥

इति विष्णुधर्म्मोत्तरोक्तं रोगमुक्तिव्रतम्।

———000———

कालपाशं तथाभ्यर्च्य ज्वरव्याधीशमेव च।
रोगमोक्षमवाप्नोति वायुवह्निदवांस्तथा॥

इति विष्णुधर्म्मोत्तरोक्तं रोगहरषष्ठीव्रतम्।

इति श्रीमहाराजाधिराजसमस्तकरणाधीश्वरसकल-
विद्याविशारदश्रीहेमाद्रिविरचिते चतुर्व्वर्गं
चिन्तामणौ व्रतखण्डे षष्ठीव्रतानि।

———

अथ एकादशोऽध्यायः।

अथ सप्तमीव्रतानि।

आचारैः प्रथमयुवा युगेन सार्द्धं
न स्पर्द्धां कलिरपि साम्प्रतं विधत्ते।
यस्योच्चैस्त्वरितमवाप्य साधुसोऽयं
हेमाद्रिः कथयति सप्तमीव्रतानि॥

कृष्ण उवाच।

पार्थ श्रुतं मया पूर्व्वं शाण्डिल्याद्व्रतमुत्तमम्।
गुह्याद्गुह्यतमं पुण्यं तपश्चरणसंज्ञितम्॥

युधिष्ठिर उवाच।

कथं कार्य्यं व्रतं देव तपश्चरणसंज्ञितम्।
सविस्तरं मम ब्रूहि सरहस्यं समन्त्रकम्॥

कृष्ण उवाच।

शृणुष्वावहितो भूत्वा युधिष्ठिर तपोव्रतम्।
मार्गशीर्षादिमासेषु कर्त्तव्यं भूतिमिच्छता॥
तस्मिं स्थितोव्रते विप्रो बह्वृचो वेदपारगः।
ब्रह्मवित् कृष्णसप्तम्यां दद्यादर्घ्यं महीतले॥
ऋग्वेदवर्गत्रितयं पठिता सूर्य्यवत्प्रभम्।

पादक्रमेण कौन्तेय कनिष्ठाद्ददितिश्रुतम्* ॥

पादक्रमेणातिप्रतिपादनमर्घ्यदानम्।

एकभक्तेन नक्तेनायाचितेन तथा सुधीः† ॥

द्विजो वेदोक्तमन्त्रैस्तु प्रागुक्तैः पाण्डवाग्रज।

अर्घ्यं दद्युर्विना मन्त्रैः शूद्राः सूर्य्यपरायणाः।

चतुर्थ्यन्तेन मन्त्रेण नामचादौ व्यवस्थितम् ॥

शूद्राणां परमोमन्त्रः सर्व्वशास्त्रेषु पठ्यते‡।

कृत्वा ताम्रमये पात्रे सार्द्रपुष्पाक्षतैर्नृप ॥

रक्तचन्दनसंमिश्रं दूर्व्वापल्लवशोभितम्।

रक्तानि करवीराणि तथा रक्तोत्पलानि च ॥

कोरण्टकविमिश्राणि जवाशोकान्वितानि च।

किंशुकागस्त्यकुसुमकरवीराणि मालतीं ॥

मुचकुन्दञ्च कुन्दञ्च शतपत्रं समल्लिकम्।

एतानि च यथालाभं** ताम्रपात्रे विनिक्षिपेत् ॥

गोरोचनाकुशाग्राणि श्रीखण्डकुङ्कुमन्तथा।

तिलतन्दुलसिद्धार्थदधिकुङ्कुमकेसरम् ॥

कुङ्कुमकेशरं कुसुम्भं।

एभिरर्घ्यं वरं दद्यादुच्चैः कृत्वा भुजौ नृप।

व्योममुद्रां पुनर्बध्वा नमस्कृत्य समापयेत् ॥

---

* निक्षान्ददिति श्रुतमिति पुस्तकान्तरे पाठः।

† कुर्य्याद्व्रतमिदं सुधोरिति क्वचित्पाठः।

‡ सुनिश्चित इति पुस्तकान्तरे पाठः।

¶ पुष्पाणि रक्तवर्णानीति पुस्तकान्तरे पाठः।

** एतानिजवणे कुर्यादिति पुस्तकान्तरे पाठः।

व्योममुद्रान्तु विष्णुधर्मोत्तरात्।

करयोः संपुटोन्योन्यमणिबन्धस्थिताङ्गुलिः।

सान्तरालान्तरोयत्र व्योममुद्रेति तां जगुरिति॥

अत्र प्रतिमानुक्तेः प्रत्यक्षस्यैव सूर्य्यविम्बस्यार्घ्यदानमिति।

एवं मासक्रमेणैव यावत्सम्वत्सरं नृप।

समाप्ते तु व्रते दद्याद्विप्रेभ्यः श्रद्धयान्वितः॥

द्वादश प्रणीताः पार्थ पायसेन प्रपूरिताः।

सौवर्णं पङ्कजं भक्त्या विप्रेभ्यो दक्षिणा स्मृता॥

वस्त्रयुग्मञ्च काषायं दद्याद्विप्राय दानव।

एवं यः कुरुते सम्यक् तपश्चरणसंज्ञितं॥

व्रतं नरो वा नारी वा सूर्य्यभक्त्या सुभावितः।

स याति भवनं तत्र यत्र देवो दिवाकरः॥

पूज्यमानोऽप्सरोवृन्दैः वृन्दारकवृषापरः।

सम्प्राप्य जन्मचैवाग्र्यं दुःखदौर्भाग्यवर्जितः॥

आदित्यस्य प्रसादेन भक्तिःस्यात्तत्र निश्चला।

औदुम्बरैःफलयुगैःसममाचितं च

दर्भान्वितञ्च कुसुमाक्षतपूरितञ्च।

अर्घ्यं विधाय विधिवत् नृप यः प्रदद्यात्

लोकं प्रयात्यमलदीधितिनासित सः॥

इति भविष्योत्तरोक्तं तपश्चरणव्रतम्।

—o*o—

कृष्ण उवाच।

मुनीन्द्रोलोमशोनाम मथुरायां गतः पुरा।

सोऽर्च्चितो वसुदेवेन देवक्या च युधिष्ठिर॥
उपविष्टः कथाः पुण्याः कथयित्वा मनोरमाः।
ततः कथयितुं भूप कथामेतां प्रचक्रमे॥
कंसेन ते हताः पुत्रि पुत्रा जाताः पुनः पुनः।
मृतवत्सा देवकि त्वं पुत्रदुःखेन दुःखिता॥
यथा चन्द्रमुखी दीना बभूव नहुषप्रिया।
पश्चाच्चीर्णव्रता सैव बभूवाच्छतवत्सका॥
त्वमेव देवकि तथा भविष्यसि न संशयः।

देवक्युवाच।

का सा चन्द्रमुखी ब्रह्मन् बभूव नहुषप्रिया।
किञ्च चीर्णं व्रतं पुण्यं तथा सन्ततिवर्द्धनम्॥
सपत्नीदर्पदलनं सौभाग्यारोग्यदं विभो।

लोमश उवाच।

अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः।
तस्यासीद्रूपसम्पन्ना देवी चन्द्रमुखी प्रिया॥
तथा तत्रैव नगरे विष्णुगुप्तोऽभवद्द्विजः।
आसीद्गुणवती तस्य पत्नी भद्रमुखी तथा॥
तयोरासीद्दृढ़ा प्रीतिः स्पृहनीया परस्परम्।
अथ ते द्वेपि सख्यौ वै स्नानार्थं शरयूतटे॥
प्राप्ते प्रापाश्च तत्रैव वान्याश्च नगराङ्गनाः।
ताः स्नात्वा मण्डलञ्चक्रुस्तन्मध्ये व्यक्तरूपिणम्॥
लेखयित्वा शिवं शान्तमुमया सह शङ्करम्।
गन्धपुष्पाद्यतैर्भक्त्या पूजयित्वा यथाविधि॥

प्रणम्य गन्तुकामास्ताः पप्रच्छुतीवरस्त्रियः।
ता जगुः शङ्करोऽस्माभिः पार्व्वत्या सह पूजितः॥
बद्धा सूत्रमयं तन्तुं शिवस्यात्मा निवेदितः।
धारणीयमिदन्तावद्यावत्प्राणविधारणम्॥
तासां तद्वचनं श्रुत्वा सख्यावेतेऽपि देवकि।
कृत्वा च समयं तत्र बद्धा दोर्भ्यां सुडोरकम्॥
ततस्ताः स्वगृहं जग्मुः स्वसखीभिः समावृताः।
कालेन महता तस्यास्तद्व्रतं विस्मृतं शुभम्॥
चन्द्रमुख्याः प्रमत्तायाः विस्मृतः स च डोरकः।
भद्रमुख्या तथा भद्रे विस्मृतं सर्व्वमेव तत्॥
मृते कैश्चिदहोरात्रैः सा बभूव प्लवङ्गमी।
भद्रा स्यात् कुक्कुटी जाता व्रतभङ्गाच्छुभानने॥
कालेन पञ्चतां प्राप्ते सखीभावस्य हेतवे।
अदेवमातृके देशे जाते गोकुलसङ्कुले॥
ब्राह्मणी ब्राह्मणी जाता क्षत्रिया क्षत्रियी तथा।
राज्ञी जाया बभूवाथ पृथ्वीनाथस्य वल्लभा॥
ईश्वरी नाम विख्याता यासीत् चन्द्रमुखी पुरा।
नाम्ना भद्रमुखी यासीत् भूषणानाम साभवत्॥
अग्निमीलस्य सा दत्ता पित्रा तस्य पुरोधसा।
अतीववल्लभा आसीत् भूषणा भूषणप्रिया॥
भूषिता भूषितवरैः रूपेणालङ्कृता स्वयम्।
तस्या बभूव रस्याश्च पुत्राः सर्व्वगुणान्विताः॥
मातृवद्रूपसम्पन्नाः पितृवद्धर्म्मशीलिनः।

सख्यौ ते चैव तद्दच जाते जातिस्मरे किल ॥
पुनर्निरन्तरा प्रीतिस्तयोरासीद्यथा पुरा।
काले बहुतिथे याते त्यक्ता सा सत्यवल्लभा ॥
मध्ये वयसि सा राज्ञी पुत्रमेकमजीजनत्।
ईश्वरी रोगिणं मूकं प्रज्ञाहीनञ्च विस्वरम् ॥
तादृशोऽपि महाभागे मृतोऽसौ नववार्षिकः।
ततस्तां भूषणभ्रष्टामीश्वरीं पुत्रदुःखिताम् ॥
सखीभावादतिस्नेहात् पुत्रैश्च परिवारिता।
अमुक्ताभरणा भद्रा स्वरूपेणैव भूषिता ॥
तां दृष्ट्वा सदृशीं भार्यां प्रजज्वालेश्वरी रुषा।
ततो गृहं प्रेषयित्वा ब्राह्मणी तीव्रमत्सरा ॥
चिन्तयामास सा राज्ञी तस्याः पुत्रवधं प्रति।
निश्चित्य चेतसा क्रूरा घातयामास तत्सुतान् ॥
हताहताश्च ते पुत्राः पुनर्जीवन्त्यनामयम्।
तदद्भुततरं दृष्ट्वा सतीमाहूय भूषणां ॥
उपवेश्यासने श्रेष्ठे बहुमानपुरःसरम्।
अपृच्छत् विस्मयाविष्टा राज्ञी सा मृतवत्सका ॥
ब्रूहि तथ्यं महाभागे किन्त्वया सुकृतं कृतम्।
दानव्रतं तपोवापि शुश्रूषणमुपोषितम् ॥
येन ते निहताः पुत्राः पुनर्जीवन्त्यनामयाः।
तथा हि बहुपुत्रा च जीववत्सा शुभानने ॥
अमुक्ताभरणा नित्यं भर्त्तुश्चेतस्यवस्थिता।
अतीव शोभसे देवि विद्युदभ्रालये यथा ॥

भूषणोवाच ।

शृणु देवि प्रवक्ष्यामि जन्मान्तरविचेष्टितम् ।
किं तर्हि विस्मृतं सर्व्वं मयोध्यायाश्च यत् कृतं ॥
आवाभ्यां व्रतवैकल्यं प्रमत्ताभ्यां वरानने ।
येन त्वं प्लवगी जाताहं सा च कुक्कुटी तथा ॥
तथापि व्रतवैकल्यं त्वया च नानृतः कृतम् ।
मया तु सर्व्वंभावेन चेतसाध्याय शङ्करम् ॥
तिर्य्यग्योन्यं गता येन मनोवृत्तया त्वनुष्ठितम् ।
एतद्धि कारणं भद्रे नान्यत्किञ्चित् करोम्यहम् ॥

लोमश उवाच ।

इत्याकर्ण्य च संगृह्य पूर्व्वजन्मनि चेष्टितम् ।
ईश्वरी च तया सार्द्धं पुनःसम्यक् चकार ह ॥
व्रतस्यास्य प्रभावेन पुत्त्रपौत्त्रादिसम्भवैः ।
भुक्त्वा च सौख्यमतुलं मृता शिवपुरङ्गता ॥
तस्मात्त्वमपि कल्याणि व्रतमेतत् समाचर ।
प्रारब्धेऽस्मिन् व्रते दिव्ये जीवत्पुत्त्रा भविष्यसि ॥

देवक्युवाच ।

ब्रह्मन्नाख्याहि ते सम्यक् व्रतमेतत् सुखप्रदम् ।
सन्तानवृद्धिकरणं शिवलोके स्थितिप्रदम् ॥

लोमश उवाच ।

भाद्रे भाद्रपदे मासि सप्तम्यां सलिलाशये ।
स्नात्वा शिवं मण्डलके लेखयित्वा तथाम्बिकाम् ॥

भक्त्या सम्पूज्य समयं कुर्य्याद्बद्ध्वा करे गुणम्।
यावज्जीवं मयात्मा तु शिवस्य विनिवेदितः॥
इत्येवं समयं कृत्वा शिवस्य विनिवेदितः।
इत्येवं समयं कृत्वा ततः प्रभृतिडोरकम्॥
सौवर्णं राजतञ्चापि सौत्रं वा धारयेत् करे।
मण्डकान् वेष्टिकानद्यादश्नपतेऽथवा द्विज॥
स्वयन्ताश्चैव भोक्तव्या व्रतभङ्गभयाच्छुभे।
पारिते मुद्रिका वासो हैमीरौप्याः स्वशक्तितः॥
ताम्रपात्रोपरि स्थाप्य ब्राह्मणेभ्यो निवेदयेत्।
आचार्य्याय विशेषेण कर्त्तव्यञ्चाङ्गुलीयकम्॥
पुष्प कुङ्कुम सिन्दूर ताम्बूलाञ्जनसूत्रकैः।
एवं त्वत्कारयित्वा तु व्रतं सन्ततिवर्द्धनम्॥
सर्व्वपापविनिर्म्मुक्ता कृत्वा सौख्यं मनोरमम्।
सन्तानं वर्द्धयित्वा च शिवलोके महीयते॥
एतत्ते सर्व्वमाख्यातमाख्यानसहितव्रतम्।
कुरु देवकि यत्नेन जीवपुत्त्रा भविष्यसि॥

कृष्ण उवाच।

इत्युक्त्वा स मुनिश्श्रेष्ठ स्तत्रैवान्तरधीयत।
चकार सर्व्वयत्नेन यदुक्तं तेन धीमता॥
व्रतस्यास्य प्रभावेण देवकी मामजीजनत्।
तस्मात् पार्थ नरैः कार्य्यं स्त्रीभिः कार्य्यं विशेषतः॥
व्रतं पापहरं भव्यं सुखसन्ततिदं सदा।
इदञ्च शृणुयाद्भक्त्या यश्चैतत् प्रतिपादयेत्॥

व्रतमाख्यानसहितं सोऽपि पापैः प्रमुच्यते।
सान्तानकं व्रतमिदं सुख मोक्षकामा
या स्त्री चरिष्यति शिवं हृदये निधाय।
विहाय दुःखमतुलङ्गतकल्मषौघा
सा स्त्री व्रताद्भवति शोभनजीववत्सा॥

इति भविष्योत्तरे अमुक्ताभरणसप्तमीव्रतम्।

——000——

भीष्म उवाच।

भगवन् दुर्गसंसारसागरोत्तारकं तथा।
किञ्चिद्व्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदम्॥

पुलस्त्य उवाच।

सौरधर्म्मं प्रवक्ष्यामि पार्थ कल्याणसप्तमीं।
विधानं तस्या वक्ष्यामि यथावदनुपूर्व्वशः॥
यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत्।
सा तु कल्याणिनी नाम विजया च निगद्यते॥
प्रातर्गव्येन पयसा स्नानमस्यां समाचरेत्।
शुक्लाम्बरधरः पद्ममक्षतैः परिकल्पयेत्॥
प्राङ्मुखोऽष्टदलं मध्ये तद्वृत्तञ्च सकर्णिकम्।
सर्व्वेष्वपि दलेष्वेवं विन्यसेत् पूर्व्वतः क्रमात्॥
पूर्व्वेण तपनायेति मार्त्तण्डायेति वै ततः।
याम्ये दिवाकरायेति विधात्रे इति नैरृते॥
पश्चिमे वरुणायेति भास्करायेति चानिले।

सौम्ये विकर्त्तनायेति रचयेदष्टमे दले॥
आदावन्तेच मध्ये च नमोस्तु परमात्मने।
मन्त्रै रेभिःसमभ्यर्च्य नमस्कारान्तदीपितैः॥
शुक्लवस्त्रैः फलैर्भक्ष्यै धूपैर्माल्यानुलेपनैः।
स्थण्डिले पूजयेद्भक्त्या गुड़ेन लवणेन च॥
ततो व्याहृतिमन्त्रेण विसृजेत् द्विजपुङ्गव।
शक्तितस्तर्पयेद्भक्त्या गुड़क्षीरघृतादिभिः॥
तिलपात्रं हिरण्यञ्च गुरवे विनिवेदयेत्।
एवन्तु नियमं कृत्वा प्रातरुत्थाय मानवः॥
कृतस्नानजपैर्विप्रैः सहैव घृतपायसम्।
भुक्त्वा च वेदविद्वद्भिर्व्वैडालव्रतवर्जितः॥
घृतपात्रं सकनकं सोदकुम्भं निवेदयेत्।
प्रीयतामत्र भगवन् फलमाह दिवाकरः॥
अनेन विधिना सर्व्वं मासि मासि समाचरेत्।
एवं सम्वत्सरस्यान्ते कृत्वैतदखिलं नृप॥
उद्यापयेद्यथाशक्त्या भास्करं संस्मरन् हृदि।
ततस्त्रयोदशे मासि गावोदद्यात् त्रयोदश॥
वस्त्रालङ्कारसंयुक्ता हेमशृङ्गीः पयस्विनीः।
एकामपि प्रदद्याद्गां वित्तहीनश्च निःक्रियः॥
वित्तशाठ्यं न कुर्व्वीत ततोलोभात् पतत्यधः।
अनेन विधिना यस्तु कुर्य्यात् कल्याणसप्तमीम्॥
श्रुत्वेति पठनाद्वापि सर्व्वपापैः प्रमुच्यते।
कर्त्ता शिवपुरे स्थित्वा कल्पमेकमिहागतः॥

राजा भवति राजेन्द्र त्रेतायां राघवो यथा।
पद्माष्टपत्रकमलोदरकर्णिकायां
सम्पूजयेत्कुसुम धूप विलेपनाद्यैः।
षष्ठ्याःपरेऽहनि जनार्त्तिहरं दिनेशं
कल्याणभाजनमसौ भवतीह नूनम्॥

इति पद्मपुराणोक्तं कल्याणसप्तमीव्रतम्।

——*——

पुलस्त्य उवाच।

अतःपरं प्रवक्ष्यामि व्रतं कमलसप्तमीं।
यस्य संकीर्त्तनादेव तुष्यतीह दिवाकरः॥
वसन्तामलसप्तम्यां स्नातः सन्* गौरसर्षपैः।
तिलपात्रे तु सौवर्णं निधाय कमले रविम्॥
वस्त्रोपवीताभरणगन्धपुष्पैरथार्च्चयेत् •।
नमस्ते पद्महस्ताय नमस्ते विश्वधारिणे।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते॥
ततस्तु कालवेलायामुदकुम्भसमन्वितं।
विप्राय दद्यात्संपूज्य वस्त्रमाल्यादिभूषितम्॥
रविं सकमलं दद्यादलंकृत्य विधानतः।
उपवासं प्रकुर्व्वीत परं नियममास्थितः॥
प्रभातायान्तु शर्व्वर्य्यामष्टम्यां भोजयेद्द्विजान्।

---

* कमलं शुभमिति पुस्तकान्तरे पाठः

• वस्त्रयुग्माष्टतमितिवा पाठः

यथाशक्त्या स्वयं पश्चात् भुञ्जीत मांसवर्ज्जितम् ॥
अनेन विधिना शुक्लसप्तम्यां मासि मासि तु।
सर्व्वं समाचरेद्भक्त्या वित्तशाठ्यविवर्जितः॥
व्रतान्ते शयनं दद्यात् सुवर्णकमलान्वितम्।
गाश्च दद्याद्यथाशक्त्या सर्व्वालङ्कारभूषिताम्॥
व्यजनासनदीपांश्च यच्चान्यत् कल्पितं गृहे।
अनेन विधिना यस्तु कुर्य्यात् कमलसप्तमीं॥
आधिव्याधिविनिर्मुक्तः सुखसौभाग्यभाजनः।
भुक्त्वा भोगांश्चिरं मर्त्यैं मृतोरविपुरं व्रजेत्॥
कल्पानेकं ततः स्थित्वा आगत्यात्र नराधिपः।
सर्व्वसम्पत्समृद्धे च कुले भवति भूभुजाम्॥
तत्रापि भानुनिरतोव्रतैः सन्तोष्य भास्करम्।
उपर्य्युपरि संप्राप्य जन्म भक्तोरवेस्तथा॥
सप्तजन्मानि राजेन्द्रस्ततोयाति परं पदम्।
यदर्थैर्म्मुनयः सिद्धाः सुराश्चेन्द्रपुरोगमाः॥
निर्व्विसा भरतश्रेष्ठ प्राप्नुवन्त्यच्चतोद्यमं।
एवं व्रतं महेन्द्रस्य समाख्यातं स्वयम्भुवा॥
तेनैव नारदस्योक्तं नारदेन स्वयं मम।
आख्यानं विजनं कृत्वा यतोगुह्यतरं नृप॥

यः पश्यतीदं शृणुयान्मुहूर्त्तं
पठेच्च भक्त्याथ मतिं ददाति।
सोप्यत्र लक्ष्मीमचलामवाप्य
गन्धर्व्वविद्याधरलोकमेति॥

इति पद्मपुराणोक्तं कमलसप्तमीव्रतम्।

पुलस्त्य उवाच।

शर्करासप्तमीं वक्ष्ये सर्व्वकल्मषनाशिनीं।
आयुरारोग्यमैश्वर्य्यं यथानन्तं प्रजायते॥
माधवस्य सिते पक्षे सप्तम्यां श्रद्धयान्वितः।
प्रातस्नातस्तिलैःशुक्लैः शुक्लमाल्यानुलेपनः॥
स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम्।
तस्मिन्नमः सवित्रेति धूपं पुष्पं निवेशयेत्॥
स्थापयेदव्रणं कुम्भं शर्करापात्रसंयुतम्।
शुक्लवस्त्रेण संवेष्ट्य शुक्लमाल्यानुलेपनैः॥
सहिरण्यं यथाशक्त्या मन्त्रेणानेन पूजयेत्।
विश्वेदेवमयोयस्माद्वेदवादीति पठ्यते॥
त्वमेवामृतसर्व्वस्व अतः पाहि सनातन।
पञ्चगव्यं ततः पीत्वा स्वपेत्तत्पार्श्वतः क्षितौ॥
सौरसूक्तं जपंस्तिष्ठेत् पुराणश्रवणेन च।
अहोरात्रे गते पश्चादष्टम्याङ्कृतनित्यकः॥
तत्सर्व्वं वेदविदुषे ब्राह्मणाय निवेदयेत्।
भोजयेच्छक्तितोविप्रान् शर्कराघृतपायसैः॥
भुञ्जीतातैललवणं स्वयमप्याथवाग्यतः।
अनेन विधिना सर्व्वं मासि मासि समाचरेत्॥
वत्सरान्ते पुनर्दद्याद्ब्राह्मणाय समाहितः।
शयनं वस्त्रसम्वीतं शर्कराकनकान्वितं॥
सर्व्वोपस्करसंयुक्तं तथैकां गां पयस्विनीम्॥

गृहञ्च शक्तितोदद्यात् समस्तोपस्करान्वितं ।
सहस्रेणाथ निष्काणाङ्कृत्वा दद्याच्छतेन वा ॥
दशभिर्व्वा त्रिभिर्निष्कै र्निष्केनैकेन वा पुनः ।
पद्मं स्वशक्तितो दद्यात् वित्तशाठ्यविवर्जितः ॥

पद्मं, सौवर्णपद्मम् ।

अमृतं पिबतोवक्तात् सूर्य्यस्यामृतविन्दवः ।
निष्पेतुर्य्ये तदुत्पन्नाः शालिमुद्गेचवः स्मृताः ॥
शर्करा च परं तस्मादिक्षुसारामृतोपमा ।
इष्टा रवेरतः पुण्याः शर्करा हव्यकव्ययोः ॥
शर्करासप्तमी चैषा वाजिमेधफलप्रदा ।
सर्व्वदुःखोपशमनी पुत्रसन्ततिवर्द्धनी ॥
यः कुर्य्यात्परया भक्त्या स वै सद्गतिमाप्नुयात् ।
कल्पमेकं वसेत् स्वर्गे* ततोयाति परं पदम् ॥

इदमनघं शृणोति यः स्मरेद्वा
पठति स याति सुरेश्वरस्य लोकम् ।
मतिमतिं च ददाति यो जनाना
ममरवधूजनकिन्नरैः सपूज्यः ॥

इति पद्मपुराणोक्तं शर्करासप्तमीव्रतम् ।

———ooo———

युधिष्ठिर उवाच ।

अध्रुवेण शरीरेण सुपुष्टेनापि किं फलम् ।
माघस्नानविहीनेन त्वयोक्तं यदुनन्दन ॥

---

* ततोराजाभवेदिति पुस्तकान्तरे पाठः ।

प्रातःस्नानसमर्थानां शरीरं यस्य देहिनः।
किं तेन वद कर्त्तव्यं माघे संसारभीरुणा॥
कायक्लेशसहा नार्य्यो न भवन्ति यदूत्तम।
सौकुमार्य्याच्छरीरस्य अबलात्वात्तथैव च॥
कथञ्च ताः सुरूपाः स्युः सुभगाः सुप्रजास्तथा।
स्नानतस्यैव पुण्यस्य सर्व्वमेतत् फलं यतः॥
अल्पायासेन सुमहत् केन पुण्यमवाप्यते।
स्त्रीभिर्म्माघे भवेद्ब्रूहि स्नानं तद्धि जगद्गुरो॥
ब्रह्मा उवाच।
श्रूयतां पाण्डवश्रेष्ठ रहस्यं मुनिभाषितम्।
यन्मया कस्यचिन्नोक्तमचलासप्तमीव्रतं॥
वेश्या चेन्दुमती नाम रूपौदार्य्यगुणान्विता।
आसीत् कुरुकुलश्रेष्ठ मगधस्य विलासिनी॥
तनुमध्या सुजघनी पीनोन्नतपयोधरा।
सम्यग्विभक्तावयवा पूर्णचन्द्रनिभानना॥
सौन्दर्य्यं सुकुमार्य्यञ्च तस्याः कामेन गीयते।
यस्याः सुदर्शनादेव कामः कामातुरो भवेत्॥
मूर्त्तिः शशधरस्येव नयनानन्दकारिणी।
वशीकरणविद्येव सर्व्वलोकमनोहरा॥
एकस्मिन् दिवसे प्रातः सम्मुखस्थितया तया।
चिन्तिता हृदये राजन् संसारस्यानवस्थितिः॥
संनिमज्जज्जगदिदं विषवेलायसागरे।
जरामृत्युज्वरग्राहे न कश्चिदवबुध्यते॥

अकूपारश्रुतभाण्डो धातृशिल्पिविनिर्म्मितः।
स्वकर्म्मघनसम्बीतः पच्यते कालवह्निना॥
ये यान्ति दिवसाः पुंसां धर्म्मकर्म्मार्थवर्जिताः॥
न ते पुनरिहायान्ति हरभक्तनरा यथा॥
पूजास्नानतपोहोमस्वाध्यायपितृतर्पणं।
यस्मिन् दिने न क्रियते वृथा तद्दिवसं नृणाम्॥
पुत्त्राणां दारगृहके समासक्तं हि मानवम्।
वृकीवोरणमासाद्य मृत्युरादाय गच्छति॥
इत्येवं चिन्तयित्वा तु वेश्याचेन्दुमती ततः।
वसिष्ठस्याश्रमं पुण्यं जगाम गजगामिनी॥
वसिष्ठमृषिमासीनं प्रणम्य विनयान्विता।
कृताञ्जलिपुटा कृत्वा इदं वचनमब्रवीत्॥

इन्दुमत्युवाच।

मया न दत्तं न हुतं नोपवासकृतं व्रतम्।
भक्त्या न पूजितः शम्भुः स्वामिन् शार्ङ्गधरो न च॥
साम्प्रतं तप्यमानाया व्रतं किञ्चिदहस्व मे।
येन दुःखाम्बुपङ्कौघादुत्तरामि भवार्णवात्॥
एतत्तस्याः सुबहुशः श्रुत्वातिकरुणम्वचः।
कारुण्यात् कथयामास वसिष्ठोमुनिसत्तमः॥
माघस्य सितसप्तम्यां सर्व्वकामफलप्रदम्।
रूपसौभाग्यजननं स्नानं कुरु वरानने॥
कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलम्।
रात्र्यंते चालयेथास्त्वं दत्त्वा शिरसि दीपकम्॥

माघस्य सितसप्तम्यामचलच्चालितञ्च यत्।
जलं मलानां सर्व्वेषामरन्तत् चालनन्ततः॥
वसिष्ठवचनं श्रुत्वा तस्मिन्नहनि भारत।
चकारेन्दुमतीस्नानं दानं सम्यक् यथाविधि॥
स्नानस्यास्य प्रभावेण भुक्ता भोगान्यथेप्सितान्।
इन्द्रलोकेऽप्सरःसङ्घे नायकत्वमवाप सा॥
अचलासप्तमीस्नानं कथितं ते विशाम्पते।
सर्व्वपापप्रशमनं सुखसौभाग्यवर्द्धनम्॥

*युधिष्ठिर उवाच।

सप्तमीस्नानमाहात्म्यं श्रुतं निरवशेषितम्।
साम्प्रतं श्रोतुमिच्छामि विधिं मन्त्रसमन्वितम्॥

श्रीकृष्ण उवाच।

एकभक्तेन सन्तिष्ठेत् षष्ठ्यां संपूज्य भास्करम्।
सप्तम्यां तु व्रजेत् प्रातः सुगम्भीरजलाशयम्॥
सरित्सरस्तड़ागं वा देवखातमथापि वा।
सुखावगाहसलिलं दुष्टसत्त्वैरदूषितम्॥
व्यालाम्बुपक्षिभिश्चैव जलगैर्मत्स्यकच्छपैः।
न केन चाल्यते यावत्तावत् स्नानं समाचरेत्॥
सौवर्णे राजते पात्रे भक्त्या ताम्रमयेऽथ वा।
तैलवर्त्तिःप्रदातव्या महारजतरञ्जिता॥

महारजतङ्कुसुम्भं

* वशिष्ठउवाचेति क्वचित्पाठः।

समाहितमना भूत्वा दत्त्वा शिरसि दीपकम्।
भास्करं हृदये ध्यात्वा इमं मन्त्रमुदीरयेत्॥
नमस्ते रुद्ररूपाय रसानां पतये नमः।
वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते॥
जलोपरि तरेद्दीपः स्नात्वा सन्तर्प्य देवताः।
चन्दनेन लिखेत्पद्ममष्टपत्रं सकर्णिकम्॥
मध्ये शिवं सपत्नीकं प्रणवेन च संयुतम्।
शक्रे दले रविः पूज्यो भानुश्चैवानले तथा॥
याम्ये विवस्वान्नैर्ऋत्ये भास्करं पूजयेद्बुधः।
पश्चिमे सविता पूज्यः पूज्योऽर्कश्चानिले दले॥
सौम्ये सहस्रकिरणः शैवे सर्व्वात्मने नमः।
पूज्याः प्रणवपूर्व्वास्तु नमस्कारान्तयोजिताः॥
पुष्पैः सुगन्धधूपैश्च प्रयत्नेन युधिष्ठिर।
विसर्ज्य वस्त्रसम्वीतं स्वस्थानं गम्यतामिति॥
विसर्जिते सहस्रांशौ समागम्य स्वमालयम्।
ताम्रपात्रे यथाशक्त्या मृण्मये वाथ भक्तिमान्॥
स्थापयेत्तिलपिष्टञ्च सघृतं सगुडं तथा।
काञ्चनं तैलकं कृत्वा अशक्तस्तिलपिष्टजम्॥

तैलकं दीपपात्रं।

संच्छाद्य रक्तवस्त्रेण पुष्पैर्धूपैरथार्चयेत्।
ततस्तान् वाचयेद्विप्रान्दद्यान्मन्त्रेण तालकम्॥
आदित्यस्य प्रसादेन प्रातस्नानफलेन च।
दुष्टदौर्भाग्यदुःखघ्नं मया दत्तन्तु तालकम्॥

तालकं तालपत्रं कर्णाभरणविशेषः॥

पूजयित्वोपदेष्टारं विप्रानन्यांश्च पूजयेत्।
ततोदिनं समग्रञ्च भास्करध्यानतत्परः॥
ताएव च कथाः शृणुयादन्या वा धर्म्मसंहिताः।
पाषण्डादिभिरालापदर्शनस्पर्शनादिकम्॥
वर्जयेत् चपयेत् प्राज्ञस्ततोबन्धुजनैः सह।
नक्तं भुञ्जीत च नरोदीनान् सम्भोज्य शक्तितः॥
एतत्ते कथितं पार्थ रूपसौभाग्यकारकम्।
अचलासप्तमीस्नानं सर्व्वकामफलप्रदम्॥
इति पठति यइत्थं यः शृणोति प्रसङ्गात्
कलिकलुषविनाशं सप्तमीस्नानमेतत्।
मतिमपि च जनानां यो ददाति प्रयत्नात्
सुरभवनगतोऽसौ सेव्यते चाप्सरोभिः॥

इति भविष्योत्तरोक्तं अचलासप्तमीव्रतं।

——o*o——

पुलस्त्य उवाच।

अन्यामपि प्रवक्ष्यामि शोभनां शुभसप्तमीम्।
यामुपोष्य नरोरोगात्* शोकदुःखात् प्रमुच्यते॥
शुक्लेचाश्वयुजे मासि कृतस्नानजपः शुचिः।
वाचयित्वा द्विजश्रेष्ठानारभेच्छुक्लसप्तमीम्॥
कपिलां पूजयेद्भक्त्या गन्धमाल्यानुलेपनैः।

---

* दौर्गत्याद्विमुच्यत इति क्वचित् पाठः।

नमामि सूर्य्यसम्भूतामशेषभुवनालयाम् ॥
त्वामहं सर्व्वकल्याणशरीरां सर्व्वसिद्धये।
अथाहृत्य तिलप्रस्थं ताम्रपात्रे कृतं नवम् ॥
काञ्चनं वृषभं तद्वद्रक्तमाल्यगुड़ान्वितम्।
फलैर्नानाविधैर्भक्ष्यैः* सर्व्वोपस्करसंयुतैः ॥
दद्यादिकालवेलायामर्य्यमा प्रीयतामिति।
पञ्चगव्यं तु संप्राश्य स्वपेद्भूमौ विमत्सरः ॥
ततः प्रभाते सुस्नातो भक्त्या सन्तर्पयेद्द्विजान्।
अनेन विधिना दद्यात् मासि मासि सदा नरः ॥
वाससी वृषभं हैमं तद्वच्छन्दोमखं¶ पूजनम्।
वस्त्रान्ते च शयनमिक्षुदण्डगुणान्वितम् ॥
सोपधानकविश्राम भाजनासनसंयुतम्।
ताम्रपात्रे तिलप्रस्थं सौवर्णवृषभैर्युतम् ॥
दद्याद्वेदविदे सर्व्वं विश्वात्मा प्रीयतामिति।
अनेन विधिना राजन् कुर्य्याद्यः शुभसप्तमीम् ॥
तस्य श्रीर्व्विजयः‡ सौख्यं भवेज्जन्मनि जन्मनि।
अप्सरोगणगन्धर्व्वैः पूज्यमानो हरालये† ॥
वसेद्गणाधिपोभूत्वा चतुर्युगविपर्य्ययेण।
ततः पुनरिहागत्य सार्व्वभौमो भविष्यति ॥
समानीतो देवलोकात् सुराणान्नारदेन तु।

---

* घृत पायससंयुतैरिति पुस्तकान्तरे पाठः।
† सुरालये इति क्वचित् पाठः।
‡ पूर्णश्चेषान्समश्नौ शाप्येति पुस्तकान्तरे पाठः।
¶ तद्वद्वेतेषपूजन मिति पुस्तकान्तरे पाठः।

शुभाख्या सप्तमीचेयं शतकोटिप्रविस्तरा॥
ब्रह्महत्यादिपापानां विनाशाय दयालुना।
समाख्याता नारदेन मया च कथिता तव॥

इमां पठेद्यः शृणुयाच्च भक्त्या
पश्येत् प्रसङ्गादपि दीयमानाम्।
सोऽप्यत्र सर्व्वाघवियुक्तदेहः
प्राप्नोति विद्याधरनायकत्वम्॥
यावत् समा व्रतमिदं करोति
यः सप्तमी सप्तविधानयुक्तः।
स सप्तलोकाधिपतिः क्रमेण
भूत्वा पदं याति पदं मुरारेः॥

इति पद्मपुराणोक्तं शुभसप्तमीव्रतम्।

---o*o---

पुलस्त्य उवाच।

अथातः संप्रवक्ष्यामि सर्व्वपापप्रणाशिनीम्।
सर्व्वकामप्रदां पुण्यां नाम्ना मन्दारसप्तमीम्॥
माघस्यामलपक्षे तु पञ्चम्यां लघुभुक् नरः।
दन्तकाष्ठं ततः कृत्वा षष्ठीमुपवसेन्नरः॥
विप्रान् संभोजयित्वा तु मन्दारं प्राशयेन्निशि।
ततः प्रभाते उत्थाय कुर्य्यात् स्नानं पुनर्द्विजान्॥
भोजयेच्छक्तितः कृत्वा मन्दारकुसुमाष्टकम्।

मन्दारोराजार्कः।

सौवर्णं पुरतस्तद्वत् पद्महस्तं सुशोभनम्॥

पद्मं कृष्णतिलैः कृत्वा ताम्रपात्रेऽष्टपत्रकम्।
हैमं मन्दारकुसुमं स्थाप्य मध्ये च पूजयेत्॥
नमस्कारेण तद्वच्च सूर्य्यायेत्यनले दले।
ऐशान्यां मित्रनामानं नमस्कारेण पूजयेत्।
दक्षिणे तद्वदर्काय अथार्य्यम्णेति नैर्ऋते॥
पश्चिमे वेदधाम्नेति वायव्ये चण्डभानवे।
पूष्णे चोत्तरतः पूज्य आनन्दायेत्यतः परम्॥
कर्णिकायाञ्च पुरुषं स्थाप्य सर्व्वात्मनेति च।
शुक्लवस्त्रैः समावेष्ट्य भक्ष्यैर्माल्यफलादिभिः॥
एवमभ्यर्च्य तत्सर्व्वं दद्याद्वेदविदे पुनः।
भुञ्जीतातैललवणं वाग्यतः प्राङ्मुखो गृही॥
अनेन विधिना सर्व्वसप्तम्यां मासि मासि वा।
कुर्य्यात् संवत्सरं यावद्वित्तशाठ्यविवर्जितः॥
एतदेव व्रतान्ते तु विधाय कलशोपरि।
गोभिर्व्विभवतः सार्द्धं दातव्यं भूतिमिच्छता॥
नमो मन्दारनाथाय मन्दारशयनाय च।
त्वं वै तारयस्वास्मानस्मात्संसारसागरात्॥
अनेन विधिना यस्तु कुर्य्यान्मन्दारसप्तमीं।
विहार्य्यातिसुखी लोके कल्पञ्च दिवि मोदते॥
इमामघौघपटलभीषणध्वान्तदीपिकाम्।
गच्छन् प्रगृह्य संसारशर्व्वर्य्यां न स्खलेन्नरः॥
मन्दारसप्तमी नाम ईप्सितार्थफलप्रदा।
यः पठेच्छृणुयाद्वापि सोऽपि पापैः प्रमुच्यते।

इति पद्मपुराणोक्तं मन्दारसप्तमीव्रतम्।

———ooo———

युधिष्ठिर उवाच।

कथं सा क्रियते कृष्ण मनुष्यैरथसप्तमी।
चक्रवर्त्तित्वफलदा या विख्याता त्वया मम॥

कृष्ण उवाच।

आसीत् काम्बोजविषये यशोधर्म्मनराधिपः।
वृद्धे वयसि तस्यासीत् सर्व्वव्याधियुतः सुतः॥
तत्कर्म्मपाकं सोऽपृच्छद्विनीतो द्विजपुंगवान्।
सचाह राजन् वैश्योयं कृपणः पूर्व्वजन्मनि॥
ददर्श रथसप्तम्यां क्रियमाणव्रतं नृप।
व्रतदर्शनमाहात्म्यादुत्पन्नोजठरे तव॥
अदाता विभवे तस्मात्तेनायं व्याधितोऽभवत्।
ततः स राजा पप्रच्छ किं मे तत्त्वंविधीयताम्॥
यस्य सन्दर्शनात् प्राप्तो लाभस्तव निकेतनम्।
तदेव क्रियतां राजन् रथसप्तमिसंज्ञितम्॥
व्रतं पापहरं येन चक्रवर्त्तित्वमाप्यते॥

राजोवाच।

ब्रूहि विप्र व्रतं तत्त्वं सविधानं समन्त्रकम्।
ईश्वराणां दरिद्राणां सर्व्वसम्पत्प्रदायकम्॥

द्विज उवाच।

शुक्लपक्षे तु माघस्य षष्ठ्यामामन्त्रयेत् गृही।

स्नानं शुक्लतिलैः कार्य्यं नद्यभावे तु कुत्रचित्॥
विमले सलिले राजन् विधिवद्वर्णधर्मतः।
देवादीन् पूजयित्वा तु गत्वा सूर्य्यालयं ततः॥
सूर्यं सम्यक् नमस्कृत्य पुष्पधूपाक्षतैः शुभैः।
आगत्य भवनं पश्चात् पञ्चयज्ञांश्च निर्वपेत्॥
संभोज्यातिथिभृत्यांश्च बालवृद्धाश्रितान् स्वयम्।
विद्यमाने दिनेऽश्नीयाद्दाग्यतस्तैलवर्जितम्॥
रात्रौ विप्रं समाहूय विधिज्ञं वेदपारगम्।
संपूज्य नियमं कुर्य्यात् सूर्य्यमाधाय चेतसि॥
सप्तम्यान्तु निराहारो भूत्वा भोगविवर्जितः।
भोक्ष्येऽष्टम्यां जगन्नेत्र निर्विघ्नं तत्र मे कुरु॥
इत्युच्चार्य्य नृपश्रेष्ठ तोयं तोयेषु निक्षिपेत्।
ततो विसर्ज्य तं विप्रं स्वपेद्भूमौ जितेन्द्रियः॥
ततः प्रातः समुत्थाय कृतावश्यः शुचिर्नरः।
कारयित्वा रथं दिव्यं किङ्किणीजालमालिनम्॥
सर्वोपस्करसंयुक्तं रत्नैः सर्व्वाङ्गचित्रितम्।
काञ्चनं राजतञ्चाथ हयसारथिसंयुतम्॥
ततो मध्याह्नसमये कृतस्नानादिकोव्रती।
अतीर्य्यग्वीक्षमाणस्तु पाषण्डालापवर्जितः॥
सौरसूक्तं जपन् प्राज्ञः समागच्छेत् स्वमालयम्।
निर्व्वर्त्त्य नित्यकार्य्यन्तु कृत्वा ब्राह्मणवाचनम्॥
वस्त्रमण्डपिकामध्ये स्थापयेत्तं रथोत्तमम्।
कुङ्कुमेन सुगन्धेन चार्चयित्वा समन्ततः॥

मालाभिः पुष्पदीपानां समन्तात्परिवेष्टयेत्।
धूपेनागुरुमिश्रेण धूपयित्वा रथोपरि॥
रथस्य स्थापयेद्भानुं सर्व्वसम्पूर्णलक्षणं।
वित्तानुरूपं हैमञ्च वित्तशाठ्यविवर्जितः॥
शाठ्यात् व्रजति वैकल्यं वैकल्यादिफलं फलम्।
ततोदेवं समभ्यर्च्च्य सरथं सहसारथिम्॥
पुष्पैर्धूपैस्तथागन्धैर्व्वस्त्रालङ्कारभूषणैः।
फलैर्नानाविधैर्भक्ष्यैर्नैवेद्यैर्घृतपाचितैः॥
पूजयेद्भास्करं भक्त्या मन्त्रैरेभिस्त्रिभिःक्रमात्।
भानो दिवाकरा,दित्य मार्त्तण्ड जगताम्पते॥
अपांनिधे जगद्व्याप भूतभावन भास्कर।
प्रणतार्त्तिहराचिन्त्य विश्वचिन्तामणे विभो॥
विष्णो हंसादिभूतेश आद्यादिमध्यान्तकारक।
भक्तिहीनं क्रियाहीनं मन्त्रहीनं जगत्पते॥
प्रसादात्तव सम्पूर्णमर्च्चनं यदिहास्तु मे।
एवं सम्पूज्य देवेशं प्रार्थयेच्च मनोगतं॥
ददाति प्रार्थितं भानुर्भक्त्या सन्तोषितोनरैः।
वित्तहीनोपि विधिना सर्व्वमेतत् प्रकल्पयेत्॥
रथं ससारथिं साश्वं वर्णकैर्भित्तिलेखितम्।
सौवर्णञ्च तथा भानुं यथाशक्त्या विनिर्म्मितं॥
प्रागुक्तेन विधानेन पूजयित्वा सुविस्तरम्।
जागरङ्कारयेद्रात्रौ गीतवादित्रनिस्वनैः॥
प्रोच्चणीयैर्व्विचित्रैश्च पुण्याख्यानकथादिभिः।

रथयात्रां प्रपश्येत भानोरायतनं श्रितः॥
अनिमीलितनेत्रस्तु नयेत्तां रजनीं बुधः।
प्रभाते विमले स्नातः कृतकृत्यस्ततोद्विजान्॥
तर्पयेद्विविधैःकामैं दानैर्वासोविभूषणैः।
अश्वमेधेन तुल्यं तदिदं ब्रह्मविदोविदुः॥
अतोदेयानि दानानि यथाशक्त्या विचक्षणैः।
रथन्तु गुरवे देयं सर्व्वोपस्करसंयुतम्॥
रक्तञ्च वस्त्रयुगलं रक्तधेनुसमन्वितम्।
एवं चीर्णव्रतोराजन् किन्नाप्नोति जगत्त्रये॥
तस्मात्सर्व्वं प्रयत्नेन कुरु त्वं रथसप्तमीं।
येनारोग्योभवेत् पुत्त्रः सदीपो नृपसत्तम॥
व्रतस्यास्य प्रभावेन प्रसादाद्भास्करस्य च।
भविष्यति महातेजा महाबलपराक्रमः॥
भुक्त्वा भोगान् सुविपुलान् कृत्वा राज्यमकण्टकम्।
दत्त्वासौ रथसप्तम्यां कृतेत्वपि माहाभुजः॥
उत्पाद्य पुत्त्रान् पौत्रांश्च सूर्य्यलोकं स यास्यति।
तत्र स्थित्वा कल्पमेकं चक्रवर्त्ती भविष्यति॥

कृष्ण उवाच।

इति सर्व्वं समाख्याय विप्ररितो द्विजोत्तमः।
यथागतं जगामासौ नृपः सर्व्वञ्चकार ह॥
यदादिष्टं द्विजेन्द्रेण तत्तत्सर्व्वंबभूव ह।
एवं स चक्रवर्त्तित्वं प्राप्तवान् नृपनन्दन॥
श्रूयते यस्तु मान्धाता पुराणेषु परन्तप।

य इदं शृणुयाद्भक्त्या योवापि परिकीर्त्तयेत् ॥
तस्यैव तुष्यते भानुर्यःशुत्वैवाभयं सदा।
एवं विधं रथवरं रथवाजियुक्तं
हैमञ्च हैमशतदीधितिना समेतम्।
दद्याच्च माघसितसप्तमिवासरेषु
सोऽखण्डचक्रगतिरेव महीं भुनक्ति ॥

इति भविष्योत्तरोक्तं रथसप्तमीव्रतम्।

———ooo———

ब्रह्मोवाच।

माघे मासि महादेव सिते पक्षे जितेन्द्रियः।
षष्ठ्यामुपोषितोभुत्वा गन्धपुष्पोपहारकैः ॥
पूजयित्वा दिनकरं रात्रौ तस्याग्रतः स्वपेत्।
विबुद्धस्त्वथ सप्तम्यां भक्त्या भानुं समर्च्चयेत् ॥
ब्राह्मणान् भोजयेद्भक्त्या वित्तशाठ्यं विवर्जयेत्।
खण्डवेष्टैर्मोदकैश्च तथेक्षुगुड़पूपकैः ॥
प्रथमं* वत्सरे पूर्णे सप्तम्यां कारयेद्बुधः।
देवदेवस्य वै यात्रां पूर्व्वोक्तविधिनाचरेत् ॥

पूर्व्वोक्तविधिनेति नानातिथिप्रकरण
स्थित रथयात्राविधिनेत्यर्थः।

कृच्छ्रपादं व्रतं कुर्य्याद्रथारूढ़ं व्रतं रविम्† ॥

---

* अथ सम्वत्सरे पूर्णे इति पुस्तकान्तरे पाठः।

† कृच्छ्रपादमुपः कृत्वा रथारूढं परम्मित मिति पुस्तकान्तरे पाठः।

पश्येद्भक्त्या जगन्नाथं स याति परमाङ्गतिम् ।
तृतीयायामेकभक्तं चतुर्थ्यां नक्तमुच्यते ॥
अयाचितन्तु पञ्चम्यां षष्ठ्याञ्चैव उपोषितः ।
सप्तम्यां पारणं कुर्य्यात् दृष्ट्वा देवं रथे स्थितम् ॥
पूजयित्वा च विधिना भक्त्या देवं त्रिलोचनम् ।
सौवर्णन्तु रथं कृत्वा ताम्रपात्रोपरिस्थितम् ॥
रथमध्ये न्यसेद्व्योम पूजितं मणिभिर्नवम् ।
व्योमनिर्म्माणं तु व्योमषष्ठीव्रतएव व्याख्यातम् वेदितव्यं ।
पद्मरागं न्यसेन्मध्ये मौक्तिकं पूर्व्वतोन्यसेत् ।
इन्द्रनीलमथो याम्या वारुण्यां* मकरध्वजम् ॥
प्रबालमुत्तरे रुद्रे सर्व्वत्रं विन्यसेद्बुधः ।
श्वेतं पीतं सितञ्चापि रक्तञ्चान्धकसूदन ॥
एतानि नववस्त्राणि दिक्षु सर्व्वासु विन्यसेत् ।
पताका रथसंस्थाने घण्टाभरणभूषिते ॥
पुष्पदाम्ना स्वलङ्कृत्य रथं व्योमसमन्वितम् ।
यथान्यायं पूजयित्वा भास्कराय निवेदयेत् ॥
भोजयित्वाथवा विप्रमाचार्य्याय निवेदयेत् ।
योऽधीते सप्तमीकल्पं सोपाख्यानञ्च शाङ्करम् ॥
आचार्य्यः सद्दिजोज्ञेयो वर्णानामनुपूर्व्वशः ।
सौराणां वैष्णवानाञ्च शैवानां पार्व्वतीपतिः ॥
अलाभे तु सुवर्णस्य रथं राजतमादिशेत् ।

---

* मरकतमिति पुस्तकान्तरे पाठः ।

तदलाभे ताम्रमयं रथं व्योमञ्च कारयेत्।
अलाभेन च ताम्रस्य रथः पिष्टमयः स्मृतः॥
सहिरण्यं महादेवं ताम्रभाजनमास्थितम्।
काषाययुग्मसहितं ब्राह्मणाय निवेदयेत्॥
पूर्व्वोक्तेन महादेव* वाचकाय महाद्युते।
पञ्चरत्नसमायुक्तं शुभाङ्गप्रावृतं सितं॥
स्वशक्त्या तु विरूपाक्षं वित्तशाठ्यं विवर्जयेत्।
एषा पुण्या पापहरा रथाख्या सप्तमी हर॥
कथिता ते मया रुद्रमहतीयं प्रकीर्त्तिता।
स्नानं दानमथो होमः पूजनं ग्रहनायकम्॥
शतसाहस्रिकं पुण्यं भूत्यै भूधर विद्यते।
एवमेषा पुण्यतमा माघे प्राप्ता तु सप्तमी॥
यामुपोष्य नरोभक्त्या सूर्य्यस्यानुचरोभवेत्।
ब्राह्मणो याति देवत्वं क्षत्रियोविप्रतां व्रजेत्॥
वैश्यस्तु क्षत्रतां याति शूद्रो वैश्यत्वमेति वै।
विद्याविनयसम्पन्नं भर्त्तारं कन्यका लभेत्॥
अपुत्रा स्त्री सुतं विन्द्यात् सौभाग्यञ्च गणाधिप।
विधवा चाप्युपोष्यैनामुत्तमं† लोकमश्नुते
नान्यजन्मसु वैधव्यं प्राप्नुयात्पार्व्वतीप्रिय।
बहुपुत्रा बहुधना भर्त्तुर्वल्लभतां व्रजेत्।
यावद्भिः सप्तजन्मानि नारी वा पुरुषस्तथा॥

---

* शुभग-आन्वितमिति पुस्तकान्तरे पाठः।

† सप्तमीं त्रिपुरान्तक इति पुस्तकान्तरे पाठः।

इति भविष्यत्पुराणोक्तं रथाङ्गसप्तमीव्रतम्।

——०००——

वासुदेव उवाच।

माघस्य शुक्लपक्षे तु पञ्चम्याञ्च कुरूद्वह।
एकभक्तं समाख्यातं षष्ठ्यां नक्तमुदाहृतम्॥
सप्तम्यामुपवासञ्च केचिदिच्छन्ति सुव्रत।
षष्ठ्यां केचिदुशन्तीह सप्तम्यां राधनं किल॥
कृतोपवासः षष्ठ्यान्तु पूजयेद्भास्करं बुधः।
रक्तचन्दनमिश्रैस्तु करवीरैः समाहृतैः॥
गुग्गुलेन महाबाहो सुगन्धेन च सुव्रत।
पूजयेद्देवदेवेशङ्कुहेशशङ्करं रविं।

शङ्करं सुखकरमित्यर्थः॥

एवं हि चतुरोमासान् माघादीन् पूजयेद्रविम्।
आत्मनश्चापि शुद्ध्यर्थं प्राशनं गोमयस्य च॥
स्नानञ्च गोमयेनेह कर्त्तव्यञ्चात्मशुद्धये।
ब्राह्मणान् दिव्यभौमांश्च भोजयेच्चापि शक्तितः॥
दिवि देवकुले भवाःदिव्या इतरेभौमाः।
ज्यैष्ठादिष्वपि मासेषु श्वेतचन्दनमुच्यते।
श्वेतानि चापि पुष्पाणि शुभगन्धान्वितानि वै॥
कृष्णागुरु तथा धूपं नैवेद्यं पायसं स्मृतम्।
तेनैव ब्राह्मणान् साधून् भोजयेच्च महामते॥
प्राशयेत्पञ्चगव्यन्तु स्नानं तेनैव सुव्रत।

कार्त्तिकादिषु मासेषु अगस्तिकुसुमैः स्मृतं
पूजनं कुरुशार्दूल धूपश्चैवापराजितः॥
नैवेद्यं गुड़पूपाश्च तथैवेक्षुरसः स्मृतः।
तेनैव ब्राह्मणान् स्नातोभोजयेच्च स्वशक्तितः॥
कुशोदकं प्राशयेच्च स्नानञ्च कुरु सिद्धये।
तृतीयपारणस्यान्ते माघे मासि महामते॥
भोजनं तत्र दानञ्च द्विगुणं समुदाहृतं।
देवदेवस्य पूजा च कर्त्तव्या शक्तितो बुधैः॥
रथस्य चापि दानन्तु रथयात्रा च सुव्रत।
रथस्य प्राप्तिहेतोर्वै कर्त्तव्या विभवे सति॥
दानं सूर्य्यरथस्येह यथोक्तं विभवे सति।
इत्येषा कथिता पुत्र रथाङ्गसप्तमी शुभा॥
सप्तमीति महाख्याता महापुण्या महोदया।
यामुपोष्य धनं पुत्रान् कीर्त्तिं विद्यां समश्नुते॥

इति भविष्यत्पुराणोक्तं महासप्तमीव्रतम्।

———ooo———

ब्रह्मोवाच।

जया च विजया चैव जयन्ती चापराजिता।
महाजया च नन्दा च भद्रा वामा प्रकीर्त्तिता
शुक्लपक्षस्य सप्तम्यां नक्षत्रं पञ्चतारकम्।
यदा भवेत्तदा ज्ञेया जयानामेति सप्तमी॥
पञ्चतारकमिति रोहिण्यश्लेषामघाहस्ताश्च।
तस्यां दत्तं हुतं जप्तं तर्पणं देवपूजनम्॥

सर्व्वंशंतगुणं प्रोक्तं पूजाञ्चापि दिवाकरीं।
हंसे हस्तसमारूढ़े शुक्ला या सप्तमी परा॥

हंसः सूर्य्यः,

वर्षमेकन्तु कर्त्तव्या विधिनानेन भास्करम्।
सौवर्णं कारयेद्भक्त्या द्विभुजं पद्मधारिणम्॥
पारणत्रितयं तस्यां क्रियते गोपते पुरा।
प्रथमञ्चतुरोमासान् पारणं कथितं बुधैः॥
कथितान्यत्र पुष्पाणि करवीरस्य सुव्रत।
चन्दनञ्च तथा रक्तं धूपार्थं गुग्गुलः स्मृतः॥
कासारन्तु सितासारं नैवेद्यं भास्कराय वै॥

कासारो गोधूमचूर्णैर्चवघृतैर्भृष्टा निर्म्मितो
लोके प्रसिद्धः सितासारः शर्कराबहुलः॥

अनेन विधिना पूज्य मार्त्तण्डं विबुधाधिपम्।
पूजयेद्ब्राह्मणान् भक्त्या* भक्ष्यभोज्यैर्यथाविधि॥
कासारं भोजयेद्विप्रान् पारणं फलदम्भवेत्।
स्वयमेव तथाश्नीयाद्दाहतो मौनमास्थितः॥
पञ्चम्यामेकभक्तञ्च षष्ठ्यां नक्तन्तु कीर्त्तितम्।
कृत्वोपवासं सप्तम्यामष्टम्यां पारणं भवेत्॥
सिद्धार्थकैःस्नानमत्र प्राशनं पायसेन तु।
भानुर्मे प्रीयतामत्र दन्तकाष्ठं तथार्कजम्॥
द्वितीयं श्रूयतां कर्म्म पारणं गदतो मम।
मालतीकुसुमानीह श्रीखण्डं चन्दनं तथा॥

---

* भोजयेद्ब्राह्मणान् भौमानिति पुस्तकान्तरे पाठः।

नैवेद्यं पायसञ्चानोर्धूपं विजयमाविशेत्।
ब्राह्मणान् भोजयेच्चापि समश्नीयात् स्वयं विभो॥
रविर्मे प्रीयतामत्र नाम देवस्य कीर्त्तयेत्।
प्राशयेत्पञ्चगव्यन्तु खादिरं दन्तधावनम्॥
द्वितीये पारणे चापि विधिरुक्तो मयाधुना।
तृतीये पारणे चैव विधानन्तु निबोध मे॥
अगस्त्यकुसुमैरत्र भास्करं पूजयेद्बुधः।
समालम्भनमात्रोक्तं श्रीखण्डं कुङ्कुमं तथा॥
सिह्लकं धूपनिर्द्दिष्टं सूर्य्यप्रीतिकरं परम्।
शाल्योदनन्तु नैवेद्यं रसालोपरिसंयुतम्॥

रसाल.शिखण्डिनी

ब्राह्मणानामथो दानं भोजयेच्च तथात्मना।
कुशोदकप्राशनञ्च बदर्य्यां दन्तधावनम्॥
विकर्त्तनः प्रीयतां मे नाम देवस्य कीर्त्तयेत्।
वर्षान्ते देवदेवस्य पूजा कार्य्या विधानतः॥
गन्धपुष्पोपहारैश्च नानाप्रोक्षणकैस्तथा।
गोदानभूमिदानैश्च ब्राह्मणानाञ्च तर्पणैः॥
इत्थं सम्पूज्य देवेशन्देवस्य पुरतः स्थितं।
कारयेत् परमं पुण्यं धर्म्मपुस्तकवाचनम॥
वस्त्रैर्गन्धैस्तथाधूपैर्व्वाचकं पूज्य यत्नतः।
देवस्य पुरतः स्थित्वा ततो मन्त्रमुदीरयेत्॥
देवदेव जगन्नाथ सर्व्वव्याधि विनाशन।

अहेश लोकतपन विकर्त्तन तमोपह ॥
कृतेयं देव देवस्य जया नामेति सप्तमी ।
मया तव प्रसादेन धन्या पापहरा शिवा ॥
अनेन विधिना वीर यः कुर्य्यात्सप्तमीव्रतम् ।
तस्य स्नानादिकं सर्व्वं भवेच्छतगुणं विभो ॥
कृत्वेमां सप्तमीं वीर पुरुषः प्राप्नुयाद्यशः ।
धनं धान्यं सुवर्णञ्च पुत्रानायु, र्बलं स्मृतम् ॥
प्राप्येह नरशार्दूल स्वर्गलोकञ्च गच्छति ।
तस्मादेत्य पुनर्भूमौ राजा भवति धार्म्मिकः ॥
इत्येषा कथिता वीर जया नामेति सप्तमी ।
कृताश्रुता स्मृता या तु हंसलोकप्रदायिनी ॥

इति भविष्यत्पुराणोक्तं जयासप्तमीव्रतम् ।

——000——

ब्रह्मोवाच ।

शुक्लपक्षस्य सप्तम्यां सूर्य्यवारोभवेद्यदि ।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ॥
स्नानं दानं जपो होम उपवासस्तथैव च ।
सर्व्वं विजयसप्तम्यां महापातकनाशनम् ॥
पञ्चम्यामेकभक्तं स्यात् षष्ठ्यां नक्तं प्रचक्षते ।
उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत् ॥
उपवास परः षष्ठ्यां अजस्रं पूजयेद्रविम् ।
उपवासपरः विजय सप्तम्यामुपवासं करिष्यन् ॥
गन्धपुष्पोपहारैश्च भक्त्या श्रद्धासमन्वितः ।

प्रकल्प्य पूजा भूमौ च देवस्य पुरतः स्वपेत्॥
जपमानस्तु गायत्रीं सौरसूक्तमथापि वा।
त्र्यक्षरं वा महाश्वेतं षडक्षरमथापि वा।
विबुद्धस्त्वथ सप्तम्यां कृत्वा स्नानं गणाधिप॥
ग्रहेशं पूजयित्वा तु होमं कृत्वा विधानतः।
ब्राह्मणान् भोजयेत्पश्चाद्भक्त्या च गणनायकन्॥
शाल्योदनमपूपांश्च खण्डवेष्टांश्च शक्तितः।
दत्त्वा तु दक्षिणां शक्त्या ततो विप्रान् विसर्ज्जयेत्॥
इत्येषा कथिता देव पुण्या विजयसप्तमी।
यामुपोष्य नरोगच्छेत्परं वैरोचनं पदम्।
करवीराणि रक्तानि कुङ्कमञ्च विलेपनम्।
विजयं धूपमस्यान्तु भानोस्तुष्टिकराणि वै॥
एषा पुण्या पापहरा महापातकनाशिनी।
अत्र दत्त हुतञ्चापि अक्षयञ्च गणाधिप॥

इति भविष्यत्पुराणोक्तं विजयासप्तमीव्रतम्।

———ooo———

ब्रह्मोवाच।

माघस्य शुक्लपक्षे तु सप्तमी या त्रिलोचना।
जयन्ती नाम सा प्रोक्ता पुण्या पापहरा तथा॥
उपोष्य येन विधिना शृणु तं पार्व्वतीप्रिय।
पारणानि तु चत्वारि कथितानि च पण्डितैः॥
पञ्चम्यामेकभक्तन्तु षष्ठ्यां नक्तं प्रकीर्त्तितम्।

उपवासस्तु सप्तम्यामष्टम्यां पारणम्भवेत् ॥
माघे च फाल्गुने मा स तथा चैत्रे च सुव्रत ।
अर्कपुष्पाणि धन्यानि कुङ्कुमञ्च विलेपनम् ॥
नैवेद्यं मोदकञ्चात्र धूपमाज्यमुदाहृतम् ।
प्राशनं पञ्चगव्यस्य पवित्रीकरणं परम् ॥
मोदकैर्भोजयेद्विप्रान् यथाशक्त्या गणाधिप ।
शाल्योदनञ्च भूतेश दद्याङ्गक्त्या द्विजेषु वै ॥
इत्थं संपूजयेद्यस्तु भास्करं लोकपूजितम् ।
सर्व्वेषु पारणेष्वेवं सोऽश्वमेधफलं लभेत् ॥
द्वितीये पारणे पूज्य राजसूयफलं लभेत् ।
वैशाखेत्वथ ज्यैष्ठे तु आषाढ़े मासि सुव्रत ॥
पूजार्थमत्र भानोर्वै शतपत्राणि योजयेत् ।
श्वेतञ्च चन्दनं भीम धूपो गुग्गुलुरुच्यते ॥
नैवेद्यं गुड़पूपाश्च प्राशनं गोमयस्य च ।
भोजनञ्चापि विप्राणां गुड़पूपाश्च कीर्त्तिताः ॥
द्वितीयमिदमाख्यातं पारणं पापनाशनम् ।
तृतीयं शृणु देवेशपूजार्थं भास्करस्य तु ॥
श्रावणे मासि देवेश तथा भाद्रपदे विभो ।
आश्विने चापि मासे तु रक्तचन्दनमिष्यते ॥
मालतीकुसुमानीह धूपो विजयइष्यते ।
नैवेद्यं घृतपूपाश्च भोजने तु द्विजातिषु ॥
कुशोदक प्राशनन्तु कायशुद्धिकरं परम् ।
तृतीयमपि त्वाख्यातं पारणं पापनाशनम् ॥

राजसूयाश्वमेधाभ्यां फलदम्भास्करप्रियम्।
चतुर्थमप्यहं वच्मि पारणं श्रेयसे नृप॥
मासि कार्त्तिक के वीर मार्गशीर्षे तथापि च।
पौषे च नरशार्दूल शृणु पुष्पाण्यशेषतः॥
करवीराणि रक्तानि तथा रक्तञ्च चन्दनम्।
अमृताख्यं तथा धूपं नैवेद्यं पायसन्तथा॥
अर्जुनीयं तथा वज्रं प्राशनं परमं मतम्।
अगुरुं चन्दनं मुस्तां सिह्लकं वृषणं तथा॥
समभागन्तु कर्त्तव्यं धूपश्चामृतसम्भवं।

अर्जुनीयं। गव्यं। वज्रं। घृतं।

नामानि कथितान्यत्र भास्करस्य महात्मनः॥
चित्रभानुस्तथा भानुरादित्यो भास्करस्तथा।
प्रीयतामिति सर्वेषु पारणेष्वेवमादिशेत्॥
अनेन विधिना यस्तु कुर्यात्पूजां विभावसोः।
अस्यान्तिथौ महादेव स याति परमं पदम्॥
कृत्वैवं सप्तमीं भीम सर्वान् कामानवाप्नुयात्।
पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम्॥
सरोगो मुच्यते रोगात् शुभं प्राप्नोति पुष्कलं।
पूर्णे सम्वत्सरे भीम कार्या पूजा दिवाकरे॥
गन्धपुष्पोपहारैश्च ब्राह्मणानाञ्च तर्पणैः।
नानाविधैः प्रोक्षणकैः पूजया वाचकस्य च॥
इत्थं संपूज्य देवेशं ब्राह्मणञ्च प्रपूजयेत्।
वाचकं द्विजं संपज्य इदं वाक्यमुदीरयेत्॥

धर्म्मकार्य्येषु मे देव अर्थकार्य्येषु नित्यशः ।
कामकार्य्येषु सर्व्वेषु जयो भवति सर्व्वदा ॥
तदा विसर्जयेद्विप्रान् वाचकञ्च द्विजोत्तमम् ।
इत्थं कुर्य्यादिदं पश्चात् स जयं प्राप्नुयात्सदा ॥
सर्व्वपापविशुद्धात्मा सूर्य्यलोकं स गच्छति ।
विमानवरमारूढः कविजोद्भवमुत्तमम् ॥
तेजसा कविसंकाशः प्रभया पतगोत्तमः ।
कविजं, कविरग्निस्तज्जं सुवर्णं । पतगः, सूर्य्यः ।

इति भविष्यपुराणोक्तं जयन्तीव्रतम् ।

———०००———

ब्रह्मोवाच ।

मासि भाद्रपदे शुक्ला सप्तमी या गणाधिप ।
अपराजितेति विख्याता महापातकनाशिनी ॥
चतुर्थ्यामेकभक्तन्तु पञ्चम्यां नक्तमादिशेत् ।
उपवासस्तथा षष्ठ्यां सप्तम्यां पारणं भवेत् ॥
पारणान्यत्र चत्वारि कथितानि मनीषिभिः ।
पुष्पाणि करवीराणि तथा रक्तञ्च चन्दनम् ॥
धूपक्रिया गुग्गुलुना नैवेद्यं गुडपूपकाः ।
नभस्यादिषु मासेषु विधिरेष प्रकीर्त्तितः ॥
तथाशुभगपुष्पाणि कुङ्कुमञ्च विलेपनम् ।
धूपार्थं सिह्लकं प्रोक्तमथवा बिल्वसम्भवम् ॥
शाल्योदनञ्च नैवेद्यं रसालाः फाल्गुनादिषु ।

रक्तोत्पलानि भूतेश अगुरुश्चन्दनं तथा ॥
अनन्तधूपमुद्दिष्टं नैवेद्यं गुडपूपकाः।
श्रीखण्डं ग्रन्थिसहितं अगुरुः सिह्लकं तथा ॥
मुस्ता तथेन्दुं भूतेश शर्कराश्च दहेत्त्र्यहम्।
इत्येषोऽनन्तधूपश्च कथितो देवसत्तम ॥

ग्रन्थि, ग्रन्थिपर्णी, इन्दुः, कर्पूरः।

ज्यैष्ठादिषु तथाद्येषु विधिरुक्तो मनीषिभिः।
शृणु नामानि देवस्य प्राशनानि च सुव्रत ॥
भगोऽंशुमानर्यमा च सविता त्रिपुरान्तकः।
पारणेषु च सर्वेषु प्रीयतामिति कीर्त्तयेत् ॥
गोमूत्रं पञ्चगव्यञ्च घृतमुष्णञ्च वै पयः।
यस्त्विमां सप्तमीं कुर्य्यादनेन विधिना नरः ॥
अपराजितो भवेत्सोपि सदा शत्रुभिराहवे।
हन्याच्छत्रून् जयेच्चापि त्रिवर्गं नात्र संशयः ॥
त्रिवर्गमथ संप्राप्य भानोः पुरमवाप्नुयात् *।
गन्धपुष्पोपहारैश्च पुराणश्रवणेन च ॥
अन्नदानेन च विभो ब्राह्मणानाञ्च तर्पणैः।
वाचकं पूजयित्वा तु भास्करस्य प्रियं सदा ॥
स पराजित्य वै शत्रून् याति हंससलोकताम्।
शुक्रजोद्भवयानेन आपगेयपताकिना ॥
आपगाधिपसंकाशो ह्यापगाधिपतिर्भवेत्।

शुक्रजं, सुवर्णं आपगेयमपि सुवर्णमेव, आपगाधिपो, वरुणः।

---

* पुष्करपूर्णं खरूकस्तु पावयेत् शक्तितःश्चगदति पुस्तकान्तरे पाठः।

इति भविष्यत्पुराणोक्तमपराजितासप्तमीव्रतम।

——*——

ब्रह्मोवाच।

शुक्लपक्षे तु सप्तम्यां यदा संक्रमतेरविः।
महाजया तदा स्याद्दै सप्तमी भास्करप्रिया॥
स्नानं दानं जपो होमः पितृदेवाभिपूजनम्।
सर्व्वं कोटिगुणं प्रोक्तं तपनेन महौजसा॥
यस्त्वस्यां मानवो भक्त्या घृतेन स्नापयेद्रविम्।
सोऽश्वमेधफलं प्राप्य ततः सूर्य्यपदव्रजेत्॥
पयसा स्नापयेद्यस्तु भास्करं भक्तिमान्नरः।
विमुक्तः सर्व्वपापेभ्यः स याति सूर्य्यलोकताम्॥
स्थित्वा तत्र चिरं कालं राजा भवति संजय।
महाजयेषा कथिता सप्तमी त्रिपुरान्तक॥
यामुपोष्य नरोभक्त्या अचलां स्वर्गति* लभेत्।
ततो याति परं स्थानं यत्र गत्वा न शोचति॥

इति भवित्पुराणोक्तं महाजयासप्तमीव्रतम।

——000——

ब्रह्मोवाच।

या तु मार्गशिरे मासि शुक्लपक्षे तु सप्तमी।
नन्दा सा कथिता वीर सर्व्वानन्दकरी शुभा॥
पञ्चम्यामेकभक्तं तु षष्ठ्यां नक्तं प्रकीर्त्तितम्।

* सप्तजामिति पुस्तकान्तरे पाठः।

सप्तम्यामुपवासञ्च कीर्त्तयन्ति मनीषिणः* ।
मालती कुसुमानीह सुगन्धं चन्दनं तथा ।
कर्पूरागुरुसंमिश्रं धूपश्चात्र विनिर्दिशेत् ।
दध्योदनं सखण्डञ्च नैवेद्यं भास्करप्रियम् ॥
तदेव दद्याद्विप्रेभ्यो ह्यश्नीयाच्च स्वयं तथा ।
पूजार्थं भास्करस्यैष प्रथमे पारणे विधिः ॥
पालाशपुष्पाणि विभो यक्षचन्दनमेव च ।
कर्पूरं सिह्लकं कुष्ठमुशीरं चन्दनं तथा ॥
वस्त्रान्विद्रुषणं भीम कुङ्कुमं गृञ्जनं तथा ।
हरीतकी तथा भीम एष यत्राङ्गउच्यते† ॥
गृञ्जनं, पलाण्डुभेदः ।
धूपं प्रबोधमादिष्टं नैवेद्यं खण्डखाद्यकम् ।
कृष्णागुरुः सिह्लकञ्च चाणक्यं द्रुषणं तथा ॥
चन्दनन्तगरं मुस्ता प्रबोधः शर्करान्वितः ।
चाणक्यं, मूलकभेदः ।
भोजयेद्ब्राह्मणांश्चापि खण्डाद्यैर्गणाधिप ॥
बिल्वपत्रं तु संप्राश्य ततो भुञ्जीत वाग्यतः ।
पारणस्य द्वितीयस्य विधिरेष प्रकीर्त्तितः ॥
नीलोत्पलानि पुष्पाणि धूपं गुग्गुलमाहरेत् ।
नैवेद्यञ्च पांशुमुखाः प्रीतये भास्करस्य तु ॥
पांशुमुखाः, शर्कराचूर्णपूर्णवदना भक्ष्याः ।

---

* पारणाखन वेचापि उपन्तीह मनीषिणः इति पुस्तकान्तरे पाठः ।

† यचनन्दनमुच्यते[इति पुस्तकान्तरे पाठः ।

विलेपनं चन्दनस्य मुस्ताप्राशन*मुच्यते ॥
तृतीयस्यापि हे वीर कथितो विधिरुत्तमः।
शृणु नामानि देवस्य पावनानि नृणां सदा ॥
विष्णु†र्भगस्तथा धाता प्रीयतामुच्चरेद्बुधः।
अनेन विधिना यस्तु कुर्य्यान्नन्दां नरः सदा ॥
स कामानिह संप्राप्य विधातारमवाप्नुयात्।
पुत्रकामो लभेत्पुत्रं धनकामो लभेद्धनम् ॥
विद्यार्थी लभते विद्यां यशोर्थी च यशस्तथा।
सर्व्वकामस्तथाप्राप्य मोदते शाश्वतीः समाः ॥
ततः सूर्य्यसदो गत्वा नन्दते नन्दवर्द्धनम्।
इत्येषा नन्दजननी नन्दा ख्याता मया द्विज ॥
यामुपोष्य तथा भूत्वा नन्दतेऽर्कमवाप्य वैं।

इति भविष्योत्तरोक्तं नन्दासप्तमी व्रतम्।

———000———

ब्रह्मोवाच।

शुक्लपक्षे तु सप्तम्यां नक्षत्रं सवितुर्भवेत्।
यदा प्राप्यमशेषेण तदा सा भद्रतां व्रजेत् ॥
सवितृनक्षत्रं, हस्ता।
चतुर्थ्यामेकभक्तन्तु पञ्चम्यां नक्तमादिशेत्।
षष्ठ्यामयाचितं प्रोक्तं उपवासस्ततःपरम् ॥

---

* विश प्राशनमिति पुस्तकान्तरे पाठः।

† रविरिति क्वचित् पाठः।

तर्पणं देवदेवेशो घृतेन कथितं बुधैः।
क्षीरेण च तथा वीर पुनरिक्षुरसेन च॥
स्नापयित्वा तु देवेशं चन्दनेन विलेपयेत्।
दद्याच्च गुग्गुलं तस्मै दद्याद्धोम तथाग्रतः॥
गोधूमचूर्णनिष्पन्नं विमलं शशिसन्निभम्
सुवर्णं सगुडञ्चैव रक्तपुष्पोपशोभितम्॥
यदत्र शृङ्गमीशानं तत्र वैमौक्तिकं न्यसेत्।
यदग्रे तत्र माणिक्यं न्यसेद्वा रोहितं मणिम्॥
नैर्ऋते मरकतन्दद्याद्वायव्येयन्नरागकम्।
सरोजं वाप्युत्तरतः स्वशक्त्या विन्यसेद्बुधः॥
पाषण्डिनो विकर्मस्थान्वैडालव्रतिकान् त्यजेत्।
सप्तम्यां भोजयेद्विप्रान्दिवास्वप्नञ्च वर्जयेत्॥
अनेन विधिना यस्तु कुर्य्याद्वै भद्रसप्तमीम्।
भद्रा ददाति सप्तम्यां भद्रन्तस्य व्रतं भवेत्*।
तस्य भद्राः सर्व्व एव गच्छन्ति ज्ञातयःसदा॥
तदग्रतः फलं तस्यां विधिनानेन दीयते।
व्योमभद्रमिति प्रोक्तं देवचिह्नं मनोरमम्॥
शालिपिष्टमयं प्रोक्तं चतुःकोणं मनोरमम्।
गव्येन सर्पिषा युक्तं खण्डशर्करसान्वितम्॥
चतुर्जातकचूर्णेन द्राक्षाभिश्च विशेषतः।
चतुर्जातकचूर्णनेति, एलालवङ्गपत्रकनागकेसरचूर्णेनेत्यर्थः॥
नालिकेलफलैश्चैव शुभगन्धैर्गणाधिप।

* इदं भद्रमिति प्रोक्तं षट्पत्राब्जं तु भूषण इति पुस्तकान्तरे पाठः।

मध्येन्द्रनीलं भद्रस्य न्यसेत् प्राज्ञः स्वशक्तितः॥
पुष्परागं मरकतं पद्मरागन्तथैव च।
अतोयमेचमाणिक्यं क्रमात्कोणेषु विन्यसेत्॥
प्रस्थमात्रं भवेद्भद्रं प्रस्थार्द्धं स्यात्त वा विभो।
अनेन विधिना कृत्वा देवस्य पुरतो न्यसेत्॥
वाचकायाथ वै दद्यादथवा भोजके स्वयम्।
अनेन विधिना यस्तु कृत्वा भद्रं प्रयच्छति॥
स हि भद्राणि संप्राप्य गच्छेद्गोपतिमन्दिरम्।
ब्रह्मलोकं ततो गच्छेद्यानारूढो न संशयः॥
तेजसा रविसङ्काशःकान्त्याचेयसमस्तथा।

आत्रेय,चन्द्रः

प्रभया गोपतेस्तुल्यस्तेजसा शङ्करस्य च।
तस्मादेत्य पुनर्भूमौ गोपतिः स्यान्न संशयः* ॥
प्रसादाद्गोपतेर्व्वीर भद्रवानभिजायते।
इत्येषा कथिता वीर भद्रानामेति सप्तमी॥
यामुपोष्य नरो वीर ब्रह्मलोकमवाप्नुयात्।
शृण्वन्ति च पठन्तीह कुर्व्वन्ति च गणाधिप॥
ते सर्व्वे चन्द्रमासाद्यां† यान्ति तद्ब्रह्म शाश्वतम्।

---

* सर्व्वगोपप्रपूजित इति पुस्तकान्तरे पाठः।

† भद्रमासाद्येति क्वचित् पाठः।

इति भविष्यपुराणोक्तं भद्रासप्तमीव्रतम् ।

———ooo———

सुमन्तुरुवाच ।

सूर्य्यभक्ता तु या नारी ध्रुवं सा पुरुषो भवेत् ।
स्त्री चैवाप्युत्तमं नाथं यत्कृत्वा शृणु साम्प्रतम् ॥
निक्षुभार्कव्रतं भानोः सदा प्रीतिविवर्द्धनम् ।
अवियोगकरं वीर धर्म्मकामार्थसाधकम् ॥
सप्तम्यामथ षष्ठ्यां वा संक्रान्तौ भानवे दिने ।
हविषा हविषा होमं सोपवासः समाचरेत् ॥
निक्षुभार्कस्य देवार्चां कृत्वा स्वर्णमयीं शुभाम् ।
राजतीं वाथ वार्च्चां वा स्थापयेच्च घृतादिभिः ॥
निक्षुभा, सूर्य्यपत्नी तया सहितोऽर्कः ।

हविषा हविषा, गव्यघृतेन ।

रूपनिर्माणं विष्णुधर्म्मोत्तरात् ।

कर्त्तव्यो निक्षुभार्कस्तु वारीकवचभूषितः ॥
रश्मयस्तस्य कर्त्तव्या वामदक्षिणहस्तयोः ॥
करयोरन्ययोस्तस्य कमले कमलासनः ।
एकचक्रे रथे चैव षडारे निक्षुभक्तितः ॥
चतुर्बाहुर्म्महातेजा रसनाभिर्व्विभूषितः ।
उपविष्टस्तु कर्त्तव्यः स देवोऽरुणसारथिः ॥
गन्धमाल्यैरलङ्कृत्य वस्त्रयुग्मैश्च शोभनैः ।
भक्ष्यभोज्यै रथैश्चैव विमानध्वजचामरैः ॥

भोजयेत्सूर्य्यभक्तांश्च भोजकांश्च तथा नृप।
भक्त्या च दक्षिणां दद्याद्भास्करः प्रीयतामिति॥
ताम्रपात्रे च कांस्ये वा शुक्लवस्त्रावगुण्ठितम्।
कृत्वायतनमध्ये तु प्रतिमामुपकल्पयेत्॥
कृत्वा शिरसि तत् पात्रं वितानच्छदशोभितम्।
ध्वजछत्रादिभिश्चैव ब्रध्नंस्त्वायतनं व्रजेत्॥
निक्षुभार्कदिनेशस्य व्रतमेतन्निवेदयेत्।
तत्पीठे स्थापयेत् पात्रं पुष्पशोभासमन्वितम्॥
प्रदक्षिणीकृत्य रविं प्रणिपत्य प्रसादयेत्।
सम्प्राप्यैतद्व्रतं पुण्यं शृणु यत् फलमाप्नुयात्॥
द्वादशादित्यसंकाशैर्म्महायानैर्नगोपमैः।
यथेष्टं वै रवेर्लोके सौरैः सार्द्धं प्रमोदते।
वर्षकोटिसहस्राणि कोटिवर्षशतानि च*॥
नन्दते च महाभागैर्व्विष्णुलोके महीयते।
ततः कर्म्मविशेषेण सर्व्वकामसमन्वितः॥
ब्रह्मलोकं समासाद्य परं सुखमवाप्नुयात्।
ब्रह्मलोकात् परिभ्रष्टः श्रीमान् सद्भिःप्रपूजितः॥
प्रजापतित्वमाप्नोति सुरासुरनमस्कृतः।
भोगानिह चिरं भुक्त्वा सोमलोके महीयते॥
सोमाच्चाप्ट्ट पुनर्लोकमासाद्येन्द्रसमो भवेत्।
इन्द्रलोकाच्च गान्धर्वलोकं प्राप्य स मोदते॥
गन्धर्वराजपतिना सह भोगैर्वसेत्सुखम्॥

---

* वर्षकोटि शतानि चेति पुस्तकान्तरे पाठः।

महारत्नप्रभावेन उपशोभितमद्भुतम्।
यत्तल्लोकमपि प्राप्तो यथा कामं प्रमोदते॥
यत्तल्लोकात् परिभ्रष्टः क्रीडते मेरुमूर्द्धनि।
स्थानानि लोकपालानां क्रमादागत्य मोदते॥
लोकालोकांस्तपर्य्यन्ते सर्व्वस्मिन् क्षितिमण्डले।
यत्र तत्र सुखी नित्यं तदशेषमवाप्नुयात्॥
धर्म्मार्थकाममोक्षांश्च राज्यं प्राप्य प्रमोदते।
आदित्यात् प्राप्यते भोगः सुभगो नात्र संशयः॥

इति भविष्यत्पुराणोक्तं निक्षुभार्कसप्तमीव्रतम्।

———ooo———

सुमन्तुरुवाच।

या तु षष्ठ्यां तु सप्तम्यां नियता व्रतचारिणी।
वर्षमेकन्तु कृत्वैवं* महालोकजिगीषया॥
वर्षान्ते प्रतिमां कृत्वा निक्षुभार्कातिविश्रुतां।
निक्षुभार्करूपनिर्माणं नियत व्रतोक्तं वेदितव्यम्॥
स्नानाद्यञ्च विधिं कृत्वा निक्षुभार्केति विश्रुतम्।
पूर्व्वोक्तांल्लभते कामान् पूर्व्वोक्तान् लभते गुणान्॥
जाम्बूनदमयैर्यानैः स्वर्गेन रमते चिरम्†।
गत्वादित्यपुरं रम्यं निखिलं विन्दते फलम्॥
सौरादिसर्व्वलोकेषु भोगान् भुक्त्वा यथेप्सितान्।
क्रमदागत्य लोकेऽस्मिन्राजानं पतिमाप्नुयात्॥

---

* वर्षमेकं न भुङ्क्ते च इति पुस्तकान्तरे पाठः।

† दिवि गन्धर्व्वशोभितैरिति पुस्तकान्तरे पाठः।

इति प्रथमम् ।

या नार्य्युपवसेदेवं कृष्णामेकान्तु सप्तमीं ।
सा गच्छेत्परमं स्थानं भानोरमिततेजसः ॥
वर्षान्ते प्रतिमाङ्कृत्वा शालिपिष्टमयीं शुभाम् ।
पीतानुलेपनैर्माल्यैः पीतवस्त्रैः प्रपूजयेत् ॥
पूर्वोक्तं निखिलं कृत्वा भास्कराय निवेदयेत् ।
सर्व्वभूमौ महीपालो धातुचामीकरप्रभः ॥
वर्षकोटिसहस्राणि सूर्य्यलोके महीयते ।
सौरादिसर्व्वलोकेषु भोगान् भुक्त्वा यथेप्सितान् ॥
क्रमादागत्य लोकेऽस्मिन् जनेशं विन्दते पतिम् ।
कुलीनं रूपसम्पन्नं सर्व्वशास्त्रविशारदम् ॥

इति द्वितीयम् ।

सप्तम्यां या निराहारा भवेदब्दनियन्त्रिता ।
गजं पिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत् ॥
विधाय राजतं पद्मं सुवर्णकृतकर्णिकम् ।
भक्त्या विन्यस्य तत्पृष्ठे सर्व्वं पूर्ववदाचरेत् ॥
कामतोऽपि कृतं पापं भ्रूणहत्यादि यद्भवेत् ।
तत्सर्व्वं गजदानेन क्षीयते नात्र संशयः ॥
महापद्मविमानेन नरो नारायणान्वितः ।
वर्षकोटिशतं पूर्णं सूर्य्यलोके महीयते ॥
सौरादिसप्तलोकेषु* भोगान् भुक्त्वा यथेप्सितान् ।

---

* सौरलोकादिलोकेष्विति पुस्तकान्तरे पाठः ।

क्रमादागत्य लोकेऽस्मिन् जनेयं विन्दते पतिं ॥
कुलीनं रूपसम्पन्नं* सर्व्वशास्त्रविशारदम्।
सर्व्वलक्षणसम्पन्नं धनधान्यसमन्वितम् ॥
महोत्साहं महावीर्यं महासत्वं महाबलम्।

इति तृतीयम्।

कृष्णपक्षे तु माघस्य सप्तम्यां या दृढव्रता।
वर्षैकमुपवासेन सर्व्वभोगविवर्जिता ॥
वर्षान्ते सर्व्वगन्धोत्थं निम्बभार्कं निवेदयेत्।
सुवर्णमणिमुक्ताढ्यं भोजयित्वा द्विजोत्तमम्।
इतिहासविदम्मान्यं वाचकं भार्य्यया सह ॥
सुविचित्रैर्महायानैर्दिव्यगन्धर्व्वशोभितैः।
क्रीड़ेद्युगशतं सार्द्धं सूर्य्यलोके नराधिप ॥
प्रभया सूर्य्यसङ्काशस्तेजसा हरिसन्निभः।
यथेष्टं भानवे लोके भोगान् भुक्त्वा यथेप्सितान् ॥
क्रमादागत्य लोकेऽस्मिन् राजा भवति धार्म्मिकः।
य एवं कुरुते राजन् व्रतं पापभयापहम् ॥
निम्बमार्कमिदं पुण्यं स याति परमं पदम्।
वर्षमेकं महाबाहो श्रद्धया परयान्वितः ॥
वर्षान्ते भोजयेद्वीर वाचकं भार्य्यया सह।
भोजयित्वा तु दाम्पत्यं महाभारतवाचकम् ॥
पूजयेद्भक्तिमाल्यैश्च वासोभिर्भूषणैस्तथा।

---

* सर्व्वलक्षणसम्पन्न मिति पुस्तकान्तरे पाठः।

ज्ञात्वा ताम्रमये पात्रे वस्त्रपूर्णेऽस्वलङ्कृते ।
निम्बभार्कन्तु सौवर्णन्द्द्यात्ताभ्यां स्वशक्तितः ॥
निम्बभा ब्राह्मणी ज्ञेया वाचकोऽर्कः प्रकीर्त्तितः ।

इति भविष्यत्पुराणोक्तं निम्बभार्कचतुष्टयम् ।

——0*0——

सप्ताश्वतिलक उवाच ।

वैनतेय शृणुष्व त्वं विधानं सप्तमीव्रतम् ।
एतद्धि परमं गुह्यं रवेराराधनं परम् ॥
सिद्धार्थकैस्तु प्रथमा द्वितीया चार्कसम्पुटैः ।
तृतीया मरिचैःकार्य्या चतुर्थी निम्बसप्तमी ॥
षट्युता पञ्चमी कार्या षष्ठी च फलसप्तमी ।
सप्तम्यनोदना वीर सप्तमी परिकीर्त्तिता ॥
षट्युता इति सिद्धार्थकादिषड्भिः प्रकारैर्युता* ।
इत्येताः सप्तसप्तम्यः कर्त्तव्या भूतिमिच्छता ॥
तथा चानुक्रमेणासाङ्करणं कथयाम्यहम् ।
माघे वा मार्गशीर्षे वा कार्य्या शुक्ला तु सप्तमी ॥
न च स्यान्नियमभ्रंशः पञ्चमासकृतो भवेत् ।
आर्त्तिवशादन्यस्मिन् मासे पञ्चेव कार्य्येत्वयं: ।
अर्द्धप्रहरशेषे तु कुर्य्याद्दै दन्तधावनम् ॥
अर्द्धप्रहरशेषे पूर्व्वंदिनेऽवशिष्टार्द्धप्रहरे ।

---

* षट् युता षड्भिः सर्षपार्कमरिचनिम्बफलपयोभिरिति सप्त सप्तमीःद्रव्यैः युता सम्पुट शब्दावच्छमाच सप्तके व्याख्याता इति पाठान्तरं ।

तत्रैव दन्तकाष्ठानां फलन्तव वदाम्यहम्* ॥
मधूके पुत्रलाभः स्याद्राजवृक्षाज्जयं लभेत्† ।
गुरुतां याति सर्व्वत्र‡ आढ़रूपकसम्भवे ॥
अशोकेन विशोकः स्यादश्वत्थवदरे यशः ।
श्रियं प्राप्नोति विपुलां शिरीषस्य निषेवणात् ॥
प्रियङ्गुं सेवमानस्य सौभाग्यं परमं भवेत् ।
अभीप्सितार्थसिद्धिः स्यान्नित्यं प्लक्षनिषेवणात् ॥
वदर्य्याश्च वृहत्याश्च चिप्रं रोगात् प्रमुच्यते ।

वृहती, डोरली ।

ऐश्वर्य्यश्च भवेद्बिल्वे खदिरे धनसञ्चयः ।
शत्रुचयं कदम्बे च अर्थलाभोतिमुक्तके ॥

अतिमुक्तः कारङ्गुटी ॥

चूतेन नृपवश्यं स्यात्सौभाग्यं पनसेन तु ।
आयुःस्यात् पङ्कजश्चैव अर्थलाभोऽविमुक्तये ।

अविमुक्तः, रापशालः ।

न पाटितं समश्नीयाद्दन्तकाष्ठञ्च सव्रणम् ।
नचार्द्धशुष्कं शुक्रञ्चा न चैव त्वग्विवर्जितं ॥
वितस्तिमात्रमश्नीयाद्दीर्घं ह्रस्वं विवर्जयेत् ।
उदङ्मुखः प्राङ्मुखो वा सुखासीनोऽथ वाग्यतः ॥

---

* सप्तम्यां ये तु ते दन्ता कामिकास्तान्वदाम्यहमिति पुस्तकान्तरे पाठः ।

† अर्जुने भार्गवी श्रियतेति क्वचित् पाठः । तत्र अर्जुनः, ककुभः । भार्गवी, लक्ष्मीरिति पाठान्तरं ।

‡ ख्यातिप्रधानतां यातीति पुस्तकान्तरे पाठः ।

कामं यथेष्टं हृदये कृत्वा समभिमन्त्र्य च।
मन्त्रेणानेन मतिमानश्नीयाद्दन्तधावनम्॥
वरं दत्त्वाभिजानामि कामदश्च वनस्पते।
सिद्धिं प्रयच्छ मे नित्यं दन्तकाष्ठ नमोस्तु ते॥
त्रीन् तथा परिजप्यैव भक्षयेद्दन्तधावनम्।
पश्चात् प्रक्षाल्य तत्काष्ठं शुचौ देशे विनिक्षिपेत्॥
ऊर्द्ध्वं निपतिते सिद्धिस्तथा वाभिमुखस्थिते।
अतोन्यथा निपतिते आनीय पुनरुत्सृजेत्॥
पुनस्तथा निपतितं तद्वथा दन्तधावनम्*।
असिद्धिं तु विजानीयात् न ग्राह्या सा तु सप्तमी॥
ब्रह्मचारी तु तां रात्रिं स्वप्यात् मङ्गल्यसेवया।
विभ्रद्वासोऽनुपहतं शुचिराचारसंयुतः॥
तस्यां रात्र्यामतीतायां प्रातरुत्थाय वै खग।
प्रक्षालयेत् मुखं धीमानश्नीयाद्दन्तधावनम्॥
उपविश्य शुचिर्भूत्वा प्रणम्य शिरसा रविम्।
जपं यथेष्टं कृत्वा तु जुहुयाच्च हुताशनम्॥
ततोऽपराह्णसमये स्नात्वा शृङ्गोद्भवांबुभिः।
विधिपूर्व्वमुपस्पृश्य मौनी शुक्लाम्बरः शुचिः॥
पूजयित्वा तु विधिना भक्त्या देवं दिवाकरम्।
स्वपेद्देवस्य पुरतो गायत्रीजपतत्परः॥
अतःपरं प्रवक्ष्यामि यैर्यैर्यत् फलमादिशेत्।
स्वप्नैर्दृष्टैस्तु सप्तम्यां पुरुषो नियतव्रतः॥

---

* पराङ्मुखं यदि भवेत् त्रीन् वारान् दन्तधारनमिति पाठान्तरं।

समाप्य विधिवत् सर्व्वाञ्जपहोमादिकां क्रियाम् ।
भूमौ शय्यां समास्थाय देवदेवं विचिन्तयेत् ॥
अत्र सुप्तो यदि नरः पश्येदुद्यद्दिवाकरम् ।
शक्रध्वजं वा चन्द्रं वा तस्य सर्व्वाः समृद्धयः ॥
वृषभं गजगोवत्सवीणां लोकाननामयान् ।
शृङ्गारममलादर्शंकरकामौ सुखोत्सवः ॥
रुधिरस्य स्रुतिः सेकःपरमैश्वर्य्यकारकः ।
सप्तवृत्ताधिरोहश्च चिप्रमैश्वर्य्यमावहेत् ॥
दोहने महिषीं सिंहीं गोधेनूनां करिश्वकः ।
गन्धर्व्वानां राज्यलाभो लाभस्तु द्युमणेर्गतिः ।
अभिपत्यस्वयं खादेत्सिंहङ्गाम्भुजगानपि ॥
स्वाङ्गमस्थि हुताशम्वा सुरापानं तथा खग ।
हैमे वा राजते चापि यो भुङ्क्ते पायसन्नरः ॥
पात्रे तु पद्मपात्रे वा तस्यैश्वर्य्यम्परं भवेत् ।
द्यूते चापि च वादे वा विजयो हि सुखावहः ॥
गात्रस्य च प्रज्वलनं शिरोवेधश्च भूतये ।
माल्याम्बराणां शुक्लानां धारणं पशुपच्चिणाम् ॥
सदालाभं प्रशंसन्ति तथा विष्ठानुलेपनम् ।
हययाने भवेत् चेमं रथयाने प्रजागमः ॥
नानाशिरोभच्चणाच्च हस्तस्थां कुरुते श्रियम् ॥
अगम्यागमनं लब्धं वेदाध्ययनमुत्तमं ।
देवा द्विजवरा वीरा गुरुवृद्धतपस्विनः ॥
यद्वदन्ति नरं स्वप्ने सत्यमेवेति तद्विदुः ।

प्रशस्तं दर्शनं तेषामाशीर्व्वादः खगाधिप ।
राज्यं स्यात् स्वशिरःच्छेदे धनं बहुतरं भवेत् ॥
रुदिते* भक्ष्यसम्प्राप्तौ राज्यं निगडबन्धनैः ।
पर्व्वतं तुरगं सिंहं वृषभङ्गजमेव हि ॥
महदैश्वर्य्यमाप्नोति विमानं योऽधिरोहति ।
ग्रसमाना ग्रहास्तारा महीञ्च परिवर्त्तयेत् ॥
उन्मूलयन् पर्व्वतांश्च राजा भवति भूतले ।
देहलीक्रान्तरत्नानां वेष्टनञ्च खगाधिप ॥
यानं समुद्रसरितामैश्वर्य्यसुखकारकम् ।
सरितं चाम्बुधिं वापि तीर्त्वा पारं प्रयाति यः ॥
तस्मै फलं भवेद्वीरः सकलं कमलोपमम् ।
अद्रिं लङ्घयतश्चापि भवत्यर्थो जयस्तथा ॥
मांसमामं तथा विष्ठां फलं नानाविधं खग ।
भवत्यर्थागमः शीघ्रं कृमिर्व्वा यदि भक्षयेत् ॥
अङ्गनानां† कुरूपाणां लाभो दर्शनमेव च ।
संयोगश्चैव माङ्गल्यैरारोग्यं धनमेव च ।
ऐश्वर्य्यं राज्यलाभो वा यस्मिन् स्वप्न उदाहृतम् ॥
तत्र स्यान्नाच सन्देहस्तैस्तैर्दृष्टैर्व्विहङ्गम ।
दृष्ट्वा तु शोभनं स्वप्नं न भूयः शयनं व्रजेत् ॥
प्रातश्च कीर्त्तयेत् स्वप्नं यथा दृष्टं खगाधिप ।
प्राज्ञे भोजकविप्रेभ्यः सुहृदां देवतासु वा ॥

---

* रुधिर इति पाठान्तरं।

† कुरूपाना मिति पुस्तकान्तरे पाठः।

ततो मध्याह्नसमये स्नातः प्रयतमानसः।
तथैवदेवं विधिवत् पूजयित्वा दिवाकरम् ॥
सम्यग्जपकृतो मौनी ततो हुतहुताशनः।
निष्क्रम्य देवायतनाद्भोजयेद्ब्राह्मणांस्ततः ॥
रत्नानि चैव वस्त्राणि तथा चैव सुगन्धयः।

सुगन्धिमाल्यानि हविष्यमन्नं
पयस्विनीं गामथ वाचकाय।
देयानि यावच्च भवेदभीष्टम्
भवेद्दलाभो यदिवाचकानां ॥
विप्रा यदर्हन्ति विशिष्टबुद्ध्या
ये मन्त्रवेदाहतपातका* वै।
ये वापि सामाध्ययने नियुक्ताः
यजुर्व्विदो वापि ऋचां विधिज्ञाः ॥

कृत्वैवं सप्तसप्तम्यो नरो भक्तिसमन्वितः ॥
श्रद्दधानोनसूयश्च स कथं नाप्नुयात् फलम्† ।
दशानामश्वमेधानां कृतानां यत् फलं भवेत् ॥
तत् फलं सप्तसप्तम्यां कृत्वा प्राप्नोति मानवः।
दुःप्रापं नास्ति तद्वीर सप्तम्यां यन्न लभ्यते।
न च रोगोस्त्यसौ लोके य एताभिर्व्विशाम्यते ॥
कुलानि यानि रौद्राणि दुस्थितानीह यानि च।

---

* कृत पावकेति कचित् पुस्तकान्तरे पाठः।

† सकलं प्राप्नुयात् फलमिति वा पाठः।

शाम्यन्ते तानि सर्व्वाणि गरुड़ेनेव पन्नगाः॥
व्रतनियमविशेषैः सप्तमी सप्त चैवं
विधिवदिह हि कृत्वा मानवो धर्म्मशीलः।
श्रुतधनफलयोगैः सौख्यपुण्यैरुपेतो
व्रजति तदनुलोकं शाश्वतं तीक्ष्णरश्मेः॥

एष दन्तधावनादिब्राह्मणभोजनान्तः सप्तानां सप्तमीनां साः विधिः॥

इति भविष्यत्पुराणोक्त-सिद्धार्थकादिसप्तमीव्रतम्॥

———000———

ब्रह्मोवाच।

संपूज्य विधिवद्देवं पुष्पधूपादिभिर्बुधः।
यथाशक्ति ततः पश्चान्नैवेद्यं भक्तितो न्यसेत्॥
पुष्पाणां प्रवरा जातिर्धूपानां विजयः परः।
गन्धानां कुङ्कुमं श्रेष्ठं लेपानां रक्तचन्दनं॥
दीपदाने घृतं श्रेष्ठं नैवेद्यं मोदकं परम्।
एतैस्तुष्यति देवेशः सान्निध्यं चापि गच्छति॥
एवं संपूज्य विधिवत् कृत्वा चापि प्रदक्षिणम्।
प्रणम्य शिरसा देव देवदेवं दिवाकरम्॥
सुखासीनस्ततः पश्येद्रवेरभिमुखस्थितः।
एवं सिद्धार्थकं कृत्वा हस्तेपानीयसंयुतः॥
सिद्धार्थकं पश्येदित्यन्वयः।
कामं यथेष्टं हृदये कृत्वा तं वाञ्छितं नरः।

...त् सन्तोषयन् विप्रमस्पृशन् दशनैः सकृत् ॥

...रात्राविति शेषः ।

द्वितीयायान्तु सप्तम्यां द्वौ गृहीत्वा तु सुव्रत ।
तृतीयायां तु सप्तम्यां पातव्यास्त्रयएव हि ॥
चतुर्थ्यां वापि चत्वारः पञ्चम्यां पञ्च एव च ।
षट् पिबेच्चापि षष्ठ्यां तु इतीयं वैदिकी श्रुतिः ॥
सप्तम्यां वारिसंयुक्तां सप्त चैव पिबेन्नरः ।

वारिशब्दः द्रववाची पञ्चगव्यस्य वक्ष्यमाणत्वात् ।

आदित्यप्रभृति ज्ञेयो मन्त्रोऽयमभिमन्त्रणे ॥
सिद्धार्थकत्वं लोके हि सर्व्वत्र श्रूयते सदा ।
तथा ममापि सिद्धार्थ्यमर्थिनः कुरु तद्रवे ॥
ततो हविरुपस्पृश्य जपं कुर्य्याद्यथोचितं ।
हुताशं चैव जुहुयाद्विधिदृष्टेन कर्म्मणा ।
एवमेवापराः कार्य्याः सप्तम्यः सप्त सर्व्वदा ॥

एवमर्कसंपुटाद्येकोत्तरवृद्ध्या पराः षट् सप्तम्यः प्रत्येक कार्याः तन्मन्त्रास्तु वक्ष्यमाणास्त्वर्कसप्तमीषूक्ता विज्ञेयाः ।

उदकप्रभृतिं यावत् पञ्चगव्येन सप्तमी ।
एकं तोयेन सहितं द्वौ वापि घृतसंयुतौ ॥
तृतीयं मधुना सार्द्धं दध्ना पि च चतुष्टयम् ।
युक्तास्तु पयसा पञ्च सट् च गोमयसंयुताः ॥
पञ्चगव्येन वै सप्त पिबेत् सिद्धार्थका द्विज ।
अनेन विधिना यस्तु कुर्य्यात् सर्षपसप्तमीं ॥

बहुपुत्रो बहुधनः सिद्धार्थश्चापि सर्व्वदा ।
इह लोके नरो भूत्वा प्रेत्य याति विभावसुम् ॥

इति श्रीभविष्यत्पुराणोक्तानि सर्षपसप्तमीव्रतानि ।

———०००———

सुमन्तुरुवाच ।

स्वयं या कथिता पूर्व्वमादित्येन खगस्य तु ।
अरुणस्य महावाहोः सप्तम्यः सप्त पूजिताः ॥
अर्कसम्पुटकैरेका द्वितीया मरिचैस्तथा ।
तृतीया निम्बपत्रैश्च चतुर्थी फलसप्तमी ॥
अनोदना पञ्चमी स्यात् षष्ठी विजयसप्तमी ।
सप्तमी कामिकी ज्ञेया विधिना मां निबोध मे ॥
शुक्लपक्षे रविदिने प्रवृत्ते चोत्तरायणे ।
पुन्नामधेये नक्षत्रे गृहीत्वा सप्तमीव्रतम् ॥
सर्व्वासु ब्रह्मचारी स्यात् शौचयुक्तो जितेन्द्रियः ।
सूर्य्यार्च्चनपरो दान्तो जपहोमपरस्तथा ॥
पञ्चम्यामेकभक्तन्तु कुर्य्यान्नियतमानसः ।
षष्ठ्यान्नमैथुनं गच्छेत् मधुमांसञ्च वर्ज्जयेत् ॥

नक्तं कुर्व्वन्निति शेषः ।

अर्कसम्पुटकैरेकां तथान्यां मरिचैर्नयेत् ।
तथापरां निम्बपत्रैः फलाख्यां फलभक्षणात् ॥

अनोदनो निराहारः उपवासी यथाविधि।
अहोरात्रं वायुभक्षः कुर्य्याद्विजयसप्तमीं॥
तथैताः सप्तकृत्वा तु प्रतिमासं विचक्षणः।
एताः षट् प्रत्येकं सप्तकृत्वे त्यर्थः।
कुर्य्याद्विधानं विधिवत् ततः कुर्व्वीत कामिकीं।
आसां गृहीत्वा* नामानि पात्रेष्वथ पृथक् पृथक्॥
तानि सर्व्वाणि पात्राणि क्षिपेदभिनवे घटे।
श्वेतचन्दनदिग्धाङ्गे माल्यदामोपशोभिते॥
धनधान्यहिरण्याद्यैः शुद्धकुन्देन्दुसन्निभैः।
अश्वत्थाशोकपत्राद्यैरर्द्ध्योदनसमन्वितैः॥
तदर्थं यो न जानीते बालोवान्योपि वै नरः।
तेनाभ्युद्धारयेदेकं तत् कुर्य्यादविचारयन्॥
तेनैव विधिना या तु प्रतिमासं परन्तप।
सप्तैवयावत् संप्राप्ता विज्ञेया सा तु कामिकी॥
इत्येताः सप्तसप्तम्यः स्वयं प्रोक्ता विवस्वता।
कुर्व्वीत यो नरो भक्त्या स यात्यर्कसदो नृप॥
श्वेतचन्दनदिग्धाङ्गे माल्यदामोपशोभिते।
सप्तधान्यहिरण्याद्यैःशुद्धकुन्देन्दुसन्निभे॥
अश्वत्थाशोकपत्राद्यैः दध्योदनसमन्विते।
अर्कसम्पुटकैर्व्वित्तममलं साप्तपौरुषम्॥
मरिचैः सङ्गमःस्याद्वै प्रियपुत्रार्थिनः सदा।
सर्व्वरोगाः प्रणश्यन्ति निम्बपत्रैर्न संशयः॥

---

* लिखित्वेति पुस्तकान्तरे पाठः।

फलैश्च पुत्रपौत्रैश्च दौहित्रैश्चापि पुष्कलैः।
अन्नोदनाद्यन्नं धान्यं सुवर्णं रजतं तथा॥
तथा* यशो हिरण्यञ्च आरोग्यं-सन्ततिर्नृप।
उपोष्य विजयं शत्रून् राजा जयति नित्यशः।
साधयेत्कामदा कामान् विधिवत्पर्य्युपासिता॥
पुत्रकामो लभेत्पुत्रमर्थकामोऽर्थमक्षयम्।
विद्याकामो लभेद्विद्यां राज्यार्थी राज्यमाप्नुयात्।
कृत्स्नान् कामानं ददात्येषा कामदा कुलनन्दन॥
नरो वा यदि वा नारी यथोक्तं सप्तमीव्रतम्।
करोति नियतात्मा चेत् स याति परमां गतिं॥
मोहात् प्रमादाल्लोभाद्वा व्रतभङ्गोभवेद्यदि।
तदा त्रिरात्रं नाश्नीयात् कुर्य्यात् वा केशमुण्डनं॥
प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्।
सप्तैव यावत् संप्राप्ता सप्तम्यः सप्तसंयुताः॥

सप्तसंयुताः, सप्तगुणिता एकोनपञ्चाशदित्यर्थः।

अभ्यर्च्च्य सूर्य्यं सप्तम्यां माल्यधूपादिभिर्नरः॥
भोजयित्वा द्विजान् भक्त्या प्राप्नुयात्स्वर्गमक्षयम्।
सप्तम्यां विप्रमुख्येभ्यो हिरण्यं यः प्रयच्छति॥
स तदक्षयमाप्नोति सूर्य्यलोकञ्च गच्छति।

---

* पशु हिरण्यञ्चेति पाठान्तरं।

इति भविष्यत्पुराणोक्तः सप्तसप्तसप्तमी कल्पः।

———ooo———

सुमन्तुरुवाच।

अथ अर्कसम्पुटकादिसप्तमीसप्तकम्

समुद्रेष्ववगाह्नं पुनरेकैव सा विप्रणोति

इत्येवं सप्तमीकल्पः समासात् कथितस्तव।
विस्तरन्ते पुनर्वच्मि शृणुष्वेकमना भृशम्॥
फाल्गुनामलपचस्य षष्ठ्यां सम्यगुपोषितः।
पूजयेद्भास्करं स्नात्वा पुष्पगन्धानुलेपनैः॥
अर्कपुष्पैर्महाबाहो गुग्गुलेन सुगन्धिना।
सितेन भूषयन् देवं चन्दनेन दिवाकरम्॥
गुडोदनञ्च नैवेद्यं पलानां त्रितयं रवेः।
एवं पूज्य दिवा भानुं रात्रौ तस्याग्रतः स्वपेत्॥
जपेद्भूमौ परं जप्यमानिद्रागमनाद् बुधः।
ध्यायमानो महात्मानं देवदेवं दिवाकरम्॥
षडक्षरेण मन्त्रेण जपपूजां समाहितः।
जपहोमं तथा पूजां शतशब्देन सर्व्वदा॥
सावित्र्या श्च जपं पूर्व्वं कृत्वा शतसहस्रशः।
पश्चात्सर्व्वं प्रकुर्व्वीत जपादिकमनाकुलः॥
श्रेयोऽर्थमात्मनो वीर धनपुत्रार्थसिद्धये।
ॐ भास्कराय विद्महे सहस्ररश्मिं धीमहि
तन्नः सूर्य्यः प्रचोदयात्।

इति सावित्री।

जप एष परः प्रोक्तः सप्तम्यां भानुना स्वयं ॥
जप्ता सकृत् भवेत् पूतो मानवो नात्र संशयः।
प्रभाते त्वथ सप्तम्यां स्नातोनियतमानसः॥
पूजयेद्भास्करं भक्त्या पूर्व्वोक्तविधिना नृप।
अथवा भोजयेद्वापि ब्राह्मणान् भक्तितो नृप॥
दिव्यैर्भोगैश्च विधिवत् भास्करप्रीतये पुमान्*।
वित्तशाठ्यं न कुर्व्वीत भोजनार्हांस्तु भोजयेत्॥
सम्भोजयेत्तथा सौरान् सौरादन्यत्र भोजयेत्।
घटी भोज्यो भवेद्विप्रः सप्तमीं कुरुते च यः॥
सौरतन्त्रेषु कुशलः स भक्तो वै दिवाकरे।
एते भोज्या द्विजा राजन् आदित्येन समासतः॥
प्रोक्ताः कुरुकुलश्रेष्ठ तथाभोज्यान् शृणुष्व मे।
परभार्य्यारतिर्य्यस्तु कुष्ठरोगवहश्च यः॥
अथान्यदेवताभक्ताः तथा नक्षत्रसूचकः।
परापवादनिरतोयश्च देवलकस्तथा।
एते ह्यभोज्या विप्रेषु स्वयं देवेन निर्म्मिताः।
घटते तु तयीं विद्यां ब्राह्मणानां कदम्बके॥
घटेत्युक्ता तु सा राजन् अतः सानुघटा स्मृता।
साघटा विद्यते यस्य सघटीत्युच्यते द्विजः॥
ब्रह्मक्षत्रविशां वीर शूद्राणाञ्च कदम्बके।

---

* भक्ष्यभोज्यैरनेकश इति पुस्तकान्तरे पाठः।

शृण्वतां विधिवत्पुण्यं भक्त्या पुस्तकवाचनं॥
इतिहासनिवद्धा* या सा समस्येति भानुना।
प्रोच्यते कुरुशार्दूल स्वयमाकाशगामिना॥
कर्त्ता तस्या भवेद्यस्तु समस्याकारकोमतः।
स विप्रो राजशार्दूल स द्विष्टि भास्करस्य तु॥
जयोपजीवी व्यासस्य समस्याजीवकस्तथा।
यान्येतानि पुराणानि सेतिहासानि भारत॥
जयेतिकथितानीह स्वयं देवेन भानुना।
एतानि वाचयेद्यस्तु ब्राह्मणो ह्युपजीवति॥
जयोपजीवी स ज्ञेयो वाचकस्तु तथा नृप।
समाख्या यत्र नो भक्त्या प्रीतये भास्करस्य तु॥
आरुणेयादिशास्त्राणि समाख्यतिलकं तथा।
यस्तु जानाति सौराणि स विप्रः सौरतन्त्रवित्॥
जयोपजीवी व्यासस्य समस्याजीविकस्तथा।
पूजयेत्सततं यस्तु पूजयेत् भास्करं नृप॥
स याति परमं स्थानं यत्र पश्यन्ति सूरयः।
भोजकस्तु यथा राजन्यथादेवो दिवाकरः॥
स ज्ञेयो भास्करेणोक्तो भोजनीयः प्रयत्नतः।
भोजनं निन्दयेद्यस्तु न च तं पूजयेत्तथा॥
ज्ञेयोन्यदेवताभक्तः स विप्रः कुरुनन्दन।
मुण्डो व्यङ्गी तथा गौरः शङ्खपद्मधरस्तथा॥

---

* इतिहासनिवद्धायां सा समस्येति सद्विज इति पुस्तकान्तरे पाठः।

यस्य याति गृहे राजन् भोजको मानवस्य तु ।
तस्यायान्ति गृहं देवाः पितरो भास्करस्तथा ॥
ब्राह्मणो यश्च राजेन्द्र वृत्त्या कर्म्म करोति वै ।
देवतायतनेष्वेव देवानां पूजनं तथा ॥
साधिपत्यं भक्षयन्तु नैवेद्यञ्च परन्तप ।
स विज्ञेयो देवलोको ब्राह्मणो ब्राह्मणाधमः ॥
नाधिकारोऽस्ति विप्राणां भौमानां देवपूजने ।
वृत्त्या भरतशार्दूल आधिपत्ये विशेषतः ॥
देवालयेषु सर्व्वेषु वर्जयित्वा शिवालयम् ।
देवानां पूजने राजन् अग्निकार्य्येषु वा विभो ॥
अधिकारःस्मृतो राजन् लोकानाञ्च न संशयः ।
पूजयन्तस्तु देवांस्तु प्राप्नुवन्ति पराङ्गतिम् ।
नैवेद्यं भुञ्जते यस्मात् भोजयन्तीव भास्करम् ॥
पूजयन्ति च वै देवान् दिव्यत्वं तेन ते गताः ।
पूजयित्वा तु वै देवान् नैवेद्यं भुञ्जते विभो ॥
यान्ति ते परमं स्थानं यत्र देवो दिवाकरः ॥
द्वावेव तु प्रियौ राजन् भास्करस्य द्विजौ नृप ॥
वाचको भोजकश्चैव तावेवोत्तमतां गतौ ।
स्वयं गत्वा गृहं भक्त्या पाणिभ्यां पादमालभेत् ॥
ब्रवीति च तथा विप्र प्रसादं कुरु मे विभो ।
भास्करप्रीतये विप्र भोजनं भुङ्क्ष्व मे गृहे ॥
येन मे देवास्तृप्यन्ति त्वयि तृप्ते दिवाकरे ।
ब्राह्मणश्चापि तं ब्रूयात् क्षणे सति महामते ॥

एवं करिष्ये श्रेयोऽर्थमात्मनस्तव वा विभो।
इत्यामन्त्र्य ततो गच्छेत् स्वगृहं कुरुनन्दन॥
तथापराह्ण* समये भक्त्या देवं दिवाकरम्।
हुत्वाथ पावकं राजन् भोजयेत् ब्राह्मणांस्ततः॥
शाल्योदनं तथा मुद्गान् सुगन्धघृतमेव च।
अपूपान् गुड़पूर्णांश्च पयोदधि तथा गुड़म॥
एतैस्तु तृप्तिमायाति भास्करोऽन्नैस्तु सप्तधा।
वर्षाणि भरतश्रेष्ठ नात्र कार्य्या विचारणा॥
शियुकुन्दं तथाऽत्यम्लं राजमासास्तथैव च।
कुलोत्थकान् मसूरांश्च तिलाश्चाणक्यमेव च।
एतान्न भास्करे दद्याद्यदीच्छेच्छ्रेय आत्मनः॥
दुर्गन्धं यच्च कटुकं अत्यम्लं भास्करस्य च।
विमिश्रां स्तदुलांश्चापि नो दद्याद्भास्कराय वै॥
इत्थं भोज्य द्विजान्† सर्व्वान् भक्षयेत्सर्व्वसम्पुटम्।
प्रणम्य शिरसा देवमुदकेन समन्वितः॥
निष्क्रम्य नगराद्राजन् गत्वा पूर्व्वोत्तरां दिशम्।
नात्युच्छ्रितं नातिनीचं शुचौ देशेऽर्कमुत्तमम्॥
जातं दृष्ट्वा महाबाहो पूजयित्वा खखोल्कतः।

खखोल्कत इति खखोल्कमन्त्रेण। तद्यथा खखोल्काय नमः इति पूर्व्वोत्तरगतायां वै तस्य साभिभूमीयायां शाखायां

---

* तथापराह्ण संपूज्यपूजेति पाठः।

† प्राशयेद्दासं पुटमिति पुस्तकान्तर पाठः।

अग्रगते पत्रेसुसूक्ष्मपल्लवाश्रिते संश्लिष्टे पृथग्भूते गृहीत्वा गृहमाव्रजेत् । द्विवचनप्रयोगात् पत्रद्वयायतनं प्रतीयते ।

स्नातः पूज्य विवस्वन्तमर्कपुष्पैः खखोल्कतः ।
ब्राह्मणान् भोजयित्वा तु अर्कोमे प्रीयतामिति ॥
प्राश्य मन्त्रेणार्कपुटं ततो भुञ्जीत वाग्यतः ।
देवस्य पुरतोवीर अस्पृशन् दशनैः पुटं ॥
ओं अर्कसंपुट भद्रं ते सुभद्रंमेस्तुवै सदा ।
ममापि कुरु भद्रं वै प्राशनाद्वित्तदोभव ॥
इमं मन्त्रं जपेद्राजन् जपन्नर्कं महीपते ।
स्थित्वा पूर्व्वमुखः प्रह्वो वारिणा सहितं नृप ॥
प्राश्य भुङ्क्ते च यो राजन् स याति परमम्पदम् ।
अनेन विधिना भक्त्या कर्त्तव्या सप्तमी सदा ॥
वर्षं यावन्महाबाहो प्रीतयेऽर्कस्य श्रद्धया ।
यश्चैमां सप्तमीं कुर्य्यात् भास्करप्रीतये नृपः ॥
तस्याक्षयं भवेद्वित्तमचलं साप्तपौरुषम् ।
कृत्वेमां सिद्धिमायातः कौथुमिः सामगः पुरा ॥
कुष्ठरोगाच्च वै मुक्तो जपन् साम महामतिः ।
बृहद्दल्कोऽथ जनको याज्ञवल्क्योऽथ कृष्णजः ॥

कृष्णजः शाम्बः ।

अनयाप्यर्कमाराध्यागतोऽर्कसात्मतां नृप ।
इयं धन्यतमा पुण्या सप्तमी पापनाशिनी ॥
पठतां शृण्वतां राजन् कुर्व्वताञ्च विशेषतः ।

तस्मादेषा सदा कार्य्या विधिवच्छ्रेयसे नृप।
अर्कप्रिया महाबाहो महापातकनाशिनी ॥

इति भविष्यत्पुराणोक्तार्कसम्पुटसप्तमीव्रतम।

———000———

सुमन्तुरुवाच।

तथा संपूज्य देवेशं भानुं कामप्रदं नृप*।
भोजयित्वा यथाशक्ति ब्राह्मणांश्च विशेषतः ॥
सप्तम्यां प्राशयेच्चापि मरीचं मनुजाधिप!।
गृहीत्वामरीचशतमव्रणं सुदृढं परं ॥
मरीचं प्राशयेद्राजन् मन्त्रेणानेन वाग्यतन्।
ॐ खखोल्काय स्वाहा।
प्रीयतां प्रियसङ्गदोभव स्वाहा।
इति सम्प्रार्थ्य मरीचं, ततो भुञ्जीत वाग्यतः।
प्रियसङ्गमवाप्नोति तत्क्षणादेव नान्यथा ॥
इतीयं सप्तमी पुण्या प्रियसङ्गमदायिनी।
यः कुर्य्यादुत्सवं वीर वियोगं स न गच्छति ॥
पुत्रादिभि नरश्रेष्ठ प्रजापतिरभाषत।
कुरु तस्मान्महा वाहोतामेतां प्रियदायिनीं ॥
उपोष्य इन्द्रोविधिवत् पुरा मारिचसप्तमीम् ॥
संयोगं गतवान् वीर सहस्रांशुधिपः पुरा।
रामपत्नानलस्यापि दमयन्त्या सहापि च।
रामोपि सीतया सार्द्धं उपोष्यैतां नराधिप ॥

* एतन विधिना नृप इति पुस्तकान्तरे पाठः।

इति भविष्यत्पुराणोक्तं मरीचसप्तमीव्रतम् ।

———000———

सुमन्तुरुवाच ।

तृतीयां सप्तमीं वीर शृणुष्वैकमना नृप ।
निम्बपत्रैः स्मृता या तु पापघ्नी* पापनाशिनी ॥
तथार्चनविधिं वान्यं येन पूजयते रविम् ।
देवदेवं गदापाणिं शङ्खचक्रगदाधरम् ॥
तथार्चनविधिं वच्मि मन्त्रोद्धारं निबोध मे ।
सर्व्वपापहरं पुण्यं सर्व्वरोगविनाशनम् ॥

ॐ खखोल्काय नमः । मूलमन्त्रः विदि विव शिरः । ओं ज्वल ठठ शिखा । ओं सहस्रधाम्नेव कवचं । ओं सर्व्वतेजोधिपतये अस्त्राः सहस्रकिरणोज्वलाय ववजघनं ओं भूतभव्यें भूतभाविन्यै वव भूतवन्धः । ओं ज्वल नेत्र ज्वल प्रज्वलत ठठ अग्निप्रकारः† । ॐ आदित्याय विद्महे विश्वभावायधीमहि तन्नःसूर्य्यः प्रचोदयात् । गायत्री सकलीकरणमिदं । ओं धर्म्मात्मने नमः पूर्व्वतः । यमाय नमः दक्षिणतः । ओं कालदण्डनायकाय नमः पश्चिमतः‡ । ओं रैवताय नमः । ओं उत्तरतः ।

श्यामपिङ्गलाय नम ऐशान्यां ॐ दीक्षिताय नम आग्नेय्याम् ।

---

* रोगनाशिनीति क्वचित् पाठः ।

† ॐ विटि विटि वव शिरः । ॐ ज्वलति वव शिखा । ॐ सर्व्वतेजोधिपतये वव अस्त्राः । ॐ सहस्रकिरणोज्वलनाय वव ऊर्द्ध्वबन्धः । ॐ पृथिव्यैभूतभाविन्यै वव भूतबन्धः । ओं ज्वलनेत्र प्रज्वलन वव अग्निप्रकार इति पुस्तकान्तरे पाठः ।

‡ दण्डनायकाय नमः पश्चिमत इति पाठान्तरं ।

ॐ वज्रपाणये नम नैर्ऋत्यां॥ आदित्याय भूर्भुवःस्वर्नमो वायव्यां ॐ चन्द्राय चन्द्राधिपतये नमः पूर्व्वतः। ओँ अङ्गारकाय क्षितिसुताय नमः आग्नेय्यां।

ॐ बुधाय सोमपुत्राय नमः दक्षिणे। ॐ नमो वागीश्वराय सर्व्वविद्याधिपतये नैर्ऋत्यां। ॐ शुक्राय महर्षये भृगुसुताय नमः पश्चिमतः। ओँ शनैश्चराय रविसुताय नमो वायव्यां। ॐ राहवे नमः उत्तरतः*। केतवेनम ईशान्यां†। भगवन्नपरिमितमयूखमालिन् सकलजगत्पते सप्ताश्ववाहनचतुर्भुजपरमसिद्धिप्रद विष्णुलिङ्गभावो एह्येहि इममर्घं मम शिरसि गतं गृहाण तेजोऽग्ररूप अनन्तज्वलन ठठः।

अर्घ्यावाहनमन्त्रः।

ॐ नमो भगवते आदित्याय सहस्रकिरणाय गच्छ सुखं पुनरागमनाय।

विसर्ज्जनमन्त्रः।

शृणुष्वात्र विधिं कृत्स्नं प्रवक्ष्याम्यनुपूर्व्वशः।
दीर्घायाय विधानस्य लोकानां हितकाम्यया॥
आचार्य्यो विधिवद्राजन् मन्त्रपूतेन वारिणा।
प्रोक्ष्य देवस्य पुरतो भूमिं भारतसत्तम॥
प्राणायामत्रयं कुर्य्याच्छुद्ध्यर्थं सुसमाहितः।
हृदयादि तथाङ्गेषु मन्त्रं‡ विन्यस्य मन्त्रवित्॥

---

* पश्चिमत इति पाठान्तरं।

† ओँ यमाय नमः दक्षिणत इति पाठान्तरं।

‡ दिग्मास प्रति शोधने इति क्वचित् पाठः।

कुर्य्यात्स तर्ज्जनीमुद्रां दिशान्तं प्रतिशोधयेत् ।
पातालभूशोधनञ्च वह्निप्राकारमेव च* ॥
शोधनं नभसश्चैव कुर्व्वीतास्त्रमनुस्मरन् ।
याम्यःसौम्यस्तथा विष्णुर्ब्रह्मा ईशान अग्नयः ॥
रुद्रं नैर्ऋतवायव्यः पञ्चमेतत् प्रकीर्त्तितम् ।
अष्टपत्रं लिखेत्पद्मं शुचौ देशे सकर्णिकम्† ॥
आवाहनं ततो बद्धा मुद्रामावाहयेद्रविम् ।
खखोल्कं स्थापयेत् तत्र स्वरूपं लोकभावनम् ॥
स्थापयेत् स्थापयेच्चैव मन्त्रैर्मन्त्रशरीरिणम् ।
पुरतो देवदेवस्य हृदये स्थापयेन्नृप ॥
ऐशान्यां शिर संस्थाप्य नैर्ऋत्यां विन्यसेच्छिखम् ।
पौरन्दर्य्यां न्यसेत्पद्ममेकाग्रस्थितिमात्मनः ॥
ऐशान्यां स्थापयेत्सोमं पौरदश्चातिलोहितम् ।
वायव्याञ्चैव कवचं वारुण्यामस्त्रमेव च ।
आग्नेय्यां सोमतनयं याम्याञ्चैव वृहस्पतिम ॥
नैर्ऋत्यां दानवगुरुं वारुण्यान्तु शनैश्चरम् ।
वायव्याञ्च तथा राहुं, कौवेर्य्यां केतुमेव च ॥
द्वितीयायान्तु कक्षायां देवतेजःसमुद्भवान् ।
स्थापयेद्द्वादशादित्यान् काश्यपेयान् महाबलान् ॥
भगःसूर्य्योऽर्य्यमा चैव मित्रो वै वरुणस्तथा ।
सविता चैव धाता च विवस्वांश्च महाबलः ॥

---

* अष्ट पत्रं लिखेत् पद्मं अष्ट पत्रं सकर्णितकमिति पाठान्तरं ।
† आग्नेय्यां दिशि देवस्येति पाठान्तरं ।

त्वष्टा पूषा तथा चन्द्रो द्वादशो विष्णुरुच्यते।

पूर्व्वे इन्द्राय, दक्षिणे यमाय. पश्चिमे वरुणाय, उत्तरे कुवेराय, ऐशान्यामीश्वराय, आग्नेय्यामग्नये, नैर्ऋत्यां नैर्ऋतये, वायव्यां वायवे नमः।

जया च विजया चैव जयन्ती चापराजिता।
शेषश्च वासुकिश्चैव रेवन्तोऽथ विनायकः॥
महाश्वेता तथा देवी राज्ञी चैव सुवर्च्चला।
तथान्यावपि विख्यातौ दण्डनायकपिङ्गलौ॥
पुरस्ताद्भास्करस्यैते स्थापनीयौ विजानता।
सिद्धिर्व्वुद्धिः, स्मृती देवी तथैवोत्पलमालिनी।
स्थाप्यास्तु दक्षिणे पार्श्वे लोकपूज्याः समन्ततः॥
प्रज्ञा तन्वी क्षुधा ब्राह्मी हारीता तुष्टिरेवच।
छायापाशं च विज्ञेया इत्येता देवशक्तयः।
दीपमन्नमलङ्कार वासःपुष्पाणि मन्त्रतः।
देयान्येतानि देवस्य सानुगस्य च मूर्त्तये॥
विधिनानेन सततं सर्व्वदा याति भास्करम्।
सं प्राप्य परमान् कामांस्ततोभानुसमो भवेत्॥
अनेन विधिना यस्तु पूजयेद्भास्करं नृप।
रविप्रसादादाप्नोति परमं स्थानमव्ययम्॥
पुत्रानवाप्नवान् राजन् दुर्जयत्वं तथा रिपोः।
अनेन विधिना पूज्य भगवान् भास्करं हरिम्।
अनेन विधिना पूज्य षष्ठ्यां भानुमनूदितं॥
कथास्मृत्कपक्षस्या जितक्रोधो जितेन्द्रियः।

निम्बपत्रं ततोऽश्नीयात् सप्तम्यां मन्त्रतो नृप ॥
निम्बपल्लव भद्रन्ते सुभद्रन्ते स्तु वै सदा।
ममापि कुरु भद्रञ्च प्राशनाद्रोगहा भवेः ॥
इत्यादितो मन्त्रः।
इत्थं प्राश्य स्वपेद्भूमौ देवस्य पुरतो नृप ॥
अष्टम्यां पूजयेद्भानुं पुनरेव तु पावतः।
ब्राह्मणान् भोजयेत् पश्चाच्छक्त्या दत्त्वा च दक्षिणाम् ॥
भुञ्जीत वाग्यतः पश्चान्मधुराम्लविवर्ज्जितम्।
इत्येषा वत्सरं यावत् कर्त्तव्या निम्बसप्तमी ॥
कुर्व्वाणः सप्तमीं चैव सर्व्वरोगैः प्रमुच्यते।
सर्व्वरोगविनिर्मुक्तः सूर्य्यलोकञ्च गच्छति ॥

इति भविष्यत्पुराणोक्तं निम्बसप्तमीव्रतम्।

सुमन्तुरुवाच।
अथ भाद्रपदे मासि सिते पक्षे महीपते।
कृत्वोपवासं सप्तम्यां विधिवत् पूजयेद्रविं ॥
माहेश्वरेण विधिना पूजयेदत्र भास्करम्।
अष्टम्यां तु पुनः प्रातः पूजयित्वा दिवाकरम् ॥
दद्यात् फलानि विप्रेभ्यो मार्त्तण्डः प्रीयतामिति।
खर्जूरं नारिकेलञ्च मातुलङ्गफलानि च ॥
ब्राह्मणान् भोजयित्वा तु फलाहारः स्वयं भवेत्।
पूर्व्वमेकन्तु सम्प्राश्य सुसूक्ष्मं फलमादरात् ॥
मन्त्रेण भरतश्रेष्ठ ततःशेषाणि भक्षयेत्।

फलं प्राश्य कुरुश्रेष्ठ भवेदिन्द्रत्वमेव च।
सर्व्वे भवन्तु सफला मम कामाः समन्ततः॥
इत्युक्त्वा भक्षयेत्तानि फलानि कुरुनन्दन।
आकण्ठं तत् कुरुश्रेष्ठ नचान्यत् किञ्चिदेव हि॥
फलाहारी भवेदेवमष्टम्यां कुरुनन्दन*।
इति संवत्सरं यावत् कर्त्तव्या फलसप्तमी॥
कृता च या महाबाहो पुत्रपौत्रान् प्रयच्छति।

इति भविष्यत्पुराणोक्तं फलसप्तमीव्रतम्।

———ooo———

सुमन्तुरुवाच।

शुक्लपक्षे तु वैशाखे† षष्ठ्यां सम्यगुपोषितः।
पूजयेद्भास्करं भक्त्या पुष्पधूपादिलेपनैः॥
येन तत् पूजयेद्देवं स विधिः कथ्यते तव।
तदा वैश्रवणो येन विधिना पूजयेन्नृप॥

ओं प्रज्वलने स्वाहा। ओं अग्निप्रकारः। ओं नमः सहस्रकिरणोज्ज्वलाय स्वाहा। ओं यं वः। ओं पृथिव्यै सर्व्वौषधिकर्त्र्यै स्वाहा। पृथिव्यस्त्वं नमः सकलीकरणमन्त्रः। आत्मनो देव शरीरे वा ओं धर्म्मात्मने नमः पूर्व्वतः। ओं धर्म्माय नमो दक्षिणतः‡। ओं रेवन्ताय नमः पश्चिमतः। ओं सततज्ज्वालारूपाय नमः। उत्तरतः। ओं श्यामपिङ्गलोहिताय नमः

---

* पूर्व्वोक्तानि फलानीति क्वचित् पाठः।

† चैत्रस्येति क्वचित् पाठः।

‡ दण्डकाय नमो दक्षिणत इति पाठान्तरं।

ऐशान्यां। नीललोहिताय नमः आग्नेय्यां। ईशानेश्वराय नमोनैर्ऋत्यां। वज्रपाणये नमो वायव्यां। ओं नमोहरदेहाय महाबलपराक्रमाय सर्व्वतेजोधिपतये स्वाहा।

उग्ररक्तिधराय नमः।

प्रथमः प्रातः प्रतीहारः। ओं हरदेहाय वज्ररूपधराय* नमः। द्वितीयः प्रतिहारः दक्षिणतः। ओं हरिताय नमस्तृतीयः पश्चिमतः। ओं अश्वमुखाय नमः पूर्व्वतः। द्वारपाल-चतुष्टयम्। ओं कुन्देन्दुवीरप्रभाय स्वाहा। प्रथमोश्वः। ओं रक्ताचरक्तवर्णदीप्ताय नमः। द्वितीयोश्वः। ओं क्षीरवर्ण-तेजस्विने नमः। तृतीयोऽश्वः। ओं भिन्नाञ्जनवर्णाय नमः। चतुर्थः। ओं तीव्रतेजसे नमः। पञ्चमोश्वः। व्योमवर्णाय प्रदीप्तमालिने† नमः। षष्ठोऽश्वः। ओं सर्व्ववर्णाय सर्व्वाधिपतये नमः। सप्तमः। ओं नमो अरुणकटाय कवचिने-कश्यपपुत्राय प्रजापतये नमः। ओं अनन्तदेवाय नमः। ओं असा-धारणविक्रमतेजसे नमः॥

आवाहनमन्त्रः।

ओं भास्कर देवाधिदेव गच्छगच्छ यथा सुखं स्वभवनं पुन-रागमनाय॥

विसर्जनमन्त्रः।

गायत्र्या स्वागमनार्घ्य पाद्याचमन स्नानातिथ्यकरण गन्ध-पुष्पधूपबलिहोमोपहारादिनिवेदनं।

---

* उग्ररूपधराय इति क्वचित् पुस्तके पाठः।

† प्रदीप्त वर्णाय इति क्वचित्पाठः।

मुकुलीपद्ममुद्रा च निष्कुरा च तथा परा ॥
नागाख्या व्योममुद्रा च उग्रा चैव पराः स्मृताः।
सप्तैतास्तु परा मुद्राः कोटिमुद्रास्तथैव च।

ओँ खखोल्काय नमः हृदयं। ओँ त्रिपिष्टपायाय नमः। शिरः। ओँ तेजसे नमः शिखा। आदित्याय तेजोधिपतये नमः कवचम्। आदित्याय सहस्रकिरणोज्ज्वलाय नमोऽस्त्रं। तेजोधिपतये नमः मुखं। ओँ मेषवृषाय नमः गुह्यं। ओँ सहस्र किरणाय नमः पादौ। ओँ दीप्ताधिपतये नमः पृष्ठम्। ओँ भास्कराय विद्महे सहस्ररश्मये* धीमहि तन्नोभानुः प्रचोदयात् ॥

सुमन्तुरुवाच।

अनेन विधिना पूज्य षष्ठ्यामुपवसेच्छुचिः।
पुरतः शयनं भानोः सप्तम्यां पूजयेत् पुनः ॥
भोजयेच्चापि विप्रांस्तु दध्ना वा पायसेन वा।
स्वशक्त्या दक्षिणां दत्त्वा श्रद्धया तु व्रजेत्तु तान् ॥
पयः पीत्वा ततो गव्यं स्नातव्यं कुरुनन्दन।
सुरभिरसिभद्रन्ते भद्रन्तेस्तु सुखाय वै ॥
तथा ममापि भद्रं वै प्राशात् सम्पत्कारीभव।

इत्यभिहितेन मन्त्रेण पयः पानम् ॥

दन्तखाद्यं भवेद्यद्वि तदोदनमिति स्मृतम् ॥
भक्ष्यं चूष्यं तथालेह्यमोदनन्त्विः प्रकीर्त्तितम्।
लेह्यं वा नोदनं प्राक्तं तस्मात्तत्परिवर्ज्जयेत् ॥

---

* सप्ताश्वाय इति पाठान्तरं।

तत् परिवर्ज्जयेदिति तच्छब्देन ओदनः परामृश्यते ।
तस्मादोदनमेव वर्ज्जयेन्नतु पेयमपि तस्यानोदनत्वात् ॥

प्राशन मन्त्रः ।

इत्येषानोदना नाम सप्तमी भरतर्षभ ।
यामुपोष्य नरो भक्त्या धनधान्यमवाप्नुयात् ॥
सर्व्वपापविनिर्म्मुक्तः सूर्य्यलोके महीयते ॥

इति भविष्यत्पुराणोक्तमनोदना सप्तमीव्रतम् ।

———000———

सुमन्तुरुवाच ।

माघे मासि सितेपक्षे सप्तम्यां कुरुनन्दन ।
निराहारो रविं भक्त्या पूजयेद्विधिना नृप ॥
पूर्व्वोक्तेन जपेज्जप्यं देवस्य पुरतः स्थितः ।
शुद्धैकाग्रमना राजन् जितक्रोधो जितेन्द्रियः ॥
वायो वलिष्ठ भद्रन्ते भद्रन्ते स्तु च वै सदा ।
समापि कुरु भद्रं वै प्राशनात् शत्रुहा भव ।
इत्यभिहितेन मन्त्रेण पीतपवनो निराहार इति

शतानीक उवाच ।

केन मन्त्रेण जप्तेन दर्शनं भगवान् व्रजेत् ।
स्तोत्रेण वापि सविता तन्मे कथय सुव्रत ॥ ३ ॥

सुमन्तुरुवाच ।

स्तुतो नामसहस्रेण यदा भक्तिमता मया ।
तदा मे दर्शनं यातः साक्षाद्देवो दिवाकरः ॥ ४ ॥

शतानीक उवाच।

नाम्नां सहस्रं सवितुः श्रोतुमिच्छामि तद्द्विज।
येन ते दर्शनं यातः साक्षाद्देवो दिवाकरः॥ ५॥

सुमन्तुरुवाच।

सर्व्वमङ्गलमाङ्गल्यं सर्व्वपापप्रणाशनम्।
स्तोत्रमेतन्महापुण्यं सर्व्वोपद्रवनाशनम्॥ ६॥
न तदस्ति भयं किञ्चिद्यदनेन न शाम्यति।
ज्वराद्विमुच्यते राजंस्तोत्रेऽस्मिन् पठिते नरः॥ ७॥
अन्ये च रोगाः शाम्यन्ति पठतः शृण्वतस्तथा।
सम्पद्यन्ते तथा कामाः सर्व्व एव यथेप्सिताः॥ ८॥
य एतदादितःश्रुत्वा सङ्ग्रामं प्रविशेन्नरः।
स जित्वा समरे शत्रूनभ्येति गृहमक्षतः॥ ९॥
बन्ध्यानां पुत्रजननं भीतानां भयनाशनम्।
भूतकारिदरिद्राणां कुष्ठिनां परमौषधम्॥ १०॥
बालानां चैव सर्व्वेषां ग्रहरक्षोनिवारणम्।
पठेद्देतद्धि यो राजन् स श्रेयः परमाप्नुयात्॥ ११॥
स सिद्धसर्व्वसङ्कल्पः सुखमत्यन्तमश्नुते।
धर्म्मार्थिभिर्द्धर्म्मलब्ध्यै सुखाय च सुखार्थिभिः॥ १२॥
राज्याय राज्यकामैश्च पठितव्यमिदन्नरैः।
विद्यावहन्तु विप्राणां क्षत्रियाणां जयावहम्॥ १३॥
पश्वावहं तु वैश्यानां शूद्राणां धर्म्मवर्द्धनम्।
पठतां शृण्वतामेतद्भवतीति न संशयः॥ १४॥
तच्छृणुष्व नृपश्रेष्ठ प्रयतात्मा ब्रवीमि ते।

नाम्नां सहस्रं विख्यातं देवदेवस्य भास्करः॥ १५॥
ओं विश्वविद्विश्वजित्कर्त्ता विश्वात्मा विश्वतोमुखः।
विश्वेश्वरो विश्वयोनिर्नियतात्मा जितेन्द्रियः॥ १६॥
कालाश्रयः कालकर्त्ता कामहा कालनाशनः।
महायोगी महाबुद्धिर्महात्मा सुमहाबलः॥ १७॥
प्रभुर्विभुर्भूतनाथो भूतात्मा भुवनेश्वरः।
भूतभव्यभावितात्मा भूतान्तकरणः शिवः॥ १८॥
शरण्यः कमलानन्दो नन्दनो नन्दिवर्द्धनः।
वरुणो वरदो योगी सुसंयुक्तः प्रकाशनः॥ १९॥
प्राप्तयानः परः प्राणः प्रीतात्मा प्रयतः प्रियः।
सहस्रपात्सुहृत्साधुर्दिव्यकुण्डलमण्डितः॥ २०॥
अव्यङ्गधारी धीरात्मा सविता वायुवाहनः।
समाहितमतिर्धाता विधाता कृतमङ्गलः॥ २१॥
कपर्दी कल्पकृद्रुद्रः सुमेता धर्म्मवत्सलः।
समायुक्तो वियुक्तात्मा कृतात्मा कृतिनाम्वरः॥ २२॥
अविचिन्त्यवपुःश्रेष्ठो महायोगी महेश्वरः।
कान्तः कामारिरादित्यो नियतात्मा निराकुलः॥ २३॥
कामः कारुणिकः कर्त्ता कमलाकरबोधनः।
सप्तसप्तिरचिन्त्यात्मा महाकारुणिकोत्तमः॥ २४॥
सञ्जीवनो जीवनाथो जयो जीवो जगत्पतिः।
अजयो विश्वनिलयः संविभागो वृषध्वजः॥ २५॥
वृषाकपिः कल्पकर्त्ता कल्पान्तकरणो रविः।
एकचक्ररथो मौनी सुरथो रथिनाम्वरः॥ २६॥

अक्रोधनो रश्मिमाली तेजोराजिर्व्विभावसुः।
दिवाकृद्दिनकृद्देवो देवदेवो दिवस्पतिः॥ २७॥
दिननाथो हवो होता दिव्यबाहो दिवाकरः।
यज्ञो यज्ञपतिः पूषा स्वर्णरेताः परावरः॥ २८॥
परावरज्ञस्तरणिः अंशुमाली मनोहरः।
प्राज्ञः प्रजापतिः सूर्य्यः सविता विष्णुरंशुमान्॥ २९॥
सदागतिर्गन्धवहो विहितोविधिराशुगः।
पतङ्गः स्थाणुर्विहगो विहङ्गो विहतोवरः॥ ३०॥
हर्य्यश्वो हरिताश्वश्च हरिदश्वो जगत्प्रियः।
अन्तकः सर्व्वदमनो भाविताल्मा भिषग्वरः॥ ३१॥
आलोककृल्लोकनाथो लोकालोकनमस्कृतः।
कालःकल्पान्तको वह्निस्तपनः सम्प्रतापनः॥ ३२॥
विरोचनो विरूपाक्षः सहस्राक्षः पुरन्दरः।
सहस्ररश्मिर्मिहिरो विविधाम्बरभूषणः॥ ३३॥
खगः प्रतर्दनो धन्यो हयगो वाग्विशारदः।
श्रीमानशिशिरो वाग्मी श्रीपतिः श्रीनिकेतनः॥ ३४॥
श्रीकण्ठः श्रीधरः श्रीमाञ्छ्रीनिवासो वसुप्रदः।
कामचारी महामायो महेशो विदिताशयः॥ ३५॥
तीर्थक्रियावान् सुनयोचितवो भक्तवत्सलः।
कीर्त्तिः कीर्त्तिकरो नित्यं कुण्डली कवची रथी॥ ३६॥
हिरण्यरेताः सप्ताश्वः प्रयतात्मा परन्तपः।
बुद्धिमानपरश्रेष्ठो रोचिष्णुः पाकशासनः॥ ३७॥
समुद्रोध २०० नदीधाता मान्धाता कश्मलापहः।

तमोघ्नो ध्वान्तहा वह्निर्होतान्तकरणो गुहः ॥ ३८ ॥
पशुमान् प्रयतानन्दो भूतेशः श्रीमतांवरः ।
नित्योदितो नित्यरथः सुरेशः सुरपूजितः ॥ ३९ ॥
अजितो विजयोजेता जङ्गमः स्थावरात्मकः ।
जीवानन्दो नित्यगामी विजेता विजयप्रदः ॥ ४० ॥
पर्जन्योऽग्निस्तिथिः स्थेयः स्थविरोऽणुर्निरञ्जनः ।
प्रद्योतनो रथारूढः सर्व्वलोकप्रकाशकः ॥ ४१ ॥
ध्रुवोमेधी महावीर्य्यो हंसः संसारतारकः ।
सृष्टिकर्त्ता क्रियाहेतुर्म्मार्त्तण्डो मरुतांपतिः ॥ ४२ ॥
मरुत्वान् दहनस्त्वष्टा भगोभाग्योऽर्य्यमा कपिः ।
वरुणोऽजोजगन्नाथः कृतकृत्यः सुलोचनः ॥ ४३ ॥
विवस्वान् भानुमान् कार्य्यं कारणं तेजसान्निधिः ।
असङ्गगामी तिग्मातिर्व्व र्म्मांशुर्द्दीप्तदीधितिः ॥ ४४ ॥
सहस्रदीधितिर्ब्रध्नः सहस्रांशुर्द्दिवाकरः ।
गभस्तिमान् दीधितिमान् स्रग्धिमानमलद्युतिः ॥ ४५ ॥
भास्करः सुरकार्य्यज्ञः सर्व्वज्ञस्तीक्ष्णदीधितिः ।
सुरज्येष्ठः सुरपतिर्वहुज्ञो वचसाम्पतिः ॥ ४६ ॥
तेजोनिधिर्व्बृहत्तेजा बृहत्कीर्त्तिर्व्बृहस्पतिः ।
अहिमानूर्जितोधीमानामुक्तः कीर्त्तिवर्द्धनः ॥ ४७ ॥
महावैद्यो गणपतिर्ग्गणेशो गणनायकः ।
तीव्रः प्रतापनः स्तापी तापनो २०० विश्वतापनः ॥ ४८ ॥
कार्त्तस्वरो हृषीकेशः पद्मानन्दोभिनन्दितः ।
पद्मनाभोऽमृतहरः स्थितिमान् केतुमान्नभः ॥ ४९ ॥

अनाद्यन्तोऽच्युतोविश्वो विश्वामित्रो घृणीविराट्।
आमुक्तकवचो वाग्मीकञ्चुकी विश्वभावनः॥ ५०॥
अनिमित्तमतिःश्रेष्ठः शरण्यः सर्व्वतोमुखः।
विगाही रेणुरसहः समायुक्तः समाक्रतुः॥ ५१॥
धर्म्मकेतु र्धर्म्मरतिः संहर्त्ता संयमो यमः।
प्रणतार्त्तिहरोऽमेयः सिद्धकार्य्यो जपेश्वरः॥ ५२॥
नभोविगाहतः सत्योऽमितात्मासुमनोहरः।
हारी हरिर्हयो वायुर्ऋतुः कालानलद्युतिः॥ ५३॥
सुखसेव्यो महातेजा जगतामन्तकारणम्।
महेन्द्रो निष्ठुतःस्तोत्रं स्तुतिहेतुः प्रभाकरः॥ ५४॥
सहस्रकरश्चायुष्मानरोगः सुखदःसुखी।
व्याधिहा सुमुखः सौख्यं कल्याणं कल्पनाम्बरः॥ ५५॥
आरोग्यकरणं सिद्धिर्व्वृद्धिर्ऋद्धिर्बृहस्पतिः।
हिरण्यरेताश्चारोग्यं विद्वान् बुद्धो बुधो महान्॥ ५६॥
प्राणमान् धृतिमान् धर्म्माधर्म्मकर्त्ता रुचिप्रदः।
सर्व्वप्रियः सर्व्वसहः सर्व्वशत्रुनिवारणः॥ ५७॥
अंशुर्व्विद्योतनोद्योतः सहस्रकिरणः कृती।
केयूरी भूषणोद्भासी भासितो भासनोऽनलः॥ ५८॥
शरण्यार्त्तिहरोहोता खद्योतः खगसत्तमः ४००।
सर्व्वद्योतमवद्योतः सर्व्वद्युतिहरोमतः॥ ५९॥
कल्याणः कल्याणकरः कल्पः कल्पकरः कविः।
कल्याणकृतकल्पवपुः सर्व्वकल्याणभाजनं॥ ६०॥
शान्तिक्रियः प्रसन्नात्मा प्रशान्त उत्तमप्रियः।

उदारकर्म्मा सुनयः सुवर्च्चा वृषलोचनः ॥ ६१ ॥
वर्च्चस्वीवर्च्चसामीश स्त्रैलोक्येशो वशानुगः ।
तेजस्वी सुयशावर्णी वर्णाध्यक्षो बलिप्रियः ॥ ६२ ॥
यशस्वी वेदनिलयस्तेजस्वी प्रकृतिः स्थितिः ।
आकाशगः शीघ्रगतिराशुगो गतिमान् खगः ॥ ६३ ॥
गोपतिर्ग्रहदस्त्रेशो गोमानेकः प्रभञ्जनः ।
जनिताप्रजनज्जीवो दीपः सर्व्वप्रकाशनः ॥ ६४ ॥
कर्म्मसाक्षी योगनित्यो नभस्वान् त्रिपुरान्तकः ।
रक्षोघ्नो विघ्नशमनः किरीटी प्रशमप्रियः ॥ ६५ ॥
मरीचिमाली सुमतिः कृती नित्यो विशेषकः ।
शिष्टाचारः शुभाचारः स्वाचाराचारतत्परः ॥ ६६ ॥
मन्दारो मातुरो दण्डः क्षुधापः पाक्षिको गुरुः ।
अवशिष्टो विशिष्टात्माविधेयो ज्ञानशोभनः ॥ ६७ ॥
महाश्वेतप्रियोऽज्ञेयः सामगो मोक्षदायकः ।
सर्व्ववेदप्रणीतात्मा सर्व्ववेदालयोऽलयः ॥ ६८ ॥
वेदमूर्त्तिश्चतुर्वेदोवेदभृद्वेदपारगः ।
क्रियावानसितोजिष्णुर्व्वरीयांश्च वरप्रदः ॥ ६९ ॥
व्रतचारी व्रतधरो लोकबन्धुरलङ्कृतः ।
अलङ्कारोऽक्षरो विद्वान् विद्यावान् विदिताशयः ॥५००॥
आकारोभूषणो भूष्यो भूष्णुर्भुवनपूजितः ।
चक्रपाणिर्व्वज्रधरःसुरेशो लोकवत्सलः ॥ ७१ ॥
राज्ञां पतिर्महाबाहुः प्रकृतिर्व्वैकृतिर्गुणः ।
अन्धकारापहः श्रेष्ठो युगावर्त्तो युगादिकृत् ॥ ७२ ॥

अप्रमेयः सदायोनिर्निरहङ्कार ईश्वरः।
शुभप्रभः शुभः शोभा शुभकर्म्मा शुभप्रदः॥ ७३॥
सत्यक् च स्तुतिमानुच्चैर्नकरो वृद्धिदोऽनलः।
बलभृद्बलदो बन्धुर्म्मतिमान् बलिनांवरः॥ ७४॥
अनङ्गो नागराडिन्द्रः पद्मयोनिर्गणेश्वरः।
सम्वत्सर ऋतुर्नेता कालचक्रप्रवर्त्तकः॥ ७५॥
पद्मेक्षणः पद्मयोनिः प्रभावानमरप्रभुः।
सुमूर्त्तिः सुमतिः सोमो गोविन्दो जगदादिजः॥ ७६॥
पीतवासाः कृष्णवासा दिग्वासातीन्द्रियो हरिः।
अतीन्द्रोऽनेकरूपात्मा स्कन्दः परपुरञ्जयः॥ ७७॥
शक्तिमाञ्छूलधृग्वालो* मोक्षहेतुरयोनिजः।
सर्व्वदर्शी जितादर्शो दुःखहा शुभनाशनः॥ ७८॥
माङ्गल्यकर्त्ता तरणिर्वेगवान् कुमलापहः।
स्पष्टाक्षरो महामन्त्रो विशाखो यजनप्रियः॥ ७९॥
विश्वकर्म्मा महाशक्तिर्ज्योतिरीशो विहङ्गमः।
विचक्षणो दक्ष इन्द्रः प्रत्यूहः प्रियदर्शनः॥ ८०॥
अखिन्नो वेदनिलयो वेदविद्विदिताशयः।
प्रभाकरो जितरिपुः सजनोऽरुणसारथिः॥ ६००॥ ८१॥
कुवेरः सुरथः स्कन्दो महितोभिमतो गुरुः।
ग्रहराजो ग्रहपतिर्ग्रहनक्षत्रमण्डलः॥ ८२॥
भास्करः सततानन्दो नन्दनो नरवाहनः।
मङ्गलेशो मङ्गलवान् मङ्गल्यो मङ्गलावहः॥ ८३॥

---

* नीलइति पुस्तकान्तरे पाठः।

मङ्गलं चारुचरितः सर्व्वसर्व्वव्रतीव्रती ।
चतुर्मुखः पद्ममाली पूतात्मा प्रणतार्त्तिहा ॥ ८४ ॥
अकिञ्चनः सत्यसन्धो निर्गुणोगुणवान् शुचिः ।
संपूर्णः पुण्डरीकाक्षोविधेयोगततत्परः ॥ ८५ ॥
सहस्रांशुःक्रतुपतिः सर्व्वस्वं सुमतिः सुवाक् ।
सुवाहनो माल्यदामा कृताहारो हरिप्रियः ॥ ८६ ॥
ब्रह्मा प्रचेताः कथिताः प्रतीतात्मा स्थितात्मकः ।
शतबिन्दुःशतमखो गरीयाननलप्रभः ॥ ८७ ॥
धीरोमहोत्तरोवित्तः पुरुषः पुरुषोत्तमः ।
विद्याराजोधिराजोहिर्विद्यावान् भूतिदःस्थितः ॥ ८८ ॥
अनिर्देश्यवपुः श्रीमान् विपाप्मा बहुमङ्गलः ।
सुस्थितः सुरथः स्वर्णो मोक्षाक्षारनिकेतनः ॥ ८९ ॥
निर्द्वन्द्वोद्वन्द्वहा सर्गः सर्गगः सम्प्रकाशकः ।
दयालुः सूक्ष्मधा चार्चिः क्षेमाक्षेमस्थितिप्रियः ॥ ९० ॥
भूधरो भूपतिर्व्वक्ता पवित्रात्मा त्रिलोचनः ।
महावराहः प्रियकृत् धाता भोक्ता भयप्रदः ॥ ९१ ॥
चतुर्व्वेदधरोऽचिन्त्यो विनिद्रोविविधासनः ।
चक्रवर्त्ती धृतिकरः संपूर्णोऽथ महेश्वरः ॥ ९२ ॥
विचित्ररथ एकाकीसप्तः सप्तिः परावरः ।
सर्व्वोदधिस्थितिकरः स्थितिस्थेयः स्थितिप्रियः ॥ ९३ ॥
निष्कलः पुष्कलनखो वसुमान् वासवप्रियः ।
पशुमान् वासरस्वामी वसुधाता वसुप्रदः ॥ ९४ ॥
बलवान् ज्ञानवान् तत्त्वमोङ्कारस्त्रिषु संस्थितः ।

संकल्पयोनिर्दिनकृत् भगवान् कारणावहः ॥ ९५ ॥
नीलकण्ठो धनाध्यक्षश्चतुर्वेदप्रियम्बदः ।
वषट्कारो व्रतं होता स्वाहाकारोहुताहुतिः ॥ ९६ ॥
जनार्द्दनोजनानन्दो नरोनारायणो बुधः ।
सन्देहच्चेपणो वायुरापः सुरनमस्कृतः ॥ ९७ ॥
विग्रही विमलो विन्दुर्विशोको विमलद्युतिः ।
द्योतितो द्योतिनो विद्युद्विद्युद्वैवारिदो बली ॥ ९८ ॥
घर्मदोहिमदोहोमः कृष्णवर्त्मा सभाजितः ।
सावित्रीभाजितो राजा विश्रुतो विश्वगो विराट् ॥ ९९ ॥
सप्तार्च्चिः सप्ततुरगः सप्तलोकनमस्कृतः ।
संपन्नोर्थी जगन्नाथः सुमनाः शोभनप्रियः ॥ १०० ॥
सर्व्वात्मा सर्व्वयष्टिः स्यात् सप्तिमान् सप्तमीप्रियः ।
प्रमेधा मेधिकोमेध्योमेधावी मधुसूदनः ॥ १ ॥
अङ्गिरागतिकालज्ञो धूमकेतुः सुकेतनः ।
सुखीसुखप्रदः सौख्यं कार्त्तिकातिप्रियीमुनिः ॥ २ ॥
सन्तापनः सन्तपनः आतपस्तपसां निधिः ।
उस्रपतिः सहस्रांशुः प्रियकारी प्रियङ्करः ॥ ३ ॥
प्रीतिर्विमत्सवारम्भो*द्योःखजगज्जगतां पतिः ।
जगत्पिता प्रीतमनाः सर्व्वसर्व्वोगुहोऽनलः ॥ ४ ॥
सर्व्वगोजगदानन्दो जगन्नेता सुरारिहा ।
श्रेयः श्रेयस्करोज्यायानुत्तमोत्तमउत्तमः ॥ ५ ॥
उत्तमोमेरुमेयोऽथ धारणो धरणीधरः ।

---

* प्रीतिर्व्विमन्यपरम्भो इति पुस्तकान्तरे पाठः ।

धाराधरो धर्म्मराजो धर्म्माधर्म्मप्रवर्त्तकः ॥ ६ ॥
रथाध्यक्षोपशुपतिस्वरमानोमनोनलः।
उत्तरोनुत्तरस्तापी तारापतिरपांपतिः ॥ ७ ॥
पुण्यसंकीर्त्तनः पुण्योहेतुर्लोकत्रयाश्रयः।
स्वर्भानुर्विगतारिष्टोविशिष्टोत्कृष्टकर्म्मकृत् ॥ ८ ॥
व्याधिप्रणाशनः क्षेमः शुरः सर्व्वजितोनरः।
एकनाथोरथाधीशः शनैश्चरपिता सितः ॥ ९ ॥
वैवस्वतो गुरुर्म्मृत्युर्धर्म्मनित्यो महाव्रतः।
प्रलम्बहारः सञ्चारी प्रद्योतोद्योतितानलः ॥ १० ॥
शताचरपरोमन्त्रोमन्त्रमूर्त्तिर्म्महाबलः।
तुष्टात्मा सुप्रियः शम्भुर्म्मरुतामीश्वरेश्वरः ॥ ११ ॥
संसारगतिविच्छेत्ता संसारार्णवतारकः।
सप्तजिह्वः सहस्राचिर्नीलगर्भोऽपराजितः ॥ १२ ॥
धर्म्मकेतुरमेयात्मा धर्माधर्मफलप्रदः।
लोकसाक्षी लोकगुरुर्लोकेशः छन्दवाहनः ॥ १३ ॥
धर्म्मयूपोधर्म्मवृक्षो धनुष्पाणिर्धनुर्द्धरः।
पिनाकधृग्महोत्साहोनेकमायो महाशनः ॥ १४ ॥
वीरःशक्तिमतां श्रेष्ठः सर्व्वशास्त्रभृताम्वरः।
ज्ञानगम्योदुराराध्यो लोहिताङ्गोरिमर्दनः ॥ १५ ॥
खखल्कोधर्म्मदोनित्यो धर्म्मकृच्च त्रिविक्रमः।
भगवान् स्वामीरिवन्तोश्चरोनीललोहितः ॥ १६ ॥
एकोऽनेकस्त्रयीव्यासः सविता समितिञ्जयः।
शार्ङ्गधन्वाऽनलोभीमः सर्व्वप्रहरणायुधः ॥ १७ ॥

अर्य्यमः परमेष्ठी च नाकपालो दिविस्थितः।
वदान्योवासुकिर्वैद्यः आत्रेयोऽथपराक्रमः॥ १८॥
द्वापरः परमोदारःपरमोब्रह्मवर्चवान्।
उदीच्यवेशोमुकुटीपद्महस्तोहिमांशुभृत्॥ १९॥
शीतः प्रसन्नवदनः पद्मोदरनिभाननः।
सायं दिवादिव्यवपुरनिर्द्देश्यो महारथः॥ २०॥
महारथो महानीशः शेषः सत्वरजस्तमः।
धृतातपत्रप्रतिमोविमर्षीनिर्णयस्थितः॥ २१॥
अहिंसकः शुद्धमतिरद्वितीयोऽरिमर्द्दनः।
सर्व्वदोधनदोमोचोविहारीबहुदायकः॥ २२॥
वारुणार्त्तिहरोनाथो भगवान् सर्व्वगोऽव्ययः।
मनोहरवपुः शुभ्रः शोभनः सुप्रभावनः॥ २३॥
सुप्रभः सुप्रभाकारः सुनेत्रोनिक्षुभापतिः।
रात्रौ प्रियः शब्दकरोग्रहेशस्तिमिरापहः॥
सैंहिकेयरिपुर्द्देवोवरदोवरनायकः।
चतुर्भुजो महायोगी योगीशोश्वपतिस्तथा॥ १०००॥
एतत्ते सर्व्वमाख्यातं यन्मां त्वं परिपृच्छसि।
नाम्नां सहस्रं सवितुः पाराशर्य्यो यदाह मे॥ २६॥
धन्यं यशस्यमायुष्यं दुष्टदुःस्वप्ननाशनम्।
बन्धमोक्षकरंचैव भानोर्नामानुकीर्त्तनम्॥ २७॥
यस्त्विदं शृणुयान्नित्यं पठेद्वा प्रयतोनरः।
अक्षयपस्वर्गमवाप्यं भवेत्तस्योपसाधितम्॥ २८॥
नृपाग्नितस्करभयं व्याधिभ्यो न भयं भवेत्।

विजयी विभवैर्नित्यं श्रेयश्च समवाप्नुयात् ॥ १९ ॥
कीर्त्तिमान् सुभगो विद्वान् सुमुखो प्रियदर्शनः।
भवेद्वर्षशतायुश्च सर्व्वबाधाविवर्ज्जितः ॥ २० ॥
नाम्नां सहस्रमिदमंशुमतः पठेद्यः
प्रातः शुचिर्नियमवान् सुसमाधियुक्तः।
दूरेण तं परिहरन्ति स दैव रोगाः
भीताः सुपर्णमिव सर्व्वमहोरगेन्द्राः ॥ २१ ॥
इत्थं राजन् जपेद्राचौ यावन्निद्रावशङ्गतः।
जपेत् भक्त्या पुनर्व्वीर आदित्यादिमुखस्थितः ॥
पूजयित्वा यथादित्यमर्चयित्वा द्विजोत्तमम्।
भुञ्जीत वाग्यतः पश्चादमांसं सुसमाहितः ॥
विप्रेभ्यो दक्षिणां दत्त्वा यथाशक्त्या नराधिपः।
एवं संवत्सरं यावत् कुर्य्याद्विजयसप्तमीम् ॥
स जयेदखिलाञ्छत्रून् सूर्य्यलोकं स गच्छति ॥

इति भविष्योत्तरपुराणोक्तं विजयसप्तमीव्रतम्।

———०*०———

युधिष्ठिर उवाच।

सप्तमी जयदा नाम कस्मिन्काले विधीयते।
किंफला नियमः कश्चिद्वद देवकिनन्दन ॥

कृष्ण उवाच।

शुक्लपक्षे तु सप्तम्यां यदादित्यदिनं भवेत्।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ॥
स्नानं दानं जपो होम उपवासस्तथैव च।

सर्व्वदा* जयसप्तम्यां महापातकनाशनम् ॥
प्रदक्षिणं यः कुरुते फलैः पुष्पै र्दिवाकरम्।
स सर्व्व गुणसम्पन्नं पुत्रं प्राप्नोत्यसंशयम् ॥
प्रथमा नालिकेरैस्तु द्वितीया वीजपूरकैः।
तृतीया रक्तनारङ्गै श्चतुर्थी कदलीफलैः ॥
पञ्चमी कूजुकुष्माण्डैः षष्ठी पक्वैश्च तेन्दुकैः।
वृन्ताकैः सप्तमी ज्ञेया शतेनाष्टोत्तरेण तु ॥
मौक्तिकैः पद्मरागैस्तु तिलैः कर्कटकैस्तथा।
गोमेदै र्व्वज्रवैदूर्य्यैः शतेनाष्टाधिकेन तु ॥
इङ्गुदै र्बदरैर्बिल्वैः करमर्द्दैः सवर्भटैः।
आम्रातकैश्च जम्बीरै र्जम्बू कर्कटिकैः फलैः ॥
पुष्पै† र्धूपैः फलैः पत्रै र्मोदकै र्घृतपाचितैः ॥
एभिर्विजयसप्तम्यां भानोः कुर्य्यात्प्रदक्षिणम्।
अन्यैः फलैश्च कालोत्थैरखण्डै र्ग्रन्थिवर्जितैः।
रवेः प्रदक्षिणं देयं फलेन फलमादिशेत् ॥
न विशेन्नच संजल्पेत् न स्पृशेत्किञ्चिदेव हि।
एकचित्ततया भानुश्चिन्तितोतिप्रयच्छति ॥
वसोर्धारा प्रदातव्या भानोर्गव्येन सर्पिषा।
चन्द्रातपत्रं बध्नीयात् ध्वजं किङ्किणिकायुतम् ॥
कुङ्कुमेन समायुक्तं पुष्पैर्वस्त्रैश्च वेष्टयेत्‡।

---

* सर्व्वं विजय सप्तम्यां मिति पुस्तकान्तर पाठः।

† पूगीफलै रिति पुस्तकान्तरे पाठः।

‡ पूजयेदिति पाठान्तर।

शुचिर्निवेद्य नैवेद्यं ततोदेवं क्षमापयेत् ॥
भानो भास्करमार्त्तण्ड चण्डरश्मे दिवाकर।
आयुरारोग्यमैश्वर्यं पुत्रान् देहि नमोस्तु ते ॥
उपवासेन नक्तेन भक्तैकायाचितेन च।
नेया नियमयुक्तेन राजन् विजयसप्तमी।
रोगी प्रमुच्यते रोगात् दरिद्रः श्रियमाप्नुयात् ॥
अपुत्रो लभते पुत्रान् विद्यार्थी पूज्यते सभां।
शुक्लपक्षे यदा पार्थ सादित्या सप्तमी भवेत् ॥
तदानक्तेन भुञ्जानो क्षपयेत्सप्तसप्तमीम्।
भूमौ पलाशपत्रेषु स्नात्वाहुत्वा यथाविधि ॥
समाप्ते तु व्रतं दद्यात्सुवर्णं मुद्गमिश्रितम्।
मुद्गभोज्याय सूर्य्याय कवकायाथवा नृप ॥
सप्तमीः सप्तसंयुक्ता आदित्येन तु योनरः।
षडक्षरेण मन्त्रेण सर्व्वं कार्य्याणि कारयेत् ॥
होमार्च्चन प्राशनानि शतेनाष्टोत्तरेण च।
होमः साज्यतिलः कार्य्यः प्राशनं चन्दनोदकम ॥
पूजां तत्कालसंभूतैः सुपुष्पैः करवीरकैः।
एवं पूर्णे व्रते पश्चात् सुवर्णेन घटायितम् ॥
स्वशक्त्या भास्करं पार्थ रुक्मपात्रमुपस्थितम्।
आदित्यरूपमिन्र्माणन्तु निक्षुभार्कसप्तमीव्रतोक्तं वेदितव्यं।
कषायवाससा युक्तां गाञ्च दद्यात् सदक्षिणाम्।
मन्त्रेणानेन विप्राय वाचकाय गुणान्विते ॥
भास्करेश नमस्तुभ्यं यशस्कर नमोस्तु ते।

ॐ यस्कार प्रसीद त्वं वाञ्छितं देहि मे विभो॥
दानान्यत्र प्रदेयानि गृहाणि शयनानि च।
अक्षयाक्षया पार्थ शाश्वतीं प्रीतिमिच्छता॥
यात्रा प्रशंस्या शत्रूणां राज्ञां विजयमिच्छतां।
विजयी जायतेवश्यं गतानान्तु नृणान्तदा॥
अतोऽर्थं विश्रुता पार्थ लोके विजयसप्तमी।
एवमेषा तिथिः सद्यः सर्व्वकामफलप्रदा॥
इह वामूत्रफलदा सूर्य्यलोकप्रदायिनी।
तदनुष्ठानतो* विद्वान्दीर्घायुर्नीरुजः सुखी॥
इहागत्य भवेद्राजा हस्त्यश्वरथसंकुलः।
नारी वा कुरुते या तु सापि तत्फलभागिनी॥
नित्यं महीतलजयप्रतिपादयित्री
या सप्तमी मुनिवरैः प्रवरा† तिथीनाम्।
सा भानुपादकमलार्चनचिन्तकानां
पुंसां सदैव विजया विजयं ददाति॥

इति श्रीभविष्योत्तरोक्तं विजयसप्तमीव्रतम्।

———000———

श्रीकृष्ण उवाच।

अथान्यन्ते प्रवक्ष्यामि सप्तमीकल्पमुत्तमम्।
माघमासात् समारभ्य शुक्लपक्षे युधिष्ठिर॥
सप्तम्यां कृतसङ्कल्पो वर्षमेकं व्रतीभवेत्।

---

* दाता रोगीन्द्रदुर्व्विंदानिति पाठान्तरं।

† या गण्यते इति पुस्तकान्तरे पाठः।

वरुणं माघमासे तु भानुं संपूज्य कारयेत् ॥
ब्रह्मकूर्च्चविधानेन यथा शक्त्या नृपोत्तम ।
अष्टम्यां भोजयेद्विप्रान् तिलपिष्टगुडोदनैः ॥
अग्निष्टोमस्य यज्ञस्य फलं कृत्स्नमवाप्यते ।
तपनं* फाल्गुने मासि सूर्य्यमित्यभिपूजयेत् ॥
वाजपेयस्य यज्ञस्य† फलं प्राप्नोति दुर्लभम् ।
सप्तम्यां चैत्रमासे तु वेदांशुरिति पूजयेत् ॥
उक्थाध्वरसमं पुण्यं नरः प्राप्नोत्यसंशयम् ।
वैशाखस्य तु सप्तम्यां धातारित्यभिपूजयेत् ॥
पशुबन्धाध्वरं पुण्यं सम्यक् प्राप्नोति मानवः ।
सप्तम्यां ज्यैष्ठमासस्य इन्द्रमित्यभिपूजयेत् ॥
अश्वमेधफलावाप्तिर्जायते नात्र संशयः ।
तथाषाढ़स्य सप्तम्यां पूजयित्वा दिवाकरम् ॥
बहुस्वर्णस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ।
श्रावणे मासि सप्तम्यामातपानां प्रपूजयेत् ॥
सौत्रामणिफलं पार्थ नरः प्राप्नोति भक्तितः ।
रविं भाद्रपदे मासि सप्तम्यामर्च्चयेच्छुचिः ॥
तुलापुरुषदानस्य गुड़ेन फलमाप्नुयात्‡ ।
अश्वयुक्शुक्लसप्तम्यां सवितारं प्रपूजयेत् ॥
गोसहस्रप्रदानस्य फलमाप्नोति भक्तितः ।

---

* भद्रकंचेति पुस्तकान्तरे पाठः ।

† यथोक्तं लभते फल मिति पाठान्तरं ।

‡ फलत्यागी भवेन्नर इति पुस्तकान्तरे पाठः ।

कार्त्तिके शुक्लसप्तम्यां सप्ताश्वंश्च नाम पूजयेत्॥
योऽभ्यर्च्चयति पुण्यात्मा पौण्डरीकफलं लभेत्।
मार्गशीर्षे तथा भानुं पूजयित्वा विधानतः॥
राजसूयस्य यज्ञस्य फलमाप्नोति वै नरः।
भास्करं पुष्यमासे तु पूजयित्वा विधानतः॥
चतुर्णामपि वेदानां स्वाध्यायस्य फलं लभेत्।
तथैव कृष्णसप्तम्यां नामपूजादिकन्तु यः॥
सोपवासः प्रयत्नेन वर्षमेकं समाचरेत्।
पारिते नियमे पार्थ सूर्य्ययागं समारभेत्॥
शुद्धभूमौ समे* देशे रक्तचन्दनलेपिते।
एकहस्तं द्विहस्तं वा चतुर्हस्तमथापि वा॥
सिन्दूरेणातिरागेण सूर्य्यमण्डलमालिखेत्।
रक्तपुष्पैश्च पद्मैश्च धूपैः कुन्दुरुकादिभिः॥
सम्पूज्य दद्यान्नैवेद्यं विचित्रं घृतपाचितम्।
पुरतःस्थापयेत् कुम्भान् जलपूर्णान् सदक्षिणान्।
द्वादशाँश्च नृपश्रेष्ठ रक्तवर्णान् सुचर्च्चितान्॥
अग्निकार्य्यं ततः कार्य्यं सम्यक्हुतहुताशनः।
आकृष्णेनेति मन्त्रेण समिद्भिश्चार्कवृक्षजैः॥
तिलैराज्यगुडोपेतैर्दद्यादष्टशताहुतीः।
दक्षिणा च ततो देया ब्राह्मणेभ्यः पृथक् पृथक्।

¶ मानव इति पुस्तकान्तरे पाठः।

* शुभदेशे इति पुस्तकान्तरे पाठः।

देयानि रक्तवासांसि शक्तानां द्विजसत्तमानां।
द्वादशात प्रशंसन्ति गावो वस्त्रविभूषिताः॥
छत्त्रोपानद्युगञ्चैवमेकैकाय प्रदापयेत्।
वित्तहीनो न शक्नोति दानं द्वादशधेनुकम्॥
एकाप्यपि सुशीला च रक्तवर्णा पयस्विनी।
उपदेष्ट्रे प्रदातव्या वित्तशाठ्यमकुर्व्वतः॥
ततो विसृज्य तान् विप्रान् स्वयं भुञ्जीत वाग्यतः।
य एवं कुरुते पार्थ सप्तमीव्रतमादरात्।
निरुजो रूपवान् वाग्मी दीर्घायुश्चैव जायते॥
विमुक्तो दीर्घरोगेभ्य ग्रस्तः कुष्टादिना तु यः।
तेन कार्य्यं प्रयत्नेन व्रतमेतद्रुजापहम्॥
नेहास्ति† भास्करादन्यदौषधं रोगहानिदम्।
भास्करैकगतिर्यस्तु सर्व्वभूतहिते रतः॥
तस्य सन्दर्शनस्पर्शाद्रोगहानिः प्रजायते।
कथं वा सूर्य्यभक्तानां रोगदौर्गत्यसम्भवः॥
जायते भरतश्रेष्ठ प्रत्यक्षे परमेष्ठिनि।
सप्तम्यां प्रतिमासन्तु जन्मव्रतचरो हि यः॥
उपवासी रवेर्भक्तः सर्व्वभूतहिते रतः।
अष्टम्यां विप्रसहितो हविष्यं भोजयेन्नरः॥
एकादशसमा यस्य दिव्यरूपा च सप्तमी।
सूर्य्यस्य मण्डलं भित्त्वा याति ब्रह्मसनातनम्॥
व्रतमेतन्महाराज सर्व्वाशुभविनाशनं।

---

† न किञ्चिद्भास्करादन्यदौषधं रोगहानिकमिति पाठान्तरं।

सर्व्वदुःखोपशमनं शरीरारोग्यदायकम्॥
सूर्य्यलोकप्रदश्चान्ते प्राहेदं नारदोमुनिः।
ये सप्तमीमुपवसन्ति सितासिताश्च
नामाक्षरैरमितदीधितिमर्च्चयन्ति।
ते सर्व्वरोगरहिता सुखिनः सदैते
भूत्वा रवेरनुचरा सुचिरं वसन्ति॥

इति भविष्यत्पुराणोक्तं द्वादशसप्तमीव्रतम्।

———000———

सुमन्तुरुवाच।

यःक्षिपेद्गोमयाहारः शुक्लाः द्वादशसप्तमीः।
राजेन्द्र याचकाहारः* शीर्णपर्णाशनोपि वा॥
क्षीराशीवैकभक्तोवा भिक्षाहारोथवा पुनः।
जलाहारोऽथवा भूत्वा पूजयित्वादिवाकरम्।
पुष्पोपहारैर्व्विविधैः पद्मसौगन्धिकोत्पलैः॥
नानाप्रकारैर्गन्धैस्तु धूपैर्गुग्गुलचन्दनैः।
शर्करापयसाद्यैश्चविचित्रैश्च विभूषणैः† ॥
अर्च्चयित्वा नरश्रेष्ठ हिरण्यान्नादिभिर्नरः।
यथोक्तफलमाप्नोति क्रतुभिर्भूरिदक्षिणैः॥
तदत्र प्राप्यते वीर सप्तम्यां केवलं रवेः।
विमानवरमारूढः सूर्य्यलोके महीयते॥

---

* यावकाहार इति पुस्तकान्तरे पाठः।

† क्षसरा शर्करेति पुस्तकान्तरे पाठः।

ततः पुण्यक्षतां राजन् कुले महति जायते।
एवं भक्त्या विवस्वन्तं प्रतिमासं समाहितः॥
पूजयेद्विधिवद्भक्त्या नामान्येतानि कीर्त्तयेत्।
मधौ मासे विष्णुरिति माधवे चार्य्यमेति च॥
शुक्रे विवस्वान् मासे च शुचौ मासे दिवाकरः।
पर्जन्यः श्रावणे मासि नभस्ये तरणिस्तथा॥
मित्रश्चाश्वयुजे मासि कीर्त्तनीयो दिवाकरः।
मार्त्तण्डेति रविर्ज्ञेयः कार्त्तिके काञ्चनप्रभः॥
मार्गशीर्षे रविः प्रोक्तः सर्व्वपापविनाशनः।
पुष्यमासे* च पूषेति विज्ञेयः काञ्चनप्रभः॥
माघे भगश्च विज्ञेयः त्वष्टा वैवाथ फाल्गुने।
एवं क्रमेण नामानि कीर्त्तयेत् प्रीतये रवेः॥
धूपार्चन विधानन्तु सप्तम्यान्तु विधानतः।
यः करोति नरो भक्त्या स याति परमां गतिं।
तेजसा हरिसङ्काशः प्रभया रविसन्निभः॥
एतत्ते सर्व्वमाख्यातं शृणुतत् पापनाशनम्।
न वदेच्च ह्यशिष्याय नाभक्ताय कदाचन॥
न च पापकृते देयं नातप्ततपसे पि च।
न कृष्णे नास्तिके वीर नदेयं क्रूरकर्म्मिणे॥

---

* पुषा पौषे तथा माघे तुजनीयः प्रयत्नतः इति पुस्तकान्तरे पाठः।

इति श्रीभविष्यत्पुराणोक्तगोमयादिसप्तमीव्रतम्।

———ooo———

सुमन्तुवाच।

उदकप्रभृतिं पीत्वा क्रियते या तु सप्तमी।
सा ज्ञेया सुखदा वीर सद्वैवोदकसप्तमी॥

इति भविष्यत्पुराणोक्तमुदकसप्तमीव्रतम्।

———ooo———

या काचित् सप्तमी प्रोक्ता ततोवच्यामि शोभनम्।
वराटिकात्रयक्रीतं यत् किञ्चित् प्राशयेन्नरः।
अनेन देही मूल्येन यल्लब्धं तच्च भच्चयेत्।
अभच्यं वापि भच्यं वा नात्र कार्य्या विचारणा।
अनेन विधिना कार्य्या वराकाह्वयसप्तमी॥

इति भविष्यत्पुराणोक्तवराटिकासप्तमीव्रतम्।

———ooo———

ब्रह्मोवाच।

अतः परं प्रवच्यामि रहस्या नामसप्तमीं।
पवित्राहि पवित्राणां महापातकनाशिनी॥
सप्तमी कृतमात्रेयं नरस्तारयते भवात्।
सप्तापरान् सप्तपूर्व्वान् पितृंश्चापि न संशयः॥
रोगांश्छिनत्ति दुश्छेद्यान् दुर्जयान् जयते रिपून्।
अर्थं प्राप्नोति दुःप्राप्यं सकृत् कृत्वापि सप्तमीं॥

---

* पूजयेदिति पुस्तकान्तरे पाठः।

कन्यार्थी लभते कन्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान् धर्म्मार्थी धर्म्ममाप्नुयात् ॥
समयान् पालयन् सर्व्वान् कुर्य्याच्चेमां विचक्षणः ।
शृणुयात् शृणु भूतेश श्रेयसे गदतोमम ॥
आदित्यभक्तः पुरुषः सप्तम्यां गणनायकम् ।
मैत्रीसर्व्वत्र वै कुर्य्यात् भास्करंवापि* चिन्तयेत् ॥
सप्तम्यां न स्पृशेत्तैलं नीलवस्त्रं न धारयेत् ।
नचवामलके स्नानं न कुर्य्यात् कलहं क्वचित् ॥
तथैवान्नमलं मद्यं न दद्यान्नपिवेद्बुधः
न द्रोहं कस्यचित् कुर्य्यान्नपारुष्यं समाचरेत् ।
नच भाषेत चाण्डालं वचनैः स्त्रीं रजस्वलां ॥
न चापि संस्पृशेत् श्वानं मृतकं नावलोकयेत् ।
न नृत्येदतिरागेण नच वाद्यानि वादयेत् ।
नस्वपेच्च स्त्रिया सार्द्धं न सेवेत दुरोदरम् ॥
न रोदेदश्रुपातेन न चाद्यात् पञ्चशाकिकम् ।
पञ्चशाकिकं कन्दमूलफलदलपुष्पाणि पञ्चशाकानि ॥
नाकर्षेच्च शिरोयूकान् न वृथा वादमाचरेत् ।
परस्यानिष्ट कथन मतिशोकं विवर्जयेत् ॥
नास्फोटयेच्चापि हसेत् गायेच्चापि न गीतकं ॥
न किञ्चित्ताडयेजन्तुं न कुर्य्यादतिभोजनम् ।
न चैव हि दिवास्वप्नं दम्भं शाठ्यं च वर्जयेत् ॥
रथ्या यामटनं चापि यत्नतः परिवर्जयेत् ।

---

* पूजयेदिति पुस्तकान्तरे पाठः ।

अथापरोविधिश्चात्र श्रूयतां त्रिपुरान्तक ॥
चैत्रात् प्रभृति कर्त्तव्या सर्व्वदा नाम सप्तमी ।
धातेति मधुमासे तु पूजनीयो दिवाकरः ॥
अर्य्यमेति च वैशाखे ज्यैष्ठे मित्रः प्रकीर्त्तितः ।
आषाढे वरुणो ज्ञेय इन्द्रोनभसि कथ्यते ॥
विवस्वांश्च नभस्ये तु पर्जन्योऽश्वयुजि स्मृतः ।
पूषा कार्त्तिकमासे च मार्गशीर्षे तु कथ्यते ॥
भगः पौषे विवस्वांश्च त्वष्टामाघे तु कथ्यते ।
विष्णुस्तु फाल्गुने मासि पूज्यो वन्द्यश्च भास्करः ॥
सप्तम्यां चैव सप्तम्यां भोजयेद्भोजकान् बुधः ।
सघृतं भोजनं देयं भोजयित्वा विधानतः ॥
भोजकाय प्रदेया तु दक्षिणा स्वर्णमाषकम् ।
सघृतं भोजनं देयं रक्तवस्त्राणि चैव हि ॥
अलाभे भोजकानान्तु दक्षणीया द्विजोत्तम ।
तथैव भोजनीयाश्च श्रद्धया परयान्वितः ॥
विशेषतः पूजनीयाः ब्राह्मणाः कस्यचित्सदा ।
इत्येता कथिता तुभ्यं सप्तमी गणनायक ।
श्रुता सती पापहरा सूर्य्यलोकप्रदायिनी ॥

इति भविष्यत्पुराणोक्तं नाम सप्तमीव्रतम् ।

———000———

पितामह उवाच ।

फाल्गुणामलपक्षस्य सप्तम्यां च घनाघन ।

उपोषिता नरो नारी समभ्यर्च्य तमोपहम्॥
सूर्य्यनाम जपन् भक्त्या भावयुक्तो जितेन्द्रियः।
उत्तिष्ठन्नुपविशंश्चैव सूर्य्यमेवानुकीर्त्तयेत्॥
ततोऽन्यदिवसे प्राप्ते अष्टम्यां नियतो रविम्।
स्नात्वा सम्यक् समभ्यर्च्य दद्याद्विप्राय दक्षिणाम्॥
रविमुद्दिश्य चैवाग्नौ कृतहोमः कृतक्रियः।
प्रणिपत्य रविं देव* मिति वाक्यमुदीरयेत्॥
यमाराध्य पुरा देवी सावित्री काममाप वै।
स मे ददातु देवेशः सर्व्वान् कामान् विभावसुः।
समभ्यर्च्य दितिः प्राप्ता कृत्स्नान् कामान् यथेप्सितान्।
ददातु सकलान् कामान् प्रसन्नो मे दिवस्पतिः॥
भ्रष्टराज्यः स देवेन्द्रो समभ्यर्च्य दिवाकरम्।
कामार्थमाप्तवान् राज्यं स मे कामान् प्रयच्छतु॥
एवमभ्यर्च्य पूजाञ्च निष्पाद्येह विशेषतः।
भुञ्जीत च ततः सम्यक् हविष्यं पतगध्वज॥
फाल्गुने चैत्रवैशाखे ज्यैष्ठमन्यं तथा परम्।
चतुर्भिः पारणं मासैरेभिर्निष्पाद्य सम्भवेत्॥
करवीरैश्चतुरोमासान् तथा संपूजयेद्रविम्।
कृष्णागुरुं दहेद्धूपं प्राश्य गोशृङ्गजं जलं॥
नैवेद्यं खण्डवेष्टांश्च दद्याद्विप्रेभ्य एव च।
ततस्तु श्रूयतामन्यच्चाषाढादिषु या क्रिया॥
जातीपुष्पाणि शस्तानि धूपो गुग्गुलुरुच्यते।

---

* जगन्नाथमिति पुस्तकान्तरे पाठः।

कुतपोदकमश्नीयात् नैवेद्यं पायसं मतम् ॥
स्वयं तदेव चाश्नीयात् शेषं पूर्व्ववदाचरेत् ।

कुतपोदकं, कुशोदकं ।

कार्त्तिकादिषु मासेषु गोमूत्रं कायशोधनं ।
महाङ्गं धूपमुद्दिष्टं पूजारक्तोत्पलैस्तथा ॥

महाङ्गधूपो, भविष्यत्पुराण उक्तो यथा ।

कर्पूरं कुङ्कुमं मुस्तामगुरुं सिह्लकं तथा ॥
व्यजनं शर्करा क्षणा महाङ्गं सिह्लकं तथा ।
महाङ्गोऽयंस्मृतो धूपः प्रियो देवस्य सर्व्वदा ॥
कुतपोदकमश्नीयात् नैवेद्यं पायसं मतम् ।
कासारश्चैव नैवेद्यं प्रदद्याद्भास्कराय वै ।
प्रतिमासञ्च विप्राय दद्याच्छक्त्या तु दक्षिणां ॥
प्रीणनं स्वेच्छया भानोः पारणं पारणे गते ।
यथाशक्ति यथायोगं वित्तशाठ्यं विवर्ज्जयेत् ॥
सद्भावेनैव सम्प्राप्तः पूजितः प्रीतये मतः ।
पारणान्ते यथाशक्त्या पूजितः स्नापितो रविः ॥
प्रीणीतश्चेप्सितान् कामान् दद्यादव्याहतान्रविः ।
एषा पुण्या पापहरा सप्तमी सर्व्वकामदा ॥
यथाभिलषितान् कामान् ददाति गरुड़ध्वज ।
अपुत्रः पुत्रमाप्नोति अधनो धनमाप्नुयात् ॥
रोगाभिभूतश्चारोग्यं कन्या विन्दति सत्पतिम् ।
समागमं प्रवासेभ्यउपोष्यै तदवाप्नुयात् ॥
सर्व्वान् कामानवाप्नोति गोगतश्चापि मोदते ।

गोगत इति, स्वर्गतः ।

पुनरेत्य महीं-कृष्ण घनाघन समोनृप ।

घनाघनसमः, शक्रतुल्यः ।

क्ष्मातले स्यान्नसन्देहः प्रसादाद्गोपतेर्नरः ॥

इति भविष्यत्पुराणोक्तं कामदासप्तमीव्रतम् ।

———000———

सुमन्तुरुवाच ।

अथ भाद्रपदे मासि शुक्लपक्षे महामते ।
उपोष्या प्रथमा तत्र विधानं शृणु यद्भवेत् ॥
अयाचिती चतुर्थ्यान्तु पञ्चम्यामेकभोजनम् ।
उपवासपरः षष्ठ्यां जितक्रोधी जितेन्द्रियः ॥
अर्च्चयित्वा दिनकरं गन्धपुष्पनिवेदनैः ।
पुरतः स्थण्डिले रात्रौ स्वपेद्देवस्य पुत्रक ॥
प्रध्याय* न्मनसा देवं सर्व्वभूतार्त्तिनाशनं ।
सर्व्वदोषप्रशमनं सर्व्वपातकनाशनं ॥
विबुद्धस्त्वथ सप्तम्यां कुर्य्याद्ब्राह्मणभोजनम् ।
पूजयित्वा दिनकरं पुष्पधूपविलेपनैः ॥
नैवेद्यं तत्र देवस्य फलानि कथयन्ति हि ।
खर्जूरं नालिकेरञ्च तथैवाम्रफलानि च ॥
मातुलङ्गफलानीह कथितानि मनीषिभिः ।
भोजयित्वा ततो विप्रान्† नात्मना चैव भोजयेत् ॥

---

* सन्ध्यायेति पुस्तकान्तरे पाठः ।

† एतैश्च भोजयेद्विप्रानिति पाठान्तरं ।

तथैषां चाप्यभावेतु शृणु वान्यानि सुव्रत।
शालिगोधूमपिष्टेन कारयेद्गणनायकम्॥
गुड़गर्भकृतानीह घृतगर्भाणि पाचयेत्।
जातु जीरक मिश्राणि* आदित्याय निवेदयेत्॥
जातुजीरकमिश्राणि एलापत्रनागकेशराणि।
शर्कराखाद्यमिश्राणि आदित्याय निवेदयेत्॥
अग्निकार्य्यमथो कृत्य ब्राह्मणान् भोजयेत्ततः।
इत्थं द्वादश वै मासान् कार्य्यं व्रतमनुत्तमम्॥
मासि मासि फलाहारः फलदायी भवेन्नृप।
व्रतमेतत्तु कुर्व्वीत भक्त्या ब्राह्मणभोजनम्॥
स्नानप्राशनयोश्चापि विधानं शृणु सुव्रतम्।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्॥
तिलाः सर्षपजं कल्कश्चितम्हद्वापि सुव्रत।
दूर्व्वाकल्क घृतञ्चापि गोशृङ्गक्षालनं जलं।
जाती गुल्म विनिर्य्यासःप्रशस्तं स्नानकर्म्मणि।
दूर्व्वाकल्कघृतं, दूर्व्वाकल्कघृतयुतं।
गोशृङ्गक्षालनं, येन गोशृङ्गं क्षाल्यते।
जातीगुल्म विनिर्यासं, समूलशाखजातीपल्लवम्।
प्राशनेचाप्यथैतानि सर्व्वपापहराणि वै॥
आदौ कृत्वा भाद्रपदे यथा संख्यं विदुर्बुधाः।
इत्थं वर्षान्तमासाद्य भोजयित्वा द्विजोत्तमान्।
दिव्यान् भौमान् महादेव ततस्तेभ्यो निवेदयेत्॥

---

* जातिजीरकेति क्वचित् पाठः।

देवकुले भवा, दिव्या, इतरे भौमाः।

फलानि चाथ हैमानि यथा शक्त्या क्वतानि तु॥
सवत्सामथवा धेनुं भूमिं शस्यान्विता* मथ।
प्रासादमथवा भौमं सर्व्वधान्यसमन्वितं॥

भौमप्रासादं, राजगृहतुल्यं गृहं।

दद्याद्रत्नानि वस्त्राणि ताम्रपात्रं सविद्रुमम्।
शक्तियुक्तस्य चैतानि दरिद्रस्य च मे शृणु॥
फलानि पुष्पाणि च तथा तिलचूर्णानि तानि तु।
भोजयित्वा द्विजान् दद्याद्राजतानि फलानि च॥
धातूरक्तं वस्त्रयुग्ममाचार्य्याय निवेदयेत्॥
सहिरण्यं महादेवं पञ्चरत्नसमन्वितम्।
इत्थं समाप्यते सम्यगव्दान्ते तात पारणम्†॥
इत्येषा वै पुण्यतमा सप्तमी दुरितापहा।
यामुपोष्य नराः सर्व्वे यान्ति सूर्य्यसलोकतां॥
पूज्यमानाः सदा देवैर्गन्धर्वाप्सरसां गणैः।
अनया मानवो यस्तु पूजयेद्भास्करं सदा॥
दारिद्र्यदुःखदुरितैर्म्मुक्तो याति दिवाकरम्।
ब्राह्मणो मोक्षमायाति क्षत्रियश्चन्द्रतां व्रजेत्॥
वैश्यो धनदसालोक्यं शूद्रो विप्रत्वमाप्नुयात्।
अपुत्रो लभते पुत्रं दुर्भगा सुभगा भवेत्॥
विधवा या सती भक्त्या अनया पूजयेद्रविं।

---

* भूमिं शस्यान्विता मिति पुस्तकान्तरे पाठः।

† चाब्दिकमिति पाठान्तरं।

नान्यजन्मनि वैधव्यं नारी प्राप्नोति मानद॥
चिन्तामणिसमा ह्येषा विज्ञेया फलसप्तमी।
पठतां शृण्वतां भक्त्या सर्व्वकामप्रदा स्मृता॥

इति भविष्यत्पुराणोक्तं फलसप्तमीव्रतम्॥

———000———

अगस्त्य उवाच।

मासि भाद्रपदे प्राप्ते शुक्लपक्षे सुरेश्वरः।
सप्तम्यामुपवासेन पुत्रप्राप्तिप्रदं व्रतम्॥
षष्ठ्यां चैव सुसंकल्प्य सप्तम्यां पूजयेद्धरिं।

हरिं, विष्णुं नाममन्त्रैः पूजा।

देवै, ब्रह्मादिभिः तद्रूपाणि पुष्पाभिषेके।

देवैर्यमगतं देवंमातृभिः परिवारितम्॥
ततः प्रभाते विमले अष्टम्यां प्रयतो हरिं।
प्राग्विधानेन गोविन्दं अर्च्चयित्वा विधानतः॥

प्राग्विधानेन वैष्णवमार्गेण गोविन्दमिति विशेषेण गोपाल मन्त्रेण होमपूजा।

तस्याग्रतः कृष्णतिलैः सघृतैर्होममाचरेत्।
ब्राह्मणान् भोजयेत् भक्त्या यथाशक्त्या तु दक्षिणां॥
ततः स्वयं तु भुञ्जीत प्रथमं विल्वमेककम्।

विल्वप्राशने फलसप्तमीघूक्तो मन्त्रः।

पश्चाद्यथेष्टं भुञ्जीत स्नेहाद्यं षड्रसान्वितम्॥
प्रतिमासमनेनैव विधिनोपोष्य मानवः।
कृष्णाष्टमीमपुत्रोपि लभेत् पुत्रं न संशयः॥

वत्सरान्ते च गोयुग्मं कृष्णं देयं द्विजातये ।
इदं पुत्त्रव्रतं नाम मया ते परिकीर्त्तितम् ॥
एतत् कृत्वा नरः पापैः सर्व्वैरेव प्रमुच्यते ।

इति वाराहपुराणोक्तं पुत्त्रसप्तमीव्रतम् ।

———ooo———

ब्रह्मोवाच ।

कृष्णपक्षे तु माघस्य सर्व्वाप्तिं सप्तमीं शृणु ।
यामुपोष्य समाप्नोति सर्व्वान् कामान् धराधर ॥
पाषण्डादिभिरालापमकुर्व्वन् भानुतत्परः ।
पूजयेत् प्रणतो देवमेकाग्रमतिरंशुगं ॥
माघादिपारणं मासैः षड्भिः शुच्यन्तकं स्मृतं ।

शुच्यन्तकं, आषाढान्तिकम् ।

मार्त्तण्डं प्रथमं नाम द्वितीयोऽर्कः प्रकीर्त्तितः ।
तृतीयं चित्रभानुश्च विभावसुरतः परम् ।
भगेति पञ्चमो ज्ञेयः षष्ठोहंसः प्रकीर्त्तितः ॥
पूर्व्वेषु षट्सु मासेषु स्नानप्राशनयोस्तिलाः ।
श्रावणादिषु मासेषु पञ्चगव्यमुदाहृतं ।
स्नाने च प्राशने चैव प्रशस्तं पापनाशनं ॥
प्रतिमासन्तु देवस्य कृत्वा पूजा यथाविधि ।
विप्राय दक्षिणां दद्यात् श्रद्दधानः स्वशक्तितः ॥
पारणान्ते च देवस्य प्रीणनं भक्तिपूर्व्वकम् ।
कुर्व्वीत शक्त्या विधिवद्रविं शक्त्या दिवस्पतिं ॥

नक्तं भुञ्जीत वै विष्णोः तैलाद्याहारविवर्ज्जितम्।
कृष्णषष्ठ्यामुपोष्यैवं सप्तम्यामथवा दिने॥
एतामुषित्वा धर्म्मज्ञः हंसप्रीणनतत्परः।
सर्व्वान् कामानवाप्नोति यद्यदिच्छति चेतसा॥
ख्याता लोकेषु विख्याता सर्व्वाप्तिरिति सप्तमी।
कृताभिलषिता ह्येषा प्रारब्धा कर्म्मतत्परैः॥
पूरयत्यखिलान् कामान् आश्रितानां दिने दिने।

इति श्रीभविष्यत्पुराणोक्तं सर्व्वाप्तिसप्तमीव्रतम्।

———ooo———

ब्रह्मोवाच।

सप्तम्यां शुक्लपक्षे तु फाल्गुन्यां यो यजेन्नरः।
जपेद्दलीति देवस्य नाम भक्त्या पुनः पुनः॥
देवार्च्चनं वाष्टशतं कृत्वैवं तु जपेच्छुचिः।
स्नातः प्रस्थानकाले तु उत्थाने स्खलिते क्षुते॥
पाषण्डान् पतितांश्चैव तथैवान्त्यावशायिनः।
नालापयेत् तथा भानुमर्च्चयेच्छ्रद्धयान्वितः।
इदञ्चोच्चारयेद्भानुं मनसा ध्यानतत्परः॥
हंस हंस कृपालो त्वं अगतीनां गतिर्भव।
संसारार्णवमग्नानां त्राता भव दिवाकर॥
एवं प्रसाद्योपवासं कृत्वा नियतमानसः।
पूर्व्वाह्णएव वान्येद्युः सकृत् प्राश्यार्ज्जुनीयकं॥
आर्ज्जुनीयकं, सकृद्गोमयं।
स्नात्वार्च्चयित्वा हंसेति पुनर्नाम प्रकीर्त्तयेत्।

वारिधारात्रयंचैव निक्षिपेद्देवपादयोः ॥
चैत्र वैशाखयोश्चैव तद्वज्ज्येष्ठे च पूजयेत् ।
मर्त्त्यलोके गतिं श्रेष्ठां कृत्वा प्राप्नोति वै नरः ॥
उत्क्रान्तश्च व्रजेत् कृष्ण दिव्यहंसमयं शुभम् ।
धर्म्मध्वजप्रसादाद्वै संक्रन्दनसमो भवेत् ।
आषाढ़े श्रावणे चैव मासि भाद्रपदे तथा ॥
मासि चाश्वयुजे चैव मनेन विधिना नरः ।
उपोष्य संपूज्य तथा मार्त्तण्डेति च कीर्त्तयेत् ॥
गोमूत्रप्राशनात्सूर्य्यपुरं गत्वा महीयते ।
आराधितस्य जगतामीश्वरस्य कृतात्मनः* ॥
उत्क्रान्तिकाले स्मरणं भास्करस्य तथा श्रुते ।
चौरस्य प्राशने कृष्ण विधिरेष मयोदितः ॥
कार्त्तिकादि यथा न्यायं कुर्य्यान्मासचतुष्टयम् ।
तेनैव विधिना कृत्वा भास्करेति प्रकीर्त्तयेत् ॥
स याति भानुसालोक्यं भास्करानुरतिः क्षये† ।
प्रतिमासं द्विजातिभ्यो दद्याद्दानं यथेच्छया ॥
चातुर्म्मास्ये तु संपूर्णे कुर्य्यात् पुस्तकवाचनं ।
कथाश्चा भास्करस्येति तत्कीर्त्तनमथापि वा ॥
धर्म्मश्रवणमिष्टन्तु सदा धर्म्मध्वजस्य च ।

धर्म्मध्वजः, सूर्य्यः ।

वाचकं पूजयित्वा तु तस्मात् कार्य्यं च श्रद्धया ।

---

* चव्ययात्मनेति क्वचित् पाठः ।

† भास्करं स्मरति चये इति पाठान्तरं ।

आद्यमन्नेन पक्षेन होमेन च द्विजेन तु॥
द्वितीयेन च तथा शुक्ल मभीष्टं भास्करस्य हि।
एवमन्ते गतिश्रेष्ठ देवनामानुकीर्त्तयेत्॥
प्राप्नोति त्रिविधान् कृष्ण त्रिलोकान्मानवः सदा।
कथितं पारणं यत्ते तथेमङ्गोधराधर॥
आधिपत्यं तथा भोगांस्तेन प्राप्नोति मानुषः।
द्वितीयेन तथा भोगान् गोत्रारेः प्राप्नुयान्नरः॥

गोत्रारि, रिन्द्रः।

सूर्य्यलोकं तृतीयेन पारणेन तथाप्नुयात्।
एवमेतत् समाख्यातं गतिप्रापकमुत्तमम्॥
विधानं देवशार्दूल यदुक्तं सप्तमीव्रतम्।
यस्त्वेतां सप्तमीं कुर्य्यात् त्रिगतिं श्रद्धयान्वितः॥
तथा भक्त्या च वै नारी प्राप्नोति त्रिविधां गतिं।
एषा पुण्या पापहरा त्रिगतिः समुदाहृता।
आराधनाय शास्त्रेण सदा भानोर्गतिप्रदा॥
पठतां शृण्वतांश्चैव सर्व्वपापभयापहा।
तथा कर्म्मसु पुण्येषु त्रिवर्गा, ज्येष्ठदा सदा।

त्रिवर्गज्येष्ठदा, धर्म्मः।

अत्र व्रते हेलिनाम चातुर्मास्यत्रयसाधारण्यां
हंस-मार्त्तण्ड-भास्करनामानि प्रातिस्विकानि।

इति भविष्यत्पुराणोक्तं त्रिगतिसप्तमीव्रतम्।

आदित्य उवाच।

माघमासे तु शुक्लायां सप्तम्यां समुपोषितः।

पूजयेद्यस्तु मां भक्त्या तस्याहं प्रभुतां व्रजेत् ॥

समुपोषितः, षष्ठ्यां।

एवञ्चोभय सप्तम्यां मासि मासि सुरोत्तम।
यस्तुमां पूजयेद्भक्त्या स्वमेकमेकमादरात् ॥

स्वमेकः, सम्बत्सरः।

प्रयच्छामि सुतान् तस्य ह्यात्मनोह्यङ्गसम्भवान्।
वित्तं यशस्तथा पुत्रानारोग्यपरमं सदा।
माघमासे तु यो ब्रह्मन् शुक्लपक्षे जितेन्द्रियः ॥
पाषण्डान् पतितानन्यान् जल्पन्नविजितेन्द्रियः।
उपोष्य विधिवत्षष्ठ्यां श्वेतमाल्यविलेपनैः।
पूजयित्वा तु मां भक्त्या निशि भूमौ स्वपेद्बुधः ॥
पुनरुत्थाय सप्तम्यां कृत्वा स्नानादिकक्रियां।
पूजयित्वा तु मां वीरहोमं ब्रह्मन् समाचरेत् ॥
पूजयित्वा हरिं भक्त्या हविषा पद्मलोचनम्।

वीरहोम, मग्निहोमं हरिविष्णुरूपं।

दध्योदनेन पयसा पायसेन द्विजांस्तथा ॥
तस्यैव कृष्णपक्षस्य षष्ठ्यां सम्यगुपोषितः।

तस्यैवेति, माघमासस्य।

रक्तोत्पलैः सुगन्धाद्यैरक्तपुष्पैस्तु पुजयेत्।
एवं यः पूजयेद्भक्त्या नरो मां विधिवत्सदा ॥
उभयोरपि देवेन्द्र स पुत्रं लभते फलम्।

इत्यादित्यपुराणोक्तं पुत्रसप्तमीव्रतम्।

———000———

ब्रह्मोवाच।

शुक्लपक्षस्य सप्तम्यां यदा ऋक्षङ्गो भवेत्।
तदा पुण्यतमा प्रोक्ता सप्तमी पापनाशिनी॥

करो, हस्तः।

अयं हि योगो बहुले श्रावणे मासि सम्भवति।
तस्यां संपूज्य देवेशं चित्रमानुज्ञगहतुकम्।
सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः॥
यश्चोपवासं कुरुते तस्यां नियतमानसः।
सर्व्वपापविनिर्म्मुक्तः सूर्य्यलोके महीयते।
दानं यद्दीयते किञ्चित्तमुद्दिश्य दिवाकरम्॥
होमो वा क्रियते तत्र तत्सर्व्वञ्चाक्षयं भवेत्।
एका ऋग्वेदपुरतो जप्ता श्रद्धापरेण तु॥
ऋग्वेदस्य समस्तस्य यत्कृते तत्फलं ध्रुवं।
सामवेदफलं साम यजुर्व्वेदे फलं यजुः॥
अथर्व्वणोथर्व्वणश्च निखिलं यत्कृते फलम्।
यतः पापमशेषेण नाशयत्यत्र भास्करः॥
करर्क्षा सप्तमी कृष्णा तेनोक्ता पापनाशिनी।
अस्यां समभ्यर्च्य रविं याति सौमनसं पुरं॥
विमानवरमारुह्य कर्व्वूरोद्भवमुत्तमम्।
सौमनसम्पुरम्, देवलोकं, कर्व्वूरं, दुर्व्वर्णं।
तेजसा रविसङ्काशः प्रभया कविसन्निभः॥

कान्त्याग्नेयसमः क्षणं शौर्य्ये हरिसमः सदा।
मोदते तत्र सुचिरं वृन्दारकगणैः सह।

इति भविष्यत्पुराणोक्तं पापनाशिनीव्रतम्।

———0*0———

ब्रह्मोवाच।

शुक्लपक्षे तु सप्तम्यां मासि भाद्रपदेऽच्युत।
प्रणम्य शिरसा देवं पूजयेत् सप्तवाहनम्॥
पुष्पधूपादिभिर्व्वीर कुतपानाञ्च तर्पणैः।

कुतपानां, ब्राह्मणादीनां

पाषण्डादिभिरालापमकुर्व्वन्नियतात्मवान्।
विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः।
तिष्ठन् ब्रुवन् प्रस्थितस्य क्षुतप्रस्खलितादिषु।
आदित्यनामस्मरणं कुर्य्यादुच्चारणं तथा॥
अनेनैव विधानेन मासान् द्वादश वै क्रमात्।
उपोष्य पारणे पूर्णे समभ्यर्च्य जगद्गुरुम्॥
पुण्येन श्रवणेनेह प्रणयेत्पुष्टिमाप्नुयात्।
एवं यः पुरुषः कुर्य्यादादित्याराधनं शुचिः॥
नारी वा स्वर्गमभ्येत्य सानन्त्यं फलमश्नुते।

इति भविष्यत्पुराणोक्तमनन्तफलसप्तमीव्रतम्।

———000———

ब्रह्मोवाच।

शुक्लपक्षे समभ्यर्च्य पुष्पधूपादिभिः शुचिः।

श्रावणेमासि सप्तम्यां देवाग्रं समिवाहनम्॥
प्राप्येह विपुलं देवं धर्म्मानन्तरमक्षयम्।
अमूनलोकमायाति दिव्यं खगपतेः शुभम्॥
धर्म्मानन्ततरमर्थं खगपति, रत्नादित्यः।
पाषण्डादिभिरालापमकुर्व्वन्नियतात्मवान्॥
विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः।
अव्यङ्गं देवदेवस्य बर्षे वर्षे नियोजयेत्॥

अव्यङ्गं, एकवर्णः शोभनकार्पाससूत्रनिर्म्मित सर्पनिर्म्मोका-कृतिरन्तःसुषिरो द्वाविंशत्यधिकशताङ्गुलपरिमितमध्यमोष्टोत्त-रशतांगुलपरिमितोक्तस्त्वइति वोद्धव्यम्। एतत्सर्व्वं भविष्यत्पुराणे एव साम्बोपाख्याने विस्तरेणोक्तम्।

सप्तम्यामत्र देवाग्रं शुभं शुक्लं नवन्तथा।
खभवेषु यथान्येषु पवित्राण्यत्र वै विदुः॥
तथा देवस्य मासेस्मिन्नव्यङ्गः परिगीयते।

खभवेषु, देवेषु।

यस्त्वारोपयते भक्त्या भास्करस्य नरोऽच्युत।
अव्यङ्गं विधिवत् कृत्वा भक्त्या ब्राह्मणभोजनम्॥
शङ्खतूर्य्यनिनादैश्च ब्रह्मघोषैश्च पुष्कलैः।
स दिव्यं यानमारूढो लोकमायाति हेलिनः॥
अनेनैव विधानेन मासान् द्वादश वै क्रमात्।
उपोष्य पारणे पूर्णे दत्त्वा विप्राय दक्षिणाम्॥
एवं यः पुरुषः कुर्य्यादादित्याराधनं शुचिः।

स गच्छेत्तु परं लोकं समुद्दिश्य दिवाकरम् ॥
होमार्चा क्रियते तत्र तत्सर्व्वं चाक्षयं भवेत् ।

इति श्रीभविष्यत्पुराणोक्तमव्यङ्गसप्तमीव्रतम् ।

———ooo———

पुलस्त्य उवाच ।

अन्यामपि प्रवक्ष्यामि नाम्ना तु फलसप्तमीम् ।
यामुपोष्य नरः पापैर्विमुक्तः स्वर्गभाग्भवेत् ॥
मार्गशीर्षे शुभे मासि पञ्चम्यां नियतव्रतः ।
षष्ठ्यामुपोष्य कमलं कारयित्वा तु काञ्चनम् ॥
शर्करासंयुतं दद्यात् ब्राह्मणाय कुटुम्बिने ।
रूपन्तु काञ्चनं कृत्वा फलस्यैकस्य धर्म्मवित् ॥
दद्याद्द्विकालवेलायां भानुर्म्मे प्रीयतामिति ।
भक्त्या तु विप्रान् संपूज्य सप्तम्यां चीरभोजनम् ॥
कृत्वा कुर्य्यात्फलत्यागं यावत्स्यात् कृष्णसप्तमी ।
तामुपोष्य विधिं कुर्य्यादनेनैव क्रमेण तु ॥
तद्वद्धेमफलं दद्यात् सुवर्णकमलान्वितम् ।
शर्करापात्रसंयुक्तं वस्त्रमालाविभूषितम् ॥
संवत्सरमनेनैव विधिनोभयसप्तमीम् ।
उपोष्य दद्यात् क्रमशः सूर्य्यमन्त्रमुदीरयेत् ॥
भानुरर्को रविर्ब्रह्मा सूर्य्यः शक्रो हरिः शिवः ।
श्रीमान्विभावसुस्त्वष्टा वरुणः प्रीयतामिति ।
प्रतिमासञ्च सप्तम्यां एकैकं नाम कीर्त्तयेत् ॥

प्रतिपक्षं फलत्यागमेकं कुर्व्वन् समाचरेत्।
व्रतान्ते विप्रमिथुनं पूजयेद्वस्त्रभूषणैः॥
शर्कराकलशं दद्याद्धेमपुष्पसमन्वितम्।
यथा न विफलाः कामास्त्वद्भक्तानां सदा रवे।
तथानन्तफलावाप्तिरस्त्वस्तु जन्मनि जन्मनि॥
इमामनन्तफलदां यः कुर्य्यात्फलसप्तमीम्।
सर्व्वपाप विशुद्धात्मा सूर्य्यलोके महीयते॥
सुरापानादिकं पापं यद्यद्यपुराकृतम्।
तत्सर्व्वं नाशमायाति यः कुर्य्यात् फलसप्तमीम्॥
कुर्व्वाणः सप्तमीमेतां सततं रोगवर्ज्जितः।
भूतान् भव्यांश्च पुरुषांस्तारयेदेकविंशतिम्।

इति पद्मपुराणोक्तं फलसप्तमीव्रतम्।

———000———

विष्णुरुवाच।

कुले जन्म तथारोग्यं धनञ्चैवेह दुर्लभम्।
तृतीयं प्राप्यते येन तन्मे वद जगत्पते॥

ब्रह्मोवाच।

यो मार्गशीर्षे सितसप्तमेऽह्नि
हस्तार्कयोगे जगतः प्रसूतिं।
संपूज्य भानुं विधिनोपवासी
स्रग्गन्धधूपान्नवनोपहारैः॥
गृहीतगव्यं प्रतिशय्यपूजा
दानादियुक्तं व्रतमब्दमेकम्।

यव्यो, मासः।

दद्याच्च दानं द्विजपुङ्गवेभ्य

स्तत्कथ्यमानं विनिबोध वीर॥

वज्रं यथा व्रीहियवं हिरण्यं

यवान्नमम्भःकरकान्नपात्रम्।

घृतंपयोन्नं गुड़फाणिताढ्यं

दद्यात्तथा वस्त्रमनुक्रमेण।

गव्येच यव्ये विधिचोदिते च

तस्यां तिथौ लोकगुरुं प्रपूज्य।

करकान्नपात्रं, अन्नपूर्णपात्रपिहित

उदकपूर्णकलसं। गुड़फाणिताढ्यं गुड़ान्नमन्नं।

अशीतधान्यानि विशुद्धिहेतोः॥

संप्राशनानीह निबोध तानि

गोमूत्रमम्भो घृतमामशाकं।

दूर्व्वादधिव्रीहियवास्तिलाश्च

सूर्य्यांशुतप्तं जलमंबुजानि।

चीरञ्च मासक्रमशोऽपि योज्यं

कुले प्रधाने धनधान्यपूर्णे॥

पद्माव्रते ध्वस्तसमस्तदुःखे

प्राप्नोति जन्माविकलेन्द्रियश्च।

भवत्यरोगी मतिमान् सुखी च

पद्मा व्रतं लक्ष्मीव्रते॥

इति भविष्यपुराणोक्तं* नयनप्रदसप्तमीव्रतम्।

———000———

पुलस्त्य उवाच।

विशोक सप्तमीं तद्वत् वक्ष्यामि मुनिपुङ्गव।
यामुपोष्य नरः शोकं न कदाचिदिहाश्नुते॥
माघे कृष्णतिलैः, स्नातः पञ्चम्यां शुक्लपक्षतः।
कृताहारः कृशरया दन्तधावनपूर्व्वकम्॥
उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि।
ततः प्रभाते चोत्थाय कृतस्नानजपः शुचिः॥
कृत्वा तु काञ्चनं पद्ममर्कोऽयमितिपूजयेत्।
करवीरैश्च पुष्पैश्च रक्तवस्त्रयुगेन च॥
यथा विशोकं भुवनं तथैवादित्य सर्व्वदा।
तथा विशोकोमेवास्तु त्वद्भक्तेः प्रति जन्मनि॥
एवं संपूज्य षष्ठ्यां तु भक्त्या संपूजयेद्द्विजान्।
सुप्त्वा संप्राश्य गोमूत्रमुत्थाय कृतनित्यकः॥
संपूज्य विप्रं यत्नेन गुड़पात्रसमन्वितं।
सुसूक्ष्मं वस्त्रसंयुतं* ब्राह्मणाय निवेदयेत्॥
अतैललवणं भुङ्क्ते सप्तम्यां मौनसंयुतः।
ततः पुराणश्रवणं कर्त्तव्यं भूतिमिच्छता॥
अनेन विधिना सर्व्वमुभयोरपि पक्षयोः।
कुर्य्याद्यावत् पुनर्म्माघशुक्लपक्षस्य सप्तमीम्॥
व्रतान्ते कलसं दद्यात् सुवर्णकमलान्वितम्।

---

* तृतीयप्रदइति पुस्तकान्तरे।

† तद्वस्त्रयुग्मं पञ्चमेति क्वचित् पुस्तके पाठोऽस्ति।

शय्यां सोपस्करां दद्यात् कपिलां गां पयस्विनीं।
अनेन विधिना यस्तु वित्तशाठ्यविवर्ज्जितः॥
विशोकसप्तमीं कुर्य्यात् स याति परमां गतिं।
यावज्जन्मसहस्राणि सार्द्धकोटिशतं भवेत्॥
तावन्नशोकमभ्येति रोगदौर्गत्यवर्ज्जितः।
यं यं कामयते कामं तं तं प्राप्नोति पुष्कलं॥
निष्कामः कुरुते यस्तु स परं ब्रह्म गच्छति।

इति भविष्यत्पुराणोक्तं विशोकसप्तमीव्रतम्।

———ooo———

अगस्त्य उवाच।

अथापरं महाराज व्रतमारोग्यसंज्ञितम्।
कथयामि परं पुण्यं सर्व्वपापप्रणाशनं॥
तस्यैव माघमासस्य सप्तम्यां समुपोषितः।
पूजयेद्भास्करं* देवं विश्वरूपं सनातनं॥
आदित्य भास्कर रवे भानो सूर्य्य दिवाकर।
प्रभाकरेति संपूज्यो देवः सर्व्वेश्वरो विभुः॥
षष्ठ्यां चैव कृताहारः सप्तम्यामुपवासकृत्।
अष्टम्याञ्चैव भुञ्जीत एष एव विधिः क्रमः।
अनेन वत्सरं पूर्णं विधिना योऽर्च्चयेद्रविम्॥
तस्यारोग्यं धनं धान्यमिह जन्मनि जायते।
परत्र च सुखं स्थानं यद्गत्वा न निवर्त्तते॥

---

* प्रीणयेत् इति पुस्तकान्तरे पाठः।

इति वराहपुराणोक्तमारोग्यसप्तमीव्रतम्।

सुमन्तुरुवाच।

हन्त ते संप्रवक्ष्यामि सूर्य्यव्रतमनुत्तमम्।
धर्म्मकामार्थमोक्षाणां प्रतिपादकमुत्तमम्॥
पौषे मासे च सप्तम्यां यः कुर्य्यान्नक्तभोजनं।
जितेन्द्रियः सत्यवादी स्नाति गोमूत्रगोरसैः॥
पक्षयोः सप्तमीं यत्नादुपवासेन यो नयेत्।
त्रिसन्ध्यमर्च्चयेद्भानुं शाण्डिलेयञ्च सुव्रत॥

शाण्डिलेयोऽग्निः।

अधःशायी भवेन्नित्यं सर्व्वभोगविवर्ज्जितः।
मासि पूर्णे तु सप्तम्यां घृतादिभिररिन्दम॥
कृत्वा स्नानं महापूजां सूर्य्यमन्त्रेण भारत।
नैवेद्यमोदनप्रस्थं क्षीरसिद्धं निवेदयेत्॥
भोजयित्वा द्विजानष्टौ सूर्य्यभक्तांस्तु सामगान्।
गां च दद्यान्महाराज कपिलां भास्कराय च॥
य एवं कुरुते पुण्यं सूर्य्यव्रतमनुत्तमं।
तस्य पुण्यफलं वच्मि सर्व्वकामसमन्वितम्॥
सूर्य्यकोटिप्रतीकाशैर्विमानैः सर्व्वकामिकैः।
अप्सरोगणसम्पूर्णैर्महाविभवसंयुतैः॥
सङ्गीतनृत्यनिर्घोषैर्गन्धर्व्वगणशोभितैः।
दोधूयमानसमरैस्तूयमानः सुरासुरैः॥

सहस्रकिरणाद्भानोर्द्वैश्वर्य्यसमन्वितः।
स याति परमं स्थानं यत्रास्ते रविरंशुमान्॥
रोमसंख्यातया तस्यास्तत्प्रसूतिकुले युवा।

तस्याः, कपिलायाः।

तावद्युगसहस्राणि सूर्य्यलोके महीयते।
त्रिःसप्तकुलजैः सार्द्धं भोगान् भुक्त्वा यथेप्सितान्॥
ज्ञानयोगं समासाद्य सूर्य्यस्य निलयं व्रजेत्।
माघमासे तु संप्राप्ते यः कुर्य्यान्नक्तभोजनम्॥
पिण्याकं घृतसंमिश्रं भुञ्जानः सञ्जितेन्द्रियः।
उपवासश्च सप्तम्यां भवेदुभयपक्षयोः॥
घृताभिषेकमष्टम्यां कुर्य्याद्भानोर्नराधिप।
गाञ्च दद्याद्दिनेशाय तरुणीं नीलसन्निभां॥
गत्वादित्यपुरं रम्यं भोगान् भुङ्क्ते यथेप्सितान्।
फाल्गुने मासि राजेन्द्र यः कुर्य्यान्नक्तभोजनम्॥
श्यामाकैःक्षीरनीवारैः जितक्रोधो जितेन्द्रियः।
षष्ठ्यां वाप्यथ सप्तम्यामुपवासपरोभवेत्॥
अष्टम्यां तु महास्नानं पञ्चगव्यघृतादिभिः।
वल्मीकाग्रादिमृद्भिश्च गोमूत्रसक्तादिभिः॥
त्वग्भिश्च क्षीरवृक्षाणां स्नापयित्वा प्रपूजयेत्।
सौरभेयीं ततोदद्यात् रक्ताभां रश्मिमालिने॥

सौरभेयी, गौः।

गत्वादित्यपुरं रम्यं मोदते शाश्वतीः समाः।

मासि चैत्रे तु संप्राप्ते यः कुर्य्यान्नक्तभोजनम् ॥
शाल्यन्नं पयसायुक्तं भुञ्जानः संयतेन्द्रियः।
भानवे पाटलां दद्याद्वैष्णवीं तरुणीं नृप ॥

वैष्णवी, गौरेव।

पुष्परागमयैर्य्यानैर्नानाहंसानुयायिभिः।
गच्छेत्सूर्य्यपुरं रम्यं दुष्प्रापमकृतात्मभिः ॥
वैशाखे मासि राजेन्द्र यः कुर्य्यान्नक्तभोजनम्।
दध्योदनञ्च भुञ्जानो जितक्रोधो जितेन्द्रियः ॥
गोष्ठशयी ह्यधःशायी निशायामेकवस्त्रधृक्।
नियमञ्च यथोद्दिष्टं सामान्यं सर्व्वमाचरेत् ॥

सामन्यो, नियमः पाषण्डाद्यसम्भाषणादिः।

वैशाख्यां पौर्णमास्यां तु कुर्य्यात् स्नानं घृतादिभिः ॥
सूर्य्यायालंकृतान्त्वेकां दद्याद्गान्तरुणीं नृप।
शङ्खकुन्देन्दुवर्णाभैर्म्महायानैरलंकृतैः ॥
श्वेतैर्गरुड़संयुक्तैर्गच्छेदर्कस्य मन्दिरम्।
सर्व्वातिशयरूपाभिर्नारीभिः परिवारितः ॥
नीलोत्पलसुगन्धाभिर्म्मोदते कालमक्षयम्।
मासि ज्येष्ठे महावाहो यः कुर्य्यान्नक्तभोजनम् ॥
भुञ्जानः पायसक्षीरं सर्पिषा मधुना सह।
वीरासनो निशायां स्यादहर्गाः समनुव्रजेत् ॥

वीरासनं, अनुपविश्यावस्थानम्।

हितकारी गवां नित्यं गवां हिंसाविवर्जितः ॥
उभयोरपि सप्तम्यां कुर्य्यात्सन्ध्यादिकं विधिम्।

उभयोः पक्षयोरितिशेषः ।

सूर्य्याय धेनुं दद्याच्च धूम्रवर्णामलङ्कृताम् ।
नीलोत्पलसमप्रख्यै र्महायानैरनूपमैः ॥
महासिंहनिबद्धैश्च मोदते कालमक्षयम् ।
आषाढे मासि यः कुर्य्यात्संयतो नक्तभोजनम् ॥
षष्टिकौदनसंमिश्रं सेवदश्नीत गोरसम् ।
गां दद्याच्च महाराज भास्कराय शुभाननाम् ॥
सामान्यञ्च विधिं कुर्य्यात्प्रागुक्तो योमयानघ ।
शुद्धस्फटिकसङ्काशैर्य्यानै र्वर्हिणवाहनैः ॥
अणिमादिगुणैर्युक्तः सूर्य्यवद्विचरेद्दिवि ।
संप्राप्ते श्रावणे मासि यः कुर्य्यान्नक्तभोजनम् ॥
क्षीरषष्ठिकयुक्तान्नं सर्व्वसत्त्वहिते रतः ।
पीतवर्णाञ्च गान्दद्याद्भास्कराय महात्मने ॥
सामान्यमखिलङ्कुर्य्याद्विधानं यत्प्रकीर्त्तितम् ।
सुविचित्रैर्महायानैर्हंससारसयायिभिः ॥
गत्वादित्यपुरं श्रीमान् पूर्व्वोक्तं लभते फलम् ।
वीर भाद्रपदे मासि यः कुर्य्यान्नक्तभोजनम् ॥
हुतशेषं हि विश्वात्मन् वृक्षमूलमुपाश्रितः ।
स्वप्यादायतने रात्रौ सर्व्वभूतानुकम्पया ॥
दद्याद्गां तरुणीं वीर भास्कराय महात्मने ।
निशाकरसमप्रख्यैर्वज्रवैदूर्य्यचित्रितैः ॥
चक्रवाकसमायुक्तैर्व्विमानैः सार्व्वकामिकैः ।
गत्वादित्यपुरं रम्यं ससुरासुरवन्दितः ॥

मोदते स महायानैर्यावदाहूतसंप्लवं।
श्रीमानश्वयुजे मासि यः कुर्य्यान्नक्तभोजनम्॥
घृताशनञ्च भुञ्जानो जितक्रोधो जितेन्द्रियः।
दद्याद्गां पद्मवर्णाभां भानोरमिततेजसे॥
पृष्ठाभरणसम्पन्नां तरुणीञ्च पयस्विनीं।
स्वच्छमौक्तिकसङ्काशैरिन्द्रनीलोपशोभितैः॥
जीवञ्जीवकसंयुक्तैर्विमानैः सर्व्वकामिकैः।
गच्छेद्भानुसलोकत्वं तेजसा रविसन्निभः॥
कान्त्या विधुसमो राजन् प्रभया भृगुसन्निभः।
राजेन्द्र कार्त्तिके मासि यः कुर्य्यान्नक्तभोजनम्॥
क्षीरोदनञ्च भुञ्जानः सत्यवादी जितेन्द्रियः।
दिवाकराय गां दद्यात् ज्वलनार्कसमप्रभाम्॥
पूर्व्वोक्तञ्च विधिङ्कुर्य्यात् सूर्य्यतुल्यो भवेन्नृप।
कालानलशिखाप्रख्यैर्महायानैर्नगोपमैः॥
महासिंहक्रतोद्भूतैः सूर्य्यवत् मोदते सुखी।
मार्गशीर्षे शुभे मासि यः कुर्य्यान्नक्तभोजनम्॥
यवान्नं पयसा युक्तं भुञ्जानः संयतेन्द्रियः।
प्रयच्छेद्गां तथा कृष्णां नानालङ्कारभूषिताम्॥
सूर्य्याय कुरुशार्दूल विधिं वापि समाचरेत्।
सितपद्मनिभैर्यानैः श्वेताम्बरयसंयुतैः॥
गत्वादित्यपुरं रम्यं प्रभया परयान्वितः।
अहिंसा, सत्यवचन, मस्तेयः, क्षान्ति, रार्जवम्॥
त्रिषवणाग्निहवनं भूशय्या नक्तभोजनम्।

पञ्चयोरुपवासेन सप्तम्यां कुरुनन्दन ॥
एतान् गुणान् समाश्रित्य कुर्व्वाणो व्रतमुत्तमम् ।
सप्तम्युभयमाख्यातं सर्व्वरोगभयापहम् ॥
सर्व्वपापप्रशमनं सर्व्वकामफलप्रदम् ।
इत्येवमादिनियमैश्चरेत् सूर्य्यव्रतं सदा ।
य इच्छेद्विपुलं स्थानं भानोरमिततेजसः ॥

इति भविष्यत्पुराणोक्तमुभयसप्तमीव्रतम् ।

———ooo———

श्रीकृष्ण उवाच ।

अथान्यदपि ते वच्मि दानं पापविनाशनम् ।
आदित्यमण्डकं नाम समीहितफलप्रदं ॥
यवचूर्णेन शुभ्रेण कुर्य्याद्गोधूमजेन वा ।
सुपक्कं भानुविम्बाभं गुड़ं गव्याज्यपूरितं ॥
सम्पूज्य भास्करं भक्त्या तदग्रे मण्डलं शुभम् ।
रक्तचन्दनजं कृत्वा कौङ्कुमं वा विशेषतः ॥
मण्डकं तत्र संस्थाप्य रक्तपुष्पैः प्रपूजितम् ।
सहिरण्यं सवस्त्रञ्च वित्तशाठ्यविवर्जितः ॥
ब्राह्मणाय प्रदातव्यं मन्त्रेणानेन पाण्डव ।
आदित्यतेजसोत्पन्नं राज्ञः करविनिर्म्मितम् ॥
श्रेयसे मम विप्र त्वं प्रतीच्छापूपमुत्तमम ।
ब्राह्मणोपि पठेन्मन्त्रं गृह्णीयाद्भास्करप्रियम ॥
दत्तं भास्करभक्तेन स्वयं तद्भक्तिभावतः ।
कामदं धनदं धर्म्मं पुत्रदं सुखदं तथा ॥

आदित्यप्रीतये दत्तं प्रतिगृह्णातु मण्डकम्।
एवं कृत्वा नरोभक्त्या सर्व्वपापैः प्रमुच्यते॥
धनधान्यसमृद्धात्मा भूतात्मा भक्तवत्सलः।
आदित्याराधनपरस्ततः स्वर्गे महीयते।
इह चागत्य राजेन्द्र निजपुण्यस्य संक्षयात्॥
सर्व्वकामसमृद्धार्थो मण्डलाधिपतिर्भवेत्।
दातव्यो रथसप्तम्यां महादानसमो नृप॥
दातव्यः प्रतिवर्षञ्च फलमत्यन्तमीप्सता।
एकेनापि प्रदत्तेन बाल्ययौवन वार्द्धकैः॥
पापं प्रणाशमायाति बहुभिः पुण्यभाग्भवेत्।
गोधूमचूर्णजनितं यवचूर्णजं वा॥
आदित्यमण्डकमखण्डमदीनसत्त्वः।
कृत्वा द्विजाय विधिवत्प्रतिपादयेद्यो
नूनं भवत्यमितमण्डलमण्डनोऽसौ।

इति भविष्योत्तरोक्त मादित्यमण्डकव्रतम्।

——000——

ब्रह्मोवाच।

मार्त्तण्ड सप्तमीं कृष्ण अथान्यां वच्मि तेऽनघ।
पौषमासे सिते पक्षे सप्तम्यां समुपोषितः॥
सम्यक् संपूज्य मार्त्तण्डं मार्त्तण्ड इति वै जपन्।
पूजयेत्कुतपं भक्त्या श्रद्धया परयान्वितः॥

कुतपः सूर्य्यः।

पुष्प धूपोपहाराद्यैरुपवासैः समाहितः।

मार्त्तण्डेति जपन्नाम पुनस्तद्गतमानसः ॥
विप्राय दक्षिणां दद्यात् यथाशक्त्या खगध्वज ।
स्वपन् विबुद्धःस्खलितोमार्त्तण्डेति च कीर्त्तयेत् ॥
पाषण्डिभिर्विकर्म्मस्थैरालापञ्च विवर्जयेत् ।
गोमूत्रं गोमयं वापि दधिक्षीरमथापि वा ।
गोदेहतः समुद्भूतं प्राश्नीयादात्मशुद्धये ।
द्वितीयेऽह्नि पुनस्नात स्तत्रैवाभ्यर्च्चनं रवेः ॥
तेनैव नाम्ना सम्पूय दत्त्वा विप्राय दक्षिणां ।
ततो भुञ्जीत गोदेहसमूद्भूतसमन्वितम् ॥
एवमेवाखिलान मासान् उपोष्य प्रयतः शुचिः ।
दद्याद्गवाह्निकं विद्वान् प्रतिमासञ्च शक्तितः ।
पारितेच* पुनर्व्वर्षे यथा पूर्वं गवाह्निकम् ॥
दत्त्वा परगवे भूयः शृणु यत् फलमश्नुते ।
स्वर्णशृङ्गयः पञ्चगावः षष्ठञ्च वृषभन्नरः ॥
प्रतिमासं द्विजातिभ्यो दत्त्वा यत् फलमश्नुते ।
तदाप्नोत्यखिलंसम्यगव्रतमेतदुपोषितः ॥
तच्चलोकमवाप्नोति मार्त्तण्डोयत्र तिष्ठति ।
शाण्डिलेयसमः कृष्ण तेजसा नात्र संशयः ॥
शाण्डिलेयसमः अग्निसमः ॥

---

* प्रारब्धे चेति पुस्तकान्तरे पाठः ।

इति भविष्यत्पुराणोक्तं मार्त्तण्डसप्तमीव्रतम्।

—०००—

युधिष्ठिर उवाच।

यामुपोष्य नरःकामानाप्नोति मनसः प्रियान्।
तामिकां वद मे देव सप्तमीं पापनाशिनीं॥

श्रीकृष्ण उवाच।

भानोर्दिने सिते पक्षे अतीते चोत्तरायणे।
पुन्नामधेयनक्षत्रे गृह्णीयात् सप्तमीव्रतं॥

सव्रीहकांस्तिल यवान् सह माषमुद्गै
र्गोधूममांसमधुमैथुनकांस्यपात्रैः।
अभ्यञ्जनाञ्जनशिलातल चूर्णितानि
षष्ठीव्रती परिहरेद्दहनीष्टसिद्धैय॥

देवान् पितॄन् मुनिगणान् सजलाञ्जलीभिः
सन्तर्प्य पूज्य गगनाङ्गनहस्तदीपम्।
हुत्वानले तिलयवान् बहुशोष्टताक्तान्
भूमौ स्वपेत् हृदि निधाय दिनेशबिम्बं॥
यानि त्रयोदशदिनैरिह वर्जितानि
द्रव्याणि तानि परिहृत्यदिने* च षष्ठ्यां।
संप्राश्य शुद्धचणकानि ह वर्षमेकं
प्राप्नोति भारत पुमान् मनसेप्सितानि॥

चणकग्रहणं विवर्ज्जितान्तरोपलक्षणार्थं
मन्यथाव्रीह्यादिवर्ज्जनमनर्थकं स्यात्।

---

* परेद्युः षष्ठ्यामिति पुस्तकान्तरे पाठः।

इति भविष्योत्तरोक्तं त्रयोदशपदार्थवर्ज्जनसप्तमीव्रतम् ।

—000—

वसुदेव उवाच ।

नैमित्तिकान् ततोवच्ये यत्नांश्चात्र समाहितः ।
सप्तम्यां ग्रहणे चैव संक्रान्तिषु विशेषतः ॥

नैमित्तिकान् ततो वच्ये इत्यनेन श्लोकेन ग्रहणसंक्रान्तिषु साधारण्येन यत्नप्रतिज्ञा कृता तत्रसप्तमीयत्न तावदाह शुक्ल-पक्षस्येत्यादिना ।

शुक्लपक्षस्य सप्तम्यां हविं भुक्तैकदा दिवा ।
सम्यगाचम्य सन्ध्यायां वरुणं प्रणिपत्य च ॥

वरुणोत्र सूर्य्यः ।

इन्द्रियाणि तु संयम्य स तं ध्यात्वा स्वपेद्बुधः ।
दर्भशय्यागतोरात्रौ प्रातःस्नातः सुसंयुतः ।
सर्व्वस्यादौ तथैवान्ते पूर्व्ववद्वरुणं यजेत् ।
जुहुयाद्दक्षचस्त्वग्निं सूर्य्याग्निं परिकल्पयेत् ॥
सूर्य्याग्निकरणं वच्ये तर्पणं च समासतः ।
अस्त्रेणोङ्कारमुल्लिख्य सावित्र्याभ्युच्य वानले ॥

अस्त्रेण अस्त्रमन्त्रेण सावित्र्या सूर्य्यगायत्र्या ।

एतच्च सर्व्वं निक्षुभा*सप्तम्यामेवाभिहितं वेदितव्यम् ॥

प्रक्षिप्यास्तीर्य्य दर्भांश्च देशे भूमौ यथेप्सिते ।
प्रागग्रैरुदगग्रैश्च पात्राण्यालभ्य चक्रवत् ।
पवित्रं द्विकुशं कृत्वा साग्रं प्रादेशसम्मितम् ॥

---

* निम्बसप्तम्यामेवाभिहितमिति पुस्तकान्तरे पाठः ।

तेन पात्राणि संप्रोक्ष्य संशोध्य च विलोप्य च।
उदग्भागस्थिते पात्रे साग्निनाचोल्मुकेन च॥
पर्य्यग्निकरणं कृत्वा ततश्चोत्पवनं त्रिधा।
परिमृज्य स्रुचादींश्च दर्भैः संप्रोक्षितैश्च तैः॥
जुहुयात् प्रोक्षिते वह्नौ तत्रार्कं पूर्व्ववत् यजेत्।
भूमौ स्थितेन पात्रेण विस्तरेण तु पाणिना॥
वामेन यदुशार्दूल नान्तरिक्षे तु पूयते।

अन्तरिक्षे त्रिकादौ।

दक्षिणेन स्रुचौ गृह्य जुहुयात्सावकं बुधः
हृदयेन क्रियाः सर्व्वाः कर्त्तव्याः पूर्व्वचोदिताः।

हृदयेन हृदयमन्त्रेण।

अनेन हुत्वा सन्तर्प्य दद्यात् पूर्णाहुतिं ततः।
वरुणायादरान्माघे सप्तम्यां वरुणं यजेत्॥
यथा शक्त्या तु विप्रेभ्यः प्रदद्यात् खण्डवेष्टकान्।
दद्याच्च दक्षिणां शक्त्या प्राप्यते यागजं फलं॥
एवञ्च फाल्गुने सूर्य्यं चैत्रे टे वांशुमालिनम्।
वैशाखे मासि धातारं इन्द्रं ज्येष्ठे यजेद्रविम्॥
आषाढ़े श्रावणे मासि भगं भाद्रपदं तथा।
आश्विने चापि पर्जन्यं त्वष्टारं कार्त्तिकेय जेत्॥
मार्गशीर्षे तु मित्रञ्च पौषे विष्णुं यजेद्यदि।
सम्बत्सरेण यत् प्रोक्तं फलमिष्ट्वा दिने दिने॥
तत् सर्व्वं प्राप्नुयात् क्षिप्रं भक्त्या श्रद्धासमन्वितः।
एवं सम्बत्सरे पूर्णे कृत्वा वै काञ्चनं रथम्॥

सप्तभिर्वाजिभिर्युक्तां नानारत्नोपशोभिताम्।
आदित्यप्रतिमां मध्ये शुद्धहेम्ना कृतां शुभाम्॥
रत्नैरलंकृतां कृत्वा हेमपद्मोपरिस्थितां।
तस्मिन् रथवरे कृत्वा सारथिं चाग्रतः स्थितम्॥
वृतं द्वादशभिर्व्विप्रैः क्रमान्मासाधिपात्मभिः।
सर्व्वंकल्पज्ञमाचार्य्यं पूजयित्वा रथाग्रतः॥

मासाधिपाः प्रतिमासोक्ताः सूर्य्याः।
अतस्तद्भक्तिभावितैर्द्वादशभिर्विप्रै
र्व्वृतमाचार्य्यं पूजयेदित्यर्थः।

संचिन्त्यादित्यवत्तं वै वसुरत्नादिनार्चयेत्॥
एवं मासाधिपान् विप्रान् संपूज्याथ निवेदयेत्।
आचार्य्याय रथं चक्रं ग्रामं वासो महीं शुभाम्॥
माघान्मासाधिपेभ्यश्च द्वादशेभ्यो निवेदयेत्।
एवं भक्त्या यथा शक्त्या हेमरत्नादिभूषणम्॥
दत्त्वा तस्य नमस्कृत्य व्रतं पूर्णं निवेदयेत्।
अतऊर्द्ध्वं न दोषोस्ति व्रतस्य करणादिह॥
एवमस्त्विति विप्रेन्द्रैः सहाचार्य्यैः पुनः पुनः।
वक्तृचैराशिषोदत्त्वा प्रवदेत् प्रीयतामिति॥
आदित्यो येन कामेन यस्त्वयाराधितो व्रतैः।
तुभ्यं ददातु तं कामं संपूर्णं भवतु व्रतम्॥
विप्रेभ्यो गुणवद्भ्यश्च निस्वेभ्यश्च विशेषतः।
दीनान्धकृपणेभ्यश्च शक्त्या दत्त्वा च दक्षिणाम्॥
ब्राह्मणान् भोजयित्वा तु व्रतमेतत्समापयेत्।

कृत्वैवं सप्तमीमब्दं राजा भवति धार्म्मिकः॥
पुरुषश्च* भवेद्दाता भास्करस्यातिवल्लभः।
शतयोजन विस्तीर्णं निःसपत्नमकण्टकम्॥
त्रिःशतं मण्डलं भुङ्क्ते साग्रं वर्षशतं सुखी।
वित्तहीनोऽपि यो भक्त्या कृत्वा ताम्रमयं रथम्॥
दद्यात्† व्रतोपवासञ्च कृत्वा सर्व्वं यथोदितम्।
साशीतियोजनं भुङ्क्ते विस्तीर्णं मण्डलं भुवः॥
एवं पिष्टमयं योपि वित्तहीनोददेद्रथम्।
आषष्टियोजनं भुङ्क्ते साग्रं वर्षशतं सुखी॥
सूर्य्यलोकञ्च कल्पान्ते सकृद्देदमवाप्नुयात्।

इति श्रीभविष्यत्पुराणोक्तं विजयायज्ञसप्तमी‡ व्रतम्।

———ooo———

सुमन्तुरुवाच।

क्षमासत्यं दयादानं शौचमिन्द्रियनिग्रहः।
सूर्य्यपूजाग्निहवनं सन्तोष स्तेयवर्जनं॥
सर्व्वव्रतेष्वयं वत्स सामान्येन सदा स्थितिः।
गृहीत्वा सप्तमीकल्पं ज्ञानतोयस्तु तामसः॥
त्यजेत्कामाद्भयाद्वापि सज्ञेयः पतितोबुधैः।
सप्तम्यां सोपवासस्तु रात्रौ भूङ्क्ते तु यो नरः॥
कृतोपवासः षष्ठ्यां तु पञ्चम्यामेककालभुक्।

---

* पुरुषः सम्भवेद्राजा स्कन्दस्यातीववल्लभ इति पाठान्तरं।

† दद्याद्व्रतावसानेतु इति पाठान्तरं।

‡ विजयासप्तमीति क्वचित् पाठः।

दत्त्वा तु संस्कृतं शाकं भक्ष्यभोज्यैः सुसंस्कृतम् ॥
देवाय ब्राह्मणेभ्यश्च रात्रौ भुञ्जीत वाग्यतः ।
यावज्जीवं नरः कश्चि व्रतमेतच्चरिष्यति ॥
तस्य श्रीर्विजयश्चैव त्रिवर्गश्च विवर्द्धते ।
मृतः स्वर्गमवाप्नोति विमानवरमास्थितः ॥
सूर्य्यलोके स रमते* मन्वन्तरचतुष्टयम् ।
इहचागत्य कालान्ते रिपून् शास्ति समन्ततः ॥
पुत्रपौत्रैः परिवृतो दाता त्याचियतव्रतः ।
स भुनक्ति परान् राजन् विप्रैरजितः परैः ।
यानिम राजशार्दूल शाकाहारेण सप्तमीम् ।
उपोष्य लब्धं तत्तीर्थं पैत्रं वै गयसंस्थितम् ॥
कुरूणां तत्र पूर्व्वेण शाकाहारेण वै तथा ।
धर्म्मक्षेत्रं कुरुक्षेत्रं कृतं तेन विवस्वता ॥
सप्तमी नवमी षष्ठी तृतीया पञ्चमी तथा ।
कामदास्तिथयो ह्येता इतरत्र न योषिताम् ॥
सप्तमी माघमासस्य नवम्यश्वयुजे तथा ।
षष्ठी भाद्रपदे धन्या वैशाखे तु तृतीयका ॥
पुण्या भाद्रपदे ज्ञेया पञ्चमी नागपञ्चमी ।
इत्येतास्तेषु मासेषु विशेषास्तिथयः शुभाः ॥
शाकं सुसंस्कृतं कृत्वा भक्ष्यभोज्यसमन्वितम् ।
दत्त्वा विप्रे यथाशक्त्या पश्चाद्भुङ्क्ते निशि व्रती ॥
कार्त्तिके शुक्लपक्षस्य शाखीयं कुरुनन्दन ।

* मन्वन्तरशतानाथेति पुस्तकान्तरे पाठः ।

चतुर्भिरपि मासैस्तु पारणं प्रथमं स्मृतम् ॥
अगस्तिकुसुमैश्चात्र पूजा कार्य्या विभावसोः।
विभावसोरिति सूर्य्यस्य।
विलेपनं कुङ्कुमञ्च धूपश्चैवापराजितः।
स्नानं तु पञ्चगव्येन तदेव प्राशयेत्तथा।
नैवेद्यं पायसं चात्र पूजा कार्य्या विभावसोः ॥
तदेव देयं विप्राणां शाकं भक्ष्यमथात्मनः।
शुभशाकसमायुक्तं भक्ष्यपेयसमन्वितम् ॥
शुभं शाकः अनिषिद्धशाकः।
द्वितीयपारणे राजन् शुभगन्धानि यानि वै।
पुष्पाणि तानि देवस्य तथाम्बे तञ्च चन्दनं ॥
अगुरुश्चापि धूपोऽत्र नैवेद्यं गुडपूपकाः।
स्नानं कुशोदकेनात्र प्राशनं गोमयेन तु ॥
तृतीये करवीराणि तथा रक्तञ्च चन्दनम्।
धूपानां गुग्गुलुश्चात्र प्रियोदेवस्य सर्व्वदा ॥
शाल्योदनं च नैवेद्यं दधिमिश्रं महामते।
तमेव ब्राह्मणानां तु भक्ष्यलेह्यसमन्वितम् ॥
कालशाकेन च विभो युक्तं दत्त्वा विचक्षणः।
गौरसर्षपकल्केन स्नानं चात्र विदुर्बुधाः ॥
तस्यैव प्राशनं धन्यं सर्व्वपापहरं शुभम्।
तृतीय पारणस्यान्ते ब्राह्मणानाञ्च भोजनम् ॥
श्रावणञ्च पुराणस्य वाचनञ्चापि शस्यते।
देवस्य पुरतः स्नातो ब्राह्मणानां तदग्रतः ॥

ब्राह्मणाद्वाचकाच्छ्राव्यं नान्यवर्णसमुद्भवात् ।
श्रावयेत् ब्राह्मणान् सर्व्वान् शक्त्या भक्त्या प्रपूजयेत् ।
वाचकस्यामले राजन् वाससी संनिवेदयेत् ॥
वाचके पूजिते देवः सदा तुष्यति भास्करः ।
करवीरं यथेष्टन्तु तथा रक्तञ्च चन्दनम् ॥
यथेष्टं गुग्गुलं तस्य यथेष्टञ्चैव भाजनम् ।
यथेष्टं तु घृतं तस्य यथेष्टो वाचकः सदा ॥
पारणञ्च यथेष्टं वै सवितुः कुरुनन्दन ।
इत्येषा सप्तमी पुण्या सुप्रिया गोपतेः सदा ॥
यामुपोष्येह पुरुषोदौर्गत्येनच युज्यते ।

चौर प्रतिपदि विशेषोऽवगन्तव्य इति

शाकसप्तमीव्रतम्

कार्त्तिकशुक्लसप्तम्यामारभ्य प्रतिमासं कुर्व्वता पुनर्मास चतुष्टयम् यावत्शुक्ल सप्तमी तस्यां तस्याञ्च पारणं कार्य्यं । एकस्मिन् वर्षे वारत्रयं पारणं भवति एवमेव वर्षान्तरेषु तादृशं व्रतं यावज्जीवं कर्त्तव्यम् ।

इति भविष्यत्पुराणोक्तं शाकसप्तमीव्रतम् ।

———ooo@ooo———

नारद उवाच ।

किमुरोगेऽद्भुते कृत्यमलक्ष्मीः केन हन्यते ।
मृतवत्साभिषेकादिकार्य्यं किन्नु विधीयते ॥

शङ्कर उवाच।

पुराकृतानि पापानि फलं तत्र तपोधन।
रोगदौर्गत्यरूपेण तथैवेष्टवधेन च॥
तद्विघाताय वक्ष्यामि तदा कल्याणकारकम्।
सप्तमीस्नपनं नामव्याधिपीड़ाविनाशनम्॥
बालानां मरणं यत्र क्षीरपानां च दृश्यते।
तद्वद्वृद्धितराणां च यौवनं वापवर्त्तिनाम्॥
शान्तं यत्तत् प्रवक्ष्यामि मृतवत्साभिषेकतः।
एतदेवाद्भुते वेगे चित्तविभ्रमनाशनम्॥
भविष्यति महाबाहो यदा कल्पस्तपोधन।
विवस्वतश्च तत्रापि यदा मनुरनुत्तमः॥
भविष्यति च तत्रापि पञ्चविंशतिमं यदा।
कृतं नाम युगं तत्र हैहयान्वयवर्द्धनम्॥
भविता तु पतिर्वीरः कार्त्तवीर्य्यः प्रतापवान्।
स सप्तद्वीपमखिलं पालयिष्यति भूतलम्॥
यावद्वर्षसहस्राणि सप्तसप्तानि नारद।
जातमात्रश्च तस्यासीद् यावत् पुत्रशतं तदा॥
च्यवनस्य तु शापेन विनाशमुपयास्यति।
सहस्रबाहुश्च यदा भविता तस्य वै सुतः॥
कृतवीर्य्यः समाराध्य सहस्रांशुं दिवाकरम्॥
उपवासैव्रतैर्दिव्यैः वेदसूक्तैश्च नारद।
पुत्रस्य जीवनायासमन्त्रस्नानमवाप्स्यति॥
कृतवीर्य्येण वै पृष्ट इदं च कतिभास्करः।

अशेष दुष्टशमनं सदा कल्मषनाशनं ॥
अलंक्लेशेन महता पुत्रस्तव नराधिप ॥
भविष्यति चिरञ्जीवी किन्नु किल्विषनाशनम्।
सप्तमीस्नपनं वक्ष्ये सर्व्वलोकहिताय वै ॥
जातस्य मृतवत्सायाः सप्तमे मासि नारद।
अथवा शुक्लसप्तम्यामेतत्सर्व्वं प्रशस्यते।
ग्रहताराबलं लब्धा कृत्वा ब्राह्मणवाचनं ॥
अलंक्लेशेन महता पुत्रस्तव नराधिप।
बालस्य जन्मनचत्रं वर्ज्जयेत्तान्तिथिंबुधः ॥
तद्दद्दंशातुराणान्तु कृत्वा तदितरेषु च।
गोमयेनोपलिप्तायां भूमावेवतु संस्थितः ॥
तण्डुलैरक्तशाल्यन्नैश्चतुरः चीरसंयुतं।
निर्वपेत् सूर्य्यरुद्राभ्यां मातृभ्यश्च विशेषतः ॥
कीर्त्तयेत् सूर्य्यदैवत्यं सूक्तं पूर्व्वं घृताहुतीः।
जुहुयाद्रुद्रसूक्तेन तद्दद्रुद्राय नारद ॥
होतव्या समिधश्चात्र तथैवार्कपलाशयोः।
यवैः कृष्णतिलैर्होमः कर्त्तव्योऽष्टशतं पुनः ॥
व्याहृतिभिरथाज्येन तथैवाष्टशतं बुधाः।
हुत्वा स्नानञ्च कर्त्तव्यं मन्त्रैस्तैरेवधीमता ॥
विप्रेण वेदबिदुषा विधिवद्दर्भपाणिना ॥
स्थापयित्वा तु चतुरः कुम्भान् कोणेषु शोभनान्।
पञ्च पञ्च पुनर्मध्ये दध्यक्षतविभूषितान् ॥
स्थापयेदव्रणं कुम्भं सौरेणैवाभिमन्त्रितम्।

पूरयेत्तीर्थतोयेन स्वर्णरत्नसमन्वितम्॥
सर्व्वान् सर्व्वौषधियुतान् पञ्चभङ्गजलान्वितान्।
पञ्चरत्नफलैर्युक्तं वासोभिः परिवेष्टितान्॥
गजाश्वरथ्यावल्मीकसङ्गमव्रजगोकुलम्।
सङ्कृत्य मृदमानीय सर्व्वेष्वेव विनिक्षिपेत्॥

सङ्कृत्य एकीकृत्य। चतुर्ष्वपि च कुम्भेषु तोयगर्भेषु मध्यमम्।
गृहीत्वा ब्राह्मणस्तत्र सौरान्मन्त्रानुदीरयन्॥
नारीभिः सप्तसंख्याभिरव्यङ्गाङ्गीभिरत्र च।
पूजिताभिर्यथाशक्त्या माल्यवस्त्रादिभूषणैः॥
सवस्त्राभिश्च कर्त्तव्यं मृतवत्साभिषेचनं।
दीर्घायुरस्तु बालोयं जीवपुत्रास्त्वियं तथा॥
आदित्यश्चन्द्रमा सार्द्धं ग्रहनक्षत्रतारकैः।
शक्रः सलोकपालो वै ब्रह्मविष्णुमहेश्वराः॥
एते चान्ये च देवौघाः सदा पान्तु कुमारकम्।
न शनिर्नाव राहुश्च नात्र बालग्रहाः क्वचित्॥
पीडां कुर्व्वन्तु बालस्य समातुर्जनकस्य च।
ततः शुक्लाम्बरधरा कुमारी पतिसंयुता।
त्र्यम्बकं पूजयेत्स्त्रीणामाचार्य्यं सह भार्य्यया॥
काञ्चनीयां ततः कृत्वा ताम्रपात्रोपरिस्थितां।
प्रतिमां धर्म्मराजस्य गुरवे विनिवेदयेत्॥

धर्म्मराजस्तु महिषस्थो दक्षिणकरे सम्पुटदण्डधरस्तदुपरि-खड्गं वामे फलकं अपराश्च धूम्रवर्णा अष्टौसवत् साःसङ्गता वामे भवा तद्दक्षिणकरे यमपाशश्च लेखनीयः।

पत्रकरः श्मश्रूधारी चित्रगुप्तः प्रकर्त्तव्यः ।
वस्त्रैः काञ्चन रत्नाद्यैर्भक्ष्यैः सघृतपायसैः ॥
पूजयेद्ब्राह्मणांस्तत्र वित्तशाठ्यविवर्ज्जितः ।
भुक्त्वा च गुरुणाचैवमुच्चार्य्या मन्त्रसन्ततिः ॥
दीर्घायुरस्तु बालोयंयावद्वर्षशतं सुखी ।
यत्किञ्चिदस्य दुरितंतत् चिप्तम्बडवामुखे ॥
ब्रह्मारुद्रोवसुः स्कन्दोविष्णुः शक्रो हुताशनः ।
रक्षन्तु सर्व्वे दुष्टेभ्यो वरदाः सन्तु सर्व्वशः ॥
एवमाद्यानि चैतानि वदन्तं पूजयेद्रविं ।
शक्तितः कपिलां चैव प्रणिपत्य विसर्जयेत् ॥
गुरुञ्च पुत्रसहितं प्रणम्य रविशङ्करौ ।
हुतशेषं समश्नीयादादित्याय नमो स्त्विति ॥
इदमेवाद्भुते वेगे दुःस्वप्नेषु च दृश्यते ॥
कर्त्तुर्जन्मदिनर्चञ्च हित्वा संपूजयेत्सदा ।
शान्त्यर्थं शुक्लसप्तम्यामेतत् कुर्व्वन्न सीदति ॥
पुण्यं विधत्तमायुष्यं सप्तमीस्त्वनं रवेः ।
कथयित्वा द्विजश्रेष्ठ तथैवान्तरधीयत ॥
सवानेन विधानेन दीर्घायुरभवन्नृप ।
संवत्सरप्रसूतोपि ससस्यां पृथिवीमिमाम् ॥
एतत्ते सर्व्वमाख्यातं सप्तमीस्नानमुत्तमम् ।
सर्व्वदुष्टोपशमनं बालानां परमं हितम् ॥
आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
शङ्करात् ज्ञानमन्विच्छेद्गतिमिच्छेज्जनार्द्दनात् ॥

एतन्महापातकनाशनं स्यात् परंहितम्
वालविवर्द्धनञ्च।
शृणोति यश्चैव मनन्यचेता
स्तस्यापि सिद्धिं मुनयो वदन्ति॥

इति भविष्यत्पुराणोक्तं सप्तमीस्नपनम्।

———000———

सनत्कुमार*उवाच।

मङ्गल्यं परमिच्छन्ति मङ्गलायतनं हरिम्।
अर्च्चयेद्वनिता देवं सप्तम्यां समुपोषिता॥
मण्डलं चतुरस्रञ्च विधायाचतसंयुतम्।
तस्मिन्नावाहयेद्देवं श्रीशमिन्दिरया सह॥
पङ्कजैर्जातिकुसुमैर्नन्द्यावर्त्तप्रसूनकैः।
एकपत्रैर्बिल्वदलैर्दूर्व्वातण्डुलकेसरैः॥
मधुरैः फलमूलैश्च पायसेन समर्च्चयेत्।
मृण्मयं राजतन्ताम्रं सौवर्णञ्च चतुष्टयम्॥
पात्रमव्रणमच्छिन्नं द्रोणपूर्णञ्च कारयेत्।
चतुरः कलशांस्तत्र मृण्मयांश्च विचक्षणः॥
चतुःप्रस्थप्रमाणेन सहितान् वस्त्रसंयुतान्।
लवणञ्च तिलञ्चैव हरिद्राचूर्णधान्यकैः॥
मृत्‌चिप्ता राजतेष्वेवं शान्तिकुम्भे निधापयेत्।
सर्पिषा मधुना दध्ना पयसा च प्रपूरितान्॥
स्थापयेत् कलशानग्रे पात्राण्यपि महामतिः।

* शङ्कर उवाचेति क्वचित पुस्तके पाठः।

योषितः पूजयेदष्टौ सपुत्राः पतिदेवताः॥
सर्व्वमङ्गलसंयुक्ताः सर्व्वाभरणभूषिताः।
ताभ्योदद्याद्यथायोगं मङ्गलार्थं विचक्षणः॥
तास्ततः पूजयेत्तासां दक्षिणाश्च प्रदापयेत्।
ततश्च सन्निधौ तासां प्रार्थयन्ते श्रियःपतिम्॥
माङ्गल्यं परमन्देहि मङ्गलायतने नमः।
इन्दिराकान्तनयने श्रीकान्तनयनप्रिये॥
श्रीपते श्रीलताश्लेषप्रियचातुर्भुजद्वये।
माङ्गल्यं परमन्देहि मङ्गलायतलोचने॥
अथ ताभिश्च वनिता योषिद्भिः कृतमङ्गला।
अनुज्ञाप्य हरेः पूजां समाप्य च विसृज्य ताः॥
आचार्य्यो दक्षिणां दद्यात् ब्राह्मणेभ्यो धनञ्चय।
सङ्कल्पग्रादौ विधिस्तस्याः सुतो वा जनको पि वा॥
कुर्व्वीत श्वशुरे वा वै गुरुर्व्वा नृपतिः क्वचित्।
कार्य्यः पूजाविधिरयं मन्त्रेणाष्टाक्षरेण तु॥
अष्टम्याञ्च ततः कुर्य्यात् पूर्व्ववद्देवपूजनम्।
अष्टाभिः सह योषिद्भिः कुर्य्यान्मन्त्रेण पारणम्॥
उपवासश्च कर्त्तव्यः पतिना च सुखार्थिना।
अष्टम्यां पारणं कुर्य्याद्दद्याद्ब्राह्मणभोजनम्॥
आचार्य्ये दक्षिणां दद्याद्व्रतञ्चैव समापयेत्।
इतश्चारोग्यजननमायुः पुष्टिः सुखावहम्॥
माङ्गल्यप्रभवः स्त्रीणां पुत्रपौत्रप्रदन्तथा।
सुतार्थिनी सुतम्बिन्दे दायुश्चापि तदर्थिनी॥

माङ्गल्यं परमिच्छन्ती व्रतेनानेन चाप्नुयात्।
पुमानपि यशः कीर्त्तिं बलमायुश्च विन्दति॥
राज्ञामायुर्द्विजाग्र्याणां विद्याञ्च विपुलामपि।
वैश्यानां विपुलां लक्ष्मीं शूद्राणाञ्च सुखम्भवेत्॥
व्रतमेतत्सदाकार्य्यमात्मनो जयमिच्छता।
युद्धानि चेहमानानामादौ कार्य्यमिदं व्रतम्॥
कन्यकापि पतिं विन्देत् कुर्व्वन्ती व्रतमुत्तमम्।
एवमेव परंप्रोक्तं सप्तमीव्रतमुत्तमम्।
सर्व्वपुण्यप्रदन्नृणां सर्व्वपुष्टिप्रदम्भुवि॥

इति गरुड़पुराणोक्तं मङ्गल्यं*व्रतम्।

अथ सूर्य्यव्रतम्।

———ooo———

मार्कण्डेय उवाच।

चैत्रे शुक्लस्य पक्षे तु सम्यक् षष्ठ्यामुपोषितः।
सप्तम्यामर्च्चनं कुर्य्याद्देवदेवस्य भूपते॥
वहिःस्नानं नरः कृत्वा गोमयेनोपलेपितः।
लेपयेत्स्थण्डिलं सम्यक् ततो गौरमृदा नृप॥
तत्राष्टदलकमलं वर्णकैस्तु समं लिखेत्।
कर्णिकायां न्यसेत्तत्र देवदेवं विभावसुं॥
पूर्व्वपत्रे न्यसेद्देवौ†राजन् द्रव्यानुचारकौ।

---

* मङ्गल्य सप्तमीति पुस्तकान्तरे पाठः।

† पूर्व्वपत्रेन्यसेद्देवौ दौराजन्नतुराजकौ इति पाठान्तरं।

आग्नेये च न्यसेत्पत्रे गन्धर्व्वौ ऋतुकारकौ॥
दक्षिणे च न्यसेत्पत्रे तथैवाङ्गारकौ शुभौ।
नैर्ऋत्ये द्वौ महाराज पत्रिनैर्ऋतकौ न्यसेत्॥
काद्रवेयौ महाभागौ पश्चिमे ऋतुचारिकौ।
वायव्ये यातुधानौ द्वौ तथैव नृपसत्तम॥
उत्तरे च तथा पत्रे विन्यसेच्चऋषिद्वयं।
ईशान्यां विन्यसेत्पत्रे ग्रहमेकं द्विजोत्तम॥
एते च देवादयोयस्मादिऋतुक्रमेण दर्शिताः।
यस्मिन् यस्मिन्नृतौ ब्रह्मन् अनुयान्ति रविं प्रभुं।
ये ये देवप्रभृतयस्तन्मे त्वं वक्तुमर्हसि।

मार्कण्डेय उवाच।

धातार्य्यमा च राजेन्द्र वसन्ते देवताद्वयं।
श्रीं तुम्बुरुर्नारदश्चैव गन्धर्व्वौ गायताम्बरौ॥
क्रतुवेलाप्सराश्चैव तथा यापुञ्जिकस्थला।
हेत्प्रहेतश्च तथा रक्षोग्रामणिपुङ्गवौ॥
उरगोवासुकिश्चैव तथैव ऋषिसत्तमौ।
अनुयाति सितश्चैव ग्रीष्मदेवौ वसन्तिकौ॥
ऋषिरत्रिर्वसिष्ठश्च तथा होदयतचकौ।
मेनका सहजन्या च गन्धर्व्वौ च हहा हुहुः॥
रथस्वनश्च ग्रामणीरथक्रत्स्नश्च तावुभौ।
पौरषादोवधश्चैव यातुधानौच तौ स्मृतौ॥
अनुयाति कुजश्चैव निदाघे च तथा ग्रहः।
येनुयान्ति रविं देवं प्रावृट्काले निबोध मे॥

इन्द्रश्चैव विवस्वांश्च अङ्गिरा भृगुरेव च।
एलापत्रस्तथासर्पः शङ्खपालश्च पन्नगः॥
शुचिः सेनोग्रसेनश्च व्रतश्चैवारुणिः सह।
प्रम्लोचन्त्यप्सराश्चैव निम्लोचन्तीह ते उभे॥
यातुधानस्तथा सर्पौव्याघ्रश्च मनुजेश्वर।
प्रावृट् काले तु यान्त्येनं ग्रहोदेवपुरोहितः॥
अतःपरं निबोध त्वं शरत्काले नराधिप।
पर्जन्यश्चैव पूषा च भरद्वाजश्च गौतमः॥
चित्रसेनश्च गन्धर्व्वस्तथा च सुकविः सह।
विश्वासी च घृताची च तथा देवाप्सरोद्वयं॥
नागस्त्वैरावतश्चैव विश्रुतश्च धनञ्जयः।
सेनजिच्च सुषेणश्च राक्षसौ भूम विक्रमौ॥
यातौ द्वौ तौ च तथा यातुधानौ महाबलौ।
ग्रहः शनैश्चरश्चैव अनुयाति दिवाकरं॥
अतःपरं प्रवक्ष्यामि हेमन्ते तव पार्थिव।
अंशोभगश्च द्वावेतौ कश्यपश्च क्रतुः सह॥
भुजङ्गश्च महापद्मः सर्पः कर्कोटकस्तथा।
चित्रसेनश्च गन्धर्व्वं ऊर्णायुश्च महाबलः॥
अप्सराः पूर्व्वचित्तिश्च गन्धर्व्वा उर्व्वशीवशाः।
तार्क्ष्यश्चारिष्टनेमिश्च राक्षसौ भीमविक्रमौ॥
विस्फूर्जतस्तथैवाशौयातुधानौ महाबलौ।
अनुयाति बुधश्चैव ग्रहोराजन् दिवाकरम्॥
अतःपरं च धर्म्मज्ञ शिशिरे गदतः शृणु।

त्वष्टा विष्णुर्जमदग्निर्विश्वामित्रस्तथैव च ॥
काद्रवेयौ तथा नागौ कम्बलस्वतुरावुभौ।
तिलोत्तमाप्सराश्चैव देवी रम्भा मनोरमा॥
ग्रामणीरतिजाश्चैव सत्यजिच्च महायशाः।
ब्रह्मोपेतश्च वैरक्षोयज्ञोपेतस्तथैव च॥
गन्धर्वोधृतराष्ट्रश्च सूर्य्यवर्चास्तथापरः।
चन्द्रमा यहराजश्च अनुयाति दिवाकरं॥
सूर्य्यमाप्याययन्त्येते तेजसातेजउत्तमम्।
एवं हि शिशिरे राजन्ननुयानं प्रकुर्व्वते॥
स्थानाभिमानिनोह्येते समहादशका गणाः।
गणषट्कस्तथैवैकमनुयाति दिवाकरम्॥
सूर्य्यमारोपयत्तेजस्तेजसातिजउत्तमम्।
तथैतैस्तैर्व्वचोभिश्च कुर्व्वन्ति ऋषयस्तवं॥
गन्धर्वाप्सरसश्चैव सुगीताद्यैरुपासते।
विद्याग्रामणिनश्चैव कुर्व्वन्त्यत्राभिसुग्रहं॥
सर्पाविहन्ते वैसूर्य्यं यातुधानानुयान्ति च।
परिचाराग्रहाश्चैव नयन्तश्च यथाविधि॥
एतेषामेव देवानां यथार्व्वीर्य्यं तथा तपः।
यथायोगं यथा धर्म्मं यथासत्वं यथाबलम्॥
यथासत्वमसौसूर्य्यस्तेषां सिद्धिस्तु तेजसा।
भूतानामशुभं कर्म्म विनाशयति तेजसा॥
ग्रीष्मे हिमे च वर्षासु विमुञ्चमानो
घर्म्मं हिमञ्च वर्षं च निशादिनञ्च।

गच्छत्यसावृतुवशात्परिवर्त्तुमस्मिन्
देवान् पितॄंश्च मनुजांश्च सतर्पयन्ति॥
तेषां सम्पूजनं कार्य्यं गन्धमाल्यानुलेपनैः।
धूपदीपैः सनैवेद्यैः पृथक् पृथगरिन्दम॥
एवं संपूजनं कृत्वा सर्व्वेषां तदनन्तरम्।
घृतेन होमं कुर्व्वीत सूर्य्यस्याष्टशतेन तु॥
अन्येषाञ्च तथा दद्यादष्टावष्टौ नरोत्तम।
अन्येषां कमलाविन्यस्तदेवानां अष्टावष्टौ आहुतय इतिशेषः॥
नाम्ना तथैव सर्व्वेषा मेकैकं भोजयेद्द्विजं।
शक्त्या च दक्षिणां दद्यात्तेषामेव यदूत्तम॥
एवं संवत्सरं कृत्वा व्रतमेतन्नरोत्तम।
पौराणिकाय विप्राय व्रतस्यान्ते पयस्विनीं॥
विधिवच्च ततो दद्यात्सुसुवर्णं यदूत्तम।
सर्व्वकामप्रदं ह्येतत् व्रतमुक्तं स्वयम्भुवा॥
व्रतेनानेन चीर्णेन सूर्य्यलोकमवाप्नुयात्।
अथ द्वादशवर्षाणि करोत्येनं महाव्रतम्॥
भित्वार्कमण्डलं राजन् विष्णोः सायुज्यतां व्रजेत्।
एतद्व्रतं पापविनाशकारि
धन्यं यशस्यं रिपुनाशकारि।
लोके तथास्मिंश्च परे च राजन्
स्वर्गं तथामोक्षकरं तथैव॥

इति विष्णुधर्म्मोत्तरोक्तं सूर्य्यव्रतम्।

अथ मरुद्व्रतम्।

———०००———

मार्कण्डेय उवाच।

चैत्रस्य शुक्लपक्षे तु सम्यक् षष्ठ्यामुपोषितः।
सप्तम्यामर्च्चनं कुर्य्यान्मरुतां तत्र तत्र च॥
तत्र श्रेणीगतं सप्तमण्डलं नृप कारयेत्।
श्रेणी तथा कार्य्यसमा सप्तमण्डलकान्विता॥

श्रेणीसप्तकं विधाय ततस्त्वेकैकस्यां श्रेण्यां मण्डलसप्तकं कुर्य्यादित्यर्थः।

गन्धैर्म्मण्डलकं कार्य्यं नामचिह्नं पृथक् पृथक्॥
एकज्योतिश्च द्विर्ज्योतिस्त्रिज्योतिश्च महाबलः।
एकद्वित्रि चतुः पञ्च क्रमेणैव तथा नृप॥
विन्यसेत् प्रथमश्रेण्यां यथोक्तं नृपसत्तम।

क्रमेणेति एकज्योतिःप्रभृति सप्तज्योतिपर्य्यन्तं सप्त नामानि विन्यसेदित्यर्थः॥

ईदृक् सदृक् वचोन्यादृक् ततः प्रतिसदृक् तथा।
मितश्च संमितिश्चैव अमितश्च महाबलः॥
द्वितीयायामथ श्रेण्यां क्रमेणैव च विन्यसेत्।
ऋतजित्सत्यजिच्चैव सुषेनःसेनजित्तथा॥
श्रुतमित्रोनुमित्रश्च पुरुजिच्च तथैव च।
तृतीयायां तथा श्रेण्यां देवानेतांश्च विन्यसेत्॥
ऋतश्च ऋतवादश्च विदग्धश्चारणो ध्रुवः।
सत्योधाता वै चतुर्थ्यां श्रेण्यां च पार्थिव न्यसेत्॥

दृष्टश्च सदृशश्चैव एतादृगमितायनः ।
क्रीडितः समवृत्तश्च सरभश्च महायशाः ॥
विन्यसेत्सप्तमश्रेण्यां सप्त देवान्नराधिप ।
धर्त्तादुर्य्योधनिर्भीमो ह्यभियुक्तः त्रयः सह ॥
षष्ठ्यांश्च विन्यसेत् श्रेण्यां सप्तदेवान् यथाक्रमं ।
*धृतिर्वपुरनाधृष्यो वासः कामो जयो विराट् ॥
सप्तम्यांश्च तथा श्रेण्यां विन्यसेत् सप्त पार्थिव ।
प्रथमा तु भवेत् श्रेणी युक्तापार्थिवसप्तमी ॥
द्वितीया पद्मपत्राभा तृतीया रुधिरोपमा ।
पीतवर्णा चतुर्थी स्यात् पञ्चमी शुक्लसन्निभा ॥
आकाशसन्निभा षष्ठी कृष्णवर्णा च सप्तमी ।
माल्यानुलेपनं देयं तासां वर्णसमं द्विज ॥
एकोनास्तत्र दातव्या दीपाः† पञ्चाशदेव तु ।
पृथक् पृथक् देवतानां नैवेद्यादि निवेदयेत् ॥
घृतञ्च जुहुयादग्नौ नामभिश्च पृथक् पृथक् ।
भोजयेत् ब्राह्मणांश्चात्र सुरसिद्धसमन्वितान् ॥
संवत्सरमिदं कृत्वा व्रतं पुरुषसत्तम ।
सुवर्णमहतं वासो गाञ्च दद्यात् पयस्विनीं ॥
पौराणिकाय विप्राय व्रतान्ते विनिवेदयेत् ।
व्रतस्यास्य तु राजेन्द्र सम्यक् विप्रो विधानवित् ॥
आरोग्यकामः कुर्व्वीत व्रतमेतन्नरोत्तम ।

---

* धृतिर्दीप्तिरनाधृष्यो इति पुस्तकान्तरे पाठः ।

† पञ्चदशैवविति पुस्तकान्तरे ।

पुत्रकामार्थकामस्य धनकामोऽपि वा पुनः॥
तथा विजयकामस्य व्रतमेतत्समाचरेत्।
स्त्रीकामस्य तथा राजन् विद्याकामोऽपि वा पुनः॥
सर्व्वकामप्रदं ह्येतत् पवित्रं पापनाशनं।
माङ्गल्यं स्वर्गदं प्रोक्तं व्रतानामुत्तमं व्रतम्॥
व्रतेनानेन चीर्णेन चिरं स्वर्गं समश्नुते।
मानुष्यमासाद्य भवेत्स्वर्गभ्रष्टस्तथाचिरात्॥

धनेन रूपेण बलेन युक्तो
जनाभिरामः प्रमदाप्रियश्च।
नीरोगदेहोहृत शत्रुपक्षो
वाग्मी तथा शास्त्रधनश्च लोके॥

इति विष्णुधर्म्मोक्तं मरुद्व्रतम्।

अथ तुरगसप्तमीव्रतम्।

——000——

मार्कण्डेय उवाच।

चैत्रमासस्य सप्तम्यां शुक्लपक्षे नराधिप।
गोमयेनोपलिप्ते तु मृदा कुर्य्यात्तु मण्डलं॥
तत्राष्टपत्रं कमलं कर्त्तव्यं वर्णकैः शुभैः।
कृतोपवासस्तन्मध्ये भास्करं पूजयेन्नरः॥
अरुणञ्चैव पुन्नाकं निकुम्भञ्च तथापरं*।
यमुनाञ्च यमं कालं द्वितीयमनुमेवच॥

---

* अरुणञ्चैव रत्नाङ्कं निचुभापतिरिति पुस्तकान्तरे पाठः।

शनैश्चरं तथा राज्ञीं छायां रेवन्तमेवच।
सप्तच्छन्दांसि वर्षश्च यान्त्र पिङ्गलमेव च॥
केसरे पूजयेद्राम पत्रे उक्ताश्च देवताः।
उक्ता देवता धातार्य्यमेत्याद्याः सूर्य्यसप्तमीव्रतोक्ताः।
दिक्कालपूजनं कार्य्यं वहिःपद्मस्य पार्थिव॥
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा।
व्रते समाप्ते दातव्यं तुरगान् ब्राह्मणाय तु॥
प्राप्याश्वमेधस्य फलं यथाव
ल्लोकानवाप्याथ पुरन्दरस्य*।
उपोष्य राजन्-सुचिरञ्च कालं
सायोज्यमायाति दिवाकरस्य†॥

इति विष्णुधर्म्मोत्तरोक्तं तुरगसप्तमीव्रतम्।

अथ सितसप्तमीव्रतम्।

——०००——

मार्कण्डेय उवाच।

मार्गशीर्षस्य मासस्य शुक्लपक्षे नराधिप।
सोपवासस्तु सप्तम्यां कमलैः पूजयेद्रविम्॥
अर्चायां वा स्थले वापि शुक्लैः पुष्पैर्यथाविधि।
चन्दनेन तु शुक्लेन वटकैः पूरणेन च॥

---

* चन्दनेन महाराज परामान्नेन पूरिणेति पाठः।

† सराकेति पुस्तकान्तरं पाठः।

दद्याद्व्रतान्ते द्विजपुङ्गवाय
वस्त्रे सुशुक्ले रिपुनाशनेच्छुः ।
सौभाग्यकामस्तु तथैव राजन्
प्राप्नोति लोकान् सवितुस्तथान्ते* ॥

इति विष्णुधर्मोत्तरोक्तं सितसप्तमीव्रतम् ।

अथ उभयसप्तमीव्रतम् ।

———ooo———

मार्कण्डेय उवाच ।

अनेनैव विधानेन प्रतिमासन्तु यो नरः ।
सप्तमीद्वितयं कुर्य्याद्यावत् सम्वत्सरं भवेत् ॥
सोऽश्वमेधमवाप्नोति सूर्य्यलोकं च गच्छति ।
कुलमुद्धरते राजन् सर्व्वान् कामानुपाश्नुते ॥

इति विष्णुधर्म्मोत्तरोक्तं उभयसप्तमीव्रतम् ।

अथ सूर्य्यव्रतम् ।

———ooo———

मार्कण्डेय उवाच ।

शिरसोवपनं कृत्वा योऽर्च्चयेत दिवाकरम् ।
तपनस्तोषमायाति वह्निष्टोमञ्च विन्दति ॥
अपूपैः सगुडैर्भक्त्या तथा लवणपाचितैः ।
सहिरण्यैः समभ्यर्च्य वह्निष्टोमफलं लभेत् ॥

---

* वाञ्छितानसौ न स्यात् गच्छेदिति पुस्तकान्तरे पाठः ।

सूर्य्याह्नि यस्तु नक्ताशी संपूजयति भास्करम्।
इष्टान् कामानवाप्नोति सूर्य्यलोकञ्च गच्छति॥
यथा यथा पूजयन्तस्तु सूर्य्यं
कामाः समग्राः सफला भवन्ति।
आरोग्यमग्रञ्च तथा नृवीर
मृतस्य लोकाः सवितुस्तथैव॥

इति विष्णुधर्म्मोत्तरोक्तं सूर्य्यव्रतम्।

अथ मुक्तिद्वारव्रतम्।

———ooo———

याज्ञवल्क्य उवाच।

मुक्तिद्वारं यद्व्रतं मे तथोक्तं
दुःकर्म्मघ्नं रोगसंघांश्च हन्तुः।
अक्षीणाख्यं मोक्षदं कर्म्म यत्स्या
त्तन्मे ब्रूहि त्वं सुरेश प्रसादात्॥
सप्तद्वीपेषु यत् प्रोक्तं ब्रह्महत्याद्यघापहं।
सर्व्वकर्म्मक्षयकरं सर्व्वकामैकधर्म्मवित्॥
मुक्तिद्वारमिति प्रोक्तं देवानां तुष्टिदं तथा।

भगवानुवाच।

अश्वमेधादियज्ञानां लक्षकोटार्बुदैरपि।
तत् फलं लभ्यते पुंसां मुक्तिद्वारव्रतेन यत्॥
योगमार्गमनभ्यस्य यथेष्टाचारवानपि।
अथ युक्तोऽमृतस्यापि व्रतेनानेन मुच्यते॥

गोब्राह्मणस्वामिवधे महार्णवे
त्यक्त्वा शरीरस्य भयान्मुने नराः ।
नारीगिणोयत्* परमार्थचिन्तकाः†
फलं लभन्ते ह्यमुना व्रतादिना‡ ॥
मुने त्वमाकर्ण्य यदा न सम्यक्
विधिं तदीयं तदहं वदामि ।
यज्ञोपितीयं सततं मया प्राक्
पुत्रे पि मित्रेपि तथा कलत्रे ॥

सप्तमीं प्राप्य हस्तेन दन्तधावनमाचरेत् ।
नमोऽर्कायेत्युदीर्य्याथ अर्ककाष्ठेन भक्तिमान् ॥
अथवा पुष्यऋक्षेण जलेनाप्लावनं तथा ।
कृत्वा पवित्रं देवानां मन्त्रेणार्कसमित्स्थितम् ॥
रक्तचन्दनपद्मन्तु लिखेद्गोमयवारिणा ।
प्राङ्गणे षोडशदलं सगर्भदलकर्णिकम् ॥

गोमयवारिणासिक्ते प्राङ्गणे रक्तचन्दनेन पद्मं प्रलिखेत् सगर्भदलकर्णिकाकर्णिक गर्भे दलवतः वक्ष्यमाण-देवतावतः ।

तपनादित्यपूषार्यसूर्यमित्रजलेश्वरान् ॥
भानुश्चारश्च विष्णुश्च समार्त्तण्डसवितृकान् ।
सहस्रांशुश्च पूर्व्वादिदिग्दलेषु न्यसेत् क्रमात् ॥

---

* नोयीगिनोयं पठतीति पुस्तकान्तरे पाठः ।

† तस्यार्कन्तोषयेदिति क्वचित् पाठः ।

‡ फलं लभन्ते ऽथ व्रताव्रतादिभिरिति पुस्तकान्तरे पाठः ।

आरो मङ्गलः।

भानुर्हंसार्य्यमव्रध्नविकर्त्तनदिवाकरान्।
सप्ताश्वसप्तकिरणसमस्तग्रहनायकान्॥
प्रभाकरं सुविषदं पतङ्गं लोकसाक्षिणम्।
विवस्वन्मिहिरौ पूर्वं न्यसेद्गर्भदले यथा॥
तमोघ्नं द्वादशात्मानं भास्करं लोकचक्षुषम्।
विश्वकर्म्माणमजरं परमात्मानमुत्तमम्॥
कर्त्तारमक्षतं वन्द्यं कर्णिकायान्तु षोड़श।

कर्णिकायां कर्णिकालग्नेषु, परश्च परमेश्वरम् एवमष्टाचत्वा-रिंशतोनामलेखनमेवावगन्तव्यं।

ओं तस्मै नमः सवित्रेति क्रमादावाहनं नमः॥
कुर्य्यादथासनं दद्यात् पाद्यार्घ्याचमनीयकम्।
रक्तगन्धाक्षतान् दद्यात् रक्तपुष्पाणि धूपकं॥

नमः नमस्कारः।

दद्यात् सुगन्धपञ्चाङ्गदीपान् रक्ताम्बराणि च।
अथवा रैत्ये ताम्रे वा पात्रे प्रोक्ते सपङ्कजे॥
रक्तगन्धाक्षतैर्हंसं मणिकुण्डलमण्डितम्।
षड़ङ्गुलोच्छ्रयं स्थूलं पृथुलम्बितमालिनम्॥
रक्तचन्दनपद्मस्य कर्णिकायां न्यसेद्बुधः।
हैमं वारिरुहं चात्र वित्तशाठ्यविवर्ज्जितः॥

कुर्य्यादितिशेषः।

अथ हैमेऽथवा ताम्रे पात्रे प्रोक्ते सपङ्कजे।
रक्तगन्धाक्षतान् क्षिप्त्वा रक्तपुष्पाणि च द्विज॥

पञ्चरत्नफलैः सार्द्धमादायाञ्जलिना जलम् ।
ललाटाञ्जलिमासाद्य जानुभ्यामवनीं गतः ॥
वीक्ष्यमाणोदिनकरं दद्यादर्घ्यन्तु मन्त्रतः ।
ॐ तुभ्यं नमः सकलकारणकारणाय
विश्वात्मने तु भवनान्तविवर्ज्जिताय* ।
विश्वेश्वराय सकलामरवन्दिताय
वेदात्मने तरणये भवमोचदाय ॥
नमामि देवासुरमौलिलालितान्
सुरेश चूडामणिवाहुचुम्बितान् ।
यदुच्यतेसारजलेश्वरालयान्
पादौशरण्ये रममानहंसान् ।
अनन्तशक्तेसकलार्थसिद्धिं
प्रसीद सर्व्वेश समस्तमव्ययम् ॥
समग्रदृष्टे परमेश्वरेश्वर
प्रयच्छ मे वाञ्छितकर्म्म मुक्तिद ।
उच्चार्य्यार्घ्यं भास्करायाथ दद्यात्
धेन्वाज्याद्यं सूर्य्यतिथ्यर्च्चयोगी
रक्तां धेनुं शोभनोपस्कराढ्यां ।
दत्त्वा कुर्य्याच्चोपवासं तदह्नि
ध्यायेत् द्वितीयेपि दिने तु तिथ्य
र्च्चयेर्युतिः स्यात्तु तदोपवासः,

---

* भवमध्येति क्वचित् पाठः ।

पूर्वं प्रदद्याद्दिवसे द्वितीये
दिनेशभक्तोथ तदा व्रतार्थी।

यदा द्वितीयेविहितेपि तिथ्या सह ऋचयोगमुपैतितदा पूर्वं पूर्व्वदिवसे नोपवासोनार्घ्यदानञ्च किन्तु द्वितीयदिने व्रतं सम्बध्यार्घ्यं दद्यादित्यर्थः।

दिनेशः सूर्य्यः।

उदयव्यापिनीग्राह्या कुले तिथिरुपोषणैः।
निम्बार्को भगवानेषां वाञ्छितार्थफलप्रदः॥

इति भविष्यत्पुराणवचनात्।

भोज्यान्ते वरं भुञ्जीत प्राश्यार्कं कुङ्कुमं भुवि।
कृते व्रतेऽस्मिन् भवति मुक्तिमार्गान्सुदुर्लभान्॥
मासि मास्यर्चंग्र दानादि कुर्य्याद्विस्तन्वर्जितं।
सर्व्वदानं परित्यज्य विशेषः श्रूयतामथ॥
वर्ज्यं* कर्कन्धुन्धान्यञ्च यत्पुष्पफलद्वयं।
रसमेकैकमेवन्तु द्वादशार्कान् प्रपूजयेत्॥
एला† गुग्गुलनागकेशरमुरादीन् द्वादशान् कुङ्कुमं।
कर्पूरागुरुदेवदारुसरलान् जातीफलं ग्रन्थिकं॥
मांसीचन्दनपत्रकेसजलदान् कक्कोलकस्तूरिकाः
सेरुं हंसरसञ्च वालकमलान्यल्पं मटोरं वचाः।
यद्यदेषु परिपूर्यते पुनस्तत्प्रदाय विनियोजयेत् स्वयं॥

* धूमर्य्येयेपेति पुस्तकान्तरे पाठः।

† एला गुग्गुल नागकेशर द्वादशकानिति पुस्तकान्तरे पाठः।

केतकीवकुलमल्लिकायुलं जातिपद्मकुमुदानि यूथिकाः।
पाटलाकुरुवकातिमुक्तकं कुब्जकं तगरकर्णिका मुनिः॥
रक्तपुष्पशतपत्रकदम्बा सिन्दुवारमुचुकुन्दजवाश्च।
चम्पकं कुरबकोरमशोकं सन्त्यजेच्चगुडमेषु यथोक्तैः॥

कुरबकोरक्तकुरुरण्टः, अतिमुक्तको माधवी, कर्णिकाः कर्णिकारः, मुनिरगस्त्यः॥

खर्ज्जूरनारङ्गमधूकजम्बु
कवीरमेवार्ककपित्थविल्वं।
द्राक्षाम्लिका दाडिमतिन्दुकानि
भल्लातरामाफलचारुकाणि।
वृन्ताककालिङ्गकनारिकेलैः
कूष्माण्डवाचीफलविम्बकञ्च॥
कर्कन्धुकोशातकमातुलङ्गतुथ्यो
यथाकाल भवानि युग्मतः।
शालिमाषतिलमुद्गसर्षपा
व्रीहिकंगुचणका स्तथावकौ॥
राजमाष चरको द्रवातसी
पुष्टिकामसूरमर्कटान्।
गोमूत्रवृन्ताकत्रिपुटश्चणा
श्यामाकनीवारकचूर्णकानि
त्यजेद्यथा सम्भवमेषु धान्ये
ष्वर्थं समासाद्य तु युग्मयुग्मम्॥

क्षीरेक्षुनिर्य्यासयुतञ्च चुक्रं
गुडं तथाज्यं नवमी तु शर्करा।
विवर्त्तयेद्दैतराजसंयुता
दधीमथोपायसमित्यनुक्रमात्॥

मधुरं लवणं तिक्तं कषायं कटुकं तथा।
अम्लञ्चैतानिवाश्नीयात् द्वौ द्वौ मासौ यथोदयम्॥
त्रयोदशं प्राप्य तथा समानं व्रतं तदानीञ्चैव सर्व्वशः।
समाप्यदत्त्वा कपिलां विधानतः।
प्रसादमाप्नोति तथाव्ययं रवेः॥
देवराज्य महाराज्य विभोगादिमहत्फलम्।
सकामः सर्व्वमाप्नोति निष्कामो मोक्षमव्ययम्॥
खेसङ्ख्याने यथोद्भूती रजसान्तु यथा भुवि।
समुद्रे सिकतानाञ्च धारणा वारिवर्षणं।
मुक्तिद्वारस्य ते तद्वत् फलसङ्ख्या न विद्यते॥

इति मत्स्यपुराणोक्तं मुक्तिद्वारसप्तमीव्रतम्।

अथ भानुव्रतम्।

———000———

पुलस्त्य उवाच।

सप्तम्यां नक्तभुक् दद्यात्समान्ते गां सकाञ्चनां।
सूर्य्यलोकमवाप्नोति भानुव्रतमिदं स्मृतम्॥

इति पद्मपुराणोक्तं भानुव्रतम्।

———000———

ब्रह्मोवाच।

सप्तम्यां पूज्य रुद्रेशं चित्रभानुं दिवाकरम्।
रक्तैश्च गन्धकुसुमैर्महदारोग्यमाप्नुयात्॥
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः।
पद्मवत् पद्मपत्रश्च यथा शक्ति विधीयते॥
पूजाशाठेन शाठेन कृतापि तु फलप्रदा।
आज्यधारा समद्भिश्च दधिक्षीरान्नमाषकैः॥
पूर्व्वोक्तफलदो होमः कृतः शान्तेन चेतसा।
एतद्वैश्वानर व्रतं प्रतिपद्व्याख्येयम्॥

इति भविष्यत्पुराणोक्तं चित्रभानुव्रतम्।

अथ सौरव्रतम्।

———ooo———

यश्चोपवासी सप्तम्यां समान्ते हेमपङ्कजम्।
गावश्च शक्तितो दद्याद्धोमान्ते घटसंयुताः।
एतत् सौरव्रतं नाम सूर्य्यलोकप्रदायकं॥

इति पद्मपुराणोक्तं सौरव्रतम्।

अथ धान्यसप्तमीव्रतम्।

———ooo———

संपूज्य सितसप्तम्यां भानुं धान्यानि सप्त च।
ददाति नक्तभुक् गार्हं लवणेन समन्वितम्॥

गार्हं गृहप्योपकरणं।

स तारयतिसप्तान्यान् कुल्यानात्मान मेव च।
एतद्धान्य व्रतं नाम व्रतं धान्यसुखप्रदम्॥

इति भविष्यत्पुराणोक्तं धान्यसप्तमीव्रतम्।

अथ भास्करव्रतम्।

———ooo———

कृतोपवासः षष्ठ्यान्तु सप्तम्यां यस्तु मानवः।
करोति विधितः श्राद्धं भास्करः प्रीयतामिति॥
सर्व्वरोगविनिर्म्मुक्तः स्वर्गलोकमवाप्नुयात्॥

इति कालिकापुराणोक्तं भास्करव्रतम्।

अथ तपोव्रतम्।

———ooo———

माघे निशार्द्रवासाः स्यात् सप्तम्यां गोप्रदोभवेत्।
स्वर्गलोकमवाप्नोति तपोव्रत मिहोच्यते॥

इति पद्मपुराणोक्तं तपोव्रतम्।

अथार्कसप्तमीव्रतम्।

———ooo———

अर्कसंपुटसंयुक्तमुदकाप्रसृतिं पिवेत्।
क्रमाद्दत्वा चतुर्व्विंशं एकैकं क्षिपते पुनः।

द्वाभ्यां संवत्सराभ्यां तु समाप्य नियमीभवेत्॥
सर्व्वकामप्रदा ह्येषा प्रसीदत्यर्कसप्तमी॥

इति ब्रह्मपुराणोक्त मर्कसप्तमीव्रतम्।

अथ पुत्रीयसप्तमीव्रतम्।

———000———

पुष्कर उवाच।

मार्गशीर्षे शुभे मासि शुक्लपक्षे द्विजोत्तम।
पुत्रीयां सप्तमीं राम गृह्णीयात् प्रयतः शुचिः॥
अथवा पुत्रकामस्य विधिना तेन यत् शृणु।

पुत्रीयां पुत्रदां।

हविष्याशी शिरःस्नानं कृत्वा भास्करपूजनम्।
अधःशायी द्वितीयेऽह्नि गोविषाणोदकेन तु॥
स्नात्वा च लिप्य च तथा शुभे देशे तु मण्डलम्।
तत्राष्टपत्रकमलं विन्यसेत् वर्णकैः शुभैः॥
तस्यैव कर्णिकामध्ये भास्करं चन्दनेन तु।
रक्तेन पूजयेद्देवं गन्धमाल्यानुलेपनैः॥
भक्ष्यैर्भोज्यैस्तथापेयै र्धूपैर्दीपैश्च भास्करं।
एवं संपूजनं कृत्वा सर्व्वकाम प्रदस्यतु।
नक्तं भुञ्जीत सर्व्वज्ञ सर्व्वकामविवर्ज्जितः॥
दन्तोदूखलकोभूत्वा कृत्वा सम्वत्सरं व्रतम्।
व्रतावसाने दातव्या शक्त्या ब्राह्मणदक्षिणा॥
तथा त्रिमधुरप्रायं कर्त्तव्यं द्विजभोजनम्।

अधःशायी निशान्ते च भूय एव तथा भवेत्॥

पुत्रीयमेतद्व्रतमुत्तमन्ते
मयोदितं कल्मषनाशकारि।
आराधनं देववरस्य राम
सर्व्वामयघ्नञ्च तथैतदुक्तम्॥

इति विष्णुधर्म्मोत्तरोक्तं पुत्रीयसप्तमीव्रतम्।

अथ कामव्रतम्।

———

सप्तम्याञ्च तथाभ्यर्च्च्य सूर्य्यपत्नीं सुवर्च्चसाम्।
इष्टान-कामान वाप्नोति नात्र कार्य्या विचारणा॥

इति विष्णुधर्म्मोक्तं कामव्रतम्।

अथ शैलव्रतम्।

———

इष्टस्य पूजां शैलस्य तदा पूज्य सुखी भवेत्।
पूजान्तु नाम मन्त्रेण।

इति विष्णुधर्म्मोक्तरोक्तं शैलव्रतम्।

अथ सरिद्व्रतम्।

———

पूजयित्वा सदाभीष्टं सरितं पुण्यभाग्भवेत्।

इति विष्णुधर्म्मोत्तरोक्तं सरिद्व्रतम्।

———

अथ वह्निव्रतम्।

वह्निसंपूजनं कृत्वा वह्निष्टोममवाप्नुयात्।

इति विष्णुधर्म्मोक्तं वह्निव्रतम्।

अथ वायुव्रतम्।

वायोः संपूजनं कृत्वा प्राप्नोति परमाङ्गतिम्।

इति विष्णुधर्म्मोत्तरोक्तं वायुव्रतम्।

अथ सप्तर्षिव्रतम्।

——000——

संपूज्य च ऋषीन् सप्त सोमसंस्था तया स्मृता।
सप्त प्राप्नोति ते एव मतिमार्थञ्च विन्दति॥

इति विष्णुधर्म्मोत्तरोक्तं सप्तर्षिव्रतम्।

अथ मुनिव्रतम्।

-——0*0——

सप्तम्यां मुनिशार्दूल इष्टमभ्यर्च्चयेन्मुनीन्।
स्वाध्यायफलमाप्नोति तद्वामफलमश्नुते॥

इति विष्णुधर्म्मोत्तरोक्तंमुनिव्रतम्।

अथ अभीष्टसप्तमीव्रतम्।

————000(D)000————

पूजयित्वा समुद्रांश्च दीपानव तदा नरः।
पातालांश्च महाभाग भुव माप्नोत्यभीप्सितम्॥

इति विष्णुधर्म्मोत्तरोक्तं अभीष्टसप्तमीव्रतम्।

अथ सप्तमीलोकव्रतम्।

———ooo———

सप्तलोकांस्तत्र भूप पूजयित्वा सुखी भवेत्।
तथैव महतीं प्रज्ञां गतिमप्रतिमां भवेत्॥

इति विष्णुधर्म्मोत्तरोक्तं सप्तमीलोकव्रतम्।

अथ नदीव्रतम्।

गङ्गाः सप्तप्रकाराश्च तथा देवीं सरस्वतीम्।
सप्तज्ञानान्यवाप्नोति नरः पूजयते ध्रुवम्॥

इति विष्णुधर्म्मोत्तरोक्तं नदीव्रतम्।

अथ सुगतिव्रतम्।

———ooo———

सुरेन्द्रपूजनं कृत्वा गतिमग्र्यान्तु वै भवेत्।

इति विष्णुधर्म्मोत्तरोक्तं सुगतिव्रतम्।

अथ जयन्तव्रतम्।

———ooo———

जयन्तं शक्रतनयं पूजयेच्च सुखी भवेत्।

इति विष्णुधर्म्मोत्तरोक्तं जयन्तव्रतम्।

अथ विधानद्वादशसप्तमीव्रतम्।

निरुक्तसप्तमीनान्तु शृणु नारद निर्णयम्।
यः शान्तिमधिगच्छेत स्मरणात् सर्व्वकिल्विषैः॥

यातना सर्व्वपापानां यातनां नमतां विदुः ।
तत्रोपवासविधिना धातारं य उपासते ॥
चैत्रमासे तु सप्तम्यामतिरात्रफलं लभेत् ।
वैशाखमासे सप्तम्यां पर्जन्यं यस्तु पूजयेत् ॥
चातुर्मासस्य यज्ञस्य फलं प्राप्नोति तत्र वै ।
विभा विभात्रमोट्ट इत्ता भाशब्दो व्याप्तिदीप्तिषु ॥
विभा नाम निरुक्ताच्च स्वयमेव विभावसुः ।
सप्तम्यां ज्यैष्ठमासन्तु वरुणं यः समर्च्चयेत् ॥
आप्नोयामद्यानान्तु फलं विन्दति मानवः ।
अमृतार्थे यदा देवा जयशब्देन निर्ययुः ॥
पूजयन्ति जयां देवास्तमस्याश्च तत् स्मृतम् ।
आषाढ़मासे सूर्य्यन्तु सप्तम्यां पूजयेन्नरः ॥
अश्वमेधमवाप्नोति कुलञ्चैव समुद्धरेत् ।
सप्तम्यां निर्ज्जिता देवैरसुरा दानवास्तथा ॥
समाराध्य सुरैः सेन्द्रैः सङ्ग्रामे तारकामये ।
त्रैलोक्यं विजयप्राप्ते तस्माद्विजयसप्तमी ॥
यः पूजयति मां भक्त्या तस्मिन्नहनि मानवः ।
स्नात्वा सम्यगुपस्पृश्य शुक्लवासाः कृताञ्जलिः ॥
सदा यज्ञोपवीतीच ब्रह्मचारी जितेन्द्रियः ।
अक्रोधनो ह्यचपलः स्थिरचित्तः समाहितः ॥
ध्यायमानं तथा साम्ब मत्परः संजितेन्द्रियः ।
न च रजस्वलाञ्चैव सूतिकां नाम न स्पृशेत् ॥
स्त्रीवृन्दं नाभिभाषेत मुखबन्धश्च सर्व्वशः ।

तथा मूत्र पुरीषञ्च निष्ठीवञ्च न लङ्घयेत् ॥
मन्त्रपूतेनोदकेन प्राभ्युक्ष्य विधिवत्तदा।
मृत्तिकामुपलिम्पेत यजमानो वरार्थिकः।
यथाकालोदितैः पुष्पैर्धूपैश्चापि रविप्रियैः॥
दीपैर्लाजैर्यवैर्मुद्गैस्तिलैःसिद्धार्थकैस्तथा।
चन्दनैर्हृद्यगन्धैश्च* मण्डलैर्हार्चयेद्बुधः॥
प्रथमे पिण्डिकास्थाने भूर्लोकश्च प्रकीर्त्तितः।
द्वितीये तु भुवर्लोकः स्वस्तृतीये प्रतिष्ठितः॥
महर्लोकश्चतुर्थे तु जनलोकस्तु पञ्चमे।
तपोलोकस्तु वै षष्ठे सत्यलोकस्तु सप्तमे॥
मण्डलं पूजयेद्यस्तु श्रद्धाभक्तिसमन्वितः।
सप्तलोकावृता देवा भवेयुस्तेन पूजिताः॥
उपक्रीड़ाचाहलाभ्यां योऽर्च्चयेन्मित्रमण्डलम्।
सोऽपि स्वर्गसदैः सार्द्धं मोदते विगतज्वरः॥
शीलाचारदयावन्तोदमशौचसमन्विताः।
मङ्गलाचारसम्पन्ना वेदशास्त्रार्थचिन्तकाः॥
तेभ्योऽवनितले विप्र नद्याम्बा विविधैस्तथा।
यजनैरुपहारैश्च वलिपात्रैः सुसंस्कृतैः॥
पायसैःकृशरैर्भक्ष्यैर्म्मांसैश्च विविधैस्तथा।
फलमूलैस्तथाभीष्टैः शाकैश्चापि मुनिप्रियैः॥
दध्ना पूर्णं पयःपूर्णं गुड़पूर्णं तथैवच।
लाजापूर्णं ... दातव्यं मन्त्रं जप्य पुनः पुनः॥

* मद्यगन्धैश्चेति पुस्तकान्तरे पाठः।

सप्तर्वे पूजयेद्भक्त्या देवज्ञान् शीलसम्मतान् ।
तैस्तुष्टैस्तुष्यते देवः सर्व्वान् कामान् ददाति च ॥
तस्य पुण्यफलञ्चैव शृणु कीर्त्तयतो मम ।
पुत्रपौत्रैः समृद्धन्ति धनधान्यगवेड़कैः ॥
अश्वा हिरण्यवासांसि दासीदासञ्च लभ्यते ।
या नार्य्यः पूजयिष्यन्ति सप्तम्यां भक्तितोरविं ॥
ता भाग्ययुक्ताः श्रीमत्यः सर्व्वालङ्कारभूषिताः ।
प्रियास्ता हि भविष्यन्ति भर्तॄणां स्वजनस्य च ॥
सूर्य्यलोके च मोदन्ते भर्तृभिः सहिताः सुखं ।
मानुष्यं पुनरागत्य महाधनपरिग्रहे ।
महाकुले हि जायन्ते मद्भक्ता वै भवन्ति च ॥
प्रीणयेत्तु प्रयच्छन्ती शुक्ला विजयसप्तमी ।
गावोहिरण्यवासांसि मणिमुक्तास्ततोधनं ।
अर्च्चयेतोपहारैश्च भक्त्या नानाविधैस्तथा ॥
पूर्णकाणि सुराद्दीनि व्यञ्जनानि मधूनि च ।
शाल्योदनं तथा मांसं शाकानि विविधानि च ॥
फलानि च यथाकालं दधिक्षीरघृतं मधु ।
यत्किञ्चिद्दीयते दानं सप्तम्यामक्षयं ततः ।
त्रैलोक्यविजयप्राप्तिस्तस्माद्विजयसप्तमी ॥
सप्तम्यां श्रावणे मासि भास्करं पूजयेन्नरः ।
सर्व्वपापविनिर्म्मुक्तो वाजिमेधफलं लभेत् ॥
श्रावणे मासि सप्तम्यां त्वष्टारं पूजयेन्नरः ।
अग्निष्टोममवाप्नोति विन्दते च महत्श्रियं ॥

तपः सन्तपनं नाम तावतः प्रोक्तवानृषिः ।
मरीचस्य तु योगेन प्रोक्ता मरीचसप्तमी ।
फलं तस्याः प्रवक्ष्यामि धन्यं पुण्यं तथापि च ।
ब्रह्मणामादितः कृत्वा पूर्व्वं देवाः सवासवाः ॥
यक्ष-गन्धर्व्वपक्षाश्च महर्षिपन्नगा नगाः ।
विद्याधराः पितृगणाः सहिताश्चाप्सरोगणैः ।
उदीक्षन्ते भगवत उदयं भास्करस्य च ।
चन्दनानां यथा तादृक् काष्ठकूटैर्महौजसः ॥
हुताशनश्च भगवान् सप्तसप्तिर्दिवाकरः ।
निर्धूमाङ्गे समारुह्य सरथेऽरुणसारथिः ।
समुत्तिष्ठति दीप्तांशुरंशुभिर्भासयन्नभः ॥
जयशब्देन सहितः पूज्यमानस्तथासुरैः ।
तथान्तरे वनं यच्च तदादित्यवनं स्मृतं ॥
शतयोजनविस्तारमायामद्दशधो गुणैः ।
तत्र ते वहवोवृक्षाः विषयैः पृथुशाखिनः ॥
तस्माद्वायुः प्रभवति सर्व्वोविषयसाश्रयः ।
प्राणिनां योजयेद्व्याधिं नित्यं नानाविधाकृतिं ॥
यथामध्यस्थसत्त्वास्ते षण्मवत्या दिवाकरं ।
शरणं देवदेवस्य पृथिव्यास्तापशान्तये ॥
स नाशयति सत्त्वानां रोगं देहसमुद्भवं* ।
कुष्ठदद्रूस पिटको कण्डु, श्वित्राणि श्लीपदं ॥
जलोदरं तथा गुल्मं अतिसारञ्च विद्रधिं ।

* सवासवतीति पुस्तकान्तरे पाठः ।

हृद्रोगं पाण्डुरोगञ्च आनाहं सगलग्रहं ॥
शिरःशूलं पार्श्वशूलं अक्षिशूलं विसूचिकां।
आध्माख्य' वातमय्यम्बा सामं वाताख्यमेव च ॥
चयाद्दितीयकाग्रञ्च सान्निपातिकएव च।
नित्यं वलत्वर्ज व्याधिं प्रातश्च यद्पाचकं ॥
एतां-श्चान्यां-श्च सुवहून रोगान्-क्षमप्रणाशकान्।
सत्त्वनाशाय इति च आयुर्दीर्घं ददाति च ॥
आज्ञानिमेषमात्रेण समतिक्रम्य भास्करः।
उदयं गिरिमारुह्य भासयन् सर्व्वतोदिशः ॥
भगवान् सविषाग्रैश्च मुहूर्त्तं तिष्ठते रविः।
तस्मिन्नुदितिमात्रे तु शुचिः प्रयतमानसः ॥
शुक्लपक्षस्य सप्तम्यां व्रतं द्वादशमासिकं।
गृह्णीयान्नियतः स्नातः सर्व्वसत्त्वानुकम्पकः ॥
पूर्व्वामुखः शुचिर्भूत्वा मिहिराय महात्मने।
पुष्पोपहारं दत्त्वा तु धूपं दद्यात्तु वेष्टतः ॥
प्रणम्य देवं जानुभ्यामर्घ्यं प्रक्षिपेन्मुखे।
उपस्पृश्य दिनं सम्यक् रात्रिं वोपवसेन्नरः ॥
ततः कल्यं समुत्थाय शुचिः स्नातः सुवस्त्रधृक्।
प्राङ्मुखः प्रयतो भूत्वा हृदि कृत्वा दिवाकरं ॥
पूजयेद्गन्धमाल्यैश्च धूपेन तु सुगन्धिना।
पूर्व्वोक्तेन विधानेन भास्कराय निवेदयेत् ॥
उपहारैस्तथाभक्ष्यैर्व्वलिपात्रैः सुसंस्कृतैः।
मन्त्रेण चैव दातव्यं जप्तव्यञ्च पुनः पुनः ॥

मन्त्रः। ॐ नमः सूर्य्यायेति।

वर्द्धमानस्तु मरीचान्येवं मासांस्तु द्वादश॥
सप्तमीं शुक्लपक्षस्य यश्चरिष्यति मानवः।
तस्य पुण्यफलञ्चैव शृणु कीर्त्तयतोमम॥
सुवासा दर्शनीयश्च सुगन्धश्च स्वलङ्कृतः।
सुवेषश्च सुरूपश्च भूत्वा सूर्य्यप्रभो नरः॥
इह लोके च दीर्घायुः प्राप्य भोगांश्च पुष्कलान्।
पुत्र पौत्रैः परिवृतो दासीदाससमन्वितः॥
इतस्ततः स्वर्गलोके महत्सुखमवाप्नुयात्।
तस्माच्च पुनरावृत्य कुले महति जायते॥
आढ्यश्च बहुपुत्रश्च भोगवांश्च भवेन्नरः।
दीक्षितश्चापि पुरुषो भवेन्मासांस्तु द्वादश॥
मरीचस्य तु नाम्ना च प्रोक्ता मरीचसप्तमी।
यस्तु भाद्रपदे मासि सप्तम्यामिन्द्रमर्च्चयेत्॥
उपोष्य विधिवत्तत्र पौण्डरीकफलं लभेत्।
महर्षिभिस्तु भृग्वाद्यैर्धर्म्मलुब्धैस्तपोधनैः॥
आदित्यस्त्वर्च्चितोयैस्तु शाकमूलपयःफलैः।
प्रत्यक्षं दर्शयामास सहस्राक्षस्तु गोपतिः।
वरेण च्छन्दयामास प्रीतोऽस्मीति तपोधनात्॥

ऋषय ऊचुः।

अस्माकं वर एवाऽस्तु प्रीतो यदि दिवाकरः।
ईर्षाश्च विस्मयात् क्रोधात् तपो न क्षयतां व्रजेत्॥

एवमस्त्विति तानुक्त्वा तत्रैवान्तरधीयत।
फलैर्यस्मात् सहस्रांशुस्तुष्टोऽस्माकं महाद्युतिः॥
फलेन महता युक्ता नामास्याः फलसप्तमी।
फलसप्तमी तु याचैव विधिं वक्ष्यामि तच्छृणु॥
पूर्व्वोक्तेन विधानेन उद्यन्तं दिवाकरं।
स्नातः शुचिः शुक्लवासाः प्राङ्मुखः प्रयतः स्थितः॥
श्वेतस्रजा समायुक्तो भूमौ दत्त्वानुलेपनं।
स्रग्भिः पुष्पसुगन्धाभिरभ्युच्यार्कं निरीक्ष्य च॥
जानुभ्यां पतितोभूत्वा वाग्भिः स्तुत्वा दिवाकरं।
दत्तोपहारपुष्पैस्तु पुष्पैःसुरभिगन्धिभिः॥
धूपं दत्त्वा तु अगुरुं फलानां पुञ्जमग्रतः।
यथालाभेन सम्भृत्य भास्कराय निवेदयेत्॥
आम्राम्रातकजम्बूनां विल्वतिन्दुकशाखिनां।
परूषकोविदाराणां खर्जूराणां तथैव च॥
फलानि चैव देयानि छिन्नं म्लानं विवर्जयेत्।
व्रती भुञ्जीत नियतः प्रयतः स्याद्विशेषतः॥
एवं द्वादशसामान्यैः फलवल्लीचयो नरः।
भवत्यरोगोद्युतिमान् वर्णरूपश्रियान्वितः॥
धनधान्य समायुक्तः पुत्रपौत्रपरिव्रतः।
भुक्त्वेह मानुषान् भोगान सूर्य्यलोके महीयते॥
तस्मात्तु पुनरावृत्य माहात्म्यं प्रतिपद्यते।
वहुयोगिवहुधने कुले महति जायते॥
ब्राह्मणः सर्व्वदेवः स्यात् क्षत्रियो विजयी भवेत्।

वैश्योऽपि लभते भोगान् शूद्रः सुखमवाप्नुयात् ॥
कृषिं कुर्य्याद्यदि नरस्त्वभ्यर्च्य फलसप्तमीं ।
यवान् माषान् कुलत्थांश्च शालिगोधूममेव च ॥
यद्धान्यं वपते चेत्रे तत्तद्बहुफलं भवेत् ।
वाणिज्यं कुरुते दिग्भ्यस्तथा स्वविषये पुनः ।
अक्लेशेनैव पण्यानि विक्रीणीते सुखं नरः ॥
लाभो बहुफलं तस्य भवतीह यतः फलं ।
यदि प्रयुञ्जीत धनं लाभार्थं मानवः क्वचित् ॥
बहुलाभं भवेत्तस्य यत् प्रयुङ्क्ते तदाप्नुयात् ।
नारीभिः फलमाप्नोति पुत्रान् दुहितरस्तथा ॥
एषा ते कथिता तुष्टा फलदा फलसप्तमी ।
ततश्चाश्वयुजे मासि त्रिवस्त्रन्तमुपासते ॥
भक्ष्यभोज्यान्नपानैश्च फलमूलरसैस्तथा ।
एतैः सर्व्वैः समायुक्तं शकटं दापयेद्बुधः ॥
अतः शकटमित्युक्तं धातुरेषोऽभिपद्यते ।
अतोऽन्नमर्हते यस्मात् तस्मात् सा तु अनोदना ॥
वाजपेयमवाप्नोति आसप्तकुलमुद्धरेत् ।
सर्व्ववीजौषधीः सर्व्वा आपातालागमाश्च याः ॥
पृथ्वी राजानुरूपेण काले तत्र ददाति वै ।
पुष्ट्यर्थमौषधीनाञ्च नराणां बलवृद्धये ॥
अनोदना च या चैव शृणु तस्यापि निर्णयं ।
सम्वत्सरं प्रयत्नेन पञ्चोचोभौ च मानवः ॥
पूर्व्वोक्तेन विधानेन भास्करं चार्च्चयेन्नरः ।

उपवासकृताश्चैव तेषां पुण्यफलं शृणु ।
यच्चापि परिहर्त्तव्यं तन्मेनिगदतः शृणु ॥
मैथुनं मधुमांसञ्च गव्यमञ्जनमेव च ।
अनृतं कुलसाक्ष्यञ्च परद्रव्यञ्च वर्ज्जयेत् ॥
सूतकं मृतकञ्चैव वर्ज्जयेच्च रजस्वलां ।
द्वाविषे मासि रक्षेद्यः पितेव स्वसुतान् यथा ॥
परिपाल्य प्रयत्नेन इह लोके परत्र च ।
अनेन विधिना येन ये कुर्व्वन्ति च सप्तमीं ॥
लभन्ते निखिलान् कामान् पत्नीञ्च प्राप्नुयान्नरः ।
नद्यादिशतुमनं भोगान् प्राप्नोति पुष्कलान् ॥
तस्माच्च पुनरावृत्तः कुले महति जायते ।
रत्नवैदूर्य्यरुचिरे र्व्वेणुवीणाविनोदितैः ॥
उपगीयमानोऽप्सरोभिः सुखं वैशाश्वतं लभेत् ।
दिव्यलक्षणसंयुक्तः सूर्य्यलोके महीयते ॥
तस्मिन् तपसि क्षीणे च नरः क्षितिमवाप्य च ।
बहुभोगे बहुधने कुले महति तेजसा ॥
सूर्य्यसङ्काशोलोकानां वालचन्द्र इव प्रियः ।
तेनैवाभ्यासयोगेन लभ्यस्यति पुनः पुनः ॥
योमां मित्रस्य दिवसे यजेद्वै मित्रतेजसा ।
उपवासी शुचिर्भूत्वा ह्यभ्यर्च्चनपरायणः ॥
ब्राह्मणान् भोजकांश्चैव यथाशक्त्या च पूजयेत् ।

* आश्रय इति पाठान्तरम् ।

स तैस्तु तुष्यते देवः सर्व्वकामप्रदोभवेत् ॥
ईप्सितान् लभते कामान् विशेषेण तु मानवः।
मिहिरे त्रिविधं यच्च प्रतिमाव्योममण्डलं ॥
सर्व्वाकृति भवेद्व्योम चतुःशृङ्गसमन्वितं।
चतुरस्रं समं सारं तन्मध्ये व्योममण्डलम् ॥
उच्छ्रयाद्यत्रिभागेन द्वौ भागौ मध्यतः क्षिपेत्।
विस्तारश्च चतुर्भागं चतुःशृङ्गोन्नतं शुभम् ॥
चतुर्द्दशन्तु ये लोका ब्रह्माण्डस्य च मध्यतः।
गमागमे निवर्त्तंत क्रियाकारणसंश्रयात् ॥
कल्पितोऽयं यदा मध्ये मेरुलोकनिवन्धनः।
नाभीवन्धनसम्भूता मेरुलोकान्तरेऽव्ययः ॥
दिव्यधातुमयश्चित्रः सर्व्वदेवैरभिष्टुतः।
अब्जे चतुर्द्दले दिक्षु कर्णिकेत्यभिशब्दितः ॥
चतुर्व्वर्णः ससौवर्णश्चतुर्जातिसमन्वितः।
स्थिता तस्याप्सरः सिद्धा मुनिविद्याधरादयः ॥
शक्रोयमोऽथ वरुणः कुवेरोग्नि पुरःसरः।
लोकपालाग्रहानागा स्तारकाश्चान्यदेवताः ॥
देवपत्न्योमातरश्च त्रिदिवाद्याः स्मृतास्तथा।
आतोद्यनृत्यगीतैस्तु मुदितश्च तथा भवेत् ॥
स्वयम्भुर्भगवान् मेरुः पूजितो नात्र संशयः।
रसान् ददाति यस्माद्वै रसादन्ने नभः स्मृता ॥
खगेषु दाता सप्रोक्तः पूज्यतेह्यर्य्यमा ततः।
नार्च्चयिष्यन्ति ये मोहात् मौढ्योपहतचेतसः ॥

दैवतस्तत्र यत्पापं भाग्यतस्तु लभेदिति ।
तस्यां तिथौ तु यः कश्चिदादित्यार्चनतत्परः ॥
सर्व्वतीर्थे भवेत् स्नातो गोसहस्रफलं लभेत् ।
तथा मार्गगिरे मासि सप्तमी कीर्त्तिता शुभा ॥

तस्मिन्नयं याति जगत् समस्तं
त्रैलोक्य संरचणाउद्यतोयः ॥
स्फीतासमस्या वसुधा समग्रा
मित्रप्रसादाद्भवतेह्यरोगाः ।
पर्य्यायनाम्ना तु तथोपदिष्टा
सूर्य्यस्य सा सप्तमि पूजनीया ॥
व्रतोपवासं कुरुते तु कश्चित्
दारिद्र्यपाशं सच्छिनत्तिचाशु ।
दशाश्वमेधा खलु तेन इष्टा
विधानतो वै मुनयो वदन्ति ॥

पौषे पूषणमभ्यर्च्च सप्तम्यां नियतेन्द्रियः
जातिस्मरत्वं लभते नरमेधं न संशयः ।
पौषे प्रापुः सुपुष्टिं ते पितरो देवमानवाः ।
पूष्णि वोत्पादिता योषित् पुष्टिस्तेन तवोच्यते ॥
माघमासे तु सप्तम्यां त्रिरात्रं नियतोभवेत् ।
जपेत् षड़चरं मन्त्रं नाभिमात्रजलान्ततः ।
जपेच्चाष्टसहस्राणि विष्णोरभिमुखस्थितः ॥

ओं नमः सूर्य्यायेति षड़चरमन्त्रः ।

ईप्सितान् लभते कामान् सर्व्वान् सम्पादयेद्रविः ।

ईप्सिता सा समाख्याता लोकानां विष्णुना स्वयम् ॥
फलं बहुसुवर्णस्य नरः प्राप्नोति सर्व्वदा।
मासे तु द्वादशे यस्तु सप्तम्यां भगमर्च्चयेत् ॥
राजसूयमवाप्नोति गच्छेच्चार्कसलोकताम्।
फाल्गुने चैव सप्तम्यां सिद्धार्थाः सिद्धसम्पदः ॥
वरं मे सिद्धवल्लोकसिद्धसङ्कल्पजाः स्मृताः।
जह्यात् यथोरगःकृत्तिं तिमिरं भास्करो यथा।
व्याधिदारिद्र्यपङ्कलं तथैव त्यजते नरः ॥

द्वादशसप्तमीषु सूर्य्यः पूज्यः तद्रूपं आरोग्यं प्रतिपद्यते पूजा तु नाम मन्त्रेण।

एवं द्वादशमासांस्तु ह्यर्च्चयेत् सततं रविम्।
अष्टौ क्रतुसहस्राणि तेन सर्व्वसदक्षिणाः ॥
सर्व्वतीर्थे भवेत् स्नातः सर्व्वदानानि यच्छति।
पक्षे पक्षे ह्युपवसेत् सप्तम्यामर्कपूजने ॥
स्त्रीषु वल्लभतां याति वश्याश्चापि भवन्ति वै।
राजसूयमवाप्नोति गच्छेदर्कसलोकताम् ॥
मोक्षद्वारमवाप्नोति भानुवच्चरतेदिवि।
विधिदृष्टो रहस्येन नारदेन महर्षिणा ॥

इत्यादित्यपुराणोक्तानि विविधानि द्वादशसप्तमीव्रतानि।

अथ पुरश्चरणसप्तमीव्रतम्।

——0*0——

ऋषय ऊचुः।

पुरश्चरणसंज्ञां तु सप्तमीं वद सूतज।
विधिना केन कर्त्तव्या कस्मिन् काले उपस्थिते॥

सूतउवाच।

अहन्ते कीर्त्तयिष्यामि रोहिताश्वस्य भूपतेः।
मार्कण्डेयेन पुरा प्रोक्तं पृच्छमानेन भक्तितः॥
सप्तकल्पस्मरोविप्रो मार्कण्डेयो महामुनिः।
रोहिताश्वेन पृष्टः स हरिश्चन्द्रात्मजेन च॥

रोहिताश्व उवाच।

अज्ञानात् ज्ञानतो वापि यत् पापं कुरुते नरः।
उपायस्तस्य नाशाय किञ्चिन्मे वद सन्मुने॥

मार्कण्डेय उवाच।

मानसं वाचिकं चैव कायिकञ्च तृतीयकं।
त्रिविधं पातकं लोके नराणामिह जायते॥
पश्चात्तापे कृते तस्य तत्क्षणादेव नश्यति।
मानसञ्चैव यत् पापं यदुक्तैः संप्रजायते॥
गुरूणां वचनात्तच्च सर्व्वमेव प्रणश्यति।

पुरश्चरणकार्य्येवं सत्यमेतन्मयोदितं ॥
नैवेद्यं ब्राह्मणेन्द्राणां तदुक्तं स समाचरेत्।
प्रायश्चित्तं यथोक्तन्तु ततः शुद्धिमवाप्नुयात्॥
अथवा पार्थिवो ज्ञात्वा कुरुते तस्य निग्रहम्।
तेन शुद्धिमवाप्नोति यद्यपि स्याच्च किल्विषी॥
लज्जया ब्राह्मणेन्द्राणां योन ब्रूते कथञ्चन।
न च राजा विजानाति शरीरस्थेन योम्रियेत्॥
तस्य निग्रहकर्त्ता च स्वयं वैवस्वतोयमः।
तस्मात् पापं प्रयत्नेन कृत्वा पापं विजानता॥
प्रायश्चित्तं तु कर्त्तव्यं यथोक्तं ब्रह्मणोदितं।
सर्व्वेषामेव पापानां विहितानां मुनीश्वर॥
किञ्चिद्व्रतं समाचर्य्य दानं वा होममेव वा।
पिपाप्मा जायते येन पुरश्चरणसेवनात्॥
व्रतानि कुरुते योवै नरः सूक्ष्माणि सर्व्वतः।
प्रायश्चित्तानि सर्व्वेषां कर्त्तुं शक्तः कथञ्चन॥

मार्कण्डेय उवाच।

अस्ति राजन् व्रतं पुण्यं पुरश्चरणसंज्ञितम्।
पुरश्चरणसंज्ञां च सप्तमीं सूर्य्यवल्लभां॥
यथा सर्व्वात्मना राजन् कायस्थो यमसम्भवः।
विचित्रोमार्जयत्यत्र शतं पापस्य लेखनं॥
तस्मात् कुरु महाराज यथा वद्वचनं मम।
येन वा मुच्यते पापात् सर्व्वस्मात् कायसम्भवात्॥

रोहिताश्व उवाच।

पुरश्चरणसंज्ञान्तु सप्तमीं मुनिसत्तम।
विधिना केन कर्त्तव्या कस्मिन् काले वदस्व मे॥

मार्कण्डेय उवाच।

माघमासे वरे पक्षे मकरस्थे दिवाकरे।
सप्तम्यां सूर्य्यवारेण व्रतमेतत् समाचरेत्॥
पाषण्डैः पण्डितैः सार्द्धं तस्मिन्नहनि वर्ज्जयेत्।
भक्षयित्वा नृपश्रेष्ठ प्रभाते दन्तधावनं॥
मन्त्रेणानेन पश्चाच्च कर्त्तव्यो नियमो नृप।
पुरश्चरणकृत् पापात् सप्तम्यां दिवसाधिप॥
उपवासं करिष्यामि अद्य त्वं शरणं मम।
ततोपराह्नसमये स्नात्वा धौताम्बरः शुचिः॥
प्रतिमां पूजयेद्भक्त्या दिनाधिपसमुद्भवां।
रक्तैः पुष्पैर्म्महावीर पादौ सम्पूजयेत्ततः॥
पतङ्गाय नमः पादौ मार्त्तण्डाय च जानुनी।
गुह्यं दिवसनाथाय नाभिं दिवसमूर्त्तये॥
बाहुञ्च पद्महस्ताय हृदयन्तीव्रदीधिते।
कम्बुं पद्मदलाभीष्ट शिरश्चन्तेजोमयाय च॥
एवं सम्पूज्य विधिवत् रूपं कर्पूरमादहेत्।
गुड़ोदनञ्च नैवेद्यं रक्तवस्त्राभिवेष्टितम्॥
रक्तसूत्रेण दीपञ्च तथैवारत्रिकं नृप।
शङ्खे तोयं समादाय रक्तचन्दनमिश्रितं॥
सफलञ्च ततः कृत्वा अर्घ्यं दद्यात्ततः परं।

दुष्कृतं यत् कृतं किञ्चिदज्ञानात् ज्ञानतोऽपि वा ॥
प्रायश्चित्ते कृते देव ममार्घ्यश्च प्रगृह्यतां।
ततः सम्पूजितं विप्रं गन्धधूपानुलेपनैः ॥
दत्वा तु भोजनं तस्मै दक्षिणाञ्च स्वशक्तितः।
प्राशनं कायशुद्ध्यर्थं पञ्चगव्यं समाचरेत् ॥
कृताञ्जलिपुटोभूत्वा समुद्वीच्य दिवाकरं।
दिवाकरं नतश्चैव मन्त्रमेतं समुच्चरेत् ॥
इदं व्रतं मया देव गृहीतं पुरतस्तव।
अविघ्नसिद्धिमायातु प्रसादात्तव भास्कर ॥
ततस्तु फाल्गुने मासि सम्प्राप्ते नृपनन्दन।
कुन्देन पूजयेद्देवं तेनैव विधिना ततः ॥
धूपञ्च गुग्गुलं दद्यात् नैवेद्यं भक्तमेव च।
प्राशनं गोमयं प्रोक्तं सर्व्वपापविशुद्धये ॥
चैत्रमासे तु सम्प्राप्ते सुरभ्या पूजयेद्धरिं।
नैवेद्यं गणकाः प्रोक्तं धूपं खर्ज्जूरसोद्भवं ॥
कुशोदकञ्च सम्प्राश्य कायशुद्धिमवाप्नुयात्।
वैशाखे किंशुकैः पूज्यं यथावच्च समाचरेत्।
घृताशनैश्च नैवेद्यं पुरामांसञ्च पूपकं ॥
दधिप्राशनमेवाथ कर्त्तव्यं कायशोधनं।
ज्यैष्ठे पाटलया पूजा विधातव्या रवेर्नृप ॥
धूपञ्च गुग्गुलं चैव रवेः प्रीतिकरं परं।
नैवेद्ये सक्तवः प्रोक्ताः प्राशनञ्च घृतं स्मृतम् ॥
घृतं प्रणाशनकरं कपिलाया विशुद्धये।

आषाढ़े मुनिपुष्पैश्च पूजयेद्भास्करं नृप ॥
धूपञ्चैवागुरुं दद्यात् श्रद्धया परया नृप ।
नैवेद्यं घारिका प्रोक्तं प्राशनं मधुनासह ॥
श्रावणे तु कदम्बेन पूजनं तीक्ष्णदीधितेः ।
नैवेद्ये मोदकाश्चैव तगरं धूपमाहरेत् ॥
गोशृङ्गोदकमासाद्य सर्व्वपापाद्विमुच्यते ।
जात्या भाद्रपदे पूर्व्वं क्षीरं नैवेद्यमाचरेत् ॥
धूपं नखोसमुद्भूतं प्राशनं क्षीरमेव च ।
आश्विने कमलैः पूजा नैवेद्यं घृतपूरिका ॥
धूपं कुङ्कुमं संप्रोक्तं कर्पूरं प्राशनं स्मृतं ।
तुलस्या कार्त्तिके पूजा भास्करस्य प्रकीर्त्तिता ॥
नैवेद्यञ्चैव मृष्टान्नं धूपं कौसुम्भकं नृप ।
प्राशनं चलिचङ्गाख्यं सर्व्वपापविशोधनं ॥
भृङ्गराजेन पूजाञ्च सौम्ये मासि समाचरेत् ।
नैवेद्यं कर्णिका देया धूपं गुड़समुद्भवम् ॥
कक्कोलप्राशनञ्चैव भास्करस्य प्रतुष्टये ।
शतपत्रचयैः पूजा पौषे मासि रवेः स्मृता ॥
सहजं धूपमादिष्टं नैवेद्यं सकुलीयकं ।
प्राशने पूर्व्वमुक्तानि सर्व्वाण्येव समाचरेत् ॥
समाप्तौ तु ततोदद्याषड्गजां गृहसम्भवां ।
ब्राह्मणाय नृपश्रेष्ठ सर्व्वपापविशुद्धये ॥
इष्टभोज्यं ततः कार्य्यं स्वशक्त्या पार्थिवोत्तम ।
एवन्तु कुरुते यस्तु सप्तमीं भास्करोद्भवाम् ॥

सर्व्वपापविनिर्म्मुक्तो निर्म्मलत्वञ्च गच्छति।

ब्राह्मणा ऊचुः।

एवं पुरा वै कथिता रोहिताश्वाय धीमते।
मार्कण्डेयेन महाभाग तस्मात्त्वमपि तां कुरु॥

इति स्कान्दे नागरखण्डोक्तं पुरश्चरणसप्तमीव्रतम्।

इति श्रीमहाराजाधिराज-श्रीमहादेवस्य-समस्त-
करणाधीश्वर-सकलविद्याविशारदश्रीहेमाद्रि
विरचिते चतुर्व्वर्ग-चिन्तामणौ व्रतखण्डे
सप्तमीव्रतानि।

———

अथ द्वादशोऽध्यायः ।

अथाष्टमीव्रतानि ।

जगत्त्रयीमण्डपमण्डयित्री यत्कीर्त्तिवल्लीजनमानसानां ।
निहन्ति सन्तापमशेषशोषा हेमाद्रिराह व्रतमष्टमीषु ॥

तत्र जयन्तीव्रतमुच्यते ।

विष्णुधर्म्मोत्तरे ।

पुलस्त्य उवाच ।

रोहिण्यञ्च यदा कृष्णे पक्षेऽष्टम्यां द्विजोत्तम ।
जयन्ती नाम सा प्रोक्ता सर्व्वपापहरा तिथिः ॥
यद्बाल्ये यच्च कौमारे यौवने वार्द्धके तथा ।
बहुजन्मकृतं पापं हन्ति सोपोषिता तिथिः ॥

वह्निपुराणे ।

वशिष्ठ उवाच ।

कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी नृप ।
जयन्ती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः ॥
सप्तजन्मकृतं राजन् जगत्यां त्रिविधं नृणाम् ।
तत् क्षालयति गोविन्दतिथौ तस्मिन् सुभावितः ।
उपवासश्च तत्रोक्तो महापातकनाशनः ॥

जगत्यां जगतीपाल विधिना नात्र संशयः।
त्रेतायां द्वापरे चैव राजन् कृतयुगे पुरा॥
रोहिणीसंयुता चेयं विद्वद्भिः समुपोषिता।
वियोगे पारणं चक्रुर्मुनयो ब्रह्मवादिनः॥
सांयोगिके व्रते प्राप्ते यत्नैकोऽपि वियुज्यते।
तत्रैव पारणङ्कुर्य्यादेवं वेदविदो विदुः।
अतः शृणु महीपाल सम्प्राप्ते तामसे कलौ।
जन्मतो वासुदेवस्य भविता व्रतमुत्तमम्॥

जन्मतोहेतौ पञ्चमी।

भविता भविष्यति।

आराधितस्तु देवक्या विष्णुः सर्व्वेश्वरः पुरा॥
समायोगे तु रोहिण्या निशीथे राजसत्तम।
समजायत गोविन्दो बालरूपश्चतुर्भुजः॥
तं दृष्ट्वा जगतान्नाथं प्रणम्य गरुडध्वजम्।
देवकी प्राञ्जलिर्भूत्वा इदं वचनमब्रवीत्॥

देवक्युवाच।

न वियोगश्च संसोढुं सौहार्द्दात् पद्मलोचन।
तवेदृग्रूपमालोक्य शङ्के ह मधुसूदन॥

वासुदेवउवाच।

त्वं मां द्रक्ष्यस्यसन्दिग्धं दिनेऽस्मिंश्चैव भामिनि।
तवदर्शनमेष्यामि बालरूपेण देवकि॥
सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि।

भविता सप्तमी पुण्या यावच्चन्द्रदिवाकरौ॥
ये त्वां पुष्पादिभिर्देवीं पूजयिष्यन्ति मानवाः।
दिनेऽस्मिन्मां महाभागा तवोत्सङ्गे व्यवस्थितम्॥
दास्यन्ति ये निशीथेऽर्घ्यं रोहिण्या सहिते विधौ।
रोहिण्या सहितं चेन्दुं कृत्वा रौप्यमयं बुधः।
द्वादशाङ्गुलविस्तारं तत्रार्घ्यं सन्निवेशयेत्॥
सुवर्णेन कृते पात्रे राजते वा नरोत्तम।
सर्व्वान् कामानवाप्नोति इह लोके परत्र च॥
शङ्खे तोयं समादाय सपुष्पफलकाञ्चनम्॥
जानुभ्यां धरां कृत्वा चन्द्रायार्घ्यं
निवेद्य लोकानामुपकारकम्
अनवस्थपदं सद्यः पुमान् सङ्कीर्त्तनादपि।
कृष्णाष्टम्यां मार्गशीर्षे दाम्पत्यं दर्भनिर्मितम्॥
अनघं वानघीञ्चैव बहुपुत्रैः समन्वितम्।
स्थापयित्वा शुभे देशे गोमयेनानुलेपिते॥
स्नात्वा समर्च्चयेत् पुष्पैः सुगन्धैश्चानुलेपनैः।
ऋग्वेदेनोक्तमन्त्रैश्च दण्डकं मनसा स्मरन्॥
अनघं वासुदेवन्तु पत्नी तस्याश्रिसम्भवा।
प्रद्युम्नादिपुत्रवर्गं हरिवंशे यथोदितम्॥
ॐ अतोदेवा अवन्त्वादि मन्त्राः प्रोक्ता द्विजातिषु।
अतोदेवा अवन्त्वित्यादि बह्वृचप्रसिद्धाः॥
नमस्कारेण मन्त्रेण स्त्रीशूद्राणां युधिष्ठिर।
कालोद्भवैः फलैः कन्दैः भृङ्गारैस्तु नवैः शुभैः॥

भृङ्गारं कलशः।

विरूढधान्यैर्धूपैश्च दीपैर्गन्धैः सुधूपकैः।
ततो द्विजान् भोजयित्वा सुहृत्सम्बन्धिबान्धवान्॥
तेषां मध्येषु दृढवागनघव्रतपारगः।
भुक्तावसाने गृह्णीयात् किञ्चिदेकं महाव्रतम्।
इदं जीवन् न हनिष्ये सत्यं सत्यं मयोदितम्॥
वर्षमेकं ततः कृत्वा इदं तदनघं स्मृतम्।
रात्रौ प्रेक्षणिकं कार्य्यं नटनर्त्तक गायकैः॥
प्रभाते च नवम्याञ्च तोयमध्ये विसर्जयेत्।
एवं यः कुरुते पार्थ वर्षे वर्षेऽनघार्च्चनम्॥
भक्त्या परमया युक्तः सएवानघ उच्यते।
इह कीर्त्तिमवाप्योच्चैः मृतोयाति हरेः पदम्॥
आरोग्यं सप्तजन्मानि पुत्रपौत्रैः समन्वितः।
अवाप्याष्टमियोगेन ततः सिद्धिमवाप्नुयात्॥
एतामघौघशमनीमनघाष्टमीति।
कौन्तेय सम्प्रति मया कथिता हिताय॥
कुर्व्वन्तिनान्य मनसः स्वयमाभिहृद्धी।
वृद्धिं प्रयान्ति कृतवीर्य्य सुतानुरूपाम्।

इति भविष्योत्तरे अनघाष्टमीव्रतं नाम।

कृष्ण उवाच।

कृष्णाष्टमीव्रतं पार्थ शृणु पापहरं परम्।
धर्म्मस्य जननं लोके रुद्रप्रीतिकरं परं॥

मार्गशीर्षेऽथ वैमासि दन्तधावनपूर्व्वकं ।
उपवासस्य नियमं कुर्व्वान्नतस्य च व्रती ॥
समर्थासमर्थभेदेन व्यवस्थितो विकल्पः ।
अश्वत्थवटोदुम्बरप्लक्षजम्बूकदम्बकम् ॥
द्राक्षाकौस्तुभकाम्रातकरीराज्जुनजातिजम्* ।
दन्तधावनकं कुर्य्यात् प्रतिमासं यथा क्रमं ॥
करवीरं कुम्भपुष्पं मरुकं किंशुकं तथा ।
चन्दनं बिल्वपत्रञ्च पाटलाम्भोजमल्लिकां ॥
जाती च शतपत्राणि स्वर्णपुष्पाणि वा क्रमात् ।
क्षीरौघ कृशरश्चैव मोदकामण्डकास्तथा ॥
वटकाघारिका पूपादधिभक्तं च पूरिका ।
गुडोदन शर्कराच नैवेद्यानि घृतं तथा ॥
कृष्णाष्टम्यां वर्षमेकं गुरोरग्रे शिवस्य च ।
ब्रह्मचारी जितक्रोधः शिवजल्पपरायणः ॥
विभागे दिवसस्येह कृत्वा स्नानादिकाः क्रियाः ।
गत्वा शिवालयं पार्थ गुरोरग्रे शिवस्य च ॥
ब्रह्मचारीजित क्रोधः शिवार्च्चन परायणः ।
विभागेदिवसस्येह कृत्वा स्नानादिकाः क्रियाः ॥
गत्वा शिवालयं पार्थ पञ्चामृतपुरः सरम् ।
स्नपनं कारयित्वाथ लिङ्गस्य वरवारिणा ॥
चन्दनेनानुलिप्याथ पूजयेत् कुसुमोत्तमैः ।
धूपं वागुरुमिश्रञ्च देवदेवस्य भक्तितः ॥

---

* द्राक्षाकाशा प्रकाशातेति पुस्तकान्तरे पाठः ।

शिवस्तेन कर्त्तव्यं शिवसूक्तैर्द्विजोत्तमैः।
मार्गशीर्षे तथा मासि शङ्करेत्यभि पूजयेत्॥
गोमयं प्राशयित्वा च स्वपेद्रात्रौ जितेन्द्रियः।
प्रतिमासं शिवस्याग्रे होमं कृष्णतिलैः नृप॥
अतिरात्रस्य यज्ञस्य फलमाप्नोति मानवः॥
एवं पुष्येतु सम्पूज्य शम्भुं नाम महेश्वरम्।
कृष्णाष्टम्यां घृतं प्राश्य वाजपेयफलं लभेत्॥
गोमूत्रं प्राशयित्वा च स्वपेद्भूमौ जितेन्द्रियः।
माघे महेश्वरं नाम देवदेवस्य पूजयेत्॥
गोक्षीरं निशि सम्प्राश्य गोमेधफलमाप्नुयात्।
फाल्गुने च महादेवं सम्पूज्य प्राशयेत्तिलान्।
राजसूयस्य यज्ञस्य प्राप्नोत्यविकलं फलं।
चैत्रेस्थाणुं समभ्यर्च्य यवान् सम्प्राश्य भक्तितः॥
अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयं।
वैशाखे शिवमभ्यर्च्य प्राशयेच्च कुशोदकम्॥
फलमेधात् फलं यज्ञात् भक्तितः प्राप्नुयान्नरः।
ज्यैष्ठे पशुपतिं पूज्यगवां शृङ्गोदकं पिवेत्॥
गोसहस्रप्रदानस्य फलमाप्नोत्यनुत्तमं।
आषाढ़े चोग्रनामानं पूजयेद्भक्तितत्परः॥
गोमयं प्राशयेद्रात्रौ सौत्रामणिफलं लभेत्।
श्रावणे सर्व्वनामानं पूजयित्वा जितेन्द्रियः॥
प्राशयेदर्कपत्राग्रं तस्मिन् सर्वेश्वरं यजेत्।
बहुस्वर्णस्य यज्ञस्य फलमाप्नोत्यसंशयम्॥

मासि भाद्रपदेऽष्टम्यां त्र्यम्बकं नाम पूजयेत् ।
विल्वपत्रं निशि प्राश्य ग्रामदानफलं लभेत् ॥
आश्विने भवनामानं पूजयेद्भक्तितत्परः ।
प्राशयेत् तण्डुलजलमग्निहोत्रफलं लभेत् ॥
कार्त्तिके रुद्रनामानं सम्पूज्य प्राशयेत्पयः ।
चतुर्णामपि वेदानामध्यापनफलं लभेत् ॥
आपोशानवदश्नीयाद्द्रवद्रव्यं सकृद्व्रती ।
अङ्गुष्ठोपकनिष्ठाभ्यां गृहीत्वा पतितोदकम् ॥
इत्युक्तैश्च तथैवान्यैः पुष्पाद्यैश्च यथाक्रमात् ।
सम्पूज्य प्रार्थयेदीशं मन्त्रेणानेन भक्तिमान् ॥
विश्वात्मन् सुमहादेव व्रते वास्मिन् त्वयोदितं ।
दन्तधावननैवेद्य कुसुमप्राशनादिकं ।
मोहाद्वा यदि वा लोभान्नकृतं यदमन्त्रवत् ।
प्रसादात्तव तच्छम्भोः परिपूर्णं महामुने ॥
मासि मासि यजेदेवं लिङ्गमूर्त्तिं महेश्वरम् ।
अथवार्च्चाकृतिं रुद्रं सोमं कुम्भोपरिस्थितं ॥

सोमं उमासहितं ।

रूपनिर्म्माणन्तु विष्णुधर्म्मोत्तरे ।

वामार्द्धे पार्व्वती कार्य्या शिवः कार्य्यश्चतुर्भुजः ।
अक्षमालां त्रिशूलञ्च तस्य दक्षिणहस्तयोः ॥
दर्पणेन्दीवरौ कार्य्यौ वामयोर्यदुनन्दन ।
एकवक्त्रोभवेच्छम्भु र्दाता च दयितातनुः ॥
त्रिनेत्रश्च महादेवः सर्व्वाभरणभूषितः ।

मन्त्रपूर्व्वन्तु विधिवत्पूजयेच्छङ्करं व्रती ॥
कृष्णाष्टमीषु सर्व्वासु शिवभक्तान् यतीन् सदा ।
भोजयेद्ब्राह्मणान् शक्त्या दद्यात्तेभ्यश्च दक्षिणाम् ॥
व्रतान्ते शङ्करं कृत्वा सौवर्णम्प्रतिमाकृतिम् ।

शङ्करं उमासहितमिति शेषः ।

कृष्णाष्टम्यां तथा रात्रौ देवं समधिवासयेत् ॥
गन्धैः पुष्पैः फलैर्धूपै नैंवेद्यैर्विविधैः शुभैः ।
पूजा स्तुतिकथाभिस्तु कारयेच्च महोत्सवम् ॥
निवेदयेत्तथेशाय शय्यां सोपस्करान्विताम् ।
वितानं व्यजनं छत्रं घण्टाभारतिकादिकम् ॥
ततः प्रभातसमये स्नात्वा चाभ्यर्च्य शूलिनम् ।
कृत्वाभिकार्य्यौं विप्राय शिवायै तत्समर्पयेत् ।
वस्त्रालङ्कारसंयुक्तां गाञ्च कृष्णतिलैर्युताम् ।
प्रीयतां मे शिवोनित्यमित्युक्त्वा विधिवत्ततः ॥
ततस्तु भोजयेद्विप्रान् शिवभक्तान् स्वभक्तितः ।
पायसेनाज्ययुक्तेन दद्यात्तेषाञ्च दक्षिणाम् ॥
शक्त्या हिरण्यवासांसि शिवध्यानैकमानसः ।
लिखाप्य शिवशस्त्राणि दद्याच्च शिवतुष्टये* ॥
सजलाः कृष्णकलशास्तिलैर्भक्ष्यैः समन्विताः ।
द्वादशान्नं प्रदातव्यं छत्रोपानद्युगान्वितं ॥
वाचकाय प्रदातव्या गौः कृष्णा तु पयस्विनी ।
सोपस्करा तु रुद्रोमे प्रीयतामिति कीर्त्तयेत् ॥

---

* शिववस्त्राणीति पुस्तकान्तरे पाठः ।

रुद्राय कृष्णकलशान् लड्डु कांश्च वितानकम् ।
ध्वजं किङ्किणिसंयुक्तं कृष्णमेवात्र कल्पयेत् ॥
एवं यः कुरुते पार्थ व्रतमेतदनुत्तमम् ।
सर्व्वपापविनिर्मुक्तः शिवलोके महीयते ॥
इन्द्राद्यैस्त्रिदशैश्चीर्णं व्रतमेतन्महाफलम् ।
देवत्वमापुः सर्व्वे ते व्रतस्यास्य प्रभावतः ॥
गुरुत्वमायुश्च गणाधिराजतां ।
गुणग्रहत्वञ्च तथागुणग्रहः ॥
बहुनात्र किमुक्तेन तोषमायाति शङ्करः ।
कृष्णाष्टमीव्रतेनेह भक्त्याचीर्णेन पाण्डव ॥
न तथा तपसा दत्तैर्व्रतैस्तीर्थाभिषेचनैः ।
इत्येतत्ते समाख्यातं पार्थ कृष्णाष्टमीव्रतम् ॥
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥
कृष्णाष्टमी व्रतमिदं शिवभावितात्मा
सम्प्राश्नैरुदितनामयुतैरुपोष्य ।
कृष्णान् ददाति कलशान्* नृप गाश्च कृष्णां
योऽसौप्रयाति पदमुत्तममिन्दुमौलेः ॥

इति भविष्योत्तरोक्तं कृष्णाष्टमीव्रतं ।

पुलस्त्यउवाच ।

शृणु दाल्भ परं काम्यं व्रतं सन्ततिदं नृणाम् ।
यस्मिन् चीर्णे न विच्छेदः पितृपिण्डस्य जायते ॥

---

* सतिलानिति पुस्तकान्तरे पाठः ।

कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः।
कृष्णमभ्यर्च्य पूजाञ्च देवक्यां कुरुते तु यः॥
निराहारो जपन्नाम कृष्णस्य जगतः पतेः।
उपविष्टो जपन् स्नातः क्षुतप्रस्खलितादिषु।
पूजायाञ्चापि कृष्णस्य समवारान् प्रकीर्त्तयेत्॥
पाषण्डिनो विकर्म्मस्थान् नालपेन्नैव नास्तिकान्।
प्रभाते वाम्बुना स्नातो दद्याद्विप्राय दक्षिणाम्॥
भुञ्जीत कृतपूजश्च कृष्णस्यैव जगत्पतेः।
वैशाखज्यैष्ठयोश्चैव पारणं हि त्रिमासिकम्॥
उपोष्य देवदेवेशं घृतेन स्नापयेत् हरिं।
आषाढ़े श्रावणे चैव मासि भाद्रपदे तथा॥
तथैवाश्वयुजे मासि कृत्वा मासत्रयं तथा।
उपोष्य तु द्वितीयं वै पारणं पूर्व्ववत्तथा॥
उपोष्य पूजयेद्देवं* हविषा पारणे गते।
पौषमाघे फाल्गुने च नरस्तद्वदुपोषितः॥
चतुर्थं पारणे पूर्णे घृतेन स्नापयेद्धरिं।
एवं कृतोपवासस्य पुरुषस्य तथा स्त्रियः॥
न सन्ततेः परिच्छेदः कदाचिदपि जायते।
कृष्णाष्टमीमिमां यस्तु नरोयोषिद्यथापि वा॥
उपोष्यति च साह्लादं त्रिलोक्यां प्राप्य निर्वृतिं।
पुत्रपौत्रसमृद्धिं च मृतः स्वर्गं महीयते॥

---

* स्नापयेदिति पुस्तकान्तरे पाठः।

इत्येतत्कथितं दाल्भ मया कृष्णाष्टमीव्रतं।

इति विष्णुधर्म्मोत्तरोक्तं कृष्णाष्टमीव्रतं।

विष्णुरुवाच।

कन्यागते सवितरि कृष्णपक्षेऽष्टमी तु या।
सा च पापहरा पुण्या शिवस्यानन्दवर्द्धिनी॥
स्नानं दानं जपो होमः पितृदेवाभिपूजनम्।
सर्व्वप्रीतिकरं स्याद्धि व्रतं तस्यां त्रिलोचने॥
विशेषतः कृतं श्राद्धं होमश्च विधिवन्मुने।
तस्मात् श्राद्धं प्रयत्नेन तस्यां कुर्य्यात् प्रयत्नतः॥
एकभक्तन्तु पञ्चम्यां षष्ठ्यां नक्तं विदुर्बुधाः।
उपवासन्तु सप्तम्यामष्टम्यां पूजयेच्छिवम्॥
पूजयित्वा शिवं भक्त्या पितुः श्राद्धन्तु कल्पयेत्।
कृत्वा तु विधिवच्छ्राद्धं भुञ्जीत पितृसेवितं॥
यस्त्वस्यां कुरुते श्राद्धं पूजयित्वा त्रिलोचनं।
तस्य वर्षाणि तृप्ता स्युः पितरो दशपञ्च च।
एवं व्रतमिदं कृत्वा स्नमेकं चैवमादरात्॥

स्नमेकं सम्वत्सरं।

नामभिः पूजयेद्देवं त्रिपुरान्तकरं परं।
मासि भाद्रपदे शम्भुं शङ्करन्तु तथा परे॥
शिवन्तु कार्त्तिके मासि सर्व्वं मार्गशिरे तथा।
पौषे मासि तथैशानमुग्रं माघे प्रकीर्त्तितम्॥
फाल्गुने तु इनामानं चैत्रे रुद्रं प्रकीर्त्तयेत्।
वैशाखे नीलकण्ठन्तु ज्यैष्ठे नाम भवं परम्॥

महादेवं तथाषाढे श्रावणे त्र्यम्बकं द्विज ।
एतानि मासनामानि प्राशनानि निबोध मे ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
गोरोचनां पञ्चगव्यं मन्दरोन्मृत्तिकां तथा* ॥
तिलान्नञ्च तथा क्षीरं प्राशयेत् कायशुद्धये ।
बह्निपुष्पाणि ते वीर देवदेवस्य प्रीतये ॥
करवीरन्तथा जातिं पिप्पलातिकदम्बकम् ।
उन्मत्तकं तथा विल्वं शमीपत्रं कदम्बकम्† ॥
मालतीकुसुमं विप्र तथा मुद्गरकस्य च ॥
कुशपुष्पं तथा पुण्यमगस्तिकुसुमं तथा ।
सिह्लकं विजयं धूपं महिषाख्यं च गुग्गुलम् ॥
य एवं पूजयेद्देवं शङ्करं त्रिपुरान्तकम् ।
स्वमेकमेकं विप्रेन्द्र स याति परमं पदम् ॥
ब्राह्मणान् पूजयेद्यस्तु वाचकं च विशेषतः ।
महादेवस्य वै भक्तान् भक्त्या पाशुपतान् द्विजान् ॥
एवं यः कुरुते श्राद्धमष्टम्यामष्टकासु च ।
पूजयित्वा सुरेशानं शिवविप्रैर्मनीषिभिः ॥
तृप्यन्ति पितरस्तस्य वर्षाणि दशपञ्चकम् ।
दिव्यानि मुनिशार्दूल सप्तसप्त च सप्त च ॥
य एवं पालयेद्भक्त्या कृष्णाष्टम्यां व्रतं परं ।
यं यं काममभीप्सेत तं तं प्राप्नोति मानवः ॥

---

* द्वारोन्मृत्तिका, तथेति पुस्तकान्तरे पाठः ।

† वकन्तथेति पुस्तकान्तरे पाठः ।

पुत्रकामो लभेत् पुत्रं धनकामो धनानि च।
विद्यार्थी लभते विद्यां कन्यार्थी कन्यकां पराम्॥

इति भविष्यत्पुराणोक्तं शिवकृष्णाष्टमीव्रतम्।

अथ कृष्णाष्टमीव्रतम्।

देव्युवाच।

कृष्णाष्टम्यां विधानं वै निखिलं क्रियते तथा।
क्रमेण मे तथा ब्रूहि तत् कर्त्तव्यं सुरेश्वर॥

ईश्वर उवाच।

हेमन्ते त्वथ सम्प्राप्ते मासि मार्गशिरे तथा।
नक्तं कृत्वा शुचिर्भूत्वा गोमूत्रं प्राशयेन्निशि॥

नक्तं कृत्वा नक्तकल्पः।

आहरेदाशनं यत्र यथान्नञ्च तथाशयेत्।
तेन नक्तं समुद्दिष्टं प्राशितेनाशितेनचेति॥

तेन नक्तं समुद्दिष्टं प्राशितेनचेति।
क्वचित्प्राशितेन क्वचिदप्राशितेनेत्यर्थः॥

कृष्णाष्टम्यां विधानं वै शङ्करं पूज्य भक्तितः।
अतिरात्रस्य यज्ञस्य फलमष्टगुणं भवेत्॥
स्मरेच्च शङ्करं नाम सायं रात्रौ दिवा यथा।
पौषे गव्यं घृतं प्राश्य नक्तं कृत्वा तु मानवः॥
भक्त्या तु पूजयेच्छम्भुं भावितस्तुतितत्परः।
वाजपेयाष्टकं पुण्यं लभते नात्र संशयः॥
माघे माहेश्वरं नाम क्षीरप्राशनमादिशेत्।

अनाहारः स्वपेद्रात्रौ शङ्करं पूज्य भक्तितः ॥
नाम जप्त्वा महेशस्य गोमेधाष्टकमाप्नुयात्।
फाल्गुने तु महादेवं कृष्णायां परिकीर्त्तयेत् ॥
तिलान् प्राश्य अनाहारो निशि जप्त्वा* समाहितः।
जपन्नामाथ देवस्य संस्मरन् शङ्करं तथा ॥
राजसूयस्य यज्ञस्य फलमष्टगुणं भवेत्।
जपन्नामानि† पूर्व्वञ्च महादेवेति कथ्यते ॥
चैत्रे स्थाणुं समभ्यर्च्च्य पूजयन् भक्षयन्मधु।
रात्रौ सम्प्राश्य विधिवदनाहारः स्वपेन्निशि ॥
स्थाणुं जप्त्वा महामन्त्रमश्वमेधाष्टकं भवेत्।
कुशोदकं वै वैशाखे शिवं देवं प्रपूजयेत् ॥
मन्त्रं तत्र शिवं जप्त्वा नरमेधफलं लभेत्।
ज्यैष्ठे पशुपतिं नाम गवां शृङ्गोदकं पिबेत् ॥
जप्त्वा पशुपतिं विप्र गवां कोटिफलं लभेत्।
कृष्णाष्टम्यामथाषाढे उग्रं नाम प्रकीर्त्तयेत् ॥
प्राशयेद्गोमयं तत्र सौत्रामणिफलं लभेत्।
उग्रं जपति योमन्त्रं सर्व्वसिद्धिप्रदायकम् ॥
नक्तन्तु प्राशयेदर्घ्यं स्मरन् मन्त्रं सुभ.वितः।
सर्व्वेति श्रावणे प्रोक्तः सर्व्वकामचयं फलम्।
त्र्यम्बकन्तु जपेदर्कं स्मरन् मन्त्रं सुभावितः ॥
वर्षकोटिशतंसाग्रं रुद्रलोके महीयते।
त्र्यम्बकञ्च जपेद्योवै मासि भाद्रे तथाष्टमीं ॥

---

* सुप्त्वेति पुस्तकान्तरे पाठः। † नामन्नपूर्व्वञ्चेति पुस्तकान्तरे पाठः।

प्राशयेद्विल्वपत्रन्तु श्रुतिदीक्षाफलं लभेत्।
त्र्यम्बकं संस्मरेत्तत्र एकचित्तः सुभावितः॥
मासिचाश्वयुजे वीर प्राशनं तण्डुलोदकम्।
नाम्ना ईशं स्मरेद्देवं पुण्डरीकाष्टकं लभेत्॥
रुद्रन्तु कार्त्तिके मासि दधि प्राश्य सुभावितः।
रात्रौ संस्मरते रुद्रं सर्व्वपापप्रणाशनम्॥
अग्निष्टोमस्य यज्ञस्य फलाष्टकमवाप्नुयात्।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं न सिध्यति॥
मन्त्रेण हि विना देवि यत्नेनापि वृथा भवेत्।
तस्मात्सर्व्वं च प्रयत्नेन मन्त्रमेतमुदीरयेत्॥
समाप्ते तु व्रते देवि वर्षान्ते तु महाफलम्।
यस्यैव तु प्रसादेन पदं याति निरामयम्॥

यस्य मन्त्रस्येतिशेषः।

हेमन्ते शिशिरेचैव तथा शरदि शोभने।
व्रतं निवेदयेत् शम्भो त्वत्प्रसादात् सुरेश्वर॥
सम्पूर्णं हि व्रतं देव कृतं परमपूजितम्।
एवं निवेद्य देवेश सान्निध्यो भव शङ्कर॥
त्वत्प्रसादात् सुरेशान यथा शक्ति जपाम्यहम्।
कन्दमूलफलैर्व्वापि वर्षान्ते तर्पणं स्मृतम्॥
ब्राह्मणांश्च यथा शक्त्या शिवभक्तान् दृढ़व्रतान्।
अर्च्चयेत्परया भक्त्या क्रियतां मे अनुग्रहः॥
व्रतस्य तर्पणं पुण्यं करिष्ये शिवचोदितम्।

तर्पणं, पूरणं*।

इति सम्पूजयेत्पश्चात् भक्ष्यभोज्यैरनेकशः॥
दातव्या चार्जुनी कृष्णा सुरूपा तु पयस्विनी।
हेमशृङ्गी रौप्यखुरा घण्टाभरणभूषिता॥
वस्त्रयुग्मपरीधाना पुष्पमाल्यान्विता शुभा।
गुरवे गौः प्रदातव्या श्रेयोऽर्थं सुरसुन्दरि॥
आचार्य्यन्तु शिवं विन्द्याच्छिवमाचार्य्यरूपिणं।
उभयोरन्तरं नास्ति आचार्य्यस्य शिवस्य च॥
एतस्मात् कारणाद्देवि गुरुं पूज्य तदा नृणां।
यः समुद्धरते नित्यं घोरात् संसारसागरात्॥
न तेन सदृशो माता न पिता नच बान्धवाः।
यद्गुरौ दीयते दानं तद्गृह्णाति सदा शिवः॥
तस्मात्सर्व्वप्रयत्नेन पूजनीयो गुरुः सदा।
इत्येतत् कथितं सर्व्वं कृष्णाष्टम्यां विधिः परः॥
अनेन विधिना यस्तु कुरुते वत्सरं नरः।
सर्व्वकाम सुसम्पन्नः प्रयाति परमं पदम्॥

इति देवीपुराणोक्तं कृष्णाष्टमीव्रतम्।

अथ लक्षणाद्रीव्रतम्।

स्कन्द उवाच।

श्रुतानि देव देवश व्रतानि भवतो मया।

---

* तर्पणं रूपणमिति पुस्तकान्तरे पाठः।

रूपसौभाग्यदानीह स्वर्गमोक्षप्रदानि च ॥
येन धर्म्मार्थकामांश्च रूपञ्च गुणवद्विभो ।
स्वल्पवित्तप्रदानेन जायते तद्व्रतं वद ॥

ईश्वर उवाच ।

अस्ति वत्स व्रतन्त्वेकं तिथिनक्षत्रयोगतः ।
नभस्ये मासि राजेन्द्र यदार्द्रा जायते तदा ॥
व्रतमेतद्विधातव्यमुमामाहेश्वरं भुवि ।
आरोग्यैश्वर्य्यसौभाग्यरूपसम्पत्प्रदायकम् ॥
कारयित्वा यथा शक्ति सौवर्णं मिथुनं तयोः ।
गौरीगिरिशयोर्भक्त्या नक्तं सम्यक् पूजयेत् ॥
उमामहेशरूपन्तु प्रथम कृष्णाष्टम्यां अभिहितं वेदितव्यम् ।
पयोदधिघृतक्षौद्रशर्करावारिभिः क्रमात् ॥
संस्नाप्य चार्चयेद्गन्धैः पूजयेत् कुसुमोत्करैः ।
रक्तैर्वाप्यथवा पीतैःश्वेतैर्वा रक्तमिश्रितैः ॥
संवेष्ट्य वस्त्रयुग्मेन मन्त्रैरेभिः प्रपूजयेत् ।
शङ्कराय नमस्तुभ्यं विमलाय शिवाय च ॥
स्वयम्भुवे ह्यनन्ताय भवाय भाविने नमः ।
सर्व्वाय विश्वरूपाय सर्व्वज्ञाय नमो नमः ।
ईशानाय शम्भवेऽथ विरूपाक्षाय शम्भवे ॥
वसुधाय महादेवि विख्याते ललिते शिवे ।
शान्ते रौद्रे महावक्त्रे दुर्गे गौरी नमोस्तु ते ॥
सुपद्मपत्रपत्राक्षि सुमुखि विश्वतोमुखी ।
ईश्वरीन्द्राणि रुद्राणि रम्भे देवि नमो नमः ॥

शर्व्वाय विश्वरूपाय सर्व्वज्ञाय नमोनमः।
पत्रं पुष्पं पयः पत्रं फलं चन्दनपङ्कजैः॥
पूर्णं कृत्वाम्बिकेशाभ्यां मन्त्रमेतमुदीरयेत्।
नमोगौर्य्यै स्कन्दमात्रे विष्णुमूर्त्त्यै नमो नमः॥
नमोभूताधिपतये रूपाधिपतये नमः॥
गृहाणार्घ्यं विरूपाक्ष रूपार्थेऽभ्यर्थितोमया।
स भार्य्यया महादेव देवदेव नमोऽस्तु ते॥
अर्घ्यं दत्त्वा ततोधूपं दद्यादगुरुमिश्रितम्।
दीपं नैवेद्यताम्बूलफलानि विविधानि च॥
ततो द्वाविंशताधूपैः सूर्य्यस्य रचितैर्दृढम्।
तत्सङ्ख्याकैश्च गोधूमैर्व्रीहिपिष्टमयैः शुभैः॥
पूर्णं तल्लक्षणैः कृत्वा संदीपं सूत्रवेष्टितम्।
रसपञ्चकयुक्तेन शुष्कान्नेन समन्वितम्॥

गोधूमैर्गोधूमपिष्टमयैः, लक्षणैर्मत्स्यादिमुद्राङ्कितैर्भक्ष्यैः।
रसा दधिदुग्धघृतमधुशर्कराः, शुष्कान्नं मोदकं।

उमामहेशयोर्नान्दियुतेत्युद्दिश्य चार्पयेत्।
विप्राय दक्षिणां पूर्वं सौवर्णं मिथुनञ्च तत्॥
भक्ताय याचमानाय सुविद्याय कुटुम्बिने।
आत्मज्ञानैकनिष्ठाय वेदवेदाङ्गवेदिने॥
कुलशीलसदाचारलक्षणैर्लक्षिताय च।
नास्तिकाय न दातव्यं नाव्रते नाजितेन्द्रिये॥
दत्त्वाचेश्वरभक्ताय प्रणिपत्य विसर्जयेत्।
सत्तृणाण्येव तावन्ति भुक्ताचान्नं सुहृज्जने॥

साईनक्तं ततः सोमं शिवं ध्यायन् सुरेश्वरीम्।
तावन्ति द्वात्रिंशत्।
नभस्ये बहुलाष्टम्यामेवं यः कुरुते व्रतम्॥
लक्षणार्द्रेतिविख्यातमिदं तस्य फलं शृणु।
सर्व्वपापविशुद्धात्मा सर्व्वैश्वर्य्यसमन्वितः॥
भुक्ता भोगान्महेशेन ततः कालविपर्य्यये।
राजा भवति धर्म्मात्मा बलवीर्य्यसमन्वितः॥
रूपसौभाग्यलावण्यधनायुःकीर्त्तिमान् भवेत्।
प्राप्य कालक्षयं तस्मात् उमारुद्रप्रसादतः॥
चतुर्युगसहस्रान्तं स्वर्गलोके महीयते।
मास्यार्द्रर्क्षयुताष्टमी भवति या कृष्णा नभस्ये तदा।
सौवर्णं मिथुनं शिवागिरिशयो रूपं तयोर्लक्षणैः॥
पूर्णं पिष्टमयैर्ददाति गुरवे साईं रसैर्भोजनं।
भुक्ता योगयुतोत्सवं सभुवनं शम्भोर्व्रजेच्छाश्वतम्॥

इति मत्स्यपुराणोक्तं लक्षणार्द्राव्रतम्।

अथ सोमव्रतम्।

———000———

अनिलाद उवाच।

अथान्यत्सम्प्रवक्ष्यामि व्रतं श्रेयस्करं परं।
तस्योदाहरणं पुण्यं विधिवत् प्रनिबोधत॥
बारे सोमस्य नाश्यां पक्षोभौ सोममर्च्चयेत्।

विधिनाचन्द्रचूडाङ्के प्राज्यान्नेन सचन्द्रकम्॥
पक्षोभौ व्रतोभयव पक्षे नियमोऽष्टमीसोमवारयोः
संयोगमात्रं विवक्षितं, प्राज्यान्नं आज्यबहुलमन्नं।
दक्षिणार्द्धं हरन्ध्यायेद्वामोर्द्धन्तु हरिं विभुम्।
सोमसचन्द्रकवामार्द्धहरिमितिविशेषणत्रयेण चन्द्रहरिरूपत्वं वामार्द्धस्योक्तं।
घृताद्यैरैक्षवान्तैश्च लिङ्गं स्नाप्य तु पूर्व्ववत्।
घृताद्यैः पञ्चामृतसंज्ञकैः।
चन्दनेनेन्दुयुक्तेन दक्षिणार्द्धं विलेपयेत्।
कुङ्कुमागुरुणा वामं घनमध्यं तथैवच॥
इन्दुयुक्तेन कर्पूरयुक्तेन, घन-मुशीरम्।
काञ्चनेन सचन्द्रेण हरभागं तथार्चयेत्॥
समौक्तिकेन नीलेन हरेर्भागं विशेषतः।
चन्द्रेण हीरकयुक्तेन।
पश्चात्पुष्पैः शुभैर्व्वंध्य कारयेत् पुष्पमण्डपम्।
नीराजनं पुनः कुर्य्यात्पञ्चविंशतिपञ्चकैः॥
उभाभ्याश्चित्तदत्तेन प्रणमेच्च मुहुर्मुहुः।
उभाभ्यां देवी देवाभ्यां चित्तदत्तेन हरि
हरध्यायिना विधिना नीराजनस्य।
आज्यसिद्धैः शुभैर्भक्ष्यैर्नैवेद्यञ्च निवेदयेत्।
व्रतिनो ब्राह्मणांश्चैव पूजयित्वा विभावसुम्॥
विभावसुरग्निः।

मिथुनानि च सम्भोज्य यथाशक्त्या च दक्षयेत्।
अष्टम्यां पितरावच्चर्य विधिनानेन सुव्रत॥

पितरौतावेव देवौदेवौ।

वत्सरन्तु तदन्ते तु कर्त्तव्यं यन्निबोधत।
प्रागुक्तविधिना पूज्य सितं पीतं युगद्वयम्॥
दद्याद्वितानके चैव पताकाघण्टिके तथा।
धूपसञ्चारणे वापि दीपवृक्षौ शुभोभिनौ॥

धूपसञ्चारणा धूपदहनया यौ दीपवृक्षौ वृक्षाकारौदीपाधारौ।

एवमादि नियोज्यैव पूर्ववद्भोजमाचरेत्॥
अब्दपञ्चकमेवं हि यः करिष्यत्यसंशयम्।
उंभाभ्यां लोकमासाद्य पदं यास्यत्यनामयम्॥
असंशयस्था जीवन्ति नियमेन समाचरेत्।
इहैव सरितः साक्षान्नरकपीति लक्षयेत्॥
न स्पृशेत् पापदक्षान्नं नच दुःखी भवेत् खलु।
ज्वरग्रहादिभिर्नैव पीड्यतेऽसौ कदाचन॥

तत्र व्रते नाममन्त्रैः पूजाहोमौ।

इति कालिकापुराणोक्तं सोमव्रतम्।

अथ शङ्करार्कव्रतम्।

———ooo———

अनिलाद उवाच।

अथ चानेन मार्गेण शुभान्तामेव चाष्टमीं।

सम्प्राप्यादित्ययोगेन प्राग्विधानेन वा नरः ॥
किन्तु दक्षिणनेत्रस्थं भास्करस्यार्च्चयेद्बुधः।
पद्मरागेन हैमेन तु योज्येदं लेपनं शृणु ॥
नेत्रे न्यस्य ललाटाधः कुङ्कुमं रक्तचन्दनम्।
वृत्तन्तु योज्य मध्ये तु हरं पूर्व्ववदर्च्चयेत् ॥

अर्द्धचन्द्राकारं तन्मध्ये वृत्तञ्च लेपनं कृत्वा हेमनिवद्धं पद्मरागं वृत्तमध्ये निधाय सूर्य्यरूपनेत्र कुर्य्यादित्यर्थः।

अभावे पद्मरागादेर्हैमं सर्व्वत्र योजयेत् ॥
रुद्रवीजं परं पूतं यतस्तच्चैव सर्व्वदा।
शुक्लं माल्यां वरं* वस्त्रं नैवेद्यं च घृतप्लुतम् ॥
शेषः पूर्व्वविधानेन कर्त्तव्यो विधिविस्तरः।
किन्त्वपोष्य प्रकुर्व्वीत सप्तम्यां विजितेन्द्रियः ॥
शङ्करार्कयुतः पूज्य-घृतं गव्यञ्च पारयेत्।

उष्य उपोष्य

एतत् प्राग्विधिना कार्य्यं पञ्चद्वत्त्चायणो विधौ।
कुर्व्वन् सूर्य्यादिलोकेषु भुक्त्वा भोगान् व्रजेत्परम् ॥
एतत्तीर्त्वा प्रतापी स्याददीनः स्वजनप्रियः।
अस्मिन् लोके च धनवान् लोकवांश्च भवेत् पुनः ॥

इति कालिकापुराणोक्तं शङ्करार्कव्रतम्।

---

* सर्व्ववस्त्रोनामिति पुस्तकान्तरे पाठः।

अथ सोमाष्टमीव्रतम्।

---ooo---

नन्द्युवाच।

अथान्यत्संप्रवक्ष्यामि व्रतं श्रेयस्करं परं।
शिवलोकव्रतं पुण्यं सर्व्वसम्पत्करं नृणां॥
वारे सोमस्य चाष्टम्यां पक्षयोरुभयोरपि।
विधिवच्चन्द्रचूड़ाभं सोमं सम्पूजयेद्विभुं॥

सोमं उमासहितम्।

रूपन्तु कृष्णाष्टम्यामेव व्याख्यातं।

तिलसर्षपकल्केन स्नातोऽमलजलाशये।
गृहे वायतने वापि शिवैकाहितमानसः॥
ब्रह्मकूर्च्चेन देवेशं प्राशयित्वा ततोव्रती।

ब्रह्मकूर्च्चं पञ्चगव्यं।

वामादिनाममन्त्रैश्च देवं देवीं तथार्च्चयेत्॥
चन्दनेनेन्दुयुक्तेन दक्षिणार्द्धं विलेपयेत्।

इन्दुःकर्पूरं।

वामार्द्धं कुङ्कुमेनाथ सतुरुष्केण मन्त्रवत्।

तुरुष्कः सिह्लकं।

देव्यामूर्द्ध्नि न्यसेन्नीलं शिवस्योपरि मौक्तिकम्॥
पश्चात् पुष्पैः समभ्यर्च्च सितरक्तैस्त्वनुत्तमैः।
नीराजनं पुनः कुर्य्यात् पञ्चविंशतिदीपकैः॥

घृतसिद्धान्* शुभान् शुक्लान् फलानि च निवेदयेत्।
सम्पूज्यैवं शिवं सोमं स्तुत्वा पश्चात् समापयेत्॥
दीक्षितस्यैवमन्योऽपि नाममन्त्रेण भक्तिमान्।
ततोविधिवद्व्यग्रोब्रह्मकूर्चम्पूतांस्तिलान्॥
सद्योजातेन जुहुयात्सम्यद्धेऽग्नौ सुभावितः।
सम्प्राप्यघ्रष्टमेवायं प्रभाते नैव तत्‌चणः† ॥

तत् ब्रह्मकूर्च्चं।

सम्भोजयेत् सपत्नीकान् ब्राह्मणान् संशितव्रतान्।
सुवर्णञ्च तथा शक्त्या रौप्यं दत्त्वा विसर्जयेत्॥
प्रीयतां मे शिवोनित्यमुमा देवी च सर्व्वदा।
एवमाराध्य गौरीशन्दशकृत्वोमुने शिवम्॥
व्रतस्यान्ते प्रकर्त्तव्यं यत्तत्सर्व्वं शृणुष्व तत्।
कृत्वामहोत्सवं प्राप्य पूजयेत्परमेश्वरम्॥
पुष्पैः शुक्लैस्तथा धूपैर्नैवेद्यैश्च फलैः शुभैः।
वितानं चामलं छत्रं घण्टाञ्चाप्युपयोगवत्॥
पूजाप्रकरणं शम्भोर्यथाशक्ति समर्थयेत्।
ततोवस्त्रैरलङ्कारैः स्वर्णरौप्यमयैर्गुरुम्॥
सभार्य्यमर्च्चयेद्भक्त्या शिवभक्तांश्च मानयेत्।
रौप्यखुरीं स्वर्णशृङ्गीं सचेलां कांस्यदोहनां॥
दद्याद्धेनुं सवत्साञ्च वृषभञ्च सुलक्षणम्।
पूजयेच्च व्रती साधून् भोजनाच्छादनाशनैः।

---

* घृतजिह्वानिति पुस्तकान्तरे पाठः।

† संप्राप्याघ्रष्टमेवायं प्रभाते तत्‌चण इति पुस्तकान्तरे पाठः।

यच्छिष्टाशनं पश्चाद्भुञ्जीयात् प्रयतो गृही ॥
य एवं कुरुते भक्त्या पार्थ सोमाष्टमीव्रतं।
सर्व्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात् ॥
कुरुक्षेत्रादिदानेन* यत् फलं लभते नरः।
तत् फलं लभते विद्वान् पूज्येमां विधिवन्नरः ॥

इति स्कन्दपुराणोक्तं सोमाष्टमीव्रतम्।

अथ अर्काष्टमीव्रतम्।

——-—-ooo——

कृष्ण उवाच।

अथान्यदपि ते वच्मि व्रतं कामफलप्रदम्।
सर्व्वपुण्यप्रदं लोके महापातकनाशनम् ॥
यदाष्टम्यां शुक्लपक्षे रविवारोऽभिजायते।
उपोष्या सा प्रयत्नेन तेनैव विधिना नृप ॥
अर्चयेद्देवदेवेशं सह देव्या महेश्वरम्।
विशेष एव एवात्र शिवस्य नयनेस्थितम्* ॥
भानुं सम्पूजयेद्भक्त्या गन्धपुष्पाक्षतैः शुभैः।
शिवञ्च सितपुष्पैस्तु रक्तपुष्पैस्तथाम्बिकाम ॥
रवैरक्तासितैर्दिव्यैर्भक्तिमानर्च्चयेद्विभुम्।
कुङ्कुमेनालभेद्देवीं चन्दनेन महेश्वरम् ॥

---

* नवां शतसहस्राणि दश दत्त्वा चेति पुस्तकान्तरे पाठः।

* शिवस्य नयने स्थितमिति पुस्तकान्तरे पाठः।

अभावे सर्व्वरत्नानां काञ्चनं तत्र दापयेत्।
वह्निबीजं जपन् सूक्तं प्रियं वद्रस्य सर्व्वदा॥
सितरक्तं वस्त्रयुग्मं नैवेद्यं घृतपाचितम्।
शेषः पूर्व्वविधानेन कर्त्तव्योविधिविस्तरः॥
किं त्वत्रोपोष्य कर्त्तव्यं गोजलं प्राश्य पारणं।

गोजलं गोमूत्रं पूर्व्वविधाने नेति

एतस्य व्रतस्य भविष्योत्तरोक्तविधानेत्यर्थः।
हविषान्नेन सहितो बान्धवै रर्थिभिस्तथा।
एतत्प्राग्विधिना यस्तु कुर्य्यात् सूर्य्याष्टमीव्रतम्॥
सर्व्वपापविनिर्म्मुक्तः सूर्य्यलोके महीयते।
पूर्व्वविधानेनेति एतस्य व्रतस्य भविष्योत्तरोक्तविधानेन

अत्र यद्यपि भविष्योत्तरोक्तसोमाष्टमीविधिर्नैरन्तर्य्यादग्राह्य
स्तथापि सक्ताधर्म्मशास्त्रिखितः।

स्कन्दपुराणोक्त सोमाष्टमीव्रतस्य विधि

ग्रहणे विशेषाभावात्कश्चिद्दोषइति।
हविषा न्नेनसहितोबान्धवैरर्थिभिस्तथा॥
एतत् प्राग्विधिना यस्तु कुर्य्यात् सूर्य्याष्टमीव्रतम्।
सर्व्वपापविनिर्मुक्तः सूर्य्यलोके महीयते॥
इहवाभ्येत्य स स्याद्वै पार्थिवः पृथिवीपतिः।
आरोग्यसर्व्वसौख्यैकभाजनो भानुभावितः॥
प्रतापी भानुवद्भाति दीनानुग्रहकृद्भवेत्।

यद्यष्टमी भवति सोमयुताकदाचि
दर्कॆण वा कुरुकुलोद्वह तामुपोष्य।

पूज्योमया सह हरं हरिणाङ्कचूडं*
भक्त्या पुमान् परमुपैति पदं मुरारेः ॥

इति श्रीभविष्योत्तरोक्तमर्काष्टमीव्रतम् ।

अथ पुष्पाष्टमीव्रतम् ।

———000———

महादेव उवाच ।

शृणु देवि महापुण्यं मामपूजाफलं शुभम् ।
श्रावणे शुक्लपक्षस्य सप्तम्यां य उपोषितः ॥
स्नापयेत् घृतक्षीराभ्यां करवीरैश्च पूजयेत् ।
कृत्वाग्निकार्य्यं विधिवद्यो ब्राह्मणभोजनम् ॥
कन्याकर्णितसूत्रेण† कारयित्वा पवित्रकम् ।
कृत्वा विचित्रगन्धैश्च कुङ्कुमागुरुचन्दनैः ॥
कृतोपवासं सप्तम्यामष्टम्यां विप्रभोजनम् ।
आरोपयति योभक्त्या सोऽग्निष्टोमफलं लभेत् ॥
पुनर्भवति वै राजा भूतले नात्र संशयः ।
मासि भाद्रपदेऽष्टम्यां शुक्लपक्षे वरानने ॥
स्नापयित्वा तु मां भक्त्या पयसा वा घृतेन वा ।
अपामार्गेण पूजान्तु कृत्वा देवि विधानतः ॥
हंसयानसमारूढो ममलोकं व्रजेदिति ।

---

* हरिणाकदाचिदिति पुस्तकान्तरे पाठः ।

† कन्यार्पितसूत्रेणेति पुस्तकान्तरे पाठः ।

मासिचाश्वयुजेऽष्टम्यां सर्व्वपुष्पैश्च* पूजयेत्॥
गैरिकं यानमारूढो ध्वजमालाकुलं शुभम्।

गैरिकं सौवर्णं।

युक्तो मयूखप्रवरैर्मम्मयाति स मन्दिरं॥
कार्त्तिकस्य तु मासस्य शुक्लाष्टम्यान्तु यो नरः।
स्नापयेन्मधुक्षीराभ्यां जातीपुष्पैस्तु पूजयेत्॥
काञ्चनं यानमारुह्य किङ्किणीजालमालिनं।
स याति परमं देवि गन्धर्व्वाप्सरसां प्रियः॥
मार्गशीर्षे च वै मासि पञ्चगव्येन यो नरः।
स्नापयित्वा च तं भक्त्या रक्तपुष्पैस्तु पूजयेत्॥
स्नापयेत् दधिक्षीरेण कुङ्कुमेन विलेपयेत्।
कृत्वोपवासं सप्तम्यामष्टम्यां विधिवन्नरः॥
स त्रैलोक्यमतिक्रम्य यत्राहं तत्र गच्छति।
पौषे मासे तु योऽष्टम्यां भक्त्या मां पूजयेन्नरः॥
उन्मत्तकस्य पुष्पैस्तु स्नापयित्वा घृतेन तु।
स यानं दिव्यमारूढः पुष्पकं नामनामतः॥
ममालयं समासाद्य मोदते शाश्वतीः समाः।
माघमासे तथाष्टम्यां विल्वपत्रेण योऽर्च्चयेत्॥
स्नापयित्वा तु मां भक्त्या दिव्यइक्षुरसेन वा।
प्रतप्तार्कसमं यानङ्काम्यात्रेयसमस्तथा॥
आरूढो मोदते नित्यं मम लोके न संशयः।

---

* अर्कपुष्पैरिति पुस्तकान्तरे पाठः।

फाल्गुनस्य तु मासस्य गन्धतोयेन यो नरः ॥
अर्च्चयेद्द्रोणपुष्पैस्तु इन्द्रस्यावासनं लभेत् ।
चैत्रे मासि तथा देवि पुष्पतोयेन यो नरः ॥
स्नापयित्वार्च्चयेद्भक्त्या अर्कपुष्पैस्तु सुन्दरि ।
बहुसुवर्णस्य यज्ञस्य विन्दति स फलं महत् ॥
वैशाखे तु यथा मासि अष्टम्यां यस्तु मानवः ।
कर्पूरागुरुतोयेन स्नापयित्वा विधानतः ॥
अर्च्चयेच्छुभगन्धेन* सोऽश्वमेधफलं लभेत् ।
ज्यैष्ठेमासि तथाष्टम्यां दध्ना यः स्नापयेत्तु माम् ॥
अर्च्चयेत्पद्मपुष्पैश्च स गच्छेत्परमाङ्गतिम् ।
आषाढे यो नरोऽष्टम्यां नानातीर्थोदकैर्नवैः ॥
स्नापयित्वार्च्चयेद्भक्त्या पत्रैर्धुस्तूरकस्य तु ।
गन्धर्व्वोरगयक्षैस्तु पूज्यमानो नरो दिवि ॥
क्रीड़ते च मया सार्द्धं यावदिन्द्राश्चतुर्दश ।
य एवं वत्सरे देवि कारयेदष्टमीव्रतम् ॥
न तस्य पुनरावृत्तिः सत्यमेतद्ब्रवीम्यहम् ।
नीलकण्ठञ्च शम्भुञ्च सर्व्वं भीमं महेश्वरम् ॥
विरूपाक्षं महादेवं उग्रं त्र्यम्बकमेव च ।
ईश्वरञ्च शिवं देवि सर्व्वलोकेषु पूजितम् ।
एतानि मासनामानि मासेष्वेतेषु कीर्त्तयेत् ॥

इति भविष्यत्पुराणोक्तं पुष्पाष्टमीव्रतम् ।

---

* अर्च्चयेच्छुक्लगन्धेनेति पुस्तकान्तरे पाठः ।

अथ तिन्दुकाष्टकाष्टमीव्रतम्।

——ooo——

ज्यैष्ठेमासि द्विजश्रेष्ठ शुक्लाष्टम्यां त्रिलोचनम।
यः पूजयति देवेशमीशलोकं व्रजेन्नरः॥
ज्यैष्ठेमासि तथाषाढ़े श्रावणे च तथा परे।
पूजयेच्चतुरोमासान् नीलोत्पलकदम्बकैः॥
त्रिपुरान्तकरं शम्भुं त्र्यम्बकान्धकसूदनम्।
गन्धानाञ्च कदम्बेन पूजयेत् गुग्गुलेन च॥
टेम्बुरुकफलं विप्र प्राशयेत् कायशोधनम्।

टेम्बुरुकस्तिन्दुकफलं।

देवस्य कीर्त्तयेन्नाम भास्करेति पुनःपुनः।
मासि चाश्वयुजे विप्र कार्त्तिकश्च तथा द्विज॥
मार्गशीर्षे तथा मासि पौषे मासि तथा हरम्।
पूजयेद्विधिवद्भक्त्या उन्मत्तकुसुमैर्विभुं॥

उन्मत्तकुसुमैर्धुस्तूरपुष्पैः।

कर्पूरागुरुधूपेन देवेशं पूजयेद्धरिम्।
विरूपाक्षेति वै नाम प्राशयेद्विधिवत् यवान्॥
माघे च फाल्गुने चैव कृष्णाष्टम्यां त्रिलोचनम्।
चैत्रवैशाखयोर्भक्त्या शतपत्रैः समर्च्चयेत्॥
महाधूपेन धूपेन विधिवत्कल्पितेन च॥
पूजयेद्विधिवद्देवं त्रिपुरान्तकरं हरम्।
कक्कोलागुरुकर्पूरदर्पकुङ्कुमचन्दनैः।

चतुर्जातेन च महान् यक्षकर्दम एवच ॥

इत्युक्तः, नैवेद्यैः खण्डत्रष्टैस्र नाम इंशेति पूजयेत् ।

य एवं पूजयेद्देवं कृष्णाष्टम्यां महेश्वरम् ॥

स्वमेकमेकं विप्रेन्द्र स याति परमाङ्गतिम् ।

यद्दिष्टं देवदेवस्य शृणु तत् द्विजसत्तम ॥

उन्मकेन पुष्पेण धूपे कृष्णागुरुः सदा ।

श्रीखण्डः सर्व्वगन्धेषु नैवेद्यं पायसं सदा ॥

पूजाकारः पाशुपतः* सर्व्वभोग विवर्जितः ।

कल्पज्ञो ब्राह्मणानान्तु वाचकस्तस्य वल्लभः ॥

एवं सम्पूज्य नृपते रुद्रेण विधिना हरिम्† ।

पूजा लिङ्गे शङ्करादिनाम्ना ।

वत्सरान्ते वलिं पुण्यं तथा पुस्तकवाचनम् ॥

यः कारयति वै भक्त्या तस्य पुण्यफलं शृणु ।

स्वर्गलोकमवाप्नोति तेजसा शुक्रसन्निभः‡ ॥

इति भविष्यत्पुराणोक्तं तिन्दुकाष्टकाष्टमीव्रतम् ।

अथ दाम्पत्याष्टमीव्रतम् ।

———॰ঃ॰———

कार्त्तिके मासि विप्रेन्द्र पुत्रकामो नरोमुने ।

अष्टम्यां कृष्णपक्षस्य पूजयेद्विधिवद्द्विज ।

---

* पूजाकरः पशुपतिरिति पुस्तकान्तरे पाठः ।

† शार्व्वेण विधिनादर मिति पुस्तकान्तर पाठः ।

‡ शक्रसन्निभ इति पुस्तकान्तरे पाठः ।

उमया सहितं देवं कृत्वा दर्भमयं विभुं ॥
गन्धपुष्पोपहारैस्तु वासोभिर्भूषणैस्तथा।
नीलवैदूर्य्यसङ्काशान्* समूलान् पुष्पवर्जितान् ॥
वैतस्तिकान् तथा साग्रान्नृजून् दर्भान् द्विजोत्तम।
गृहीत्वा कारयेद्देवं नीलकण्ठमुमापतिं ॥
उमाञ्च तां सतीं देवीं विधिवद्ब्रह्मसत्तम।
पूजयेद्गन्धपुष्पैस्तु फलैर्भक्ष्यैरनेकशः।
नानाप्रेक्षणकैश्चैव सुखवाद्यैश्च सुव्रत ॥
य एवं कुरुते भक्त्या उमामाहेश्वरं व्रतम्।
स्वमेकमेकं विप्रेन्द्र स याति परमां गतिं ॥

स्वमेकः सम्वत्सरः।

चतुर्भिः पारणैरेवं स्वमेकं कीर्त्तितं बुधैः।
प्रथमन्तु त्रिभिर्मासैः पारणं कार्त्तिकादिभिः ॥
कार्त्तिके मार्गशीर्षे तु पौषे मासि तथा परे।
उन्मत्तकस्य पुष्पैस्तु फलैर्भक्ष्यैरनेकशः ॥

उन्मत्तकस्य धूस्तूरकस्य।

श्रीखण्डचन्दनेनेशं श्वेतेन तु विलेपयेत्।
साज्यन्तु गुग्गुलं दद्यान्नैवेद्यं पायसं परं।
स्नानन्तु पञ्चगव्येन प्राशनन्तु प्रवर्त्तयेत् ॥
महादेवेति वै नाम गौरीदेवीति पठ्यते।
माघे च फाल्गुने मासि तथा चैत्रे द्विजोत्तम ॥
मालतीकुसुमैर्देवं कुसुमैर्म्मुहुरस्य च।

* कुशान् वैदूर्य्यसङ्काशानिति पुस्तकान्तरे पाठः।

विरूपाक्षेति वै नाम देव्यानाम उमेति च ॥
पूजयेद्विधिवद्देवं धूपेनागुरुणा विभुं।
कुङ्कुमेन तथा भक्त्या विधिवत्तौ विलेपयेत् ॥
दध्ना शाल्योदनं दद्यान्नैवेद्यं शूलपाणये।
कुशोदकं तथाश्नीयादात्मनः कायशुद्धये ॥
वैशाखे तु तथा ज्यैष्ठे आषाढ़े पूजयेद्धरं।
करवीरैश्च पुष्पैश्च तथा रक्तोत्पलैर्मुने ॥
प्राजापत्येन धूपेन रसालामोदकैस्तथा।

रसाला शिखरिणी।

शिवः शिवा च वै नाम्नी तयोर्विप्र प्रकीर्त्तिते।
स्नानप्राशनयोःशस्ता घृतकृष्णतिला बुधैः ॥
अगुरुं सिह्लकं धूपं प्राजापत्यमिति स्मृतम्।
श्रावणादिषु मासेषु जातीपुष्पकदम्बकैः ॥
पूजयेद्विधिवद्देवीं त्रिपुरान्तकरं हरं।
चतुःसमेन देवेशमर्च्चयेद्विधिवन्मुने ॥
धूपेनागुरुमिश्रेण कृशरापूपपायसैः।

चतुःसमेन त्वकपत्रैलाकेसरेण।

एभिर्भक्ष्यैः पूजयेद्देवं चतुर्भिः पारणैर्हरम् ॥
चतुर्वर्गमवाप्नोति कामयानो न संशयः।
प्रकामयानश्च पुनस्तुरीयं केवलं लभेत् ॥

तुरीयोमोक्षः।

कामयानो यथा मोक्षं कामं प्राप्नोति मानवः।
पुत्रकामोलभेत् पुत्रं धनकामो लभेद्धनम् ॥

विद्यार्थी लभते विद्यां नूनं प्राप्नोति शङ्करात्।
कृत्वैवं वर्षमेकन्तु वर्षान्ते प्रीणयेद्धरिं ॥
नानाप्रेक्षणकैर्ब्रह्मन् ब्राह्मणांश्चान्नतर्पणैः।
दाम्पत्यं भोजयेद्विप्रं प्रीतये शङ्करस्य तु ॥
कल्पस्थं वाचकं विप्रं सपत्नीकं विचक्षणः।
वाचकं कल्पयेत् शम्भुं स्वपत्नीं ललितां मुने ॥
प्रीणयित्वा तु दाम्पत्यं भक्ष्यभोज्यैरनेकशः।
कुसुम्भं रक्तवस्त्राणि ताभ्यां दद्याद्द्विजोत्तम।
नानाविधैर्गन्धपुष्पैः पूजयित्वा द्विजोत्तमं ॥
दक्षिणाञ्च पुनर्दद्यात्सौवर्णप्रतिमाद्वयं।
वाचकाय महादेवं तत्पत्नीं ललितां मुने।
य एवं पूजयेद्देवं हरं श्रद्धासमन्वितः ॥
स दिव्यं यानमारूढ़ः सुवर्णोज्ज्वलमुत्तमं।
तेजसा शुक्रसङ्काशः प्रभया हरिसन्निभः ॥
स गच्छेत्परमं स्थानमचलं शूलपाणिनः।
तस्मादेत्य भवेद्राजा भूतले भूतलेश्वरः ॥

इति भविष्यत्पुराणोक्तं दाम्पत्याष्टमीव्रतम्।

अथ पुत्रीयव्रतम्।

———०००———

पुलस्त्य उवाच।

प्रौष्ठपद्यामतीतायां कृष्णपक्षाष्टमी तु या।
सोपवासो नरोऽष्टम्यां योषिद्वा तनयार्थिनी ॥

स्नाता सरसि धर्म्मज्ञा तोयेवाप्यथ सारसे।
पूजनं वासुदेवस्य यथा कुर्य्यात्तथा शृणु॥
घृतप्रस्थेन गोविन्दं स्नापयित्वा जगद्गुरुं।
क्षौद्रेण च ततः पश्चाद्दध्ना वा स्नापयेत्ततः॥
क्षीरेण स्नपनं कृत्वा ततः पश्चाद्विरूक्षयेत्।
सर्व्वौषधैश्च सजलैः सर्व्वबीजफलैस्तथा॥
स्नापयित्वानुलिप्ता च चन्दनागुरुकुङ्कुमैः।
कर्पूरेण तथा राम तथा जातीफलैः शुभैः॥
ततः कालोद्भवैः पुष्पैः पूजयित्वा जगद्गुरुम्।
धूपं वागुरुणा धूपं कृत्वा नैवेद्यमीप्सितम्॥
विप्रेभ्यो ह्यङ्गिरसम्प्राश्य पुन्नागैरन्वितं फलम्।
पौरुषेण च सूक्तेन हुत्वा वानन्तरं ध्रुवम्।
शूद्रीवाप्यथवा नारी नाम्ना हुत्वा जगद्गुरोः॥
यवपात्राणि* दत्त्वा तु फलानि कनकं तथा।
पुत्रार्थं प्राशनं कुर्य्यात् फलैः पुन्नामभिः शुभैः॥
स्त्रीनामभिश्च कन्यार्थी ततो भुक्त्वा यथेप्सितं।
पुत्रकन्यामवाप्नोति तथा सर्व्वानभीप्सितान्॥
हविष्यं देवदेवस्य भूमिपानान्तु कारयेत्।
संवत्सरमिदं कृत्वा व्रतमाप्नोत्यभीप्सितं॥
पुत्रीयमेतद्व्रतमुत्तमन्ते मयेरितं यद्यपि धर्म्मनित्य।
तथाप्यनेनैव समस्तकामान् कृतेन लोके पुरुषा लभन्ते॥

इति विष्णुधर्म्मोक्तं पुत्रीयव्रतम्।

---

* ग(?)स्वपात्राणीति पुस्तकान्तरे पाठः

अथ सन्तानाष्टमीव्रतम्।

——000——

पुलस्त्य उवाच।

शृणु दाल्भ परं काम्यं व्रतं सन्ततिदं नृणां।
यदुपोष्य न विच्छेदः पुत्रपिण्डस्य जायते॥
कृष्णाष्टम्यां चैत्रमासे स्नातोनियतमानसः।
कृष्णमभ्यर्च्चगपूजाञ्च देवक्याः कुरुते च यः॥
निराहारोनरः पश्चात्कृष्णस्य जगतः पतेः।
उपोषितोजपन्मन्त्रं रात्रौ प्रयतमानसः॥
पूजायाञ्चापि कृष्णस्य सप्तवारान् प्रकीर्त्तयेत्।
पाखण्डिनोविकर्म्मस्थान् वैडालान् वकनास्तिकान्॥
प्रभाते च ततः स्नातो दत्त्वा विप्राय दक्षिणाम्।
भुञ्जीत कृतपूजस्तु कृष्णस्यैव जगत्पतेः॥
वैशाखज्यैष्ठयोश्चैव पारणं हि त्रिमासिकम्।
उपोष्य देवदेवेशं घृतेन स्नापयेद्धरिम्॥
आषाढे श्रावणेचैव मासि भाद्रपदे तथा।
उपोषितो द्वितीयं वै पारणं पूर्व्ववद्भवेत्॥
आश्विने कार्त्तिके सौम्ये तृतीयं पारणं तथा।
पौषे माघे फाल्गुने च चतुर्थं द्विजसत्तम॥
पारणे पारणे पूर्णे घृतेन स्नापयेद्धरिम्
ब्राह्मणेभ्यो घृतं दद्यात्तथैव प्रतिपारणम्॥

कृत्वाव्रतं नाकमनुप्रयाति
मानुष्यमासाद्य च निर्वृतिः स्यात्।
सन्तानवृद्धिश्च तथाप्नुतेऽसौ
यावन्महीं सागरमेखलान्ताम्॥

इति विष्णुधर्म्मोत्तरोक्तं सन्तानाष्टमीव्रतम्।

अथ महेश्वराष्टमीव्रतम्।

———ooo———

मार्कण्डेय उवाच।

शुक्लपक्षात्तथारभ्य सौम्याष्टम्यां नराधिप।
पूजयेत्सोपवासस्तु देवदेवं त्रिलोचनम्॥

सौम्याष्टम्यां मार्गशीर्षाष्टम्यां।

लिङ्गेवाप्यथ चार्च्चायां कमले यदिवा स्थले।
घृतक्षीराभिषेकेण स्नातेन विविधेन वा॥
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा।
गीतेन नृत्यवाद्येन वह्निसन्तर्पणेन च॥
ब्राह्मणानाञ्च पूजाभिर्यथावन्मनुजोत्तम।
व्रतावसाने दत्त्वा तु तथा धेनुं पयस्विनीं॥
पौण्डरीकमवाप्नोति स्वर्गलोकञ्च गच्छति।
पौण्डरीको नाम यज्ञविशेषः तस्य फलमवाप्नोतीत्यर्थः।
अष्टमीद्वितयं कृत्वा तथा संवत्सरं नरः॥

प्राप्याश्वमेधस्य फलं यथाव
द्भुक्त्वा च भोगान् सुरनाकलोके।
लोकानवाप्याथ महेश्वरस्य
सायोज्यमाप्नोत्यचिरेण तस्य॥

इति विष्णुधर्म्मोत्तरोक्तं महेश्वराष्टमीव्रतम्।

अथ वसुव्रतम्।

——ooo——

मार्कण्डेय उवाच।

ध्रुवोऽध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभावश्च अष्टौ ते वसवः स्मृताः॥
अष्टात्मा वासुदेवोऽयं प्रभाविनादयेन च।
अष्टम्यां पूजयेद्यस्तु सोपवासो नराधिप॥
चैत्रमासादथारभ्य शुक्लपक्षाच्च यादव।
मण्डले पृथिवार्चासु जपेच्च मनुजाधिप॥
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा।
वहिःस्नानेन राजेन्द्र तथाधःशयनेन च॥
व्रतान्ते तु सदा दद्याद्धेनुं विप्राय शक्तितः।
व्रतमेतन्नरः स्नात्वा सर्व्वान् कामानवाप्नुते॥
पुण्डरीकमवाप्नोति कुलमुद्धरते स्वकम्।
वसूनां लोकमासाद्य मोदतेऽमरसन्निभः॥
महातेजाः सत्यपरोह्यरोगोविजितेन्द्रियः।

सत्यपरोविनीतः ।

धनेन धान्येन तथान्वितः स्यात् ।
स्त्रीणामभीष्टश्च तथा भवेच्च ॥

इति विष्णुधर्म्मोत्तरोक्तं वसुव्रतम् ।

अथ कालाष्टमीव्रतम् ।

———०*०———

पुलस्त्य उवाच ।

नभस्ये मासि च तथा यास्यात् कृष्णाष्टमी शुभा ।
युक्ता मृगशिरैश्चैव सा तु कालाष्टमीस्मृता ॥
तस्यां सर्व्वैकलिङ्गेषु तिथौ स्वपिति शङ्करः ।
वसन्तसन्निधाने तु तत्र पूजाच्चया स्मृता ॥

एकलिङ्गानि वृषभगणपतिसहितानि पश्चिमाभिमुखानि प्रसिद्धानि ।

तत्र स्नायीत विद्वान् हि गोमूत्रेण जलेन च ॥
स्नात्वा सम्पूजयेत् पुष्पैर्धूपैस्तस्य त्रिलोचनम् ।
धूपः केशरनिर्य्यासैर्नैवेद्यं मधुसर्पिषा ॥

केशरोवकुलः ।

प्रीयतां मे विरूपाक्ष इत्युच्चार्य्य च दक्षिणां ।
विप्राय दद्यान्नैवेद्यं सहिरण्यं द्विजोत्तम ॥
तद्वदाश्वयुजे मासि सोपवासो जितेन्द्रियः ।
नवम्यां गोमयस्नानं कृत्वा पूजाञ्च पङ्कजैः ॥

तद्वदाश्वयुजे मासि सोपवासइत्यभिधानात्

पूर्व्वमासेप्युपवासोबोद्धव्यः।

धूपयेत्सर्जनिर्यासैर्नैवेद्यं मधुमोदकान् ॥
कृत्वोपवासमष्टम्यां नवम्यां-स्नानमाचरेत्।
प्रीयतां मे विरूपाक्ष दक्षिणा च तिलैः स्मृता ॥
कार्त्तिके पयसा स्नानं करवीरेण चार्च्चनं।
धूपं श्रीवासनिर्यासैर्नैवेद्यं मधुपायसैः ॥
सनैवेद्यञ्च रजतं दातव्यं दानमग्रजे।

श्रीवासः, सरलवृक्षः, अग्रजे ब्राह्मणे ॥

प्रीयतां भगवांस्थाणुरिति वाच्यमनन्तरम्।
कृत्वोपवासमष्टम्यां नवम्यां स्नानमाचरेत् ॥
मासि मार्गशिरे स्नानं तत्रार्च्चा रुद्रजा स्मृता।

अर्च्चा पूजा रुद्रजा शमीपुष्पजा।

धूपः श्रीवृक्षनिर्यासो नैवेद्यं मधुमोदकं।

श्रीवृक्षोविल्वः।

नैवेद्यं रक्तशालिश्च दक्षिणा परिकीर्त्तिता ॥
नमोस्तु प्रीयतां सर्व्व इति वाच्यञ्च पण्डितैः।
पौषे स्नानञ्च हविषा पूजा स्यात्पारणेन तु ॥

हविषा घृतेन।

धूपोयं मधुकनिर्य्यासो नैवेद्यं मधुशष्कुली।
सामुद्रं दक्षिणा प्रोक्ता प्रीणनाय जगद्गुरोः ॥
वाच्यं नमोऽस्तु देवेश त्र्यम्बकेति प्रकीर्त्तयेत्।
माघे कुशोदकस्नानं मृगमदेन वार्च्चनम् ॥

मृगमदोलताकस्तूरी ।

धूपः कदम्बनिर्यासो नैवेद्यं सतिलोदनं ।
पयः कुम्भेन नैवेद्यं सरुक्मं प्रतिपादयेत् ॥
प्रीयतां मे महादेव उमापतिरितीरयेत् ।
एवमेकं समुद्दिष्टं षड्भिर्मासैस्तु पारणम ॥
पारणान्ते त्रिगोत्रस्य* स्नपनङ्कारयेत् क्रमात् ।

गोरोचनां चन्दनकुङ्कुमेन
देवं समालभ्य च पूजयेच्च ।
त्रायस्व दीनोस्मि भवन्तमीश
शशाङ्कनाथ प्रणतोऽस्मि नित्यं ॥

ततस्तु फाल्गुने मासि कृष्णाष्टम्यां यतव्रतः ।
उपवासः समुद्दितः कर्त्तव्यो द्विजसत्तम ॥
द्वितीयेऽह्नि ततः स्नानं पञ्चगव्येन कारयेत् ।
पूजयेत् कुन्दपुष्पैस्तु धूपयेच्चन्दनेन तु ॥
नैवेद्यं सघृतं दद्यात्ताम्रपात्रे गुडोदनं ।
दक्षिणाञ्च द्विजातिभ्यो नैवेद्यसहितां मुने ॥
ब्राह्मणेभ्यः प्रदद्याच्च रुद्रमभ्यर्च्य नामतः ।
चैत्रे चेन्दुस्वरफलैः स्नानं मन्दारकार्चनं ॥
गुग्गुलं महिषाख्यञ्च घृताक्तं धूपयेद्बुधः ।
समोदकं तथा सर्पिः प्राशनं विनिवेदयेत् ॥
दक्षिणाञ्चैव नैवेद्यमुमाकान्ताय दापयेत्† ।

---

* त्रिनेत्रस्येति पुस्तकान्तरे पाठः ।

† नगात्मजमुदाहरेदिति पुस्तकान्तरे पाठः ।

नन्दीश्वर नमस्तेऽस्तु इदमुच्चार्य्य नारद ॥
प्रीणनं देवनाथाय कुर्य्याच्च श्रद्धयान्वितः ।
वैशाखे स्नानमुदितं सुगन्धिकुङ्कुमाम्भसा ॥
पूजनं शङ्करस्योक्तं भूतमञ्जरिभिर्विभो ।
धूपं सूर्य्याख्यपुष्पैस्तु नैवेद्यं सफलं घृतं ॥

सूर्य्याख्यं, अर्कपुष्पं ।

नाम जप्तव्यमीशेति कालघ्नेति विपश्चिता* ॥
जलकुम्भान् सनैवेद्यान् ब्राह्मणेभ्यो निवेदयेत् ।
उपानद्युगलं छत्रं दानं दद्याच्च शक्तितः ॥
नमस्ते भगनेत्रघ्न पुष्पदन्तविनाशन ।
इदमुच्चारयेद्भक्त्या प्रीणनाय जगत्पतेः ॥
आषाढे स्नानमुद्दिष्टं श्रीफलैरर्चनं तथा ।
धुस्तूरकस्य कुसुमैर्धूपार्थं सिल्हकं तथा ॥
नैवेद्यं सघृताः पूपाः दक्षिणा सघृतास्तथा ।
नमस्ते दक्षयज्ञघ्न इदमुच्चारयेत्ततः ॥
श्रावणे मृगमदेन स्नानं कृत्वार्चयेद्धरिं ।
श्रीवृक्षपत्रैः सफलैर्धूपं दद्यात्तथागुरुं ॥
नैवेद्यं सघृतं दद्याद्दधिपूर्णांस्तु मोदकान् ।
दध्योदनं कृशरकः कटिधानाः सशष्कुलाः ॥
दक्षिणा श्वेतवृषभं धेनुश्च कपिलां शुभां ।
कनकं रक्तवसनं प्रदद्याद्ब्राह्मणाय तु ॥

---

* नामपूज्यश्च ईशस्य कालघ्नेति त्रिवक्षता इति पुस्तकान्तरे पाठः ।

गङ्गाधरेति वक्तव्यं नाम शम्भोश्च पण्डितैः
अमीभिः षड्भिरुद्दिष्टैर्मासैः पारणमुत्तमं ॥
एवं सम्बत्सरं पूर्णं सम्पूज्य वृषभध्वजम् ।
अक्षयान् लभते लोकान् महेश्वरपरो नरः ॥
इदमुक्तं व्रतं पुण्यं सर्व्वाक्षयकरं शुभम् ।
स्वयं रुद्रेण देवर्षे तत्तथा न तदन्यथा ॥

इति वामनपुराणोक्तं कालाष्टमीव्रतम् ।

अथ रुक्मिण्यष्टमीव्रतम् ।

———000———

स्कन्द उवाच ।

भगवन् कथितं सर्व्वं यदभीष्टं मम प्रभो ।
साम्प्रतं श्रोतुमिच्छामि भुवि जातस्य कस्यचित् ॥
येन पुत्रवियोगेन भवेच्चैवं कदाचन ।
गृहे हि वसतां केन नित्यं श्रीः परिकीर्त्तिता ॥

शङ्कर उवाच ।

शृणु पुत्र प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
येन चीर्णेन मात्रेण नारी वा पुरुषोऽपि वा ॥
न पुत्रविरहं क्वापि न च भर्त्तुस्तथा क्वचित् ।
गृहस्थोपस्करैर्द्रव्यैर्हीनता न प्रजायते ॥
मासि मार्गशिरे कृष्णे पक्षेऽष्टम्यां षडानन ।
रुक्मिण्यष्टमिसंज्ञा सा सर्व्वकामफलप्रदा ॥

तस्यां प्रातः शुचिर्भूत्वा नारी नियमकारिणी ।
वर्षे च प्रथमे कुर्य्यादेकद्वारं गृहं मृदा ॥
गृहोपकरणं सर्व्वं तस्मिन्निक्षिप्य सादरम् ।
व्रीहीन् सूपप्रकारांश्च घृतादींश्च रसांस्तथा ॥
वस्त्रैः काष्ठैस्तथा दन्तैश्चित्रेण लिखितास्तथा ॥
कार्य्याः पुत्तलिकास्तत्र तासां नामानि मे शृणु ।
कृष्णश्च रुक्मिणीचैव बलदेवस्त्वरुन्धती ॥
प्रद्युम्नश्चैव तद्भार्य्या अनिरुद्ध उषा तथा ।
देवकीवसुदेवादीन् सर्व्वांस्तत्र प्रकल्पयेत् ॥
ततोनुपूजयेत् सर्व्वानष्टधूपाक्षतादिभिः ।
चन्द्रोदये तु सञ्जाते दद्यादर्घ्यन्तदिन्दवे ॥
शङ्खकुन्दप्रतीकाश गगनाङ्गणदीपक ।
गृहाणार्घ्यं मया दत्तं शङ्कराय नमोऽस्तु ते ॥

इति चन्द्रार्घ्यमन्त्रः ।

अर्घ्यं दत्त्वा तु भुञ्जीत मित्रस्वजनबन्धुभिः ।
ततः प्रभातसमये कुमार्य्यै तद्गृहं शुभं ॥
दद्यात् प्रीतेन मनसा सर्व्ववस्तुप्रपूरितम् ।
ततो द्वितीये अब्दे तु कुर्य्याद्द्वे सुखमन्दिरम् ॥
पूर्व्ववत् पूरितं कृत्वा कुमार्य्यै विनिवेदयेत् ।
ततस्तृतीये अब्दे तु कृत्वाभिसुखमन्दिरं ॥
सम्पूर्णं पूर्व्ववत् कृत्वा कुमार्य्यै विनिवेदयेत् ।
ततश्चतुर्थे अब्दे तु कृत्वा सुखचतुष्टयम् ॥
पञ्चमेऽब्दे पञ्चद्वारं षष्ठे षण्मुखसंयुतम् ।

कृत्वा दद्यात् प्रयत्नेन कुमार्य्यै मुखचतुष्टयम् ।
पञ्चमेऽब्दे, पञ्चद्वारं षष्ठे षण्मुखसंयुतम् ॥
कृत्वा दद्यात् प्रयत्नेन कुमार्य्यै सप्तमन्दिरम्* ।
ततस्तु सप्तमे वर्षे कुर्य्यादुद्यापनं शुभम् ॥
सप्तद्वारं गृहं कृत्वा सुधाधवलितं महत् ।
शय्यां तूलीञ्च यानं च कन्तोपानहमेव च ॥
आदर्शं चामरञ्चैव मुशलोलूखलं तथा ।
कांस्यभाजनपात्राणि ताम्रस्य तु महान्ति च ॥
नानाविधानि वस्त्राणि तथैवाभरणानि च ।
गृहोपकरणं सर्व्वं गृहे निक्षिप्य सर्व्वतः ॥
कृष्णञ्च रुक्मिणीञ्चैव प्रद्युम्नञ्च मनोहरं ।
कृत्वा स्वर्णमयान् शक्त्या पीतवस्त्रावगुण्ठितान् ।
पूजयित्वोपवासेन रात्रिजागरणेन च ॥
ततः प्रभातसमये तद्गृहे समुपागतम् ।
सपत्नीकं द्विजं पूज्य वस्त्रालङ्कारभूषणैः ।
तस्मादितद्गृहं दद्यागाश्चैवाथ सुशीलिनीं ॥
एवं कृते व्रते पुत्र न दुःखानि व्रजेन्नरः ।
नारी वा पुत्रदुःखार्त्ता भवेन्नैव षडानन ॥

इति स्कन्दपुराणोक्तं रुक्मिण्यष्टमीव्रतम् ।

---

* पुर्णमन्दिरमिति क्वचित् पाठः ।

अथ दुर्गाव्रतम्।

ब्रह्मोवाच।

देवीव्रतं प्रवक्ष्यामि सर्व्वकामप्रसाधनं।
श्रावणे शुक्लपक्षे तु अष्टम्यां वायुभोजनः॥
स्नात्वा सार्द्रपुटीभूत्वा जितक्रोधः* क्रियान्वितः।
देवीं सस्नाप्य तोयेन पुनःक्षीरेण वारिणा॥
ततोगुग्गुलधूपञ्च सतुरुष्कन्तु दापयेत्।

तुरुष्कः सिह्लकः।

ततोगन्धोदकस्नानं पुनः स्नानञ्च वारिणा॥
श्रीखण्डेन समालभ्य बिल्वपत्रैः प्रपूजयेत्।
पायसं दापयेद्देव्या नैवेद्यन्तेन भोजयेत्।
कन्याद्विजांश्च शक्त्या तु तेषां दद्याच्च दक्षिणां॥
कात्यायनीति चोच्चार्य्य प्रीयतां मम सर्व्वदा।
आत्मनः पारणं तच्च कृत्वा प्राप्नोति भार्गव॥
अश्वमेधफलञ्चाग्र्यं देव्यालोकञ्च गच्छति।
तथागत्य इमां भूमिं पृथिव्यां जायते नृपः॥
तेन संलभते योगं शिवप्राप्तिकरं परं।
मासे प्रौष्ठपदे शुक्ले गोशृङ्गापग्रही तथा।
मृदया ह्यात्मनोह्यङ्गमुपलिप्तन्तु कारयेत्†॥

---

* क्षमान्वित इति पुस्तकान्तरे पाठः।

† शुक्लपक्षे इति द्विशेषः षष्ठ्यामिति सप्तम्याम इति पुस्तकान्तरे पाठः।

शुक्ले तु शुक्लपक्षे तु अष्टम्या मित्यनुषङ्गः ।

तदा वामलकैः स्नात्वा शुचिः सङ्गविवर्ज्जितः ।
पूजयेद्यूथिकापुष्पैर्देवीं क्षीरेण स्नापयेत् ।
चन्दनोदकमिश्रेण कुङ्कुमेन विलेपयेत् ॥
ततः पूपकनैवेद्यं कर्णवेष्टांश्च दापयेत् ।
अगुरुं धूपनैवेद्यं तिलतैलेन दीपकान् ।
तेन ता भोजयेत्कन्या द्विजान् सद्वृत्तवर्त्तिनः ॥

तेन पूपकादिनैवेद्यान्नेन ।

पाषण्डान्नावलोकेत न च शास्त्रवहिष्कृतान् ।
दक्षिणाः शक्तितोदेयाः स्वस्तिवाच्यं च मङ्गलम् ।
पारणं चात्मनः कृत्वा सौत्रामणिफलं लभेत् ॥
प्रयाति विष्णुलोकञ्च तथा विप्रोऽभिजायते ।
धनाढ्योमहतां गोत्रे वेदवेदाङ्गपारगः ।
पुत्रवान् धनवान् भोगी सुखं प्राप्य शिवोभवेत् ॥
शुक्लाष्टम्यामाश्विने च मृदा स्नानं समाचरेत् ।
ततोदेवीं स्नपेद्दत्त दध्ना वेक्षूदकेन च ॥
आलभ्य रोचनां चन्द्रैर्द्देहेद्धूपञ्च बालकं ।
समखं सितया मिश्रं पद्मपत्रैस्तथार्चयेत् ॥
नैवेद्ये रोहितं मांस समानं शल्यजं तथा* ।
गोधूमविकृतान् भक्ष्यान् घृतपक्वान्निवेदयेत् ।
तेन कन्यास्तु सम्भोज्य द्विजांश्चापि क्षमापयेत् ॥

---

* माजं शाल्यकजं तथेति पुस्तकान्तरे पाठः ।

शक्तितोदक्षिणा देया आत्मनस्तत्र भोजनं।
गोसहस्रप्रदानस्य फलं प्राप्नोति मानषः॥
अरोगी सुखवान् धन्यो जायते चेह मानवः।
दुर्गानामानि सङ्कीर्त्य तस्या लोके महीयते॥
कार्त्तिके दर्भमूलानि मृद्भिः स्नायीत भार्गव।
देवीं गन्धोदकैः स्नाप्य उशीरैः पूज्य लेपयेत्॥
धूपं पञ्चरसन्देयन्तिलतैलेन दीपकाः।
पञ्चरसं, वोलरालकुन्दुरुश्रीवेष्टगुग्गुलुकृतं।
नैवेद्यं यावकं सर्पिःकन्याविप्रेषु चात्मनि॥
भोजनं स्वस्तिवाच्यैव दक्षिणा प्रीयतां शिव।
अनेन विधिना वत्स विद्यादानफलं लभेत्॥
वेदवेदाङ्गतत्त्वज्ञस्तदन्ते शिवतां व्रजेत्।
मार्गशीर्षे तथा मासि अष्टम्यांङ्गिरिमृत्तया॥
स्नात्वा देवीं ततः स्नाप्य तीर्थतोयेन भार्गव।
लेपयेद्वालकैः कुष्ठैः पूजा जातीगजाह्वयैः॥

गजाह्वयैर्नागकेसरैः।

धूपं कृष्णागुरुं दद्यात् घृतैर्दीपान् प्रबोधयेत्।
दधिभक्तन्तु नैवेद्यं कन्यास्तेनैव भोजयेत्॥
शक्तितोदक्षिणा देया आत्मनस्तत्र पारणं।
उमा मे प्रीयतां वाच्यं वाजपेयफलं लभेत्॥
इहैव धनवान् भोगी देहान्ते ब्रह्मणः पदम्।
पौषाष्टम्यान्तु दूर्वाग्रैः स्नात्वा शुक्लपरिच्छदः।

जितक्रोधः स्नापयेच्च देवीं कर्पूरवारिणा॥
विलेपयेत् कुङ्कुमेन मांसी वालकचन्दनैः।
धूपञ्च निर्दहेत् प्राज्ञः पूजनीया कुरुण्टकैः॥
कृशरं गुडनैवेद्यं कन्या भोज्याश्च तेनवै।
आत्मनः पारणं तच्च शक्त्या वै दक्षयेत् द्विजान्॥
नारायणी सदा प्रीता मम देवी प्रसीदतु।
एतेन ग्रहराजेन्द्र भूमिदानफलं लभेत्॥
सुभगोधनसम्पन्नः परत्र शिवमाप्नुयात्।
माघमासे गवां शृङ्गशृङ्गिः स्नात्वा तु भार्गव॥
देवीं तोयेन संस्नाप्य तथा क्षीरघृतेन च।
स्नापयेत पुनस्तोयैः कुङ्कुमेन विलेपयेत्॥
धूपं देवदलं दद्यात् कुन्दपुष्पैस्तु पूजयेत्।
घृतपूर्णञ्च नैवेद्यं कन्या विप्रांश्च तेन वै॥
भोजयेदात्मनस्तच्च दक्षिणा प्रीयतां जया।
सर्व्वयागफलं पुण्यं लभते नात्र संशयः॥
फाल्गुने सर्षपैः स्नात्वा देवीनाम्ना फलाम्बुना।
तथाद्रसुरसेनैव भूयस्तेनोदकेन च॥
रोचनालेपने पूजा शतपत्रिकया गुह।
दीपोघृतेन धूपस्तु चन्दनं नतु शर्करा*॥
नैवेद्येऽशोकवर्त्तिश्च भोजनं कन्यकासु च।
आत्मनस्तच्च कुर्व्वीत दक्षिणां स्वस्ति वाचयेत्॥

---

* नखशर्करा इति पुस्तकान्तरे पाठः।

विजया सुखदा नित्यं सुमुखा चेतनेति च* ।
अनेन विधिना शुक्ल राजसूयफलं समम् ॥
लभते श्रद्धया युक्तो ततो देवीमयं जगत् ।
चैत्राष्टम्यां तु स्नायीत मातृस्नाने मृदाम्बुभिः ।
देवीं तीर्थजलैः स्नाप्य मदलेपेन लेपयेत् ॥
धूपं तु कुक्कुसौशीरं† ह्यतिमुक्तैस्तु पूजयेत् ।
नैवेद्यं शालिजं भक्तं शर्करा कन्यकास्वपि ॥
आत्मनस्तच्च वै भोज्यं शक्तितोदक्षिणा ददेत् ।
अजिता सर्व्वकामानाम् पूरणाय सुखाय वै ॥
विप्रकन्याः समाच्छाद्य हेमदानफलं लभेत् ।
सहकारफलैः स्नानं वैशाखे ह्यष्टमीं शुचिः ॥
आत्मानं देवताः स्नाप्य मांसीवालकवारिभिः ।
लेपनं मृगकर्पूरं धूपं पञ्चसुगन्धिकम् ॥
देव्याः पूजां प्रकुर्व्वीत केतक्या चम्पकेन तु ।
शर्कराक्षीरनैवेद्यं कन्याविप्रेषु भोजनं ॥
आत्मनः पारणं तच्च दक्षिणां शक्तितोददेत् ।
अपराजिता भवानी च शिवा नाम्ना च वाचयेत् ॥
प्रीयतां सर्व्वकालं मे ईप्सितं तु प्रयच्छतु।
सर्व्वतीर्थाभिषेकं तु अनेनाप्नोति भार्गव ॥
सूर्य्यलोकं व्रजेदन्ते तत्तुल्योजायते सदा ।
अष्टम्यां चैव ज्यैष्ठस्य तिलैः स्नायाद्विचक्षणः ।

---

* संमुमेधिन्तितानिर्वेति पुस्तकान्तरे पाठः॥

† कुक्कुचौशीरमिति पुस्तकान्तरे पाठः।

सर्व्वसङ्गपरित्यागी देवीं जातिफलाम्बुना ॥
स्नापयेल्लेपयेत्ताभिश्चन्दनेन सुगन्धिना ।
ततोविजयपुष्पैस्तु पूजयेद्द्विजसत्तम ॥

विजयः कुम्भकः ।

नैवेद्यैशक्तवो देयाः शर्करा कन्यकास्वपि ।
दक्षिणा शक्तितोदेया चर्च्चिकां प्रति वाचयेत् * ॥
लभते शुक्र यज्ञस्य सौत्रामणिसमं फलम् ।
अष्टम्यां च तथाषाढे निशातोयेन स्नापयेत् ॥
ततोदेवीं जलैः कुष्ठैर्वरदामधुकेन च ।

जलैःकालकैः ।

मधुकेन यष्टिमधुना ।

स्नात्वा विलिप्य कर्पूरं चन्दनैरोचनाम्बुभिः ।
धूपश्चन्दनकर्पूरैर्वाल्कीकैः सितसिल्लकैः ॥

सिताशर्करा ।

भक्ष्यान्नशर्करापूपान् पानकानि शुभानि च ।
दापयेत् कन्यकां विप्र भोजनं चात्मनस्तथा ॥
शक्तितोदक्षिणां दद्यात् मह्निषघ्नीति कीर्त्तयेत् ।
दीपमाला घृतेनैव सर्व्वकामान् प्रयच्छति ॥
नैवेद्यं शुभ्रकंसारं कन्याविप्रांश्च भोजयेत् ।
सर्व्वयज्ञमहीदानसर्व्वतीर्थफलं लभेत् ।
एतद्व्रतवरं शुक्र मया रुद्रेण विष्णुना ॥

---

* प्रतिषार्च्चयेदिति पाठान्तरे ।

जगतोहितमिच्छद्भिस्त्रीर्णन्दुर्गाव्रतं महत्।
भानुना ग्रहविध्वंससमरे च कृतं पुरा* ॥
यथा देवासुरैर्यक्षनागकिन्नरमानवैः।
अप्सरोभिस्तथा स्त्रीभिः सौभाग्यस्य विवृद्धये ॥
कृतं वै ग्रहशार्द्दूल यश्च कुर्य्याद्यथाविधि।
श्रवणादस्य चाप्नोति सर्व्वकामसुखानि च ॥
इष्टानि लभते मर्त्यो वन्ध्या पुत्रं प्रसूयते।

इति देवीपुराणोक्तं दुर्गाव्रतम्।

अथाशोकाष्टमीव्रतम्।

———ooo———

कृष्ण उवाच।

लिङ्गपुराणात्।

अशोक कलिकाश्चाष्टौ ये पिबन्ति पुनर्व्वसौ।
चैत्रे मासि तथाष्टम्यां न ते शोकमवाप्नुयुरिति ॥

कूर्म्मपुराणेऽपि।

चैत्रे मासि सिताष्टम्यां बुधवारे पुनर्व्वसौ।
अशोककुसुमैरुद्रमर्च्चयित्वा विधानतः ॥
अशोकस्याष्टकलिका मन्त्रेणोक्तेन भक्षयेत्।
शोकं नैवाप्नुयान्मर्त्यो रूपवानपि जायते ॥

अत्र बुधपुनर्व्वसुयोगः प्राशस्त्यार्थः।

---

* भानुनाश्चोग्रतिथिवत्समरे चेति पुस्तकान्तरे पाठः।

अतएव लिङ्गपुराणे।

अशोककलिकापानं, मशोकतरुपूजनम्।
शुक्लाष्टम्यान्तु चैत्रस्य कृत्वा प्राप्नोति निर्वृतिमिति॥

प्राशनमन्त्रस्तूक्तो लिङ्गपुराणे

त्वा, मशोकहरा, भीष्ट मधुमाससमुद्भव।
पिवामि शोकसन्तप्तो मामशोकं सदा कुर्व्विति।
कूर्म्मपुराणोक्तस्तु त्वामशोक नमाम्येनं मधुमासेति शोभितं॥
शोकार्त्तः कलिकाः प्राश्ये मामशोकं सदा कुर्व्विति॥

इत्यशोकाष्टमीव्रतम्।

अथ सोमव्रतम्।

———ooo———

कृष्ण उवाच।

चन्द्राष्टम्यां रोहिणीस्यात्तदा चन्द्रव्रतञ्चरेत्।
शिवं सम्पूज्य विधिवत् स्नानैः पञ्चामृतादिभिः*॥
विलेपनन्तु चन्द्रेण चन्दनेन तु वा हितं।
शुक्लवस्त्रैस्तथापुष्पैः पूजयेत्परमेश्वरं॥
नैवेद्यं क्षीरकुम्भन्तु सितशर्करया युतं।
प्राशनं चन्दनेनैव रात्रौ जागरणं हितं॥
आयुःकामैः सदा कार्य्यं कीर्त्तिश्रीसाधने हितं।
इति चन्द्रव्रतं नाम दारदानेन† जायते॥

इति कालान्तरोक्तं सोमव्रतम्।

---

* रविभिरिति पुस्तकान्तरे पाठः। † वारदानेति पुस्तकान्तरे पाठः।

अथ राजराजेश्वरव्रतम् ।

———ooo———

बुधस्वात्यात्मिकोयोगो यदाष्टम्यां प्रजायते ।
उपोषितस्तु विधिना महास्नानपुरःसरं ॥
सम्पूजयेद्दिरूपाच्च मङ्गरागचतुःसमं ।
महावर्त्तिद्वयं दीर्घंदीपं साष्टोत्तरं शतं ॥
लघुकुङ्कुमधूपन्तु सितपुष्पैस्तु पूजयेत् ।
खण्डखाद्यान्यनेकानि नैवेद्यन्तु प्रकल्पयेत् ॥
आचार्य्याय शिवस्याग्रे ग्रैवेयमुकुटादिकं ।
रसनाकुण्डलेचैव कङ्कणं मुद्रिकाद्वयं ॥
वाहनन्तु गजञ्चैव तद्भावाद्धयोत्तम ।
सम्पूज्य परया भक्त्या भवञ्च शर्कराघृतं ॥
राजराजेश्वरपदं प्राप्नुयाद्रोमसङ्ख्यया ।
राजराजेश्वरं तेन व्रतमेतत् प्रकाशितम् ॥

इति कालोत्तरोक्तं राजराजेश्वरव्रतम् ।

अथ महाव्रतम् ।

———ooo———

शुक्लश्रावणयोगस्तु यदाष्टम्यां प्रजायते ।
चतुर्दश्यामथो वत्स तदा व्रतं समाचरेत् ॥
उपोषितस्तु विधिना महास्नानं समाचरेत् ।

अगुरुचन्दनेनैव रोचनाकुङ्कुमेनच* ॥
महादीपचतुष्केण धूपं कृष्णागुरुं शिवं।
नैवेद्यं घृतभूयिष्ठं यावकेन समन्वितं ॥
भोगांस्तु विधिना तत्र शिवस्याग्रे प्रकल्पयेत्।
आचार्य्यं पूजयित्वा तु वस्त्रहेमान्नभूषणैः ॥
प्रत्यग्रं कुङ्कुमं पुष्पैः शिवस्याग्रे प्रकल्पयेत्† ।
ऋग्यजुःसामाथर्व्वणामेकैकं तद्वदेव हि ॥
इमं महाव्रतं नाम मया ते परिकीर्त्तितं।
विलसेदवनीं सर्व्वां सप्तद्वीपां ससागरां ॥
रात्रौ जागरणं कार्य्यं महाविभवसम्भवैः।
पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ॥
पुत्रान् पौत्रान् प्रपौत्रांश्च शिवलोकेषु यत्फलं।
इदं महाव्रतं नाम कर्त्तव्यं पृथिवीश्वरैः ॥

इति कालोत्तरोक्तं महाव्रतम्।

अथ विश्वरूपव्रतम्।

—000—

रेवतीशनियोगस्तु‡ सिताष्टम्यां यदा भवेत्।
भूतायां वा महासेन तदा जातमिदं शृणु ॥
महास्नानं प्रकर्त्तव्यं नित्यकृत्यादनन्तरम्।

---

* अङ्गरागमिति पुस्तकान्तरे पाठः।

† तस्मै इति पुस्तकान्तरे पाठः।

‡ नवमीति क्वचित् पाठः।

चन्द्रेणैवाङ्गरागन्तु रत्नपूजान्तु कल्पयेत्॥
शितपद्मानि देयानि भूषणानि बहून्यपि।
चन्द्रमेवं दहेद्धूपं नैवेद्यं पायसङ्कृतम्॥
श्वेताश्वन्तरुणं* सौम्यं शिवाय विनिवेदयेत्।
अश्वाष्टमं कुञ्जरञ्च आचार्य्याय प्रदापयेत्॥
ऋग्यजुःसामाथर्व्वणा प्रत्यश्वं कुञ्जरं तथा।
राज्यार्थी लभते राज्यं यावदाहूतसंप्लवम्॥
पुत्रार्थी लभते पुत्रान् वायुतुल्यपराक्रमः।
भोगार्थी लभते भोगान् विद्यातत्त्वेन शाश्वतान्॥
यान् यान् कामयते कामान् तांस्तान् कामामवाप्नुयात्।
विश्वरूपमिदन्तेन व्रतमेतदुदाहृतम्॥
कुशोदकप्राशनन्तु रात्रौ जागरणं ततः।

इति कालोत्तरोक्तं विश्वरूपव्रतम्।

अथ बुधाष्टमीव्रतम्।

———000———

श्रीकृष्ण उवाच।

बुधाष्टमीव्रतं भूप ब्रवीमि शृणु पाण्डव।
येन चीर्णेन नरकं नरः पश्यति न क्वचित्॥
पुराकृतयुगस्यादौ इलोराजा बभूव ह।
बहुभृत्ययुतोमित्रमन्त्रिभिः परिवारितः॥

---

* षष्ट्याश्विति पुस्तकान्तरे पाठः।

जगाम हिमवत्पार्श्वं महादेवानिवारितः ।
योऽसौ प्रविश्यते भूमौ सा स्त्री भवति निश्चितं ॥
स राजा मृगसङ्गेन प्रविश्यैत्तदुमावनं ।
एकाकी तुरगोपेतः क्षणात्स्त्रीत्वं जगाम ह ॥
सा बभ्राम वने शून्ये पीनोन्नतपयोधरा ।
का त्वं कस्य कुतः प्राप्ता अनुरोधोऽस्ति किञ्चन ॥
तां ददर्श बुधस्तन्वीं रूपौदार्य्यगुणान्वितां ।
अष्टम्यां बुधवारेण तस्यास्तुष्टो बुधोग्रहः ॥
ददौ गृहाश्रमन्तस्या मानीयत प्रतोषितां ।
पुत्रमुत्पादयामास योऽसौ ख्यातः पुरूरवाः ॥
चन्द्रवंशकरोराजा आद्यः सर्व्वमहीक्षितां ।
ततः प्रभृति पूज्येयमष्टमी बुधसंयुता ॥
सर्वपापप्रशमनी सर्व्वोपद्रवनाशिनी ।
अन्नामदयिते वच्मि कर्म्म राजकथामलं ॥
आसीद्राजा विदेहानां मिथिलामनु वैरिभिः ।
संग्रामेनाहतोवीरस्तस्य भार्य्यादरिद्रिणी ॥
उर्म्मिला नाम बभ्राम महीं बालकसंयुता ।
अवन्तिविषयप्राप्तौ ब्राह्मणस्य निवेशने ॥
आकारोदरपूर्णार्थं नित्यं कण्डनपेषणं ।
कृत्वा सा स्तोकगोधूमं ददौ बालकयोस्तदा ॥
कार्पण्यान्मातृवात्सल्यात्क्षुधासम्पीड्यमानयोः ।
कालेन बहुधा साध्वी पञ्चत्वमगमच्छुभा ॥
पुत्रस्तस्या विदेहाख्यं गत्वा स पितुरासने ।

उपविष्टः सलयोगात् बुभुजे गमनाकुलम् ॥
अन्विष्य धर्म्मराजोऽसौ सा कन्या मिथिवंशजा ।
विवाहिता हिता भर्तुः सामहानायिका भवत् ॥
श्यामला नाम चार्व्वङ्गी प्रसिद्धा श्रूयते श्रुतौ ।
तामुवाच वरारोहां धर्म्मराजः स्वयं प्रियां ॥
वहस्व सर्व्वव्यापारं श्यामले त्वं गृहे मम ।
कुरु स्वजनभृत्यानां दानाक्षेपं यथेप्सितं ॥
किं त्वेते पञ्जराः सप्त नालोक्या अतियन्त्रिताः ।
कदाचिदपि घोराश्च त्वया वैदेहनन्दिनि ॥
एवमस्त्विति साप्युक्त्वा निजं कर्म्म चकार ह ।
कदाचिद्व्याकुलीभूता ब्रह्मराजविदेहजा ॥
उद्घाटयित्वा प्रथमं ददर्श जननीं स्वकां ।
सा पच्यमाना क्रन्दन्ती भीषणैर्यमकिङ्करैः ॥
हेलयाक्षिप्यते बध्वा तप्ततैले पुनः पुनः ।
तथैव तां समालोक्य व्रीडिता सा मनस्विनी* ॥
द्वितीये पञ्जरे तद्वन्मातामेव ददर्श ह ।
सुधावत् पिष्यमाणान्तां शिलापाल्याष्टकेतुना ॥
तृतीये पञ्जरे तद्वत्तां ददर्श स्वमातरम् ।
क्रकचैः पाट्यते मूर्ध्नि घण्टायुक्तैः करोल्वणैः ॥
चतुर्थपञ्जरे स्थाने भीषणैः श्वरुणाननैः ।
भुज्यमानैः श्वापदैश्च क्रन्दतीं तां पुनः पुनः ॥
पञ्चमे निहतां भूमौ कण्ठं पादेन पीड़ितां ।

---

* तथैवतात्मकं गल पुस्तकान्तरे पाठः ।

सक्तुर्ग्रैर्घनघातैश्च विदीर्णा क्रियते तु सा ॥
षष्ठेभूर्य्यैश्चमध्यस्थ्यां मस्तकेमुद्गराहतां ।
सम्पीड्यमानामनिशं सुदृढं खण्डखण्डवत् ॥
सप्तमे पञ्जरेचार्त्तस्वनां पूति सुगन्धिना ।
दृष्ट्वा तथागतां तां तु मातरं दुःखकर्षितां ॥
श्यामला म्लानवदना किञ्च नोवाच भामिनी ।
अथागतयमं प्राह सरोषा श्यामला पतिं ॥
किन्त्वयापहृतं राजन् ममत्वाभ्रंस दारुणम् ।
येनत्वं विविधैर्घातैर्बध्यते बहुधाचया ॥
यमः प्राह प्रिये दृष्ट्वा भद्रेनोद्घटिता त्वया ।
एते पिञ्जरकाः सप्त निषिद्धा त्वं मया पुरा ॥
तवमाता सुतस्नेहाद्गोधूमोऽपहृतः किल ।
किन्नजानासि तेभद्रे येन तुष्यापयोपरि ॥
ब्रह्मस्वं प्रणयाद्भूतं दहत्यासप्तमं कुलं ।
तदेव चौर्य्यरूपेण क्षिप्रात्याचन्द्रतारकं ॥
गोधूमास्तदिमे भूताः कृमिरूपाः सुदारुणाः ।
ये पुरा ब्राह्मणगृहेहृता तवकृते मया ॥

श्यामलोवाच ।

जानामि तदहं सर्व्वं यन्मे मात्राकृतं पुरा ।
तथापित्वां समासाद्य त्वाञ्च जामातरं शुभम् ॥
मुच्यते कृमिरागित्वाद्यथावदधुना कुरु ।
तच्छ्रुत्वाचिन्तयाविष्ट हृदयोऽवस्थितश्चिरं ॥
बुधाष्टमी सुसम्पूर्णा यथोक्तफलदायिनी ।

तत् फलं यच्छतीवेयं कुरु शीघ्रं जगाद तां॥
धर्म्मराजः सहासीनां प्रियां प्राणधनेश्वरीं।
व्रतञ्च सप्तमे, तीतेजन्मनि ब्राह्मणी शुभा॥
आर्त्तासि च त्वयासङ्गात्सखीनां पर्य्युपासिता।
बुधाष्टमी सुसम्पूर्णायथोक्तफलदायिनी॥
तत् फलं यच्छती वाचं सत्यां कृत्वा ममाग्रतः।
येन मुच्येत तेमाता नरकात् पापसङ्कटात्॥
तच्छ्रुत्वात्वरितं स्नात्वा ददौ पुण्याहवाचकम्।
स्वमातुः श्यामला तुष्टा तेन मोक्षं जगाम सा॥
उर्म्मिला रूपसम्पन्ना दिव्यदेहधरा शुभा।
विमानवरमारूढ़ादिव्यमाल्याम्बरावृता॥
भर्त्तुः समीपे स्वर्गस्था दृश्यतेऽद्यापि सा जनैः।
बुधस्य पार्श्वे नभसि मिथिराजसमीपतः॥
विस्फुरति महाराज बुधाष्टम्याः प्रभावतः।

युधिष्ठिर उवाच।

यद्येवं प्रवराकृष्ण तिथिर्वैका बुधाष्टमी।
तस्याएव विधिं ब्रूहि विधानञ्च विशेषतः॥
तस्या एव विधिं ब्रूहि यदि तुष्टोसि मे प्रभो।

श्रीकृष्ण उवाच।

शृणु पाण्डव यत्नेन बुधाष्टम्यां विधिं शुभं।
यदा यदा सिताष्टम्यां बुधवारो भवेद्यदि॥
तदा तदैव सा ग्राह्या एकभक्ताशनैर्नृभिः।
स्नात्वा नद्यां तु पूर्व्वाह्णे गृहीत्वा करकं नवं॥

जलपूर्णं सहेमानं कृत्वा खाद्यैः समन्वितम् ।
दद्याद्विप्राय तं गत्वा गृहं चैव क्रमेण तु ॥
अष्टम्यष्टविधानेन विचित्रान्नैः पृथक् पृथक् ।
प्रथमा मोदकैर्भक्ष्यैः द्वितीया धाणकैस्तथा ॥
तृतीया घृतपूरैश्च चतुर्थी वटकैर्नृप ।
पञ्चमी शुभ्रकासारैः षष्ठीसोहालकैः शुभैः ॥
अशोकवर्त्तिभिः शुभ्रैः सप्तमी चातिवाहयेत् ।
अष्टमी फाणितापूर्णैः खण्डवेष्टैर्युधिष्ठिर ॥
एवं क्रमेण कर्त्तव्याः सुहृत्स्वजन बान्धवैः ।
सहैकत्र स्थितैर्भोज्यं भोक्तव्यं प्रीतिपूर्व्वकम् ॥
उपाख्यानमिदं पार्थ भोजनं सहसा त्यजेत् ।
तावदेव हि भोक्तव्यं यावन्ना कथ्यते कथा ॥
ततोभुक्त्वाबुधस्याग्रे आचम्य च समाहितः ।
विप्राय वेदविदुषे वाचकाय प्रदापयेत् ॥
साक्षतं सहिरण्यं च जातरूपमयं शुभम् ।
अर्चितं चर्च्चितं गन्धैः पुष्पैर्धूपैः सुगन्धिभिः ॥
पीतवस्त्रैः समाच्छन्नं बुधं सोमात्मजाकृतिं ।
माषकेन सुवर्णस्य तदर्द्धार्द्धेन वा कृतां ॥

बुधरूपमुक्तं मत्स्यपुराणे ।

पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः ।
खड्गचर्म्मगदापाणिः सिंहस्थोवरदोबुध इति ॥
भक्तियुक्तस्तु कौन्तेय दद्यादेवं समुच्चरन् ।

ॐ बुधाय नमः। ओं सोमात्मजाय नमः। ओं दुर्बुद्धिनाशाय नमः। ओं सुबुद्धिप्रदाय नमः। ओं ताराजाताय नमः। ओं पीताम्बराय नमः ओं सौम्यग्रहाय नमः ओं सर्व्वसौख्यप्रदाय नमः।

इति पूजामन्त्राः।

ओं बुधोयं प्रतिगृह्णाति द्रव्यस्थस्तु पुनः स्वयं।
दीयते बुधरूपेण तुष्यतां मे बुधोत्तमः॥

दानमन्त्रः।

ओं दुर्बुद्धिबोध दुरितं नाशयत्वावयोर्व्बुधः।
सौख्यं सौमनसं नित्यं करोतु शशिनन्दनः॥
इत्युच्चार्य्य गृहीत्वा तु दत्त्वा मन्त्रपुरस्कृतम्।
सप्तजन्मनि राजेन्द्र भवेज्जातिस्मरोभुवि॥
धनधान्यसमायुक्तः पुत्रपौत्रसमृद्धिमान्।
दीर्घायुर्विपुलान् भोगान् बहून् भुक्ता महीतले॥
ततः सुतीर्थमरणं ध्यात्वा नारायणं लभेत्।
मृतोऽसौ स्वर्गमाप्नोति पुरन्दरपुरीं नृप॥
तत्रास्ते यावदाऽसृष्टे र्यावदाभूतसंप्लवम्।
एवमेषा समाख्याता गुह्या पार्थ बुधाष्टमी॥
यां श्रुत्वा ब्रह्महा गोघ्नः सर्व्वपापैः प्रमुच्यते।
यश्चाष्टमीं बुधयुतां समवाप्य भक्त्या
सम्पूजयेच्छशिसुतं करकोपरिस्थम्।
पक्कान्नपानसहितं सहिरण्यवस्त्रं

पश्यत्यसौ यमसुखं न कदाचि देव ॥

इति भविष्योत्तरे बुधाष्टमीव्रतम् ।

अथ दूर्व्वाष्टमीव्रतम् ।

———०००———

विष्णुरुवाच ।

ब्रह्मन् भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः ।
पूजयेच्छङ्करं भक्त्या योनरः श्रद्धयान्वितः ॥
स याति परमं स्थानं यत्र देवस्त्रिलोचनः ।
गणेशं पूजयेद्यस्तु दूर्व्वया या हितं मुने ॥

गणेशोमहेश्वरः ।

फलानां सकलैर्दिव्यै गन्धपुष्पैर्विलेपनैः ।
दूर्व्वां पूज्य तथेशानं मुच्यते सर्व्वपातकैः ॥
शुचौ देशे प्रजातायां दुर्व्वायां ब्राह्मणोत्तमः ।
स्नाप्य लिङ्गन्ततोगन्धैः पुष्पैर्धूपैः समर्चयेत्* ॥
खर्जूरैर्नारिकेलैश्च मातुलिङ्गफलैस्तथा ।
पूजयेच्छङ्करं भक्त्या दूर्व्वया विधिवद्द्विज ॥
दध्यक्षतैर्द्विजश्रेष्ठ प्रदद्यात्तु त्रिलोचने ।
दुर्व्वा शमीभ्यां सम्पूज्य मानवः श्रद्धयान्वितः ॥
स वै सुकृतजन्मा स्यात् सर्व्वदेवैस्तु वन्दितः ।
विद्यां प्राप्नोति विद्यार्थी पुत्रार्थी पुत्रमाप्नुयात् ॥

---

* समर्पयेदिति क्वचित् पाठः ।

धर्म्मार्थी धर्म्ममाप्नोति कन्यार्थी लभते च तां* ।
मनसा यद्यदिच्छेत तत्तदाप्नोति मानवः ॥
य एवं पूजयेद्दूर्व्वां भूतिघ्नं मानवः फलैः ।
सप्तजन्मनि पापौघैर्मुच्यते नात्र संशयः ॥
कृत्वोपवासं सप्तम्यामष्टम्यां पूजयेच्छिवम् ।
दूर्व्वासमेतं विप्रेन्द्र दध्यक्षतफलैः शुभैः ॥
त्वं दूर्व्वेऽमृतजन्मासि वन्दितासि सुरासुरैः ।
सौभाग्यं सन्ततिं देहि सर्व्वकार्य्यकरी भव ॥
यथा शाखाप्रशाखाभिर्व्विस्तृतासि महीतले ।
तथा ममापि सन्तानं देहि त्वमजरामरे† ॥

दूर्व्वापूजनमन्त्रः ।

सलिङ्गमन्त्रैरीशानमर्चयेत् प्रयतः शुचिः ।
ततः सम्पूजयेद्विप्रान् फलैर्नानाविधैर्द्विज ॥
अनग्निपक्वमश्नीयाद्दन्नं दधि फलं तथा ।
अक्षारलवणं ब्रह्मन् नाश्नीयान्मधुनान्वितं ॥
दद्यात् फलानि विप्रेषु फलाहारः स्वयं भवेत् ।
प्रणम्य शिरसा दूर्व्वां शिवं शिवमवाप्नुते ॥
य एवं कुरुते भक्त्या महादेवस्य पूजनम् ।
गणत्वं यात्यसौ ब्रह्मन् मुच्यते ब्रह्महत्यया ॥
एवं पुण्या पापहरा अष्टमीदेवसंज्ञिता ।

---

* भार्य्यामिति पुस्तकान्तरे पाठः ।

† तथाविस्तृतसन्तानमिति पाठान्तरं ।

चतुर्णामपि वर्णानां स्त्रीजनानां विशेषतः ॥

इति भविष्यपुराणोक्तं दूर्व्वाष्टमीव्रतम् ।

अथ दूर्व्वाष्टमीव्रतम् ।

—000—

शुक्लाष्टम्यां तु सम्प्राप्ते मासि भाद्रपदे तथा ।
दूर्व्वाप्रतानं सुश्वेतमुत्तराशाभिगामिनं ॥
पूजयेद्गृहमानीय गन्धमाल्यानुलेपनैः ।
फलमूलैस्तथाचैव दीपं धूपैर्विसर्ज्जयेत् ॥
अग्निपक्कं तथा सर्व्वं निवेद्यच कथञ्चन ।
भोक्तव्यञ्च तथा ब्रह्मन् वह्निपक्वविवर्जितम् ॥
दूर्व्वाङ्कुरस्थां सम्पूज्य विधिना यौवने प्रियम् ।
यौवनं स्थिरमाप्नोति यत्र यत्राभिजायते ॥

इति आदित्यपुराणोक्तं दूर्व्वाष्टमीव्रतम् ।

अथाशोकाष्टमीव्रतम् ।

—000—

भानुरुवाच ।

अष्टमीषु च सर्व्वासु पूजनीयाप्यशोकिका ।
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा ॥
तस्मिन्नहनि या भुङ्क्ते नक्तमिन्दुविवर्जिते ।
भवत्यथो विशोका सा यत्र यत्राभिजायते ॥
अष्टमीषुच सर्व्वासु नचेच्छुक्लेति वै मुने ।

प्रोष्ठपद्यामतीतायां या स्यात् कृष्णाष्टमी द्विजाः॥
तस्यामवश्यं कर्त्तव्यं देवीं पूज्य यथाविधि।

इत्यादित्यपुराणोक्तमशोकाष्टमीव्रतम्।

अथ मातृव्रतम्।

——000——

मातृणामष्टमी दत्ता ब्रह्मणा तिथिरुत्तमा।
एताः क्षमापयेद्भक्त्या निराहारोनरः सदा॥
तस्य ताः परितुष्टास्तु क्षेमारोग्यं ददन्ति च।

इति वाराहपुराणोक्तं मातृव्रतम्।

अथ नरसिंहव्रतम्।

——000——

सनत्कुमार उवाच।

अथाष्टमीव्रतं ब्रह्मन् प्रोच्यमानमिदं शृणु।
भवविध्वंसनं नृणां सर्व्वार्तिहरणं परं* ॥
राजा वा राजपुत्रो वा यदि चेद्रिपुनाशनं।
तदष्टम्यान्तु सुस्नातो यवाग्रञ्च प्रकाशयेत्॥
कुर्य्यादष्टदलं पद्मं तन्दुलैर्वाप्रसूनकैः।
कर्णिकायामथेशानं नरसिंहाकृतिं स्मरेत्॥
उग्ररूपं महादंष्ट्रं गम्भीराध्वानगर्जितम्।

---

* उपवासव्रतकारयेदिति पाठान्तरं।

बृहद्गजततुङ्गादिप्रवराहतनुद्युतिं।
चलत्करालकुटिल भ्रूभङ्गनिहताहितं॥
वक्त्रान्तवर्त्तिज्वलितस्फुरत्पद्मविलोचनं।
दंष्ट्राग्रान्त विनिर्द्दूतज्वालाव्याप्तदिगन्तरम्॥
नखराग्रविनिर्भिन्नवैरिवक्षः क्षत स्रुतिः।
दैत्योरस्थलविक्षोदक्षतजानुकराम्बुजः* ॥
रक्तपुष्पगुड़ान्नेन फलमूलेन चार्चयेत्।
तत् प्रकाशे महाकुम्भमव्रणं भारसम्मितं॥
तीर्थोदकेन शुचिना गन्धयुक्तेन पूरितम्।
वस्त्रयुग्मेन सञ्छन्नं कुशकूर्चसमन्वितं॥
सर्व्वौषधिसमायुक्तं सर्व्वरत्नसमन्वितं।
धान्यपूगेऽथ वा श्वेततण्डुले स्थापयेत् सुधीः॥
दिक्षु वा कलसानष्टौ शुभवस्त्रादिसंयुतान्†।
पूर्व्वादिक्रमयोगेन स्थापयेदेकमग्रतः॥
द्वारप्रदेशे संस्थाप्य कलशानां द्वयं द्वयं।
द्वारपालान् प्रतिष्ठाप्य कलशेषु वहि क्रमात्॥
रथाङ्गं पाञ्चजन्यञ्च शार्ङ्गं नन्दकमेव च।
स्मरन् प्रतीचीपर्य्यन्तं कलशेषु यथाक्रमं॥
शरांश्च मुशलं चन्द्रं स्मरन् कोणेषु वै गदां‡।
अनन्तरञ्च वै तार्क्ष्यं वेदात्मानञ्च संस्मरन्॥

---

* चालयेदिति पाठान्तरम्।

† नववस्त्रयुगानपीति पाठान्तरं।

‡ वज्रमिति पाठान्तरं।

तत्र तत्र च वै नाम्ना पूजयेत्सुसमाहितः ।
रक्तानुलेपनैः पुष्पैः फलमूलैः समर्च्चयेत् ॥
तत्र तत्र च तन्मन्त्रं जपेदष्टसहस्रकम् ।
अष्टोत्तरसहस्रं वा शतम्वापि स्वशक्तितः ॥
नृसिंहैकाक्षरं मन्त्रं जपेद्वानुष्टुभं परं ।
जपान्ते कल्पयेत् कुण्डमग्रतः शास्त्रसम्मतम् ॥
द्विहस्तायामविस्तारं योनिनाभिसमन्वितम् ।
चतुर्मेखलकं वास्य त्रिमेखलक मेव वा ॥
उन्मत्तपुष्पसदृशं योनिरन्ध्रं विदुर्बुधाः ।
एवं कृत्वा ततः कुर्य्यात् समिद्धं जातवेदसम् ॥
तन्मध्ये संस्मरेद्देवं नरसिंहमनुत्तमं* ।
सुदर्शनाद्यायुधानि यथा स्थानं च संस्मरेत् ॥
विधायाग्निप्रतिष्ठानं प्रणवेनैव मन्त्रवित् ।
आदौ कुण्डञ्च संशोध्य कुर्य्यादग्निनिमन्त्रणं† ॥
पश्चादग्निं परिस्तीर्य्य प्रागग्रैर्वा कुशैरपि ।
ततः संशाद्य पात्राणि प्रोक्षयेत् क्रमशस्ततः ॥
प्रणीतामपि संशोध्य कुर्य्यात्तत्परिषेचनं ।
संशोध्यहोमद्रव्याणि‡ कुण्डस्यैवापसव्यतः ॥
विधायाज्यस्य संस्कारं पात्रादीन् परिधाप्य च ।
निधाप्य सम्यक् पात्राणि वाज्यभागौ तथैव च ॥

---

* नरसिंहतनुं तत इतिपाठान्तरं ।

† भूमिविशोधनमिति पाठान्तरं ।

‡ पात्राणि इति पाठान्तरं ।

देवतावाहने पश्चाद्धविषश्च समर्पणं ।
आयुः कामस्तु दूर्व्वाभिः श्रीकामो विल्वसम्भवैः ॥
आरोग्यकामोऽपामार्गैस्तिलैर्व्वापि घृतेन च ।
मृत्योर्विजयमन्विच्छन् मध्वाक्तैः कमलैर्नवैः ॥
पुष्पैश्च चम्पकभवैर्धनार्थी जातिसम्भवैः ।
शत्रोर्म्मरणमाकाङ्क्षन्नाचैर्वापि विभीतकैः ॥
वश्यार्थी लवणोद्भूतैः सर्षपैः समरीचकैः ।
तुषैर्वा निम्बपत्रैर्वा तैलेनापि च साधयेत् ॥
उन्मत्तकैस्तथोन्मादैर्म्मोहने स्तम्भनेऽपि च ।
तद्बीजैस्तत्फलैर्वापि तत्काष्ठैर्ज्ज्वलितानलैः ॥
अम्बुजैः श्रियमन्विच्छन् सितैरव्याकुलं यदि ।
श्रीलताकुसुमैश्चापि तत्पत्रै रचतैरपि ॥
तद्बीजैरङ्कुरैश्चापि त्रिमध्वाक्तैश्च तन्दुलैः ।
चन्दनक्षोदसंयुक्तै रुत्पलैः कुमुदैरपि ॥
तथा चन्दनकाष्ठेन गव्येन पयसापि वा ।
एकपत्रैः परां पुष्टिं सहदेव्याप्यरोगतां ॥
धान्यैरायुस्तथारोग्यमक्षतैः कदलीफलैः ।
यं यं कामयते मन्त्री तेन तेनैव साधयेत् ॥
साधारणोविधिरयं लभते वच्मि तं पुनः ।
जुहुयादृग्रसाहस्रं द्रव्यैर्व्वाथ यथाविधि ॥
यावत्साध्यगरीयस्त्वं साहस्रं वा यथा विधि ।
यावत्साध्या गरीयस्त्वं तावत्संख्यानदर्शनम् ॥
श्रीनिवास नमस्तेऽस्तु श्रीवृक्ष शिववल्लभ ॥

ममाभिलषितावाप्तिं कृत्वा विघ्नहरोभव ॥
समकृत्व स्ततोभ्यर्च्य श्रीवृक्षं प्रणिपत्य च।
ब्राह्मणान् भोजयेद्भक्त्या श्रीदेवी प्रीयतां मम ॥
ततो भुञ्जीत मौनेन तैलक्षारविवर्ज्जितम्।
अनग्निपक्वं मृत्पात्रे दधिधान्यफलंशुभम् ॥
एवं यः कुरुते पार्थ श्रीवृक्षाभ्यर्च्चनं नरः।
नारी वा दुःखशोकाभ्यां मुच्यते नात्र संशयः ॥
सप्तजन्मान्तरं यावत् सुखसौभाग्यसंयुता।
श्रीमती फलिनीसत्या मर्त्यलोके महीयते ॥

श्रीवृक्ष मक्षतफलं वरदं नवम्यां
नैवेद्यदिव्यफल वस्त्रविरूढ धान्यैः।
पूज्य प्रभात समये पुरुषोत्तमा ये
ते प्राप्नुवन्ति कमलां पुरुषेन्द्रचन्द्राः ॥

अथदेवस्य पुरतः साध्यं कृत्वासनेस्थितः।
कुम्भतोयेन कलशैर्मन्त्रे णैवाभिषेचयेत् ॥
दक्षिणां गुरवे दत्त्वा कुर्य्याद्ब्राह्मणभोजनम्।
युद्धारम्भेजनक्षोभे राष्ट्रयात्रारिपीडने* ॥
भये व्याधिपरिक्लेशे स कुर्य्यादष्टमीव्रतं।
विद्यार्थी विद्यामतुलां श्रियमिच्छन्महाश्रियम्† ॥
यद्यदिच्छति तत्तस्य पुण्यात्येतं व्रतं परं।

इति गरुड़पुराणोक्तं नरसिंहव्रतम् ॥

---

* राष्ट्रनाशेऽरिपीडने इति पुस्तकान्तरे पाठः।

† श्रियमायुश्चविन्दतीति पुस्तकान्तरे पाठः।

अथ हरव्रतम् ।

—:○:—

ब्रह्मोवाच ।

अष्टम्यां पूजितोदेवो गोश्रुताभरणो हरः ।
ज्ञानं ददाति विपुलां कान्तिं* जातिं बलं तथा ॥
गोश्रुताभरणः चक्षुःश्रवोभूषः शिव इत्यर्थः ॥
मृत्युहा ज्ञानदश्चैव पापहा च प्रपूजितः ।
मूलमन्त्रस्वसञ्ज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः ॥
पूर्व्ववत्स्थपनस्थः कर्त्तव्यश्चातिथीश्वरः ।
गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते ॥
पूजाशाठ्येन शाठ्येन कृतापि तु फलप्रदा ।
आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः ॥
पूर्व्वोक्तफलदोहोमः कृतः शान्तेन चेतसा ।
एतद्व्रतं वैश्वानरप्रतिपद्व्रते व्याख्येयम् ॥

इति भविष्यत्पुराणोक्तं हरव्रतम् ।

अथ सुगतिव्रतम् ।

—०*०—

नक्ताशी त्वष्टमीपुस्यादब्दमरान्ते तु गोप्रदः ।
पौरन्दरपदं याति सुगतिव्रतमुच्यते ॥

अत्र पुरन्दरोदेवता ।

इति पद्मपुराणोक्तं सुगतिव्रतम् ।

---

* ख्यातिमिति क्वचित्पाठः ।

अथ वृषभव्रतम्।

———०००———

सिताष्टम्यां सोपवासोवृषभं यः प्रपच्छति*।
सितवस्त्रयुगच्छन्नं यदाभरणभूषितम्†॥
शिवलोके चिरं स्थित्वा ततो राजा भवेदिह।
वृषव्रतमिदं प्रोक्तं सर्व्वपापप्रणाशनम्॥
सोपवासइति पूर्व्वदिने कृतोपवास इत्यर्थः।

अत्र शिवोदेवता।

इति भविष्यत्पुराणोक्तं वृषभव्रतम्।

अथ गुर्व्वष्टमीव्रतम्।

———०००———

युधिष्ठिर उवाच।

ब्रूहि कृष्ण व्रतं किञ्चित् सर्व्वपापप्रणाशनम्।
प्रेतत्वनाशनञ्चैव भुक्ति मुक्ति फल प्रदम्॥

कृष्ण उवाच।

मासि भाद्रपदे राजन् शुक्लपक्षे यदाष्टमी।
गुरुवारेण संयुक्ता सा तिथिर्द्धर्मवर्द्धिनी॥
सम्पूर्णा सर्व्वपापघ्नी प्रेतयोनिविनाशनी।
गृह्णीयान्नियमं सम्यक् दन्तधावनपूर्व्वकम्॥

---

* यच्छतीति पाठान्तरं।

† घण्टाभरण भूषितमिति पाठान्तरं।

एकभक्तेन राजेन्द्र तस्यां देवी बृहस्पतिः ।
स्नानं नद्यान्तडागे वा गृहे वा नियमात्मना ॥
सौवर्णं कारयेज्जीवं राजतं वा नरोत्तम ।
तस्याभावे यथाशक्त्या श्रीखण्डेनापि कारयेत् ॥
शाल्योदनञ्च भोक्तव्यं षष्टिकान्नमथापि वा ।
पात्रेतु शालिं संस्थाप्य परिपूर्णं यथाभवेत् ॥
कपिला गौः प्रदातव्या व्रतसम्पूर्णहेतवे ।
जलपूर्णे तु सद्रव्ये स्थापयेद्ब्राह्मणो घटे ।
नमस्ते ज्ञानिनां श्रेष्ठ नमोनीतिविशारद ।
त्रिदशो देवदेवेश देवराज नमोऽस्तुते ॥
त्रिदशाधिपं संपूज्य प्रारम्भे गिरिशस्तुतः ।
गृहाणार्घ्यमिदं देव नमस्तुभ्यं बृहस्पते ॥

अर्घ्यमन्त्रः ।

बुद्धिं देहि श्रियं देहि गतिं देहि सुरार्चित ।
बृहस्पते विधिस्त्वेव* परिपूर्णं कुरुष्व मे ॥

प्रार्थनामन्त्रः ।

अत्रैवोदाहरिष्यामि इतिहासं पुरातनं ।
प्रेतमोक्षप्रदं पुण्यं तच्छृणुष्व महामते ॥
शृणु राजन् महाबाहो सकले क्षितिमण्डले ।
सुरथोनाम राजाभूत्सोमवंशसमुद्भवः ॥
स कदाचिद्गतोऽरण्ये प्रविष्टोगहने वने ।

---

* व्रतस्यास्य इति पाठान्तरं ।

शाल्मलीवृक्षमेकञ्च निर्जले सूर्य्यतापिते ॥
निर्जीवे निर्ज्जले रौद्रे सर्व्वप्राणभयङ्करे।
स ददर्श नृपस्तत्र दुष्टरौद्रनिभान्तकान् ॥
अस्थिचर्म्मावरोकांश्च ऊर्द्धकेशभयावहान्।
दंष्ट्राकरालवक्त्रांश्चान् पूर्व्वपापफलव्रतान् ॥
तानुवाच नृपः पार्थ सुरथोविगतज्वरः।
के यूयं निर्ज्जनेऽरण्ये कथम्भो भीषणाननाः ॥
ततस्त मूचुः सम्भीताः सुरथं प्रेतसत्तमाः।
राजन् कर्म्मविपाकेन वयं प्रेतत्वमागताः ॥
अथोवाच नृपः प्रेतान् कर्म्मणा केन कथ्यतां।
निर्जने येन वारण्ये तिष्ठन्ति प्रेतभीषणाः ॥
अथ चैकेन तन्मध्यादुक्तोराजा यथा क्रमम्।
कृतं परस्त्रीगमनमसत्यं भाषितं मया ॥
तेन कर्म्मविपाकेन प्रेतत्वमहमागतः।
द्वितीयोऽथा ब्रवीद्राजन् अस्मदीयं कृतं शृणु ॥
कुर्व्वन्तीनां गवां पानं जले विघ्नं मया कृतम्।
तृतीयोऽथाब्रवीद्राजन् पैशून्यं कृतवानहम् ॥
तेन कर्म्मविपाकेन प्रेतत्वं प्रगतोह्यहं।
एतस्मिन् कथिते राजा प्रोवाच सुरथो नृपः ॥
कथं वो भोजनं पानं शयनं स्वस्ति ते कथम् ॥

प्रेत उवाच।

यत्नोच्छिष्टं स्थितं भूमौ श्लेष्मा नासाविनिर्गतं।
रजोविनिःसृतं योनौ स्त्रीणां तदपि भोजनं ॥

नान्यथा भोजनं राजन् तेन लज्जामहे वयम् ।
न प्रष्टव्यं महावाहोपानीयं न लभामहे ॥

सुरथ उवाच ।

किं यज्ञैः किं तपोदानैः किं वा तीर्थावगाहनैः ।
युष्माकञ्च भवेन्मोक्षो व्रतमेकं विना प्रभो ॥

राजोवाच ।

किं व्रतं कथ्यतां शीघ्रं कोविधिः का च देवता ।
कस्मिन् वारे दिने मासे येन मोक्षोभवेच्च वः ॥

प्रेत उवाच ।

मासि भाद्रपदे राजन् शुक्लपक्षे यदाष्टमी ।
गुरुवारेण सम्पूर्णा लभ्यते च महाव्रतम् ॥
गुर्व्वष्टमी महापुण्या सर्व्वपापप्रणाशिनी ।
वुधाष्टमी सहस्रस्य फलमाप्नोति मानवः ॥
दिङ्मूढ़ोहं वने प्रेता भवन्तो दर्शयन्तु मे ।
भूपस्य दर्शयामासुस्ते च मार्गं सुगामिनं ॥
राजा च स्वपुरं गत्वा कृत्वा च व्रतमुत्तमं ।
प्रेतान् नरेण विधिना ददौ पुण्यं त्रिवाचकम् ॥
प्रेतत्वादथ मुक्तास्ते विमानवरमाश्रिताः ।
सूर्य्ययुग्मसमं दृष्टासुरथं नृपसत्तमं ॥
एवं यः कुरुते पार्थ वृहस्पतिशुभव्रतं ।
तस्मिन् वंशे च न प्रेता भविष्यन्ति कदाचन ॥
सर्व्वपापविनिर्मुक्तः पदं गच्छत्यनामयं ।

एतत्ते कथितं पार्थ गुह्यं गुर्व्वष्टमीव्रतम् ॥
यः श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः।

इति श्रीभविष्यत्पुराणोक्तं गुर्व्वष्टमीव्रतम्।

इति श्रीमहाराधिराज-श्रीमहादेवस्य समस्तकरणाधी-
श्वर-सकल-विद्या-विशारद-श्रीहेमाद्रि-विरचिते
चतुर्व्वर्गचिन्तामणौ-व्रतखण्डे
अष्टमीव्रतानि ॥

अथ त्रयोदशोऽध्यायः।

———ooo@ooo———

अथ नवमी व्रतानि।

अवाप्य यदुपाश्रयं गुणिगणः परं श्लाघते
पवित्रितजगत्त्रयं जयति यस्य कान्तं यशः।
क्रमागतमथोच्यते सकललोकशोकापहं
समस्तनवमीतिथिव्रत मनेन हेमाद्रिणा॥

अथ श्रीवृक्षनवमीव्रतम्।

कृष्ण उवाच।

समुत्पन्नेषु रत्नेषु क्षीरोदमथने पुरा।
बिल्ववृक्षगणं गत्वा विश्रान्ता कमलालया॥
ममेयमिति चान्योन्यं युयुधुर्देवदानवाः।
असुरा निर्जिताः सर्व्वे युद्धे चक्रेण चक्रिणा॥
पातालं गमिता दैत्याः सश्रीकः स्वयमावभौ।
श्रीकामावासितो यस्मात् श्रीवृक्षस्तेन स स्मृतः॥
तस्माद्भाद्रपदे चैव शुक्लपक्षे कुरूत्तम।
नवम्यामर्च्चयेद्भक्त्या ईषत्सूर्य्योदयेऽनघ॥
श्रीवृक्षं विविधैरन्नैरनग्निपतितैः फलैः।
तिलपिष्टान्नगोधूमैर्धूपगन्धानुलेपनैः॥
ईषद्भानुकराक्रान्ते श्रीकृता वै नभस्तले।
मन्त्रेणानेन राजेन्द्र पूजयेद्भक्तिसंयुतः॥

श्रीनिवास नमस्तेऽस्तु श्रीवृक्ष शिववल्लभ।
ममापि सन्ततां तृप्तिं* कृत्वा विघ्नहरो भव॥
सप्तकृत्वस्ततोऽभ्यर्च्य श्रीवृक्षं प्रणिपत्य च।
ब्राह्मणान् भोजयेद्भक्त्या श्रीदेवी प्रीयतां मम॥
ततो भुञ्जीत मौनेन तैलक्षारविवर्ज्जितम्।
अनग्निपक्वं सुत्पाति दधिधान्यफलं शुभम्॥
एवं यः कुरुते पार्थ श्रीवृक्षाभ्यर्चनं नरः।
नारी वा दुःखशोकाभ्यां मुच्यते नात्र संशयः॥
सप्तजन्मान्तरं यावत् सुखसौभाग्यसंयुता।
श्रीमतीद्युतिनीचैवं† मर्त्यलोके महीयते॥

श्रीवृक्ष मक्षतफलं वरदं नवम्यां
नैवेद्य पुष्पफलरत्न विरूढधान्यैः।
पूज्य प्रभातसमये पुरुषोत्तमोऽस्यां
ते प्राप्नुवन्ति कमलां पुरुषेन्द्रचन्द्र॥

इति भविष्योत्तरोक्तं श्रीवृक्षनवमीव्रतम्।

अथ ध्वजनवमीव्रतम्।

———000———

कृष्ण उवाच।

उल्काख्यां नवमीं राजन् कथयामि निबोध ताम्।
या काश्यपेन कथिता तारकस्यार्त्तिनाशिनी॥

---

* ममाभिलषितावाप्तिमिति पुस्तकान्तरे पाठः।

† श्रीमतीफलिनीसत्या इति पुस्तकान्तरेपाठः।

अश्वयुक् शुक्लपक्षे या नवमीति च विश्रुता॥
नद्यां स्नात्वातमभ्यर्च्य भगवत्या महासुरैः।
पूर्व्ववैर मनुस्मृत्य संग्रामे बहवः कृताः॥
नानारूपधरा देवी अवतीर्य्य पुनः पुनः।
धर्म्मसंस्थापनार्थाय पतिघ्ने दैत्यसत्तमान्॥
अथ रक्तासुरोनाम महिषस्य सुतोमहान्।
आसीत्तेन तपस्तप्तं वर्षाणामयुतानि षट्॥
तस्मै ददौ चतुर्वक्त्रो राज्यं त्रैलोक्यमण्डले।
तेन लब्धवरेणाथ ह्यलपित्वा दनोः सुतान्॥
प्रारब्धं सह शक्रेण युद्धं गत्वामरावतीं।
तं दृष्ट्वा दानवबलं सन्नद्धंवोद्धतध्वजं॥
युयुधे दानवः सार्द्धं सुरैः शक्रपुरःसरैः।
तत्र प्रावर्त्तत नदी शोणितौघतरङ्गिणी
परमस्य गदाग्राह वसुलं दन्तकच्छपा।
वहन्ती पित्तलेकायेसुरासुरभटानकाः॥
अथ रक्तासुरोरोषात् युयुधेविबुधैः सह।
ते हन्यमाना विबुधा रक्ताक्षेण महारणे॥
भ्रष्टाः स्वर्गम्परिष्वज्य त्यक्तप्राहरणाहुतं।
कटकनां पुरीं प्राप्ता यत्रास्ते भववल्लभा॥
दुर्गा चामुण्डया सार्द्धं नवदुर्गासमन्विता।
आद्या तावन्महालक्ष्मीर्नन्दा क्षेमङ्करी तथा॥
शिवदूती महातुण्डा भ्रामरी चन्द्रमङ्गला।
रेवती हरिसिद्धिस्तु नवैताः परिकीर्त्तिताः॥

य स्तासां ते स्तुतिं चक्रे त्रिदशाः प्रणता मताः॥
अमरमुकुट चुम्बित चरणाम्बुजाः सकल भुवन सुखजननी।
जयन्ती जगदीशं मुदिता सकलनिष्कलादुर्गा॥ १॥
विषाणे नख दशन भूषण रुधिरवसाच्छुरित कृतखड्गहस्ता।
जयति नररुद्र मण्डित पिशाचानुचरहारकन्दरी॥ २॥
प्रज्वलितशिखिशिखोल्वण विकटजटाबद्धचन्द्रमणि शोभा।
जयति दिगम्बरे भूषासिद्धवटे सा लक्ष्मीः॥ ३॥
करकमलजनितशोभाविप्रावबद्धपद्मवचना च।
जयति कमण्डलुहस्ता नन्दादेवी न नन्त्रिहर॥ ४॥
दिग्वसना विकृतमुखा फेत्कारोद्दामपूरितदिक्शोभा।
जयति विकारणदेहा क्षेमङ्करी रौद्रभावस्था॥ ५॥
क्रोशत ब्रह्माण्डोदरमुखरमुखरमुखहुँकृतनिनादा।
जयति महातिहस्ता शिवदूती प्रथमशिवभक्तिता:॥ ६॥
मुक्ताट्टहासभैरवदुःसह उच्चकितसकलदिग्वक्त्रा।
जयति भुजगेन्द्रबन्धनशोभित कर्णामदातुण्डा॥ ७॥
पटहमुरजमर्द्दल कुल्लरिक्तानर्त्तितावयवा।
जयति मधुव्रतात्तपादैत्यहरी भ्रामरी देवी॥ ८॥
शान्ता प्रशान्तवदना सिंहन्व्याध्यानयोगगतिनिष्ठा।
जयति चतुर्भुजदेहा चन्द्रकला चन्द्रमण्डला देवी॥ ९॥
पक्षपुटचञ्चुघातैः सचूर्णित विविधशत्रुसङ्घाता।
जयति शिवशूलहस्ता बहुरूपा रेवती भद्रा॥ १०॥
पश्यति जगतिदुष्टा पितृवननिलयेषु योगिनी सहिता।
जयति हरसिद्धि नाम्नां हरसिद्धिर्वन्दिता सिद्धैः॥ ११॥

इति दुर्गा सप्तमानुषम मर्य्यादातिरमरराट् कृत्वा इदमूचे सहदेवैः सापद्यस्मात्सर्व्वभीतिस्य:।

पुनः पुनः प्रणम्याशुर्भवानां सिंहवाहिनीं।
अस्माकं भवभीतानां श्रुत्वा तेभ्योभयं ततः॥
सिंहात्तत्र विनिर्गत्य दुर्गाभिः सहिता पुरात्।
युयुधे दानवैः सार्द्धं महासमरदुर्द्दिनम्॥
कुमारी विंशतिभुजा घनविद्युल्लतोपमा।
तेपि तत्रासुराप्राप्ताः प्रचण्डा रौद्ररूपिणः॥
सर्व्वं लघुवरः सूरा सुतप्त तपसस्तथा।
महाग्रहापक्रान्ताद्य स्तमायाविनिर्णये॥
आब्रह्माण्याद्यधमिषानाम्नतत्र निवोधिनान्।
इन्द्रमारी मनुकेशी प्रलम्बो नरकः कुतः॥
कुष्ठःपुलोमाशरभः सम्बरो दुन्दुभिः खरः।
इल्वलोनमुचिर्भौमोवाताप्यं धेनुकः कलिः॥
मायाव्रतो बलौ बन्धु मधुकैटभ कालवित्।
रहः पौण्ड्रादिदैत्येन्द्राः प्राधान्यात् ये प्रकीर्त्तिताः॥
धनगोभिर्जनाः सर्व्वे सन्नद्धा स्वोच्छ्रितोध्वजः।
रूपतोवर्णितश्चैव ध्वजास्तेषां पृथक् पृथक्॥
प्रत्यदृश्यन्त राजेन्द्र ज्वलिता इव पावकाः।
काञ्चनाः काञ्चनापीडाः काञ्चनास्त्रगलङ्कृताः॥
पताका विविधैर्व्वालै रुत्थिता लक्षणान्विताः।
नीलाः पीताः सिता रक्ता कृष्णाभाः पञ्चवर्णकाः॥
तत्र पट्टपटी सोचा क्षतबुद्बुदकर्बुरा।

पताका कान्तिवल्लला कर्त्तव्या इव शोभनाः॥
ततोहलहलारावञ्चक्रुस्ते दानवोत्तमाः।
आस्फालयन्ति पणवा भेरीमुरजगोमुखाः॥
तान् वादयत्यानकन्ये शङ्खाडम्बरडिण्डिमान्
एव ते समयुध्यन्त भवानी दैत्यदानवाः॥
समाजघ्नुः शरैः शूलैः परिघैः शक्तितोमरैः।
कणायैरिव तैः कुन्तैः शतघ्नीकूटमुद्गरैः॥
आहत्यमाणोरोषेण जज्वाल समरेऽधिकं।
सिंहारूढा द्रुतं देवी रणमध्ये प्रधाविता॥
अच्छिवाच्छशचिह्नानि ध्वजानानाविधास्तथा।
बलात्कारेण दैत्यानामनाथसमरेतु वा॥
चिह्नकानि ददौ तुष्टा देवेभ्यः शीघ्रचारिणी।
सर्व्वैरपि गृहीतानि जपेद्देवीतिवादिभिः॥
अविद्यातु भृशन्तुष्टा तेषाञ्चक्रे चणात्चयं।
कालरात्रि र्दानवानां मरीचिनिपपात सा॥
जीवितानि च जग्राह दैत्यानान्देवनन्दिनी।
अथरक्तासुरङ्कण्ठे गृहीत्वापात्य भूतले॥
देवी जग्राह तीक्ष्णेन त्रिशूलेन भृशन्दिवि।
संभिन्नहृदयेमासाञ्चक्रे दैत्यसुदारुणाः॥
तथापि देव्याभिहतः पपात च ममार च।
देवस्तानसुराञ्जित्वा जित्वाशत्रुपुरे जितं॥
ददृशुस्ते कणप्रान्ते लम्बमाना महाध्वजाः।
यात्राञ्चक्रुः सम्प्रहृष्टान् नवम्यां ध्वजचिह्निताम्॥

अतोऽस्यां पीह भूपाले जयलक्षै क्षिपाट्टतैः।
उपेष्यते नरैर्भक्तैः नारीभिश्चैवपाण्डव ॥

युधिष्ठिर उवाच।

कीदृग्विधानं तस्यास्तु नवम्यां ब्रूहि मे प्रभो।
सरहस्यञ्च मन्त्रञ्च तुष्यते येन चण्डिका ॥

कृष्ण उवाच।

पौषस्य शुक्लपक्षे या नवमी शम्बरी श्रुता।
तस्यां स्नात्वा शुभैः पुष्पैरर्चनीया हरेश्वसा ॥
कुमारी भगवान् देवी सिंहस्यन्दनगामिनी।
ध्वजान् नानाविधान्कृत्वा पुरतस्तच्च पूजयेत् ॥
मालती कुसुमैर्दीपैर्गन्धधूपविलेपनैः।
वलिभिः पशुभिर्मेध्यैः सुरामांससमपिष्ठनैः ॥
दधिचन्दनचूर्णैश्च फलैश्चानग्निपाचितैः।
देवीं स्वर्णमयीं कृत्वा सिंहारूढां चतुर्भुजां ॥
खड्गशक्तिधरां शूलधरां नेत्रत्रयान्वितां।
मन्त्रेणानेन कौन्तेय ब्राह्मणो ह्यथवा न तु ॥
भद्रां भगवतीं कृष्णां विश्वस्य जगतोहितां।
प्रवेशनीं संयमनीं ग्रहनक्षत्रमालिनीं ॥
प्रपन्नोहं शिवां रात्रीं भद्रेमांपाहिसर्व्वदा।
सर्व्वभूतपिशाचेभ्यः सर्व्वसत्वसरीसृपैः ॥
देवेभ्यो मानुषेभ्यश्चोभयेभ्यो रक्ष मां मनः।
यक्षरक्षः पिशाचेभ्यो नागेभ्यो वृश्चिकेष्वपि ॥

---

* द्विजेभ्योदापयेत्तदिति पुस्तकान्तरे।

चौरादिदुष्टसत्त्वेभ्यो हिंस्रेभ्यो रक्ष सर्व्वतः।
इत्युच्चार्य्य प्रधान्येकं ध्वजकिङ्किणिमालिनं॥
ततश्चारोपयेद्राजा देवीनां भवने तथा।
भोजयेच्च कुमारीश्च प्रणिपत्य क्षमापयेत्॥
वाचकं पूरयित्वा थ परिप्राप्य क्षमाप्य च।
उपवासेन कुर्व्वीत एकभक्तेन वा पुनः।
भक्त्या नरेण दृढया भक्तिस्तत्र गरीयसी॥
एवं ये पूजयिष्यन्ति ध्वजैर्भगवतीं नरः*।
तेषां दुर्गा दुर्गमार्गे चौरव्यालाग्निसङ्कटे॥
रणे राजकुले गेहे युद्धमध्ये जले स्थले।
रक्षाङ्करोति सततं भवानी सर्व्वमङ्गला॥
अस्यां बभूव विजयो नवम्यां पाण्डुनन्दन।
भगवत्यास्तु तेनैषां नवमी सततं प्रियां॥
धन्या पुण्या पापहरा सर्व्वोपद्रवनाशिनी।
अनुष्ठेया प्रयत्नेन सर्व्वकामानभीप्सितान्॥

देव्यार्चनं हितमिदं मनुजो नवम्यां
हेमस्रजं ध्वजवरां स हि रोपयेद्यः।
कामानवाप्य मनसोपिहितान् विहाय
देहं प्रयाति परमेश्वरि पादमूलम्॥

इति भविष्योत्तरे ध्वजनवमीव्रतम्।

---

* ध्वजमालाभिरम्बिकामिति पुस्तकान्तरे पाठः।

अथ उल्कानवमीव्रतम्।

———ooo———

उषा उवाच।

उल्काख्या नवमी राजन् कथयामि निबोध तां।
या काश्यपेन कथिता तारकस्यार्त्तिनाशिनी॥
अश्वयुक्शुक्लपक्षे या नवमी लोकविश्रुता।
नद्यां स्नात्वा समभ्यर्च्य पितॄन्देवान् यथाविधि॥
पश्चात् संपूजयेद्देवीं चामुण्डां भैरवीं प्रियां।
पुष्पैर्धूपैः सनैवेद्यैः मांसमत्स्यसुरासवैः॥
पूजयित्वा स्तवं कुर्य्यान्मन्त्रेणानेन मानवः।
समारोप्याञ्जलिं मूर्द्ध्नि जानुभ्यामवनीं गतः।
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि॥
द्रव्यमारोग्य विजयन्देहि देवि नमो स्तु ते।
भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि॥
देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा।
सर्व्वमङ्गल माङ्गल्ये शिवे सर्व्वार्थ साधिके॥
उमे ब्रह्माणि कौमारी विश्वरूपे प्रसीद मे।
कुमारीर्भोजयेत्पश्चात् नवम्यां नीलकञ्चुकैः॥
परिधानैर्भूषणैश्च भूषयित्वा क्षमापयेत्।
सप्तपञ्चमयैषां वा वित्तवृत्तानुरूपतः॥
श्रद्धया तुष्यते देवी इति वीरानुशासनम्।
अभ्युक्ष्य मण्डलं कृत्वा गोमयेन शुचिः स्मृतः॥

दत्वासनं चोपविश्येत् पात्रञ्च पुरतोन्यसेत् ।
ततः सुसिद्धमन्नं य त्तत्सर्व्वं परिवेषयेत् ॥
सघृतं पायसन्तेऽपि स्वयञ्चापात्रसन्निधौ ।
तृणानि पुष्टिमादाय ह्यादाय ग्रामकं तथा ॥
प्रज्वालयेत्ततो भोज्ययावज्ज्वलति पावकः ।
प्रशान्ते भोजनं त्यक्ता समाचम्य प्रसन्नधीः ॥
चामुण्डां हृदये ध्यात्वा गृहकृत्यपरो भवेत् ।
अनेन विधिना सर्व्वं मासि मासि समाचरेत् ॥
ततः सम्वत्सरस्यान्ते भोजयित्वा कुमारिकाः ।
वस्त्रैराभरणैः पूज्य प्रणिपत्य चमाययेत् ॥
सुवर्णंशक्तितोदद्यान्नाञ्च विप्राय शोभनाम् ।
य एवं कुरुते पार्थ पुरुषो नवमीव्रतम् ॥
न तस्य शत्रवोनार्त्तिं न राजा नापि तस्करः ।
भूताः प्रेताः पिशाचाश्च जनयन्ति भयं गृह ॥
समुद्यतेषु शास्त्रेषु हता तस्य न विद्यते ।
रक्षते जयदोयुक्ता सर्व्वांस्तुवत्चण्डिका ॥
नरोवा यदिवा नारीव्रतमेतत्समाचरेत् ।
उल्कावत्स सपत्नानां ज्वलगस्ते सदा हृदि ॥
तां शुष्कवीढ़रसुखो प्रकटी सु दंष्ट्रा
कामाकिनीं समबलं चितिमुण्डमालम् ।
उल्कव्रतेषु पुरुषोनवमीषु चण्डी
संपूज्य कस्य हृदयं न च शङ्करोति ॥

इति श्रीभविष्योत्तरे उल्कानवमीव्रतम् ।

अथ उल्कानवमीव्रतम् ।

———ooo———

ऋषय ऊचुः ।

व्रतेन येन देवेन्द्र प्रसीदत्याशुपार्व्वती ।
तच्चोल्का नवमीसंज्ञं शृणु सर्व्वफलप्रदम् ॥
तस्यां नवम्यां सर्व्वाणी महिषादीन् महासुरान् ।
जघान समरे शत्रून् तेन सा नवमी प्रिया ॥
अश्वयुक् शुक्लपक्षस्य नवम्यां प्रयतात्मवान् ।
स्नात्वाभ्यर्च्चय पितॄन् देवान् मनुष्यांश्च यथाक्रमम् ॥
जपेत् पश्चान्महादेवीं महिषासुरघातिनीं ।
पुष्पैर्धूपैः सनैवेद्यैः पयोदधिफलादिभिः ॥
भक्त्यासम्पूजयित्वैवं देवीं सम्प्रार्थयेत्ततः ।
मन्त्रेणानेन द्व्यारिं श्रद्धया परया व्रती ॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
दिव्यमारोग्यविजयं देहि देवि नमोऽस्तु ते ॥
भूतप्रेतपिशाचेभ्योरक्षोभ्यश्च महेश्वरि ।
देवेभ्योमानुषेभ्यश्च भयेभ्योरक्ष मां सदा ॥
सर्व्वमङ्गलमाङ्गल्ये शिवे सर्व्वार्थसाधिके ।
उमे ब्राह्माणि कौमारि विश्वरूपे प्रसीद मे ॥
कुमारीर्भोजयित्वा च भोजयित्वा क्षमापयेत्* ।
न च सप्ताष्टकञ्चैकं वाल वित्तानुसारतः ॥

---

* दद्याचाच्छादनादिकमिति पुस्तकान्तरे पाठः ।

अनया प्रीतिमाप्नोति देवी भगवती शिवा ।
शास्त्रवयस्यजञ्चैव स तं यत्नेन पूजयेत् ॥
यतः शास्त्रेषु सा देवी निवसत्येव सन्ततं ।
अभ्युच्य मण्डलं कृत्वा गोमयेन सुविस्तरं ॥
दत्त्वा समं चोपविशेत् पात्रञ्च पुरतोन्यसेत् ।
तस्यां संसिद्धमन्नाद्यन्तत्सर्व्वमुपवेषयेत् ॥
शाक् च सर्व्वं समुद्धृत्यवायसेभ्यो निवेदयेत् ।
तृणानां मुष्टिमादाय हस्तमात्रं सुयन्त्रितं ॥
अन्यहस्तस्थितं चाल्य स्वयं भुञ्जीत वाग्यतः ।
प्रशान्तेऽग्नौ समाचम्य शुचिस्तद्गतमानसः ॥
चामुण्डां हृदये ध्यात्वा गृहकृत्यपरोभवेत् ।
अनेन विधिना वर्षं मासि मासि समाचरेत् ॥
ततः सम्वत्सरस्यान्ते भोजयित्वा कुमारिकाः ।
वस्त्रैराभरणैः पूज्य प्रणिपत्य विसर्ज्जयेत् ॥
सरुक्मशृङ्गीर्दद्याच्च गास्तु विप्राय शोभनाः ।
नरोवा यदि वा नारी व्रतमेतत् करोति यः ॥
उल्केवसा सपत्नीनां तेजसा भाति भूतले ।
श्रीमहानवमी त्येषा ख्यातासुरथ तेऽधुना ॥
सर्व्वसिद्धिकरी पुण्या सर्व्वोपद्रवनाशिनी ।
नाध्यात्मिकं भयं तस्य दैवं स्यान्नाधिभौतिकम् ॥
रक्षते हि सदा शक्र सर्व्वापत्सुच चण्डिका ।
शान्तिपुष्टिकरी धन्या पुत्रारोग्यार्थलाभदा ॥
अनुष्ठेया सदा पुंभिश्चतुर्वर्गफलार्थिभिः ।

यश्चाप्यनेनापि कुरुते व्रतमेतदित्थं
चण्डीप्रियं सुरथ ते मुनिसिद्धजुष्टं।
रुद्राङ्गनाकुलवराकुलितं विमान
मारुह्य याति सुमुखेन शिवस्य लोकं॥

इति सौरपुराणोक्तं उल्कानवमीव्रतम्।

अथ प्रदीप्तनवमीव्रतम्।

——०*०——

हस्तमात्रं त्वयं कार्य्यमङ्गुष्ठतर्ज्जनीगतम्।
प्रदीपं यावन्नोद्दीप्तं तावद्भोजनमाचरेत्॥
आश्विनशुक्लनवम्यामिति शेषः।
देवीं सम्पूजयित्वा तु षोड़शार्णेन भावितः।
ओं महाभगवत्यै महिषासुरमर्द्दिन्यै
नाम्ना हुंफटिति षोड़शाक्षरम्।
हेमपुष्पैस्तथागन्धैरन्नैश्चित्रैर्यथाविधि॥
सम्वत्सरं यथा न्यायं सर्व्वान् कामानवाप्नुयात्।
प्रदीप्ता नवमी वत्स हेमगोदक्षिणा मता॥
आद्या सर्व्वगता शुद्धा संग्रामेष्वपराजिता।
भवते प्रसन्नस्य यथा देवो महेश्वरः॥
अनेनैव विधानेन गुग्गुलोर्गुटिकान्दधन्।
पूजयित्वा शिवं मन्त्रैः प्रदीप्तां होमयेद्विधौ॥
पूजयित्वा शिवं मन्त्रैः प्रदीप्तां होमयेद्विधौ॥ पूजयित्वा गुग्गुलोर्गुटिकां होमये-

पूर्व्वोक्तेन विधानेन शिवं पूजयित्वा गुग्गुलोर्गुटिकां होमये-
दितन्वयः।

मन्त्रैर्दुर्गामन्त्रैः

प्रदीप्तेविधौ प्रौढ़े चन्द्रे प्रदोषान्त इत्यर्थः॥

पूर्वोक्ता दक्षिणा वात्र फलं वाजिमखोदितं।

इति देवीपुराणोक्तं प्रदीप्तनवमीव्रतम्।

अथ नवरात्रिव्रतम्।

———000———

देवा ऊचुः।

यावद्भूर्व्वायुराकाशं* जलं वह्निशशिग्रहाः।
तावद्वै चण्डिकापूजा भविष्यति सदा भुवि॥
प्रावृट्काले विशेषेण आश्विनेह्यष्टमीषु च।
महानन्दी नवम्यां च लोके ख्यातिं गमिष्यति॥

ब्रह्मोवाच।

एतत्ते देवराजेन्द्र स्वर्गवासफलप्रदम्।
परापरविभागन्तु क्रियायोगेन कीर्त्तितम्॥
एवं महाबलं शक्र पुरा देवारिकण्टकम्।
हत्वा देवीं वरं दध्युर्विद्याद्याश्च प्रतोषिताः॥

शक्र उवाच।

आश्विने घातिते घोरे नवम्यां प्रतिवत्सरं।
श्रोतु मिच्छाम्यहं तात उपवासजपादिकम्॥

घोरे घोरनाम्नि दैत्ये घातिते मारिते सतीत्यर्थः।

---

* व्यापकाकाशमिति पुस्तकान्तरे पाठः।

ब्रह्मोवाच ।

शृणु शक्र प्रवक्ष्यामि यथा त्वं पृच्छसि स्वयम् ।
महासिद्धिप्रदं धन्यं सर्व्वशत्रुनिवर्हणम् ॥
सर्व्वलोकोपकारार्थं विशेषादतिवृष्टिषु ।
कत्यर्थं ब्राह्मणाद्यैश्च क्षत्रियैर्भूमिपालने ॥
गोधनार्थं विशा वत्स शूद्रैः पुत्रसुखार्थिभिः ।
सौभाग्यार्थं स्त्रिया कार्य्यमाढैश्च धनकांक्षिभिः ॥
महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम् ।
कर्त्तव्यं देवराजेन्द्र देवीभक्तिसमन्वितैः ॥
कन्यासंस्थे* गुरौ शक्र शुक्लादारभ्य नन्दिकां ।

नन्दिकां प्रतिपत् ।

यवाशीत्यथवैकाशी नक्ताशीत्यथवा पुनः ।
प्रातस्नायी जितद्वन्द्वस्त्रिकालं शिवपूजकः ।
जपहोमसमासक्तः कन्यकाभोजयेत्सदा ॥
अष्टम्यां नवगेहानि दारुजानि शुभानि च ।
एकं वा हि विभावेन कारयेत् सुरसत्तम ॥
तस्मिन् देवी प्रकर्त्तव्या हैमी वा राजती पि वा ।
युद्धकालक्षणोपेतखड्गशूलेन पूजयेत् ॥
सर्व्वोपहार सम्पन्ना वस्त्र रत्नफलादिभिः ।
कारयेद्रथदोलादिपूजाञ्च वलिदैविकीं ।
वलिग्राहिणो देवा वलिदेवा विनायकादयः ।

---

* रवाविति पुस्तकान्तरे पाठः ।

तत्सम्बन्धिनीं बलिं देवकीं।
पुष्पैश्चन्द्रेण बिल्वाम्रजातीपुन्नाग, चम्पकैः।
द्रोणः कुरुवकः।
विचित्रां रचयेत् पूजां अष्टम्यामुपवासयेत्।
दुर्गाग्रतोजपेन्मन्त्रमेकचित्तः सुभावितः॥
तदर्द्धयामिनीशेषे विजयार्थं नृपोत्तम।
पश्चाद्दं लक्षणोपेतं महिषञ्च सुपूजितम्॥
विधिवत् कालकालीति जप्ता खड्गेन घातयेत्।
तस्योत्थं रुधिरं मांसं गृहीत्वा पूजनादिषु॥
नैर्ऋताय प्रदातव्यं महाकौशिकमन्वितम्।
तस्याग्रतो नृपः स्नायाच्छत्रुं कृत्वा सुपिष्टजम्॥
खड्गेन घातयित्वा तु दद्यात् स्कन्दविशाखयोः।
ततो देवीं सुस्नात्वा च क्षीरसर्पिर्जलादिभिः॥
कुङ्कुमागुरुकर्पूरचन्दनैश्चार्च्य धूपयेत्।
हेमादिपुष्परत्नादिवासांसि आहृतानि च॥
नैवेद्यं सुप्रभूतन्तु देयं देव्या सुभावितैः।
देवीभक्तांश्च पूजेत कन्यकाः प्रमदादिकाः॥
द्विजातीनन्धपाषण्डाननदानेन प्रीणयेत्।
नन्दाभक्ता नरा ये तु महाव्रतधराश्च ये॥
रथयात्रावलिक्षेपं जयवाद्यरवाकुलम्।
कारयेत्पूज्यते येन देवी वस्त्रनिघातनैः॥
अश्वमेधमवाप्नोति भक्तितः सुरसत्तम।
महानवम्यां पूजेयं सर्व्वकामप्रदायिका॥

सर्व्वेषु वत्स वर्षेषु तव भक्ताः प्रकीर्त्तिताः।
सत्वाप्नोति यशोराज्यं पुत्रायुर्धनसम्पदः॥

इति देवीपुराणोक्तं नवरात्रि व्रतम्।

अथ महानवम्युत्सवविधिम्।

———000———

कुमारीपूजनमप्यत्रैवोक्तं स्कन्दपुराणे।
एकैकां पूजयेत् कन्यामेकवृद्धया तथैव च॥
द्विगुणां त्रिगुणां वापि पूजयेन्नवकन्तथा।
नवभिर्लभते* भूमिमैश्वर्य्यं द्विगुणेन च॥
एकवृद्धया लभेत् क्षेममेकैकेन प्रियं लभेत्।
एकवर्षा तु या कन्या पूजार्थन्तां विवर्ज्जयेत्॥
गन्धपुष्पफलादीनां प्रीतिस्तस्य न विद्यते।
द्विवर्षकन्यामारभ्य दशवर्षावधि क्रमात्॥
पूजयेत्सर्व्वकार्य्येषु यथाविध्युक्तमार्गतः।
कुमारिका द्विवर्षा तु त्रिवर्षा च त्रिमूर्त्तिनी॥
चतुर्वर्षा तु कल्याणी पञ्चवर्षा तु रोहिणी।
षड्वर्षा तु भवेत् काली सप्तवर्षा तु चण्डिका॥
अष्टवर्षा शाम्भवी तु दुर्गा तु नवमी स्मृता।
दशवर्षा सुभद्रेति नामभिः परिकीर्त्तिताः॥
अत ऊर्द्धन्तुयाः कन्याः सर्व्वकार्य्येषु वर्ज्जिताः।

* लभते इति पाठान्तरं।

दुःखदारिद्रनाशाय शत्रूणां नाशनाय च।
आयुष्यबलवृद्धार्थं कुमारीः पूजयेन्नरः॥
आयुष्कामस्त्रिमूर्त्तिन्तु त्रिवर्गस्य फलाप्तये।
अपमृत्युव्याधिपीडा दुःखानामपनुत्तये॥
सौख्यधान्यधनारोग्यपुत्रपौत्राधिवृद्धये॥
कल्याणीं पूजयेद्धीमान्नित्यं कल्याणवृद्धये।
आरोग्यसुखकामीच जयकामी तथैव च।
यशस्कामीनरोनित्यं रोहिणीं परिपूजयेत्॥
विद्यार्थी च जयार्थी च राज्यार्थी च विशेषतः।
शत्रूणाञ्च विनाशार्थी कालिकां पूजयेन्नरः।
संग्रामेजयकामी च चण्डिकां परिपूजयेत्॥
दुःखदारिद्रनाशाय नृपसंमोहनाय च।
महापापविनाशाय शाम्भवीञ्च प्रपूजयेत्॥
स चेत् कुलाटशत्रूणामुग्रसाधनकर्म्मणि।
दुर्गां दुर्गतिनाशाय पूजयेद्यत्नतो बुधः॥
सौभाग्यधनधान्यादि वाञ्छितार्थफलाप्तये।
सुभद्रां पूजयेन्मर्त्त्योदासीदासविवृद्धये।

कुमारीपूजाप्रकारश्च तत्रैवोक्तः।

प्रातःकाले विशेषेण कृताभ्यङ्गो विशेषतः॥
आवाहयेत्ततः कन्यां मन्त्रेणानेन भार्गव।

आवाहन मन्त्रः।

मन्त्राक्षरमयी लक्ष्मी मातृणां रूपधारिणी।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहं॥

त्रिपुरां त्रिपुराधारां त्रिवर्गां ज्ञानरूपिणीं ।
त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहम् ॥
कलात्मिकां कलातीतां कारुण्यहृदयां शिवां ।
कल्याणजननीं नित्यां कल्याणीं पूजयाम्यहम् ॥
अणिमादिगुणाधारां मकाराद्यक्षरात्मिकाम् ।
अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥
कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीं ।
कामदां करुणोदारां कालीं सम्पूजयाम्यहम् ॥
चण्डवीराञ्चण्डमायाञ्चण्डमुण्डप्रभञ्जनीं ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमां ॥
सदानन्दकरीं शान्तां सर्व्वदेवनमस्कृतां ।
सर्व्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहं ॥
दुर्गमे दुस्तरे कार्य्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्त्तिनाशिनीम् ॥
सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ।
सुभद्रां जननीं देवीं सुभद्रां पूजयाम्यहम् ॥
एवमभ्यर्चनं कुर्य्यात् कुमारीणां प्रयत्नतः ।
कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥
नानाविधैर्भक्ष्यभोज्यै र्भोजयेत्पायसादिभिः ।
हीनाधिकाङ्गीं कुष्ठादिविकारां कुकुलान्तथा ॥
ग्रन्थिस्फुटितगर्भाङ्गीं* रक्तपूयव्रणाङ्किताम् ।
जात्यन्धां केकरीं काणीं कुरूपान्तनुरोमशां ॥

* शीर्णाङ्गीमिति पुस्तकान्तरे पाठः ।

मन्त्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां ।
अरोगिणीं सुपुष्टाङ्गीं सुरूपां व्रणवर्जितां ॥
एकवंशसमुद्भूतां कन्यां सम्यक् प्रपूजयेत् ।
ब्राह्मणीं सर्व्वकार्य्येषु जयार्थे नृपवंशजाम् ॥
दारुणे चान्यजातीयां पूजयेद्विधिना नर इति* ॥

अत्र चाश्वस्य पूजनमुक्तं देवीपुराणे ।

अश्वयुक् शुक्लप्रतिपत्तिथियोगे शुभे दिने ।
पूर्व्वमुच्चैःश्रवा नाम प्रथमं श्रियमावहन् ॥
तस्मात् सोऽश्वोनरैस्तत्र पूज्योऽसौ श्रद्धया सह ।
पूजनीयाश्च तुरगा नवमीं यावदेव हि ॥
शान्तिः स्वस्त्ययनं कार्य्या तदा तेषां दिने दिने ।
धान्यभल्लातकं कुष्ठं वचां सिद्धार्थकांस्तथा ॥
पञ्चवर्णेन सूत्रेण ग्रन्थिस्तेषान्तु बन्धयेत् ।
वायव्यैर्व्वारुणैः सौरैः शाक्तैर्मन्त्रैश्च वैष्णवैः ॥
वैश्वदेवैस्तथाग्नेयैर्होमः कुर्य्याद्दिने दिने ।
तुरङ्गा रक्षणीयास्तु पुरुषैः शस्त्रपाणिभिः ॥
दारिद्र्यतः क्वचित्तत्र नच वाह्याः कथञ्चन इति ।
अश्विनवरात्रे षष्ठ्यां विल्वशाखादिमन्त्रणं कार्य्यं तथा लिङ्गपुराणे ॥

---

* लाभार्थे वैश्यवंशस्थां सुतार्थे शूद्रवंशजां ।
दारुणे चान्यजातानां पूजयेद्विधिना नरः ॥ इति पुस्तकान्तरे पाठः ।

ऐं रावणस्य बधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधोदेव्यास्त्वयि कृतः पुरा ॥
अहमप्याश्वितः* षष्ठ्यां सायाह्ने बोधयाम्यतः ।
श्रीशैलशिखरेजात श्रीफल श्रीनिकेतन ॥
नेतव्योऽसि मया गच्छ पूज्योदुर्गास्वरूपतः ।
सप्तम्यां प्रातस्तां शाखां गृहं छित्वा प्रवेशयेत् ॥
तथा च तत्रैव । मूलाभावेऽपि सप्तम्यां केवलायां प्रवेशयेत् ।
उभाभ्यां नवबिल्वस्य फलाभ्यां शाखिकान्तथेति ॥
अष्टम्यां पूजाविशेषो विहितोब्रह्मपुराणे ।
अत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ॥
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ।
अतोऽर्थं पूजनीया सा तस्मिन्नहनि मानवैः ॥
उपोषितैर्वस्त्रधूपैर्दीपैर्माल्यानुलेपनैः ।
आमिषैर्विविधैः शाकैर्होमब्राह्मणतर्पणैः ॥
विल्वपत्रैः श्रीफलैश्च चन्दनेन घृतेन च ।
नवम्यां तु कृतस्नानैः सर्व्वैः पूज्यास्तु ब्राह्मणाइति ॥
प्रतिपदादिषु नवसु प्रतिदिनं दुर्गापूजादिकरणासामर्थ्ये सप्तम्यादिदिनत्रयेण कर्त्तव्यम् ।

तदाह धौम्यः ॥

आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकं ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥

---

* अहमप्याश्विने इति पुस्तकान्तरे पाठः ।

त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादि यथाक्रममिति।

श्रीकृष्ण उवाच।

पुण्या महानवम्यस्ति तिथीनामुत्तमा तिथिः।
सानुष्ठेया सुरैः सर्व्वैः प्रजापालैर्विशेषतः॥
भवानीतुष्टये पार्थ सम्वत्सरसुखाय च।
भूतप्रेतपिशाचानां प्रीत्यर्थं तूत्सवाय च* ॥

युधिष्ठिरउवाच।

कस्मात् कालात् प्रवृत्तेयं नवमी महशब्दिता।
किमादावपि कृष्णासीद्भगवत्याः प्रिया तिथिः॥
यशोदागर्भसम्भूता भूतयात्रा प्रवर्त्तते।
उताहो पूर्व्वमेवासीत् कृतत्रेतायुगादिषु॥
ये चान्ये प्राणिनः केचिद्घ्नन्ति घातयन्ति वा।
हतानां प्राणिनां तेषां का गतिः पारलौकिकी॥
स्वयं घ्नतां घातयतामनुमोदयतां तथा।
एतन्मे संशयं सर्व्वं छेत्तुमर्हसि केशव॥

श्रीकृष्ण उवाच।

पार्थ या परमा शक्तिरनन्ता लोकपूजिता।
आद्या सर्व्वगता शुद्धा भावगम्या मनोहरा॥
अर्द्धाष्टमी कालिकायाः सुपुण्या सर्व्वमङ्गला।
माया कात्यायनी दुर्गा चामुण्डा शङ्करप्रिया॥

---

* नाशार्थं चोत्सवायेति पुस्तकान्तरे पाठः।

ध्यायन्ति यां योगरताः सा देवी परमेश्वरी।
रूपभेदैर्नामभेदैर्भवानी पूज्यते शिवा॥
नवम्यां तु महाराज देवदानवराक्षसैः।
गन्धर्व्वैरुरगैर्यक्षैः पूज्यते किन्नरैर्नरैः॥
अन्यैरपि महीपालैः सृष्टिपूर्वं प्रकीर्त्तिता।
पूजितेयं पुरा देवैस्तेभ्यः पूर्वतरैः शुभैः॥
अश्वयुक् शुक्लपक्षस्य अष्टमी मूलसंयुता।
सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभा॥
कन्यागते सवितरि शुक्लपक्षेऽष्टमी तु या।
मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता।
अष्टम्यां च नवम्यां च जन्ममोक्षप्रदाश्विका॥
पूजयित्वाश्विने मासि विशोकोजायते नरः।
सन्तर्ज्जयन्ती हुङ्कारैर्विघ्नौघच्छेदकृत्परा॥
नवम्यां पूजिता देवी ददात्यनुपमं फलं।
सा पुण्या सा पवित्रा च सुधर्म्मसुखदायिनी॥
तस्यां सदा पूजनीया चामुण्डा मुण्डमालिनी।
तस्यै ये ह्युपयुज्यन्ते प्राणिनोमहिषादयः।
सर्व्वे ते स्वर्गतिं यान्ति घ्नतां पापं न विद्यते॥
न तथा वलिदानेन पुष्पधूपविलेपनैः।
यथा सन्तुष्यते मेषैर्माहिषैर्विन्ध्यवासिनी॥
उद्दिश्य दुर्गां हन्यन्ते विविधा यत्र जन्तवः।
ते यान्ति स्वर्गं कौन्तेय घातयन्तोयशस्विनः॥
भवानी प्राक्षये प्राणा येषां याता युधिष्ठिर।

तेषां स्वर्गे भुवं वासोनरास्तेऽप्सरसांप्रियाः ।
मन्वन्तरेषु सर्व्वेषु कल्पेषु कुरुनन्दन ॥
तेषु सर्वेषु चैवासोन्नवमीयं सुरार्च्चिता ।
प्रसिद्धानादिनिधना वर्षे वर्षे युधिष्ठिर ॥
भूयोभूयोऽवतारेषु भवानी पूज्यते सुरैः ।
अवतीर्णावतीर्णा च भुवि दैत्यनिवर्हिणी ॥
स्वर्गपातालमर्त्येषु करोत्यतिथिपालनं ।
सैषा काले महादेवी यशोदागर्भसम्भवा ।
कंसासुरस्योत्तमाङ्गे पादं गत्वा गता दिवं ॥
ततः प्रभृति दैत्यघ्नी यशोदानन्दिनी मया ।
विन्ध्याचले स्थापयित्वा पुनः पूज्याप्रवर्त्तिता ॥
पूर्व्वप्रसिद्धापि पुनर्भगिन्या महिमाकृते ।
भुवि सत्त्वोपकाराय सर्व्वोपद्रवशान्तये ॥
एवञ्च विन्ध्यवासिन्यां नवरात्रोपवासितः ।
एकभक्तेन नक्तेन स्वशक्त्यायाचितेन वा ।
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।
गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने ॥
स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ।
ततः संपूजयेद्धीमान् मन्त्रैरेव पृथक् पृथक् ।
वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ।
स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु ॥
जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात् ।
लौहाभिसारिकं कर्म्म कारयेत् यावदष्टमीं ॥

प्रागुदक्प्रवणे देशे पताकाभिरलंकृतम् ।
मण्डपं कारयेद्दिव्यं नवसप्तकरं शुभम् ॥
आग्नेय्यां कारयेत् कुण्डं हस्तमात्रं सुशोभनम् ।
मेखलात्रयसंयुक्तं योन्यश्वत्थदलालया ।
राजचिह्नानि सर्व्वाणि शस्त्राण्यस्त्राणि यानि च ॥
आनीय मण्डपे तानि सर्व्वाण्येवाधिवासयेत् ।
ततस्तु ब्राह्मणैः स्नातः शुक्लाम्बरधरः शुचिः ॥
ओंकारपूर्वकैर्म्मन्त्रैस्तल्लिङ्गैर्जुहुयात् घृतं ।
लोहनामाभवत् पूर्व्वं दानवः सुमहाबलः ॥
स देवैः समरे क्रुद्धैर्व्वहुधा शकलीकृतः ।
तदङ्गसम्भवं सर्व्वं लोहं यद्दृश्यते क्षितौ ।
लोहाभिसारिकं कर्म्म तेनैतद्दृषिणा स्मृतम् ॥
हुतशेषन्तुरङ्गाणां राजान्नमुपहारयेत् ।
शस्त्रास्त्रमन्त्रैर्हौतव्यं पायसं घृतसंयुतम् ॥
केवलं घृतहोमस्तु राजचिह्न सुमन्त्रकैः ।
वद्धानालानकैस्तत्र गजाश्वान् समलङ्कृतान् ॥
भ्रामयन्नगरे नित्यं नन्दिघोषपुरःसरान्* ।
प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवतां ॥
पूजयेद्राजचिह्नानि फलमाल्यानुलेपनैः ।
हुतशेषं प्रदातव्यमौपनायनिके द्विजे ॥
तस्याभिहरणाद्राज्ञोविजयः समुदाहृतः ।

* वेदघोषेति पुस्तकान्तरे पाठः ।

पूजामन्त्रान् प्रवक्ष्यामि पुराणोक्तानहं तव ॥
यैः पूजिताः प्रयच्छन्ति कीर्त्तिमायुर्यशोबलम्।
यथा चन्द्रच्छा* दयति शिवायेमां वसुन्धराम् ॥
तथा च्छादय राजानं विजयारोग्यवृद्धये ॥

छत्रमन्त्रः।

गन्धर्व्वकुलजातस्त्वं माभूयाः कुलदूषकः।
ब्राह्मणान् सत्यवाक्येन सोमस्य वरुणस्य च ॥
प्रभावाच्च हुताशस्य वर्द्धयस्व तुरङ्गम।
तेजसाचैव सूर्य्यस्य मुनीनां तपसा तथा ॥
रुद्रस्य ब्रह्मचर्य्येण पवनस्य बलेन च।
स्मर त्वं राजपुत्रस्य कौस्तुभस्य मणिं स्मर ॥
यां गतिं पितृहा गच्छेद्‌ ब्रह्महा मातृहा तथा।
भ्रूणहानृतवादीच क्षत्रियश्च पराङ्मुखः ॥
सूर्य्याचन्द्रमसौ वायुर्य्यावत्पश्यन्ति दुष्कृतिं।
व्रज त्वं ताङ्गतिं क्षिप्रं तव पापं भवेत्तदा ॥
विकृतिं यदि वाच्छन्तो युद्धेऽध्वनि तुरङ्गम।
रिपून् विजित्य समरे सह भर्त्रा सुखी भव ॥

अश्वमन्त्राः।

शक्रकेतो महावीर्य्य श्यामवर्णार्च्चयाम्यहं।
पतत्त्रि वैनतेय त्वं तथा नारायणध्वज ॥
काश्यपेयामृताहर्त्तर्नागारे विष्णुवाहन ॥

---

* यथाम्बुदः छादयतीति पुस्तकान्तरे।

अप्रमेय दुराधर्ष रणे देवारिसूदन ।
गरुत्मान्मारुतगतिस्त्वयि सन्निहितोयतः ॥
अस्त्रचर्म्मायुधान् पत्तं रक्ष त्वं च रिपून् दह ।

ध्वजमन्त्रः ।

कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोञ्जनो नील एतेष्टौ देवयोनयः ॥
तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रिताः ।
भद्रोमन्दोमृगश्चैव राजसङ्कीर्ण एव च ॥
वने वने प्रसूतास्ते स्मर योनिं महागज ।
पान्तु त्वां वसवोरुद्रा आदित्याः समरुद्गणाः ॥
भर्त्तारं रक्ष नागेन्द्र स्वामिवत् प्रतिपाल्यतां ॥
अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रज ।
श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्य्याज्जवोऽनिलात् ।
स्थैर्य्यं मेरोर्जयो रुद्राद्दीर्घं देवात् पुरन्दरात् ॥
युद्धे रक्षन्तु नागास्त्वां दिशश्च सह दैवतैः ॥
अश्विनौ सह गन्धर्वैः पान्तु त्वां सर्व्वतः सदा ।

गजमन्त्रः ।

हुतभुग्वसवोरुद्रा वायुःसोमो महर्षयः ।
नाग, किन्नर, गन्धर्व्वा, यक्षभूतगणग्रहाः ॥
प्रमथास्तु*सहादित्यै र्भूतेशोमातृभिः सह ।
शक्रसेनापतिस्कन्दोवरुणःपार्श्वदास्त्विह ॥

* प्रथमास्तु सहादित्यैरिति पुस्तकान्तरे ।

प्रदहन्तु रिपून् सर्व्वान् राजा विजयमृच्छतु।
यानि प्रयुक्तान्यरिभि*र्भूषणानि समन्ततः॥
पतन्तूपरि शत्रूणां हतानि तव तेजसा।
कालनेमिबधे यद्वत्तद्वत्त्रिपुरघातने॥
हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा।
शोभितासि तथैवाद्य शोभयास्मांश्च संस्मर॥
नीलां श्वेतामिमां दृष्ट्वा नश्यन्त्वाशु नृपारयः।
व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधिनिर्जिताः॥
सद्यःस्वस्था भवन्त्वस्मात्त्वद्वातेनापमार्जिताः।
पूतना रेवती गौरी कालरात्रिश्च या स्मृता॥

पताकामन्त्रः।

असिर्विशसनः खड्गो† विकर्म्मा च दुरासदः।
श्रीगर्भो विजयश्चैव धर्म्माधारस्तथैव च॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा।
नचत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः॥
हिरण्यञ्च शरीरन्ते धाता देवो जनार्द्दनः।
पिता पितामहोदेवस्त्वन्मां पालय सर्व्वदा॥

खड्गमन्त्रः।

ओं शर्म्मप्रद त्वं समरे चर्म्मसर्व्वायसो हृदि।
रक्ष मां रक्षणीयोऽहं न हन्तव्योनमोस्तु ते॥

---

* रायुधानीति पुस्तकान्तरे पाठः।

† तीक्ष्णधारोदुरासद इति पुस्तकान्तरे पाठः।

वर्म्ममन्त्रः ।

दुन्दुभे त्वं सपत्नानां घोषाद्धृदयकम्पनः ।
भव भूमिपसैन्यानां तथा विजयवर्द्धनः ।
यथा जीमूतघोषेण प्रहृष्यन्ति तु बर्हिणः ॥
तथास्तु तव शब्देन हर्षोऽस्माकं मुदावह ।
यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते ॥
तथा वादित्रशब्देन त्रासोऽस्त्वस्मद्रिपोरणे ।

दुन्दुभिमन्त्रः ।

सर्व्वायुधमहामात्र सर्व्वदेवारिसूदन ।
शिवभूमासि सैन्यानां तथा विजयवर्द्धनः ॥
चाप मां सर्व्वदा रक्ष साकं सायकसत्तमैः ।

चापमन्त्रः ।

पुण्यस्त्वं शङ्खशब्दानां मङ्गलानाञ्च मङ्गलम् ।
विष्णुना विधृतोनित्यमतः शान्तिप्रदो भव ॥

शङ्खमन्त्रः ।

शशाङ्ककरसङ्काश हिमडिण्डीरपाण्डुर ।
प्रोत्सारणाय सुदित चामरामरवल्लभ ॥

चामरमन्त्रः ।

सर्व्वायुधानां प्रथमा निर्म्मितासि पिनाकिना ।
शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभम् ॥
चण्डिकायाः प्रियासि त्वं सर्व्वदुष्टनिबर्हणी ।
त्वया विस्तारिता वासि देवानां प्रतिपादिता ॥

सर्व्वसत्वाङ्गभूतासि* शुभासुरनिवर्हणी।
छुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोस्तु ते॥

छुरिकामन्त्रः।

प्रोत्सारणाय दुष्टानां साधुसंग्रहणाय च।
ब्रह्मणा निर्मितश्चापि व्यवहारप्रसिद्धये॥
यशोदेहि सुखं देहि जयदो भव भूपतेः।
ताडयाशु रिपून् सर्व्वान् हेमदण्ड नमोस्तु ते॥

कनकदण्डमन्त्रः।

विजयो जयदो नाम रिपुघाति प्रियङ्कर।
दुःखहा धर्म्मदः शान्तः सर्व्वारिष्टविनाशन॥
एतेष्टौ सन्निधौ प्रोक्तास्तवसिंहा महाबलाः।
तेन सिंहासनोऽसि त्वं विप्रैर्वेदेषु गीयसे॥
त्वयि स्थितः शिवः साक्षात् त्वयि शक्रः सुरेश्वरः।
त्वयि स्थितो हरिर्देवस्त्वदर्थे तप्यते तपः।
नमस्ते सर्व्वतोभद्र भद्रदो भव भूपतेः॥
त्रैलोक्यजयसर्व्वस्व सिंहासन नमोस्तु ते॥

सिंहासनमन्त्रः।

लोहाभिसारिकं कर्म्म कृत्वैवं मन्त्रपूर्व्वकम्।
फलनैवेद्यकुसुमैर्धूपदीपविलेपनैः॥
अष्टम्यां नियमं कृत्वा पूर्वाह्णे स्नानमाचरेत्।
दुर्गां काञ्चनमूर्त्तिं स्थां रौप्यां वा मृण्मयीमथ॥

---

* सर्व्वाशुभविवर्हणीति पुस्तकान्तरे पाठः।

शैलीं वार्क्षीञ्च रैत्तीं वा ताम्रीं विभवतः कृत्वा ।
दारुविचित्रतोरणे न्यस्ता शोभने स्थाने ।
पुरतो विन्यस्तदेशां विचित्रगृहमध्यगां देवीम् ॥
चन्दन कुङ्कुम चम्पकचतुःसमैःशैलपिष्टैश्च ।
चर्च्चितगात्रां देवीं कुसुमैरभ्यर्चितां* बहुभिः ॥
कुमुदैः सपद्मपुष्पैः सुदीपधूपैः सुनैवेद्यैः ।
मांसैर्व्वल्युपहारैर्मङ्गलशब्दैः समुच्चलितैः ॥
विजयच्छत्रैर्यानैः स्यन्दनसितशस्त्रधारिजनलोकैः ।
तुष्टैर्वरवस्त्रादि सुनिवेद्यते सर्व्वमेव भगवत्यै ॥
जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री† स्वाहा स्वधा नमोस्तु ते ॥
अमृतोद्भव श्रीवृक्ष महादेवप्रियं सदा ।
विल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ॥
दुर्गां सम्पूजयेच्चैव तद्दिने द्रोणपुष्पकैः ।
साचाभीष्टा सुरेशान्यास्तथारूढव्रतोयतः ।
ततः खड्गं नमस्कृत्य शत्रूणाञ्चैव मर्दयेत् ॥
इच्छेत विजयं राज्यं सुभिक्षं चात्मनो नृपः ।
पुनः पुनः प्रणम्यासिं संस्मरन् हृदये शिवाम् ॥
महिषघ्नी महाभुजां कुमारीं सिंहवाहिनीम् ।
दानवांस्तर्जयन्तीं च खड्गोद्यतकरां शुभाम् ।
घण्टाक्षस्रग्धरां दुर्गां रणारम्भे व्यवस्थिताम् ॥

---

* कुसुमैरभ्यर्च्चयेदिति पुस्तकान्तरे पाठः ।

† शिवाक्षमेति पुस्तकान्तरे पाठः ।

ततो जयजयालापैस्तवं कुर्य्यादिमन्ततः।
सर्व्वमङ्गलमाङ्गल्ये शिवे सर्व्वार्थसाधिके॥
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते।
कुङ्कुमेन समालब्धे चन्दनेन विलेपिते॥
बिल्वपत्रमहामाले दुर्गेऽहं शरणङ्गतः।
इत्येवमथ कौरव्य अष्टम्यां जागरं निशि॥
नटनर्त्तकगीतैश्च कारयेत्सुमहोत्सवम्।
एवं हृष्टोनिशां नीत्वा प्रभाते अरुणोदये॥
घातयेन्महिषान्मेषानग्रतो नतकन्धरान्।
शतमर्द्धंशतंवापि तदर्द्धं वा यथेच्छया॥
सुरासवभृतैः कुम्भैस्तर्पयेत्परमेश्वरीम्।
कपालिकेभ्यस्तद्देयं तथा दुष्टजनेष्वपि*॥
विभज्य सर्व्वं कौन्तेय सुहृत्सम्बन्धिबन्धुषु।
ततोपराह्णसमये नवम्यां स्यन्दनेस्थितां॥
भवानीं भ्रामयेद्राष्ट्रे स्वयं राजा ससैन्यवान्।
सुविदग्धैः पूरपैर्वारयुक्तैः सुपूजितैः॥
शनैः शनैरम्बिकायाज्वलद्भिर्दीपहस्तजैः।
आकृष्टखङ्गैर्योधैस्तु धानुष्कैः सुप्रवल्गितैः॥
नदद्भिःशङ्खपटहैर्नृत्यद्भिर्बहुचारणैः।
कश्चिच्चोपोषितो वीरोविध्दतोन्येन खड्गिना॥
भूतेभ्यस्तु बलिं दद्यान्मन्त्रेणानेन चामिषं।
सरक्तं सजलं चान्नं गन्धपुष्पाक्षतैर्युतं॥

---

* दासीदासजने तथेति पुस्तकान्तरे।

त्रींस्त्रीन् वारांस्त्रिशूलेन दिग्विदिक्षु क्षिपेद्बलिं।
बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा॥
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः* ।
असुरा यातुधानाश्च पिशाचा मातरोरगाः॥
डाकिन्यो यक्षवेताला योगिन्यः पूतनास्तथा।
जृम्भकाः सिद्धगन्धर्व्वा मालाविद्याधरा नगाः।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥
जगतां शान्तिकर्त्तारो ब्रह्माद्याश्च महर्षयः।
मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः॥
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः।
इत्येवं भ्रामयेद्राष्ट्रे दुर्गादेवीं रथस्थितां॥
नरयानेन वा पार्थ ततोविघ्नं समापयेत्।
अथोत्पन्नेषु विघ्नेषु भूतशान्तिं समाचरेत्॥
येन विघ्ना न जायन्ते यात्रा सम्पूर्णतां व्रजेत्।
एवं ये कुर्व्वते यात्रां राजानोऽन्येऽपि मानवाः॥
महानवम्यामन्यायाः पुष्पिका हृष्टमानसाः।
ते सर्वे पापनिर्मुक्ता यान्ति भागवतीं पुरीं॥
न तेषां शत्रवोनाग्निर्नचौरो न विनायकाः॥
विघ्नं कुर्व्वन्ति राजेन्द्र येषां तुष्टा महेश्वरी।
निरुजाः सुखिनो भोगान् भुक्त्वा रोगविवर्ज्जिताः॥
भवन्ति पुरुषा भक्ता भगवत्याः किमुच्यते।
इत्येतत्ते समाख्यातं दुर्गादेव्या महोत्सवम्॥

---

* पिशाचोरगराक्षसाइति पुस्तकान्तरे।

पठतां शृण्वतां चैव सर्व्वाशुभविनाशनम्।
शूलाग्रभिन्नमहिषासुरपृष्ठपीठ
मध्यास्य तत्सुरुचिराङ्गदवाहुदण्डां।
अभ्यर्च्य चन्द्रवदनानुगतां नवम्यां
दुर्गान्तु दुर्गगहनानि तरन्ति मर्त्त्याः॥

इति भविष्योत्तरपुराणोक्तो महानवम्युत्सवविधिः।

अथ महानवम्युत्सवविधिः।

अथाथर्व्वणगोपथब्राह्मणात्।

अथ नवम्यामपराह्णे वाहनानि स्नपयित्वा आहतवासा ब्राह्मणो द्वादशकुशमितं वेदं कृत्वा अथ तत्त्वमित्युक्तां शान्तिं कृत्वा तद्भूषणवाहनानि त्रिःप्रोक्ष्य परिधीयान् निशालामिति सूक्तं जपन् प्रत्येत्याभिषेचयेत्। यद्देतेनाश्वलङ्गे* कृतं मवल कण्टकं

कृत्वोपस्थाय निदध्याद्भयैरपराजितैः

स्वपुण्यैः† स्वस्त्ययनैरप्रतिरथेन च हुत्वा संस्थाप्य अग्ने रक्षांसि अपाहतेति वासोभिः प्रच्छाद्य रसैः कुम्भानौडुम्बरान् पूरयित्वा प्रतिदिवसमवस्थाप्य निदध्यादेवमन्यान्युदपात्राणि संमिश्र्या धान्याष्टपात्राण्यष्टासु दिक्षु तत्रैव देवताः यजेताग्निवायुवरुण सोममश्विनाविति पयसि स्थालीपाकं अर्पयित्वा समन्वारब्धोऽग्ने

---

* यतेनमश्वगातं कृतं मश्वनकृकटमिति पुस्तकान्तरे पाठः।

† सपुष्पैरिति पुस्तकान्तरे पाठः।

त्वन्नो अतम ममाग्ने वर्चोविहवेष्वस्तु उदत्तमं वरुणपाशमस्मान् सदस्यतिमद्भुत अश्विनावाचमिति पञ्चभिर्जुहुयात्पौर्णमासी प्रथमेति जुहुयाद्दुन्दुभिमाहन्यादित्युक्तं उपश्वासयद्दति* तच्चैवा-नुमन्त्रम्

सर्व्वाणि च वादित्राणि वाहनानि च सन्नं स्यात् प्रतिहर्ष-यन्ति पञ्चमीनधिष्ठापयेतश्च पञ्चैनुदेव इति गुग्गुलु कुष्ठ धूपं दद्यात् यस्ते गन्धचायुषं इति भूतिं प्रयच्छेत् दुष्याद्दूषितरसीति प्रतिसरमवध्नात्त: पुस्तादिति† प्रतिसंचिपेद्बहिर्निस्त्योत्तरेण गत्वा वाह्नोतापनि:क्रम्य सुहृदे कुर्य्या अद्दधते कुर्य्यात् हतानाम-भयंकर्म्म विवर्ज्जित पञ्चयोर्नवमीं यत्नात् कुर्य्याच्च भयकर्म्माणि ।

इति गोपथब्राह्मणे महानवमीविधिः ।

इति महानवम्युत्सवविधिः ।

अथ उभयनवमीव्रतम् ।

——000——

श्रीसुमन्तुरुवाच ।

योऽब्दमेकं प्रकुर्व्वीत नवम्यां नक्तमादरात् ।
इह भोगानवाप्याग्र्यान् परत्र च दिवं व्रजेत् ।
पौषे मासे च सम्प्राप्ते यः कुर्य्यान्नक्तभोजनं ॥
जितेन्द्रियः सत्यवादी कामक्रोधविवर्ज्जितः ।
पञ्चयोर्नवमीं यत्नादुपवासेन पालयेत् ॥

---

* उपश्वासयदिति पुस्तकान्तरे पाठः ।

† प्रसवमाधवेध्यवार्गदति पुस्तकान्तरे पाठः ।

त्रिकालं पूजयेद्दार्य्यां गन्धपुष्पोपहारतः।
कृत्वाग्निकार्य्यं विधिवद्भूमौ शय्यां प्रकल्पयेत्॥
मासान्ते स्नपनं कृत्वा भवान्यै च घृतादिभिः।
कृत्वा ध्यानं महापूजां चण्डिकायै प्रकल्पयेत्॥
नैवेद्यं तण्डुलप्रस्थं क्षीरसिद्धं निवेदयेत्।
कुमारीर्भोजयेच्चाष्टौ विप्रान् भागवतांस्तथा॥

भागवतान् भगवतीभक्तान्।

कृत्वा पिष्टमयीं देवीं नाम्ना आर्य्येति पूजयेत्।
चतुर्भुजां शूलधरां कुन्दपुष्पैः सगुग्गुलैः॥
स्नानं कृत्वा तिलैर्विप्र स्तिलानां प्राशनं तथा।
य एवं पूजयेदार्य्यां तस्य पुण्यफलं शृणु॥
सूर्य्यकोटिप्रतीकाशं विमानवरमास्थितः।
दोधूयमानश्चमरैः स्तूयमानः सुरासुरैः॥
गच्छेद्दुर्गापुरं रम्यं यत्रास्ते चण्डिका स्वयम्।
क्रीड़ते देवगन्धर्व्वैर्यावदाहूतसंप्लवम्॥
त्रिःसप्तकुलजैः सार्द्धं भोगान् भुक्त्वा यथेप्सितान्।
पुनरेत्य भुवं वीर राजा भवति भूतले॥
माघे मासे तु संप्राप्ते यः कुर्य्यान्नक्तभोजनम्।
कृशरां घृतसंयुक्तां भुञ्जानः संयतेन्द्रियः॥
उपवासपरोऽष्टम्यां पक्षयोरुभयोरपि।
पूजयेद्विधिवद्दुर्गां* नाम्ना गौरीति वै नृप॥

---

* पूजयेदम्बिकाभक्त्या कृत्वा गोधूमचूर्णजामिति पुस्तकान्तरे पाठः।

विमानवरमारूढ़ः सूर्य्यलोके महीयते ।
प्राप्ते तु फाल्गुने मासि यः कुर्य्यान्नक्तभोजनम् ॥
यवान्नं भुञ्जमानस्तु त्यक्त्वा दूरेण योषितं ।
कृत्वोपवासमष्टम्यां पञ्चयोरुभयोर्नृप ॥

उपवासं मनसि कृत्वा पूजयेद्विधिवद्दुर्गां नवम्युपवासं मनसि निधायाष्टम्यां नक्तं

पूजयेत्त्र्यम्बकां भक्त्या कृत्वा गोधूमचूर्णतः ।
दुर्गामष्टभुजां वीर त्र्यम्बकामिति नामतः ।
गन्धपुष्पोपहारैस्तु सर्व्वैरक्तैस्तु पूजयेत् ॥
धूपं कृष्णागुरुं दद्यात् मांसं दद्याच्च माहिषम् ।
धान्यं सिद्धार्थकाः स्नाने प्राशने वा यवाः स्मृताः ॥
य एवं माघमासे च पूजयेत्त्र्यम्बकां नृप ।
कृत्वा ताम्रमयीं वीर द्वात्रिंशाद्भुजां शुभां ॥
पीतैस्तु पूजयेत् पुष्पैश्चन्दनागुरुमिश्रितैः ।
दध्योदनन्तु नैवेद्यं धूपोऽयं सिह्लकः परः ॥
स्नानप्राशनयोर्धान्यं* गोमूत्रं कायशोधनम् ।
नवम्यां च महादेवीं स्नानं कृत्वा घृतादिभिः ॥
कुमारीर्भोजयेद्भक्त्या ब्राह्मणांश्च स्वशक्तितः ।
य एवं पूजयेद्भक्त्या दुर्गादेवीं नृपोत्तम ॥
स याति परमं स्थानं यत्र सा चण्डिका स्थिता ।
चैत्रे मासि तु संप्राप्ते यः कुर्य्यान्नक्तभोजनं ॥
पिष्टकं पयसा युक्तं भुञ्जानः शालिसम्भवम् ।

---

* धन्यमिति पुस्तकान्तरे पाठः ।

पूजयेद्भगवतीं भक्त्या कृत्वा वै चन्दनस्य च ॥
गन्धपुष्पोपहारैश्च विंशार्द्धभुजसम्मितां।
ज्वालामुखीति वै नाम्ना कुङ्कुमागुरुचन्दनैः ॥
धूपं सागुरुकर्पूरं भगवत्यै निवेदयेत्।
दद्यात्पश्चिमुखं भक्त्या नैवेद्यं विधिवन्नृप ॥
स्नाने कुशोदकं धर्म्मंश प्राशने च नराधिप।
इत्थं सम्भोज्य* देवेशीं कुमारीं भोजयेत्ततः ॥
ब्राह्मणांश्च तथा शक्त्या ततो भुञ्जीत वाग्यतः।
पद्मरागगणैर्युक्तं सौवर्णमणिवेदिकं ॥
विमानवरमारूढो ब्रह्मलोके महीयते।
वैशाखे मासि राजेन्द्र पक्षयोरुभयोर्द्वयोः ॥
उपवासपरोभक्त्या पूजयामास चण्डिकां।
अष्टम्यां नक्तं नवम्यामुपवासप्रकारादिदितव्यमुत्तरेष्वपि मासेषु।
नाम्ना भगवतीत्येवं कृत्वा पद्ममयीं विभो।
रूपेणाष्टभुजां शुभ्रां पूर्णचन्द्रनिभाननां।
सुन्दराणां प्रजाभिस्तु पूजयेच्छिवनायिकां ॥
नानागुरुककर्पूरधूपेन विजयेन च ॥
नैवेद्यं गुड़पूपाश्च अथवा गुग्गुलं नृप।
एवं संपूज्य विधिवत् कुमारीर्भोजयेत्ततः ॥
पुष्पेषुतनुसङ्काशां† स्तेजस्वी ध्रुवसन्निभः।
विमानवरमारूढोदेवीलोके महीयते ॥

---

* सम्पूज्येति पुस्तकान्तरे पाठः।

† पुष्पच्छालतनुसङ्काश इति पुस्तकान्तरे पाठः।

ज्यैष्ठे मासि नृपश्रेष्ठ यः कुर्य्यान्नक्तभोजनम् ।
शाल्युत्तमं घृतं शुभ्रं* भुञ्जानः पयसा सह ॥
उपवास परो भक्त्या नवम्यां पूजयेद्द्रुमं† ।
कुङ्कुमागुरुकर्पूरैर्धूपेनागरुणाथवा ।
अशोकवर्त्तिप्रमुखैर्नानाभक्ष्यैस्तु पूजयेत् ।
आषाढे मासि राजेन्द्र यः कुर्य्यान्नक्तभोजनम् ।
भुञ्जानः खण्डखाद्यानि पायसं च नराधिप ॥
उपवासपरो भक्त्या नवम्यां पक्षयोर्द्वयोः ।
पूजयेच्छ्रद्धया दुर्गामैन्द्रीनाम्ना तु नामतः ॥
ऐरावणगतिं शुभ्रां श्वेतरूपेण पक्षिणीं ।
कृत्वा स्वर्णमयीं भक्त्या नानानयनभूषितां ॥
नानापुष्पविशेषैस्तु भक्ष्यैर्नानाविधैस्तथा ।
यक्षकर्दमगन्धैश्च धूपैः सागरुचन्दनैः ।
एवं संपूज्य इन्द्राणीं कुमारीं भोजयेत्ततः ॥
स्त्रियो विप्रान् यथा भक्त्या ततो भुञ्जीत वाग्यतः ।
पञ्चगव्यकृतस्नातः पञ्चगव्यकृताशनः ॥
ध्यायमानस्तथाचैन्द्रीं स्वयं भूमौ नराधिप ।
य एवं पूजयेत् दुर्गां भक्त्या श्रद्धासमन्वितः ॥
उपवासपरो वीर नवम्यां पक्षयोर्द्वयोः ।
पूजयेद् ब्राह्मणं भक्त्या श्रद्धया चण्डिकां नृप ॥

---

* शाल्युत्तमभक्ष्योपेतमिति पुस्तकान्तरे पाठः ।

† अत्र ब्रह्माणीं मन्त्ररूपिणीं पद्मपत्रेक्षणां भक्त्या नलिनैर्विविधैरपीति पुस्तकान्तरे पाठोऽस्ति ।

कौमारीमिति वै नाम्ना नामतः पूजयेत्सदा।
कृत्वा रौप्यमयीं भक्त्या योगं वै पापनाशिनीं॥
करवीरैस्तु पुष्पैस्तु गन्धैश्चागरुचन्दनैः।
नरो भाद्रपदे मासि यः कुर्यान्नक्तभोजनं॥
भुञ्जानः पायसं वीर कालशाकञ्च श्रद्धया।
उपवासपरोनित्यं नवम्यां पक्षयोर्द्वयोः॥
पूजयेद्वैष्णवीं भक्त्या शङ्खचक्रासिधारिणीम्।
जातीपुष्पैर्महावाहो गन्धैः श्रीखण्डमिश्रितैः॥
श्रीखण्डागुरुकर्पूरैः सिह्लकेन च धूपयेत्।
नैवेद्यं पायसं युक्तं यथाशक्त्या निवेदयेत्॥
मांसेन प्रीणनं तस्या स्ततः पूज्याश्च कन्यकाः।
गोसहस्त्राश्च विधिवत् ततो भुञ्जीत वाग्यतः॥
प्रीणयित्वा द्विजान् शक्त्या योषितश्च नराधिप।
य एवं पूजयेद्भक्त्या वैष्णवीं सततं नृप॥
विमानवरमारूढ़ो विष्णुलोके महीयते।
राजन्नश्वयुजे मासि यः कुर्यान्नक्तभोजनम्॥
गुड़ोदनं प्रभुञ्जानोजितात्मा संयतेन्द्रियः।
उपवासपरोभूत्वा नवम्यां पक्षयोर्द्वयोः।
माहेश्वरीं पूजयेच्च कृत्वा रौप्यमयीं शुभां॥
वृषभञ्च तथा वीर श्वेतपुष्पोपलेपनैः।
धूपञ्च महाङ्गेन खण्डखाद्यादिभोजनैः॥
अजानां महिषाणाञ्च मेषाणाञ्च यथावधात्।
प्रीणयेत् विधिवद्देवीं मांसप्रोषितपायसैः॥

कुमारीं भोजयेद्भक्त्या ब्राह्मणान् योषितस्तथा ।
भक्ष्यभोज्यैरनेकैश्च समांसैर्विविधैर्नृप ।
अश्वमेधसहस्रस्य फलं प्राप्य दिवं व्रजेत् ॥
द्विजेन्द्रप्रभया तुल्यः कान्त्या पुण्यायुधस्य च ।
पुष्पकं यानमारुह्योमोदते शाश्वतीः समाः ॥
कार्त्तिके मासि राजेन्द्र यः कुर्य्यान्नक्तभोजनम् ।
क्षीरोदनन्तु भुञ्जानः सत्यवादी जितेन्द्रियः ॥
यवान्नं पयसा युक्तं भुञ्जानः संयतेन्द्रियः ।
पूजयेच्छ्रद्धया देवीं वाराहीं चक्रधारिणीम् ॥
शतपत्रस्रजाभिश्च कुङ्कुमेन विलेपयेत् ।
कृष्णागरुं सिल्हकञ्च धूपं देव्यै निवेदयेत् ॥
नैवेद्यं खण्डवेष्टांस्तु नवम्यां पक्षयोर्द्वयोः ।
एवं संपूज्य वाराहीं कुमारीं भोजयेत्ततः ॥
ब्राह्मणांश्च तथा शक्त्या ततो भुञ्जीत वाग्यतः ।
प्राशयित्वा तिलान्क्षीरं दत्त्वा हुत्वा च शक्तितः ॥
एवं संपूजयित्वा तु वाराहीं स्वर्गमाप्नुयात् ।
क्रीडते विष्णुना सार्द्धं क्रीडमानैः सुरासुरैः ॥
पुनरेत्य भुवं राजा सार्व्वभौमोभवेन्नृप ।
राजन् मार्गशिरे मासि यः कुर्य्यान्नक्तभोजनम् ॥
भुञ्जानः शष्कुलीं नित्यं जितात्मा च जितेन्द्रियः ।
पूजयेद्विधिवद्भक्त्या चामुण्डां मुण्डनाशनीं ॥
नीलोत्पलैस्तथा पद्मैर्विल्वपत्रैः कदम्बकैः ।
चन्दनागुरुकर्पूरगुग्गुलेन तथा नृपः ॥

भक्ष्यैर्भोज्यै रनेकैश्च सुरामांसैरनेकशः।
रुधिरेण तथा वीर शिरोभिर्विविधैर्नृप॥
गजाविमहिषाणां च स्वदेहस्य च भेदनात्।
नवम्यां विधिवद्भक्त्या पञ्चयोरुभयोरपि॥
कुमारीर्भोजयेच्चापि ब्राह्मणान् योषितस्तथा।
पञ्चगव्यकृतस्नातः सम्यक् प्राश्य विधानतः॥
ततो भुञ्जीत राजेन्द्र भूमिं कृत्वा तु भाजनं।
य एवं पूजयेत् भक्त्या चामुण्डां सततं नरः।
स याति परमं स्थानं यत्र सा परमा कला।
सौवर्णं यानमारुह्य ध्वजमालाकृतं शुभम्॥
मोदते दैवतैः सार्द्धं यावदिन्द्राश्चतुर्दश।
पुनरेत्य महीं वीर राजा भवति भूतले॥
प्रभया भृगुसङ्काशस्तेजसा रविसन्निभः।
कान्त्या चन्द्रसमोवीर युद्धे चेन्द्रसमो भवेत्॥
रुचा यमसमोवीर बुद्ध्या धिषणशुक्रयोः।

इति भविष्यत्पुराणोक्तं उभयनवमीव्रतम्।

अथ नामनवमीव्रतम्।

———000———

सुमन्तुरुवाच।

नवम्यां शुक्लपक्षे तु कृते नक्ते विशेषतः।
मासि चाश्वयुजे वीर दुर्गादेवीति पूजयेत्॥
विल्वपत्रैस्तथाद्भिश्च द्रोणपुष्पैस्तु सर्व्वशः।

गुग्गुलेनाथ दग्धेन भक्ष्यभोज्यैरनेकशः॥
परमान्नेन रक्तेन अजमहिषैर्विघातितैः।
सम्प्रीणनं तथा कुर्य्याद्देव्या वै भक्तिमाचरन्।
भोजयित्वा नवम्यां तु ब्राह्मणानां तु कन्यकाः।
ब्राह्मणानां क्षत्त्रियस्य यथा भवति शक्तितः॥
पञ्चगव्यं ततः प्राश्य नक्तं भुञ्जीत वाग्यतः।
य एवं पूजयेदत्र दुर्गां भक्त्या समन्वितः॥
सोऽश्वमेधसहस्रस्य फलं प्राप्य दिवं व्रजेत्।
कार्य्यमाश्विनवत्सर्व्वं कार्त्तिकेऽपि हि सत्तम॥
कृत्वोपवासमष्टम्यां मासि मार्गशिरे नृप।
नवम्यां पूजयेद्यस्तु शक्त्या भगवतीं बुधः॥
नाम्ना भगवतीत्येवं जातीपुष्पैर्नराधिप।
कर्पूरागरुधूपेन मधुना पायसेन च॥
भोजयित्वा कुमारीश्च स्त्रियोविप्रांश्च शक्तितः।
गोमयं प्राश्य विधिवत्ततोभुञ्जीत वाग्यतः॥
य एवं पूजयेद्भक्त्या नरोभगवतीं नृप।
राजसूयफलं प्राप्य ततः शिवपुरं व्रजेत्॥
पुष्येप्येवं महाबाहो नवम्यां संजितेन्द्रियः।
पूजयेत्त्र्यम्बकाञ्चैव नाम्ना तात नरः शिवां॥
करवीरस्य पुष्पेण कुङ्कुमेन तु केसरैः।
निवेद्य सिह्लकं धूपं नैवेद्यं मांसपूरिकम्॥
पूजयेद्विप्रकन्याश्च स्त्रियोविप्रांश्च शक्तितः।
विधिवत् प्राश्य गोमूत्रं ततो भुञ्जीत वाग्यतः॥

य एवं पूजयेन्मर्त्यो वाजपेयशतं लभेत्।
माघे शुक्लनवम्याञ्च पूजयेच्चण्डिकां बुधः॥
सर्व्वमङ्गलनामाख्यां यूथिकाकुसुमैर्नृप।
प्रबोधाख्येन धूपेन अथवा गुग्गुलेन च॥
नैवेद्यञ्चैव पूपाश्च मत्स्यमांसञ्च भारत।
पूजयित्वा नरो ह्येवं विधिवत्सर्व्वमङ्गलां॥
कुमारीर्भोजयेत्पश्चात् प्रीयतां सर्व्वमङ्गला।
गोधूमानां* शतं लब्ध्वा गोलोके च महीयते॥
फाल्गुने मासि राजेन्द्र चण्डिकेति सदार्च्चयेत्।
नाम्ना भगवतीं देवीं कुन्दपुष्पेण पूजयेत्॥
धूपेनागरुणा वीर सिह्लकेनापि वार्च्चयेत्।
नैवेद्यं मोदकान् दद्यान्मधुमांसम्पयस्तथा॥
गोक्षीरप्राशनात्पूतः पूतोभुञ्जीत वाग्यतः।
पूर्व्वोक्तान् भोजयित्वा च यथा शक्त्या विधानतः॥
एवं सम्पूज्य विधिवच्चण्डिकां मुण्डमण्डनां।
अग्निष्टोमस्य यज्ञस्य फलं शतगुणं भवेत्॥
चैत्रे मासि महाबाहो आर्य्या भगवती स्मृता॥
पूजयेद्विधिवद्भक्त्या पुष्पैर्मुद्गरकस्य च।
धूपेनागरुमिश्रेण सिह्लकेनापि चार्च्चयेत्॥
धूपेन कुसुमौघेन कासारेण च पूजयेत्।
वैशाखे मासि राजेन्द्र नाम्ना भगवतीं यजेत्॥
प्राशयेत् पुष्पतोयन्तु ततो भुञ्जीत वाग्यतः।

---

* गोमेधानामिति पुस्तकान्तरे पाठः।

कुमारीर्भोजयेद्भक्त्या पालाशकुसुमैरिमम्।
धूपं कृत्वागुरुश्चैव नैवेद्यं घृतपूपकान्॥
ज्येष्ठेमासि नृपश्रेष्ठ पूजयेदम्बिकामुमां।
कुशपुष्पोदकं प्राश्य ततोभुञ्जीत वाग्यतः॥
कुमारीर्योषितोविप्रान् पूजयेद्विधिवन्नृप।
यूथिकाकुसुमैर्भक्त्या धूपेनाशबलेनच॥
शाल्योदरजलाजाश्च* श्रियै नैवेद्यमादिशेत्।
एवं पूज्य श्रियं देवीं विष्णुलोके महीयते।
आषाढ़े शुक्लपक्षस्य नवम्यां पूजयेदुमां॥
कर्णमोटीति नाम्नो तु लम्बकर्णी प्रकीर्त्तिता।
शमीपत्रकदम्बैस्तु पूजयेद्विधिवन्नृप॥
कर्पूरागरुमिश्रेण धूपेन च कपालिनां।
पूजयित्वा भगवतीं कुमारीं भोजयेत्ततः॥
स्त्रियश्चापि यथा शक्त्या ब्राह्मणांश्च नराधिप।
शमीपत्रं ततः प्राश्य ततो भुञ्जीत वाग्यतः॥
एवं पूज्य महाकालीं राजसूयफलं लभेत्।
श्रावणे मासि राजेन्द्र नवम्याञ्चण्डमर्द्दिनीम्॥
नारायणीति वै नाम्ना पूजयेत् सततम्बुधः।
रक्तोत्पलैः सबकुलैः सकदम्बैस्तथा नृप॥
सघृतं गुग्गुलं धूपं नैवेद्यं घृतपायसम्।
एवं सम्पूज्य विधिवत् कुमारीर्भोजयेत्ततः॥
योषितश्च तथा विप्रान् शक्त्या च विधिवन्नृप।

---

* गान्धोदरमालाक्षांश्चेति पुस्तकान्तरे पाठः।

भोजयित्वा घृतं प्राश्य नवम्यां विधिवन्नृप ॥
एवं सम्पूजयेद्देवीं स गच्छेत् परमम्पदम्।
मासि भाद्रपदे शुक्ले नवम्यां चन्द्रिकां सदा ॥
महानन्देति वै नाम्ना पूजयेद्विधिवन्नृप।
श्वेतरक्तैस्तथा पीतैः सर्वपुष्पैश्च भारत ॥
कर्पूरागरुधूपेन गुग्गुलेन विशेषत.।
भक्ष्यभोज्यैरनेकैश्च मोदकैर्लोपिकादिभिः ॥
एवं सम्पूज्य विधिवन्महादेवीं नराधिप।

लोपिका गोधूमचूर्णपिण्डिका ॥

कुमारीर्भोजयेद्भक्त्या योषितो ब्राह्मणांस्तथा।
भोजयित्वा ततोबिल्वं प्राशयेत् कायशोधनम् ॥
भूमिं तु भाजनं कृत्वा ततो भुञ्जीत वाग्यमः।
एवं त्रिः पूजयित्वा वै ब्रह्मलोके महीयते ॥
वर्षान्ते भोजयेद्विप्रान् दुर्गाभक्तिपरायणान्।
पायसं मधुसंयुक्तं घृतेनच पवित्रकम् ॥
कुमारीः पूजयित्वा तु दद्याच्चाच षडङ्गिनीम्।
कपिलां कुरुशार्दूल शीलयुक्तां पयस्विनीम् ॥

षडङ्गिनीरुक्ता।

करोति वै वर्षमेकन्नैरन्तर्येण योनरः।
नामाख्यनवमीं भक्त्या तस्य पुण्यफलं शृणु ॥
सर्व्वपाप बिनिर्मुक्तः सर्वैश्वर्य्यसमन्वितः।
वसेद्दुर्गापुरन्नित्यं नवेहायाति वा पुनः।
य एवं कुरुते पुण्यां नवमीं नामसंज्ञिकां ॥

स हि कामानवाप्याथ ब्रह्मलोके महीयते ।
अपुत्रो लभते पुत्रान् निर्द्धनश्च धनं लभेत् ॥
कन्यार्थी लभते कन्यां यशोऽर्थी लभते यशः ।

इति भविष्यत्पुराणोक्तं नामनवमीव्रतम् ।

अथ रूपनवमीव्रतम् ।

———000———

सुमन्तुरुवाच ।

शूलं पिष्टमयं कृत्वा मार्गे मासि नराधिप ।
कृत्वा सुराजतं पद्मं सौवर्णं कृतकर्णिकम् ॥
निवेद्य श्रद्धया वीर भगवत्यै प्रपूजितम् ।
कामतोऽपि कृतं पापं भ्रूणहत्यादि यद्भवेत् ॥
तत् सर्व्वं शूलदानेन देवी नाशयति ध्रुवम् ।
विमानवरमारूढो देवगन्धर्व्वपूजितः ॥
कल्पकोटिशतं साग्रं दुर्गालोके महीयते ।
चण्डिकाप्रीतिमाप्नोति यदिच्छेद्विपुलां श्रियम्* ॥
पौषे मासि महाबाहो चतुर्दन्तं गजं शुभम् ।
कृत्वा रुक्ममयं भक्त्या न्यस्य पात्रे हिरण्मये ॥
इन्द्राण्यै विधिवद्दद्यान्नानामणिविभूषितं ।
एवं पूजयते भक्त्या इन्द्राणीं विधिवत्ततः ॥
स ऐरावतमारूढः सोमलोके महीयते ।
वर्षकोटिशतं साग्रं देवगन्धर्व्वपूजितं ॥
माघे कृत्वा तु वै मेषं सर्व्वंसौवर्णमुत्तमं ।

---

* यत्र यायच्छतेनृपद्रति पुस्तकान्तरे पाठः ।

कृत्वा रुक्ममये पात्रे स्वाहायै विनिवेदयेत् ॥
भक्तगन्धैः* समायुक्तं नानापुष्पोपशोभितं।
विनिवेद्य नरोभक्त्या अग्निलोके महीयते ॥
दिव्यं विमानमारूढ़ोध्वजमालाकुलं शुभम्।
पुनरेत्य महीं राजा मण्डलाधिपतिर्भवेत् ॥
मयूरं फाल्गुने मासि कृत्वा पिष्टमयं नृप।
गन्धमाल्यैरलङ्कृत्य कुमार्य्यै विनिवेदयेत् ॥
निवेद्य विधिवद्भक्त्या विमानवरमास्थितः।
क्रीड़ते देवगन्धर्व्वैर्गुहेनच महात्मना ॥
चैत्रे मासि महावाहोगरुडं पिष्टजं कृतम्।
संपूजयित्वा विधिवद्वैष्णव्यै विनिवेदयेत् ॥
स्रजाभिर्विविधै वीर गन्धमाल्यैश्च शोभितं।
तं निवेद्य महाबाहो विष्णुलोके महीयते।
चित्रं यानं समारुह्य नानावीदकदम्बकैः ॥
वर्षकोटिशतं साग्रं ज्वलन्निव सुतेजसा।
कृत्वामणिमयं वीर वाराहं लोकपूजितं ॥
गन्धमाल्योपहारैस्तु पूजयित्वा विधानतः।
चित्रैस्तु कुसुमैरेव गुग्गुलेन सुगन्धिना।
चामुण्डायेति नैवेद्यैर्हविष्यान्नैर्लभेत् फलम्।
प्रयाति च परं लोकं यत्र सा चण्डिका स्थिता ॥
पलायते च चौरादि सर्व्वशत्रुभयङ्करः।
कृत्वा पिष्टमयं ज्येष्ठे कच्छपं रत्नभूषितम् ॥

---

* नानागन्धैः समायुक्तमिति पुस्तकान्तरे पाठः।

भूषयित्वा रजोभिश्च पुष्पाणां चन्दनेन च।
निवेद्य भक्त्या वारुण्यै रुद्रलोके महीयते॥
शङ्खकुन्देन्दुसङ्काशं विमानवरमातरेत्।
वर्षकोटिशतं साग्रं क्रीडयित्वा नराधिप॥
पुनरेत्य महाराजो मण्डलाधिपतिर्भवेत्।
कृत्वा मृगं पिष्टमयं आषाढे रत्नभूषितम्।
स्वर्णशृङ्गं रौप्यखुरं वायव्यै विनिवेदयेत्॥
पूजयित्वा सुविधिवत् पुष्पधूपविलेपनैः।
नैवेद्येन महाबाहो वायुलोके महीयते॥
नरयानं* पिष्टमयं कृत्वा राजन् सुशोभितं।
अनेकावरकोपेतं श्रावणे मासि भूपते॥
पुष्पमाल्याकुलं दिव्यं ध्वजमालाकुलं तथा।
गन्धपुष्पोपहारैश्च पूजयित्वा विधानतः॥
कौबेर्य्यै विनिवेद्येह अश्वमेधफलं लभेत्।
प्रयाति परमं स्थानं दुर्गालोके महीयते॥
कृत्वा भाद्रपदे मासि सर्व्वहेममयं विभो।
महिषं दिव्यसंस्थानं गन्धमाल्योपशोभितम्॥
याम्यै निवेदयेद्भक्त्या भगवत्यै विधानतः।
एकं निवेदयेद्भक्त्या सूर्य्यलोके महीयते।
तथा चाश्वयुजे मासि भगवत्यै विधानतः॥
सुस्निग्धैश्चैव गोधूमैर्भक्ष्यभोज्यैरनेकशः।
नानावस्त्रसमायुक्तं कृत्वा पुष्पमयं द्विज॥

---

* नरवाहणमिति पुस्तकान्तरे पाठः।

विचित्रयानमारूढो रुद्रलोके महीयते।
वर्षकोटिशतं साग्रं क्रीडयित्वा गणैः सह॥
क्रमादागत्य लोकेऽस्मिन् प्राज्ञो भवति भूतले।
सप्तधातुसमायुक्तं सर्व्वबीजरसादिभिः॥
वाहुले वहुलं वीर वितानच्छत्रशोभितम्।

वाहुले कार्त्तिके

गन्धमाल्यैश्च बहुभिः पूजिते च तथा शुचिः।
कृत्वा रुक्ममयं शक्त्या विधिवच्चन्द्रमण्डलं।
सुवर्णं मणिमुक्ताढ्यं रोहिण्यां विनिवेदयेत्॥
य एवं कुरुते भक्त्या तस्य पुण्यफलं शृणु।
वेदान्तेषु च यत् पुण्यं कथितं मुनिभिः पुरा॥
तत् पुण्यं कोटिगुणितं प्राप्नुयान्नात्र संशयः।
स याति परमं स्थानं चण्डिका वरदा यतः*॥
देवदानवगन्धर्व्वैः स्तूयमानो गणादिभिः।
कल्पकोटिशतं साग्रं क्रीडते सह दैवतैः॥
चन्द्रलोकादिलोकेषु भोगान् भुक्त्वा यथेप्सितान्।
पुण्यक्षयादिहागत्य राजा भवति भूतले॥
सुरूपः सुभगो नित्यं चन्द्रिकावरदानतः।
कल्पकोटिं समुद्दिश्य नरनारीनपुंसकः।
भगवत्यै गृहं दत्त्वा सर्व्वान् कामानवाप्नुयात्॥
य एवं कुरुते नक्तमेकभक्तमथापि वा।

---

* चण्डिकास्थितेति पुस्तकान्तरे पाठः।

नवम्यामुपवासन्तु कुर्व्वाणो विधिवन्नृप ॥
रूपाणि यच्छमानस्तु पूर्व्वोक्तानि नराधिप ।
अश्वमेधसहस्रस्य राजसूयशतस्य च ॥
लब्ध्वा फलं महाबाहो ब्रह्मलोके महीयते ।
कल्पकोटिसहस्राणि पूज्यमानः सुरासुरैः ॥
पुण्यक्षयादिहागत्य पुनरेव महीपतिः ।
राजा भवति दुर्द्धर्षः सप्तद्वीपाधिपो नृप ॥

इति भविष्यत्पुराणोक्तं रूपनवमीव्रतम् ।

अथ वरव्रतम् ।

———ooo———

सुमन्तुरुवाच ।

नवम्यां नववर्षाणि राजन् पिष्टाशनो भवेत् ।
तस्य तुष्टा भवेद्देवी सर्व्वकामफलप्रदा ॥
अग्निपक्वमभुञ्जानो यावज्जीवं व्रती भवेत् ।
इह चामुत्र वरदा तस्यानन्तफलं ददेत् ॥

इति भविष्यत्पुराणोक्तं वरव्रतम् ।

अथ दुर्गानवमीव्रतम् ।

———ooo———

सुमन्तुरुवाच ।

नवम्यां तु सिते पक्षे नियतः संजितेन्द्रियः ।
मासि चाश्वयुजे वीर कार्त्तिके कार्त्तिकोत्तरे ॥

कार्त्तिकोत्तरे मार्गशीर्षे ।

पुष्ये च पूजयेद्दुर्गां जातिपुष्पैर्विधानतः ।
धूपार्थं गुग्गुलं दद्यान्नैवेद्यं गुडपूपकान् ॥
दुर्गेति नाम जप्तव्यं प्रयतोऽष्टशतं नृप ।
माघे च फाल्गुने मासि चैत्रे चैत्रोत्तरे नृप ॥
शुक्लपक्षे तु अष्टम्यामुपवासपरायणः ॥

चैत्रोत्तरे, वैशाखे ।

मालतीकरवीरेण बिल्वपत्रैश्च पूजयेत् ।
धूपेनागरुकर्पूरसिह्लकैर्वृषणेन च ॥

सिह्लकस्तुरुस्कः ।

वृषणं कस्तूरिका ।

नैवेद्यं पायसम्मांसम्मङ्गलायै निवेदयेत् ।
सर्व्वमङ्गलइत्येवं जप्तव्यन्नाम भारत ।
ज्येष्ठे मासे तथाषाढे श्रावणे श्रावणोत्तरे ॥

श्रावणोत्तरे भाद्रे ।

चण्डिकां पूजयेत् भाद्रे चण्डमुण्डप्रणाशिनीम् ।
बिल्वपत्रैर्मुहुरकैः शातपत्रिकया तथा ॥
प्रबोधेनैव धूपेन नैवेद्यं मोदकान्यसेत् ।
स्वमेकमेकं यस्त्वेवं पूजयेदम्बिकां नरः ॥
नवम्यां शुक्लपक्षे तु सोपवासो जितेन्द्रियः ।
अश्वमेधसहस्रस्य राजसूयशतस्य च ॥

फलमाप्नोति राजेन्द्र सूर्य्यलोकञ्च गच्छति ।
विमानं दिव्यमारूढ़ः सौवर्णकिङ्किणीचितं ॥
क्रीड़ित्वेवं महाराजश्चासौ भवति भूतले ।
प्रथमे पारणे दुर्गा द्वितीये सर्व्वमङ्गला ।
तृतीये चण्डिका प्रोक्ता राजन् भगवती बुध ॥
प्रथमं पञ्चगव्यञ्च स्नानप्राशनयोर्म्मतं ।
द्वितीयं बिल्वपत्रैश्च तृतीयं मधुसर्पिषा ॥
मासि मासि महाबाहो कुमारीर्ब्राह्मणान् नृप ।
स्वशक्त्या भोजयेद्राजन् भक्ष्यभोज्यैरनेकशः ॥
पारणान्ते महाभोज्यं कर्त्तव्यं विधिवन्नृप ।
गन्धपुष्पोपहारैश्च चण्डिकां पूजयेत्ततः ॥
नानाप्रेक्षणकैर्व्वीर ब्राह्मणानाञ्च तर्पणैः ।
एवमेकं समेकन्तु सुव्रतेनार्च्चयेन्नरः ॥
महानवमीसंज्ञेन दुर्गाभक्तान् नराधिप ।
स याति परमं स्थानं विमानवरमास्थितः ॥
यत्र साक्षाद्भगवती पूज्या मान्य तिलैरसैः ॥

इति भविष्यत्पुराणोक्तं दुर्गानवमीव्रतम् ।

अथ गोपालनवमीव्रतम् ।

———000———

अतः परं त्वञ्च कृष्ण नवमी व्रतमुत्तमम् ।
माङ्गल्यं परमं त्राणं सर्व्वपापप्रणाशनम् ॥
तथा समुद्रगामिन्यां नवम्यां स्नानमाचरेत् ॥

शुचौ तत्पुलिने तीरे सिकताभिः समलङ्कृते।
वसुदेवसुतं विष्णुं गोपीगणनिषेवितम्॥
वनमालाचितोरस्कं वन्यपुष्पैरलङ्कृतम्।
बर्हिचयकृतापीडं पीतकौशेयवाससम्॥
समानवेषैरतुलैःक्रीड़द्भिरितरेतरं।
वृतं गोपकुमारैश्च नीलाकुञ्चितमूर्द्धजम्॥
ध्यात्वा देवं परं विष्णुं सर्वलोकेश्वरेश्वरम्।
वन्यपुष्पैश्च वहुभिः पायसेन समर्च्चयेत्॥
फलमूलैश्च गन्धाद्यैः शुचिभिश्च यथाविधि।
सुभगं पतिमिच्छन्ती कन्यका शृणुयात् व्रतम्॥
गोपीजनमनःकान्त गोविन्दगरुडध्वजः।
वरं प्रयच्छ सुभगं सुवेषं दयितं मम॥
ततस्तु सर्पिषा पूर्णं हरिद्राचूर्णपूरितम्।
कुलाङ्गनाभ्यस्तु दद्यात् पात्रं वीजप्रपूरितम्॥
गुरवे च वरं दद्यात्तथा व्राह्मणतर्पणम्।
एवमभ्यञ्जनं नाम नवमीव्रतमुत्तमं॥
एवं स्वस्त्ययनं स्त्रीणां उक्तं सर्व्वसुखप्रदं।
भ्राता पिता च कन्यार्थी व्रतमेतत्समाचरेत्॥
अङ्गनानां व्रतञ्चैव अर्चनीयः स्त्रियः पतिः।
पतिर्व्विश्वस्य भगवान् सर्व्वान् कामान् प्रवर्षति॥
यं यं कामयते कश्चित् सिद्धिर्भवति तस्य तं।
अलं ददाति भगवान् अर्चितः किमुयोषितः॥
परिपूर्णो हि भगवान् स्निग्धे यत्किञ्चिदीहितं।

साक्षादेव ददात्येते तेभ्यः प्रीतो दर्दत्फलं* ॥

इति गारुडपुराणोक्तं गोपालनवमीव्रतम् ।

अथ रामनवमीव्रतम् ।

———000———

अगस्त्य उवाच ।

सर्व्वानुष्ठानसारन्ते सर्व्वदानोत्तमोत्तमं ।
रहस्यं कथयिष्यामि सुतीक्ष्णं शृणु सत्तम ॥
चैत्रे नवम्यां प्राक्पक्षे दिवा पुष्ये पुनर्व्वसौ ।
उदये गुरुगौरांश्वोः स्वोच्चस्थे ग्रहपञ्चके ॥
मेषे पूषणि सम्प्राप्ते लग्ने कर्कटकाह्वये ।
आविरासीत्सकलया कौशल्यायां परः पुमान् ॥
तस्मिन् दिने तु कर्त्तव्यमुपवासव्रतं सदा ।
तत्र जागरणं कुर्य्याद्रघुनाथपरोभुवि ॥
प्रातर्द्दशम्यां कृत्वा तु सन्ध्याद्याः कालिकीः क्रियाः ।
संपूज्य विधिवद्रामं भक्त्या वित्तानुसारतः ॥
ब्राह्मणान् भोजयेद्भक्त्या दक्षिणाभिश्च तोषयेत् ।
गोभूतिलहिरण्याद्यैर्व्वस्त्रालङ्करणैस्तथा ॥
रामभक्तान् प्रयत्नेन प्रीणयेत्परया मुदा ।
एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम् ॥
अनेकजन्मसिद्धानि पातकानि बहून्यपि ।
भस्मी कृत्य व्रजन्त्येव तद्विष्णोः परमं पदं ॥

---

* साक्षादेवतथादन्तेदृमि पुस्तकान्तरे पाठः ।

सर्व्वेषामप्ययन्धर्म्मोभुक्ति मुक्त्यैकसाधनम्।
अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमम्॥
पूज्यः स्यात् सर्व्वभूतानां यथा रामस्तथैव सः।
यस्तु रामनवम्यान्तु भुङ्क्ते स च नराधमः॥
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः।
अकृत्वा रामनवमीव्रतं सर्व्वव्रतोत्तमं।
व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत्॥
रहस्यकृतपापानि प्रख्यातानि बहून्यपि।
महान्ति च प्रणश्यन्ति श्रीरामनवमीव्रतम्॥
एकामपि नरोभक्त्या श्रीरामनवमीं मुने।
उपोष्य कृतकृत्यः स्यात् सर्व्वपापैः प्रमुच्यते॥
नरोरामनवम्यां तु श्रीरामप्रतिमाप्रदः।
विधानेन मुनिश्रेष्ठ स मुक्तो नात्र संशयः॥

सुमन्तुरुवाच।

श्रीरामप्रतिमादानविधानं वा कथं मुने।
कथय त्वच्चरामेपि भक्तस्य मम विस्तरात्॥

अगस्त्य उवाच।

कथयिष्यामि तद्धि श्रीप्रतिमादानमुत्तमं।
विधानञ्चापि यत्नेन यतस्त्वं वैष्णवोत्तमः॥
अष्टम्यां चैव मासेषु शुक्लपक्षे जितेन्द्रियः।
दन्तधावनपूर्व्वन्तु प्रातस्नायाद्यथाविधि॥
नद्यां तड़ागे कूपे वा ह्रदे प्रस्रवणेऽपि वा।

ततः सन्ध्यादिकाः कार्य्याः संस्मरन् राघवं हृदि ॥
गृहमासाद्य विप्रेन्द्र कुर्य्यादौपासनादिकम् ।
दानं कुटुम्बिनं विप्रं वेदशास्त्रपरं सदा ॥
श्रीरामपूजानिरतं सुशीलं दम्भवर्जितम् ।
विधिज्ञं राममन्त्राणां राममन्त्रैकसाधनम् ॥
आहूय भक्त्या संपूज्य वृणुयात् प्रार्थयन्निति ।
श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम ॥
मक्त्या चार्य्य भव प्रीतः श्रीरामोऽसि त्वमेव च ।
इत्युक्त्वा पूज्य विप्रं तं स्नापयित्वा ततः परं ॥
तैलेनाभ्यज्य वस्त्राद्यान् चिन्तयन् राघवं हृदि ।
श्वेताम्बरधरः श्वेतगन्धमाल्यानि धारयेत् ॥
अर्चितो भूषितश्चैवं कृतमाध्याह्निकक्रियः ।
आचार्य्यं भोजयेद्भक्त्या सात्विकान्नैः सुविस्तरं ॥
भुञ्जीत स्वयमप्येवं हृदि राममनुस्मरन् ।
एकभक्तव्रती तत्र सहाचार्य्यो जितेन्द्रियः ॥
शृण्वन् रामकथां दिव्यामहःशेषं नयेत् सुते ।
सायंसन्ध्यादिकाः कुर्य्या क्रिया राममनुस्मरन् ॥
आचार्य्यसहितोरात्रावधःशायी जितेन्द्रियः ।
वसेत् स्वयं नचैकान्ते श्रीरामार्पितमानसः ॥
ततः प्रातः समुत्थाय स्नात्वा सन्ध्यां यथाविधि ।
प्रातः सर्व्वाणि कर्म्माणि शीघ्रमेव समापयेत् ॥
ततः स्वस्थमना भूत्वा विद्वद्भिः सहितोऽनघः ।
स्वगृहे चोत्तरे देशे दानस्योज्ज्वलमण्डपं ॥

चतुर्द्वारं पताकाढ्यं सवितानं सतोरणम् ।
मनोमयं महोत्सेधं पुष्पाद्यैः समलङ्कृतम् ॥
शङ्खचक्रहनूमद्भिः प्राग्द्वारे समलङ्कृतम् ।
गरुत्मत् शार्ङ्गवाणैश्च दक्षिणं समलङ्कृतं ॥
गदाखड्गाङ्गदैश्चैव पश्चिमेषु विभूषितं ।
पद्मस्वस्तिकनीलैश्च कौवेरे समलङ्कृतं ॥
मध्ये हस्तचतुष्काढ्यां वेदिकायुक्तमायतं ।
पवित्रनृत्यगीतैश्च वाद्यैश्चापि सुसंयुतम् ॥
पुण्याहं वाचयेत्तत्र विद्वद्भिः प्रीतमानसः ।
ततः संकल्पये देवं राममेव स्मरन्मुने ॥
अस्यां रामनवम्याञ्च रामाराधनतत्परः ।
उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि ।
इमां स्वर्णमयीं राम प्रतिमाञ्च प्रयत्नतः ॥
श्रीरामप्रीतये दास्ये रामभक्ताय विधीयते ।
प्रीतोरामहरत्वाशु पापानि सुबहूनि मे ॥
अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च ।
ततः स्वर्णमयीं रामप्रतिमां पलमात्रतः ।
निर्म्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीं ॥
बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामुने ।
वामे नाधःकरेणाव देवीमालिङ्ग्य संस्थितां ॥
सिंहासने राजवेतं पलद्वयविनिर्म्मितं ॥
पञ्चामृतस्नानपूर्व्वं संपूज्य विधिवत्ततम् ।
मूलमन्त्रेण नियतोन्यासपूर्व्वमतन्द्रितः ॥

दिवैवं विधिवत् कृत्वा रात्रौ जागरणं ततः ।
दिव्यां रामकथां कृत्वा रामभक्तैः समन्वितः ॥
नृत्यगीतादिभिश्चैव रामस्तोत्रैरनेकधा ।
रामाष्टकं तथाध्याप्य गन्धपुष्पाक्षतादिभिः ॥
कर्पूरागरुकस्तूरीकह्लाराद्यैरनेकशः ।
पूजयन् विधिवद्भक्त्या दिवारात्रं नयेद्बुधः ॥
ततः प्रातः समुत्थाय स्नानसन्ध्यादिकाः क्रियाः ।
समाप्य विधिवद्रामं पूजयेत् विधिवन्मुने ॥
ततो होमं प्रकुर्व्वीत मूलमन्त्रेण मन्त्रवित् ।
पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा समाहितः ॥
लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः ।
साज्येन पायसेनैव स्मरन् राममनन्यधीः ॥
ततोभक्त्या सुसम्पाद्य आचार्य्यं पूजयेन्मुने ।
कुण्डलाभ्यां सरत्नाभ्यामङ्गुलीयैरनेकधा ॥
गन्धपुष्पाक्षतैर्वस्त्रैर्विविधैः सुमनोहरैः ।
ततोरामं स्मरन् दद्यादेवं मन्त्रमुदीरयेत् ॥
इमां स्वर्णमयीं राम प्रतिमां समलङ्कृतां ।
चित्रवस्त्रयुगच्छन्नां रामाहं राघवाद्य ते ॥
श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ।
इति दत्त्वा विधानेन दद्याद्वै दक्षिणां ध्रुवं ॥
अन्येभ्यश्च यथान्यायङ्गोहिरण्यादि शक्तितः ।
दद्याद्दासीयुगन्धान्यं यथाविभवमादृतः ॥

ब्राह्मणैः सह भुञ्जीत तेभ्यो दद्याच्च दक्षिणां।
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः।
तुलापुरुषदानादिफलं प्राप्नोति सुव्रत।
अनेकजन्मसंसिद्धपापेभ्यो मुच्यते ध्रुवम्॥
बहुना किमिहोक्तेन मुक्तिस्तस्य करे स्थिता।
कुरुक्षेत्रे महापुण्ये सूर्य्यपर्व्वण्यशेषतः॥
तुलापुरुषदानाद्यैः कृतैर्यल्लभ्यते फलम्।
तत्फलं लभते मर्त्त्यो दानेनानेन सुव्रत॥

इति अगस्त्यसंहितायां रामनवमीव्रतम्।

अथ रथनवमीव्रतम्।

—:○:—

सुमन्तुरुवाच।

कृत्वैवाश्वयुजे मासि कृष्णपक्षे नराधिप।
नवम्यामुपवासन्तु दुर्गादेवीं प्रपूजयेत्॥
पुष्पधूपोपहारैस्तु ब्राह्मणानां च तर्प्पणैः।
पूजयित्वा रथं कृत्वा नानावस्त्रोपशोभितम्॥
शोभितं ध्वजमालाभिः छत्रचामरदर्पणैः*।
नानापुष्पस्रजाभिश्च सिंहैर्युक्तं मनोरमं॥
कृत्वा स्वर्णमयीं दुर्गां महिषासनशोभिताम्।
दुर्गारूपन्तु विष्णुधर्म्मोत्तरात्।

* छत्रचामरतर्पणैरिति पुस्तकान्तरे पाठः।

आलीढ़स्थानसंस्थानां तथा राजन् चतुर्भुजाम्।
स्रुचः पात्रकरां देवीं शूलखड्गधरां तथा॥
चतुर्थश्च करस्तस्यास्तथा कार्यस्तु सामिष इति।
विन्यस्य रथमध्ये तु पूजयेत् क्षतलक्षणम्॥
तं रथं राजमार्गेण शङ्खभेर्य्यादिनिस्वनैः।
नवम्यां भ्रामयित्वा तु नयेत् दुर्गातपं नृप॥
तत्र जागरपूर्व्वन्तु प्रदीपाद्युपशोभितम्।
नानाप्रक्षेपकैर्व्वीर नृत्यमानैश्च बालकैः॥
जागरं कारयेत्तत्र पूजयानश्च चण्डिकाम्।
प्रभाते स्नपनं कृत्वा तद्भक्तानाञ्च भोजनम्।
रथं शोभासमायुक्तं भगवत्यै निवेदयेत्॥
भुक्ता च बान्धवैः सार्द्धं प्रणम्यार्य्यां गृहं व्रजेत्।
सर्व्वव्रतानां प्रवरं सर्व्वपापप्रणाशनम्॥
नवम्यां रथव्रताख्यं सर्व्वकामार्थसाधनम्।
सर्वयज्ञेषु यत्पुण्यं सर्व्वतीर्थेषु यत् फलम्।
तत् फलं लभते विद्वान् नवमीव्रतपालनात्॥
कल्पकोटिशतं साग्रं विष्णुलोके महीयते।
पुनरेत्य महीं राजा सार्व्वभौमो भवेदिति॥
रत्नोपकरणैर्युक्तां देवदारुमयीं शुभाम्।
शय्यां निवेदयेद्यस्तु भगवत्यै नराधिप॥
संपूज्य गन्धपुष्पाद्यैर्विधिवच्चण्डिकां नृप।
दुकूलवस्त्रतूतानां* परिसंख्या च यावती॥

* वस्त्रतूलानामिति पुस्तकान्तरे पाठः।

तावद्वर्षसहस्राणि दुर्गालोके महीयते।
वृषं शूलाङ्कितं यश्च भगवत्यै निवेदयेत्॥
आसप्तमं स तु कुलं महादेवालयं व्रजेत्।
यश्चोभयमुखीं गङ्गां भगवत्यै सुशोभितां॥
सप्तद्वीपाम्बरां दत्वा यत् फलं तदवाप्नुयात्।
पदद्वयं शिरोऽञ्च यावद्वत्सस्य निर्गतम्॥
तावद्गौः पृथिवी ज्ञेया तद्दाता स्यात् महीप्रदः॥

इति भविष्यत्पुराणे रथनवमी व्रतम्।

अथ आनन्दनवमीव्रतम्।

——ooo——

सुमन्तुरुवाच।

अनन्दा नन्दिनी नन्दा महानन्दा महीपते।
तथाद्या नवमी पुण्या पञ्चमी महती स्मृता॥
फाल्गुनामलपक्षस्य नवमी या महीपते।
अनन्दा सा महापुण्या सर्व्वपापहरा शुभा॥
कृत्वैकभक्तं पञ्चम्यां षष्ठ्यान्नक्तं तथान्नृप।
अयाचितन्तु सप्तम्यामुपवासः परेऽहनि॥
य एवं पूजयेद्भक्त्या नवम्यां विधिवन्नृप।
सोपवासोऽर्च्चयेद्देवीं धूपं दद्यात्तथागुरुम्।
कुङ्कुमाणां स्रजाभिस्तु पुष्पैरन्यैश्च पूजयेत्॥
नैवेद्यं पायसन्दद्यात् रसालामोदनं तथा।

पञ्चगव्यं प्रशस्तं हि स्नान प्राशनयोर्नृप ॥
जप्तव्यं नाम देव्यास्तु आरूण्याख्यभयापहं ।
इत्येतत् प्रथमं प्रोक्तं पारणं पापनाशनम् ॥
मासैश्चतुर्भिरादीयं द्वितीयं पारणं शृणु ।

आदीयं श्राद्धं ।

भोजयेद्विप्रकन्याश्च नवम्यां ब्राह्मणस्त्रियः ।
मासि मासि महाबाहो यथाशक्त्या यथा विधि ॥
आषाढ़े श्रावणे मासि मासि भाद्रपदे तथा ।
तथावाश्वयुजे मासि पूज्या भगवती विभो ॥
कृत्वैकभक्तं पञ्चम्यां षष्ठ्यां नक्तं तथा नृप ।
अयाचितं तु सप्तम्यामुपवासः परेऽहनि ॥
सोपवासो नवम्यां तु पूजयेद्विधिवच्छिवाम ।
सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते
जातिपुष्पस्रजाभिस्तु तथा रक्तैश्च चन्दनैः ।
कस्तूरिकाद्यतैर्गन्धै देवीमालेपयेत्तथा ॥
माहिषाख्यं गुग्गुलञ्च धूपं परमपूजितम् ।
नैवेद्यं गुड़पूपाश्च खण्डवेष्टाश्च शक्तितः ॥
विल्वपत्रोदकस्नानं प्राशने च प्रकीर्त्तितम् ।
दुर्गाख्यं नाम जप्तव्यं सर्व्वपाप भयापहम् ॥
इत्येवं पूजयित्वार्यां पूजयित्वा गुरुं तथा ।
कुमारीर्भोजयेच्छक्त्या ब्राह्मणान् योषितस्तथा ॥
एवं यः पूजयेद्भक्त्या यथाविभवमात्मनः ।
स सिंहासनमारूढ़ो ब्रह्मलोकं प्रयाति वै ॥

तृतीयं पारणं तस्मिन् सर्व्वपापविनाशनम्॥
ध्यायेच्छिवं सदा शान्तं सच्चिदानन्दविग्रहम्।
कार्त्तिकादि महापुण्यं दुर्गायाः प्रीतिवर्द्धनम्॥
नानाविधानां पुष्पाणां* जलजानां विशेषतः।
स्रजाभिरर्च्चयेद्देवीं त्र्यम्बकां जगतोऽम्बिकां॥
कुङ्कुमागरुकर्पूरैः सुगन्धैश्च प्रलेपयेत्।
मांसगर्भैस्तथाभक्ष्यैः श्रीवेष्टैश्चापि पूजयेत्॥
धूपोविल्वागुरुःशस्तःसघृतो गुग्गुलस्तथा।
तिलस्नानं तिलैर्होमस्तिलानां प्राशनं वरम्॥
जपेन्नाम तथा देव्याः सर्व्वपापक्षयङ्करम्।
अपराजिताख्यमतुलं जपेदन्ते व्रतं नृणाम्॥
एवं यः कृच्छ्रपादेन नवमीं तामुपासते†।
मासि मासि महावाहो यावदेव हि वत्सरम्॥
स हि पुत्रानवाप्याशान् धनं धान्यं बलं यशः।
विपुलां च तथा कीर्त्तिमारोग्यमतुलां श्रियम्॥
ततस्त्विन्द्रपुरं याति सिंहासनसमन्वितः।
तेजसाम्बुजसङ्काशः प्रभयाम्बुजसन्निभः॥
य इदं शृणुयान्नित्यमनन्दाकल्पमादितः।
स हि कामानवाप्याशान् ब्रह्मलोके महीयते॥

इत्यनन्दानवमीव्रतम्।

———000———

* पुण्यानामिति पुस्तकान्तरे पाठः।

† नव.पासते इति पुस्तकान्तरे।

अथ मातृव्रतम्।

——000——

राजा विजयमाप्नोति भुक्त्वा राज्यमकण्टकम्।
ब्राह्मणाः क्षत्रिया वैश्या येचान्ये मन्दजातयः* ॥
सर्व्वत्र जयमायान्ति भयेभ्योऽपि विवर्ज्जिताः।
मातरश्चैव संपूज्याः यथा शक्त्या प्रयत्नतः ॥
तदग्रे शिवभक्तांस्तु व्रताचार्य्यं विशेषतः।
एवं कृत्वा विधानेन सर्व्वत्र जयमाप्नुयात् ॥
ब्रह्माणींचैव माहेशीं कौमारीं वैष्णवीं तथा।
वाराहीं नारसिंहीं च शिवक्षेमजयां महीं ॥
ऐन्द्रीञ्चामुण्डां योगेशीं गौरीं चैव तथाम्बिकां।
आग्नेयीं वारुणीं चैव वायव्यां व्योमसंज्ञिकां ॥
लम्पटां गजवक्त्राञ्च गारुडीं च जयां यजेत्।
विजयां च जयन्तीं च तथान्यां त्वपराजितां ॥
सिद्धरक्तां तथा शुक्लां उत्पलां पूजयेत्तथा।
गरुड़ांच तथा रात्रिं सुरात्रिं च तथा पुनः ॥
हंसवक्त्राश्ववक्त्राञ्च सिंह व्याघ्रमुखीं तथा।
जम्बूलकमुखारावींमार्ज्जारीं ऋक्षवानरीं ॥
उष्ट्रवक्त्रां श्याममुखीं गोमुखीं सुमुखीं तथा।
भैरवीं चैव संपूज्या तथा वै कृष्णरेदती ॥
शुक्लरेवतिसंज्ञा च तथा शकुनिरेवतीं।
लङ्केश्वरी भद्रकर्णा शीशीघ्रा सिद्धिरेव च ॥

---

* चन्द्रजातयइति पुस्तकान्तरे पाठः।

घण्टाकर्णी तथा निद्रा मातरः परिकीर्त्तिताः।
नवम्यां पूजयेद्यस्तु मासि चाश्वयुजे सदा॥
अखण्डितप्रभावस्तु भवते नात्र संशयः।
अहन्यहनि योनित्यं भक्त्या पूजावसानतः॥
ग्रहदोषा न बाधन्ते परभक्त्या विशेषतः।
दुःस्वप्नो व्याधयो भूता हिंसकाश्च विनायकाः॥
स्वग्रहाः पूतनाश्चण्डा डाकिन्यो मारिकास्तथा।
नश्यन्ति स्मरणात्तस्य सर्व्वंदुर्भिक्षकल्मषाः॥
मृततोका* काकबन्ध्या सुप्रजा वै प्रजायते।

इति मातृव्रतम्।

अथ वैशाखनवम्योर्भविष्योत्तरोक्तं नवमीव्रतम्।

———ooo———

वैशाखे मासि राजेन्द्र नवम्यां पक्षयोर्द्वयोः।
उपवासपरोभक्त्या पूजयानस्तु चण्डिकां॥
विमानवरमारूढो देवलोके महीयते।

इति वैशाखनवमीव्रतम्।

अथ नन्दानवमीव्रतम्।

———ooo———

सुमन्तुरुवाच।

मासि भाद्रपदे या तु नवमी बहुलेतरा।
मातृनन्दा महापुण्या कीर्त्तिता पापनाशनी॥

* उत्तुकोति पुस्तकान्तरे पाठः।

बहुलः कृष्णपक्षः तदितरा शुक्ला ।

तस्यां यः पूजयेद्दुर्गां विधिवत् कुरुनन्दन ॥
सोऽश्वमेधफलं विन्द्याद्विष्णुलोकं स गच्छति ।
एकभक्तं तु सप्तम्यामष्टम्यां समुपोषितः ॥
जातीपुष्पैः कदम्बैश्च पूजयेद्विधिवच्छिवं ।
दूर्व्वां परिस्थितां देवीं यथा शास्त्रविनिर्म्मितां* ॥
खर्जूरनालिकेरैश्च त्रपुसामलकैस्तथा ।
पूजयेत्सप्तधान्येन पिण्याकेन च सुव्रत ॥
दध्ना साज्येन धूपेन दूर्व्वाङ्कुरैश्च धूपयेत् ।
प्रजागरं ततो रात्रौ नन्दायाः पुरतो नृप ॥
नानाप्रेक्षणकैः कुर्य्यात् ब्रह्मघोषैश्च पुष्कलैः ।
नन्दाख्यं च जपेन्मन्त्रमष्टोत्तरशतं विभो ॥

विभोनन्दाख्यः ।

ओं नन्दायैनमः स्वाहा हुं फडिति ।
प्रभाते तु नवम्यान्तु पूजां कृत्वा तु चण्डिकां ॥
प्रीणयित्वा गुरुं शक्त्या कुमारीर्भोजयेत्ततः ॥
एवञ्चाश्वयुजे मासि कार्त्तिके कार्त्तिकोत्तरे ।

कार्त्तिकोत्तरे, मार्गशीर्षे ।

पूजयेच्चतुरोमासान् नन्दां भगवतीं विभो ॥
स्नाने कुशोदकं प्रोक्तं प्राशने च नराधिप ।

---

* यथानार्मविनिर्म्मितामिति पुस्तकान्तरे पाठः ।

इति ते कथितं वीर प्रथमं पारणं शुभम्॥
द्वितीये शृणु मे पौषे पारणाम्नानप्राशनं*।
चण्डिकां पूजयेदत्र नाम्ना कनकनन्दिनीं॥
नानास्रजाभिः कुसुमैः कुङ्कुमागरुचर्च्चितां।
नानाविधैर्भक्ष्यभोज्यैर्धूपेनागुरुणा तथा॥
पञ्चगव्यकृतस्नानः सोपवासोजितेन्द्रियः।
पूजयित्वा महादेवीं रात्रौ स्वपिति भूतले॥
पुनर्नवम्यां संपूज्य विधिवत् कनकनन्दिनीं।
हुत्वा तु शाण्डिलीपुत्रं कुमारीर्भोजयेत्ततः॥

शाण्डिलीपुत्रमग्निं।

वैशाखादिषु मासेषु पूजयेद्विधिनाच्युतम्।
मुहुराणां स्रजाभिस्तु अशोकानां च भारत॥
कुङ्कुमागरुकर्पूरैश्चन्दनेन विलेपयेत्।
धूपेनागुरुमिश्रेण पयसा पायसेन च॥
अच्युताख्यं जपेन्नाम सर्व्वपापहरं शिवं।
गोरोचनाम्बुना स्नानं प्राशनं गोमयस्य तु॥
कृत्वोपवासमष्टम्यां पूजयित्वा तथाच्युतम्।
नवम्यां भोजयेच्छक्त्या कुमारीर्ब्राह्मणान् स्त्रियः॥
य एवं कुरुते नन्दां नवमीं विधिवद्विभो।
स्वमेकमेकं विधिवच्चिन्तितं लभते फलम्॥

इति भविष्यत्पुराणोक्तं नन्दानवमीव्रतम्।

---

* पारणाशाशनमिति पुस्तकान्तरे पाठः।

अथास्यामेव भविष्यत्पुराणोक्तं दुर्गापूजनम् ।

———000———

मासि भाद्रपदे या स्यान्नवमी बहुलेतरा ।
मातृनन्दा महापुण्या कीर्त्तिता पापनाशिनी ॥
तस्यां यः पूजयेत् दुर्गां विधिवत् कुरुनन्दन ।
सोऽश्वमेधफलं प्राप्य विष्णुलोकञ्च गच्छति ॥
अथ भाद्रपदकृष्णनवम्यां देवीपुराणोक्तं दुर्गाबोधनम्
कन्यायां कृष्णपक्षे तु पूजयित्वा ऊभेऽपि वा ॥
नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैरिति ।
कन्यायां दर्शान्तभाद्रपदे ॥

इति नानापुराणोक्तं दुर्गापूजनम् ।

अथ महानवमीव्रतम् ।

———000———

सुमन्तुरुवाच ।

माघमासे तु या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्तं सदानन्दकरी नृणाम् ॥
''स्यां स्नानं तथा दानं तथा होम उपोषितम् ।
सर्व्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरैः ॥
श्वेतपुष्पस्रजाभिस्तु नन्दां भगवतीं यजेत् ।
कुङ्कुमेन तथा वीर धूपेनागरुणा तथा ॥
मोदकैर्व्विविधैर्व्वीर फलैर्नानाविधैस्तथा ।
तिलकल्ककृतस्नानो होमयेद्विधिवत्तिलान् ॥

पूजयेच्चतुरोमासान् नन्दां भगवतीं शिवाम्।
कुमारीं भोजयेद्भक्त्या योषितो ब्राह्मणांस्तथा॥
ज्यैष्ठादिपारणे वीर जातीपुष्पकदम्बकैः।
पूजयेद्विधिवद्दुर्गां नाम्ना विन्ध्यनिवासिनीम्॥
प्राशयेत्पञ्चगव्यं तु स्नानं तेनैव पुण्यदम्।
पायसान् मधुसर्पिर्भ्यां तथा दध्योदनं परम्॥
कार्त्तिकादिषु मासेषु पूजयेद्धि स्मितामनाम्।
कुन्दपुष्पस्रजाभिस्तु करवीरैश्च सुव्रत॥
कस्तूरिकाक्तैर्गन्धैर्धूपैर्नागरुणा तथा।
घृतपूरैः खण्डवेष्टैः श्रीफलैश्चापि पूजयेत्॥
गोशृङ्गक्षालनस्नानात् पूतदेहो नराधिप।
पूजयेद्विधिवद्देवीं भक्त्या श्वेतमुखीं विभो॥
य एवं पूजयेद्वर्षं चण्डिकां समुपोषितः।
सर्व्वान् कामानवाप्याग्र्यान् ब्रह्मलोके महीयते॥
क्रीड़ित्वा ब्रह्मणः सार्द्धं तत्र प्रपूजितः।
पूजयेद्विधिवद्देवीं भक्त्या भवति भूतले।
धनधान्यसमृद्धस्तु पुत्रवान् कीर्त्तिमान् भवेत्॥

इति भविष्यत्पुराणे महानवमीव्रतम्।

अथ दुर्गानवमीव्रतम्।

———000@000———

ब्रह्मोवाच।

दुर्गां संपूज्य दुर्गाणि नवम्यां तरति तया।

संग्रामे व्यवहारे च सदा विजयमाप्नुयात् ॥
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः ।
पूर्ववत् पद्मपत्रस्था कर्त्तव्या च तिथीश्वरा ॥
तिथीश्वरात्र दुर्गा तद्रूपन्तु रथनवमीव्रते ।
गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते ॥
पूजाशाठ्येन शाठ्येन कृतापि तु फलप्रदा ।
आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः ।
पूर्व्वोक्तफलदो होमःपयसा तेन वै कृतः ॥

इति भविष्यत्पुराणोक्तं दुर्गानवमीव्रतम् ।

अथ शौर्य्यव्रतम् ।

अगस्त्य उवाच ।

अतःपरं प्रवक्ष्यामि शौर्य्यव्रतमनुत्तमम् ।
येन भीरोरपि महत् शौर्य्यं भवति तत्क्षणात् ॥
मासि चाश्वयुजे शुक्ला नवमी समुपोषिता ।
सप्तम्यां कृतसङ्कल्पःस्थित्वाष्टम्यां निरोदनः ॥
नवम्यां प्राशयेत् पिष्टं प्रथमं भक्तितो नृप ॥
ब्राह्मणान् भोजयेद्भक्त्या देवीञ्चैव तु पूजयेत् ।
दुर्गां देवीं महाभागां महामायां महाप्रभाम् ॥
एवं सम्वत्सरं यावदुपोष्य विधिवन्नृप ।

व्रतान्ते भोजयेद्धीमान् यथाशक्त्या कुमारकान् ॥
हेमवस्त्रादिभिः स्नातुं पूजयित्वा तु शक्तितः।
पश्चात् क्षमापयेत्क्षान्तुं देवी मे प्रीयतामिति ॥
एवं कृत्वा भ्रष्टराज्योलभेद्राज्यं न संशयः।
अविद्यो लभते विद्यां भीरुः शौर्य्यञ्च विन्दति ॥

इति वाराहपुराणोक्तं शौर्य्यव्रतम्।

अथ वीरव्रतम्।

नवम्यामेकभक्तं तु कृत्वा कन्याः स्वशक्तितः।
भोजयित्वा समां दद्याद्धेमकुम्भञ्च वाससी ॥
समां संवत्सरं, यावन्नवम्यामेव भोजयेत्।
तथा हेमन्तु दातव्यं मृतो शिवपुरं व्रजेत्।
प्रतिजन्म सुरूपःस्यात्कृत्नुभिश्चापराजितः ॥
एतद्वीरव्रतं नाम नारीणाञ्च सुखप्रदम् ॥

इति पद्मपुराणोक्तं वीरव्रतम्।

अथ आग्नेयव्रतम्।

कृष्ण उवाच।

सकृन्नवम्यां भक्तेन पूजयेद्विन्ध्यवासिनीम्।

पुष्पैर्धूपैस्ततोदीपैर्नैवेद्यैर्विविधैरपि ॥
पूजयित्वा ततोविद्यात् पञ्जरं सुकसंयुतम्।
हैमं विप्राय दद्याद्यः स वाग्मी जायते नरः॥
सक्रुङ्क्तेनन्तेन अग्निलोकप्रदायकम्॥

इति भविष्योत्तरोक्तं आग्नेयव्रतम्।

अथ वर्षव्रतम्।

—:○:—

मार्कण्डेय उवाच।

हिमवान् हेमकूटश्च शृङ्गावान् मेरुमाल्यवान्।
गन्धमादनएवैतान् पूजयेत् पार्थिवर्षभः॥
शैलान् नृप नवम्यांतु चैत्रमारभ्य पार्थिव।
सोपवासेन धर्मज्ञ गन्धमाल्यान्नसम्पदा॥
जम्बूद्वीपस्य संस्थानं व्रतान्ते राजतं नरः।
तुलाप्रमाणं दद्यात्तु सर्व्वान् कामानवाप्नुते॥

तुलाफलश्चतम्।

अश्वमेधमवाप्नोति स्वर्गलोकञ्च गच्छति।
मानुष्यमानाद्यन्त ततोऽसक्रवर्त्ती नृपोभवेत्॥
चिरञ्च कालं वसुधां प्रशाद्युलोकावाप्नोति ततोधि लोकान्॥

इति विष्णुधर्म्मोत्तरोक्तं वर्षव्रतम्।

——

अथ भद्रकालीव्रतम्।

—ooo—

मार्कण्डेय उवाच।

नवम्यां सोपवासस्तु भद्रकालीं प्रपूजयेत्।
शुक्लपक्षे महाराज कार्त्तिकात् प्रभृति क्रमात्॥
गन्धमाल्य नमस्कार धूपदीपान्न सम्पदा।
सम्वत्सरान्ते सम्पूज्य व्रतान्ते ब्राह्मणाय तु॥
वस्त्रयुग्मं नरोदत्त्वा यथेष्टं काममाप्नुयात्।
रोगार्त्तोमुच्यते रोगात् बद्धो मुच्येत बन्धनात्॥
राजकार्य्याभियुक्तश्च मुच्यते च महाभयात्।
नामरेभ्यो भयं तस्मान्ननरेभ्यः कथञ्चन॥

पुत्रानवाप्नोति धनं यथेष्टं
यशश्च पुण्यं विविधं च कुप्यम्।
पूजां च कृत्वाविधिवत् भवान्याः
कामानवाप्नोति तथादि भूतान्।
हेमरूप्यव्यतिरिक्तं धनं कुप्यं॥

इति विष्णुधर्म्मोत्तरोक्तं भद्रकालीव्रतम्।

राजोवाच।

विधिना पूजयेत् कन्यां भद्रकालीं नराधिप।
नवम्यामाश्विने मासि शुक्लपक्षे नरोत्तम॥

पुष्कर उवाच।

पूर्व्वोत्तरे तु दिग्भागे लिखेत् वास्तुमनोहरे।
भद्रकालीं नृपगृहं चित्र वस्त्रैरलङ्कृतम्॥

भद्रकालीं पटे कृत्वा तत्र सम्पूजयेद्द्विज ।
भद्रकालीरूपनिर्म्माणं तत्रैव दर्शितम् ॥
अष्टादशभुजा कार्य्या भद्रकाली मनोहरा ।
आलीढस्थानसंस्थाना चतुःसिंहे रथे स्थिता ॥
अक्षमालां त्रिशूलञ्च खड्गश्चन्द्राख्य* एवच ।
बाणं, चापौच कर्त्तव्यौ शङ्खपद्मौ तथैव च ॥
स्रुक्स्रुवौ च तथा कार्य्यौ तथा वेदिकमण्डलं ।
दण्डशक्ती च कर्त्तव्ये तथा शक्तिहुताशने ॥
हस्तानां भद्रकाल्यास्तु तारकानिकरः† करः ।
एकश्चैव महाभाग रत्नपात्रं भवेदिति ॥
आश्विने शुक्लपक्षस्य अष्टम्यां प्रयतःशुचिः ।
तत्रैवायुधचर्म्माद्यं छत्रं वस्त्रञ्च पूजयेत् ॥
राजलिङ्गानि सर्व्वाणि तथा शस्त्राणि पूजयेत् ।
फलैर्म्माल्यैस्तथा भक्ष्यैर्भोज्यैश्च सुमनोहरैः‡ ॥
बलिभिश्च विचित्रैश्च प्रेक्षादानैस्तथैव च ।
रात्रौ जागरणं कुर्य्यात् तत्रैव वसुधाधिप ॥
उपोषितो द्वितीयेऽह्नि पूजयेत् पुनरेव ताः ।
आयुधानाञ्च सकलं पूजयेद्वसुधाधिप ॥
एवं सम्पूजयेद्देवीं वरदां भक्तवत्सलां ।
कात्यायनीं कामगमां बहुरूपां वरप्रदां ॥

---

* खड्गश्चन्द्रश्च याद्व इति पुस्तकान्तरे पाठः ।

† तारकान्तिकर इति पुस्तकान्तरे पाठः ।

‡ पुष्पैर्भोज्यैरिति पुस्तकान्तरे पाठः ।

पूजिता सर्व्वकार्य्यैः सा युनक्ति वसुधाधिप* ।
एवं हि संपूज्य जगत्प्रधानां
याचासु देव्या वसुधाधिपेन ॥
प्राप्नोति सिद्धिं परमां महेशा
ज्जनस्तथान्योऽपि च वित्तशक्त्या ॥

इति विष्णुधर्म्मोत्तरोक्तं भद्रकालीव्रतम् ।

इति श्रीमहराजाधिराजश्रीमहादेवस्य समस्तकरणा-
धीश्वर-सकल-विद्या-विशारद-श्रीहेमाद्रि-विर-
चिते-चतुर्व्वर्ग-चिन्तामणौ व्रतखण्डे
नवमीव्रतानि समाप्तानि ॥

———

* एवं हि संपूज्य जगत्प्रधानाया मनुदेत् या वसुधाधिपेन। प्राप्नोति सिद्धिं परमाम्महेशाच्चित्तस्तथान्योपि जनःस्वशक्त्या इति पुस्तकान्तरे पाठः।

अथ चतुर्द्दशोऽध्यायः ।

———000@000———

अथ दशमीव्रतानि ।

अन्यं नवेत्ति विषयान्तरमन्तरायं
यश्चन्द्रचूड़चरणार्पितचित्तवृत्तिः ।
सत्यव्रतः सकलशैलसमूहसूर्य्यो*
हेमाद्रिरद्य दशमीव्रतवृन्दमाह ॥

सनत्कुमार उवाच ।

अथ त्वं शृणु विप्रर्षे दशमीव्रतमुत्तमं ।
सर्व्वरोगार्त्तिशमनं सत्त्वपुष्टिप्रदं शुभम् ॥
व्रतमेतन्महाबुद्धे कार्य्यमारोग्यमिच्छता ।
सर्व्वकार्य्यार्थमेतद्धि लिप्सुना जीवितं चिरं ॥
उपवासश्च कर्त्तव्यो नवम्यामिह सुव्रत ।
दशम्यां तु कृतस्नानो मङ्गलायतनं हरिं ॥
देवमिन्दिरया सार्द्धं ध्यात्वा च जगतां पतिं ।
शङ्खचक्र गदा पद्म, शार्ङ्गा, सि, धरमुत्तमं ॥

इन्दिरया लक्ष्म्या ।

फलैश्च धूपैश्च पुष्पैश्च पायसेन समर्च्चयेत् ।
अग्रतः स्थापयेत् कुम्भन्तीर्थतोयेन पूरितं ॥

* धूर्य्य इति पुस्तकान्तरे पाठः ।

63—2

अस्मिन्नावाहयेत्पद्म, चक्राद्यान्यायुधान्यपि ।
पूजयेद्रक्तपुष्पैस्तु गुडान्नेन समाहितः ॥
द्रोणमात्रतिलैः कृष्ण कारयेदजिनोपरि ।
तस्मिन्नष्टदलं पद्मं सौवर्णं च निधाय वै ॥
मनःषष्ठानीन्द्रियाणि प्राणान् बुद्धिं दलेष्वपि ।
कर्णिकायां तथा कालं क्रमेणैवमथार्चयेत् ॥
अनामयानीन्द्रियाणि प्राणश्च चिरसंस्थितः* ।
अनाकुलासना बुद्धिः सर्व्वेषु निरुपद्रवा† ॥
मनसा कर्म्मणा वाचा मया जन्मनि जन्मनि ।
सञ्चितं क्षपयत्वेनः कालात्मा भगवान् हरिः ॥
इत्येवं प्रार्थितं कृत्वा देवदेवस्य चाग्रतः ।
दरिद्राय सपुत्राय सत्पुत्राय द्विजन्मने ॥
इष्टापूर्त्तविधिज्ञाय दद्यात् सर्व्वमतन्द्रितः ।
गुरवे दक्षिणां दद्याद्ब्राह्मणेभ्यश्च भोजनं ॥
आचार्य्यः साधकं पश्चात् स्नापयेत् कुम्भवारिणा ।
अवशिष्टेन चान्नेन गुर्व्वनुज्ञापुरःसरं ॥
बान्धवैः सह भुञ्जीत नियमानुत्सृजेत्ततः ।
जन्माद्यधिकृतां पीडां स्वप्नोत्थामपि सुव्रत ॥
व्रतेनानेन वै मर्त्यः सकल्पितेन संयुतः ।
पुत्र पौत्र सुहृद्बन्धु पश्वादीनपि नित्यशः ॥

---

* प्राणश्चिरसंस्थितिरिति पुस्तकान्तरे पाठः ।

† अनाकुलाश्चमेबुद्धिः सर्व्वेष्वुर्निरुपद्रवा इति पुस्तकान्तरे पाठः ।

आरोग्यं चिरजीवित्वं व्रतमेतत् प्रयच्छति ।
राजयक्ष्मश्लीहाष्ठीलागुल्मशूलभगन्दराः ॥
नश्यन्ति च महासर्व्वे व्रतिनीनाञ्च संशयः ।
अनपत्यः सुतं देवि दीर्घ मायुश्च विन्दति ॥
अन्तरामरणं जह्यादानन्दारोग्यमृच्छति ।
अन्तरामरणं, जह्यादित्यपमृत्युं नाप्नोतीत्यर्थः ॥

इति गरुडपुराणोक्तमारोग्यव्रतम् ।

अथ राज्याप्तिदशमीव्रतम् ।

——:०:——

मार्कण्डेय उवाच ।

क्रतुर्द्दक्षो मुनिः सत्यःकालः कामोवसुस्तथा ।
कुरवान् मनुजोविप्र रोमसारश्च ते दश ॥
विश्वेदेवाः समाख्याता दशात्मा केशवो विभुः ।
तस्य संपूजनं कार्य्यं सितपक्षे नराधिप ॥
आरभ्य कार्त्तिकान्मासाद्दशम्यां नृपपुङ्गव ।
मण्डलेष्वथ पुण्येषु यदिवार्च्चासु यादव ॥
गन्ध, माल्य, नमस्कार, दीप, धूपान्न, सम्पदा ।
अर्च्चा प्रतिमा साच यथासम्भवं सुवर्णादिधातुमयी विधेया ।
व्रतान्ते कनकं दद्याद्यथाशक्ति द्विजातये ॥

---

¹ मृदाश्विलभेति पुस्तकान्तरे पाठः ।

कृत्वा व्रतं केवलमेतदिष्टं
प्राप्नोति तेषां सुचिरन्तु लोकान्।
ततोऽथ लोके पुरुषोत्तमस्य
राजा भवेद्ब्राह्मणपुङ्गवो वा॥

इति विष्णुधर्मोत्तरोक्तं राज्याप्तिदशमीव्रतम्।

अथ ब्रह्मावाप्तिव्रतं।

———ooo———

मार्कण्डेय उवाच।

आत्माह्यायुर्म्मनोदक्षोमदः प्राणस्तथैव च।
हविश्मांश्च गतिस्तस्य* दक्षः प्रत्यश्च ते दश॥
देवास्त्वङ्गिरसोनामदशम्यां पूजयेन्नरः॥
सोपवासःपूर्वपक्षे पूर्व्वोक्तविधिना चिरं।
पूर्व्वोक्त विधिना अनन्तरोक्तविधिना।
कृत्वाव्रतं वत्सरमेत दिष्टं
प्राप्नोति तेषां सुचिरं हि लोकान्।
ततोऽथ कालं पुरुषत्वमेत्य
राजा भवेद्ब्राह्मणपुङ्गवो वा॥

इति विष्णुधर्मोत्तरोक्तं ब्रह्मावाप्तिव्रतं।

---

* स्वयदत्तं सत्यश्च ते दश इति पुस्तकान्तरे पाठः।

अथ पदार्थव्रतं।

——ooo——

मार्कण्डेय उवाच।

शुक्लपक्षे दशम्यां तु सोपवासस्तथानरः।
मार्गशीर्षं तथारभ्य यावत्सम्बत्सरं भवेत्॥
गन्धमाल्यनमस्कार धूपदीपान्नसम्पदा।
दिक्पालपूजनं कुर्य्याद्दिशां संपूजनं तथा॥
गां वत्सरान्ते दद्याच्च तथैवच पयस्विनीं।
ब्राह्मणाय महाभाग यथा च मनुजोत्तम॥
एतद्व्रतं नरः कृत्वा यत्र क्वचन गच्छति।
तत्रेष्टं काम्यमाप्नोति पुत्रेष्टिफलमश्नुते*॥
वाणिज्यकर्तुस्य नरस्य सिद्धं
यावान् तथान्यां विजीगीषवश्च।
विद्यार्थिनो वा रिपुनाशनं वा
हितं पदार्थं व्रतमेतदिष्टं॥

इति विष्णुधर्म्मोत्तरे पदार्थव्रतम्।

अथ धर्म्मव्रतम्।

——ooo——

मार्कण्डेय उवाच।

शुक्लपक्षे दशम्यां तु सोपवासस्तु मानवः।
धर्म्मं सम्पूजयेद्देवं सर्व्वलोकसुखावहं॥

---

* पुत्रीत्विमधिपाश्नुते इति पुस्तकान्तरे पाठः।

मार्गशीर्षाद्‌थारभ्य नित्यमेवमरिन्दम।
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा ॥
घृतेन जुहुयाद्वह्निं ब्राह्मणांश्चात्र पूजयेत्।
व्रतावसाने दद्याच्च तथा धेनुं पयस्विनीं ॥
व्रतमेतद्विनिर्द्दिष्टमश्वमेधफलप्रदम्।
कृष्णपक्षे तथाप्येतत् कार्य्यं मनुजसत्तम ॥
राजसूयाश्वमेधाभ्यां फलं प्राप्नोत्यसंशयम्।
स्वर्गलोकमवाप्नोति कुलमुद्धरति स्वकम्* ॥
धर्म्मेति च भवेत्तस्य धर्म्मं प्राप्नोति मानवः।
यत्र यत्राभिजायेत तत्र धर्म्मपरो भवेत् ॥
व्रतेनानेन सर्व्वत्र नरो धर्म्मपरो भवेत्।
आयुष्यमारोग्ययशस्करन्तत्
स्थानप्रदं पापविनाशकारि।
कर्त्तव्यमेतत् पुरुषैर्यथावत्
पूज्योहि विष्णुर्भगवान् स धर्म्मः ॥

इति विष्णुधर्म्मोत्तरोक्तं धर्म्मव्रतम्।

अथापराजितदशमीविधिः।

---ooo---

आथर्व्वणगोपथब्राह्मणे अथापराजितदशम्यां पूर्व्वोक्तं विजय मुहूर्त्ते उक्तं प्रास्थानिकं एतानि खलु प्रास्थानिकं एतानि खलु प्राग्वा द्वाराणीत्यादि येते पन्थान इत्यादि नक्षत्रहोमश्च दध्यो-

---

* आयुष्यमारोग्यकरं यशस्यमिति पुस्तकान्तरे पाठः।

दनं भुक्त्वा कृत्तिकासु अभ्युदियात्सिद्धार्थो* ह पुनरागच्छति तृटित मांसे भुक्त्वा पूर्वयोः फाल्गुन्योरभ्युदियाद्रसै रुभयोः प्रियं गवहस्ते पवित्रं भक्तं भुक्त्वा चित्राभ्युदियानि शस्तानि फलजातानि तेषां भुक्तोत्खादतिश भूरिपायसपूपान् विशाखयोश्चैतानि खलु दक्षिणद्वाराणि भवन्ति॥

तत्रैव दक्षिणादिशमभ्युदितः।

वराहहस्तेन जालहस्तेन वा मत्स्यऽसम्बन्धेन वा समेयानि वर्त्तेतार्वाक् खलु एतेक्तोथादर्वाक् घातुकर्मस्य भवन्ति खलु गुडैर्भुक्त्वा नुराधाभिरभ्युदियाच्छलानामोदनं भुक्त्वा श्रवणेनाभ्युदियादेतानि पादेतानि खलु पश्चिमद्वाराणि स यत्रैव दिशमभ्युत्थितः। शयनहस्तेन वा तृणहस्तेन वा आसन्दीहस्तेन वा

नीवीहस्तेन वा जानुहस्तेन वा

समेयान्निवृत्तोतार्वाक् खल्वेतत्क्राम्यादूर्ध्वं क्रोशादर्वाक् घातुकथमस्य भवति। विदलन्तपेन भुक्त्वा अविष्ठास्वभ्युदयाद्रासैरुत्तरयोर्रोहिणीभक्तं भुक्त्वा रेवतीभिरभ्युदयातिरभ्युदयात्तिलान् भक्षयित्वा भरणीभिरभ्युदियात् एतानिखलूत्तरदिक्द्वाराणि

* हैव पुनरागत्यार्षभेण मांसेन रोहिण्यां स्वगमांसैर्मृगशिरसि रुधिरमार्द्रायां रुद्रपतिर्भक्तं भुक्त्वां पुनर्व्वस्वोष्टंनपायसान् पुष्यैः सर्पमांसैरश्लेषायां एतानि खलु प्राक् द्वारा भवन्ति स यत्रैव प्राचीं दिशामभ्युत्थितः शालहस्तेन वा कम्बुहस्तेन वा सामयात् निर्वर्त्तनार्थाः खल्वेतत् क्रोशादर्वाक् घातुकमर्थस्य भवन्ति तैलेन छागरां भुक्त्वा मघाभिरभ्युदयात् सिद्धार्थाः हैव पुनरागच्छति पक्षिमांसैर्भुक्त्वा पूर्वयोः फाल्गुन्योरभ्युदियाद्रसैः छागरान्यान् प्रियङ्गवंहस्ते चित्रं भक्तं भुक्त्वा चित्रादिरभ्युदियानि शस्तानि फलजातानि इत्यादि पुस्तकान्तरे पाठः।

भवन्ति सम्पन्नैर्व्वीदेवीं दिशमभ्युत्थितः। पानहस्तेनवा किगव हस्तेनवा चौरेण वा सर्पेपान्निभर्त्तितार्वाक् खल्वेतत् क्रोशा-दर्वाक् भाकुशं कुमर्थस्य भवति। अनिजनिर्वेज्योजनिः सनिश-मीहोजनि ब्रह्माजनि चर्य्यं समजनि। सर्वेषां लोकानां सर्व्वेषां वेदानां सर्व्वेषां भूतानां सर्वासां अवन्तीनां अधिपतिःस्यादिति तस्मादेतस्मिन्नचत्रएवं कुर्य्यात् प्राचकमिध्ममुपमासाधया प्रस्तीर्य्य वहिरसान् वहिष्याध्यायत्वालाय जुहुयात् पवित्राणि साकं हि रोचनानि स्वाहेत्यग्नौ हुत्वा रसेषु संपातमानानीय संस्थाप्य होमस्तु स्नपनं प्राशय निरसानि ववैतस्मै करोति सर्वेषां लोकानां सर्वेषां देवानां सर्व्वेषां भूतानां सर्व्वासां अवन्तीनां जनिता-धिपतिरजनिर्भवति। चित्राणि साकं दधिरोचनानि सरी-सृपाणि भवने जनानि। तूनीशममितिच्छमोहनिगाभिं सप-र्य्याणि नाकमुहत्वमग्रे कृत्तिकारोहिणी वास्तु प्राशयति। रमा-नेवं चैनचैनस्मै सौवुभद्रेमृगतिरःसमुद्रापुनर्वसवोस्तु शून्यता वातुष चाक्षुषो भानुमस्तेषां यमं गया मे पुण्यं सर्व्वफालगुश्चानुहस्ता-श्चिनाग्निस्वाति सुखो मेस्तु शून्यताचानुराधे विशाखासहवानु-राधा ज्येष्ठासु नचत्रमरिष्ठमूलं अन्नपूर्व्वां रसन्तां मे स्वाहा ऊर्द्धं पूर्व्वादित्युत्तरावाह उक्तं प्रास्थानिकमित्युपक्रम्य।

तदप्येते श्लोकाः।

अलङ्कृतो भूषितभृत्यवर्गः परिष्कृतोत्तुङ्गतुरङ्गमार्गः।
वादित्रनादप्रतिनादिताशः सुमङ्गलाचारपरम्पराशीः॥
राजा निर्गत्य भवनात् पुरोहितपुरोगमाः।
प्रास्थानिकं विधिं कृत्वा प्रतिष्ठेत् पूर्व्वतो दिशि॥

गत्वा नगरसीमान्तं वास्तुपूजां समारभेत्।
सम्पूज्य चार्थ्यद्दिकपालान् पूजयेत् पथि देवताः॥
मन्त्रैः सर्व्वैर्दिक्पौराणैः पूजयेच्च शमीतरुं*।
अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च॥
दुःस्वप्नशमनीं† धन्यां प्रपद्येऽहं शमीं शुभाम्।
सततांशीः पूर्व्वस्यां दिशि विष्णुक्रमात् क्रमेत्॥
रिपोः प्रतिकृतिं कृत्वा ध्यात्वा वा मनसा तथा।
शरेण स्वर्णपुङ्खेन विद्धो हृदयमर्म्मणि।
दिशां विजयमन्त्राश्च पठितव्याः पुरोधसा॥
एवमेव विधिं कुर्य्यादृक्षिणादिदिशास्वपि॥
पूज्यान् द्विजांश्च संपूज्य सम्बत्सरं पुरोहितः।
गजवाजिपदातीनां प्रेक्षाकौतुकमाचरेत्॥
जयमङ्गलशब्देन ततः स्वभवनं विशेत्।
नीराज्यमानः पुण्याभिर्गणिकाभिः सुमङ्गलम्॥
य एवं कुरुते राजा वर्षे वर्षे सुमङ्गलम्।
आयुरारोग्यमैश्वर्य्यं विजयं च स गच्छति॥
नाधयोव्याधयस्तस्य भवन्ति न पराजयः।
श्रियं पुण्यामवाप्नोति विजयश्च सदा भवेति॥

उक्तं प्रास्थानिकमिति विवाहमुद्दिश्य यदुक्तं
प्रास्थानिकं तदिहापि ज्ञातव्यमित्यर्थः।

---

* गोपथब्राह्मणे इति पुस्तकान्तरे पाठः।

† दुःस्वप्ननाशिनीमिति पुस्तकान्तरे पाठः।

तच्च प्रास्थानिकं यथा।

अथातः प्रास्थानिकं व्याख्यास्यामो जनेषु गमिष्यत्सु पार्थिवा वा तस्य त्वां दुन्दुभयः स्वर्वीणाश्चोपवादयेरन् हृष्टालङ्कृताश्चाक्वदन्त उदगयने पूर्व्वपक्षे पुण्यनक्षत्रे केशश्मश्रूरोमनखानि वापयित्वा संभारानुपकल्पयित्वा मुहूर्त्तमुपसमाधाय शान्तिप्रतिसरं कारयित्वा वीढारन्तेनाभिषिञ्चेद्दन्यथोक्तमञ्जनाभ्यञ्जनानुलेपनं कारयित्वा वासो गन्धान् स्रजश्चावध्य पुरःस्नातारं स्थापयित्वा कर्त्तान्वालभ्य जुहोत्यभयैरपि राजितैरापुष्यैः स्वस्त्ययनैः शर्म्मवर्मभिजनैश्च हुत्वा पार्थिवस्येतिभाप्रगामेति बहुधा आगच्छता गतस्येतीस्येतीन्द्रं स्थालीपाकेनेष्ट्वा आतिष्ठाजिष्णुरन्तूचराक्षजेव इति पन्थानमस्थाप्य जपेदिमौ पादौ यतइन्द्रत्रातारमिन्द्रं मानो विदन्नभयंसोमोऽहस्पतिर्नः परिपातु पश्चादिति त्रीन्विष्णुकामान् क्रान्त्वा विवाहं कारयेन्नदूरात्प्रतिष्ठेन्नपरिवसेत् सद्यएव कुर्य्यादिति।

पुराणसमुच्चयेत्वस्यामेवापराजिता पूजोक्ता।

आश्विनशुक्लपक्षं प्रक्रम्य दशम्याञ्च नरैःसम्यक् पूजनीयापराजिता।

ऐशानीन्दिशमाश्रित्य अपराह्णे प्रयत्नत इति।

इयंतिथिद्वैधे* परदिने श्रवणाभावे पूर्व्वोक्ता

आश्विनशुक्लपक्षं प्रकम्य दशम्याञ्च नरैः

सम्यक् पूजनीयापराजिता।

---

* यदुश्रवापूर्व्वोक्ता इति पुस्तकान्तरे पाठः।

यदा* श्रवणयुक्ता तदा सैव कार्य्या।

तदुक्तं कश्यपेन।

उदये दशमी किञ्चित् संपूर्णैकादशी यदि।
श्रवणर्क्षं यदाकाले सा तिथिर्विजयाभिधा॥
श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः।
उल्लङ्घयेयुःसीमान्तं तद्दिनर्क्षे ततो नरा इति॥
अन्येषु सर्व्वेषु पक्षेषु नवमीयुक्ता ग्राह्या॥

तदुक्तं पुराणसमुच्चये।

या पूर्णा नवमीयुक्ता तस्यां पूज्यापराजिता।
क्षेमार्थं विजयार्थञ्च प्रसिद्धविधिना नरैः†॥
नवमी शेषसंयुक्ता दशम्यामपराजिता।
ददाति विजयं देवी पूजिता जयवर्द्धनी॥
तथा आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः।
एकादश्यां न कुर्व्वीत पूजनं चापराजितमिति॥

स्कन्दपुराणेऽपि।

दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नृपः।
तस्य संवत्सरं राज्ये न क्वापि विजयोभवेदिति॥

इत्यपराजितादशमीविधिः।

कृष्ण उवाच।

पूर्व्वं कृतयुगस्यादौ भृगोर्भार्य्या महासती।
दिव्ये रामाश्रमे रम्ये गृहकार्य्येषु तत्परा॥

---

* ऐर्षारेवेति पुस्तकान्तरे पाठः।

† पूर्व्वोक्तविधिनेति पुस्तकान्तरे पाठः।

बभूव सा भृगोर्नित्यं हृदयेप्सितकारिणी।
तस्यां मुनिर्महातेजा अग्निहोत्रं निधाय च॥
विष्णोस्त्रासोद्दानवानां कुलालणसमाकुलम्।
मुक्ता युद्धस्थितं पार्श्वे समप्र्य मुनिपुङ्गवः॥
दत्त्वा निक्षेपकं सर्व्वं दिव्यया सुमहातपाः।
जगाम हिमवत्पार्श्वं हरन्तोषयितुं हरः॥
सञ्जीवनीकृते नित्यं कणधूममधोमुखः।
ययौ दानवराजस्य विजयाय पुरोहितः॥
आजगाम गते तस्मिन् गरुड़ेनाग्रगो हरिः।
अभ्येत्य तत्स्थलं चक्रे चक्रेण कृत्तकन्धरं*॥
गलद्रुधिर पल्लौघै र्लोहितार्णवसन्निभं।
दृष्ट्वासुरबलं सर्व्वं निहतं विष्णुना तदा॥
दिव्यास्त्र संयुक्तामोभूत् विष्णुमस्त्राविलेक्षणं।
यावन्नोच्चरते वाचं चक्रेण कृतकन्धरम्।
तावन्निपातयामास शिरस्तस्य सकुण्डलम्॥
प्राप्य सञ्जीवनीं विद्यां यावदायात्यसौ मुनिः॥
तावत्सदैत्य दैत्यान् हि पश्यतिस्म निपातितान्।
रोषाच्छशाप च हरिं भृकुटीकुटिलाननः॥
अवश्यभावभावित्वाद्विश्वस्य हितकारणात्।
यस्मात्त्वया हता दैत्या ब्राह्मणी अत्परिग्रहा।
तस्मात्त्वं मानुषे लोके दशवारं गमिष्यसि॥
अतोर्थं मानुषे लोके रक्षार्थञ्च महीभृतां।

---

* निपातयामासशिरसस्तु,धिर पल्लौघं लोहितार्णव संनिभं इति पुस्तकान्तरे।

अवतारोदशाकारो भूयो भूयः पृथग्विधः ॥
पूर्व्वोक्तकारणैः पार्थ अवतीर्णं महीतले ।
मानवा येऽर्चयिष्यन्ति तेषां वासस्त्रिपिष्टपे ॥

युधिष्ठिरउवाच ।

व्रतं दशावताराख्यं कृष्ण ब्रूहि सविस्तरम् ।
समन्त्रं सरहस्यञ्च सर्व्वपापप्रणाशनं ॥

कृष्ण उवाच ।

प्रोष्ठपदे सिते पक्षे दशम्यां नियतः शुचिः ।
स्नात्वा जलाशये स्वच्छे पितृदेवादितर्पणम् ॥
कृत्वा कुरुकुलश्रेष्ठ गृहमागत्य मानवः ।
गृह्णीयात् धान्यचूर्णस्य द्विहस्तप्रसृतिचयम् ॥
क्रमेण पाचयेत्तत्तु पुंसंज्ञघृतसंयुतम् ।
वर्षं वर्षं दिने तस्मिन् यावद्वर्षाणि वै दश ॥
प्रथमे पूरिकां वर्षे द्वितीये घृतपूरिकान् ।
तृतीये शुक्लकासारं चतुर्थे मोदकान् शुभान् ॥
सोहालकान् पञ्चमेऽब्दे षष्ठेऽब्दे खण्डवेष्टकान् ।
सप्तमेऽब्दे कोकरस्यलकापुष्टस्तथाष्टमे ॥
नवमे कर्णवेष्टांस्तु दशमे खण्डकान् शुभान् ।
दशात्मनो दशहरे दशविप्राय दापयेत् ॥
क्रमेण भक्षयित्वा च यथोक्तं भरतर्षभ ।
अर्द्धार्द्धं विष्णवे देयं अर्द्धार्द्धं वा द्विजातये ।
स्वतएवार्द्धमश्नीयात् गत्वा रम्ये जलाशये ॥
दशावतारानभ्यर्च्य पुष्पधूपविलेपनैः ।

मन्त्रेणानेन मेधावी हरिमभ्युच्य वारिणा ॥
मत्स्यं कूर्म्मं नृसिंहं वराहं त्रिविक्रमं रामं
रामं रामञ्च बुद्धचैव सकल्किकं।
गतोस्मि शरणं देवं हरिं नारायणं प्रभुम् ॥
प्रणतोस्मि जगन्नाथ स मे विष्णुः प्रसीदतु।
छित्वा तु वैष्णवीं मायां भग्नां प्रीतोजनार्दनः ॥
श्वेतद्वीपं नयत्वस्मात् मयात्मा विनिवेदयेत्।
एवं यः कुरुते पार्थ विधिनानेन सुव्रतम् ॥
दशावतारनामाख्यं तस्य पुण्यफलं शृणु।
श्रूयते यास्त्विमा लोके पुरुषाणां दशा दश ॥
तांश्छिनत्ति न सन्देहश्चक्रप्रहरणैर्हरिः।
संसारसागरा घोरा तत ऊर्द्धरते हरिः ॥
श्वेतद्वीपं नयत्याशु व्रतेनानेन तोषितः।
किं तस्य न भवेल्लोके यस्य तुष्टोजनार्द्दनः ॥
सोऽहं जनार्द्दनो राजन् कालरूपोररास्यतः।
मर्त्यलोकेऽभयं पार्थ चरिष्यति मयोदितं ॥
सलक्ष्म्या चलया भक्त्या भर्तृपुत्रसमन्विता।
मर्त्यलोके चिरं स्थित्वा विष्णुलोके महीयते ॥
विष्णुलोकादिन्द्रलोकं ततो याति परं पदम्।

ये पूजयन्ति पुरुषाः पुरुषोत्तमस्य
मत्स्यादिकान् दशमीषु दशावतारान्।
मर्त्ये दशस्वपि दशासु सुखं विहृत्य
ते यान्ति यानमधिरुह्य सुरेशलोकान् ॥

इति भविष्योत्तरे दशावतारं नाम।

अथ सोद्यापनमाशादशमीव्रतम्।

———000———

कृष्ण उवाच।

पार्थ पथि विवर्द्धन्तमुखपङ्कज सद्रवे।
शृणुष्वावहितो वच्मि तवाशादशमीव्रतम्॥
नलतापीभवेत्पूर्व्वं निषधेषु महीपते।
स भ्राता विजितो राजन् निष्करेनाति निष्कृतिः॥
अक्षैर्द्यूतेन राजेन्द्र निर्ययौ भार्य्यया सह।
वनं भयप्रतिभयं शून्यं झिल्लीतगणनादितः॥
स गत्वा प्रीतिहीनोऽन्नजलमात्रेण वर्त्तयेत्।
ददर्श वनमध्यस्थांच्छकुनीन् काञ्चनच्छवीन्॥
ग्रहीतु मिकुस्तान् राजन् समाच्छाद्य स्ववाससा।
समीपे तु खगात्तूर्णं गृहीत्वा वसनं शुभम्॥
आससाद सभां काञ्चित् हृतवासा सुदुःखितः।
दमयन्ती सभां प्राप्य निद्रयापहृता तदा॥
दुःखादुत्सृज्य गतवान् चान्यत्र प्रधनेश्वरम्।
गते तु नैषधे भैमी प्रबुद्धा चर्चितानना॥
अपश्यन्ती नलं वीर भैमी सुतं पतिं वने।
इतस्ततश्च बभ्राम हाहेति रुदती मुहुः॥
दुःखशोकसमाक्रान्ता नलदर्शनलालसा।
आससाद वनेकैश्चित्साचैद्यपुरपुञ्जसा॥
उन्मत्तवत्परिवृत्ताशिशुभिः कौतकाकुलैः।

दृष्ट्वा च चेदिराजस्य जननी जनचेष्टिता॥
चन्द्रलेखेव पतिता भूमौ भासितदिङ्मुखा।
आरोप्य सा स्वभवनं पृच्छका त्वं वरानने॥
उवाच भैमी सव्रीडं सैरिन्ध्रीं मां निबोधत।
न धावयेयं चरणौ नोच्छिष्टं भक्षयाम्यहं॥
यदि प्रार्थयते कश्चिदण्डस्ते साम्प्रतं भवेत्।
प्रतिज्ञया तया देवि तिष्ठेऽहं तव वेश्मनि॥
एवमस्त्वनवद्याङ्गि राजमाताप्युवाच तां।
एवं वै दासभवने कञ्चित् कालमनिन्दिता॥
उवास वत्सरार्द्धेन* प्रवृत्तातिकिलद्विज।
अनयामासमुदितादमयन्तीग्टहं पितुः॥
मात्रा पित्रा समायुक्ता सुतैर्भ्रातृभिरेव च।
दमयन्ती तथाप्यास्ते दुःखं नैषधवर्जिते॥
प्रोवाच विप्रानाहूय व्रतं दानमथापि वा।
कथयध्वं यथा मे स्यादिष्टेन सहसङ्गमः॥
तत्रेतिहासकुशलो विप्रः प्रोवाच बुद्धिमान्।
भद्रे त्वमाशादशमीं कुरुष्वेप्सितसिद्धिदम्॥
चकार सर्व्वं तन्वङ्गी यत्पुराणविदा तदा।
ख्यातमाख्यानविदुषा दमनेन पुरोधसा॥
व्रतस्यास्य प्रभावेन दमयन्त्या नरोत्तम
सञ्जातः सुखदोत्पर्थं भर्त्रा सह समागमः॥

युधिष्ठिर उवाच।

कथमाशादशम्येषा गोविन्द क्रियते कदा।

---

* वसनार्द्धेनेति पुस्तकान्तरेपाठः।

सर्व्वमेतत् समाचक्ष्व मासतिथ्यादि* यादव ॥

कृष्ण उवाच ।

राज्याशया राजपुत्रःकृष्यर्थन्तु कृषीवलः ।
भार्य्यार्थं तु वणिक्पुत्रः पुत्रार्थं गुर्विणी तथा ॥
धर्म्मार्थकामसंसिद्धैर लोके कन्या वरार्थिनी ।
यष्टुकामोद्विजवरोरोगी रोगापनुत्तये ॥
वीर प्रवसिते कान्ते तदार्त्तितापपीडिता ।
एतेष्वन्येषु कर्त्तव्यमाशा व्रतमिदं तदा ॥
यदा यस्य भवेदार्त्ति कार्य्यं तेन तदा व्रतं ।
शुक्लपक्षे दशम्यां तु स्नात्वा संपूज्य देवताः ॥
नक्तं दशम्यां संपूज्यः पुष्पालक्तकचन्दनैः ।
गृहाङ्गणे लेखयित्वा यवैः पिष्टालकेन वा ॥
स्त्रीरूपाश्चाधिपूज्यास्तु स्वचिह्नैनैव चिह्निताः ।
यथा देवस्य शक्रादेःशस्त्रवाहनलक्षणम् ॥
दत्त्वा घृताक्तं नैवेद्यं पृथक् दीपांश्च दापयेत् ।
फलानि कालजातानि ततः कार्यं निवेदयेत् ॥
आशाश्चाशा सदा सन्तु विद्यन्तां मे मनोरथाः ।
भवानीनां प्रसादेन सदाकल्याणमस्त्विति ॥
एवं संपूज्य भुञ्जीत दत्त्वा विप्राय दक्षिणाम् ।
अनेन क्रमयोगेन मासि मासि समाचरेत् ॥
यावन्मनोरथः पूर्ण स्ततः पश्चात्समुद्यमान् ।
मासिपूर्णे च अगस्त्ये वर्षे वर्षद्वये गते ॥

---

* मासपोक्त्यासिषादवः इति पुस्तकान्तरे पाठः ।

सौवर्णी कारयेदाशाः रौप्या पिष्टातकेन वा ।
ज्ञातिबन्धुजनैः सार्द्धं स्नातः सम्यगलंकृतः ॥
पूजयेन्मन्त्रसन्दर्भैरेभिर्ध्यात्वा गृहाङ्गणे ।
तव संनिहितः शक्रः सुरासुरनमस्कृतः ॥
पूर्व्वं चन्द्रेण सहिता ऐन्द्रीदिग्देवतेनमः ।
अग्नेः परिग्रहाचार्य्ये त्वमाग्नेयी समुच्यसे ॥
तेजोरूपा पराशक्तिराग्नेयी वरदा भव ।
देवराजं समासाद्य लोकः संयमयत्यसौ ।
तेन संयमिनीयासि याम्ये कामप्रदा भव ॥
खड्गं सहेति विकृतानैर्ऋतिस्त्वामुपाश्रितं ।
तेन नैर्ऋतनाम्नि त्वं कृतवान् भवतः सदा ॥
त्वयास्ते भवनाधार वरुणोयादसां पतिः ।
इष्टकामार्थसिद्ध्यर्थं वारुणिप्रभवो भव ॥
अधिवासिच यस्मात्त्वं वायुदा जगतां पुनः ।
वायव्ये त्वमतःशान्तिं नित्यं यच्छ नमोनमः ॥
कौवेरीवशिसौम्या च प्राच्याशा त्वमथोत्तरा ।
निरुत्तरा भवास्मासु दत्त्वा सद्योमनोरथान् ॥
ये पानीजगदीशेन शम्भुना त्वमलङ्कृता ।
अतस्त्वं शिवसांनिध्यं दभिव्याहि शिवे नमः ॥
सर्पाटक कुलेन त्वं सेवितासि तथाप्यधः ।
नागाङ्गनाभिः सहितोताहिता न सर्व्वदा भव ॥
सप्तलोकैः परिगतः सर्वदा त्वं शिवाय तु ॥
सनकाद्यैः परिहृताब्राह्मजिह्वानपांकुरु ।

नक्षत्राणि च सर्व्वाणि ग्रहास्ताराग्रहास्तथा ॥
नक्षत्रमातरो ये च भूतप्रेतविनायकाः।
सर्व्वे ममेष्टसिध्यर्थं भवन्तु प्रणता सदा ॥
एभिर्मन्त्रैः समभ्यर्च्च्य पुष्पधूपादिना ततः।
आपोभिरभिसंस्थाप्य फलानि विनिवेदयेत् ॥
तत्सूर्य्यध्वनिर्घोषेण गीतमङ्गलनिस्वनैः।
नृत्यतीभिः क्षमाप्यस्ता स्तां रात्रिमतिवाहयेत् ॥
कुङ्कुमक्षोदतीव्रेण दानमानादिभिः सुखम्।
प्रभाते वेदविदुषे सर्व्वं तत् प्रतिपादयेत् ॥
अनेन विधिना सर्व्वं क्षमाप्य प्रश्रियस्य च।
भुञ्जीत मित्रसहितः सुहृद्बन्धुजनैरपि ॥
य एवं कुरुते पार्थ दशमीव्रतमादरात्।
स सर्व्वकाममाप्नोति मनसा भीप्सितं नरः ॥
स्त्रीभिर्विशेषतः कार्य्यं व्रतमेतद्युधिष्ठिर।
लघुवित्तपतेर्नार्य्य सदा काम परायणाः ॥
धन्यं यशस्यमायुष्यं सर्व्वकामफलप्रदम्।
कथितं ते महाराज मया व्रतमनुत्तमम् ॥

ये मानवा मनुजपुङ्गवकामकामाः
संपूजयन्ति दशभीषु सदा दशाशाः।
तेषां विशेषनिहिता हृदये प्रकाम
माशाः फलं त्वलमलं बहुनोदितेन ॥

इति भविष्योत्तरे सोद्यापनमाशादशमीव्रतम्।

अथ यमव्रतम्।

——000——

ब्रह्मोवाच।

दशम्यां यमराडिष्टः सर्व्वव्याधिहरो ध्रुवम्।
मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः॥
पूर्व्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः।
नमोस्तु पञ्चसुभुजोवरदण्डपाशाभयङ्करीमहीष पृष्ठवर सुरार्च्यः।
गन्ध पुष्पोपहारैश्च यथाशक्ति विधीयते।
पूजाशाठेरन शाठेरन कृतापितु फलप्रदा॥
आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः।
पूर्व्वोक्त फलदो होमः पायसान्नेन वा कृतः॥
इदं व्रतं वैश्वानर प्रतिपद्व्रतवद्द्राख्येयम्।

इति भविष्यत्पुराणोक्तं यमव्रतम्।

अथ भौमव्रतम्।

——:○:——

अगस्त्य उवाच।

सार्वभौमव्रतं चान्यत् कथयामि समासतः।
येन सम्यक् कृतेनाशु सार्व्वभौमो भवेन्नरः॥
कार्त्तिकस्य तु मासस्य दशमी शुक्लपक्षगा।
तस्यां नक्ताशनोमर्त्त्योदिक्षु सुद्धवलिं हरेत्॥
शुद्धबलिः पवित्रद्रव्यैः पूजोपहारः।

विचित्रैर्कुसुमैर्भक्ष्यैः पूजयेच्च द्विजांस्तथा ॥
सर्वा भवन्त्यः सिध्यन्तु मम जन्मनि जन्मनि ।
एवमुक्त्वा बलिं तासु दत्त्वा शुद्धेन चेतसा ॥
ततोऽग्निपक्वं भुञ्जीत दध्यन्नञ्च सुसंस्कृतं ।
सर्व्वं पश्चाद्यथेष्टञ्च एवं संवत्सरं नृपः ।
यः करोति नृपोनित्यं तस्य दिग्विजयो भवेत् ॥

इति श्रीवाराहपुराणोक्तं सार्व्वभौमव्रतम् ।

अथ विश्वव्रतम् ।

——ooo——

पुलस्त्य उवाच ।

दशम्यामेकभक्ताशी समांते दशधेनवः ।
दिशस्तु काञ्चनीर्दद्याद्यहारूप्या* महीपतिः ॥
तिलद्रोणोपरिगताः सार्वभौमो भवेन्नृप ।
एतद्विश्वव्रतं नाम महापातकनाशनम् ॥

इति पद्मपुराणोक्तं विश्वव्रतम् ।

इति श्रीमहाराजाधिराजश्रीमहादेवस्य समस्तकर-
णाधीश्वर समस्तविद्याविशारद हेमाद्रि विर-
चिते चतुर्वर्गचिन्तामणौ व्रतखण्डे
दशमीव्रतानि ।

——

* नानारूपा इति पुस्तकान्तरे पाठः ।

अथ पञ्चदशोऽध्यायः ।

———000———

अथैकादशी व्रतानि ।

लोकानुग्रहविग्रहो स भगवान् चित्तेयदीये वसन्
क्षीरोदं मनसापि नेच्छति नवा वैकुण्ठमुत्कण्ठितः ।
सोऽयं सम्प्रति सुप्रतीतचरितः श्रीविष्णुभक्ताग्रणी
हेमाद्रिर्व्रतजातमत्र कथयत्येकादशीसंश्रितम् ॥

तत्रैकदश्यां जागरणगीतनर्त्तनभगवत् पूजनोत्सवमाहात्म्यम् ।

———000———

ब्रह्मपुराणे ।

एकादश्यां नरोयस्तु कुरुते जागरं नरः ।
गीतैर्नृत्यैस्तथावाद्यैः प्रेक्षणीयैः पृथक्विधैः ॥
स याति वैष्णवं लोकं यं गत्वा न निवर्त्तते ।
हत्यायुतानीह सुसंचितानि स्तेयानि रुक्मस्य वसूनि सद्यः ॥
निहत्य ते नैव निराकृतानि सर्वाणि भद्राणि निशिजागरेण ।
मार्गे भयं प्रेतपुरं नदूतात्त्वनन्ततः स्वःवरखड्गपचम् ॥
स्वप्ने न पश्यन्ति च ते मनुष्या येषां गताजागरणेन भद्रा ।
कन्यासहस्रं विधिवद्ददाति रत्नैरलङ्कृत्य सधर्ममेव ॥
गवां सहस्रं कुरुज दत्तं जागरेण विष्णोः* ।

* कुरुजां गणीकुजागरणेति पुस्तकान्तरे पाठः ।

तथा । एकादश्यां निराहारः पूज्य दामोदरं हरिम् ।
रात्रौ जागरणं कृत्वा मुच्यते सर्व्वपातकैः ॥
ननु ये पापकर्म्माणः समायाताः प्रजागरे ।
संसारसागरेतीव्र न ते यान्ति हरेः पुरम् ।
-यथा यथा याति निशाप्रजागरे
स्तथा तथा विष्णुपुरे विचिन्त्यते ।
वासः पुरी वैष्णवलोकहेतवे
मृदङ्गगीतध्वनिनादिते गृहे ॥
गदासिशङ्खारधरश्चतुर्भुजो
दैतेयदर्पापहरास्त्रधारी ।
प्रगीयमानः सुरसुन्दरीभिः
स याति खं खेचरगानसङ्गी ॥

ब्रह्मवैवर्त्ते ।

द्वादश्यां जागरं रात्रौ श्रद्धया श्रीपतिं स्तुवन् ।
कुरुते कुरुते तस्य नारकी नैव वासना ।
यमः, पापानि विप्रेन्द्र स्वपटात्माज्जपत्नता ॥

वाराहपुराणे ।

योगायति विशालाक्षि जानतो जानतो पि वा ।
मम प्रजागरे गीतैर्नित्यं मत्त्या व्यवस्थितः ॥
यावन्तश्च स्वराः केचिद्गायमाना यशस्विनि ।
तावद्वर्षसहस्राणि शक्रलोके महीयते ॥
महात्माश्चैव जायेत शक्रलोकमुपाश्रितः ।
सर्व्वकर्म्मगुणश्रेष्ठस्तत्रापि मम पूजकः ॥

इन्द्रलोकपरिभ्रष्टो ममपूजापरायणः।
प्रमुक्तः सर्व्वसंसारात् मम लोकायगच्छति॥
तथा शृणुत तत्त्वेन मे भूमिं कथ्यमानय।
मम गाथाप्रभावेण* सिद्धिं प्राप्तोमहौजसीं॥
तत्रैव चाश्रमे कश्चिच्चण्डालः कृतनिश्चयः।
दूरात् जागरणेगायेन्ममभक्तिव्यवस्थितः॥
एवन्तु गायतस्तस्य जग्मुर्व्वर्षाण्यनेकशः।
स्वपाकः सुगुप्तः सोऽथ मद्भक्तश्च वसुन्धरे॥
कौमुदस्य तु मासस्य शुक्लपक्षस्य द्वादशीं।
सुसंङ्गते जने याते वीणामादाय जागरं॥
ततोर्द्धमार्गेचण्डालो गृहीतो ब्रह्मराक्षसैः।
अल्पप्राणः श्वपाको वै बलवान् ब्रह्मराक्षसः॥
दुःखेन चैव सन्तप्तो न शक्नोति विचेष्टितं।
सवै प्रोक्तः स्वपाकेन बलवान् ब्रह्मराक्षसः॥
किन्त्वया चेष्टितं मह्यं यस्त्वेवं परिधावसि।
श्वपाकवचनं श्रुत्वा† तदा वै ब्रह्मराक्षसः॥
उवाच मधुरं वाक्यं मानुषोद्गारलोलुपः।
अद्य मे दशरात्रोऽयं निराहारस्य गच्छति॥
धात्रा सुविहितोसि त्वमाहारार्थं पुरस्थितः।
अद्य ते भक्षयिष्यामि नरमांसञ्च शोणितं॥
पीत्वा चैव यथान्यायं यथावा तव रोचते।

---

* नद्योपगाथान्तप्रभावेणेति पुस्तकान्तरे पाठः।

† हृष्टेति पुस्तकान्तरे पाठः।

ब्रह्मरक्षोवचःश्रुत्वा श्वपाको गीतलालसः ॥
राक्षसं छन्दयामास मम भक्त्या व्यवस्थितः ।
एवमेतन्महाभाग भक्षाय समुपागतः ॥
अवश्यमेव कर्त्तव्यं धात्रा दत्तं यथा तव ।
पश्चात् खादसि मां रक्षो जागरे विनिवर्त्तिते ॥
विष्णोः सन्तोषणार्थाय ममैतत् व्रतमुत्तमम् ।
संरक्ष व्रतभङ्गाद्वै देवनारायणं प्रति ॥
जागरे विनिवृत्ते तु मां भक्षय यदिच्छसि ।
श्वपाकस्य वचः श्रुत्वा ब्रह्मरक्षः क्षुधार्द्दितम् ॥
उवाच मधुरं वाक्यं श्वपाकं तदनन्तरम् ।
मिथ्या वदसि चाण्डाल त्वं कथं पुनरेष्यसि ॥
कोहि रक्षोमुखाद्भ्रष्टो मानवो विनिवर्त्तते ।
तथा ! राक्षसस्य वचः श्रुत्वा चाण्डालो धर्म्मसंस्थितः ॥
उवाच मधुरं वाक्यं राक्षसं पिशिताशनम् ।
यद्यप्यलं हि चाण्डालः पूर्व्वकर्म्मविदूषितः ॥
प्राप्तोऽस्मि मानुषं जन्म गर्हितेनान्तरात्मना ।
शृणु तत्समयं रक्षो येन मे पुनरागमः ॥
दूरस्थं जागरं कृत्वा लोकनाथस्य रात्रिकः ।
सत्यमूलं जगत् सर्व्वं लोके सत्यं प्रतिष्ठितम् ॥
सत्येन लेभिरे सिद्धिमृषयो ब्रह्मवादिनः ।
नाहं सत्यात् प्रमुच्येय तस्थौ ब्रह्मोह्यतेन्द्रियः ॥
स याति चैव सत्येन नागमिष्यामि यद्यहम् ।
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ।

तेषां गतिं प्रपद्येयं नागमिष्यामि यद्यहम्॥
ब्रह्मराक्षसमुक्तस्तु श्वपाकः कृतनिश्चयः॥
पुनर्गायति मत्स्थं वै मम भक्त्या व्यवस्थितः।
अथ प्रभाते विमले गीतं नृत्यञ्च जागरे॥
नाम्ना श्वपाका गायन्ति श्वपाकोन निवर्त्तते।
ततः त्वरितमागत्य पुरुषोदात्तरूपभाक्॥
उवाच मधुरं वाक्यं श्वपाकं तदनन्तरम्।
कुतो गच्छति तत्त्वेन द्रुतं गमननिश्चितः॥
एकदा चक्रमेतर्व्वं यत्र तत्र प्रवर्त्तने।
तस्य तद्वचनं श्रुत्वा श्वपाकः सत्यसङ्गरः।
उवाच मधुरं वाक्यं पुरुषादस्य संसदि।
समयो मे कृतः पूर्व्वमग्रतो ब्रह्मरक्षसः॥
तत्राहं गन्तुमिच्छामि नात्र कार्य्या विचारणा।
ततो राक्षससान्निध्यं श्वपाकइत्युवाच ह॥
गच्छ चण्डाल भद्रं ते गन्तुं तत्र नचार्हसि।
यत्रासौ राक्षसः प्राप्तः पिशितासनसंसदः* ॥
अथोवाच श्वपाकोऽसौ मरणे कृतनिश्चयः।
नाहमेवं करिष्यामि यथात्वं वदसेऽनघ॥
नचाहं नाशये सत्यमेतन्मे निश्चितं व्रतम्।
नाहं समयमुत्सृज्य प्रपद्यांश्च कदाचन॥
सत्यमित्थं करिष्यामि गच्छ तावन्नमोस्तु ते†।

---

* पिशिताशिच्छिरासद इति पुस्तकान्तरे पाठः
† गच्छता च नमोस्तु ते इति पुस्तकान्तरे पाठः।

एवं प्रचारणं तस्मिन्वै श्वपाके सत्यवादिनि।
ब्रह्मरक्षसि सत्यत्वात् सत्यवाक्यप्रभाषणात्।
दृष्ट्वा तु राक्षसं तत्र श्वपाकस्तमुवाच ह॥
आगतोऽस्मि महाभाग गीत्वा गाथां यथेप्सिताम्।
विष्णोर्वै लोकनाथस्य मम पूर्णा मनोरथाः॥
एह्येहि मम गात्राणि भक्षयस्व यथेप्सितम्।
श्वपाकस्य वचः श्रुत्वा प्रोवाच ब्रह्मराक्षसः॥
तव तुष्टोऽस्म्यहं वत्स सत्यधर्म्मानुपालनात्।
चाण्डालस्य विधिज्ञस्य यस्य वै बुद्धिरीदृशी॥
ततः प्रोवास रात्रौ च विष्णुर्ज्ये जागरः कृतः।
फलं गीतस्य मे देहि यदि जीवितुमिच्छसि॥
अथोवाच श्वपाकस्तु मया सत्यं वचः कृतम्।
खाद राक्षस मांसानि न दद्यां गीतजं फलम्॥
उवाच राक्षसो गीतं दीयतामर्द्धरात्रिकम्।
ततो मोक्ष्यामि कल्याण राक्षसत्वाच्च भाषणात्॥
अथोवाच श्वपाकोऽसौ त्वं पाहि ब्रह्मराक्षसः।
त्वां भक्षयामीत्येवोक्तं गीतिपुण्यं किमिच्छसि॥
श्वपाकस्य वचः श्रुत्वा ब्रह्मरक्षो जगाद ह।
एकयामस्य मे देहि पुण्यं श्रान्तस्य वै फलम्॥
तं राक्षसमुवाचाथ चाण्डालो गीतलुब्धकः।
नच याम्यफलं दद्मि ब्रह्मरक्षस्तवेप्सितम्॥
पिवस्व शोणितं मेऽद्य यत्त्वया पूर्व्वं भाषितम्।
श्वपाकस्य वचः श्रुत्वा राक्षसः प्रत्यभाषत॥

एकगीतस्य मे देहि यत् फलं विष्णुसंसदि।
आत्मानं तारयिष्यामि तव गीतफलेन तु॥
नाम्नाहं सोमशर्मेति ब्राह्मणोब्रह्मयोनिना।
सूत्रयंत्रपरिभ्रष्टो यज्ञकर्मसु निष्ठितः॥
ततोस्मि कृतवान्यज्ञं लोभमोहप्रपीड़ितः।
तस्य यज्ञस्य दोषेण जातोस्मि ब्रह्मराक्षसः॥
मन्त्रहीनञ्च यद्दत्तं स्वरहीनञ्च यत्कृतम्।
यदिष्टं पुत्रहीनेन विध्वस्तं कर्मजन्मया॥
परिमाणञ्च रूपञ्च मया नात्रोपलक्षितम्।
लाभलोभस्य दोषेण योनिं प्राप्तोस्मि राक्षसीम्॥
त्वं तु गीतप्रदानेन मां तारयितुमर्हसि।
युज्येयं राक्षसत्वाच्च विष्णुगीतप्रसादतः॥
ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः संशितव्रतः।
वाढ़मित्येव तद्वाक्ये ब्रह्मराक्षसमब्रवीत्॥
गीतवानस्मि यत्पश्चात् स्वरमेकमनुत्तमं।
फलेन तस्य भद्र त्वां राक्षसत्वादमोचयम्॥
सकृद्गायति संयुक्तः कौशिकं विष्णुसन्निधौ।
स तारयति दुर्गाणि श्वपाको राक्षसं तथा॥
एवं तत्र वरं लब्ध्वा स तदा ब्रह्मराक्षसः।
जातस्तु विमलो भद्रे शरदीव निशाकरः॥
यज्ञशापाद्विनिर्मुक्तः सोमशर्मा द्विजस्तदा।
जातो भागवतो भूमिक्षेत्रे दक्षो महायशाः॥
श्वपाकस्यापि सुश्रोणि ममक्षेत्रोपगायनात्।

कृत्वा सुविमलं कर्म्म सोऽपि ब्रह्मत्वमागतः॥

एतद्भूमिकथां सर्व्वां कथितं तव सुन्दरि॥

ब्रह्मपुराणे।

देवस्योपरि कुर्व्वीत श्रद्धया सुसमाहितः।

नानापुष्पैर्मुनिश्रेष्ठ विचित्रपुष्पमण्डपं॥

कृत्वा वावरणं पश्चात् जागरं कारयेन्निशि।

कथां च वासुदेवस्य गीतकं वापि कारयेत्॥

ध्यायन् पठन् स्तवन् देवं प्रेरयेद्रजनीं बुधः।

मम जागरणे गीतस्वरसङ्कैकनिश्चितं॥

यस्तु गायति सुश्रोणि कौमुदद्वादशीनिशि।

स सर्व्वसङ्गं सन्त्यज्य मम लोकायगच्छति॥

यस्तु गायति गीतानि मम जागरणे सदा।

युक्तश्चान्तस्थिरोभूत्वा* ब्रह्मभूयं स गच्छति॥

यस्तु गायति गीतानि मम जागरणे† सदा।

युक्तमन्तस्थितोभूत्वा ब्रह्मभूयं स गच्छति॥

एतत्ते कथितं भूमिगायने मम जागरे।

नित्यं तु गायनेनैव तरेत्संसारसागरात्॥

वादित्रस्य प्रवक्ष्यामि तच्छृणु त्वं वसुन्धरे।

समवत्तु‡ फलं यस्मात् वादित्रात् धर्म्मसंस्थितः॥

सम्यक् कालप्रयोगेण सन्निपातेन वा पुनः।

---

* युक्तमन्तस्थिरो इति पुस्तकान्तरे पाठः।

† जगरणे सदेति पुस्तकान्तरे पाठः।

‡ समवक्ष्य इति पुस्तकान्तरे पाठः।

नववर्षसहस्राणि नववर्षशतानि च ॥
कुबेरभवनं गत्वा मोदतेऽसौ यदृच्छया।
कुबेरभवनाद्भ्रष्टः स्वच्छन्दो धनवान् सुखी ॥
सम्यक्कालनिपातेन मम लोकाय गच्छति।
नर्त्तनस्य प्रवक्ष्यामि तच्छृणु त्वं वसुन्धरे ॥
मनुजा येन गच्छन्ति छित्वा संसारसागरं।
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ॥
पुष्करद्वीपमासाद्य स्वच्छन्दगमनोभवेत्।
नृत्यंस्तु जागरे देवि मम कर्म्मपरायणः ॥
रूपवान् गुणवांश्चैव शीलवांश्चैव जायते।
मद्भक्तश्चैव जायेत संसारादपि मुच्यते ॥
यस्तु जागरणे नृत्ये मम कर्म्मपरायणः।
जम्बूद्वीपं समासाद्य राजराजः स जायते ॥
सर्व्वकर्म्मसमायुक्तो रचिता पृथिवीतले।
मद्भक्तश्चैव जायेत शूरः सर्व्वगुणान्वितः ॥
उपगच्छेत्तु मामन्ते* मम कर्म्मपथे स्थितः।
एतत्ते कथितं भूमि गीतवादित्रनर्त्तनं ॥
मद्भक्तानां सुखार्थाय सर्व्वसंसारमोचणं।

इह खलु निखिलस्मृतिपुराणनिगमादिविहितमेकादशीव्रतं।
तत्र वहवो विप्रतिपद्यन्ते† ।

---

* उपगच्छेद्धमामन्ते इति पुस्तकान्तरे पाठः।

† एकादश्यामन्नप्रतिषेधमात्रमित्येके। उपवासव्रतमित्यपरे। व्रतत्वे च नित्यं काम्यमिति द्वेधा स्थितिः। तत्र नित्यमधिकृत्य कात्यायनवचनौ इति पुस्तकान्तरे पाठः।

एकादश्यामुपवसेत्पक्षयोरुभयोरपि।

विष्णुरहस्यस्कन्दपुराणयोः।

उपोष्यैकादशीं सम्यक् पक्षयोरुभयोरपि।

गरुडपुराणे।

उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि।

सनत्कुमारप्रोक्तं।

एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः

तथा। एकादश्यामुपवसेत् न कदाचिदतिक्रमेत्॥

मत्स्यभविष्यपुराणयोः।

एकादश्यां निराहारो यो भुङ्क्ते द्वादशीदिने।

शुक्ले वा यदिवा कृष्णे तद्व्रतं वैष्णवं महत्॥

आग्नेयपुराणे।

एकादश्यां न भुञ्जीत व्रतमेतद्धि वैष्णवं।

उपवासपरमिदंवचनंयुगलं, व्रतमितिवाक्यशेषात्॥

विष्णुधर्म्मोत्तरे कूर्म्मपुराणे च*।

न शङ्के न पिबेत्तोयं न खादेत् कूर्म्मशूकरौ।

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि॥

नारदीयपुराणे।

पद्मोरटतेत्यर्थं मृगारिरिपुमस्तके।

अभुक्ता दशमीं लोका ममत्वेन विवर्जिताः॥

प्राणबाधेषु कार्य्येषु देवैश्चिन्त्यतां हरिः।

---

* पद्मपुराणेचेति पुस्तकान्तरे पाठः।

रटन्तीह पुराणानि भूयो भूयो वरानने॥
न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे।

विष्णुस्मृतौ।

एकादश्यां न भुञ्जीत कदाचिदपि मानवः।

एतान्यपि वचनानि नादित्यमीक्षतेति च वदत उपवासव्रतपराण्येव क्वचित् क्वचिदुपवासप्रतिपादनाच्च।

अर्थविधौ मूलभूतवेदान्तर कल्पनाप्रसङ्गाल्लक्षणाप्रसङ्गाच्च एकमूलत्वाय लक्षणात्वनुमतैव।

यद्वैकादश्यामुपवसेदित्युपक्रम्य एकादश्यां न भुञ्जीतेति देवलादिवचनं तदुप संहारार्थं गुणविधानार्थं वा तथा चोपवासप्रकरणपठनमप्युचितं* भवति।

तेन स्वतन्त्रं नार्थविधिपरमेव मादिवचनमितिमतमपास्तं॥

तथाच सिद्धश्चोपवासोव्रतरूप. सच नित्यः फलाश्रवणात् कल्पनायां प्रमाणाभावात् विहितत्वाच्च सदाकरणं न कदाचिदतिक्रमेदितिवचनात् अकरणे प्रत्यवायस्मरणाच्च।

तथा हि सनत्कुमारप्रोक्तौ।

न करोति हि यो मूढ़ एकादश्यामुपोषणम्।
स नरोनरकं याति रौरवं तमसावृतम्॥
तथा। एकादश्यां मुनिश्रेष्ठ यो भुङ्क्ते द्विजपुङ्गवः†।

---

* समुचितमिति पुस्तकान्तरे पाठः।

† द्विजजन्मवातिति पुस्तकान्तरे पाठः।

प्रतिग्रासं स भुंक्ते च मलं कुष्ठीसमुद्भवमिति* ॥
निष्कृतिर्ब्रह्महप्रोक्ता धर्मशास्त्रे मनीषिभिः।
एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदिता ॥
मद्यपानान्मुनिश्रेष्ठ पापी च नरकं व्रजेत्† ।
एकादश्यन्नकामस्तु पितृभिः सह मज्जति ॥

नारदीये।

सोऽश्नाति पार्थिवं पापं योऽश्नाति मधुभिद्दिने।
तथा। यानि कानि च पापानि ब्रह्महत्यासमानि च ॥
अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे।
तानि पापानि वाप्नोति भुञ्जानो हरिवासरे॥

स्कान्दपुराणे।

मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा।
एकादश्यां तु भुञ्जानो विष्णुलोकात् च्युतो भवेत् ॥

स्वीकृतव्रतपरित्यागे च पापं कृतं।

विष्णुरहस्ये।

समादाय विधानेन द्वादशीव्रतमुत्तमम्।
तस्य भङ्गं नरः कृत्वा रौरवं नरकं व्रजेत् ॥
तथा द्वादशी व्रतमादाय व्रतभङ्गं करोति यः।
द्वादशाब्दव्रतं चीर्णमफलं तस्य जायते ॥
परिगृह्य व्रतं सम्यगेकादश्यादिकं यदि।
न समापयते तस्य गतिः पापा गरीयसी ॥

---

* पृथ्वीसमुद्भवमिति पुस्तकान्तरे पाठः।

† पाताचेति पुस्तकान्तरेपाठः।

नारदीये।

एकादश्यां विना रक्षा यतिश्च सुमहामते।
पच्यते ह्यन्धतामिस्रे यावदाभूतसंप्लवम्॥

कात्यायनः।

विधवा या भवेन्नारी भुञ्जीतैकादशीदिने।
तस्यास्तु सुकृतं नश्येत् ब्रह्महत्यादिने दिने*॥

विष्णुरहस्ये।

द्वादशी न प्रमोक्तव्या यावदायुःसुवृत्तिभिः।

अग्निपुराणे।

उपोष्यैकादशी राजन् यावदायुःसुवृत्तिभिः।

विष्णुरहस्यस्कन्दपुराणयोः।

परमापदमापन्नोहर्षेवा समुपस्थिते।
सूतके मृतके वापि न त्याज्यं द्वादशीव्रतम्॥

ऋष्यशृङ्गः।

एकादश्यां न भुञ्जीत नारी दृष्टे रजस्यपि।

पुलस्त्योऽपि।

संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम्।
सूतकादावुपवासमात्रं कार्य्यं न पुनरर्च्चनादि।

विष्णुरहस्यस्कन्द पुराणे।

सूतकेऽपि नरः स्नात्वा प्रणम्य मनसा हरिं।
एकादश्यां न भुञ्जीत व्रतमेवं न लुप्यते॥
सूतकेऽपि न भुञ्जीत एकादश्यां सदा नरः।

---

* भ्रूणहत्येति पुस्तकान्तरे पाठः।

द्वादश्यां तु समश्नीयान्नीवा विष्णुं प्रणम्य च॥

केचित्तु पुत्रवतोऽगृहिणः कृष्णैकादश्यामुपवासे नाधिकार इत्याहुः।

यदाह पैठीनसिः।

कृष्णैकादश्यां संक्रान्त्यां ग्रहणे चापि वा पुमान्।
उपवासं न कुर्वीत सर्वबन्धुधनक्षयात्॥
संक्रान्त्यां कृष्णपक्षे च रविशुक्रदिने तथा।
एकादश्यां न कुर्वीत उपवासञ्च पारणम्॥

गौतमः।

आदित्येऽहनि संक्रान्तावसितैकादशीसु च।
व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद्गृही॥

कात्यायनः।

एकादशीषु कृष्णासु रविसंक्रमणे तथा।
चन्द्रसूर्योपरागे च न कुर्य्यात् पुत्रवान् गृही॥

उपवासमितिशेषः।

नैतत्साधीयः, कृष्णैकाश्यादिनिमित्तकाम्योपवासप्रतिषेधपरत्वादेषां वचनानां।

तथा च कात्यायनः।

तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः।
प्रयुक्तान्तरयुक्तस्य न विधिर्न निषेधनम्॥

स्मृतिमीनांसायां जैमिनिः।

तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः।

नानुषङ्गकृतो ग्राह्योयतो नित्यमुपोषणम् ॥

अयमर्थः।

तन्निमित्तस्य भानुदिनदिनादिनिमि

त्तस्योपवासस्यायमुदाहृतोनिषेधः ॥

नतु भानुवाराद्यनुषक्तैकादश्युपवास विषयः।

यत एकादश्यामुपोषणं नित्यमवश्यकर्त्तव्यं

तथा विहितं, न च तस्य निषेधः कल्प्यते विकल्पापत्तेः।

नच संक्रान्त्यादीनामेकादशीविशेषणत्वं।

चन्द्रसूर्य्यग्रहणसाहचर्य्यात् असमानविभक्तिनिर्देशात् तथा पदप्रयोगाच्च संक्रान्त्यादियुक्तायामप्येकादश्युपवासविधानाच्च।

तथा सनत्कुमारप्रोक्ते ॥

भानुवारेण या युक्ता तथा संक्रान्तिसंयुता।

एकादशी सदोपोष्या सर्व्वसम्पत्करी तिथिः।

कात्यायनः।

संक्रान्तौ रविवारे वा एकादश्यां यदा भवेत्।

उपोष्या सा महापुण्या सर्वपापहरा हि सा ॥

तथा। व्यतीपातो वैधृतिर्वा एकादश्यां यदा भवेत्।

उपोष्या सा तु विज्ञेया पुत्रसम्पत्विवर्द्धनी ॥

श्राद्धदिनेषु विशेषमाह कात्यायनः।

उपवासो यदा नित्यं श्राद्धं नैमित्तिकं भवेत् ॥

उपवासं तदा कुर्य्यादाघ्राय पितृसेवितं।

अस्त्येव गृहिणः पुत्रवती रुक्माङ्गदादेः

कृष्णैकादश्युपवासश्रवणं ।

किञ्च । स्त्रीकृतउभयैकादशीव्रतोपावसः पुत्रजन्मनि कृष्णै-
कादशीपरित्यागप्रसङ्गः ।

तथा च । समादाय विधानेन द्वादशीव्रतमित्यादिवचन
विरोधात् ।

अपरन्त्वेकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
वनस्थयतिधर्म्मोऽयं शुक्लामेवं सदा गृही ॥

गौतमवचनबलाद्गृहिणः ।

शुक्लायामेवोपवासः तद्व्रतंवैष्णवं महदितिवचनविरोधः
स्यात् ।

अपरथा वैष्णवोवाथ शैवो वा कुर्य्यादेकादशीव्रतमिति मत्स्य-
पुराणवचनविरोधः स्यात् ।

अतः सर्व्वेषां उभयैकादश्युपवासेऽधिकारइति युक्तम् ।

तथा च स्कन्दकूर्म्मपुराणयोः ।

यथा शुक्ला तथा कृष्णा न विशेषोस्ति कश्चन ॥

सनत्कुमारप्रोक्ते ।

यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा ।

नारदीयपुराणे ।

तस्मात् श्रद्धां पुरस्कृत्य कृष्णे शुक्ले हरेर्द्दिने ।
पूजयेज्जगतां वीज सोपवासोजनार्द्दनं ॥
सद्योगैर्यत्पदं सांख्यैः प्राप्यते वा नवा द्विज ।
अनायासेन यत् प्राप्यं पदं हरिदिनानुगैः ॥

तस्य देवस्य नेदिष्ठं मूर्त्तिद्वयमिदं स्मृतं।
पावको ब्राह्मणश्चेति तत्त्वज्ञेयानुभावत॥
भविष्यत् पुराणे।
शुक्ला वा यदि वा कृष्णा विशेषोनास्ति कश्चन।
सौरधर्म्मेषु, एकादशी सदोपोष्या शुक्ला कृष्णा तथैव च।
मत्स्य पुराणे।
यथा सुपूजितोगौरः कृष्णो वा वेदविद्द्विजः।
सन्तारयति दातारमेकादश्यौ तथा स्मृते॥
तैले शुक्लेतराणां वै तिलानां सदृशं यथा।
कृष्णायाश्च सितायाश्च गोर्गव्यं सदृशं यथा॥
द्वादश्याः सदृशं तद्वत् पुण्यं स्याच्छुक्लकृष्णयोः।
दर्शश्च पूर्णमासी च पुण्यतस्तु यथा समे॥
तथा तथा सिते पुण्ये द्वादश्यौ मुनिभिः स्मृते।
यथोत्तरदक्षिणञ्च अयने च प्रकीर्त्तितम्॥
तुल्यं पुण्यमवाप्नोति द्वादश्योस्तु तथोभयोः।
पद्म पुराणे।
सोम सूर्य्यग्रहौ पुण्यौ तथैव मुनिभिः स्मृतौ॥
तथा तथा सिते पुण्ये द्वादश्यां धर्म्मतः समे।
यथा विष्णुः शिवश्चैव सम्पूज्यौ मुनिभिः स्मृतौ॥
तथा पूज्यतमे प्रोक्ते द्वादश्यौ शुक्लकृष्णके।
इति शुक्लकृष्णविवेके पापस्मरणात्।
तथा च कूर्म्मपुराणे, विष्णुधर्म्मोत्तरे च।
सुब्रह्महा सुरापः स्यात् कृतघ्नो गुरुतल्पगः।

स्कन्दपुराणे।

सुब्रह्महा सगोघ्नश्च सुरापो गुरुतल्पगः।

कालिकापुराणे।

सर्व्वेषामिह पापानामाश्रयः स तु कीर्त्तित इति

तेषामुत्तरार्थं विविचयति।

यश्च मोहादेकादश्यौ शुक्लकृष्णे सितासिते।

भविष्यत् पुराणे।

एवं ज्ञात्वा सदोपोष्या द्वादशी शुक्लकृष्णजा।

तयोर्भेदं न कुर्व्वीत तद्भेदान्नरकं व्रजेत्॥

गारुड़पुराणे।

शुक्ला वा यदि वा कृष्णा यावदाहूतसंप्लवं।

अथैकादशीव्रताकरणेन निन्दा। सनत्कुमारप्रोक्ते

शुक्ला वा यदि वा कृष्णा विशेषो नास्ति कश्चन।

विशेषं कुरुते यस्तु पितृहा स तु कीर्त्तितः॥

सनत् कुमारप्रोक्ते।

एकादश्योर्द्वयोर्यस्तु विशेषं कुरुते नरः।

तस्योद्धारं न पश्यामि यावदाहूतसंप्लवम्॥

अथैकादशीव्रताकरणनिन्दा। सनत्कुमारप्रोक्ते।

न करोति हि यो मूढ़ एकादश्यामुपोषणं।

स नरोनरकं याति रौरवं तमसावृतम्॥

तथा तथा मुनिश्रेष्ठ योभुङ्क्ते द्विजजन्मवान्॥

तथा। प्रतिग्रासं स भुङ्क्ते तु किल्विषं श्वादिविट्समं।

निष्कृतिर्म्मद्यपस्योक्ता धर्म्मशास्त्रे मनीषिभिः॥

एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदिता ।
मद्यपानान्मुनिश्रेष्ठ पातैव नरकं व्रजेत् ॥
एकादश्यन्नकामस्तु पितृभिः सह मज्जति ।

नारदीयपुराणे ।

सोऽश्नाति पार्थिवं पापं योऽश्नाति मधुभिद्दिने ।
तथा । यानि कानि च पापानि ब्रह्महत्यासमानि च ॥
अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे ।
तानि पापान्यपाप्नोति भुञ्जानो हरिवासरं ॥
दिने च सर्व्वपापानि भवन्त्यन्न स्थितानि तु ।
तानि मोहेन योऽश्नाति न स पापैः प्रमुच्यते ॥
तस्मादवश्यं कर्त्तव्या द्वादशी सोमकालजा ।
स केवलं मलं भुङ्क्ते योभुङ्क्ते हरिवासरे ॥

स्कन्दपुराणे ।

मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा ।
एकादश्यां तु भुञ्जानो विष्णुलोकाच्चुतो भवेत् ॥

नारदीयपुराणे ।

रण्डा, यतीनामेकादशीव्रतस्याकरणे प्रत्यवायविशेषमाह ।
एकादशीं विना रण्डा यतिश्च सुमहामते ।
पच्यते ह्यन्धतामिस्रे यावदाहूतसंप्लवम् ॥

कात्यायनश्च ।

विधवा या भवेन्नारी भुञ्जीतैकादशीदिने ।
तस्यास्तु सुकृतं नश्येद्भ्रूणहत्या दिने दिने ॥
स्वीकृतव्रतपरित्यागे पापमुक्तम् ।

विष्णुरहस्ये ।

समादाय विधानेन द्वादशीव्रतमुत्तमम् ।
तस्य भङ्गं नरः कृत्वा रौरवं नरकं व्रजेत् ॥

तथा । द्वादशीव्रतमादाय व्रतभङ्गं करोति यः ।
द्वादशाब्दं व्रतं चीर्णमफलं तस्य जायते ॥

तथा । परिगृह्य व्रतं सम्यगेकादश्यादिकं यदि ।
न समापयते तस्य गतिः पापा गरीयसी ॥

अथास्मिन् दिने अधिकारिणमाह कात्यायनः ।

अष्टवर्षाधिकोमर्त्यो ह्यपूर्णाशीतिवत्सरः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ।

नारदीयपुराणे ।

अष्टवर्षाधिकोमर्त्यो अशीतिर्नहि पूर्य्यते ।
यो भुङ्क्ते मामके राष्ट्रे विष्णोरहनि पापकृत् ॥
स मे वध्यश्च दण्ड्यश्च विवास्योदेशतः स मे ।

कात्यायनः ।

एतस्माद् कारणाद्विप्र एकादश्यामुपोषणं ।
कुर्य्यान्नरोवा नारीवा पक्षयोरुभयोरपि ॥

अत्रानुकल्पे सर्व्वएवाधिकारी ज्ञातव्यः ।]

यथाह ब्रह्मवैवर्त्ते ।

एकादशीं विना विप्र न संसाराद्विमोचणम् ।
तत्राप्ययं विशेषोऽस्ति कार्य्यशक्तिमताञ्च सः ॥
न तु देहं विदुःप्राज्ञोपीड़यानो महाग्रहात् ।
शरीरं पीडयते येन सुशुभेनापि कर्म्मणा ॥

अत्यन्तं तन्नकुर्व्वीत* अनायासः स उच्यते ।
धर्म्मसाधनमाद्यं यः शरीरं बहुपुण्यकृत् ॥
यथाकथञ्चिन्मौर्ख्यान्न पीडयेदेव हेलया† ।
गूढ़याहिणात्मनो यः पीडया कुरुते तपः ॥
न स सिद्धिमवाप्नोति न सुखं न परां गतिं ।
अधिकारिणोऽसामर्थ्ये प्रतिनिधिमाह ।

वाराहपुराणे ।

असामर्थ्ये शरीरस्य व्रते तु समुपस्थिते ।
कारयेद्धर्म्मपत्नीं वा पुत्रं वा विनयान्वितम् ॥
भगिनीं भ्रातरं वापि व्रतमस्य न लुप्यते ।
शृणु योवान्यमुद्दिश्य एकादश्यामुपोषति ॥
यमुद्दिश्य कृतो विप्रस्तस्य पूर्णफलं भवेत् ।
कर्त्ता दशगुणं पुण्यं प्राप्नोत्यस्य न संशयः ॥

अथोपवासव्रतानुष्ठानक्रमः ।

तत्रोपवासस्य सामान्येन स्वरूपं ।

यथाह वसिष्ठः ।

उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह ।
उपवासः स विज्ञेयः सर्व्वभोगविवर्जितः‡ ॥

पापेभ्यो उपावृत्तस्य वर्ज्येभ्यो निवृत्तस्य, गुणैर्विष्णुनामकीर्त्तनादिभिः ।

---

* अत्यल्पमिति पुस्तकान्तरे पाठः ।

† पपद्येदेकहेलयेति पुस्तकान्तरे पाठः ।

‡ न शरीरविशोषणमिति पुस्तकान्तरे पाठः ।

एतदुपवासव्रतं द्विविधं नित्यं फलार्थञ्च।

नित्ये तु यथाकथञ्चिदेकादश्यां भोजनद्वयपरिहाररूपेणोपवासव्रतेन प्रत्यवायपरिहारः।

तथाच ब्रह्मवैवर्त्ते।

इति विज्ञाय कुर्व्वीतावश्यमेकादशीव्रतम्।
विशेषनियमाशक्तोऽहोरात्रं भुक्तिवर्ज्जितः॥
निगृहीतेन्द्रियः श्रद्धासहायोविष्णुतत्परः।
उपोष्यैकादशीं पापान्मुच्यते नात्र संशयः॥

कात्यायनश्च।

अथ नित्योपवासी चेत्सायम्प्रातर्भुजिक्रियां।
सप्तजन्मेति मान्देवि संप्राप्ते हरिवासरे॥

अथ फलार्थमुपवासव्रतस्वरूपं तत्रैवाह।

शक्तिमांस्तु पुनः कुर्य्यान्नियमं सविशेषणं।
सायमाद्यन्तयोरह्नोः प्रातःसायञ्च मध्यमे।
उपवासफलं प्रेप्सुर्जह्यात् भक्तचतुष्टयम्*॥

इति नित्यकाम्ययोरुपवासव्रतयोरन्यतरमारभमाणः प्रथमदशम्यां भोजनानन्तरं दन्तधावनं कुर्य्यात्।

तदाह। दशम्यां दन्तकाष्ठेन जिह्वां लेढि† यथायथा।
द्वादशीनियमार्थाय निराशः स्योद्यमस्तथा॥
निर्म्मार्जयति तत्पापं तटस्थं दीनमानसः।
अभुक्तकर्म्मा यद्याति पातकी वैष्णवं पदम्॥

---

* वर्ज्ज्यभक्तचतुष्टयमिति पुस्तकान्तरे पाठः।

† जिघ्रिमिति पुस्तकान्तरे पाठः।

ततो दशम्यां रात्रौ नियमग्रहणाय सङ्कल्पङ्कुर्य्यात्।

ब्रह्मवैवर्त्ते।

प्राप्ते हरिदिने सम्यक् विधाय नियमं निशि।
दशम्यामुपवासस्य प्रकुर्य्याद्वैष्णवं व्रतम्॥

सङ्कल्प मन्त्रहेतु दैवतान्याह।

एकादश्यां निराहारः स्थित्वाहमपरेऽहनि।
भोक्ष्यामि पुण्डरीकाक्ष तारणं* मे भवाच्युत॥

इति संकल्पं विधाय एकादशीदिने देवस्य पुष्पमण्डपं विरचयेत्।

यथाह ब्रह्मपुराणे।

देवस्योपरि कुर्वीत श्रद्धया सुसमाहितः।
नानापुष्पैर्मुनिश्रेष्ठा विचित्रं पुष्पमण्डपं॥
कृत्वा चावरणं पश्चाज्जागरं कारयेन्निशि।

एवं मण्डपं विधाय रात्रौ देवं पूजयेत्।

तथा भविष्यत्पुराणे।

एकादश्युपवासेन रात्रौ संपूजयेद्धरिं।
तां च रात्रिं यथाशक्ति पुराणश्रवणादिना॥

नीत्वेति शेषः।

ब्रह्मवैवर्त्ते।

तस्माच्छ्रद्धां पुरस्कृत्य शुक्लां कृष्णाञ्च द्वादशीम्।
संप्राप्य पूजयेद्देवं सोपवासो जनार्दनम्॥

---

* शरणं मे भवाच्युतेति पुस्तकान्तरे पाठः।

ब्रह्मपुराणे। व्यास उवाच।

एकादश्यामुभे पक्षे निराहारः समाहितः।
स्नात्वा सम्यग्विधानेन सोपवासो जितेन्द्रियः॥
सम्पूज्य विधिवत् विष्णुं श्रद्धया सुसमाहितः।
पुष्पैर्गन्धैस्तथाधूपैर्दीपैर्नैवेद्यकैः परैः।
उपवासैर्बहुविधैर्जप्यहोमप्रदक्षिणैः॥
स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यमनोहरैः।
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः॥

एवं संपूज्य जागरं कुर्य्यात्।

अत्रैवाह। एवं संपूज्य विधिवद्रात्रौ कुर्य्यात् प्रजागरं।

अत्रैवाह।

कथां च गीतिकां विष्णोर्गाहयन्विष्णुपरायणः॥
याति विष्णोः परं स्थानं नरोनास्त्यत्र संशयः।
कथां च वासुदेवस्य गीतकं वापि कारयेत्।
ध्यायन् पठंस्तुवन् देवं पूजयेद्रजनीं बुधः॥

एवं जागरं निर्वर्त्त्य द्वादश्यां प्रभाते स्नात्वा विष्णुं संपूज्य उपवासं समर्पयेत्।

अज्ञानतिमिरान्धस्य व्रतेनानेन केशव।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव॥

इति मन्त्रेण देवाय उपवासं संकल्पयेत् ततः पारणं कुर्य्यात्।

तथा। पारणन्तु ततः कुर्य्याद्यथासम्भवमार्गतः।

एतच्च पारणं तुलसीमिश्रं कुर्य्यादित्याह।

स्कन्दपुराणे।

कृत्वा वै चोपवासन्तु योऽश्नाति द्वादशीदिने।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम्॥

एवं दशमीमारभ्य पारणान्तं सर्व्वं नियमयुक्तं व्रतं निवर्त्तयेत्।
ते च नियमा उच्यन्ते विष्णुधर्मोत्तरे।

क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः॥
शिवपूजाग्निहोत्रञ्च सन्तोषास्तेयभावनाः।
सर्व्वव्रतेष्वयं कर्मसामान्यं दशधा स्मृतः॥

तान्याह मनुः।

विहितस्यानुष्ठानमिद्रियाणामनिग्रहः*।
निषिद्धसेवनं नित्यं वर्जनीयं प्रयत्नतः॥

कूर्मपुराणे।

कांस्यं माषंमसूरञ्च चणकं कोरदूषकान्।
शाकं मधु परान्नञ्च वर्जयेदुपवसन्निति॥

मत्स्यपुराणे।

कांस्यं मांसं मसूरञ्च चौद्रं तैलं वितथभाषणम्।
व्यायामञ्च प्रवासञ्च दिवास्वप्नमथाञ्जनम्॥
शिलापिष्टं मसूरञ्च द्वादशैतानि वैष्णवः।

त्यजेदिति शेषः।

हारीतः।

पतित, पाखण्डि नास्तिकादिसम्भाषणानृतद्यूतादिकमुपवासदिने वर्जनीयमिति।

---

* निन्दितस्य च सेवनादिति पुस्तकान्तरे पाठः।

विष्णुधर्मोत्तरे।

तज्जप्यजापी तद्ध्यानतत्कथाश्रवणादिकं।
तदर्चनञ्च तन्नामकीर्त्तनश्रवणादयः।
उपवासकृतोह्येते गुणाः प्रोक्ताः मनीषिभिरिति॥

विष्णुरहस्ये।

ब्रह्मोवाच।

मनसा कर्मणा वाचा पूजयेन्नरुड़ध्वजं।
कुर्य्यान्नरस्त्रिषवणं ब्रह्मचर्य्यं जितेन्द्रियः॥
नामावलोकनालापं* विष्णोः कुर्य्यादहर्निशं।
भक्त्या विष्णोस्तुतिर्वाच्यामृषावादं विवर्जयेत्॥
सर्वसर्वदयायुक्तः शान्तिवृत्तिरहिंसकः।
सुप्तोवा शयनस्थो वा वासुदेवं प्रकीर्त्तयेत्।
स्मृत्यालोचनगन्धादिलेपनं† परिकीर्त्तनम्॥
अन्यस्य वर्जयेत्सर्वं मांसानां चाभिकांक्षणम्।
गात्राभ्यङ्गं शिरोऽभ्यङ्गन्ताम्बूलं सविलेपनम्॥
व्रतस्थोवर्जयेत्सर्वं यच्चान्यच्च निराकृतम्।
व्रतस्थो न गृहे किञ्चिद्विकर्म्मस्थैर्नचालपेत्।
देवतायने तिष्ठन् न गृहस्थश्चरेद्व्रतम्॥

ब्रह्मपुराणे।

उपवासे तथाश्राद्धे नखादिदन्तधावनम्।
दन्तानां काष्ठसंयोगो हन्ति सप्त कुलानि वै॥

---

* नाम्नानेवलेचालायमिति पुस्तकान्तरे पाठः।

† गन्धादिस्थाननमिति पुस्तकान्तरे पाठः।

विष्णुधर्मेषु।

पाषण्डिभिरसंसर्गो ह्यसत्याश्रमणमेव च।
विष्णोराराधनं यत्र नरैः कार्य्यमुपोषितम्॥

पद्मपुराणात्।

त्यौषधं परान्नञ्च पुनर्भोजनमैथुनम्।
क्षौद्रं तिलामिषञ्चैव द्वादश्यां सप्त वर्जयेत्॥

एते नियमाः सङ्कल्पपारणान्तमेव विधेयाः।
पारणेनैव व्रतपरिसमाप्तेः।

अत ऊर्द्ध्वं यथेच्छया पारयेच्च यथा रुचीति कात्यायनोक्तत्वात्।
उपवासव्रताशक्तस्य नक्तादिकमाह।

भविष्यत्पुराणे।

एकादश्यामुपवसेन्नक्तं वापि समाचरेत्।

कूर्मपुराणे।

एकभक्तेन नक्तेन क्षीणवृद्धातुरो क्षिपेत्।
नातिक्रमेद्द्वादशीं तु उपवासव्रतेन तु॥

मार्कण्डेयपुराणे।

एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन दानेन न निर्द्वादशिको भवेत्*।

नित्यैकादशीविधिः। वज्र उवाच।

अकामेन कथं ब्रह्मन् द्वादशीषु जनार्दन।
पूजनीयो द्विजश्रेष्ठ तन्मे चाख्यातुमर्हसि॥

---

* नैवाद्वादशिको भवेदिति पुस्तकान्तरे पाठः।

मार्कण्डेयउवाच।

मार्गशीर्षस्य मासस्य श्रुत्वा सर्व्वं त्वया बुध।
अश्नीयान्मासिमास्येवं कुर्य्यात्संवत्सरं व्रती॥
नामानि देवदेवस्य केशवस्य पृथक् पृथक्।
कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्द्दनः॥
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः।
योगेशः पुण्डरीकाक्षोमासनामान्यनुक्रमात्॥
एतानि प्रातरुत्थाय यः स्मरेत् पुरुषःसदा।
अपि दुर्गतिकास्तस्य पितरः स्वर्गमाप्नुयुः॥
तिलपात्रं द्वादशकं योदद्यात् प्रत्यहं द्विजे।
गावश्च कपिला दद्यात् जपेत् नामानि वै समाः॥
मासोपवासिनां पुण्यं मज्जनां तीर्थयायिनां।
पूज्यते देवदेवस्य प्रत्यहं मासनामभिः॥
प्रतिमासं स्वनाम्नैवं पूजादानादिकं हरेः।
नामयस्मिन् मासे च यत् प्रोक्तं तेनैवेत्यर्थः।
कल्पान्ते च ततो होमः कार्य्यस्तद्दैवतापदे।

अन्ते व्रतान्ते।

अग्निप्रणयणादूर्द्धं द्वादशैतानुस्मरेत्॥
द्वादशाश्वत्थपत्रेषु स्थापयेत्कुलतण्डुलैः।
ओं तस्मै नमः आयातु स इत्यावाहयेत् पृथक्।
संस्थाप्याग्निं ततः प्राच्यां ध्यायेन्नानामसंमुखान्।
आसनं पाद्यमर्घ्यञ्च गन्धपुष्पार्चनानि च।

धूपदीपांश्च वासांसि होमशेषं समापयेत् ॥

दत्त्वा वाचमनं पश्चाद्धोमशेषं निवेदयेत् ।

अष्टाष्टसमिधः पूर्व्वं हुत्वाष्टौ च घृताहुतीः ॥

कृशराहुतिरेका च यवाश्चाष्टौ तिलाहुतीः ।

देवोपहारशेषेण दत्त्वा स्विष्टकृतं ततः ॥

अग्निप्रतिष्ठान्तहोमं कृत्वा देवेभ्य

आसनाद्याचमनं दत्त्वा शेषहोमं समाप्य हुतशेषं देवेभ्यो-निवेद्य तच्छेषेण स्विष्टकृतं दद्यात् ।

पूर्णाहुत्या भवेन्मन्त्रस्तद्विष्णोः परमं पदम् ।

एवं कृते तु होमान्ते गाः कृष्णा द्वादशाष्ट वा ॥

षट् चतस्त्रोऽथ वा देया एकावापि पयस्विनी ।

हेमशृङ्गीं रौप्यखुरां सघण्टाभरणाम्बराम् ॥

कांस्यपृष्ठां तथा दोग्ध्रीं सुवर्णान्तरदक्षिणाम् ।

सवत्सां द्विजमुख्याय पूजयित्वा समर्पयेत् ॥

कृष्णभक्ताय शान्ताय विधिज्ञाय महात्मने ।

ते प्रीयन्तामिति प्रोक्ता देवद्वादशमासिकाः ॥

मामेवमुद्धरस्वेतिचेत्यावाह्य प्रतिग्रहाः ।

मासि मासि च दत्तेषु तिलपात्रेषु तैर्घटैः ॥

सहार्थे तृतीया न केवलमस्मिन् दाने प्रतिमासं घटदानेप्ययं मन्त्र इत्यर्थः ।

तस्मिन् काले प्रदातव्यास्ते घटा मासनामभिः ।

समानं तद्व्रतं पुण्यं तस्मादर्वाक् समर्पयेत् ॥

सूर्य्यायेति शेषः ।

समामेस्मिन्* व्रते भूमे यदभीष्टमवाप्यते ।
महारौरवपूर्व्वेभ्यो नरकेभ्योऽथ तारयेत् ॥
स्वपितुस्तत्पतेर्यामयो न स्यात् कल्पशतैरपि ।
ब्रह्महत्यादिपापानामश्वमेधैर्भवेत् क्षयः ॥
स्वकृतानां न वै भूमे कृतानां पितृभिःस्वकैः ।
अश्वमेधाद्वयाश्राद्धाद्व्रतमेतद्विशिष्यते ॥
पितृणामात्मनश्चैव तारकं सर्व्वकामदम् ।
नरकस्थाश्च ये केचिद्गर्भवासे रणे च ये ।
ये बाल्ये नरणेनापि भूत प्रेतत्वमागताः ॥
नेच्छन्ति सन्ततिं ये च मुच्यन्ते ते च किल्विषैः ।
उद्धारयेत्पितृगणान् दशपूर्व्वान् दशापरान् ।
आत्मानमेकविंशञ्च कृष्णद्वादश्युपोषणात् ॥

इति वाराहपुराणोक्तं कृष्णद्वादशीव्रतम् ।

अथ कृष्णद्वादशीव्रतम् ।

———ooo———

युधिष्ठिर उवाच ।

कृष्ण कृष्णा न मे ख्याता द्वादशी केन हेतुना ।
किं सा न ते प्रिया देव किं वाख्यातुं न युज्यते ।

कृष्ण उवाच ।

न कस्यचिन्मयाख्यातं गुह्यमेतदनुत्तमं ।

---

* नमामेरस्मिते इति पुस्तकान्तरे पाठः ।

महापुण्यप्रदं पार्थ महापातकनाशनम्॥
वाञ्छितार्थप्रदं नृणां श्रुतं पापापहारकम्।
श्रेष्ठं व्रतानां सर्व्वेषामुभयद्वादशीव्रतम्॥
तत्तेऽहं सम्प्रवक्ष्यामि समाहितमनाः शृणु।
ततोऽपराह्ने सन्तर्प्य कृतसन्ध्यादिकः शुचिः॥
प्राप्याज्ञां वेदविदुषः पुराणज्ञात् जितेन्द्रियात्।
संपूज्य देवदेवशन्दन्तधावनपूर्व्वकम्॥
कुर्य्याच्च नियमं पार्थ गुरुदेवाग्निसन्निधौ।
एकादश्यां निराहारः स्थित्वाहमपरेऽहनि॥
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत।
इत्युक्त्वाथ गुरून्नत्वा पूजयित्वा जनार्द्दनं॥
भूमौ स्वपेज्जितक्रोधः शब्दादिविषयोज्झितः।
ततः प्रभाते विमले केशवार्पितमानसः॥
केशवेति तदा वाक्यं क्षुतप्रस्खलितादिषु।
पाषण्डादिभिरालापं दर्शनस्पर्शनादिना॥
त्यजेद्दिनत्रयं पार्थ व्रतवैकल्यकारकम्।
ततोमध्याह्नसमये नद्यादौ विमले जले॥
स्नानं कुर्य्याज्जितक्रोधः पञ्चगव्यपुरःसरं।
स्नानं कृत्वैकचित्तस्तु प्रपूतात्मा दयान्वितः॥
आदित्याय नमस्कृत्य केशवं कारणं व्रजेत्।
उत्तीर्य्य परिधायौतकुक्तेऽच्छिद्रे च वाससी॥
पितृदेवमनुष्याणां दत्त्वातोयाञ्जलींस्ततः।
स्ववर्णाचारविधिना कृतकृत्योगृहं व्रजेत्॥

पूजयेत्तत्र गोविन्दं केशवेति जपन् बुधः ।
पुष्पधूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि ।
गीतवाद्यैः कथाभिश्च जागरं कारयेन्निशि ॥
कुम्भं संस्थापयित्वा तु रत्नगर्भं सकाञ्चनम् ।
छादितं वस्त्रयुग्मेन शितचन्दनचर्च्चितं ॥
गन्धमाल्यसमायुक्तं दीपैर्दिक्षु स्वलंकृतम् ।
कुम्भस्यैकाङ्गदेशे तु शितचन्दनचर्चिताम् ॥
प्रतिमां देवदेवस्य शङ्खचक्रगदाभृतम् ।
कृत्वाभ्यर्च्य यथान्यायं प्रभाते विमले सति ॥
द्वादश्यां कृतकृत्यस्तु समभ्यर्च्च्य जगद्गुरुम् ।
विप्राय दद्यात् कलशं दक्षिणोपस्कारान्वितम् ॥
सम्भोज्य विप्रमुख्याय दद्याच्छक्त्या च दक्षिणां ।
भृत्यान् सम्भोजयित्वा तु दत्त्वा गोषु गवाह्निकं
पञ्चगव्यन्तु सम्प्राश्य स्वयं भुञ्जीत वाग्यतः ।
अनेन विधिना मासि तस्मिन् कृष्णामुपोषयेत् ॥
द्वादशीं पुरुषव्याघ्र ध्यायन् सङ्कर्षणं विभुं ।
प्राग्वत्सर्व्वं ततः कृत्वा ब्राह्मणाय निवेदयेत् ॥
भोजयित्वा द्विजश्रेष्ठं दद्यात्तेभ्यश्च दक्षिणां ।
भुञ्जीत वाग्यतः पश्चात् पञ्चगव्यहुताशनं ॥
एवं पौषे तु सङ्कल्प्य द्वादश्यां शुक्लपक्षतः ।
नारायणं जपन् प्राज्ञः सर्व्वं प्राग्विधिमाचरेत् ॥
स्नानप्राशनदानानि भोजनं तद्वदाचरेत् ।
ब्राह्मणेभ्यस्तथा दद्याद्दक्षिणां यदुनन्दन ॥

नारायणः प्रीयतां मे इत्याचार्य्यं समापयेत्।
अस्यैव पुष्यमासस्य द्वादश्यां कृष्णपक्षतः॥
वासुदेवेति सम्पूज्य प्रागुक्तविधिना नृप।
देवदेवं जगन्नाथं सर्व्वकारणकारणम्॥
ततो दद्याद्द्विजातिभ्यो दक्षिणां श्रद्धयान्वितः।
भोजनं पूर्व्ववत् कुर्य्याद्दानं पूजादिकं ततः॥
शुक्लायां माघमासस्य द्वादश्यां तु विशाम्पते।
माधवेति जपन्नाम पूजयेत् पूर्व्ववद्धरिं॥
रात्रौ जागरणं तद्वत्पुष्पधूपप्रदीपकैः।
पूजयित्वा द्विजश्रेष्ठान् माधवः प्रीयतामिति॥
प्राशनादिकमेवात्र पूर्व्वोक्तविधिना स्मृतम्।
अस्यैव माघमासस्य द्वादश्यां कृष्णपक्षतः॥
प्रद्युम्नेति जपन् प्राज्ञः सर्व्वं प्राग्विधिमाचरेत्।
स्नानप्राशनदानानि भोजनं तद्वदेव हि॥
ब्राह्मणेभ्यस्तथा दद्याद्दक्षिणां पाण्डुनन्दन।
फाल्गुनामलपक्षस्य द्वादश्यां नियतः शुचिः॥
गोविन्देति जपन्विष्णोः पूजयेत् प्रतिमान्नरः।
विप्राय दक्षिणां दद्याद्गोविन्दः प्रीयतामिति॥
जपपूजनदानानि पूर्व्वेण विधिनाचरेत्।
फाल्गुनस्य तथा कृष्णद्वादश्यां नियतेन्द्रियः॥
अनिरुद्धेति कृष्णस्य जपन् पूर्व्ववदाचरेत्।
तेनैव विधिना पार्थ सर्व्वपापापहारणं॥
पुष्पधूपनैवेद्यैश्च गन्धदीपादिशोभया।

नैवेद्याद्युपचारैस्तु पूर्व्वं दानं समाचरेत्॥
अनिरुद्धः प्रीयतां मे दानकाले त्युदीरयेत्।
चैत्रस्यामलपक्षे तु द्वादश्यां पाण्डुनन्दन॥
पञ्चगव्यजलैः स्नात्वा विष्णुनामानुकीर्त्तयेत्।
उपस्थानं तु कुर्व्वीत भास्करस्य विचक्षणः॥
य एव भास्करोदेवः स वै विष्णुः प्रकीर्त्तितः।
विष्णुर्भवतु सुप्रीतोदेवदेवः सनातनः॥
भुक्तिमुक्तिप्रदानाय तव दत्तो मयाञ्जलिः।
इत्युक्त्वार्थ्याञ्जलिं क्षिप्त्वा गन्धपुष्पाक्षतैर्युतम्॥
पूर्व्ववद्देवमभ्यर्च्य दानं दद्याच्च शक्तितः।
विष्णुर्मे प्रीयतां देवो जगद्योनिः सनातनः॥
अस्मिन्मासि तथा कृष्णां द्वादशीं विधिना क्षिपेत्
स्नानभोजनकाले तु जपन्वै पुरुषोत्तमं॥
तेनैव विधिना पार्थ स्नानदानं समाचरेत्।
वैशाखस्यामले पक्षे द्वादश्यां विधिवन्नरः॥
कृत्वा स्नानादिकं सर्व्वं पूजयेन्मधुसूदनम्।
पूर्व्ववत् पुष्पधूपाद्यैर्गन्धदीपं निवेदयेत्॥
दक्षिणां गुरवे दद्यात् प्रीयतां मधुसूदनः।
इत्युक्त्वार्घ्ये महाबाहो सर्व्वं निष्पादयेदिदम्॥
मासेऽस्मिन् कृष्णपक्षे तु द्वादश्यां भरतर्षभ।
कृत्वा प्राग्विधिना सर्व्वं जपन् देवमधोक्षजं॥
पूजयन् प्रतिमां विष्णोः सुगन्धैः पुष्पचन्दनैः।
ततोदद्याद्विजातिभ्यो दक्षिणां वित्तसारतः॥

ज्यैष्ठमासामले पक्षे द्वादश्यां पूर्व्ववन्नृप।
स्नानादिसर्व्वं निर्व्वर्त्य पूजयेच्च त्रिविक्रमम्॥
पुष्पधूपादिनैवेद्यैः प्रभाते विमले सति।
प्राज्यक्षीराज्यसंभोज्यैर्भोजयित्वा द्विजोत्तमान्॥
ज्यैष्ठमासामले पक्षे द्वादश्यां पूर्व्ववन्नृप।
स्नानादिसर्व्वं निर्व्वर्त्य पूजयेच्च त्रिविक्रमं॥
पुष्पधूपादिनैवेद्यैः प्रभाते विमले सति।
प्राज्यक्षीराज्यसम्भोज्यैर्भोजयित्वा द्विजोत्तमान्॥
तेभ्यश्च दक्षिणां दद्यात् प्रीयतां मे त्रिविक्रमः।
इत्युच्चार्य्य नरव्याघ्र स्वयं भुञ्जीत पूर्व्ववत्।
ज्यैष्ठस्यैव हि कृष्णायां द्वादश्यां तु विशाम्पते॥
स्नात्वा प्राग्विधिना भक्त्या नृसिंहं पूजयेद्विभुम्।
पुष्पैर्धूपैस्तथादीपैर्गन्धैर्नैवेद्यकैरपि॥
वामनः प्रीयतां देवो मम नित्यं सनातनः।
भोजनं प्राग्विधानेन कर्त्तव्यं व्रतिना तदा॥
आषाढ़स्यैव कृष्णायां द्वादश्यां नियतः शुचिः।
पूजयेदच्युतं देवं तेनैव विधिना नृप।
निर्व्वर्त्य पूर्व्ववत्सर्व्वं प्रभाते निमले रवौ।
विप्राय दक्षिणां दद्यादच्युतः प्रीयतामिति॥
श्रावणस्य तु मासस्य द्वादश्यां शुक्लपक्षतः।
स्नात्वा पूर्व्वविधानेन श्रीधरेति जपन् बुधः॥
पूजयेद्देवदेवेशं शङ्खचक्रगदाधरम्।
ततोविप्राय दातव्या दक्षिणा शक्त्यपेक्षया।

विशेषान्नवनीतन्तु तदा देयं द्विजातये॥
श्रीधरः प्रीयतामित्य श्रियं पुष्णात्वमुत्तमां॥
इत्युच्चार्य्य कुरुश्रेष्ठ ततो विप्रान् विसर्जयेत्॥
ततो भुञ्जीत पूर्व्वोक्तविधिना सुसमाहितः।
श्रावणस्यैव कृष्णायां द्वादश्यां कुरुनन्दन॥
स्नात्वाभ्यर्च्याथ देवेशं तूर्ब्बोक्तविधिना ततः।
जनार्दनेति संपूज्य प्रतिमाञ्चक्रपाणिनः॥
ततो विप्रेषु दातव्यं भोजनं सहदक्षिणम्।
जनार्दनः प्रीयतां मे वाक्यमेतदुदीरयेत्॥
स्वयं भृत्यैस्ततः सार्द्धं भुञ्जीयात्पूर्व्ववन्नृप।
मासि भाद्रपदे भद्र द्वादश्यां शुक्लपक्षतः॥
पूर्व्ववत् कल्पयेत् सर्व्वं देवमभ्यर्च्चयेत्ततः।
हृषीकेशेति संकल्प्य क्षुतप्रस्खलितादिषु॥
ब्राह्मणान् भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम्।
विशेषेणार्च्चयेद्देवं क्षीरं विप्रेषु पाण्डव॥
हृषीकेशः प्रीयतां मे वाक्यमेतदुदीरयेत्।
क्षमापणं ततः पार्थ भुञ्जीयात् पूर्ववन्नृतो॥
कृष्णाप्येवं हि कर्त्तव्या मासि भाद्रपदे नृप।
उपेन्द्रेति च संपूज्य प्रतिमां शार्ङ्गधन्विनः॥
पूर्व्ववद्दक्षिणां दद्याद्विप्राणां भक्तितत्परः।
प्रीतये देवदेवस्य ममैव पाण्डुनन्दन॥
अश्वयुक्छुक्लपक्षे तु द्वादश्यां नियतः शुचिः।
स्नात्वा पूर्वविधानेन कृत्वा देवाय तर्पणम्॥

पद्मनाभेति नाम्ना वै पूजयेत् प्रतिमां हरेः॥
पूर्व्वोक्तविधिना सर्व्वं कृत्वा जारणादिकम्।
ततः प्रभाते विमले कृतस्नानादिकोऽग्रही॥
विप्रान् संभोजयित्वा च तेभ्यो हेम स्वशक्तितः।
ततः प्रदक्षिणं कुर्य्यात् प्रणिपत्य क्षमापयेत्॥
प्रीयतां पद्मनाभाय इति वाचमुदीरयेत्।
अश्वयुक्शुक्लपक्षे तु द्वादशीं भक्तिमान्नरः॥
उपोष्य विधिना तेन हरिरित्यपि पूजयेत्।
विप्राय दक्षिणां दद्याद्यथाशक्त्या नृपोत्तम॥
हरिर्मे प्रीयतां देवोमन्त्रमेतमुदीरयेत्।
कार्त्तिकस्य तु मासस्य द्वादश्यां शुक्लपक्षतः॥
आद्येन विधिना सर्व्वं स्नानादि विनिवर्त्य च।
शुक्लमाल्याम्बरधरः पाषण्डालापवर्जितः॥
गृहमभ्येत्य मेधावी विधिदृष्टेन कर्म्मणा।
कुर्य्याच्छोभादिकं सर्व्वं पुष्पधूपनिवेदनम्॥
वंशपात्रे च कर्त्तव्या सर्व्वकर्म्मसु भारत।
दामोदरायेति संपूज्य नाम देवस्य चक्रिणः॥
विशेषादुत्सवं कृत्वा गीतवाद्यादिभिर्नृप।
कृष्णाप्येवंतु निर्व्वर्त्य द्वादशी कार्त्तिके तदा॥
कृष्णेति नाम संपूज्य देवदेवस्य चक्रिणः।
प्रनुक्तस्य विधिः पार्थ विशेषान्न विधीयते॥
अस्मिन् व्रते केशवाद्या चतुर्विंशन्मूर्त्तयः पूजनीयाः।
अत्र देयानि नामानि षोड़शैव विधीयते॥

गोलक्षं गोसहस्रं वा गोशतं द्वादशैव गाः।
तुलापुरुषदानानि मुख्यानि विधिवत्तदा॥
देयानि विप्रमुख्यानां व्रतान्ते समुपस्थिते।
सूर्योपरागे यदा तु कुरुक्षेत्रे कुरूत्तम॥
हेमवाससमं दत्त्वा तत्फलं तद्दिने भवेत्।
प्रभासं नाधिकं पार्थ न गया नव पुष्करं॥
वाराणसी न वा तद्वत् प्रयागमथ वापि च।
तीर्थानि च ततः पूर्व्वं पश्चिमानि जनेश्वर॥
सर्व्वाण्येव नृपश्रेष्ठ उदीचिदिग्भवानि च।
न समानि महाबाहो व्रतान्ते कार्त्तिकस्य च।
उभयद्वादशीयोगाच्छ्रद्दधानो नरोत्तम।
वित्तशाठ्यं न कुर्वीत कृष्णैकगतमानसः॥
सर्व्वदयादिसंयुक्तः पुराणार्थैकनिष्ठितः।
कुलान्युद्धृत्य सप्तैव विष्णोःसायुज्यतां व्रजेत्॥
एतदुद्देशतः प्रोक्तमुभयद्वादशीफलम्।
अश्रद्दधानस्य यत्पुण्यं पार्थ तत् केन वर्ण्यते॥
एतत् पुण्यं पवित्रं च व्रतानामुत्तमं परम्।
नाशिष्याय प्रदातव्यं नचाशुश्रूषवे क्वचित्॥
नावैष्णवाय राजेन्द्र अन्यथा नरकं व्रजेत्।
मुमुक्षूणामिदं ब्रह्मन् वुभुक्षूणामियं गतिः॥
इदं हि यः पार्थ नरोमहात्मा शृणोति यो भक्तिपरः स्मरेद्वा।
विमुक्तपापः स विहाय दुःखं प्रयाति सान्निध्यमनन्तमूर्त्तेः॥

इति भविष्योत्तरोक्तमुभयद्वादशीव्रतम्।

अथ मत्स्यद्वादशीव्रतम्।

———000———

सत्यपा उवाच।

कोऽसौ धरण्यां संचीर्ण उपवासो महामुने।
कानि व्रतानि च तथा एतन्मे वक्तुमर्हसि॥

दुर्व्वासा उवाच।

मार्गस्य शुक्लपक्षे तु दशम्यां नियतात्मवान्।
स्नात्वा देवार्चनं कृत्वा अग्निकार्य्यं यथाविधि॥
शुचिवासाः प्रसन्नात्मा हव्यं चान्नं सुसंस्कृतम्।
भुक्त्वा पञ्चपदं गत्वा पुनः शौचं तु पादयोः॥
कृत्वाष्टाङ्गुलमानन्तु क्षीरवृक्षसमुद्भवम्।
भक्षयेद्दन्तकाष्ठं तु ततआचम्य यत्नतः॥
स्पृष्ट्वा खानि तथाद्भिश्च चिरं ध्यात्वा जनार्दनम्।

खानीन्द्रियाणि।

शङ्खचक्रगदापाणिं पीतवस्त्रं किरीटिनं।
प्रसन्नवदनं देवं सर्व्वलक्षणलक्षितम्॥
ध्यात्वा जलं* गृहीत्वा तु भानुरूपञ्जनार्दनम्।
दृष्ट्वार्घ्यं दापयेत्पश्चात्करतोयेन मानवः॥
एवमुच्चारयेद्वाचं तस्मिन् काले महामुने।
एकादश्यां निराहारो भूत्वाहमपरेऽहनि।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत॥

---

* फलमिति पुस्तकान्तरे पाठः।

एवमुक्त्वा ततो रात्रौ देवदेवस्य सन्निधौ ।
जपन्नारायणायेति स्वयं भूमौ विधानतः ॥
ततः प्रभाते विमले नदीं गत्वा समुद्रगां ।
इतरां वा तडागं वा गृहे वा नियतात्मवान् ॥
आनीय मृत्तिकां शुद्धां मन्त्रेणानेन मानवः ।
धारणं पोषणं त्वत्तोभूतानां* देवि सर्व्वदा ॥
तेन सत्येन मां दिव्ये पापान्मोचय मृत्तिके ।

मृत्तिकामन्त्रः ।

ब्रह्माण्डोदरतीर्थानि करैस्पृष्टानि ते रवेः ।
भवन्ति पूतानि यतो मृत्तिकामालभेत्ततः ॥

आदित्यस्य मृत्तिकादर्शनमन्त्रः ।

त्वयि सर्व्वेस्थितान्नित्यं स्थिता वरुण सर्व्वदा ।
तेन मां मृत्तिकां प्राप्य मां पूतं कुरु माचिरम् ॥

मृत्तिकाभ्युक्षणमन्त्रः ।

एवं मृदं रविं तोयं प्रासाद्यात्मानमालभेत् ।
त्रिःकृत्वाशेषमृदया कुण्डमालिख्य वै जले ॥
ततः स्नात्वा नरः सम्यक् मन्त्रवच्चोपचारतः† ।
आचम्यावश्यकं कृत्वा पुनर्देवगृहं व्रजेत् ॥
तत्राराध्य महायोगं देवं नारायणं विभुम् ।
केशवाय नमः पादौ कटिं दामोदराय च ॥
ऊरुयुग्मं नृसिंहाय उरः श्रीवत्सधारिणे ।

* कृतेति पुस्तकान्तरे पाठः ।

† मैत्रवच्चोपचारत इति पुस्तकान्तरे पाठः ।

कण्ठं कौस्तुभनाथाय वक्षः श्रीपतये तथा ॥
त्रैलोक्यविजयायेति बाहू सर्व्वात्मने शिरः।
रथाङ्गधारिणे चक्रं शङ्करायेति वारिजम् ॥

वारिजं शङ्खम्।

गम्भीरायेति च कटान्तु कजशान्तिमूर्त्तये* ।
एवमभ्यर्च्य देवेशं देवं नारायणं प्रभुं ॥
पुनस्तस्याग्रतः कुम्भांश्चतुरः स्थापयेद्बुधः।
जलपूर्णान् समाल्यांश्च सितचन्दनलेपितान् ॥
चतुर्भिस्तिलपात्रैश्च स्थगितान् रत्नगर्भिणः।
चत्वारस्ते समुद्रास्तु कलशाः परिकीर्त्तिताः ॥
तेषां मध्ये शुभं पीठं स्थापयेद्वस्त्रसंयुतम्।
तस्मिंश्च रौप्यं सौवर्णन्ताम्रं वा दारवं तथा ॥
अलाभतस्तोयपूर्णं कृत्वा पात्रं ततो न्यसेत्।

अलाभतः सौवर्णादीनामलाभे दारवमपि कुर्य्यादित्यर्थः ॥

सौवर्णं मत्स्यरूपेण कृत्वा देवं जनार्द्दनम्।
वेदवेदाङ्गसंयुक्तं श्रुतिस्मृतिविभूषणं ॥

तोयपूर्णं पात्रं कृत्वा तत्र मत्स्यरूपं जनार्द्दनं न्यसेदित्यन्वयः।

तत्रानेकविधैर्भक्ष्यैः फलैः पुष्पैश्च शोभितम्।
गन्धैर्मन्त्रैश्च† धूपैश्च अर्च्चयित्वा यथाविधि ॥
रसातलगता वेदा यथा देव त्वयाहृताः।
मत्स्यरूपेण तद्वन्मां भवादुद्धर केशव ॥

---

* खञ्जकशान्तमूर्त्तये इति पुस्तकान्तरे पाठः :

† मन्त्रैश्चेति पुस्तकान्तरे पाठः।

एवमुच्चार्य्य तस्याग्रे जागरं तत्र कारयेत् ।
यथाविभवसारेण प्रभाते विमले तथा ॥
चतुर्णां ब्राह्मणानां च चतुरोदापयेत् घटान् ।
पूर्व्वञ्च बहृचे दद्याच्छन्दोगे दक्षिणां तथा ॥
यजुःशाखान्विते दद्यात् पश्चिमं घटमुत्तमम् ।
उत्तरेऽथर्वणे दद्यादेषएव विधिः स्मृतः ॥
ऋग्वेदः प्रीयतां पूर्व्वे सामवेदस्तु दक्षिणे ।
पश्चिमे तु यजुर्व्वेदोऽथर्व्ववेदस्तथोत्तरे ॥
ताम्रपात्रैस्तु सतिलैः स्थगितान् कारयेद्घटान् ।
ततस्तु जलपात्रं वै ब्राह्मणाय कुटुम्बिने ॥
दद्यादेव महाभाग ततः पश्चात्तु भोजयेत् ।
ब्राह्मणान् पायसेनाग्र्यान् ततः पश्चात् स्वयं नरः ॥
भुञ्जीत सहितो भृत्यैर्वाग्यतः संयतेन्द्रियः ।
यः सकृद्द्वादशीमेतां करोति विधिवन्मुने ॥
स ब्रह्मलोकमाप्नोति तत्कालं चैव तिष्ठति ।
द्वादशीदोचधरणीव्रतेष्वेकादशीपरः ॥

तत्कालं ब्रह्मकालं ।

ततोब्रह्मोपसंहारे तल्लयस्तिष्ठतेऽचिरं ।
पुनः सृष्टौ भवेद्देवोवैराजो नामनामतः ॥
ब्रह्महत्यादिपापानि इह लोके कृतान्यपि ।
अकामतः कामतोवा तानि नश्यन्ति तत्क्षणात् ॥
इह लोके दरिद्रोवा राज्यभ्रष्टोभवेन्नृपः ।
उपोष्य तु विधानेन मीश्वरो राज्यभाग्भवेत् ॥

मेश्वरः लक्ष्मीश्वरः।

वन्ध्या नारी भवेद्यातु अनेन विधिना शुभा।
उपोष्यति भवेत्तस्याः पुत्रः परमधार्म्मिकः॥
अगम्यागमनं येन जानताजानता कृतम्।
स इमं विधिमास्थाय तस्मात्पापाद्विमुच्यते।
ब्रह्मक्रियाया लोपेन बहुवर्षकृतेन च॥
उपोष्येमां सकृद्भक्त्या वेदसंस्कारमाप्नुयात्।
किञ्चात्र बहुनोक्तेन न तदस्ति महामुने॥
प्राप्यं वा प्राप्यते नैव पापवान् यत्र पश्यति।
अदीक्षिताय नो देयं विधानं नास्तिकाय च॥
देववेदद्विषे वापि न श्राव्यन्तु कदाचन।
गुरुभक्ताय दातव्यं सर्व्वपापप्रणाशनम्॥
इह जन्मनि वारोग्यं धनं धान्यं वरस्त्रियः।
भवन्ति विविधा यस्तु उपोष्यति विधानतः॥

इति धरणीव्रतमत्स्यद्वादशीव्रतं।

अथ कूर्म्मद्वादशीव्रतम्।

———000———

दुर्व्वासा उवाच।

पुष्यमासस्य या पुण्या द्वादशी शुक्लपक्षतः।
तस्यां प्रागिव सङ्कल्पं कुर्य्यात् स्नानादिकाः क्रियाः॥
निर्वर्त्याराधयेद्रात्रावेकादश्यां जनार्द्दनम्।
पृथङ्मन्त्रै र्द्विजश्रेष्ठ देवदेवं जनार्द्दनम्॥

कूर्म्माय पादौ प्रथमन्तु पूज्य नारायणायेति कटिं हरेस्तु।
सङ्कर्षणायेत्युदरं हरेस्तु उरोविशोकाय भवाय कण्ठम्॥
सुबाहवेत्येव भुजौ शिरश्च नमो विशालाय रथाङ्गशङ्खौ।
स्वनाममन्त्रैश्च सुधूपगन्धैर्नानानिवेद्यैर्विविधैःफलैश्च॥
अभ्यर्च्य देवं कलशं तदग्रे संस्थाप्य माल्यास्तृतदामकण्ठं।
तं रत्नगर्भन्तु पुरेव कृत्वा स्वशक्तितोहेममयञ्च देवम्॥
समन्दरं कूर्म्मरूपेण कृत्वासंस्थापयेत्ताम्रपात्रे घृतस्य।
पूर्णे घटे पर्य्यथ सन्निवेश्याथोब्राह्मणायैव सर्व्वं तु दद्यात्॥

घृतस्य पूर्णे ताम्रपात्रे समन्दरं कूर्म्मरूपं निधाय घटोपरि निवेश्य प्रभाते दद्यादित्यर्थः।

श्वो ब्राह्मणान् भोज्य सदक्षिणांश्च यथाशक्त्या प्रीणयेद्देवदेवं।
नारायणं कूर्म्मपुराणे पश्चात् स्वयं भुञ्जीत सभृत्यवर्गः॥
एवंकृते वै त्रिविधं हि पापं विनश्यते नात्र विचारणास्ति।
संसारचक्रन्तु विहाय शुद्धं प्राप्नोति लोकं तु हरेः पुराणम्॥
अनेकजन्मान्तरसञ्चितानि नश्यन्ति पापानि नरस्य भक्त्या।
प्रागुक्तरूपं तु फलं लभेत नारायणस्तुष्टि मुपैति सद्यः॥

इति धरणीव्रते कूर्म्मद्वादशीव्रतम्।

अथ वाराहद्वादशीव्रतम्।

———000———

दुर्व्वासा उवाच।

एवं माघे सिते पक्षे द्वादशीधरणीभृतः।
वाराहस्य शृणुष्वा न्यां पुण्यां परमधार्म्मिकः॥

प्रागुक्तेन विधानेन सङ्कल्पस्नानमेव च।
कृत्वा देवं समभ्यर्च्य एकादश्यां विचक्षणः॥
पुष्पैर्नैवेद्यगन्धैश्च ह्यर्चयित्वाच्युतं नरः।
पश्चात्तस्याग्रतः कुम्भञ्जलपूर्णन्तु विन्यसेत्॥
वराहायेति पादौ तु माधवायेति वै कटिं।
क्षेत्रज्ञायेति जठरं विश्वरूपं पुरोहितः॥
सर्व्वज्ञायेति वैकण्ठं प्रजानांपतये शिरः।
प्रद्युम्नायेति च भुजौ दिव्यास्त्राय सुदर्शनम्॥
अमृतोद्भवाय शङ्खञ्च एष एवार्च्चने विधिः।
एवमभ्यर्च्य मेधावी तस्मिन् कुम्भे तु विन्यसेत्॥
सौवर्णं रौप्यं ताम्रं वा वाराहं कारयेद्बुधः।
दंष्ट्राग्रेणोद्धृतां पृथ्वीं सपर्व्वतवनद्रुमां॥
माधवं मधुहन्तारं वाराहं रूपमास्थितम्।
सर्व्वबीजभृते पात्रे रत्नगर्भघटोपरि॥
स्थापयेत्परमं देवं जातरूपमयं हरिं।
सितवस्त्रयुगच्छन्नं तत्राभावे तु वैणवे॥
स्थाप्यार्च्चा गन्धपुष्पैश्च नैवेद्यैर्व्विविधैः फलैः।
पुष्पमण्डयिकां कृत्वा जागरं तत्र कारयेत्॥
प्रादुर्भावान् हरेस्तत्र वाचयेद्गाययेद्बुधः।
एवं संस्तूयमानस्य प्रभातेह्युदिते रवौ॥
शुचिः स्नातोहरिं पूज्य ब्राह्मणाय निवेदयेत्।
वेदवेदाङ्गविदुषे साधुवृत्ताय धीमते॥
विष्णुभक्ताय विप्रर्षे विशेषेण तु दापयेत्।

एवं विधानतो दत्त्वा हरिं वाराहरूपिणम् ॥
ब्राह्मणाय च तद्द्यात् फलं तस्य निशामय ।
इह जन्मनि सौभाग्यं श्रीः कान्तिस्तुष्टिरेव च ॥
ज्ञानवान् वित्तवान् भोगी अपुत्रः पुत्रवान् भवेत् ।
ोगी अपुत्रः पुत्रवान् भवेत् ।

इति धरणीव्रते वाराहद्वादशीव्रतम् ।

अथ नृसिंहद्वादशीव्रतम् ।

——000——

दुर्व्वासा उवाच ।

तद्वत्तु फाल्गुने मासि कृष्णपक्षे तु द्वादशी ।
उपोष्या प्रोक्तविधिना हरिमावाहयेद्बुधः ॥
नरसिंहाय पादौ तु गोविन्दायोदरं तथा ।
कटिं विश्वभुजे तद्वदनिरुद्धेत्युरस्तथा ॥
कण्ठन्तु शितिकण्ठाय पिङ्गकेशाय वै शिरः ।
असुरध्वंसनायेति चक्रंवोद्भात्मने तथा ।
शङ्खमित्येव सम्पूज्य गन्धपुष्पफलैस्तथा ॥
तदग्रे स्थाप्य तु घटं सितवस्त्रयुगान्वितम् ।
तत्रोपरि नृसिंहन्तु सौवर्णं ताम्रभाजने ॥
सौवर्णं शक्तितः कृत्वा दारुवंशमयोऽपि वा ।
नृसिंहरूपन्तु विष्णुधर्म्मोत्तरेऽभिहितं ।
पीनस्कन्धकटिग्रीवः कृशमध्यः कृशोदरः ।
सिंहासनो नृदेहश्च नीलवासा प्रभान्वितः ॥

आलीढस्थानसंस्थानः सर्व्वाभरणभूषणः ।
ज्वालामालाकुलमुखोज्वालाकेसरमण्डलः ॥
हिरण्यकशिपोर्वक्षःपाटयन्नखरैः खरैः ।
नीलोत्पलाभःकर्त्तव्यो देवतानुगतस्तथा ॥
हिरण्यकशिपुर्दैत्यःसंव्रतीयमिति ध्रुवमिति ।
रत्नगर्भघटे स्थाप्य तं सम्पूज्य विधानतः ॥
द्वादश्यां वेदविदुषे ब्राह्मणाय निवेदयेत् ।
एवं कृते फलं प्राप्तं यत् पुरा पार्थिवेन च ॥
वत्सनाम्ना तु तत्तेऽहं प्रवक्ष्यामि महामुने ।
तस्य व्रतान्ते भगवान् नरसिंहस्तुतोष च ॥
चक्रं प्रादात्तु शत्रूणां विध्वंसनकरं मृधइति ।
तेनास्त्रेण स्वकं राज्यं जितवान् स नृपोत्तमः ॥
राज्ये स्थित्वाश्वमेधानां सहस्रमकरोत् प्रभुः ।
अन्तेच ब्रह्मलोकाख्यं पदमागाच्च सत्तम ॥
एषा धन्या पापहरा द्वादशी भवतो मुने ।
कथितेमां प्रयत्नेन श्रुत्वा कुरु यथेच्छसि ॥

इति धरणीव्रते नृसिंहद्वादशीव्रतम् ।

अथ वामनद्वादशीव्रतम् ।

———000———

दुर्व्वासा उवाच ।

एवमेव मुने मासि चैत्रे संकल्पा द्वादशी ।
उपोष्य धारयेद्भक्त्या देवदेवं जनार्दनम् ॥

वामनायेति पादौ तु विष्णवे कटिमर्चयेत् ।
वासुदेवेति जठरं उरः सङ्कर्षणाय च ॥
कण्ठं विश्वभृते पूज्य शिरोवै व्योमरूपिणे ।
बाहू विश्वजिते पूज्य स्वनाम्ना शङ्खचक्रके ॥
अनेन विधिनाभ्यर्च्च्य देवदेवं जनार्दनम् ।
प्राग्वंशेनोदरं कुम्भं सयुग्मं पुरतोन्यसेत् ॥

युग्मं वस्त्रयुग्मं ।

प्रागुक्तपात्रे संस्थाप्य वामनं काञ्चनं बुधः ।
यथाशक्तिकृतं ह्रस्वं सितयज्ञोपवीतिनम् ॥
कुण्डिकां स्थापयेत् पार्श्वे छत्रिकापादुके तथा ।
अक्षमालाञ्च संस्थाप्य यष्टिकां च विशेषतः ॥
एतैरुपस्करैर्युक्तं प्रभाते ब्राह्मणाय तु ।
दापयेत् प्रीयतां विष्णुः ह्रस्वरूपीति कीर्त्तयेत् ॥
मासनाम्ना तु संयुक्तं प्रादुर्भावाभिधानकम् ।
प्रीयतामिति सर्व्वत्र विधिरेष प्रकीर्त्तितः ।

मासनाम्ना मार्गशीर्षादिमासकेशवादिनाम्ना प्रादुर्भावाभिधानकं मत्स्यरूपी कूर्म्मरूपीत्येवमादि ।

श्रूयते च पुरा राजा हर्य्यश्वः पृथिवीपतिः ।
अपुत्रः स तपस्तेपे पुत्रमिच्छंस्तपोधनम् ॥
तस्यैवं कुर्व्वतस्त्विष्टिं पुत्रार्थं मुनिसत्तम ।
आजगाम हरिर्द्देवो द्विजरूपसमन्वितः ॥
स उवाच नृपं राजन् किं ते व्यवसितन्त्विति ।
पुत्रार्थमिति चोवाच स च तं प्रत्युवाच ह ॥

इदमेव विधानं तु कुरु राजन् प्रयत्नतः।
स विप्र एवमुक्त्वा च क्षणादन्तर्हितस्ततः॥
राजा च तच्चकाराथ मन्त्रवित्तु द्विजातये।
दरिद्राय तथा प्रादाज्ज्योतिर्गर्भाय धीमते॥
यथा दितेरपुत्रायाः त्वयं पुत्रत्वमागतः।
भगवंस्तेन सत्येन ममाप्यस्तु सुतोवरः॥
इदमेव विधानं वामनद्वादशीव्रतम्।
विधिमन्त्रवित् यथा दितेरपुत्राया इत्यादिमन्त्रज्ञः।

तं वामनम्।

अनेन विधिनोक्तेन तस्य पुत्रोभवन्मुने।
उग्राश्वइति विख्यातश्चक्रवर्त्ती महाबलः॥
अपुत्रो लभते पुत्रान् धनहीनोलभेद्धनम्।
भ्रष्टराज्यो लभेद्राज्यं मृतो विष्णुपुरं व्रजेत्॥

इति धरणीव्रते वामनद्वादशीव्रतम्।

अथ जामदग्न्यव्रतम्।

———ooo———

दुर्व्वासा उवाच।

वैशाखस्यैवमेवन्तु संकल्पविधिना नरः।
तद्वत् स्नानं मृदा कृत्वा ततोदेवालयं व्रजेत्॥
तत्राराध्य हरिं भक्त्या एभिर्मन्त्रैर्विचक्षणः।
जामदग्न्याय पादौ तु उदरं सर्वधारिणे॥

मधुसूदनायेति कटिं उरः श्रीवत्सधारिणे ।
चक्रान्तकाय बाहू च मणिकण्ठाय कण्ठकम् ॥
स्वनाम्ना शंखचक्रे तु शिरो ब्रह्माण्डधारिणे ।
एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम् ॥
विन्यसेत् स्थगितं वस्त्रयुगेन च विशेषतः ।
वैणवेन च पात्रेण तस्मिन् संस्थापयेद्धरिम् ॥
जामदग्न्येन रूपेण कृत्वा सौवर्णमग्रतः ।
दक्षिणे परशुं हस्ते तस्य देवस्य कारयेत् ॥
सर्व्वं गन्धैश्च संपूज्य पुष्पैर्नानाविधैस्तथा ।
ततस्तस्याग्रतः कुर्य्याज्जागरं शक्तिमान्नरः* ॥
प्रीयतां मधुसूदनोजामदग्न्यरूपीतिमन्त्रः ।
प्रभाते विमले सूर्य्ये ब्राह्मणाय निवेदयेत् ।
एवं नियमयुक्तस्य यत् फलं तन्निबोध मे ॥
आसीद्राजा महाभागो वीरसेनो महाबलः ।
अपुत्रः स पुरा तीव्रन्तपस्तेपे महाबलः ॥
चरतस्तत्तपोघोरं याज्ञवल्क्यो महामुनिः ।
आजगाम महायोगी तं द्रष्टुं वानियोगतः ॥

राजोवाच ।

कथं मे भविता पुत्रः स्वल्पायासेन वै द्विज ।
एतन्मे कथय प्रीत्या भगवान् प्रणतस्य मे ॥
एवमुक्तोमुनिस्तेन पार्थिवेन यशस्विना ।
आचख्यौ द्वादशीमेमां वैशाखे सितपक्षजां ॥

---

* भक्तिमान्निति पुस्तकान्तरे पाठः ।

स हि राजा विधानेन पुत्रकामो विशेषतः।
उपोष्य लब्धवान् पुत्रं नलं परमधार्म्मिकम्॥
योऽद्यापि कीर्त्त्यते लोके पुण्यश्लोको नृपोत्तमः।
प्रासङ्गिकं फलं ह्येतत् व्रतस्यास्य महामुने॥
सुपुत्रो जायते वित्तविद्यावान् कीर्त्तिमांस्तथा*।
इह जन्मनि किं चित्रं परलोके शृणुष्व मे॥
कल्पमेकं ब्रह्मलोकमुषित्वाप्सरसाङ्गणैः।
क्रीड़तेऽतः पुनः सृष्टौ जायते चक्रवर्त्तिनः।
त्रिंशत्कल्पसहस्राणि जायते नात्र संशयः॥

इति धरणीव्रते जामदग्न्यद्वादशीव्रतम्।

अथ राघवद्वादशीव्रतम्।

दुर्व्वासा उवाच।

ज्यैष्ठमासेप्येवमेवं संकल्प्य विधिना नरैः।
अर्चयेत् परमं देवं पुष्पैर्नानाविधैःशुभैः॥
ॐ नमोराघवायेति पादौ पूर्वं समर्चयेत्।
त्रिविक्रमायेति कटिंधृतवस्त्राय वै हरम्॥
उरःसंवत्सरायेति कण्ठं संवर्त्तकाय च।
सर्व्वास्त्रधारिणे बाहू स्वनाम्नाजरथाङ्गकेत्†॥
सहस्रशिरसेऽभ्यर्च्य शिरस्तस्य महात्मनः।
ब्जरथाङ्गके शंखचक्रके॥

---

* कीर्त्तिवानिति पुस्तकान्तरे पाठः।
† ब्जरथाककेइति पुस्तकान्तरे पाठः।

एवमभ्यर्च्य विधिवत् घृतकुम्भं प्रकल्पयेत्।
प्राग्वद्वस्त्रयुगच्छन्नौ सौवर्णौ रामलक्ष्मणौ॥
अनयोः स्वरूपं विष्णुधर्म्मोत्तरात्।
रामो दाशरथिर्मौली राजलक्षणलक्षितः॥
मौली मुकुटवान्।
भरतो लक्ष्मणश्चैव शत्रुघ्नश्च धनुर्धरः।
तथैव नूनं कर्त्तव्याः किन्तु मौलिविवर्जिताइति।
अर्चयित्वा विधानेन प्रभाते ब्राह्मणाय तौ।
दातव्यौ मनसा काममीहता पुरुषेण तु॥
अपुत्रेण पुरा पृष्टो राज्ञा दशरथेन तु।
वशिष्ठः पुत्रकामाय प्रोवाच परमार्थतः॥
इदमेव विधानन्तु कथयामास स द्विजः॥
प्राग्रहस्यं विदित्वा तु स राजा कृतवानिदम्।
तस्य पुत्रः स्वयं जज्ञे रामाख्यो मधुसूदनः॥
चतुरंशोप्यभूद्विष्णुः परितोषान्महामुने।
एतदेव हि चाख्यातं पारत्रिकमतः शृणु॥
दिव्यान् भोगान् भुञ्जते स्वर्गसंस्थो यावदिंद्रा दश च द्विद्विसंख्याः
अतीतकाले पुनरेत्य मर्त्त्यं राजराजोजायते यज्ञयाजी॥
दश द्विद्विसंख्याः चतुर्दशेत्यर्थः।
नश्यन्ति पापानि च तस्य पुंसः कामानवाप्नोति यथासमीहान्।
निष्काम एतद्व्रतमेव चीर्त्वा प्राप्नोति निर्व्वाणफलं स्थितं तत्॥
एतद्व्रतमेव निर्व्वाणसाधनान्तरमनुष्ठायापीत्यर्थः।

इति धरणीव्रते राघवद्वादशीव्रतम्।

अथ वासुदेवद्वादशीव्रतम् ।

———000———

दुर्व्वासा उवाच ।

आषाढ़े प्येवमेवन्तु सङ्कल्प्य विधिना ततः ।
अर्च्चयेत्परमं देवं गन्धपुष्पैर्विधानतः ॥
वासुदेवाय पादौ तु कटिं संकर्षणाय च ॥
प्रद्युम्नायेति जठरमनिरुद्धाय वै उरः ।
चक्रपाणयेति भुजौ कण्ठं भूपतये तथा ॥
स्वनाम्ना शङ्खचक्रे तु पुरुषायेति वै शिरः ।
एवमभ्यर्च्च मेधावी प्राग्वत्तस्याग्रतोघटम् ॥
विन्यसेद्वस्त्रयुग्मं तु तस्योपरि ततोन्यसेत् ।
काञ्चनं वासुदेवं तु चतुर्व्वाहुं सनातनम् ॥
तमभ्यर्च्च विधानेन गन्धपुष्पादिभिः क्रमात् ।
प्राग्वत्तु ब्राह्मणे दद्याद्देववादिनि सुव्रते ॥
एवं नियमयुक्तस्य यत् पुण्यं तच्छृणुष्व मे ।
वसुदेवो भवेद्राजा यदुवंशविवर्द्धनः ॥
देवकी तस्य भार्य्यासीत्समानव्रतचारिणी ।
सात्वपुत्रा भवेत्साध्वी पतिधर्म्मपरायणा ॥
तस्याः कालेन महता नारदोभ्यागमद्गृहम् ।
वसुदेवेन तद्भक्त्या पूजितो वाक्यमब्रवीत् ॥
कथयामास धर्म्मज्ञो देवकीवसुदेवयोः ।
तावप्येवं विधिं भक्त्या चक्रतुः श्रद्धयान्वितौ ॥

तयोस्तुष्टः स्वयं विष्णुः पुत्रत्वञ्च जगाम ह ।
एवमेषा पापहरा द्वादशी पुत्रदा स्मृता ॥
इमामुपोष्येह सुतान्विद्यावित्तं लभेत च ।
राज्यञ्च भ्रष्टराज्यस्तु पापिनः पापसंचयम् ॥
यया भावोपनीतस्तु धरण्यां केशवेन वै ।
मृता विष्णुपुरे रम्ये मोदते कालसंचयम् ॥
मन्वन्तराणि षट्त्रिंशत्ततः कालात्यये पुनः ।
इह लोके भवेद्राजा सप्तवर्षायुतानि तु ॥
दाता यज्वाचमायुक्तस्ततो* निर्व्वाणमाप्नुयात् ।

इति धरणीव्रते वासुदेवद्वादशीव्रतम् ।

अथ वुद्धद्वादशीव्रतम् ।

———०:०———

दुर्व्वासा उवाच ।

एवमेव श्रावणे तु मासि संकल्प द्वादशीम् ।
अर्च्चयेत्परमं देवं गन्धपुष्पनिवेदनैः ॥
वुद्धाय पादौ संपूज्य श्रीधरायेति वै कटिम् ।
पद्मोद्भवाय जठरमुरः संवत्सराय वै ॥
सुग्रीवायेति कण्ठं तु भुजौ द्वौ विश्ववाहनः ।
प्राग्वच्छस्त्राणि संपूज्य शिरो वै परमात्मने ॥
एवमभ्यर्च्य मेधावी तस्याग्रे पूर्व्ववद्घटम् ।

---

* दातायज्वाक्षमेति पुस्तकान्तरे पाठः ।

स्थापयेत्तत्र सौवर्णं बुद्धं कृत्वा विचक्षणः॥

बुद्धस्वरूपमुक्तं पुराणान्तरे।

बुद्धस्तु द्विभुजः कार्य्योध्यानस्तिमितलोचन इति॥

तमप्येवन्तु संपूज्य ब्राह्मणाय निवेदयेत्।

अनेन विधिना पूर्व्वं द्वादशी समुपोषिता॥

शुद्धोदनेन बुद्धोऽभूत् स्वयं पुत्रो जनार्द्दनः।

महतीञ्च श्रियं प्राप्तः पुत्र पौत्र समन्वितः।

भुक्ता राज्यश्रियं सोऽथ गतिं परमिकां गतः॥

इति धरणीव्रते बुद्धद्वादशीव्रतम्।

अथ कल्किद्वादशी व्रतम्।

——000——

दुर्व्वासा उवाच।

तद्वद्भाद्रपदे मासि शुक्लपक्षे तु द्वादशीम्।

सङ्कल्प्य विधिना देवमर्च्चयेत्परमेश्वरम्॥

नमोस्तु कल्किने पादौ हृषीकेशाय वै कटिं॥

म्लेच्छध्वंसनायोरू जगन्मूर्त्तिस्तथोदरम्।

श्रीकण्ठायेति कण्ठन्तु खड्गपाणीति वै भुजौ॥

स्वनाम्ना शङ्खचक्रे तु विश्वमूर्त्तेस्तथा शिरः

एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम्॥

विन्यस्य कल्किनं देवं सौवर्णं तत्र धारयेत्।

कल्किस्वरूपं पुराणान्तरात्।

कृपाणपाणिः कर्त्तव्यः कल्की तुरगवाहन इति।
सितवस्त्रयुगच्छन्नं गन्धपुष्पोपशोभितम्॥
कृत्वा प्रभाते विप्राय प्रदेयं शास्त्रवित्तमे।
पूर्व्वं राजा विशालोऽभूत् काशीपुर्य्यां महाबलः॥
द्वादशीं कृतवान् सोऽपि चक्रवर्त्ती बभूव ह।
यज्ञैश्च विविधैरिष्ट्वा परं निर्व्वाणमाप्तवान्॥
पूज्यते मत्स्यरूपेण सर्व्वज्ञत्वमभीप्सुभिः।
स्ववंशोद्धरणार्थाय कूर्म्मरूपी तु पूज्यते॥
भवोदधिनिमग्नेन वराहः पूज्यते नरैः*।
नरसिंहस्वरूपेण सर्व्वपापभयातुरैः।
वामनोमोहनार्थाय वित्तार्थे जमदग्निजः॥
क्रूरशत्रुविनाशाय यजेद्दाशरथिं बुधः।
बलकृष्णौ यजेद्धीमान् पुत्रकामो न संशयः॥
रूपकामो यजेद्बुद्धं कल्किनं शत्रुघातने।

इति धरणीव्रते कल्किद्वादशीव्रतम्।

अथ पद्मनाभ द्वादशी व्रतम्।

—ः○ः—

दुर्व्वासा उवाच।

तद्वदाश्वयुजे मासि द्वादशीं शुक्लपक्षिणीम्†।

---

* द्वाराधेति पुस्तकान्तरे पाठः।

† पक्षजामिति पुस्तकान्तरे पाठः।

सङ्कल्पाभ्यर्च्चयेद्देवं पद्मनाभं सनातनम् ॥
पद्मनाभाय पादौ तु कटिं वै पद्मयोनये‡ ।
उदरं सर्व्वदेवाय पुष्कराक्षाय वै उरः ॥
अव्ययाय तथा बाहू प्राग्वदस्त्राणि पूजयेत् ।
प्रभवाय शिरः पूज्य प्राग्वदग्रे घटं न्यसेत् ॥
तस्मिन् हेममयं देवं पद्मनाभं तु विन्यसेत् ।

पद्मनाभस्तु दक्षिणाधोहस्तादारभ्य सव्येन शङ्खपद्मगदाधारी कार्य्यः ।

तं देवदेवं संपूज्य गन्धपुष्पादिभिः क्रमात् ।
प्रभातायान्तु शर्व्वर्य्यां ब्राह्मणाय निवेदयेत् ॥
आसीत् कृतयुगे राजा भद्राश्वो नाम वीर्य्यवान् ।
यस्य नाम्ना भवेद्वर्षं भद्राश्वं नामनामतः ॥
तस्यागस्त्यः कदाचित्तु गृहमागमत् भूपते ।
उवाच पञ्चरात्रं तु वसामि भवतो गृहे ।
तं राजा शिरसा नत्वा स्थीयतामित्यभाषत ॥
तस्य कान्तिमती नाम्ना भार्य्या परमशोभना ।
तामगस्त्यस्तथा दृष्ट्वा रूपतेजोन्वितां शुभां ॥
सपत्न्यश्च भयात् सर्व्वाः कुर्व्वन्त्यः कुर्म्म शोभनम् ।
साधु पार्थ जगन्नाथ स्त्री शूद्रः साधुसाध्विति ॥
एवमुक्त्वा ननर्त्तोच्चै रगस्त्योराजसन्निधौ ।

राजोवाच ।

किं हर्षकारणं ब्रह्मन् येनैवं नृत्यते भवान् ।

---

‡ पद्मधारिणे इति पुस्तकान्तरे पाठः ।

अगस्त्य उवाच ॥

इयं राज्ञी त्वदीयाभूद्दासी वैश्यस्य वैदिशे ।
नगरे हरिदत्तस्य त्वमस्याः पतिरेव च ॥
तस्यैव कर्म्मकारोऽभूत् शूद्रो विध्येति नामतः ।
स वैश्योऽश्वयुजे मासि द्वादश्यां नियतः शुचिः ॥
स्वयं विष्णवालयं गत्वा गन्धपुष्पादिभिर्हरिम् ।
अभ्यर्च्य स्वगृहे प्रायाद्भवन्तौ रत्न पालकौ ॥
स्थाप्य द्वावपि दीपानां ज्वालनार्थं महामते ।
गते तस्मिन् भवने तद्दीपप्रज्वालने स्थितौ ॥
यावत् प्रभाता रजनी निःशाठेन नरोत्तम ।
ततः कालेन महता मृतौ द्वावपि दम्पती ॥
तेन पुण्येन ते जन्म प्रियव्रतगृहेऽभवत् ।
इयञ्च पत्नी ते जाता वैश्यदास्यभवत् पुरा ॥
पारक्यस्यापि दीपस्य ज्वलितस्य गृहे हरेः ।
इयं व्युष्टिः परा जाता भक्तियुक्तस्य ते पुरा ॥
स्वेमयः पुनरर्थेन विष्णुमभ्यर्च्य दीपकम् ।
ज्वालयेत्तस्य यत्पुण्यं तत्सङ्ख्यातुं न शक्यते ॥

इति श्रीधरणीव्रते पद्मनाभद्वादशीव्रतम् ।

अथ योगेश्वरव्रतम् । अथ धरणीव्रतम् ।

———000———

अगस्त्य उवाच ।

शृणुष्व भक्तितोराजन् कार्त्तिकैकादशीं तथा ।

उपोष्य विधिना येन सर्व्वासां प्राप्नुयात् फलम्॥
प्राग्विधानेन संकल्प्य तद्वत् स्नानं समर्चयेत्।
विलोमेनार्च्चयेद्देवं नारायणमकल्मषम्॥
नमः सहस्रशिरसे शिरः संपूज्य वै हरेः।
पुरुषायेति च भुजौ कण्ठे वै विश्वरूपिणे॥
ज्ञानात्मनेति चास्त्राणि श्रीवत्साय तथा उरः।
जगद्ग्रसिष्णवे पूज्य उदरं विश्वमूर्त्तये॥
कटिं सहस्रपादाय पादौ देवस्य पूजयेत्।
अनुलोमेन देवेशं पूजयित्वा विचक्षणः॥
नमो दामोदरायेति सर्व्वाङ्गं पूजयेद्धरिम्।
एवं संपूज्य विधिना तस्याग्रे चतुरो घटान्॥
स्थापयेद्रत्नगर्भांस्तु सितचन्दनचर्च्चितान्।
स्रग्दामवद्धग्रीवांस्तु सितवस्त्रावगुण्ठितान्॥
स्थगितान् ताम्रपात्रैस्तु तिलपूर्णैः सकाञ्चनैः।
चत्वारः सागराश्चैते कल्पिता द्विजसत्तम॥
तन्मध्ये प्राग्विधानेन सौवर्णं स्थापयेद्धरिम्।
योगेश्वरं योगनिद्राशायिनं पीतवाससम्॥
तमप्येवं तु संपूज्य जागरं तत्र कारयेत्।
कुर्य्यात्तु वैष्णवं यागं जपेत् योगेश्वरं हरिम्॥
षोड़शारे रथाङ्गे तु रजोभिर्बहुभिः कृते।

षोड़शारे रथाङ्गे षोड़शारचक्रे।

एवं कृत्वा प्रभाते तु ब्राह्मणान् पञ्च वानयेत्।
चत्वारः कलशा देयाश्चतुर्णां पञ्चमस्य तु॥

सौवर्णं प्रदद्यात् प्रयतः शुचिः।
वेदाध्येत्रे समं दत्तं तद्विदे द्विगुणं तथा॥
आचार्य्ये पञ्चरात्राणां सहस्रगुणितं भवेत्।
यस्त्विमं सरहस्यन्तु समन्त्रं चोपपादयेत्।
विधानं तस्य भक्त्या वै दत्तं कोटिगुणोत्तरम्॥
योग्ये तिष्ठति यस्त्वन्यमासन्नं पूजयेल्लधीः,
दुर्गतिं समवाप्नोति दत्तं तस्य च निष्फलम्॥
एवं दत्त्वा विधानेन तत्वतो विष्णुमर्च्य च।
विप्राणां भोजनं दद्याद्यथाशक्त्या च दक्षिणाम्॥
धरणीव्रतमेतद्धि पुरा कृत्वा प्रजापतिः।
प्रजां* लेभे तथा मुक्तिं ब्राह्मण्यं विमलं शुभं॥
युवनाश्वस्य राजर्षिरनेन विधिना पुरा।
मान्धातारं सुतं लेभे परं ब्रह्म च शाश्वतम्॥
तथा हैहयदायादः कृतवीर्य्यो नराधिपः।
कार्त्तवीर्य्यं सुतं लेभे परं ब्रह्म च शाश्वतम्॥
शकुन्तलाप्येवमेव व्रतं चीर्त्वा महामुने।
लेभे शाकुन्तलं पुत्रं दौष्मन्तं चक्रवर्त्तिनम्॥
अनेन विधिना प्राप्तं चक्रवर्त्तित्वमुत्तमम्।
धरण्या अपि पाताले पद्मया तु कृतं पुरा।
व्रतमेतत्ततोनाम्ना धरणीव्रतमुच्यते॥
सुमेरस्मिंस्तु धरा देवी हरिणा क्रोड़रूपिणा।

---

* पूजां लेभे इति पुस्तकान्तरे पाठः।

उद्धृतायापि तुष्टेन धारिता नौरिवाम्भसि ॥
धरणीव्रतमेतद्धि कीर्त्तितं तन्मया मुने।
य इदं शृणुयाद्भक्त्या यश्च कुर्य्यान्नरोत्तमः ॥
सर्व्वपापविनिर्मुक्तो विष्णुसालोक्यतां व्रजेत्।
एकैकयापि वापत्सु राज्यमेकैव यच्छति।
किं पुनर्द्वादशैतास्तु यन्नेदं न ददुः परं ॥

इति योगेश्वरद्वादशी।

इति वाराहपुराणोक्तं धरणीव्रतम्।

अथ भीमद्वादशीव्रतम्।

——ooo——

पुलस्त्य उवाच।

कृष्णः कदाचिदासीनः स्वपुर्य्याममितद्युतिः।
प्रवृत्तासु पुराणेषु धर्म्मसम्बन्धिनीषु च ॥
कथासु भीमसेनेन परिपृष्टः प्रतापवान्।
धार्म्मिकस्याप्यशक्तस्य तीव्राग्नित्वादुपोषणे ॥
किञ्चिद्व्रतमशेषाणां व्रतानामधिकं मम।
निरूपयतु विश्वात्मा वासुदेवोजगद्गुरुः ॥
अशेषयज्ञफलदमशेषाघविनाशनं।
अशेषदुष्टदमनमशेषसुरपूजितम् ॥
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम्।

वासुदेव उवाच।

यद्यष्टम्यां चतुर्दश्यां द्वादशीष्वथ भारत।

अन्येष्वपि दिनर्चेषु न शक्तस्त्वमुपोषितुं ॥
ततः पुण्यामिमाभैमीं* सर्व्वपापप्रणाशनीं।
उपोष्य विधिनानेन गच्छ विष्णोः परं पदम् ॥
माघमासस्य दशमी यदा शुक्ला भवेत्तदा।
घृतेनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत् ॥
तथैव विष्णुमभ्यर्च्य नमो नारायणेति च।
कृष्णाय पादौ सम्पूज्य शिरः सर्व्वात्मने नमः ॥
वैकुण्ठायेति वै कण्ठमुरः श्रीवत्सधारिणे।
शङ्खिने चक्रिणे तद्वद्गदिने वरदाय वै ॥
सर्व्वं नारायणस्यैतं सम्पूज्या बाहवः क्रमात्।
दामोदरायेत्युदरं मेढ्रं पञ्चशराय वै ॥
ऊरू सौभाग्यनाथाय जानुनी भूतधारिणे।
नमो नीलाय वै जङ्घे पादौ विश्वसृजे नमः ॥
नमो देव्यै नमः शान्त्यै नमो लक्ष्म्यै नमः श्रियै।
नमः पुष्ट्यै नमस्तुष्ट्यै नमस्तुष्ट्यै तथा प्रिये ॥
नमो विहङ्गनाथाय वायुवेगाय पक्षिणे।
विषप्रभाषिणे नित्यं गरुडञ्चाभिपूजयेत् ॥
एवं सम्पूज्य गोविन्दमुमापतिविनायकौ।
गन्धमाल्यैस्तथा धूपैर्भक्ष्यैर्नानाविधैस्तथा ॥
गव्येन पयसा सिद्धां कृशरांत्वथ वाग्यतः।
सर्पिषा सह भुञ्जानो गत्वा शतपदं वुधः ॥

---

* पुण्यामिमां भीमतिथिमिति पुस्तकान्तरे पाठः।

न्यग्रोधन्दन्तकाष्ठन्तु अथवा खादिरं बुधः ।
गृहीत्वा धारयेद्दन्तानाचान्तः प्रागुदङ्मुखः ॥
पूजां सायन्तनीं कृत्वा गतेऽस्तमिते रवौ ।
नमो नारायणायेति त्वामहं शरणं गतः ॥
एकादश्यां निराहारः समभ्यर्च्य च केशवम् ।
रात्रिञ्च सकलां स्थित्वा स्नानञ्च पयसा ततः ॥
सर्पिषा विश्वदहनं हुत्वा ब्राह्मणपुङ्गवैः ।
सहैव पुण्डरीकाभ द्वादश्यां क्षीरभोजनम् ॥
करिष्यामि यतात्माहं निर्व्विघ्नेनास्तु तच्च मे ।
एवमुक्त्वा स्वपेद्भूमावितिहासकथाः पुनः ॥
श्रुत्वा प्रभाते सञ्जाते नदीं गत्वा विशाम्पते ।
स्नानं कृत्वा मृदा तद्वत् पाषण्डानभिवर्ज्जयेत् ॥
उपास्य सन्ध्यां विधिवत् कृत्वा च पितृतर्पणम् ।
प्रणम्य च हृषीकेशममलं वार्कमीश्वरम् ॥
गृहस्य पुरतो भक्त्या मण्डपं कारयेद्बुधः ।
दशहस्तमथाष्टौ वा करान् कुर्य्याद्विशाम्पते ॥
चतुर्हस्तां शुभां कुर्य्यात् वेदीमरिनिषूदन ।
चतुर्हस्तप्रमाणाच्च विन्यसेत्तत्र तोरणम् ॥
प्रलंव्य कलशं तत्र माषमात्रेण संयुतम् ।
छिद्रेण रत्नसम्पूर्णामधःकृष्णाजिने स्थितः ॥

तत्रेति तोरणइत्यर्थः ।

तस्य धारां च शिरसा धारयेत्सकलां निशां
धाराभिर्भूरिभिर्भूरिफलं वेदविदो विदः ॥

यस्मात्तस्मात् कुरुश्रेष्ठ धारा धार्या स्वशक्तितः।
तथैव विष्णोः शिरसि चीरधारां प्रयामयेत्॥
पञ्च कुण्डांस्ततः कृत्वा वेद्यां तत्र समाधिनः।
चतुरस्रं पूर्व्वकुण्डं कारयेत् प्रयतो द्विज॥
दक्षिणे नार्द्धचन्द्रन्तु पश्चिमे वर्त्तुलं तथा।
तथा वाश्वत्थपत्राभमुत्तरेण तु कारयेत्॥
मध्ये तु पद्माकारं च कारयेद्वैष्णवो द्विजः।
पूर्व्वतो वेदिकायास्तु निजस्थानं प्रकल्पयेत्॥
पानीयधारां शिरसि धारयेद्विष्णुतत्परः।
द्वितीयवेदौ देवस्य तत्र पद्मं सकर्णिकम्॥
तत्रमध्यस्थितं देवं मूर्त्त्या वै पुरुषोत्तमम्।
पुरुषोत्तममूर्त्तिस्तु प्राधान्यात् सुवर्णमयी कार्य्या।
अरत्निमात्रं कुण्डञ्च कृत्वा तच्च त्रिमेखलं॥
योनिवक्त्रयुतं कृत्वा ब्राह्मणैर्यवसर्पिषौ।
तिलांश्च देवदेवस्य मन्त्रैरेवाग्निवत्तदा।
हुत्वा च वैष्णवं सम्यक् कृत्वा गोचीरसंयुतम्॥
निष्पावार्द्धप्रमाणं वै धारामाज्यस्य पातयेत्।
ब्राह्मणैर्ऋत्विग्भिःकरणभूतैर्हुत्वेत्यर्थः।
निःव.र्द्धं बल्लबीजार्द्धं।
जलकुम्भान् महावीर स्थापयित्वा त्रयोदश॥
भक्ष्यैर्नानाविधैर्युक्तान् सितवस्त्रैरलङ्कृतान्।
युतानौदुम्बरैः पात्रैः पञ्चरत्नसमन्वितान्॥
औदुम्बरैः ताम्रमयैः।

चतुर्भिर्व्व ह्वचैर्होमस्ततः कार्य्य उदङ्मुखैः।
रुद्रजापश्चतुर्भिश्च यजुर्वेदपरायणैः॥
वैष्णवानि च सामानि चत्वारः सामवेदिनः।
अरिष्टवर्गसहितान्यभितः परिपाठयेत्॥
अरिष्टवर्गः, तपमूषुवाजिनमित्यस्यामन्नुत्पन्नसामद्वयं।
एवं द्वादशविप्रांस्तान् वस्त्रमाल्यानुलेपनैः।
पूजयेदङ्गुलीयैश्च कटकैर्हेमसूत्रकैः॥
वासोभिः शमनीयैश्च वित्तशाठ्यविवर्जितः।
पञ्चपा तिबाह्या वै गीतमङ्गलनिस्वनैः॥
उपाध्यायस्य च पुनर्द्विगुणं सर्व्वमेव तु।
ततः प्रभाते विमले समुत्थाय त्रयोदश॥
गाश्च दद्यात् कुरुश्रेष्ठ सौवर्णमुखसंयुताः।
पयस्विनीः शीलवतीः कांस्यदोहसमन्विताः॥
रौप्यखुराः सवस्त्राश्च चन्दनेनाभिषेविताः।
तास्तु तेषां ततो दत्त्वा भक्ष्यभोज्यान्नपिण्डितान्॥
कृत्वा वै ब्राह्मणान् सर्व्वान् रत्नैर्नानाविधैर्युतान्।
भुक्त्वा वाक्षारलवणमात्मना च विसर्जयेत्॥
अनुगम्य पदान्यष्टौ पुत्रभार्य्यासमन्वितः।
प्रीयतामत्र देवेशः केशवः क्लेशनाशनः॥
शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः।
यथोत्तरं न पश्यामि तथा मे स्वस्ति वायुषः॥
एवमुच्चार्य्य तान् कुम्भान् गाश्चैव शयनानि च।

वासांसि चैव सर्व्वेषां गृहाणि प्रापयेद्बुधः।
अभावे बहुशय्यानामेकामपि सुसंस्कृतां॥
शय्यां दद्याद्गृही भीम* सर्व्वोपस्करसंयुतां।
इतिहासपुराणानि वाचयित्वातिवाहयेत्॥
तद्दिनं नरशार्दूल य इच्छेद्विपुलां श्रियम्।
तस्मात्त्वं सत्वमालम्ब्य भीमसेनोविमत्सरः॥
कुरु व्रतमिदं सम्यक् स्नेहाद्गुह्यं मयोदितं।
त्वया कृतमिदं वीर त्वन्नामकं† भविष्यति॥
सा भैमी द्वादशी ह्येषा सर्व्वपापहरा शुभा।
या तु कल्याणिनी नाम पुरा कल्पेषु पठ्यते॥

स्नातः पुरा मण्डलमेष तद्वत्तेजोमयं वेदशरीरमाप।
अस्याञ्च कल्याणतिथौ विवस्वान् सहस्रधारेण सहस्ररश्मिः॥
इदमिह हि कृतं महेन्द्रमुख्यैर्वसुभिरथासुरदेवकोटिभिश्च।
फलमिह हि न शक्यतेऽनुवक्तुं यदि जिह्वायुतकोटयो मुखेषु।
कलिकलुषविदारिणीमतस्तामितिकथयिष्यति यादवेन्द्रते।
अपि नरकगतान् पितॄनशेषानलमुद्धर्त्तुमिहैव यः करोति॥

इति श्रीपद्मपुराणे भीमद्वादशीव्रतम्।

अथ भीमद्वादशीव्रतम्।

———०००———

कृष्ण उवाच।

विदर्भाधिपतिः श्रीमानासीत् पूज्यः सुधार्म्मिकः।

---

* भामसिति पुस्तकान्तरे पाठः।

† त्वन्नामाकमिति पुस्तकान्तरे पाठः।

दमयन्त्या पिता पूर्व्वं नलस्य श्वशुरो भुवि॥
सत्यवदनशीलश्च प्रजापालनतत्परः।
चात्मधर्म्मरतः श्रीमान् संग्रामेष्वपराजितः।
तस्यापि कुर्व्वतोराज्यं शास्त्रदृष्टेन कर्म्मणा।
आजगाम महाभागः पुलस्त्योब्रह्मणःसुतः॥
सर्व्वज्ञानविधिः श्रीमांस्तीर्थयात्राप्रसङ्गतः।
तमायतमथो दृष्ट्वा ब्रह्मयोनिमकल्मषम्॥
उत्थाय प्रददौ राजा स्वमासनमभीप्सितम्।
अर्घ्यैः पाद्यैश्च यत् किञ्चित् तत्तस्मै प्रददेत् स्वयम्॥
राज्यञ्चैवात्मना सार्द्धं निवेद्य स कृताञ्जलिः।
तेनचैवाभ्यनुज्ञातो निससाद च आसनं॥
पप्रच्छ कुशलं प्रश्नं तपस्यध्ययने तथा।
तथेति चोक्तः समुनिस्तं राजानमभाषत॥

पुलस्त्य उवाच।

कथितं कुशलं राजन् कोशे जनपदे पुरे।
धर्म्मे च ते मतिर्नित्यं तस्मात् पार्थिव वर्त्तते॥

भीम उवाच।

सर्व्वत्र कुशलं ब्रह्मन् येषां कुशलमिच्छति।
तवागमनतोनाहं प्रचितः सङ्गचारिणः॥
एवन्तौ सर्व्वदा कृत्वा सम्भाष्येऽपि परस्परं।
रसान्तैः पूर्व्ववृत्तान्तैः कथाभिरितरेतरं॥
ततः कथान्ते राजेन्द्र पुलस्त्यो याति विस्मयं।
पप्रच्छ सर्व्वलोकस्य हिताय जगतः पतिः॥

भगवन् प्राणिनः सर्व्वे संसारार्णवमध्यगाः ।
दृश्यन्ते विविधैर्दुःखैः पीड्यमाना दिवानिशं ॥
नरके गर्भवासे च व्याधिभिर्जनपा तथा ।
तथाचेष्टवियोगादिदुःखैर्दौर्गत्यसम्भवैः ॥
बलापचयमापन्नान्* परिपीडोपजीविनः ।
एवं विधान्यनेकानि दुःखानि मुनिपुङ्गव ॥
दैवान्येतानि तान्येव भृशं मे व्यथितं मनः ।
तेषां दुःखानि भूतानां प्राणिनां भूमिमापदां† ॥
उपकारकरं ब्रूहि ममानुग्रहकाम्यया ।
स्वल्पायासेन सुमहज्जायते सुमहत् फलम् ॥

पुलस्त्य उवाच ।

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
यामुपोष्य न दुःखानां भाजनं भजते जनः‡ ॥
माघमासे सिते पक्षे द्वादशी पावना स्मृता ।
तस्यां जलार्द्रवसन उपोष्य सुखभाग्भवेत् ॥

भीम उवाच ।

कथं सा मुनिशार्दूल उपोष्या द्वादशी भवेत् ।
विधिना केन विप्रेन्द्र तन्मे ब्रूहि यथाक्रमम् ॥

पुलस्त्य उवाच ।

शृणु राजन्नवहितोव्रतं पापप्रणाशनम् ।

---

* बलावयवपरमानादिति पुस्तकान्तरे पाठः ।

† भूमिमातदिति पुस्तकान्तरेपाठः ।

‡ भोजनेयजनोजनइति पुस्तकान्तरेपाठः ।

तव शुश्रूषणाद्वाच्यं मयाप्येतत् न संशयः॥
अदीक्षिताय नो देया नाशिष्याय कदाचन॥
विष्णुभक्ताय शान्ताय धर्म्मनिष्ठाय चैव हि।
वाच्यमेतन्महाराज भवतान्यस्य* कस्यचित्॥
ब्रह्महा गुरुघाती च सोमस्त्रीघातकस्तथा।
कृतघ्नो मित्रध्रुक् चौरःक्षुद्रोभग्नव्रतस्तथा॥
मुच्यते पातकैः सर्व्वैर्व्रतेनानेन भूपते।
शुद्धे तिथौ मुहूर्त्ते च मण्डपं कारयेत्ततः॥
दशहस्तप्रमाणेन देशे पूर्व्वोत्तरप्लवे।
तन्मध्ये पञ्चहस्तां तु वेदिकां परिकल्पयेत्॥
शुक्लां† सकर्द्दमां भूमिं वेदीं कृत्वा प्रयत्नतः।
विलिखेन्मण्डलं तत्र पञ्चवर्णविधानतः॥
ब्राह्मणोवेदसम्पन्नो विष्णुभक्तोजितेन्द्रियः।
पञ्चविंशतितत्त्वज्ञः स्वाचाराभिरतस्तथा।
कुण्डानि कल्पयेत्तत्र अष्टौ चत्वारि वा पुनः॥
ब्राह्मणास्तेन युञ्जीत चातुश्चरणिकाः शुभाः।
मध्ये च मण्डलस्याथ कर्णिकायां जनार्द्दनम्॥
प्राङ्मुखं तु न्यसेद्देवं चतुर्बाहुमरिन्दम।
पूजयेत विधानेन शास्त्रोक्तेन विचक्षणः॥
गन्धपुष्पैस्तथा धूपैर्नैवेद्यैर्व्विविधैरपि॥
एवं संपूज्य देवेशं ब्राह्मणैः सह देशिकः॥

---

* भवेतान्यस्यकस्यचिदिति पुस्तकान्तरे पाठः।

† शुक्लांदिमामिति पुस्तकान्तरेपाठः।

न्यसेत्स्तम्भद्वयं पश्चान्निम्बकाष्ठसमन्वितम्।
देवस्याभिमुखं तत्र पीठस्योपरि कल्पयेत्॥
षड्‌त्रिंशदङ्गुलं श्रेष्ठं चतुरस्रं समन्ततः।
तत्र शिलां समालभ्य सुवृत्तं सुदृढं नवं॥
आरोपयेद्घटं तत्र यादृशं तु शृणुष्व मे।
कलधौतं तथा रौप्यं ताम्रं वाप्यथ मृण्मयं॥
सर्व्वलक्षणसम्पूर्णं सुदृढं व्यङ्गवर्ज्जितं।
तं सहस्रशतं कुर्य्यादच्छिद्रमथवापि वा।
स्वकुलत्वानुरूपेण पार्श्वैकच्छिद्रमेव वा॥
सन्निधाने ततः कुर्य्यात् सलिलं वस्त्रमातलं।
होमार्थं कल्पयेच्चापि पलाशाः समिधः शुभाः॥
तिला घृतं तथा क्षीरं शमीपत्राणि चैव हि।
वेद्याः पूर्व्वोत्तरे भागे ग्रहपीठं प्रकल्पयेत्॥
तत्र पूज्या ग्रहाः सर्व्वे ग्रहयज्ञविधानतः।
पूर्व्वस्यां दिशि शक्रस्य पूजां कुर्व्वीत यत्नतः॥
दक्षिणस्यां यमस्याथ प्रतीच्यां वरुणस्य च।
कुवेरस्य तथोदीच्यां बलिं कुर्य्यात् फलाक्षतैः॥
एवं सम्भृत्य सम्भारं शुक्लाम्बरधरस्तथा।
समलस्य्र शुभैर्गन्धैर्दर्भपाणिरतन्द्रितः॥
पीठमारोपयेयुस्ते यजमानं द्विजोत्तमाः।
यजमानोऽपि देवस्य सम्मुखः प्रयतः शुचिः॥
उपविश्य पठन्मन्त्रं पुराणोक्तमिदं शृणु।
नमस्ते देवदेवेश नमस्ते भुवनेश्वर।

व्रतेनानेन मान्त्वाहि परमात्मा नमोऽस्तु ते ॥
तिलोदकस्य धारास्ताः प्रतिसन्ध्यासमन्वितः।
शिरसा धारयेत्तूष्णीं तद्गतेनान्तरात्मना ॥
होमं कुर्युस्ततो विप्रा दिक्षु सर्व्वासु तत्पराः।
पठेयुः शान्तिकाध्यायं विष्णुसंज्ञानि यानि च ॥
वादित्रैस्ताड्यमानैश्च शङ्खगेयस्वनैस्तथा।
पुण्याहं जयशब्दैश्च वेदध्वनिविमिश्रितैः ॥
मङ्गलैस्तुतिसंयुक्तैः कारयेत्तु महोत्सवम्।
देवदेवस्य चरितं केशवस्य महात्मनः ॥
हरिवंशादिकं सर्व्वं श्रावयेत् ब्राह्मणोवरः।
सौवर्णिकमथाख्यानं भारताख्यानमेव च ॥
व्याख्यानकुशलः कश्चिच्छ्रावयेत् पुरतस्थितः।
अनेन विधिनासाद्य तां* रात्रीं प्रत्यवर्द्धिनीं ॥
यजमानो नयेद्धीमान् यावत् सूर्य्योदयोभवेत्।
ब्राह्मणाश्चापि तां रात्रिं सुकृती जातवेदसम् ॥
मन्त्रैस्तु वैष्णवैर्दिव्यैः त्तपयेयुर्महीपते।
वासुदेवस्य शिरसोधारां तत्र प्रपातयेत् ॥
क्षीरेणाज्येन वा राजन् सर्व्वसिद्धिप्रदायिनीं।
ततः प्रभातसमये यजमानोद्विजैः सह ॥
स्नानं कुर्य्यात् नृपश्रेष्ठ नद्यां सरसि वा पुनः।
अथ वा शक्तिहीनस्तु यजमानोष्णवारिणा ॥
ततः शुक्लानि वस्त्राणि परिधाय यतव्रतः।

---

* साध्वमिति पुस्तकान्तरे पाठः।

अर्घंञ्च दत्त्वा भास्करस्य सविधानं प्रसन्नधीः॥
पुष्पैर्धूपैः सनैवेद्यैः पूजयेत् पुरुषोत्तमं।
हुत्वा हुताशनं भक्त्या दत्त्वा पूर्णाहुतिं ततः॥
दक्षयेत् ब्राह्मणान् सर्व्वान् होतारोयेऽत्र कल्पिताः।
शय्यालाजैश्च गोदानैर्वस्त्रैराभरणैस्तथा॥
आचार्य्यः पूजनीयोऽत्र सर्व्वस्वेनापि भारत।
येन वा तुष्टिः स्यादेव देवतुल्यो गुरुर्य्यतः॥
वित्तशक्तिविहीनस्तु भक्तिशक्तिसमन्वितः।
दीनानाथविशिष्टेभ्यो वन्दिनश्च समागताः॥
तेषामन्नं हिरण्यञ्च दद्याच्छुद्धेन चेतसा।
एवं सम्पूज्य विप्राय भोजयित्वा यथेप्सितम्॥
यथाविभवसारेण पश्चाद्भुजीत वाग्यतः।
हविष्यमन्नं यत्नेन न हविष्यातिलस्तथा॥
एष यज्ञो महाराजन् चोक्तो यस्ते प्रकीर्त्तितः।
यत्कृत्वा* सर्व्वपापेभ्यो मुच्यते नात्र संशयः॥
वाजपेयातिरात्राभ्यां याजयन्ति शतं समाः।
सर्व्वे ते विद्धि यागस्य कलां नार्हन्ति षोड़शीम्॥
सप्तजन्मनि सौभाग्यमायुरारोग्यसंपदः।
प्राप्नोति द्वादशीमेतां यामुपोष्य विधानतः॥
मृतो विष्णुपुरं याति विष्णुना सह मोदते।
चतुर्य्युगानि द्वात्रिंशद्विष्णुरूपधरस्तथा।
रुद्रलोके तथा राजन् युगानि द्वादशैव तु॥

---

* पद्मिर्ष्येति पुस्तकान्तरेपाठः।

ब्रह्मलोके तथा त्रीणि सूर्य्यलोके युगे तथा।
पुण्यक्षयादिहाभ्येत्य राजा भवति धार्म्मिकः॥
पृथिव्यधिपतिः श्रीमान् विजितारिः प्रतापवान्।
व्रतमेतत्पुरा चीर्णं सगरेण महात्मना॥
अजेन धुन्धुमारेण दिलीपेन ययातिना।
अन्यैश्च पृथिवीपक्षपालितैरिह भूतले*॥
स्त्रीभिर्वैश्यैस्तथाशूद्रैः धर्म्मकामैः सदा नृप।
भृग्वाद्यैर्म्मुनिसंघैश्च ब्राह्मणैर्वेदपारगैः॥
त्वया च पृष्टेन मया कथितं तन्नराधिप।
अद्यप्रभृति चैवेतिख्यातिं यास्यति भूतले॥
भीमाख्या द्वादशीचेति कृतकृत्या नरा यतः।
एषा पुलस्त्यमुनिना कथिता कुरुनन्दन॥
यश्चैनां कथितां यत्नात् कुर्य्याद्वा भक्तिभावितः।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोके महीयते॥
दरिद्रेणापि वा पार्थ वित्तशाठ्यं विवर्जयेत्।
विष्णुभक्तेन कर्त्तव्या संसारभयभीरुणा॥
भीमेन या किल पुरा समुपोषितत्वा
द्राक्षीगलत्स्थिरसुशीतलवारिधारा॥
तां द्वादशीं त्रिदशवेद्यमुखां स्मरेद्यः
सम्यक् समाचरति याति स विष्णुलोकम्॥

इति भविष्योत्तरोक्तं भीमद्वादशीव्रतम्।

---

* पृथिवीपक्षैपालितादीपभूतले इति पुस्तकान्तरे पाठः।

नन्दिकेश्वर उवाच ।

शृणु राजन् प्रवक्ष्यामि विष्णोर्व्रतमनुत्तमम् ।
विभूतिद्वादशी नाम सर्व्वाभरणभूषिता ॥
कार्त्तिके वाथ वैशाखे मार्गशीर्षेऽथ फाल्गुने ।
आषाढ़े वा दशम्यान्तु शुक्लायां लघुभुङ्नरः ॥
कृत्वा सायन्तनीं सन्ध्यां गृह्णीयान्नियमं बुधः ।
एकादश्यां निराहारः समभ्यर्च्य जनार्द्दनम् ॥
द्वादश्यां द्विजसंयुक्तः करिष्ये भोजनं ततः ।
तदविघ्नेन मे यातु साफल्यं मधुसूदन ॥
ततः प्रभाते चोत्थाय कृत्वा स्नानजपं शुचिः ।
पूजयेत् पुण्डरीकाक्षं शुक्लमाल्यानुलेपनैः ॥
विभूतिदे नमः पादौ विकोशायेति जानुनी ॥
नमः शिवायेतिचोरू कटिं वै विश्वरूपिणे ।
कन्दर्पाय नमोमेढ्रं आदित्याय नमः करौ ॥
दामोदरायेत्युदरं वासुदेवाय च स्तनौ ॥
माधवायेत्युरोविष्णो कण्ठमुत्कण्ठिने नमः ।
श्रीधराय मुखं केशान् केशवायेतिना रदः ॥
धृतशार्ङ्गधरायेति श्रवणे वरदाय वै ।
स्वनाम्ना शङ्ख,चक्रा,सि,गदा,वरद,पाणयः ॥
शिरः सर्व्वात्मने ब्रह्मन् नम इत्यभिपूजयेत् ।
मत्स्यमुत्फुल्लसंयुक्तं हैमं* कृत्वा तु शक्तितः ॥
उदकुम्भसमायुक्तमग्रतः स्थापयेद्विभोः ।

* 'मत्स्यमुत्फुल्लसंयुक्तं' हेममिति पुस्तकान्तरे पाठः ।

गुडपात्रन्तिलैर्युक्तं सितवस्त्राभिवेष्टितम् ॥
रात्रौ च जागरं कुर्य्यादितिहासकथादिकम् ।
प्रभातायां तु शर्व्वर्य्यां ब्राह्मणाय कुटुम्बिने ।
सकाञ्चनोत्पलं देवं सोदकुम्भं निवेदयेत् ॥
यथा ना मोच्यते विष्णो सदा सर्व्वविभूतिभिः ।
तथा मामुद्धराशेषदुःखसंसारकर्दमात् ॥
दशावताररूपाणि प्रतिमासक्रमान्मुने ।
दत्तात्रेयं तथा व्यासमुत्पलेन समन्वितम् ॥
प्रतिमासं तु कर्त्तव्या मूर्त्तयः काञ्चनेन वै ।
काञ्चनस्यैव पद्मस्य संस्थाप्योपरिपूजयेत् ॥
पुष्प धूपादिनैवेद्यैर्भक्ष्यभोज्यैः सदीपकैः ।
वस्त्रैराभरणैश्चैव यथाविभवसारतः ॥
रात्रौ जागरणं कुर्य्याद्गीतनृत्यादिभिर्नरैः ।
ततः प्रभाते विमले कृतस्नानादिकक्रियः ॥
उपदेष्टे तु दातव्यं सर्व्वमेतत् समाहृतम् ।
प्रतिमासं पुराणज्ञैर्व्वेदवेदाङ्गपारगैः ॥
ततः संवत्सरस्यान्ते विशेषं शक्तिपूर्व्वकम् ।
शक्तिपूर्व्वकं विभूतिपुरःसरम् ।
कृत्वासम्पूज्य लवणपर्वतेनसमन्वितं ।
लवणपर्व्वतदानविधिस्तु दानखण्डे विलोकनीय
शय्यां सोपस्करां श्रेष्ठां गाञ्चैवोपस्करान्वितां ।
ग्रामं देशपतिर्दद्यात् क्षेत्रं ग्रामाधिपस्तथा ।
निवर्त्तनं क्षेत्रपतिर्भवनञ्च समृद्धिमत् ॥

एवं विभवसारेण पूजयित्वेदृशं गुरुम् ।
अन्यानपि यथाशक्त्या तर्पयित्वा द्विजोत्तमान् ॥
वस्त्रान्नगोहिरण्यादिसत्त्वमास्थाय चोत्तमम् ।
यत्र सत्त्वं तत्र हरिस्तोषमायात्यसंशयम् ॥
यथातिनिष्ठः पुरुषो भक्तिमान् माधवं प्रति ।
पुष्पार्च्चनविधानेन स कुर्य्याद्वत्सरद्वयम्* ॥

पद्मपुराणात् ।

शेषे गास्तु प्रदातव्या मध्यमे भूमिरुत्तमा ।
कन्या सकाञ्चना देया† ह्येषा दक्षिणा स्मृता ॥
प्रथमं ब्रह्मदैवत्यं द्वितीयं वैष्णवं तथा ।
तृतीयं रुद्रदैवत्यं त्रयो देवाः त्रिषु स्थिताः ॥

मत्स्यपुराणात् ।

अनेन विधिना यस्तु विभूतिद्वादशीव्रतम् ।
कुर्य्यात् स पापनिर्मुक्तो गुरूणां‡तारयेच्छतम् ।
सप्तजन्मान्यसौ मर्त्यो विभूतिं प्राप्नुयात्परम् ।
रोगदौर्गत्यपापानां भाजनं नोपजायते ॥
भक्तिश्च यज्ञपुरुषे तस्य जन्मनि जन्मनि ।
प्राप्नुयादच्युतं स्थानमच्युतस्य प्रसादतः ॥
इयञ्चाखण्डिता कार्य्या विभूतिद्वादशी नरैः ।
सर्व्वपापोपशमनी फलमीदृक्प्रदायिनी ॥

---

* वत्सरएषमिति पुस्तकान्तरे पाठः ।

† कन्यासकाञ्चनं देय मिति पुस्तकान्तरे पाठः ।

‡ पितृणां तारयेच्छतमिति पुस्तकान्तरे पाठः ।

इति कलुषविदारणं जनानां
पठति सदा शृणोति यश्च भक्त्या।
मतिमपि च ददाति देवलोके
वसति चिरं च स पूज्यतेऽमरौघैः॥

इति मत्स्यपुराणोक्तं विभूतिद्वादशीव्रतम्।

वज्र उवाच।

द्वादशीषु कथं विष्णुः सोपवासेन पूजितः।
राज्यप्रदः स्याद्धर्मज्ञ तन्मे त्वं ब्रूहि तत्त्वतः॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थोप्यभिक्षुकः।
राज्ञा संरक्षिताः सर्व्वे शक्नुवन्ति निषेवितुम्॥
मानुषेण शरीरेण राजा देववपुर्द्धरः।
क्षत्रियोऽपि सतां पूज्यो ब्राह्मणानां महात्मनां॥
विना राज्यं हि या लक्ष्मीः परतन्त्रा हि सा मता।
तस्माद्राज्यं प्रशंसन्ति तत्राज्ञानं विहन्यते॥
तुल्यधातुशरीराणां तुल्यावयवधारिणां।
नरेन्द्राणां नरैर्न्नित्यन्देववद्भुवि वर्त्तते॥
राज्यदां द्वादशीं* तस्माद्वक्तुमर्हति मे भवान्।
यामुपोष्य महद्राज्यं प्राप्तवान् स तु वै द्विज॥

मार्कण्डेय उवाच।

शृणुष्वावहितो राजन् द्वादशीं राज्यदां शिवां।

---

* नीराज्यद्वादशीमिति पुस्तकान्तरे पाठः।

यामुपोष्य नरो लोके राज्यमाप्नोत्यकण्टकम् ॥
मार्गशीर्षस्य मासस्य शुक्लपक्षे नराधिप ।
दशम्यां प्रयतः शुद्धः स्नानमभ्यङ्गपूर्व्वकं ॥
हविष्यभुक् प्रशान्तात्मा दन्तधावनपूर्व्वकं ।
उपवासस्य सङ्कल्पं श्वोभूतस्य तु कारयेत् ॥
देवाङ्गणे कुशस्तीर्णामेकवस्त्रोत्तरच्छदां ।
अध्यासीत महीं तत्र तां रात्रीं संयतो नयेत् ॥
द्वितीयेऽह्नि ततः कुर्य्यादद्भिः स्नानमतन्द्रितः ।
पूजनंचैव सर्व्वस्य* सर्व्वमुक्तेन कारयेत् ॥
कर्पूरं चन्दनं देयं मल्लिका श्वेतयूथिका ।
जात्यश्च शुक्ला राजेन्द्र धूपं कुन्दुरुमेवच ॥
घृतेन दीपा दातव्या शुक्लवर्त्तिसमन्विताः ।
घृतोदनं दधिक्षीरे परमान्नं तथैव च ॥
इक्षुमिक्षुविकारं वा देवदेवे निवेदयेत् ।
कालोद्भवं मूलफलं पर्णं तत्र न विर्त्तयेत्† ॥
यथालाभेन तद्देयं शुक्लं वा स्याद्विशेषतः ।
हवनञ्च ततः कार्य्यं परमान्नेन पार्थिव ॥
तद्विष्णोः परमित्येवं होममन्त्रोऽभिधीयते ।
द्वादशाक्षरकं मन्त्रं स्त्रीशूद्रेषु विधीयते ।
ततोऽग्निहवनं कृत्वा भक्त्या संपूज्य च द्विजान् ।

---

* सर्व्वं शुक्लेनेति पुस्तकान्तरे पाठः ।

† पर्णं तत्र निवेदयेदिति पुस्तकान्तरे पाठः ।

सितरङ्गेण कर्त्तव्या भूमिशोभा सुरालये ॥
रात्रौ जागरणं कार्य्यं गीतं नृत्यञ्च पार्थिव ।
कर्म्मणा देवदेवस्य कर्त्तव्यं श्रवणं तथा ॥
द्वादश्यां विधिनैतेन पुनः पूज्यः सनातनः* ।
राज्यलिङ्गं प्रदातव्यमेकं विप्राय दक्षिणा ॥
ततश्च पश्चाद्भोक्तव्यं हविष्यं पार्थिवोत्तम ।
एकादशी यथा मध्ये स्नानयोर्व्वर्त्तते नृप ॥

तथा भोक्तव्यमितिशेषः द्विवचनबलादेकभक्तस्नानमनुक्रष्यते अयमर्थः एकादश्यामनागतायां यो मे विप्राय दक्षिणां तम भुक्तमतीतायां पारणं, स्नानग्रहणं दूरतो वर्जनार्थं ।

कार्स्नेन मौनञ्च कर्त्तव्यं जप्यं कार्य्यन्तु मानसम् ।
द्वादशीष्वथ शुक्लासु सर्व्वास्वेव विशेषतः ॥
विधिस्तवायं निर्द्दिष्टः कृष्णास्वेवञ्च कारयेत् ।
विशेषं तासु वक्ष्यामि तन्मे निगदतः शृणु ॥
रक्तवस्त्रेण कर्त्तव्या देवपूजा यथाविधि ।
रक्तञ्च देयं नैवेद्यं पुष्पगन्धानुलेपनं ॥
तिलतैलेन दीपाश्च महारजतरञ्जिताः ।
दीपेषु वर्त्तयोदेया होमः कार्य्यस्तथा तिलैः ॥
भूमिशोभा च कर्त्तव्या रक्तैर्भूपाल वर्णकैः ।
अनेन विधिना पूज्य राजन् संवत्सरं प्रभुं ॥
कार्त्तिक्यां समतीतायां कृष्णा या द्वादशी भवेत् ।
व्रतावसाने तस्यां तु महावर्त्तिं प्रदापयेत् ॥

---

* जनार्द्दन इति पुस्तकान्तरे पाठः ।

वाससा च समग्रेण तुलया च घृतस्य च ।
ब्राह्मणाय च दातव्या धेनुः कांस्योपदोहना ॥
हेमशृङ्गैः खुरै रौप्यैर्मुक्तालाङ्गूलभूषिता ।
वस्त्रोत्तरीया दातव्या शक्त्या द्रविणसंयुता ॥
संवत्सरेण राजा स्यान्नरः पर्व्वतगह्वरे ।
त्रिभिः संवत्सरैः पुण्यैर्जायते मण्डलेश्वरः ॥
तथा द्वादशभिः पुण्यैः राजा भवति पार्थिवः ।
राज्यप्रदा तेऽभिहिता मयैषा
स्याद्द्वादशी पापहरा वसिष्ठा ।
उपोष्य यां भूमितले नरेन्द्रो
भवत्यजेयस्तु रणेऽरिसंघैः ॥

इति विष्णुधर्म्मोत्तरोक्तं राज्यद्वादशीव्रतम् ।

अम्बरीष उवाच ।

कथं सुनामभिर्द्देवो द्वादश्यां मुनिसत्तम ।
पूज्यते केशवो मर्त्यैं मुक्तिकामफलार्थिभिः* ॥

वसिष्ठ उवाच ॥

शृणुष्वैकमना भूप सुनामद्वादशी शुभा ।
सर्व्वपापहरा स्वर्ग्या भुक्तिमुक्तिप्रदायिका ॥
मनसा च चिकीर्षन्ति द्वादशीं ये नरोत्तमाः ।
तेऽपि घोरं न पश्यन्ति पुनः संसारसागरं ॥

---

* क.मफलातिथिरिति पुस्तकान्तरे पाठः ।

आद्यं सर्व्वव्रतानां तु वैष्णवानां नृपोत्तम ।
नरैस्त्रिभिश्च कर्त्तव्यं विष्णोस्तुष्टिकरं परम् ॥
मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः ।
प्रथमश्चैव गृह्णीयाद्द्वादशीं विधिवन्नरः ॥
मनोवाक्कायचेष्टाभिः सुविशुद्धो जितेन्द्रियः ।
दशम्यां नियतः स्नात्वा प्रणिपत्य जनार्द्दनम् ॥
हविष्यान्नकृताहारः शुचिर्भूत्वा भवेद्व्रती ।
उपतिष्ठे शुचौ देशे भक्षयेद्दन्तधावनं ॥
उपोष्यैकादशीं* सम्यक् पूजयित्वा जनार्द्दनम् ।
सुनामद्वादशीं देव अहं भोक्ष्ये परेऽहनि ॥
एवं सङ्कल्प्य नियमं प्रणम्य गरुड़ध्वजम् ।
दशम्यामेकभक्ताशी संयतः संवसेन्निशां ॥
एकादश्यां ततः प्रातरेकचित्तः समाहितः ।
पूर्व्वं संपूजयेत् सूर्य्यं ततो देवं प्रपूजयेत् ॥
देवं विष्णुं ।

नमस्ते देवदेवेश नमस्ते भक्तवत्सल ।
भास्कराय नमस्तुभ्यं रवये त्वयि भानवे ॥
नमः सूर्य्याय देवाय नमस्ते सप्तसप्तये ।
एकस्मै हि नमस्तुभ्यमेकचक्ररथाय च ॥
ज्योतिषां पतये नित्यं सर्व्वतेजोहराय च ।
दिवाकर नमस्तेऽस्तु प्रभाकर नमोस्तु ते ।
एवं संपूज्य विधिवत् पुष्पधूपानुलेपनैः ।

---

* शुद्धामिति पुस्तकान्तरे पाठः ।

दीपैर्वस्त्रैः सनैवेद्यैस्ततो विप्रगृहं व्रजेत् ॥
अच्युतं चार्च्चयेद्भक्त्या मालतीकुसुमैर्भृशम् ।
गुग्गुलं घृतसंयुक्तं दीपं दद्यादहर्निशम् ॥
पायसापूपसंयावकरम्भादिकदम्बकैः ।
नैवेद्यं हरये दद्यात् फलमोदकफाणितैः ॥
गीतवाद्यैर्हरेरिष्टैः प्रणमेच्च मुहुर्मुहुः ।
एवं पूजां हरेः कृत्वा द्विजं ज्ञानप्रदायकम् ॥
पूजयेदन्तरं नास्ति विप्रकेशवयोरिव ।
ततो व्रतं समालभ्य चन्दनेन नवं घटम् ॥
स्रग्विणं तोयसंपूर्णं न्यसेद्देवस्य सन्निधौ ।
सुनीलमौक्तिकाख्यन्तु वज्रं रत्नसुवर्णकं ॥
न्यस्तगर्भं सवस्त्रं* तु पूजयेत्तत्र केशवं ।

केशवमूर्त्तिस्तु दक्षिणाधोहस्तादारभ्य प्रदक्षिणं पद्म शङ्ख चक्र गदा धारिणी सा च स्वर्णमयी विधेया ।

यस्य रोचिस्थिता मेघाः सर्व्वे सविषपन्नगाः ॥
सागराः कुक्षिदेशस्थाः सीतासनजगत्पतिः† ।
वनस्पतिरसो दिव्यः सर्व्वगन्धेषु चोत्तमः ॥
घृतेन सहसंमिश्रः धूपोऽयं प्रतिगृह्यतां ।
केशवं केशिहा दुष्टकंसदैत्यनिषूदनः ॥
सर्व्वकामप्रदोदेवः स मे पापं व्यपोहतु ।
एवमभ्यर्च्च देवेशं प्रणिपत्य क्षमापयेत् ॥

---

* न्यस्ता:गर्भसद्वस्त्रस्य इति पुस्तकान्तरे पाठः ।

† श्रोत्रयोनुजगत्पते इति पुस्तकान्तरेपाठः ।

द्वादश्यां गन्धतोयेन स्नापयित्वेह माधवं ।
सर्व्वपापविनिर्मुक्तो वैष्णवीं लभते तनुं ॥
कृताभिषेकः पुण्यात्मा सम्यगभ्यर्च्य केशवं ।
नवसूतां तथा धेनुं ब्राह्मणायोपपादयेत् ॥
केशवः प्रीयतां देवः केशिहन्ता महाद्युतिः ।
स च मे भगवान् प्रीत इष्टान् कामान् प्रयच्छतु ॥
एवं प्रदक्षिणं कृत्वा शृणु तस्यापि यत् फलं ।
त्रिंशदब्दकृतं पापं हत्वा स त्रिविधं नरः ॥
षष्टिवर्षसहस्राणि स्वर्गे मोदति देववत् ।
यदा कालादिहायाति स धर्म्मधनवान् भवेत् ॥
अथवा दशधेनूनां* तन्मात्रं कल्पयेन्नरः ।
तत्फलं हि विनिर्द्दिष्टं यथा शक्त्या तु दक्षिणा ॥
विभक्त्या फलमाप्नोति भक्तिरेवात्र कारणम् ।
पौषे चैव तु मासे वा यस्त्वेवं कुरुते नरः ॥
समाहितमना भूप रसं नु विप्रदायकः ।
आपो नरा इति प्रोक्ता आपो वै नरसूनवः ॥
अयनं† वर्त्तयेत्स्नात्मानारायणइति स्मृतः ।
नारायणः प्रीयतां मे देवो नरप्रियः सदा ॥
इष्टकामप्रदं नित्यं स मे पापं व्यपोहतु ।
ततः प्रदक्षिणं कृत्वा ब्राह्मणान् भोजयेत्ततः ॥
एवं हि यजमानस्य तस्य पुण्यफलं शृणु ।

---

* अभावादृशधेनूनामिति पुस्तकान्तरे पाठः ।

† ता यदस्यायनं पूर्व्वं तेनेति पुस्तकान्तरे पाठः ।

षष्टिवर्षकृतं पापं स्वल्पं वा यदि वा बहु ॥
दत्वा स्वर्गमवाप्नोति वर्षाणामयुतं शुभं।
माघस्यैव तु मासस्य द्वादशी शुक्लपक्षतः॥
यः क्षपेद्विशुचिर्भूत्वा एकचित्तः समाहितः।
तपने पूजने नित्यं ब्राह्मणानां च तर्पणैः॥
प्रदाने नृपशार्दूल इमं मन्त्रमुदीरयेत्।
महालक्ष्मीः पुरानेयी भगिनी शशिनोऽनुजा॥
धवस्त्वमपि तस्यास्तु सर्व्वकामद माधव।
प्रीयतां देवदेवो मे मधुकैटभसूदनः॥
कंसकेशिनिहन्ता च मम पापं व्यपोहतु।
एवं यः कुरुते नूनं तस्य पुण्यफलं शृणु॥
यावज्जन्मकृतं पापं हत्वा सर्व्वमशेषतः।
दिव्यवर्षसहस्राणि स्वर्गं वसति षोड़श॥
गुडधेनुप्रदोमाघे इहायातः सदा सुखी।
भवेद्राजनिरातङ्कः सर्व्वैश्वर्य्यसमन्वितः॥
तत्र विष्णुपरोभूत्वा क्रमान्मोक्षमवाप्नुयात्।
फाल्गुनामलपक्षस्य दशम्यां नियतः शुचिः॥
पूजयित्वा विधानेन गन्धपुष्पादिना हरिं।
तिलधेनुं ततो दद्यादृषं चापि सुभक्तितः॥
मन्त्रेणानेन राजेन्द्र गोविन्दः प्रीयतामिति।
गवां भक्तोसि गोस्वामी गोवासी गोकृतालयः॥
सर्व्वकामप्रदो नित्यं स मे पापं व्यपोहतु।
ततः प्रदक्षिणं कृत्वा शृणु पुण्यं यथातथं॥

बलीवर्द्दसहस्राणां दशानां धुरवाहिनो।
न तैस्तत्फलमाप्नोति द्वादश्यां यद्भवेन्नृप।
दिव्यवर्षसहस्राणि स्वर्गे तिष्ठति स्वर्गिवत् ॥
चैत्रस्य द्वादशी शुक्ला समुपोष्या नृपोत्तम।
स्नात्वा सम्पूजयेद्विष्णुं जगतान्तरचारिणं ॥
पूर्व्वोक्तविधिवत् स्नात्वा गोमूत्रैर्गोमयेन वा।
स्नापयित्वामृतेनैव पञ्चानां गव्यसंयुतैः ॥
जलैः पश्चात्तु पूज्यैवं गन्धधूपविलेपनैः।
पुष्पवासोभिरेवं हि मन्त्रेणानेन बुद्धिमान् ॥
प्रवेशनो सदाशीलो* भगवान् रक्षणाय च।
उद्वर्त्तांश्च विनिर्जेतुं मासि विष्णुरतोहरेः ॥
विष्णुर्भवतु मे प्रीतो विष्णुर्देवः सनातनः।
सर्व्वपापविनाशाय विष्णुर्मे प्रीयतामिति ॥
मधुधेनुमभावाच्च शक्तितः पात्रमेव च।
दत्त्वा यत् फलमाप्नोति तदिहैकमनाः शृणु ॥
सर्व्वजन्मनि यत्पापमिह जन्मनि साम्प्रतं।
वर्त्तते सकलं हत्वा स्वर्गलोके महीयते ॥
वैशाखस्य तु मासस्य पूजयेन्मधुसूदनं।
पूर्व्वोक्तविधिना राजन् सौवर्णं मधुसूदनं ॥
जलकुम्भेन संस्थाप्य मन्त्रेणानेन पूजयेत्।
एकार्णवे जले धातर्हृता वेदाः पुरा हरे ॥
मधुनामा हतःसोऽपि तेनानुमधुसूदनः।

---

* प्रवेशनैः सदेति पुस्तकान्तरे पाठः।

स मे भवतु सुप्रीतो देवदेवः सनातनः॥
सर्व्वपापापनोदाय प्रीयतां मधुसूदनः।
घृतमन्नमथो दत्त्वा ब्राह्मणान् भोजयेत्ततः॥
ततः प्रदक्षिणं कृत्वा दत्त्वादेयां तथैव गां।
एवन्तु रक्षमाणस्य तस्य पुण्यमतः शृणु॥
कपिलायाः सहस्रस्य सम्यक्दत्तस्य यत् फलं*।
तत्फलं समवाप्नोति भक्तियुक्तेन संशयः॥
यावदिन्द्रो वसेत् स्वर्गे तावदेव स तिष्ठति।
ज्यैष्ठस्यैव तु मासस्य शुक्लपक्षे तु द्वादशीं॥
पूजयेद्विधिवद्भक्त्या समुपोष्य त्रिविक्रमं।
जलधेनुमथोदद्याद्विप्राय नियतः शुचिः॥
यज्ञभागभुजोदैत्यान् सन्निहत्य क्रमैस्त्रिभिः।
त्रैलोक्यमाहृतं तस्मात्तेनासि त्वं त्रिविक्रमः॥
त्रिविक्रमं त्रिलोकेशं प्रीणयामि त्रिविक्रमं।
ततः प्रदक्षिणं कृत्वा ब्राह्मणेभ्यश्च दक्षिणां॥
दत्त्वा तु भोजयेत्तांस्तु शृणु तस्यापि यत्फलं।
वाजपेयस्य यज्ञस्य सम्यगिष्टस्य पार्थिव॥
तत्फलं लभते मर्त्त्यो परत्रैव सुखी भवेत्।
वामनन्तु यथाषाढे समुपोष्य प्रयत्नतः॥
द्वादश्यां नियमाहारी वामनं तत्र पूजयेत्।
हिताय सर्व्वदेवानामादित्यः कामदो यथा॥
तथा त्वं भव मे देव वामनो बलिबन्धनः।

* गवां दशसहस्रेण पात्रदत्तेन यत्फलमिति पुस्तकान्तरे पाठः।

तिलधेनुं ततो दद्याद्दामनः प्रीयतामिति ॥
इन्द्रस्थानाच्च सरसस्तथा पर्व्वतमस्तकात् ।
एताभिः स्नाप्य देवेशं दद्याद्गोरोचनां शुभां ॥
ततस्तु कलशा देया यथावत्समलङ्कृताः ।
जातीपल्लवसंयुक्ताः सफलाश्च सकाञ्चनाः ॥
पुण्याहवेदशब्देन वीणावेणुरवेण च ।
शब्देन मधुरेणैव सूतमागधबन्दिनां ॥
एवं संस्थाप्य गोविन्दं स्वनुलिप्तं स्वलङ्कृतं ।
सुवाससम्पूजयेत्तं सुमनोभिश्च कुङ्कुमैः ॥
धूपैर्दीपैर्मनोज्ञैश्च पायसेन तु भूरिणा ।
मालारत्नप्रदानैश्च होमैः पुण्यैः सदक्षिणैः ॥
वासोभिर्भूषणैर्हृद्यै र्गोभिरश्वगजैरपि ।
ब्राह्मणाः पूजनीयाश्च विष्णोराद्याः समूर्त्तयः ॥
विष्णोरात्रौ प्रसुप्तस्य दामोदरगतस्य च ।
ब्रह्माण्डस्य सुतोसि त्वं दामोदरइति स्मृतः ॥
दामोदर इमां धेनुं गृह्णातु स्वयमेव हि ।
द्विजरूपेण ते विष्णो प्रकृत्येषा सनातनी ॥
इत्येवं पृथिवीदानात् फलं प्राप्नोति मानवः ।
सुवर्णस्य महाधेनुं दत्त्वा वरं नृपोत्तम ॥
हत्वा पापान्यशेषाणि शतजन्मान्तराणि वैं ।
वैष्णवं लोकमाप्नोति यावदिन्द्राश्चतुर्दश ॥
सम्यगत्र व्रतेचीर्णे सप्तजन्मानुगं फलं ।
ददाति भगवान् विष्णुः क्रमात् मोक्षं नरेश्वर ॥

ब्राह्मणान् भोजयेद्भक्त्या भक्ष्यैस्तूष्यावचैरपि।
ततः प्रदक्षिणं कृत्वा यथाशक्त्या च दक्षिणां॥
कलशान् द्वादशांश्चैव ब्राह्मणेभ्यः प्रदापयेत्।
वस्त्रेण वेष्टतग्रीवान् होमगर्भोपशोभितान्॥
दधिक्षीरयुतांश्चैव सगुणान् नृप भूरिशः।
शक्तिर्यथा तथा दद्याद्भक्तिरेवात्र कारणं॥
प्रसङ्गेनापि यो राजन् सुनामद्वादशीं नरः।
करोति पुण्यभागी स यथा दद्याद्बवेद्बलिः॥
एवं यः कुरुते राजन् सुनामद्वादशीं नरः।
राजसूयस्य यज्ञस्य फलं समधिकं भवेत्॥
सर्व्वदानेषु यत्पुण्यं यच्च पुण्यं तपोवने।
सर्व्वतीर्थेषु यत्पुण्यं तत्पुण्यं समुदाहृतम्॥
गावो द्वादश दातव्या वस्त्रयुग्मानि काञ्चनं।
अलाभाच्चैव गामेकां पात्रञ्च स्वर्णसंयुतं॥
समासेनाथवा प्येवं चञ्चलं जीवितं ततः।
बहुविघ्नानि धर्म्मस्य कर्त्तुः छिद्रं न जायते॥
एतज्ज्ञात्वा तु मेधावी व्रते युग्मेन यत्नतः।
न तस्य वित्तलोभोस्ति भक्तिग्राह्योऽस्ति केशवः॥
अनेन विधिना यस्तु द्वादशीं परिवत्सरं।
कृत्वा नरः परं याति विष्णुलोकमनामयं॥
सुनामद्वादशीचैषा व्रतानामुत्तमं व्रतं।
आद्या नरैस्तु कर्त्तव्या तोषयद्भिर्जनार्द्दनं॥
यश्चेमां कीर्त्तयेत् पुण्यां शृणुयाद्द्वादशीं नरः।

तावुभौ गच्छतः स्वर्गं कर्त्ता विष्णुपुरं व्रजेत्॥

इति वह्निपुराणोक्तं सुनामद्वादशीव्रतम्।

पुलस्त्य उवाच।

फाल्गुनामलपक्षस्य एकादश्यामुपोषितः।
नरोवा यदि वा नारी समभ्यर्च्य जगत्पतिं॥
हरेर्नाम जपन् भक्त्या सप्तवारान् जनेश्वर।
उत्तिष्ठन् प्रस्वपंश्चैव हरिमेवाशु कीर्त्तयेत्॥
अतः प्रभाते विमले द्वादश्यां नियतो हरिं।
स्नात्वा सम्यक् समभ्यर्च्य दत्त्वा विप्राय दक्षिणां॥
हरिमुद्दिश्य चैवाग्नौ घृतहोमं समाचरेत्।
प्रणिपत्य जगन्नाथमिति वाणीमुदीरयेत्॥
पातालसंस्था वसुधा प्रसाद्य च मनोरथान्।
अवाप वासुदेवोमे स ददातु मनोरथान्॥
यमभ्यर्च्य दिति प्राप्ता सकलांश्च मनोरथान्।
भ्रष्टराज्यश्च देवेन्द्रो यमभ्यर्च्य जगत्पतिं॥
मनोरथानवाप्याशु स ददातु मनोरथान्।
एवमभ्यर्च्य पूजाञ्च निष्पाद्य हरये ततः॥
सम्भोज्य तिथिभृत्यांश्च हविष्यान्नेन वाग्यतः।
स्वयम्भुञ्जीत च नरोहरिं ध्यात्वा विमत्सरः॥
फाल्गुनश्चैत्रवैशाखौ ज्यैष्ठमासश्च पार्थिव।
चतुर्भिः पारणं मासैरेभिर्निष्पादितं भवेत्॥
रक्तपुष्पैश्च चतुरोमासान् कुर्व्वीत वार्चनं।

दहेच्च गुग्गुलं प्राश्य गोमूत्रमच्चालनं परं* ॥
हविष्यान्नञ्च नैवेद्यमात्मनश्चापि भोजनं ।
तदस्तु श्रूयतामन्या आषाढ़ादिषु वा क्रिया ॥
जाती† पुष्पाणि धूपश्च शस्तः सर्जरसेन तु ।
प्राश्य दर्भोदकं चात्र शाल्यन्नं च निवेदयेत् ॥
स्वयमेव तदश्नीयाच्छेषं पूर्व्ववदाचरेत् ।
कार्त्तिकादिषु मासेषु गोमूत्रं कायशोधनं ॥
सुगन्धं स्वेच्छया धूपं पूजां भृङ्गारकेण च ।

भृङ्गारको माकन्दः ।

कासारं वात्र नैवेद्यं भुञ्जीयात्तच्च वै स्वयं ।
प्रतिमासञ्च विप्राय दातव्या दक्षिणा तथा ॥
प्रीणनं देवदेवस्य पारणे पारणे गते ।
यथा शक्त्या च कुर्व्वीत वित्तशाठ्यविवर्जितः ॥
सद्भावेनैव गोविन्दः प्रीतिमाप्नोत्यनुत्तमां ।
अतोर्थं पारणस्यान्ते प्रीणनीयो जनार्द्दनः ॥
प्रीणीतश्चेप्सितान् कामान्ददात्यव्याहतान् भुवि ।
वर्षान्ते प्रतिमां विष्णोः कारयित्वा सुशोभनां ॥
सुवर्णं न यथा शक्त्या गदा शङ्खासि भूषितां‡ ।
शुक्लवस्त्रयुगच्छन्नां ब्राह्मणाय निवेदयेत् ॥
द्वादश ब्राह्मणांस्तत्र भोजयित्वा क्षमापयेत् ।

---

* जलमिति पुस्तकान्तरे पाठः ।

† जालीपुष्पाणिति पुस्तकान्तरे पाठ ।

‡ गदाशङ्खानि भूषितमिति पुस्तकान्तरे पाठः ।

द्वादश्यात्र प्रदातव्याः कुम्भाः साम्रजलाप्लुताः ॥
छत्रोपानद्युगैः सार्द्धं दक्षिणाभिश्च सत्तम ।
गावश्चैवात्र प्रदातव्या गुरवे च पयस्विनीः ॥
सर्व्वोपस्करसंयुक्ताः सवत्साः शीलसंयुताः ।
एषा पुण्या पापहरा द्वादशी फलमिच्छतां ॥
यथाभिलषितान् कामान् ददाति नृपसत्तम ।
पूरयित्वाखिलान् भक्त्या यतश्चैषा मनोरथान् ॥
मनोरथा द्वादशीयन्ततो लोकेषु विश्रुता ।
उपोष्यैतां त्रिभुवनं प्राप्तमिन्द्रेण वै पुरा ॥
आदित्या वेप्सितान् पुत्रान् धनमौशनसा तथा ।
धौम्येनाध्ययनं प्राप्तमन्यैश्चाभिमतं फलं ॥
अपुत्रो लभते पुत्रान् निर्द्धनो धनमाप्नुयात् ।
रोगाभिभूतश्चारोग्यं कन्या प्राप्नोति सत्पतिं ॥
समागमः प्रवसितैरुपोष्यैतदवाप्यते !
सर्व्वकामानवाप्नोति मृतः स्वर्गञ्च मोदते ॥
नापुत्रो नापि निधनो वियुक्तो न च निर्गुणः ।
उपोष्य तद्व्रतं मर्त्यः स्त्रीजितो वापि जायते ॥
स्वर्गलोकं सहस्राणि वर्षाणां मनुजाधिप ।
भोगानभिमतान् भुक्त्वा स्वर्गलोकेऽभिकांक्षितान् ॥
इह पुण्यवतां नृणां धनिनां साधुशीलिनां ।
गृहेषु जायते राजा सर्व्वव्याधिविवर्जितः ॥
न द्वादशीमुपवसन्ति मनोरथाख्यां
नैवार्च्चयन्ति पुरुषोत्तममादिदेवं ।

गोब्राह्मणांश्च न नमन्ति न पूजयन्ति
ये ते मनोभिलषितं कथमाप्नुवन्ति ॥

इति श्रीपद्मपुराणोक्तं मनोरथद्वादशीव्रतम् ।

भीष्म उवाच ।*

किमभीष्टवियोगशोकसंघा
नलमुद्धर्त्तुमुपोषणं व्रतं वा ।
विभवोद्भवकारि भूतलेऽस्मिन्
भवभीतेरपि सूदनञ्च पुंसां ॥

पुलस्त्य उवाच ।

परमिष्टमिदं जगत्प्रियन्ते
विबुधानामपि दुर्लभं महत्वात् ।
तव भक्तिमतस्तथा च वक्ष्ये
व्रतमिन्द्रादिसुरदानवेषु गुह्यं ॥

पुण्येवाश्वयुजे मासि विशोकद्वादशीव्रतं ।
यच्चीर्त्वा शोकदौर्गत्यभाजनं न नरो भवेत् ॥
दशम्यां लघुभुक् रात्रौ कृत्वा वै दन्तधावनं ।
उदङ्मुखो प्राङ्मुखो वा वाक्यमेतदुदीरयेत् ॥
एकादश्यां निराहारः समभ्यर्च्य च केशवं ।
श्रियं च जगतां भूतिं भोक्ष्यामीत्यपरेऽहनि ॥
एवं नियममास्थाय सुप्त्वा रात्रौ जितेन्द्रियः ।
प्रभाते विमले गत्वा मध्याह्ने तु जलाशयं ॥

---

* श्रीकृष्णउवाचेति पुस्तकान्तरे पाठः ।

स्नानं सर्व्वौषधैः कुर्य्यात् पञ्चगव्यजलेन च।
शुक्लमाल्याम्बरधरः समभ्येत्य गृहं ततः॥
पूजयेज्जगतां नाथं लक्ष्मीदयितमुत्पलैः।
केशवाय नमः* पादौ जङ्घे च वरदाय वै॥
श्रीशाय जानुनी तद्वदूरू च जलशायिने।
कन्दर्पाय नमो गुह्यं माधवाय नमः कटिं॥
दामोदरायेत्युदरं पार्श्वे च विपुलाय वै।
नाभिञ्च पद्मनाभाय हृदयं मन्मथाय च॥
श्रीधराय विभोर्वक्षः करौ तु मधुघातिने।
चक्रिणे वामबाहुञ्च दक्षिणं गदिने नमः†॥
नासां शोकविनाशाय वासुदेवाय चाक्षिणी॥
ललाटं वामनायेति हरये च पुन र्भ्रुवौ।
अलकान् साधनायेति किरीटं विश्वरूपिणे॥
नमः सर्व्वात्मने तुभ्यं सर्व्वाङ्गान्यभिपूजयेत्।
एवं संपूज्य गोविन्दं गन्धमाल्यानुलेपनैः॥
तदस्तु मण्डपस्याग्रे स्थण्डिलं कारयेन्मृदा।
चतुरस्रं समन्ताच्च त्रिरत्निमात्रमुच्छ्रयं॥
सूक्ष्मं श्लक्ष्णञ्च पुरतोवप्रद्वयसमावृतं।

वप्रप्रकारः।

त्र्यङ्गुलोच्छ्रितं वप्रं तद्विस्तारोद्व्यङ्गुलः।
स्थण्डिलस्योपरिष्टात्तु भित्तिरष्टांगुला भवेत्॥

---

* विशोकायेति पुस्तकान्तरे पाठः।

† कण्ठमाखमग्रमुखाय मै चत्र पुंस्तकान्तरे पाठोऽस्ति।

नदी वालुकया शूर्पे लक्ष्म्याः प्रतिकृतिं न्यसेत्।
स्थण्डिले शूर्पमारोप्य लक्ष्मीमित्यर्चयेद्बुधः॥
नमोदेव्यै नमः शान्त्यै नमस्तस्यै नमः श्रियै।
नमोस्तुष्ट्यै नमः पुष्ट्यै सृष्ट्यै हृष्ट्यै नमोनमः॥
विशोका दुःखनाशाय विशोका वरदास्तु ते।
विशोका मेऽस्तु सन्तत्यै विशोका सर्व्वसिद्धये॥
शुक्लाम्बरधरः सूर्य्यं वेश्म संपूजयेत् फलैः।
भक्ष्यैर्नानाविधैस्तद्वत्सौवर्णं कमलेन च॥
यथा विभवतो भीष्म वित्तशाठ्यविवर्ज्जितः।
दर्भोदकं प्रशंसन्ति रात्रावस्मिन् व्रते सदा॥
प्राशनं जागरश्चैव गीतनृत्यादिभिस्तथा।
यामत्रये व्यतीते तु सर्व्वोपस्करसंयुतः॥
अभिगम्य च विप्राणां मिथुनानि समर्चयेत्।
शक्तितः त्रीणि चैकं वा वस्त्रमाल्यानुलेपनैः॥
शयनस्थानि पूज्यानि नमोस्तु जलशायिने।
ततस्तु गीतवाद्यादि निशाशेषे विवर्जयेत्।
प्रभाते कृतकृत्यस्तु दम्पत्यानि च भोजयेत्।
यथा शक्त्या कुरुश्रेष्ठ ततो भुञ्जीत वाग्यतः॥
दिवास्वप्नं परान्नञ्च पुनर्भोजनमैथुनं।
क्षौद्रन्तैलामिषञ्चैव द्वादश्यां सप्त वर्जयेत्॥
अतोर्थं पारणादूर्द्ध्वं पुराणश्रवणादिभिः।
सिद्धिनादैस्तथाचान्यैस्तद्दिनञ्चातिवाहयेत्॥
अनेन विधिना सर्व्वं मासि मासि समाचरेत्।

व्रतान्ते शयनं दद्यात् गुडधेनुसमन्वितम् ॥
सोपधानकविश्रामं सवस्त्राभरणं शुभं।
मन्त्रेणानेन राजेन्द्र विप्रेन्द्राय निवेदयेत् ॥
यथा लक्ष्मीर्न देवेश त्वां परित्यज्य तिष्ठति।
तथा रोग्यञ्च रूपञ्च विशोकं वा स्तु मे सदा ॥
यथा देवेन रहिता न लक्ष्मीर्जातु जायते।
तथा विशोकता मेऽस्तु भक्तिरग्रा च केशवे ॥
विधिनानेन तत्सर्व्वं शूर्पं सकमलं तथा।
दातव्यं वेदविदुषे आत्मनो भूतिमिच्छता ॥
उत्पलं करवीरञ्च अम्लानकुसुमं तथा*।
भृङ्गारं सिन्धुवारञ्च मल्लिकागन्धपाटलं ॥
कदम्बकुमुदंजाती शस्तान्येतानि पूजने।
विशोकद्वादशी चैषा सर्व्वपापप्रणाशिनी ॥
यामुपोष्य नरो भक्त्या शुभसौभाग्यभाग्भवेत्।
भुक्त्वा कामानशेषांस्तु अन्ते स्मरणमाप्नुयात् ॥
स्मृत्वाच्युतंह्यन्तकाले याति तत्सममन्ततः।
इति पठति य इत्थं यः शृणोतीह सम्यक्
मधुमुरनरकारेरर्च्चनं चापि पश्येत्।
मतिमपि कुरुते यो देवतास्विन्द्रलोके
वसति च ससुराद्यैः पूज्यमानः सदैव ॥

इति पद्मपुराणोक्तं द्वादशीव्रतम्।

---

* अम्लान कुसुममिति पुस्तकान्तरे पाठः।

दाल्भ्य उवाच ।

अतीव भीषणा नित्यं यस्माग्निभयदायक ।
कथं न गच्छेम रकानेतस्मे वक्तुमर्हसि ॥
अशीतिकष्टं पापानां विपाको नरकस्थितिः ।
पुरुषैर्भुज्यते ब्रह्मन् तन्मोघं वद सत्तम ॥

पुलस्त्य उवाच ।

पुण्यस्य कर्मणः पाकः पुण्य एव द्विजोत्तम ।
चेतसः परिणामार्थं स्वर्गस्थैर्भुज्यते नरैः ॥
तथैव पाकः पापानां पुरुषैर्नरकस्थितैः ।
भुज्यते तावदखिलो यावत् पापं क्षयं व्रजेत् ॥
यथेयं द्वादशी शस्ता नृणां सुकृतकर्मणां ।
यामुपोष्य द्विजश्रेष्ठ न याति नरकं नरः ॥
फाल्गुनामलपक्षस्य एकादश्यामुपोषितः ।
द्वादश्यां च द्विजश्रेष्ठ पूजयेन्मधुसूदनं ॥
एकादश्यां स मुक्तिष्टन् विष्णोर्नामानुकीर्त्तनं ।
पूजायां वासुदेवस्य कुर्व्वीत सुसमाहितः ॥
नमो नारायणायेति वाक्यं वाक्यमहर्निशं ।
क्रोधं पापं तथेर्ष्याञ्च दम्भलोभञ्च वर्जयेत् ॥
कामद्रोहं मदं वापि मानमैश्वर्य्यमेव च
सर्व्वमेतत् परित्याज्य विष्णुभक्तेन चेतसा ॥
असारताञ्च लोकेऽस्मिन् संसारे भावयन्निति ।
तथैव कुर्य्याद्द्वादश्यां नाम्नामुच्चारणं द्विज ॥

भविष्योत्तरात् ।

सौवर्णताम्रपात्राणि मृण्मयान्यपि पाण्डव ।
यवपात्रस्थानि कृत्वा प्रतिमासमुपोषितः ॥
नामत्रयमशेषेण मासि मासि दिनद्वयं ।
तथैवोच्चारयेद्व्याद्द्वादश्याञ्च यथोदितं ॥
प्रणम्य च हृषीकेशं कृत्वा पूजां प्रसादयेत् ।
विष्णो नमस्ते जगतः प्रसूते श्रीवासुदेवाय नमो नमस्ते ॥
नारायणोस्तु धम्मा मे जहि पापमशेषतः ।
सर्व्वपापक्षयो मेऽस्तु महासुकृतकर्म्मभिः ॥
अनेकजन्मजनितं बाल्ययौवनवार्द्धके ।
पुण्यं विवृद्धिमायातु पापं च संक्षयं व्रजेत् ॥
तत्शान्तिवृद्धिमायातु पापानां पञ्चकक्षयं ।
आकाशादिषु शब्दादौ श्रोत्रादिमहदादिषु ॥
प्रकृति पुरुषौ चैव ब्रह्मसंप्राप्तिमाप्नुते ।
यथैक एव सर्व्वात्मा वासुदेवो व्यवस्थितः ॥
तेन सत्येन मे पापं नरकार्त्तिप्रदक्षयं ।
प्रयातु सुकृतस्यास्तु ममतुदिनसञ्चयं ॥
पापस्य हानिं पुण्यं तु वृद्धिमभ्येत्वनुत्तमां ।
एवमुच्चार्य्य विप्राय दत्त्वा वा कथितं तव ॥
भुञ्जीत कृतकृत्यस्तु पारणे पारणे गते ।
पारणान्ते च देवस्य प्रीणतां शक्तितोद्विज ॥
कुर्व्वीताखिलपाषण्डैरालापञ्च विवर्जयेत् ।
एवं संवत्सरस्यान्ते काञ्चनीं प्रतिमां हरेः ॥
पूजयित्वा वस्त्रपुष्पघृतपात्रेण संयुतां ।

गां सवत्सां च विप्राय दद्यात् कृष्णां समाहितः॥
विलंबितश्च यत्पूर्व्वं दैवात्पात्रं भवेद्यदि।
तस्मिन्नहनि दातव्यं भोजनञ्चानिवारितं॥
इत्येषा कथिता दाल्भ्य सुकृतस्य जयावहा।
द्वादशी नरकं मर्त्यो यामुपोष्य न पश्यति॥
नाग्नयो न च शस्त्राणि नच लोहमुखाः खगाः।
नरकास्तं न वाधन्ते मतिर्यस्य जनार्द्दने॥
नामोच्चारणमात्रेण विष्णोः क्षीणाघसञ्चयः।
भवत्यपास्तपापस्य नरके गमनं कुतः॥
नमो नारायणायेह वासुदेवेति कीर्त्तयेत्।
न याति नरकं मर्त्यः संक्षीणाशेषपातकः॥
तस्मात्पाषण्डिसंसर्गमकुर्व्वन् द्वादशीमिमां।
उपोष्य पुण्योपचयीं न याति नरकं नरः॥

इति विष्णुधर्म्मोक्तं सुकृतद्वादशीव्रतम्

——ooo——

पुलस्त्य उवाच।

एकादश्यां शुक्लपक्षे फाल्गुने मासि यो नरः।
जपन् कृष्णेति देवस्य नाम भक्त्या पुनः पुनः॥
देवार्च्चनं वाष्टशतं कृत्वैतत्तु जपेच्छुचिः॥
स्नान, प्रस्थानकाले च उत्थाने स्खलिते क्षवे।
पाषण्डान् पतितां,श्चैव तथैवान्त्यावसायिनः॥
नालपेत्तु, तथा देवमर्च्चयेच्छ्रद्धयान्वितः।
इदञ्चोदाहरेत् मन्त्रं मनश्चाधाय तत्परः॥

कृष्ण कृष्ण कृपालुस्त्वमगतीनां गतिर्भव।
संसारार्णवमग्नानां प्रसीद मधुसूदन॥
एवं प्रसाद्योपवासं कृत्वा नियतमानसः।
पूर्व्वाह्ण एवचान्येद्युर्गवां संप्राश्य वै सकृत्॥
स्नातोऽर्च्चयित्वा कृष्णेति पुनर्नाम प्रकीर्त्तयेत्।
वारिधारात्रयञ्चैव विक्षिपेद्देवपादयोः॥
चैत्रवैशाखयोस्त्वेवं तद्वज्ज्यैष्ठे च पूजयेत्।
मर्त्यलोके गतिं श्रेष्ठां दाल्भ्य प्राप्नोति वै नरः॥
उत्क्रान्तिकाले कृष्णस्य स्मरणञ्च तथाप्नुयात्।
आषाढ़े श्रावणे चैव मासि भाद्रपदे तथा॥
तथैवाश्वयुजे देवमनेन विधिना नरः।
उपोष्य संपूज्य तथा केशवेति च कीर्त्तयेत्॥
गोमूत्रप्राशनात् पूतः स्वर्गलोके महीयते।
आराधितस्य जगतामीश्वरस्य महात्मनः।
उत्क्रान्तिकाले स्मरणं केशवस्य तथाप्नुयात्॥
क्षीरस्य प्राशनं श्रेष्ठं विधिनेदं यथोदितं।
कार्त्तिकादि यथान्यायं कुर्य्यान्मासचतुष्टयं॥
तेनैव विधिना ब्रह्मन् तत्र विष्णुं प्रकीर्त्तयेत्।
स याति विष्णुसालोक्यं विष्णुं स्मरति तत्क्षये॥
प्रतिमासं द्विजातिभ्यो दद्याद्दानं यथेच्छया।
चातुर्मास्ये च सम्पूर्णे पुण्यश्रवणकीर्त्तनं॥
कथाश्च वासुदेवस्य तद्गीतं वापि कारयेत्।
एवमेव गतिं श्रेष्ठां देवानामनुकीर्त्तनात्॥

कथितं पारणं यत्ते कुर्य्यान्मासचतुष्टयं ।
आधिपत्यं तेन भोगान् दिव्यमाप्नोति मानवः ।
द्वितीयेन तथा भोगानैन्द्रान् प्राप्नोति मानवः ॥
विष्णुलोके तृतीयेन पारणं तु तथाप्नुयात् ।
एवमेतत्समाख्यातं गतिप्रापकमुत्तमम् ॥
विधानं द्विजशार्दूल कृष्णतुष्टिप्रदं नृणां ।
सुगतिद्वादशीमेतां श्रद्दधानश्च योनरः ॥
उपोष्यति तथा नारी प्राप्नोति त्रिविधां गतिं ।
एषा धन्या पापहरा तिथिर्नित्यमुपासिता ।
आराधनाय प्रस्तैषा देवदेवस्य चक्रिणः ॥

इति विष्णुधर्म्मोक्तं सुगतिद्वादशीव्रतम् ।

———ooo@ooo———

युधिष्ठिर उवाच ।

ऋणैस्त्रिभिः परिवृतः पुरुषो जायते किल ।
ऋणत्रयात्तु मुच्येत पुरुषः पुत्रदर्शनात् ॥
पुन्नामनरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥
दिगम्बरं गतव्रीडं जटिलं धूलिधूसरं ।
पुण्यहीना न पश्यन्ति गङ्गाधरमिवात्मजं ॥
तस्मात् पुत्रस्य लाभाय व्रतमेतदुदीरयेत् ।

कृष्ण उवाच ।

एकादश्यां चाश्वयुजे स्नात्वोपोष्यार्चयेद्धरिं ।
गां रात्रौ पूजयेद्दद्यात् सवत्साया गवाह्निकं ॥

अपरेऽह्नि तथाभ्यर्च्च्य निशि भुञ्जीत वाग्यतः।
मासे मासेऽथ चैतानि हरिनामानि कीर्त्तयेत्॥
अपराजितोऽजातशत्रुः पुरुहूतः पुरन्दरः।
वर्द्धमानः सुरेशश्च महाबाहुः प्रभुर्विभुः॥
सुभूतिः सुमनाश्चैव सुप्रचेता इतीरयेत्।
एवं द्वादशभिर्म्मिश्रैर्म्मासैर्वा पारयेद्व्रतं*॥
व्रतान्ते जुहुयाद्देवं नामभिर्घृतपायसं।
ब्राह्मणान् भोजयेत्पश्चाद्द्वादशान् माससङ्ख्यया॥
मासि मासि यथा शक्त्या दानं प्रार्थनमेव च।
यथा दिते र्भवान् पुत्रः शाश्वतश्चाच्युतोऽच्युतः॥
तथा भवतु मे देवः पुत्रो जन्मनि जन्मनि।
वैष्णवी सुरभी माता ब्रह्मणा देवपूजिता॥
गृहाणेदं मया दत्तं पिण्डमातृणमूलकं‡।
वस्त्राभरणगोदानैर्ब्राह्मणं प्रीणयेद्गुरुं॥

इति भविष्यत्पुराणोक्तं गोवत्सद्वादशी व्रतं।

——000——

युधिष्ठिर उवाच।

हत्वा भयङ्करं पापं पृथिवीक्षयकारकं।
परिपृच्छामि गोविन्द त्वां नमस्कृत्य पादयोः॥
गुह्याद्गुह्यतरं ब्रूहि व्रतं किञ्चिदनुत्तमं।
तरामि येन पापौघं भीष्मद्रोणवधार्णवं॥

---

* एवं द्वादशभिर्व्वर्षैरिति पुस्तकान्तरे पाठः।

‡ मृतृण पत्रकमिति पुस्तकान्तरे पाठः।

कृष्ण उवाच।

आसीत् पुरा नरीनामा विदर्भायां कुशध्वजः।
शान्तः पुरुसुतो येन चक्रे राष्ट्रमतन्द्रितः॥
जघान तापसं सोऽप्यप्रमादं मृगयाकृतः।
मृगं मत्वा महारण्ये ब्राह्मणं दैवमोहितः॥
तेन कर्म्मविपाकेन देहान्ते गवयस्ततः।
तत्रासौ पतनाद्घोराश्व तु भूपातिपीडितं॥
तस्मादिहागतोमर्त्ये रौद्रो विषधरो भवेत्।
अदर्शत्सोऽपि राजेन्द्र ब्राह्मणस्त्वरणे तु षा॥
सत्वतां हतपश्चत्वं जगाम द्विपसूनुतां।
विपन्नश्च ततः सिंहो द्वितीयेऽभूत्सुदारुणः॥
विदारितमुखोहिंस्रोनाम सत्वभयङ्करः।
जन्मान्ते सोऽभवत् श्रेष्ठराजन्यो मृगयागतः*।
ततोभि बहुभिः शस्त्रै राजालोकैर्निपातितः॥
पुनर्व्याघ्रो बभूवासौ तृतीयेऽपि भवान्तरे॥
तीक्ष्णपादनखाघातव्यापादितमृगान्वयः।
तेनापि वैश्योनिधनंगतः कश्चिन्मतान्तरे॥
सनीरक्तमिराशित्वं लोकैःख्यातनिपातनात्।
स जातस्तापकृद्रच्चो† नखराहतजन्तुभुक्॥
जघान बालं चण्डालादसौ मृत्युमवाप्नुयात्।

---

* जन्मान्ते सोभ पुनः श्रेष्ठराजन्यं मृगयागतमिति पुस्तकान्तरे पाठः।

† तामगटद्रच इति पुस्तकान्तरे पाठः।

पञ्चमे मकरो* जातः समुद्रे ति भयङ्करः ॥
स्त्रियं जघान तरुणीं स्नातुकामां यथागतां ।
प्रभाते शङ्करस्याग्रे शशाङ्कग्रहणे निशि ॥
तत्रापि बडिसं दत्त्वा जनैः प्राणैर्वियोजयेत् ।
पुनः षष्ठे भवेज्जातो पिशाचः पिशिताशनः ॥
क्रूरः छिद्रपरःक्षुद्रो नरप्राणवियोजकः ।
सोऽवतीर्णोनरस्याङ्गङ्गनामा स च कस्यचित् ॥
मन्त्रेण पूयसिक्तेन वातिकेन व्यसुः कृतः ।
सप्तमे स पुनर्जातो दुर्निरीक्षवपुर्भृशम् ॥
क्रूरदंष्ट्रः करालास्योमांसशोणितभोजनः ।
दिग्वासा मनुभसीषु वासिष्ठो ब्रह्मराक्षसः ॥
राष्ट्रञ्च गौर्जरं शून्यं सर्व्वं चक्रे विषादिषु ।
आक्रम्य भीमदासेन राजा राक्षसशत्रुणा ॥
समारोप्य धनुः संख्ये ब्रह्मास्त्रेण निपातितः ।
भूयोभवद्व्याघ्रसमः स्याज्जन्मन्यष्टमे भुवि ॥
वनेनराणांकुद्दोगोब्राह्मणार्त्तौ निगन्धनं ।
स तु हस्तीजभल्लेन मातङ्गेन धनुष्मता ॥
एकादेशेऽपि पाञ्चालो पञ्चमध्येतिभीषणः ।
अर्ध्वकर्णोऽतिरक्ताक्षोजातो ह्रस्वतनुर्दृढः ॥
पापो धर्म्मध्वजोरक्षोदेवतोजिनमाल्यधृक् ।
स दण्डपाशिकेनैव वृक्षाग्रे ह्यवलम्बितः ॥
द्वादशे स पुनर्जातः पुल्कशः क्लेशभाजनः ।

---

* बबकर इति पुस्तकान्तरे पाठः ।

भक्ष्यलोभाद्बिलगतोव्याधेन विनिपातितः ॥
तेन वासीत्कृतं पूर्व्वं तारकद्वादशी व्रतं ।
तस्य प्रभावाज्जातोऽपि दुष्टयोनौ पुनःपुनः ॥
अवाप शीघ्रं पञ्चत्वं संसारभवसागरे ।
पुनरेवाभवद्राजा विदर्भायां सुधार्म्मिकः ॥
भूयः सोपोषिता तेन तारका द्वादशी शुभा ।
पश्यतां व्रतमाहात्म्यं जातौ जातौ पुनः पुनः ॥
व्रतप्रभावाद्भुवने भुक्त्वा राज्यमकण्टकं ।
प्राप विष्णुपुरे स्थानं यावदाहूतसंप्लवं ॥

युधिष्ठिर उवाच ।

कथं तत् कृष्ण कर्त्तव्यं तारकद्वादशीव्रतम् ।
पापोऽपि सद्गतिं प्राप्तो यत्प्रभावात् कुशध्वजः ॥

कृष्ण उवाच ।

मार्गशीर्षे सिते पक्षे गृहीत्वा द्वादशीव्रतम् ।
अकृत्त्रिमे जले स्नानमपराह्णे समाचरेत् ॥
प्रणम्य भास्करं भक्त्या कृत्वा देवार्च्चनं तथा ।
मौनेनैवावस्थातव्यं यावदस्तं व्रजेद्रविः ॥
ततो मुक्ताफलैः पुष्पैर्गन्धधूपविलेपनैः ।
सजलं साक्षतं युक्तं हिरण्यासफलैः शुभैः ॥
रम्ये ताम्रमये पात्रे जानुभ्यां धरणीं गतः ।
पूर्व्वामुखः प्रदोषाग्रे मूर्ध्नि कृत्वार्घभाजनं ॥
भूमौ मण्डलिकं कृत्वा गोमयेन सताड्वितं ।
चन्दनेन समालिप्य ध्रुवस्य मृगगोमुखं ॥

सहस्रशीर्षामन्त्रेण भूमौ ध्यात्वा जगद्गुरुम्।
तारकानां कुलस्येह दद्यादर्घ्यं जितेन्द्रियः॥
पर्य्युच्य धूपमुत्क्षिप्य दद्याद्विप्राय दक्षिणां।
क्रमेण सर्व्वं निर्व्वर्त्य भोज्यं भोज्यं निशागमे॥
मार्गशीर्षे खण्डखाद्यैः पुष्पैः शोवालकैः शुभैः।
माघे तिलान्नकृशरैः फाल्गुने गुडपूरकैः॥
वसन्ते मोदकैर्दिव्यैर्व्वैशाखे खण्डवेष्टकैः।
ज्यैष्ठे शक्तुभृतैः पात्रैराषाढे गुडपूरकैः॥
श्रावणे शष्कुलीभिश्च नभस्ये पायसेन च।
घृतपूरैरश्वयुजे कासारैः कार्त्तिके क्रमात्॥
एभिर्द्वादशभिर्भक्ष्यैर्भोजयित्वा द्विजान् स्वयम्।
भुञ्जीत वाग्यतः पार्थ पश्चाद्विप्रान् क्षमापयेत्॥
समाप्ते तु व्रते कृत्वा राजतं तारकागणम्।
पैष्टं वा पूर्व्वविधिना पूजयित्वा क्षमापयेत्॥
कुम्भा द्वादश दातव्याः सोदका मोदकान्विताः।
ब्राह्मणानां परीधानं पद्मरागं सकञ्चुकं॥
श्वेताञ्च गां ब्राह्मणाय चन्दनञ्चोपवीतकं।
कुङ्कुमाञ्जनताम्बूलं स्त्रीणां दत्त्वा क्षमापयेत्॥
अनेन विधिना राजन् यः करोति व्रतं नरः।
नारीवा भर्त्तृपरमा विधवा शीलभूषणा॥
नक्षत्रलोकं व्रजति विमानेनार्कवर्च्चसा।
अप्सरोगणगन्धर्व्वैश्च विद्याधरैः शुभैः॥
तोव्र ताराव्रतः स्वर्गे युगान्तमपि पूज्यते।

एतद्व्रतं पुरा चीर्णं शैव्या राज्ञ्या श्रिया मया॥
यासीतया दमयन्त्या रुक्मिण्या सत्यभामया।
अन्याभिरपि नारीभिः पुरुषैश्च पृथग्विधैः॥
चीर्णमेतद्व्रतं पार्थ सर्व्वंपापभयापहम्।
जन्मान्तरेष्वपि कृतानि दहत्यघानि*
यासन्दधात्यहरहः सुकृतोपयोगं।
ताराभिधानमतिपातकतूलकीला
तन्नास्ति यत्र विदधाति कृता मनुष्यैः॥

इति भविष्यत्तरोक्ततारकाद्वादशीव्रतम्।

———000———

युधिष्ठिर उवाच।

श्रुता मे मानवा धर्म्मा वासिष्ठाश्च मया श्रुताः।
द्वैपायन यथोद्दिष्टा वैष्णवान् वक्तुमर्हसि॥

व्यास उवाच।

श्रुतास्ते मानवा धर्म्मा वैदिकाश्च श्रुता मया।
कलौ युगे न शक्यन्ते ते वै कर्त्तुं नराधिप॥
सुखोपायमल्पधनमल्पक्लेशं महाफलं।
पुराणानाञ्च सर्व्वेषां सारभूतं वदामि ते॥
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि।
एकादश्यां न भुङ्क्ते यो न याति नरकन्तु सः॥
व्यासस्य वचनं श्रुत्वा कम्पितोऽश्वत्थपर्णवत्।

---

* दहत्यधर्म्ममिति पुस्तकान्तरे पाठः।

भीमसेनो महाबाहुर्भीतो वाक्यमभाषत ॥

भीम उवाच।

पितामह न शक्तोऽहमुपवासं करोमि किं।
अतो बहुफलं ब्रूहि व्रतमेकमपि प्रभो ॥

व्यास उवाच।

वृषस्थे मिथुनस्थेऽर्के शुक्लाह्येकादशी भवेत्।
ज्यैष्ठे मासि प्रयत्नेन सोपोष्या जलवर्जितैः ॥
स्नाने वाचमने चैव वर्जयित्वोदकं बुधः।
उपभुञ्जीत नैवान्यद्व्रतभङ्गोऽन्यथा भवेत् ॥
उदयादुदयं यावद्वर्जयित्वा जलं बुधः।
अप्रयत्नादवाप्नोति द्वादश्यां द्वादशीनरः* ॥
ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत्।
जलं सुवर्णं दत्त्वा तु द्विजातिभ्यो यथाविधि ॥
भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी।
एवं कृते तु यत्पुण्यं भीमसेन शृणुष्व तत् ॥
संवत्सरस्यया मध्ये एकादश्यो भवन्त्यत।
तासां फलमवाप्नोति अत्र मे नास्ति संशयः ॥
इति मां केशवः प्राह शङ्खगदाधरः।
अस्य व्रतस्य यत् पुण्यं तन्मे ब्रूहि जनार्द्दन ॥
एकादश्यां सिते पक्षे ज्यैष्ठस्योदकवर्जितं।
उपोष्य फलं प्राप्नोति यत्तु शृणु वृकोदर ॥
सर्व्वतीर्थेषु यत् पुण्यं सर्व्वदानेषु यत् फलं।

---

* उपवासन्तु भुञ्जीत द्विजातिभ्यो यथाविधि इति पुस्तकान्तरे पाठः।

सर्व्वहोमेषु यत् पुण्यं तदस्याः समुपोषणात् ॥
संवत्सरस्य यावत्यः शुक्लाः कृष्णा वृकोदर ।
उपोषितास्तु ताः सर्व्वा एकादश्यां न संशयः ॥
धनधान्यवहाः पुण्याः पुत्रारोग्यप्रदास्तथा ।
उपोषिता नरव्याघ्र इति सत्यं ब्रवीमि ते ॥
यमदूता महाकाया करालकृष्णकपिशाः ।
दण्डपाशधरा रौद्रा मरणे दृष्टिगोचराः ॥
न प्रयान्ति नरव्याघ्र एकादश्यामुपोषणात् ।
पीताम्बरधराः सौम्याश्चक्रहस्ता मनोजवाः ॥
अन्तकाले नयन्त्येवं वैष्णवा वैष्णवीं पुरीं ।
तस्मात्सर्व्वप्रयत्नेन उपोष्य जलवर्जितं ।
जलधेनुं तथा दत्त्वा सर्व्वपापैः प्रमुच्यते ॥

इति श्रीमहाभारतोक्तनिर्जलैकादशीव्रतम् ।

——ooo——

युधिष्ठिर उवाच ।

भगवन् ब्रूहि ते सम्यक् गणय द्वादशीव्रतम् ।
सप्राशनं सोपवासं सरहस्यं समन्त्रकं ॥

श्रीकृष्ण उवाच ।

कौन्तेय यत्पुरा चीर्णं सीतया वनसंस्थया ।
व्रतं राघववाक्येन अगस्त्यऋषिभाषितं ॥
लोपामुद्रालये सर्व्वा मुनिपत्न्यो बहुप्रजाः ।
भोजितास्तर्पिताः सर्व्वैः राहारैः सर्व्वकामिकैः ।

तामिहैकमनाः पार्थ अखण्डद्वादशीं शृणु ।
मार्गशीर्षे सिते पक्षे एकादश्यां दिनोदयं ॥
स्नात्वा नरः सोपवासः कृत्वा पूजां जनार्दने ।
गन्धपुष्पार्घ्यधूपैश्च दीपैर्जागरणादिभिः ॥
निशां नीत्वा प्रभाते च वनोद्देशेऽतिशोभने ।
सजले कृष्णसान्निध्ये वेदवेदाङ्गपारगं ॥
भोजयित्वा फलप्रायं स्वयं भुञ्जीत वाग्यतः ।
पञ्चगव्यपूर्णमेव प्राशनं वाथ तद्दिने ॥
वर्षमेकं सुसंपूर्णं पारयित्वा युधिष्ठिर ।
श्रावणे कार्त्तिके माघे चैत्रे वाथ समुद्यमेत् ॥
व्रती पक्वान्नसंपूर्णान् भाण्डकान् घृतपूरकान् ।
अन्नं स्वादु च सुस्विन्नं खण्डखाद्यादिसंयुतं ॥
भक्ष्यैर्नानाविधैः पार्थ संयुतं षड्रसेण तु ।
व्यञ्जनैः पत्रशाकैश्च शुष्कार्द्रैरतिशोभनैः ॥
पानकैः पत्रसारैश्च सुगन्धैः स्वादुशीतलैः ।
फलैः कालोद्भवैः सर्व्वैर्यथाविभवमात्मनः ॥
गत्वा वनं सुतृजनं स्वादुतोयं धनञ्जय ॥
तत्र विप्रान् सुखासीनान् प्रागुदीच्यमुखाञ्छुचीन् ।
भोजयेद्दश च द्वौ च कृतपूजादिकक्रियः ॥
अलाभे यतिमुख्यानां गृहस्थानपि भोजयेत् ।
सपत्नीकान् सदाचारानपियुक्तान् गुणप्रियान् ॥
उद्दिश्य देवं गोविन्दं पृथक् द्वादशनामभिः ।
वासुदेवं हृषीकेशं विष्णुं दामोदरं हरिं ॥

त्रिविक्रमञ्च गोविन्दं पद्मनाभञ्जनार्द्दनं।
गोवर्द्धनधरं कृष्णं श्रीधरं क्रमशो नृप॥
प्रणवादिनमस्कारैर्नामभिः पूजयेद्द्विजान्।
गन्धपुष्पादिना पार्थ भक्त्या तद्भाविताक्मना॥
भोजयित्वा शुभान्नानि स्वाचारांस्तान् सदक्षिणान्।
प्रणम्याथो विसृज्यैतान् विष्णुर्मे प्रीयतामिति॥
ततो भुञ्जीत सहितोभृत्यैर्वन्धुजनेन च।
आश्रितैरर्थिभिः पार्थ सामान्यैरथवाग्यतः॥
एवं यः कुरुते सम्यगरण्यद्वादशीं नरः।
स देहान्ते विमानस्थो दिव्यकन्यासमावृतः॥
उद्धृत्य स्वपितॄंश्चापि श्वेतद्वीपं हरः प्रियं।
यत्र लोकाः पीतवस्त्राः श्यामदेहाश्चतुर्भुजाः।
शङ्खचक्रगदापद्मव्यग्रहस्ताः सकौस्तुभाः॥
तार्क्ष्यासनाः समुकुटा दिव्यकुण्डलमण्डिताः।
नीलोत्पलमहापद्ममालया ललितोरसः॥
लक्ष्मीधरा मेघवर्णाः केयूराङ्गदभूषणाः।
तिष्ठन्ति विष्णुसामान्या यावदाहृतसंप्लवं॥
तत्र भोगांश्चिरं भुक्त्वा पश्यन् विष्णुं सनातनं।
पुण्यशेषात् समायातः पृथिव्यां पृथिवीपते॥
सार्व्वभौमः श्रिया युक्तोराजा स्याद्राजपूजितः।
तत्रापि पुनरेवेमामरण्यद्वादशीं शुभां॥
करोति द्वादशैवासौ जन्मानि हरितत्परः।
तदन्ते बन्धनिर्म्मुक्तो याति ब्रह्म सनातनं॥

एकादशीमुपवसन्ति सितासितस्य
नार्यो वने द्विजवरा व्रतमाचरन्ति* ।
साध्यस्त्रियः शुचरिताभरणाश्च तेषां
विष्णुः प्रसादमुपयान्ति ददाति मोक्षं ॥

इति भविष्योत्तरोक्तमपराद्वादशी व्रतम्† ।

———000———

याज्ञवल्क्य उवाच ।

कृष्णपक्षे तु पौषस्य संप्राप्तद्वादशीं शृणु ।
यामुपोष्य समाप्नोति सर्व्वानेव मनोरथान् ॥
पाषण्डादिभिरालापमकुर्व्वन् विष्णुतत्परः ।
पूजयेत् प्रयतोदेवमेकाग्रमतिरच्युतं ॥
पौषादिपारणं मासैषड्भिर्ज्येष्ठान्तिकं स्मृतं ।
प्रथमे पुण्डरीकाक्षनाम देवस्य गीयते ॥
द्वितीये माधवाख्यन्तु विश्वरूपन्तु फाल्गुने ।
पुरुषोत्तमाख्यञ्च ततः पञ्चमेऽच्युतसंज्ञितं ॥
षष्ठे जयेति देवस्य गुह्यं नाम प्रकीर्त्तयेत् ।
पूर्व्वेषु षट्सु मासेषु स्नानप्राशनयोस्तिलाः ॥
आषाढ़ादिषु मासेषु पञ्चगव्यमुदाहृतं ।
स्नानञ्च प्राशनञ्चैव पञ्चगव्यं सदेष्यते ॥
पूजयेत् पुण्डरीकाक्षं पुनस्तेनैव नामभिः ।

* द्विजवराश्चयजपन्तीति पुस्तकान्तरे पाठः ।

† इति विष्णुधर्म्मोक्तमरण्यद्वादशीव्रतमिति पुस्तकान्तरे पाठः ।

प्रतिमासञ्च देवस्य कृत्वा पूजां यथाविधि ॥
विप्राय दक्षिणां दद्याच्छ्रद्दधानः समन्वितः।
पारणान्ते तु देवस्य प्रीणनं भक्तिपूर्व्वकम् ॥
कुर्व्वीत शक्त्या गोविन्दे सदा साभ्यर्चनं यतः।
नक्तं भुञ्जीत च नरस्तैलक्षारविवर्जितं ॥
एकादश्यामुषित्वैवं द्वादश्यामथवा दिने।
एवमेकादश्यामुपोष्य द्वादशीनक्तं दिनं वा भुञ्जीतेन्वयः॥
एवं संवत्सरस्यान्ते ददाति प्रीतिमांस्ततः।
धेनुं वस्त्रं हिरण्यञ्च धान्यं भोजनमासनं॥
शय्याञ्च ब्राह्मणे दद्यात् केशवः प्रीयतामिति
एतामुपोष्य विधिवत् विष्णुप्रीणनतत्परः॥
सर्व्वान् कामानवाप्नोति सर्व्वपापैः प्रमुच्यते
यतः सर्व्वमवाप्नोति यद्यदिच्छति चेतसा॥
ततो लोकेषु विख्यातं संप्राप्तिद्वादशीति वै।
कृताभिलाषिता हृष्टा प्रारब्धा कर्म्मतत्परैः।
पूरयत्यखिलान् कामान् संस्मृता च दिने दिने

इति विष्णुधर्म्मोक्तं संप्राप्तिद्वादशीव्रतं।

———000———

पौषे कृष्णे विशाखासु युक्ताचैकादशी भवेत्।
तस्यां संपूजयेद्विष्णुमुपोष्य विधिवन्नरः॥
सुगन्धपुष्पनैवेद्यैर्वस्त्रभूषणसम्भवैः।
मासानुमासम्पूजयेत् विधिना जगतीपतिं॥

प्राशनञ्चायशुद्धयर्थं कार्य्यं मासक्रमेण तु।
गोमूत्रमुदकं सर्पिराचस्य कामतः परं॥
ततोदर्व्वादधिव्रीहितिलांश्चैव यवांस्तथा।
जलमर्क्ककरैस्तप्तं दर्भांश्च चीरमेव च॥
द्वादश्यां भोजयेद्विप्रान् दधिचीरगुड़ौदनैः।
मासक्रमेण विप्रेभ्यो दद्यात्तस्यकक्रते व्रती॥
घृतं तिलान् व्रीहियवसुवर्णसंयुतं घटम्।
मोदकैश्च युतं कुम्भमातपत्रन्तु पायसं॥
फाणितं चन्दनं मालाः सुगन्धाश्चेति दक्षिणाः।
व्रतमेतन्महापुण्यं दृष्टादृष्टफलप्रदं॥
कर्त्तव्यं धर्म्मनिरतैर्विष्णुपूजनतत्परैः*।
व्रतमेतन्नरः कृत्वा विप्राणां प्रवरे कुले॥
सुजन्मा जायते धीमान् वेदवेदाङ्गपारगः।
निरातङ्कोऽनन्तसुखः सुखतश्च तथारिहा†॥
बहुपुत्रोभवेद्धीमान् धनैश्च धनदोपमैः।
यथानरस्तथा नारी व्रतमेतत् समाचरेत्।
इह प्राप्य परां लक्ष्मीं मृतो विष्णुपुरं व्रजेत्॥

इति विष्णुरहस्योक्तं महाफलद्वादशीव्रतम्।

द्वादश्यां भोजयेद्विप्रान् तेभ्यो दद्याच्च दक्षिणां।
प्रतिमासं तिथौ तस्याङ्गेभ्योदद्यान्नवाह्निकं॥

---

* विश्वपूजनमिति पुस्तकान्तरे पाठः।

† सुतान्तश्च यथारिहा इति पुस्तकान्तरे पाठः।

गवां क्षीरेण संयुक्तं दध्ना वाथ घृतेन वा।
मृत्पात्रे च समश्नीयादक्षारलवणं व्रती॥
संवत्सरमुपोष्यैव गोविन्दद्वादशीं नरः।
पुनर्गोभ्यो यथा शक्त्या भूयोदद्यात्नवाह्निकं॥
गोविन्दद्वादशी यातु उपोष्य विधिवन्नरः।
प्राप्नोति विधिवद्दत्त्वा गोसहस्रस्य यत्फलं॥
समुपोष्य महापुण्यां गोविन्दद्वादशीमिमां।
गवां लोकमवाप्नोति दधिक्षीरघृतप्लुतं।
तत्र भोगान्वरान् भुक्त्वा चिरकालं मनोरथान्॥
गोविन्दस्य सदानन्दं ततोलोकमवाप्नुयात॥
तत्र तिष्ठेन्निरातङ्को मुदा परमया युतः।
गोविन्दस्य प्रसादेन यावदिन्द्राश्चतुर्द्दश॥

इति विष्णुरहस्योक्तं गोविन्दद्वादशीव्रतम्।

नारद उवाच।

द्वादश्योविधिवित् प्रोक्ताःस्त्वया लोकपितामह।
अनुष्ठानविहीनानां तासां ब्रूहि क्रियाफलम्॥
प्रारम्भञ्च समाप्तिञ्च द्वादशीनां यथाविधि।
व्रतचर्य्याफलञ्चैव कथयस्व पितामह॥

ब्रह्मोवाच।

शृणुष्वैकमना विप्र विष्णोः प्रीतिकरं शुभं।
पुण्यं व्रतानां सर्व्वेषां द्वादशीव्रतमुत्तमं॥
मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः।

प्रथमञ्चैव गृह्णीयात् द्वादशीं विधिवन्नरः ।
कारयेच्च हरेर्यज्ञमाचार्य्याद्यैर्व्विधानतः ।
अर्च्चयित्वा हरिं तत्र लब्ध्वानुज्ञां द्विजस्ततः ॥
चक्रतीर्थं हरिं दृष्ट्वा मथुरायाञ्च केशवं ।
दृष्ट्वाऽशोकवने विष्णुं कुब्जाग्रे च जनार्द्दनं ॥
तत्फलं समवाप्नोति द्वादश्यां समुपोषणे ।
मनोवाक्कायचेष्टाभिः शुचिः शुद्धो दृढ़व्रतः ॥
ततो बन्धून् गुरून् विप्रान् प्रणम्यैवानुमन्य च ।
धर्म्मकामो नरः कुर्य्यादेतैः कृच्छ्रैर्न्न कारयेत् ॥
गुरोश्चानुज्ञया तत्र भक्षयेद्दन्तकाष्ठकम् ।
साक्षतञ्चोदकं गृह्य व्रतस्यानुपकल्पयेत् ॥
उपोष्यैकादशीं विष्णोर्यावच्च परिवत्सरं ।
अविघ्नसिद्धिमायातु त्वत्प्रसादात् जनार्द्दन ॥
एवं सम्बत्य नियमं प्रणम्य गरुड़ध्वजम् ।
जितेन्द्रियः शान्तमना दशम्यां निवसेन्निशां ॥
एकादश्यां ततः प्रातःस्नानं कृत्वा विधानतः ।
मधुना स्नाप्य देवेशं दधिक्षीरघृतादिभिः ॥
सर्व्वौषधिजलैः पूर्णैः कुम्भैः पल्लवचन्दनैः ।
कुङ्कुमोशीरकर्पूरैः स्रग्दामपरिशोभितैः ।
तत्रार्च्चयेत् स्थितं भक्त्या मालतीकुसुमैः शुभैः ॥
धूपं वागुरुसंसिद्धं गुग्गुलं वा घृतप्लुतं* ।
दहेद्देवाधिदेवाय दीपं दद्यादहर्निशं ॥

---

* घृतं प्लुतमिति पुस्तकान्तरे पाठः ।

पायसं पूपसंयावं फलैः सार्द्धकरम्भकं ।

करम्भा दधिसंमिश्राः शक्तवः ।

नैवेद्यन्तु हरेर्दद्यात् भक्त्या चैव विधानतः ॥
गीतवाद्यं ततः कृत्वा यथाशक्त्या निशां नयेत् ।
एवं पूजां हरेः कृत्वा द्विजश्चैवानुपूजयेत् ॥
योग्ये सति च नत्वन्यमासन्नं पूजयेद्यदि ।
स दुर्गतिमवाप्नोति खण्डश्चैव व्रतं नयेत् ॥
खण्डव्रताच्च निरयङ्गत्वा कल्पशतं स्थितः ।
यातोभवति देवर्षे खण्डस्थानान्तु भाजनं ॥
यथाशक्त्या नरोदद्यात् गुरवे दक्षिणां सुधीः ।
गुरुणा तत्र वै कुम्भे जपः कार्य्यः प्रयत्नतः ॥
एकाक्षरेण मन्त्रेण यत्तोयं चानुमन्त्रयेत् ।
अष्टोत्तरशतं जप्त्वा जलरूपं न्यसेद्रविं ॥
यस्य रोम्नि स्थिता मेघाः सर्व्वसन्धिषु निम्नगाः ।
समुद्राः कुक्षिमध्यस्थाः सर्व्वतीर्थानि पादयोः ॥
एवंभ्यस्य जले विष्णुं तां रात्रिं वासयेद्वदन् ।

एवं वदन् जले न्यस्येत्यन्वयः ।

द्वादश्यां तेन तोयेन तं शिष्यं स्नापयेद्गुरुः ॥
तेन स्नानेन विधिवन्मन्त्रपूतेन नारद ।
पुनन्तु सर्व्वतीर्थानि सर्व्वदेवाः सवासवाः ॥
तोयेनाद्याभिषिञ्चन्तु सर्व्वपापविमुक्तये ।
सर्व्वपापविनिर्मुक्तो वैष्णवीं तु लभेत्तनुं ॥
कृताभिषेकः पुण्यात्मा समभ्यर्च्याथ केशवं ।

गुरुं ज्ञानप्रदञ्चैव भोजयेद्ब्राह्मणैः सह ॥
भोजयित्वा द्विजेभ्योऽथ दक्षिणां प्रतिपादयेत् ।
एवमभ्यर्च्च देवेशं प्रतिमासं द्विजोत्तमं ॥
अर्च्चयेत् कीर्त्तय नामानि मासि मासि तथा शृणु ।
मार्गशीर्षे तु पुष्येच नाम नारायणं तथा ॥
माघे तु माधवं पूज्य गोविन्दं फाल्गुने तथा ।
चैत्रे च केशवं विष्णुं वैशाखे मधुसूदनं ॥
ज्यैष्ठे त्रिविक्रमं देवमाषाढ़े वामनं मुने ।
श्रावणे श्रीधराख्यं च हृषीकेशं नभस्यथ ॥
पद्मनाभं चाश्वयुजे तस्माद्दामोदरं तथा ।
एवं संकीर्त्तय नामानि द्वादशैव यथाक्रमं ॥
प्रीयतां मे हृषीकेश इत्युक्ता प्रणमेत्ततः ।
ततो विप्राय शान्ताय सवत्सां गां पयस्विनीं ॥
कृष्णस्य प्रीतये दद्याद्व्रतस्यास्य च सिद्धये ।
उपानहौ च वस्त्राणि मुद्रिकाञ्च कमण्डलुं ॥
कर्णमात्रान् घटांस्तोयपूर्णांश्च सह मोदकैः ।
द्वादश द्वादशेभ्यश्च विप्रेभ्यश्च सदक्षिणान् ॥
अनेन विधिना यस्तु द्वादशीं समुपोषयेत् ।
पूजयित्वा हरिं यान्ति विष्णोर्लोकमनामयं ।
नामाख्यद्वादशीह्येतद्व्रतानां प्रथमं मुने ॥
नरैस्त्रिभिरनुष्ठेया तोषयद्भिर्जनार्द्दनं ।
ॐकारः सर्व्ववेदानां यथादौ परिपठ्यते ॥
यश्चैनां कीर्त्तयेद्भक्त्या शृणोति श्रद्धयान्वितः ।

तत्सर्व्वपापनिर्मुक्तो विष्णुलोके व्रजत्यसौ* ॥
एवं कृते यच्च फलं लभते च तदुच्यते ।

मानी धनी ज्ञानयुतोऽथ विप्र
कुले प्रधाने धनधान्यपूर्णे ।
विवेकविन्यस्तसमस्तदुःखे
प्राप्नोति जन्माविकलेन्द्रियश्च ॥
तस्मात्त्वमप्येतदमोघविद्यो
नारायणाराधनमप्रमत्तः ।
कुरुष्व विष्णुं भगवन्तमीश
माराध्यमानश्च फलान्यपैहि ॥
धातेतदुक्त्वा ह्यभवत्स तूर्ष्णी
तदा स वाग्भिः परिपूजितः सन् ।

इति विष्णुरहस्योक्तनामद्वादशीव्रतम् ।

———000———

अगस्त्य उवाच ।

शृणु राजन्महाभाग शुभव्रतमनुत्तमं ।
येन सम्प्राप्यते विष्णुः शुभेनैव न संशयः ॥
मासि मार्गशिरे पुण्ये प्रथमाब्दात्समाचरेत् ।
एकभक्तं सिते पक्षे यावत् स्याद्दशमी तिथिः ॥
ततो दशम्यां मध्याह्ने स्नात्वा केशवमर्चयेत् ।
भुक्ता सङ्कल्पतः प्राग्वद्द्वादश्यां शुद्धमानसः ॥
केशवेति हरिं पूज्य दद्यात्तत्प्रीतये तिलान् ।

---

* व्रजन्निवै इति पुस्तकान्तरे पाठः ।

सहिरण्यं तथा कृष्णद्वादश्यां प्रयतो नृप॥
तामप्येवमुषित्वा च यवान् दद्याद्विजातये।
कृष्णायेति हरिर्वाच्यो दाने होमे तथार्च्चने॥
चातुर्म्मास्यामथैवन्तु क्षपित्वा राजसत्तम।
चैत्रादिषु पुनस्तद्वदुपोष्य प्रयतः शुचिः॥
मृत्पात्राणि विप्राणां सहिरण्यानि दापयेत्।
श्रावणादिषु मासेषु तद्वद्गोविन्दमर्च्चयेत्॥
त्रिषु मासेषु यावत्तु कार्त्तिकःस्यादिहागतः* ।
तमप्येवं क्षपयित्वा दशम्यां प्रयतः शुचिः॥
अर्च्चयित्वा हरिं भक्त्या मासनाम्ना विचक्षणः।
प्रियदत्तेत्यादिमन्त्रेण।
सङ्कल्प्य कारयेद्भक्त्या द्वादश्यां संयतेन्द्रियः॥
एकादश्यां यथा भक्त्या कारयेत् पृथिवीं नृप।
काञ्चनीं सप्तपातालकुलपर्व्वतसंयुतां॥
भूविन्यासविधानेन स्थापयेत्तां हरेः पुरः।
सितवस्त्रयुगच्छन्नां सर्व्वबीजसमन्वितां॥
सम्पूज्य प्रियदत्तेति पञ्चगन्धैर्व्विचक्षणः।
जागरं तत्र कुर्व्वीत प्रभाते तु पुनर्द्विजान्॥
आमन्त्र्य सङ्ख्यया राजन्नेकविंशतिनामतः।
तेषामेकैकशो गाश्च अनड्वाहश्च दापयेत्॥
एकैकं वस्त्रयुग्मञ्च एकैकं चाङ्गुलीयकं।
कटकञ्चैव सौवर्णं कर्णाभरणमेव च॥

---

* कार्त्तिकस्यादिवागत इति पुस्तकान्तरे पाठः।

एकैकं ग्राममेतेषां राजा राज्यप्रदोभवेत् ।
यथाविभवसारेण ततोगां सम्प्रदापयेत् ॥
अशक्त्या करणे चैव दरिद्रोऽपि स्वशक्तितः ।
यथाशक्त्या महीं कृत्वा काञ्चनीं गोयुगं तथा ॥
वस्त्रयुग्ममथैकं वा दद्याद्विभवशक्तितः ।
गोयुग्मासम्भवात्सर्व्वं हिरण्येनैव कारयेत् ॥
एवं कृत्वा तथा कृष्णद्वादश्यामेवमेव तु ।
रौप्याञ्चेत् पृथिवीं कृत्वा यथाविभवशक्तितः ॥
प्रदद्याद्ब्राह्मणानान्तु तथा तेषान्तु भोजनं ।
उपानहौ यथा शक्त्या पादुके छत्रिकान्तथा ।
एवं दद्याद्वेदविदे कृष्णो दामोदरो मम ॥
प्रीयतां सर्व्वदेवोऽपि विश्वरूपो हरिर्मम ।
दाने च भोजने चैव मुक्ता यत्फलमश्नुते ॥
न तच्छक्यं सहस्रेण वर्षाणामपि कीर्त्तितुं ।
शुभव्रतमिदं यस्तु पुण्यं कुर्य्यान्नरेश्वरः ॥
स सर्व्वसम्पदं प्राप्य ततो विष्णुपदं व्रजेत् ।

इति वाराहपुराणोक्तं शुभद्वादशीव्रतम् ।

———000———

पुलस्त्य उवाच ।

शृणु राजन्महाभाग व्रतञ्चानुत्तमं शुभं ।
मासि चाश्वयुजे ब्रह्मन् यदा पद्मजसन्निधिः ॥
नाभ्यां निर्य्याति जगतामीशितुश्चक्रधारिणः ।
तस्मिन् रम्ये शुभे काले या शुक्लैकादशी भवेत् ॥

तस्यां सम्यग्यजेद्विष्णुं येन खण्डं प्रपूर्य्यते ।

येन विष्णुप्रपूजनेन खण्डमसम्पूर्णं धर्म्मादिभिः परिपूर्णम्भवतीत्यर्थः ।

पुष्पैः पत्रैः फलैर्व्वापि गन्धवर्णसमन्वितैः ।
ओषधीभिश्च सर्व्वाभिर्यावत्स्थावरसम्भवैः* ॥
घृतं तिलान् व्रीहियवान् हिरण्यकनकादि च ।
मणिमुक्ताप्रवालानि वस्त्राणि विविधानि च ॥
रसाश्च स्वादुकट्वम्लकषायलवणानि च ।
तिक्तानि च निवेद्यानि तान्यखण्डानि यानि हि ।
तत्पूजार्थम्प्रदातव्यं केशवाय महात्मने ॥
येन सम्बत्सरं पूर्णमखण्डं जायते गृहे ।
कृतोपवासो देवर्षे द्वितीयेऽहनि सर्व्वतः ॥
स्नानेन तेन स्नायीत येनाखण्डं हि वत्सरं ।
सिद्धार्थकैस्तिलैर्व्वापि तेनैवोद्वर्त्तनं स्मृतं ॥
हविषा पद्मनाभस्य स्नानमेव समाचरेत् ।
होमे तदेव गदितो दाने शक्त्या द्विजोत्तम ।
पूजयेच्चाथ कुसुमैः पादादारभ्य केशवं ॥
धूपयेद्विधिवद्रूपं येन स्याद्वत्सरं परं ।
हिरण्यरत्नवासोभिः पूजयेत्तं जगद्गुरुं ॥
सरसद्रवचूष्याणि हविष्याणि निवेदयेत् ।

प्रथमैकादश्यां येन द्रव्येण यत्कर्म्म निष्पादितं शेषास्वेकादशीषु तेनैव द्रव्येणान्यन्निष्पाद्यं ।

---

* यावत्स्थावरदागम इति पुस्तकान्तरे पाठः ।

ततः सम्पूज्य देवेशं पद्मनाभञ्जगद्गुरुं ।
विज्ञापयेन्मुनिश्रेष्ठ मन्त्रेणानेन सुव्रत ॥
नमोस्तु पद्मनाभाय पद्मावह महाद्युते ।
धर्म्मार्थकाममोक्षाणि अखण्डानि भवन्तु मे ॥
विकासिपद्मपत्राक्ष यथाखण्डोसि सर्व्वतः ।
तेन सर्व्वेण धर्म्माद्यास्त्वखण्डाः सन्तु केशव ॥
एवं सम्वत्सरे पूर्णे सोपवासोजितेन्द्रियः ।
अखण्डम्पारयेद्ब्रह्मन् व्रते वै सर्व्ववस्तुषु ।
अस्मिंश्चीर्णे व्रते व्यक्तं परितुष्यति माधवः ॥
धर्म्मार्थकाममोक्षाद्याःस्वेच्छया सम्भवन्ति च ।

इति वामनपुराणोक्ताखण्डद्वादशीव्रतम् ।

——000——

मुनय ऊचुः ।

कुम्भिकाव्रतमस्माकं प्रब्रूहि मुनिसत्तम ।
यथा जागरणं तस्यां यथा वै देवपूजनम् ॥
यद्देवं यत्फलं तस्यां तद्ब्रूहि मुनिसत्तम ।

शौनक उवाच ।

अतिव्रतमिदं पुण्यं पवित्रं पापनाशनं ।
श्रावयेत् पुण्डरीकाक्षं देवानामपि दुर्लभं ॥
एकादश्यां कार्त्तिकस्य शुक्लपक्षे तु कारयेत् ।
कुम्भादिनरकेभ्यस्तु उद्धरेत् स्वमशेषतः ॥
प्रयत्नात् कार्त्तिके मासि विष्णोरग्रे तु जागरम् ।

शुक्लैकादशीं रात्रौ विशेषादर्च्चयन्ति च ॥
चतुरस्रं चतुर्द्वारङ्गोमयेनोपलिप्य च ।
चतुर्भिः शालिगोधूमवर्णकैरुपशोभितम् ॥
स्नात्वा नारायणं पूज्य स्थण्डिले प्रतिमासु च ।
हुत्वा दिशां बलिं दत्त्वा विधानमवधारयेत् ॥
दीपमालान्वितं गन्धपुष्पाद्यैः पूजयेत्ततः ।
कुम्भीं देवमयीं ध्यात्वा मुच्यते सर्व्वकिल्बिषैः ॥

कुम्भीनाम प्रसिद्धा ।

यदा सुकुसुमोपेता कुम्भी कल्मषनाशिनी ।
तस्या मूले स्थितो विष्णुस्तदूर्ध्वे च पितामहः ॥
स्कन्धे च संस्थितो रुद्र अन्ते च त्रिपुरान्तकः ।
इन्द्रवायुसमायुक्तशाखासु ऋषयस्तथा ॥
पर्णे चरन्ति देवाश्च मूलेषु मरुतः स्मृताः ।
सर्व्वदेवनमस्कार्य्या सर्व्वव्रतकरी स्मृता ॥
तस्मात् सर्व्वप्रयत्नेन कार्य्यं वै कुम्भिकाव्रतम् ।
सदा जागरणं कार्य्यं नृत्यगीतपुरःसरं ॥
दम्पत्योः परिधानञ्च पूजा च मधुसूदन ।
यथाशक्ति तथा देया दक्षिणा पापनाशनी ॥
य एवं कुरुते कश्चित् कुम्भीजागरणं शुभं ।
मन्त्रेण पूजयेत् कुम्भीं कुम्भीपाकप्रणाशनीं* ॥
वल्लीं स्वर्णमयीं कृत्वा रौप्यञ्च पुष्पमेव च ।
सौवर्णं केसरञ्चैव नानाफलसमायुतम् ॥

---

* यावपःकप्रणाशनमिति पुस्तकान्तरे पाठः ।

लक्ष्मीं नारायणंचैव सौवर्णं कारयेद्बुधः।
पूजयेत् परया भक्त्या कुम्भीकायाः समीपतः॥
पुरा त्वं दैवतैः पूर्व्वं प्रेषिता भुवनागता।
गृहाण पूजां भद्रन्ते सर्व्वकार्य्यार्थसिद्धये॥

पूजामन्त्रः।

फलपुष्पाक्षतैस्तोयैः कर्पूरैश्चन्दनेन च।
रौप्यपात्रे च संकृत्वा दद्यादर्घ्यं प्रयत्नतः॥
अर्घ्यं गृहाण मे देवि सर्व्वपापप्रणाशनी।
अर्घ्यन्तुभ्यं मया दत्तं कुम्भीकायै नमोस्तुते*॥

अर्घ्यमन्त्रः।

त्वम्माता सर्व्वभूतानां त्वमेव परमेश्वरी।
विद्या परमविद्यानां सर्व्वभूतवशङ्करी॥
पुत्रसौभाग्यदा देवी सर्व्वसौख्यहितैषिणी।
मत्स्याय पादौ संपूज्य जरू कूर्म्माय वै तथा॥
वराहाय कटिं पूज्य नृसिंहाय उरस्तथा।
वामनाय च कण्ठञ्च भुजौ रामद्वयेन च†॥
रामनाम्ना च नेत्रे तु बुद्धनाम्नः शिरस्तथा।
कल्किनाम्ना तथा केशान् वामनायेति सर्व्वतः॥

पूजामन्त्रः।

जय विष्णो जयानन्त जय वामनरूपधृक्।
गृहाणार्घंञ्च मया दत्तमेकादश्यां तु कुम्भिके॥

---

* नमोनमइति पुस्तकान्तरेपाठः।

† वामद्वयेनचेति पुस्तकान्तरे पाठः।

सवत्सां वस्त्रसम्वीतां शुभां यज्ञोपवीतिनीं।
स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां सघण्टिकां॥
कांस्योपदोहनयुतां सितचन्दनचर्च्चितां।
मुक्ताफलस्रजन्दिव्यां हिरण्योपरिसंस्थितां॥
हिरण्यं वाचयित्वाग्रे ब्राह्मणाय निवेदयेत्।
नन्दा चैवोपनन्दा च सुशीला सुरभी तथा॥
गावो मम गृहे* सन्तु गावो मे लोकमातरः।
एवं सम्पूज्य विधिना नक्तं वाश्यादुपोषणं॥
रात्रौ जागरणं कुर्य्यात् सकलं प्राप्नुयात् फलं।
स पुत्रपशुरत्नानि अचर्याणि पितामह॥
सप्तकल्पसहस्राणि सप्तकल्पशतानि च।
कुर्व्वीत कुम्भीव्रतमिदं विष्णुलोके† महीयते॥

इति स्कन्दपुराणोक्तं कुम्भीव्रतम्।

—:○:—

दाल्भ्य उवाच।

अल्पायासेन विप्रर्षे दानेनाल्पेन वा विभो।
पापप्रशममायाति येन तद्वक्तुमर्हसि॥

पुलस्त्य उवाच।

शृणु दाल्भ्य परां पुण्यां द्वादशीं पापनाशनीं
यामुपोष्य परं पुण्यं प्राप्नुयाच्छ्रद्धयान्वितः॥

---

* ममायतइति पुस्तकान्तरेपाठः।
† ब्रह्मलोकइति पुस्तकान्तरेपाठः।

माघमासे तु सम्प्राप्ते आषाढ़र्क्षं भवेद्यदि ।
मूलं वा कृष्णपक्षस्य द्वादश्यां नियतव्रतः ॥
गृह्णीयात् पुण्यफलदं विधानं तस्य मे शृणु ।
देवदेवं समभ्यर्च्य सुस्नातः प्रयतः शुचिः ॥
कृष्णनाम्ना तु सम्पूज्य एकादश्यां महामतिः ।
उपोषितो द्वितीयेऽह्नि पुनः सम्पूज्य केशवम् ॥
संस्तूय नाम्ना तेनैव कृष्णाख्येन पुनः पुनः ।
दद्यात्तिलांस्तु विप्राय कृष्णो मे प्रीयतामिति ॥
स्नानप्राशनयोः शस्तास्तथा कृष्णतिला मुने ।
विष्णुप्रीणनमन्त्रैश्च समाप्ते वर्षपारणे ॥
कृष्णकुम्भास्तिलैः सार्द्धं पक्वान्नेन च संयुताः ।
छत्रोपानद्युगैः सार्द्धं सव्रीता रत्नगर्भिणः ॥
ब्राह्मणानां प्रदेयास्ते यथावच्च ससंख्यया ।
कृष्णाञ्च गां ब्राह्मणाय पीतवस्त्रां पयस्विनीं ॥
छत्रोपानद्युगन्दद्यात् कृष्णो मे प्रीयतामिति ।
तिलप्ररोहजाः क्षेत्रे यावत्सङ्ख्यास्तिला द्विजाः ॥
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ।
अरोगो जायते नित्यं नरो जन्मनि जन्मनि ॥
अन्धो न च विहीनाङ्गो न कुष्ठी न च कुत्सितः ।
अवत्येतामुषित्वा तु तिलाख्यां द्वादशीं नरः ॥
विष्णुप्रीणनमन्त्रोक्त्या समाप्ते वर्षपारणे ।
पूजां च कुर्य्याद्विप्राय भूयोदद्यात्तथा तिलान् ॥
अनेन विधिना दाल्भ्य तिलदानान्नसंशयः ।

मुच्यते पातकैः सर्व्वैरनायासेन मानवः ॥
दानं विधिस्तथा श्रद्धा सर्व्वपातकशान्तये ।
नार्थप्रभूतोमायासः शरीरे मुनिसत्तम ॥

इति विष्णुधर्म्मोक्तं तिलद्वादशीव्रतम् ।

———000———

कृष्ण उवाच ।

शरतल्पगतं भीष्मं पर्य्यपृच्छद्युधिष्ठिरः ।
व्रतेन येन पुण्येन यमलोको न दृश्यते ॥
नारी वा पुरुषो वापि शोकं चैव न पश्यति ।
तन्ममाचक्ष्व धर्म्मज्ञ पितामह कृपां कुरु ॥

भीष्म उवाच ।

एकादशी वैतरणी या तां कृत्वा सुखी भव ।
यमलोकं न पश्ये च शोकञ्चैव न विन्दति ॥

युधिष्ठिर उवाच ।

केन तात विधानेन कर्त्तव्या सा महाफला ।
पितामह समाख्याहि तद्विधानं मम प्रभो ॥

कृष्ण उवाच ।

एकादशी तिथिः कृष्णा मार्गशीर्षगता नृप ।
तामासाद्य नरः सम्यक् गृह्णीयान्नियमं शुचिः ॥
एकादशी तिथिः कृष्णा नाम्ना वैतरणी शुभा ।
सा व्रतेन मया कार्य्या वर्षं नक्तपरा सिता ॥
मध्याह्ने तु नरः स्नात्वा नित्यं निर्व्वर्त्तितक्रियः ।

रात्रौ सुरभिमानीय कृष्णामर्च्चेत् यथाविधि ॥
पूर्व्वाभिमुख्यभिधातव्या कृष्णागौर्लिप्तभूतले।
अग्रपादादितः पूज्या यश्चात्पादद्दयावधि ॥
गोपुच्छन्तु समासाद्य कुरु वै पितृतर्पणं।
ततः पूजा प्रकर्त्तव्या शास्त्रदृष्टविधानतः॥
गाश्चैव श्रद्धया युक्तश्चन्दनेनानुलेपयेत्।
गन्धतोयेन चरणौ शृङ्गे प्रक्षाल्य भक्तितः॥
ततो तु पूजयेद्भक्त्या पुष्पैर्गन्धादिवासितैः।
मन्त्रैः पुराणसम्प्रोक्तैर्यथास्थानं यथाविधि ॥

तत्र पूजामन्त्रः।

गोरग्रपादाभ्यां नमः। गोरास्याय नमः। गोः शृङ्गाभ्यां नमः। गोः स्कन्धाभ्यां नमः। गोपुच्छाय नमः। गोग्रपादाभ्यां नमः। गोः सर्व्वाङ्गेभ्यो नमः।

स्थानेष्वेतेषु गन्धांश्च प्रक्षिपेच्छुद्धमानसः।
पश्चात्प्रदापयेद्धूपं गौर्द्दीपंप्रतिगृह्यतां।
असिपत्रादिकं घोरं नदीवैतरणीं तथा ॥
प्रसादात्ते तरिष्यामि गोमातस्ते नमोनमः।
सुखेन तीर्य्यते यस्मान्नदी वैतरणी ध्रुवं ॥
तस्मादेकादशीं कृत्वा नाम्ना वैतरणी भवेत्।
आनन्दकृत्त्वं लोके देवानाञ्च सदा प्रिया ॥
गौस्त्वं पाहि जगन्नाथे दीपोऽयं प्रतिगृह्यतां ॥

दीपमन्त्रः।

आच्छादनं गवे दद्यात् सम्यक शुद्धं सुनिर्म्मलं।

सुरभिर्वस्त्रदानेन प्रीयतां परमेश्वरी ॥

आच्छादनमन्त्रः।

मार्गशीर्षादिके भक्तं यावन्मासचतुष्टयं।
अन्यमासचतुष्कन्तु यवकाशनमेवच* ॥
श्रावणादिषु मासेषु चतुर्ष्वंद्याच पायसं।
तदन्नस्य त्रयोभागाः गोगुरु स्वार्थमेव च† ॥
नैवेद्यं हि मया दत्तं सुरभि प्रीयतामिति।
द्वितीयं गुरवे दद्यात् तृतीयं स्वयमेव च ॥
मासान्मासं प्रकुर्व्वीत मासद्वादशकं व्रतं ॥
उद्यापनन्ततः कुर्य्यात् पूर्णे सम्वत्सरे सदा।
शय्या सतूलिका कार्य्या दम्पत्योः परिधानकं ॥
सवत्साꣳ‡ कृष्णवर्णा तु धेनुः कार्य्या पयस्विनी।
सौवर्णीं सुरभीं कृत्वा स्थापयेत्तूलिकोपरि ॥
सुरभीं पूजयेन्मन्त्रैः पूर्व्वोक्तै भक्तिसंयुतैः।
ततस्तु गुरवे दद्यात्सर्व्वं तत्र समापयेत् ॥
नारी वा पुरुषो वापि व्रतस्यास्य प्रभावतः।
राज्यं बहुविधं भुक्त्वा स्वर्गलोके महीयते ॥
भारो लौहस्य दातव्यः कार्य्योऽसौ द्रोणसम्मितः।
वैतरण्यां समाश्रित्य ब्राह्मणाय कुटुम्बिने ॥

इति भविष्योत्तरोक्तं वैतरणीव्रतम्।

---

* यवकाशनमिति पुस्तकान्तरे पाठः।
† गोगुरुः स्वार्थमिति पुस्तकान्तरे पाठः।
‡ सवत्सेति पुस्तकान्तरे पाठः।

युधिष्ठिरउवाच।

मेघावृतेऽम्बरे देव प्रावृट्काले ह्युपस्थिते।
दर्दुराराबभूयिष्ठे केकानादनिनादिते॥
किं व्रतं तत्र कर्त्तव्यं स्त्रीभिः पुंभिरथापि वा।
ब्रूहि मे तत् सोपवास सर्व्वनामानि मन्त्रकं॥

कृष्ण उवाच।

प्रवृत्ते श्रावणे मासि कृष्णपक्षे समाहितः।
एकादश्यां शुचिर्भूत्वा स्नात्वा सर्व्वौषधीजलैः॥
माषचूर्णेन राजेन्द्र कुर्य्यादिन्दुरिकाशतं।
मोदकांश्च तथा पक्व घृतप्रस्थः सुनिर्म्मलः॥
आत्मोपयोगमुद्दिश्य ततो गत्वा जलाशयं।
दुष्टयादोविरहितं अज्ञोपेतजलैर्वृतं॥
तस्यैव पुलिने रम्ये जलान्ते गोमयादिना॥
कृत्वा मण्डलकं वृत्तं पिष्टकादिभिरर्च्चितं।
चर्च्चितं गन्धकुसुमैर्धूपदीपाक्षतैः शुभैः॥
तत्र चन्द्रं लिखेत्पार्श्वे रोहिण्या सहितं भुवि।
अर्च्चयीत शुभार्थेन मन्त्रेणानेन भक्तितः॥
सोमराज नमस्तुभ्यं रोहिण्या ते नमोनमः।
महासति महादेवि सम्पादय ममेप्सितम्॥
इत्थं सम्पूज्य तस्याग्रे नैवेद्यं देयमर्च्चितम्॥
तच्चैवं ब्राह्मणे दद्यात् सोमो नः प्रीयतामिति।
प्रीयतामिति मे देवि रोहिणी शशिनः प्रिया॥
एवमुच्चार्य्य तद्दत्वा तज्जलं स्वयमाविशेत्।

कण्ठान्तं जलमात्रं वा जानुगुल्फान्तमेव वा ॥
ध्यायते सोमराजञ्च रोहिणीसहितं विभुम्।
जलस्थमेव भुञ्जीत स्वयमिन्दुरिकाशतम्* ॥

पञ्च मोदकान् घृतप्रस्थस्येति शेषः ॥

यावत्समस्तं† तद्भुक्तं भुक्त्वा तत्तटसंस्थितः।
निवेद्य वाचनं वाच्यं ततो विप्राय भोजनम् ॥
दक्षिणासहितं दद्यात् स्वशक्त्या परिधानकम्।
भक्त्या परमया पार्थ वित्तशाठ्यविवर्जितः ॥
यः करोति नरो राजन्नारी वाथ कुमारिका।
वर्षे वर्षे विधानेन पार्थेदं रोहिणीव्रतम् ॥
इहलोके‡ चिरं स्थित्वा धनधान्यसमाकुले ॥
गृहाश्रमे शुभे पार्थ पुत्रपौत्रादिसंयुते।
ततः सुतीर्थमरणं लब्ध्वा विष्णुपुरं व्रजेत् ॥
दिव्यं वर्षशतं स्थित्वा भुक्त्वा भोगाननुत्तमान्।
इह चाभ्येत्य राजासौ जायते जनवल्लभः ॥

के रोहिणी शशिभृता विहृता हिता
यत् कारणं शृणु नरेन्द्र निवेदयामि।
सत्पिष्टमापरचितेन्दुरिकाशतं य-
द्भुक्तं जले गुड़घृतेन फलं तदेव ॥

गुड़ो,मोदकः।

इति भविष्योत्तरोक्तं रोहिणीद्वादशीव्रतम्।

---

* छिण्डिरिका इति पुस्तकान्तरेपाठः।

† यावत् समस्तमिति पुस्तकान्तर पाठः।

‡ रुद्रलोकमिति पुस्तकान्तरे पाठः।

युधिष्ठिर उवाच ।

शङ्ख चक्र गदापाणे श्रीवत्स गरुड़ासन ।
मल्लाख्यद्वादशीं ब्रूहि किं विधानञ्च किं फलम् ॥

कृष्णउवाच ।

मार्गशीर्षे शुभे मासि देवर्षिपितृसेविते ।
यदा च भण्डीरवटे रमामि यमुनातटे ॥
गोपालमध्ये गोवत्सैरष्टवर्षोऽस्मि लीलया ।
कंसासुरवधार्थाय यमुनोपवने तदा ॥
अवलोबालरूपेण गोपमल्लैर्बलोत्कटैः ।
त एव मल्लगोपाश्च बलेन सह कानने ॥
आस्फोटयन्ति नृत्यन्ति त्रिदिवे त्रिदशा इव ।
सुभद्रो मन्दलोगण्डस्तगोवर्द्धनगायनः ॥
यचेन्द्रभटइत्यादि तेषां नामानि गोकुले ।
गोपीनामपि नामानि प्राधान्येन च बोधयेत् ॥
गोपाली पालिका धन्या विशाखान्या विनिश्चिका ।
गन्धानुगन्धा सोमाभा तारका दशमी तथा ॥
इत्येवमादिभिरहमुपविश्य वरासने ।
पूजितोस्मि शुभैः पुष्पैर्दधिदूर्वाचतैस्तथा ॥
शतानां त्रीणि पुष्पाणि मल्लानां पूजयन्ति मां ।
मल्लैश्चैव सुरागैश्च रङ्गजा मरनर्त्तनैः ॥
मल्लयुद्धैर्बहुविधैर्मत्तमल्लभटस्फुटैः ।
भक्ष्यैर्भोज्यैस्तथा पानैर्दधिदुग्धघृताशनैः ॥
स्नेहसङ्कर्षणैर्हास्यैः कर्षणक्रीडने मिथः ।

एवं द्वादश कर्त्तव्याः स्मर्त्तव्याः सुसमाहितैः ॥
मल्लैर्विशेषतः कार्य्यास्तथान्यैरपि भक्तितः ।
पूजयन्ति क्रमेणैव मासि मासि तनूर्म्मम ॥
मार्गशीर्षादिभिः पार्थ पूजयेन्मासनामभिः ।
पारणे पारणे दद्यान्मल्लिकानि द्विजातये ॥
गन्धैः पुष्पैस्तथादीपैर्गीतवाद्यैर्म्मनोहरैः ।
मल्लयुद्धैश्च विविधैर्जागरं कारयेन्निशि ॥
घृतदानैः क्षीरदानैर्दधिदानैः पृथक् पृथक् ।
सर्व्वं च देवदेवेशः कृष्णो मे प्रीयतामिति ॥
एवमेव विधिः प्रोक्तो मन्त्रदानसमन्वितः ।
द्वादशीयं मयाद्यापि क्रियते बलहृद्वये ॥
मल्लानां जयदा यस्मान्मल्लद्वादशिसंज्ञिता ।
तस्मान्मल्लैः प्रकर्त्तव्या मल्लयुद्धजयार्थिभिः ॥
अन्येषामपि कौन्तेय सर्व्वार्थजयदायिनी ।
इमां चीर्त्वा पापसङ्घैर्म्मुच्यते नात्र संशयः ॥
अरण्येस्याद्यतोभोज्यं दत्तं तैस्तु परस्परं ॥
क्रमेण पाण्डवश्रेष्ठ तेनैषारण्यद्वादशी ।
एषैव मार्गशीर्षे तु गृहीता पार्थ मानवैः ॥
द्वादशिसंज्ञा तु विख्याता द्वादशी भुवनत्रये ।
यस्याः प्रभावात् राजेन्द्र गोपगोकुलसङ्कुलाः ॥
अजाविगोमहिष्यादिधनधान्यसमृद्धिभिः ।
इमां पापहरां पुण्यां नामाख्यद्वादशीं नृपः ॥
ये करिष्यन्ति मद्भक्तास्तेषां दास्यामि हृद्गतम् ।

आरोग्यं बलमैश्वर्य्यं विष्णुलोकञ्च शाश्वत

भण्डीरपादपतले मिलितैर्म्महद्भि-

र्म्मल्लैरनाकुलबाहुबलं नियुद्धैः।

सम्पूजितः सपदि यत्र तिथौ ततश्च

सा द्वादशी भुवि गता बलमल्लसंज्ञा॥

इति भविष्योत्तरोक्तं मल्लद्वादशीव्रतम्।

मैत्रेय उवाच।

उपवासव्रतानां तु वैकल्यं यन्महामते।

दानकर्म्मकृतं तस्य विपाको वद यादृशः॥

याज्ञवल्क्यउवाच।

यज्ञानामुपवासानां व्रतानाञ्च यतव्रतः!

वैकल्यात्फलवैकल्यं यादृशं तच्छृणुष्व मे।

उपवासादिना राज्यं प्राप्याथान्ये तथा वसु॥

भ्रष्टैश्वर्य्या निर्द्धनाश्च भवन्ति पुरुषाः पुनः।

रूपं तथोत्तमं प्राप्य व्रतवैकल्यदोषतः॥

काणाः कुब्जाश्च भूयस्ते भवन्त्यन्धाश्च मानवाः।

उपवासान्नरः पत्नीं नारी वापि तथा पतिं॥

वियोगव्रतवैकल्यादुभयं तदवाप्नुते।

येऽपि हव्ये सत्यदारास्तथान्ये सत्यनग्नयः॥

कुले वसति दुःशीला दुष्कुले शीलिनश्च ये।

वस्त्रानुलेपनैर्हीना भूषणैश्चातिरूपिणः॥

विरूपरूपाश्च तथा प्रसाधनगुणान्विताः।

सर्व्वे ते व्रतवैकल्यात् फलवैकल्यताङ्गताः ॥
तस्माद्व्रते तथा दाने यज्ञे वोपोषिते तथा ।
वैकल्यं नैव कर्त्तव्यं वैकल्याद्विकलं फलं ॥

मैत्रेय उवाच ।

कथञ्चिद्यदि वैकल्यमुपवासादिके भवेत् ।
किं तत्र वद कर्त्तव्यं निश्छिद्रं येन जायते ॥

याज्ञवल्क्य उवाच ।

अखण्डद्वादशीमेतां समस्तेष्वेव कर्मसु ।
वैकल्यशमनायालं शृणुष्व गदतो मम ॥
मार्गशीर्षेऽमले पक्षे द्वादश्यां नियतः शुचिः ।
कृतोपवासो देवेशं समभ्यर्च्य जनार्द्दनं ॥
स्नातो नारायणं वक्ति भुञ्जन् नारायणं तथा ।
भुञ्जन्नारायणं देवं स्वपन्नारायणं पुनः ॥
पञ्चगव्यजलस्नातो विष्णुं ध्यात्वा जितेन्द्रियः ।
यवव्रीहिभृतं पात्रं दत्त्वा विप्राय भक्तितः ॥
इदमुच्चारयेत् पश्चाद्देवस्य पुरतो हरेः ।
सप्तजन्मनि यत् किञ्चिन्मया खण्डव्रतं कृतं ॥
भगवंस्त्वत्प्रसादेन तदखण्डमिहास्तु मे ।
यथाखण्डं जगत्सर्व्वं त्वमेव पुरुषोत्तम ॥
तथाखिलान्यखण्डानि व्रतानि मम सन्तु वै ।
एवं मे त्वत्प्रभावेण कामावाप्तिस्तु साम्प्रतं ॥
एवं मासानुमासञ्च चातुर्वर्ण्यविधिः स्मृतः ।
चतुर्भिरेव मासैस्तु पारणं प्रथमं स्मृतं ॥

प्रीणनञ्च हरेः कुर्य्यात् पारणे पारणे पुनः।
चैत्रादिषु तु मासेषु चतुर्थ्येव पारणं॥
तत्रापि शक्तुपात्राणि दद्यात् श्रद्धासमन्वितः।
श्रावणादिषु मासेषु कार्त्तिकान्तेषु पारणं॥
तत्रापि घृतपात्राणि दद्याद्विप्राय भक्तितः।
सौवर्णं राजतं ताम्रं मृण्मयं पात्रमिष्यते॥
स्वशक्त्यपेक्षया राजन् पात्राण्यत्राथ कारयेत्।
एवं सम्वत्सरस्यान्ते ब्राह्मणान् संयतेन्द्रियान्॥
आमन्त्रितान् द्वादश वै भोजयेद्घृतपायसैः।
वस्त्राभरणदानैश्च प्रणिपत्य क्षमापयेत्॥
उपदेष्टारमपि च पूजयेद्विधिवद्गुरून्।
गाश्च दत्त्वा नृपश्रेष्ठ प्रणिपत्य क्षमापयेत्॥
एवं सम्यग्यथान्यायमखण्डद्वादशीं नरः।
समुपोष्याखण्डस्य व्रतस्य फलमश्नुते॥
सप्तजन्मानि वैकल्यं यद्व्रतस्य क्वचित् कृतं।
करोत्यखण्डमखिलमखण्डद्वादशी यतः॥
तस्मादेषा प्रयत्नेन नरैः स्त्रीभिश्च सुव्रते।
अखण्डद्वादशीं सम्यगुपोष्य फलकाङ्क्षया॥

इति विष्णुधर्म्मोत्तरे अखण्डद्वादशीव्रतम्।

विष्णुधर्म्मोत्तरोक्तमुद्यापनम्।

———ooo———

कृष्णउवाच।

नारदेन पुरा विष्णुरखण्डद्वादशीव्रतं।

उद्यापनविधिं पृष्टः कथयामास तं शृणु ॥

नारद उवाच।

भगवन् देवदेवेश पुराणपुरुषोत्तम।
किञ्चित् पृच्छामि सन्देहं कारुण्यात् कथय प्रभो ॥
अखण्डद्वादशी यासौ पुराणे कथिता तु या।
सा सर्व्वव्रतखण्डानां पूरणाय किमुच्यते ॥
यथा सर्व्वव्रतानान्तु वैकल्यं पूर्य्यते प्रभो।
तस्या उद्यापनविधिर्न सम्यक्कथितस्त्वया ॥
न तत्प्रश्नस्य वक्तास्ति श्रोता वापि सुदुर्लभः।

विष्णुरुवाच।

मार्गशीर्षे शुभे मासि शुक्लपक्षे शुचिव्रतः।
दशम्यां केशवं पूज्य हविष्यान्नकृताशनः ॥
निर्व्वर्त्त्य पश्चिमां सन्ध्यां गृह्णीयाद्दन्तधावनं।
उपस्पृश्य यथान्यायं मन्त्रमेतमुदीरयेत् ॥
कृष्ण विष्णो हृषीकेश केशव क्लेशनाशन।
करिष्येऽहं व्रतारम्भं भवेद्यावद्दिनत्रयं।
इति सम्प्रार्थ्य गोविन्दं मन्त्रेणादौ ततः स्वपेत् ॥

व्रतग्रहणमन्त्रः।

ततः प्रभाते चोत्थाय यथोक्तं व्रतमाचरेत्।
चतुर्भिः पारणं मासैः कथितं यत् द्विजोत्तम ॥
तत्पात्रदानविधिना भिद्यते नहि पारणं।
एवं द्वादश निर्व्वर्त्य द्वादशीः पद्मजोद्भव ॥
उद्यापनन्ततः कुर्य्याद्विधिमन्त्रपुरस्कृतं।

एकादश्यां शुचिः स्नातः शुक्लाम्बरधरोव्रती ॥
सर्व्वतीर्थेषु यत्पुण्यं सर्व्वतीर्थेषु यत् फलं ।
त्वत्पादपद्मतोयेन सर्व्वं मे भवतु प्रभो ॥

इति स्नानमन्त्रः ।

स्नानं कृत्वा ततो देवं पूजयेद्गरुड़ध्वजं ।
एकत्रमूर्त्तिसम्पन्नं लक्ष्मीनारायणं प्रभुं ।
यथाशक्त्या प्रकुर्व्वीत सौवर्णं रत्नभूषितं ॥
सहस्रशीर्षामन्त्रेण स्नापयेद्गन्धवारिणा ।
मधुवातादिभिर्म्मन्त्रैर्मधुना स्नापयेद्धरिं ॥
यथार्थ्यमेतिमन्त्रेण क्षीरेण स्नापयेत्ततः ।
एवं स्नाने कृते पश्चात् पूजां कर्त्तुं समारभेत् ॥
चन्दनोशीरकर्पूरकुङ्कुमादिभिरर्च्चयेत् ।
तैर्विलिप्य हरिं भक्त्या ततो मन्त्रमुदीरयेत् ॥
यथाशक्त्या मया देव स्नापितश्चानुलेपितः ।
न्यूनातिरिक्तं तत्सर्व्वं लक्ष्मीनारायण क्षमेत् ॥

अनुलेपमन्त्रः ।

ततो वस्त्रयुगं श्रेष्ठमानीय परिधापयेत् ।
पीतं वा लोहितं वापि श्वेतं नानाविचित्रितं ॥
परिधानं यथाशक्त्या तव देव समर्पितं ।
न्यूनातिरिक्तं तत्सर्व्वं लक्ष्मीनारायण क्षमेत् ॥

इति परिधानमन्त्रः ।

परिधाप्य ततो देवं पुष्पैर्नानाविधैः शुभैः ।

संच्छाद्य पुष्पमालाभिर्म्मन्त्रमेतमुदीरयेत् ॥
पुष्पैरपि यथा भक्त्या पूजितोसि जनार्द्दन।
न्यूनातिरिक्तं तत्सर्व्वं लक्ष्मीनारायणः क्षमेत् ॥

इति पुष्पार्च्चनमन्त्रः।

एवं कृत्वा विधानेन शय्यां चैव निवेदयेत्।
तूलीपर्य्यङ्कयुक्तान्तु छेदप्रच्छेदगूडकैः ॥
प्रतिपादसमारूढैः चतुःपादप्रतिष्ठितैः।
निवेश्य तत्र देवेशं लक्ष्मीनारायणं शुभं ॥
नैवेद्यादि निवेद्यानि नानाभक्ष्ययुतानि च।
लेह्यान्यभ्यवहार्य्याणि चूष्याणि चर्व्वणानि च ॥
पानकानि च वै यत्नात् यस्मिन् देशे यथा तथा ॥
तानि सर्व्वाण्युपादाय देवाय विनिवेदयेत्।
फलानि च सुगन्धीनि पक्वान्नानि निवेदयेत् ॥
एवं निवेद्य तत्सर्व्वं भक्त्या मन्त्रमुदीरयेत्।
यथावित्तोपसंयुक्तं* मया तव निवेदितं ॥
लक्ष्मीनारायण विभो भक्त्या तत् प्रतिगृह्यतां ॥
इति नैवेद्यदानन्तु भक्त्या देवस्य कारयेत्।
देवस्य तु शिरः पूर्व्वं पादौ पश्चात् प्रकल्पयेत्।
शिरःस्थाने ततः कुम्भं वारिपूर्णं मनोहरं ॥
स्थापयेत् कर्कटीयुक्तं सरत्नं वस्त्रभूषितं।
स्थापयित्वा तु तं कुम्भं ततोमन्त्रमुदीरयेत् ॥

---

* वित्तोपसंयुक्तमिति पुस्तकान्तरे पाठः।

भुक्ता पीत्वा तथाचम्य तोयेनानेन केशव ।
मद्भक्त्या प्रीतितो देव सुप्तः सुमुखः स्वयं ॥
इति स्थापनमन्त्रः* ।
शय्योपचारं यत्किञ्चित् तत्सर्व्वं विनिवेदयेत् ।
यावत्पूजा समारब्धा स्नानदानाशनान्तिकाः ॥
सघृतं गुग्गुलं तावद्दहेद्देवाग्रतो निशि ।
ततो विप्रं समानीय भार्य्यया सहितं शुभं ॥
सर्व्वं दुर्लक्षणैर्हीनं साङ्गोपाङ्गसमन्वितं ।
वेदविद्याव्रतस्नातः पूजितः स्वकुलोद्भवैः ॥
देवस्यान्ते ततो विप्रं भार्य्यया सहितं न्यसेत् ।
प्राङ्मुखं विमलं शुद्धं भक्त्या तं पूजयेत्ततः ॥
बहुना किं प्रलापेन कथितेनेह नारद ।
देवः संपूजितो यद्वत्तद्वद्विप्रञ्च पूजयेत् ॥
विष्णुब्राह्मणयोर्भेदं न कदाचिद्विकल्पयेत् ।
इति येषां हृदि सदा पूज्या विप्रा यतीश्वराः ॥
द्वादशान्यांस्तथा कुम्भान् पूर्णान् शुद्धेन वारिणा ।
स्नापयेद्देवपर्य्यङ्कोपरितः शुभचेतसा ॥
द्वादशैव तथा गावः सवत्साः कांस्यदोहनाः ।
क्षीरवत्यः सुशीलाश्च स्थापयेद्देवसन्निधौ ॥
अथवा वित्तवैकल्ये कुर्य्यात् गोचितशक्तः ।
दद्यात्तु सम्यक् भक्ताय तत्राशक्तिमतः सतः ॥
एकाप्युत्तमगुणा तस्य सा द्वादशाधिका ।

---

* स्थापनमन्त्र इति पुस्तकान्तरे पाठः ।

स्ववित्तशक्त्या यत्किञ्चिद्दातुमुत्सहते नरः॥
तत्सर्व्वं द्विजदेवाभ्यां सन्निधौ सम्प्रकल्पयेत्।
उपस्कराणि दानानि छत्रोपानत्प्रपादुकाः॥
गोसङ्ख्यादिकृतं सर्व्वं दानं तस्मिन् प्रकल्पयेत्।
यदा दानेन गौरेकतल्या शक्तिप्रपूर्व्वकं॥
सा सम्पूर्णा तु कर्त्तव्या वत्सेन सह पूजिता।
स्वर्णशृङ्गीं रौप्यखुरां घण्टाभरणसंयुतां।
तद्वर्णवस्त्रसम्वीतां वस्त्रेन सह पूजयेत्॥
एवं निर्वर्त्य विधिना स्नानपूजादिना समं।
देवब्राह्मणयोर्भक्त्या ततो विप्रान् क्षमापयेत्॥
एतत् गृहाण मे विप्र भार्य्यया सहितः प्रभो।
एतेनावाह्य तं विप्रं तस्मिन् सर्व्वं निवेदयेत्॥
प्रतिग्रहीता दाता च व्रती विष्णुर्य्यथा तथा।
मया दत्तमिदं सर्व्वं गृहाण त्वं द्विजोत्तम॥

दानमन्त्रः।

दाता च विष्णुर्भगवाननन्तः
प्रतिग्रहीता स च एव विष्णुः।
तस्मात्त्वया दत्तमिदं हि सर्व्वं
प्रतिगृहीतञ्च मया शुभाय॥

ब्राह्मणमन्त्रः।

अन्येभ्योऽपि यथा शक्त्या तस्मिन् काले प्रदीयते।
दीनान्धकृपणादिभ्यस्तदक्षयफलं स्मृतम्॥
वित्तशाठ्यं न कुर्व्वीत समग्रफलमाप्नुयात्

इत्यखण्डव्रतस्यैव उद्यापनविधिः स्मृतः॥
कथितस्ते मया वत्स तस्य पुण्यफलं शृणु।

याववज्जगज्जलधिशैलधरादि तावत्
तत् सन्ततिर्भवति पुण्यफलोपभोक्त्री।
तावन्न विष्णुभवनात्परिवर्त्ततेऽसौ
अन्ते लयश्च परमात्मनि याति विष्णौ॥

इत्यखण्डद्वादश्या उद्यापनविधिः।

यतस्तद्दुर्लभं पुण्यं भुक्तिमुक्तिप्रदं नृणां।
नारदेन पुरा प्राप्तं सकाशाच्चक्रपाणिनः॥
नच व्यूहं परं पात्रं* स्वयं देवेन भाषितम्।
तद्वदस्व गुरु त्वं मे कुरुष्वानुग्रहं मयि॥

मार्कण्डेयउवाच।

श्वेतद्वीपस्थितो विष्णुः पुरा देवसुरर्षिणा।
आराधितो हरिर्भक्त्या वर्षाणां कोटयस्तु षट्॥
प्रसन्नस्तस्य देवर्षेः शङ्खचक्रगदाधरः।
प्रादुर्भूत्वाब्रवीद्वाक्यं नारदं मुनिसत्तमं॥
ब्रूहि नारद देवर्षे वरदोऽस्मि तवानघ।
मत्सकाशाद्वरो यस्ते चिरात्समभिकाङ्क्षितः॥

नारद उवाच।

वेदशास्त्राणि वेदाङ्गधर्म्मशास्त्राणि वा प्रभो।
अधीतानि मया सम्यक् सकाशात्पद्मयोनितः॥

---

* च व्यूहकरमाप्तमिति पुस्तकान्तरे पाठः।

न श्रुतं हि मया देवपूजने नैतदुत्तमं ।
तत्स्थानाच्च समुद्धारं अज्ञानाच्च तथार्चनम् ॥
यज्ञं च विभवं यच्च भुक्तिमुक्ति फलप्रदम् ।
यदि तेऽस्ति दया देव कथय मे तद्वद प्रभो ॥
श्रीभगवानुवाच ।
आदौ तु मण्डपं वक्ष्ये शृणुष्वैकमना मुने ।
यत् प्रविश्य नरोयाति तत् स्थानं परमं मम ॥
कस्यचित् शुक्लपक्षः स्यादेकादश्यामुपोषितः ।
पुष्यश्चलग्नसंयोगे यज्ञं कुर्व्वीत वैष्णवं ॥
फाल्गुनाषाढशुक्लायां कार्त्तिक्यां ग्रहणेऽपि वा ।
एकादश्याञ्च सङ्क्रान्त्यौ कर्त्तव्यं यजनं मम ॥
यथा चोपनतं शिष्यं श्रद्दधानं जितेन्द्रियम् ।
सर्व्वसत्वहितं विप्रभक्तं च सुपरीक्षितम् ॥
यज्ञस्तदैव कर्त्तव्यो भुक्तिमुक्तिप्रदायकः ।
शैवाय चलचित्ताय हिंसकायाजितात्मने ॥
मम यज्ञो न दातव्यो प्रार्थमानस्य कस्यचित् ।
परीक्ष्य भूमिं सगुणां यज्ञार्थं प्रागुदक्प्लवां ॥
मन्त्रयेत् प्रथमं तस्यास्ततः कुर्व्वीत मण्डप ।
अङ्गारतुषकेशास्थिवल्मीककृमिसङ्कुलाम् ॥
सशल्यामूषरां भूमिं यत्नेन परिवर्ज्जयेत् ।
नीलां पीतां तथा रक्तां कृष्णवर्णां हि सन्त्यजेत् ॥
आचार्य्यो वैष्णवो यज्ञं कर्त्तुमर्हति योगवित् ।
अन्यदर्शनसंलीनं शूद्रं सङ्करजं शठं ।

अकार्य्यकारिणः सर्व्वानाचार्य्यान् दूरतस्त्यजेत् ॥
ततः प्रवर्त्तयेत् सम्यक् मण्डपं मुक्तिदायकं।
आचार्य्यः कवचं कृत्वा वैष्णवन्त्वभयप्रदं ॥
प्रतिमायां कृतौ पूर्वं चतुःकोणपुरं लिखेत्।
द्वारैश्चतुर्भिः संयुतं समरेखाङ्कितं शुभं॥
तस्य मध्ये स्थितं पद्ममष्टपत्रन्तु वर्त्तुलं।
पीता सौवर्णिका तस्य रक्तकेसररञ्जिता॥
पुरद्वाराणि शुक्लानि कोणान् रक्तेन रञ्जयेत्।
चतुरो विन्यसेच्छङ्खान् कृष्णान् पद्मस्य कोणगान्॥
पूरयेद्रक्तपुष्पैस्तु अन्तरं पुरपद्मयोः।
आयुधानि दिगीशानां विलिखेद्वाह्यतः पुमान्* ॥
वज्रं शक्तिं तथा दण्डं खड्गं पाशं ध्वजं गदां।
शूलञ्चेति दिगीशानां स्वासु दिक्षु विनिर्द्दिशेत्॥
वर्णादि विन्यसेत्तत्त्वं वासुदेवाख्यमव्ययं।
शुद्धस्फटिकसङ्काशं कर्णिकायां महाप्रभुं॥
पूर्व्वोक्तानन्तरे वर्णं रक्तं पूर्व्वदले स्थितं।
तत्त्वं सङ्कर्षणञ्चैव सर्व्वलोकेषु पूजितं॥
आद्यं विन्दुसमायुक्तं विशुद्धकनकप्रभं।
आग्नेये तु दले तत्त्व प्राद्युम्नन्तु विनिर्द्दिशेत्॥
सविसर्गं तथैवाद्यं भिन्नाञ्जनसमन्वितम्।
स्ववर्णात् सप्तमं वर्णं याम्ये विन्दु विभूषितम्॥
तत्त्वं नारायणाख्यन्तु न्यसेन्नैरृतिदिग्दले।

---

* बाह्यतः पुरादिति पुस्तकान्तरे पाठः।

सर्व्वं ब्रह्ममयं तत्त्वं रत्नाख्यं कुसुमप्रभम्।
ईशाने च दले पूज्यं वामनं तत्त्वमव्ययं॥
आकाराणि नवैतानि नमोन्तानि तपोधन।
ख्यातानि नवतत्वानि नवव्यूहेति शब्दितं॥
अङ्गानि चास्य मुख्यानि नवव्यूहस्य सत्तम।
वाहनान्यायुधानाञ्च सम्यग्भोगं यथादिशेत्॥
वैनतेयं गरुत्मन्तं पक्षिराजमनुत्तमं।
मण्डपस्य न्यसेद्द्वारि पूर्व्वञ्चैव तथापरे॥
तं थं रं हुं फड़िति चक्रं त्रैलोक्यवन्दितं।
सुदर्शनमहावीरं न्यसेत्पीठस्य दक्षिणे।
खं धं फं यं क्षं गदां देवी मं शं शक्तिं सुदुर्ज्जयां॥
उत्तरे तु न्यसेद्द्वारि पूर्व्वञ्चैव तथा परे।
बलवन्तं* महाशङ्खं मृणालरजतप्रभम्।
पीठस्य पश्चिमे भागे पाञ्चजन्यं विनिर्द्दिशेत्॥
पद्महस्तां श्रियं देवीं स्वाकारां पद्मभूषितां।
वामे चैनां पराकान्तिं न्यसेत्पीठस्य दक्षिणे॥
मण्डपञ्च चतुःषष्टिसत्ववीर्य्यबलप्रदं।
गणेशं शाश्वतीच्छायां न्यसेत्पीठस्य चोत्तरे॥
वर्व्वणोत्तमामालाञ्च भूषणाय ममोत्तमा।
पीठस्य पश्चिमे भागे न्यसेच्च ममसन्निधौ॥
क्षतं क्षमं ववं रक्षं कौस्तुभं भूषणं मम।
पश्चिमे विन्यसेत्तत्र पश्चिमे मुनिसत्तम॥

---

* वं ल स क्षमिति पाठान्तरं।

तं मं यं शं महाभोगं फणामणिविभूषणं ।
आधारः सर्व्वलोकानां तमप्यस्य विनिर्द्दिशेत्
नवैतानि ममाङ्गानि साकाराणि यथाक्रमम् ।
पीठमध्येऽर्च्चयेत्सम्यक् बहिः पद्मस्य सत्तम ॥
नवव्यूहं तथाङ्गानि परिकल्प्य यथा पुरा* ।
उपरिष्टाद्वितानन्तु पताकाभिरलङ्कृतम् ॥
दर्पणौ पुष्पमालाभिर्यथाशोभं विभूषितौ ।
एवमभ्यर्च्च मान्तत्र आचार्य्यः शिष्यसंवृतः ॥
अग्निकुण्डं ततो गच्छेत् प्रदीप्तं दक्षिणान्वितम् ।
निविश्य सामतः शिष्यान् पूजयित्वा हुताशनम् ॥
जुहुयान्मूलमन्त्रेण तिलान् व्रीहिघृतप्लुतान् ।
लक्षमष्टोत्तरं हुत्वा सहस्रं शतमेव च ॥
शिष्याणां कायशुद्ध्यर्थं समयं वैष्णवं मुने ।
नवव्यूहस्य मूर्त्तानामङ्गानाञ्च यथाक्रमम् ॥
शतं शतं तु सर्व्वेषां हुत्वा चाष्टोत्तरं पृथक् ।
हुत्वा लक्षं सहस्रं वा अष्टधा तु विधानतः ॥
ततः पूर्णाहुतिं दद्यात् समाप्तौ च विशेषतः ।
समाप्ते तु महायज्ञे तुष्ट्यर्थं त्रिदिवौकसां ॥
वसोर्द्धारां ततः कुर्य्यात् प्रदीप्ते यज्ञवाटके ।
शङ्खदुन्दुभिनिर्घोषैर्मृदङ्गपणवस्वनैः ॥
कर्त्तव्याख्यानकुशलैः मनुजैर्जागरं निशि ।
समाप्य विधिवद्यज्ञं प्रभूतं धनसञ्चयम् ॥

---

* षडङ्गयाहनमानि तु इति पुस्तकान्तरे पाठः ।

ततोऽनुपूजयेद्भक्त्या गुरुं दीक्षाप्रदायकम्।
यः प्रकाशयते ज्ञानं निष्कलं विपुलं धनम्॥
स गुरुर्व्वन्दनीयो हि यथैवाहं तथा मुने।
दीक्षां प्राप्य गुरोः सम्यक् ज्ञानं वा मत्प्रकाशकम्॥
गुरुं न प्रणमेद्यस्तु स पापो नरकं व्रजेत्।
अतः प्रणम्य शिरसा दद्याच्च गुरुदक्षिणां॥
भू-गाश्चैव काञ्चनं धान्यवस्त्राण्याभरणानि च।
निवेद्य गुरवे सर्व्वमात्मानं विभवं गृहम्॥
तथा मिथः प्रकुर्व्वीत यथा सुप्रीतये गुरोः।
परितुष्टे गुरुस्तस्य तुष्टोऽहं नात्र संशयः॥
विमानिते भृशं क्रुद्धे गुरौ वाहं विमानितः।
ततो धान्यानि भूगावौ भक्ष्य,भोज्य.मवारितम्॥
चतुर्थस्याश्रमेभ्यश्च शक्त्या देयं प्रियम्वद।
यः कारयति मे यज्ञं यो विद्याद्भक्तिमान्नरः॥
यः पश्यति विशुद्धात्मा स याति भवनं मम।
इमं यज्ञं महापुण्यं महापातकनाशनम्॥
नवव्यूहञ्च ते पुत्त्र प्रोक्तं संसारमुक्तिदम्।
आधानं यो नवव्यूहं यज्ञे यस्मिन प्रविश्य तु॥
विशुद्धो जन्मदुःखौघाल्लीयते मयि मानवः।

मार्कण्डेय उवाच।

इति गुह्यतमं ज्ञानं नवव्यूहं कपिञ्जल।
भाषितं वासुदेवेन नारदाय महात्मने॥
ते नराः पशवो लोके किं तेषां जीवितैः फलम्।

येर्लब्धा न हरेर्दीक्षा नार्च्चितो वा जनार्द्दनः॥
संसारेऽस्मिन्महाघोरे जन्मरोगभयाकुले।
स एवैको महाभागः पूजयेद्यो जनार्द्दनम्॥
स एवैकः कृती लोके कुलं तेनाप्यलङ्कृतम्।
आधारः सर्व्वलोकानां येन विष्णुः प्रसादितः॥
इति विष्णोर्म्महायज्ञं ये कुर्व्वन्ति नरा भुवि।
ते यान्ति शाश्वतं विष्णोरानन्दम्परमं पदम्॥

इति विष्णुधर्म्मोत्तरोक्तं नवव्यूहार्च्चनं।

———ooo———

स्कन्द उवाच।

विष्णुं वैकुण्ठमासीनन्देवदेवं जनार्द्दनम्।
प्रणम्य शिरसा भक्त्या प्रह्लादो दैत्यसत्तमः॥
वासुदेव जगन्नाथ भक्तानामभयप्रद।
अहं हि मनुजैः पृष्टो लोकानाञ्च शुभाशुभम्॥
शुभगा मनुजाश्चैव केचिद्देवेश दुर्भगाः।
भवन्ति कर्म्मणा केन सुरूपा रूपवर्ज्जिताः॥
तैस्तु सर्व्वैरहं पृष्टो न जानामि जनार्द्दन।
प्रणम्य शिरसा भक्त्या प्रह्लादो दैत्यसत्तमः॥
वासुदेव जगन्नाथ भक्तानामभयप्रद।
आपृष्टवान् जनान् सर्व्वान् आगतोस्मि तवान्तिकम्॥
एवं सर्व्वं ततो मह्यं जनानां मम चैव हि।

श्रीभगवानुवाच।

पुरा कृतयुगे तात न तेजोऽभत हुताशने।

ब्राह्मणस्य च शापेन तनुस्तस्य विरूपिता ॥
ततो देवगणाः सर्वे ऋषिभिः किन्नरैः सह।
तेन दुःखेन सन्तप्ता ब्रह्माणं शरणं ययुः ॥

देवा ऊचुः।

देवदेव जगत्कर्त्ता लोकानां प्रपितामह।
हुतभुक् द्विजशापेन नच यज्ञेषु हूयते ॥

ब्रह्मोवाच।

आसीत्पुरा व्रतं गोप्यन्तिलदाहीति संज्ञकम्।
तेन व्रतेन देवेन्द्र प्रेरयध्वं हुताशनम् ॥
व्रतस्यास्य प्रभावेण पावको हीष्यतेऽध्वरेः।
तथेति चोक्ता देवास्ते व्रतमग्निमकारयन् ॥
तदा प्रभृतियज्ञेषु हूयते च यथा पुरा।
लोकपालेषु वैशित्वं दत्तञ्च ब्रह्मणा स्वयम् ॥
तिलदाही तथाप्येकाप्रसिद्धा दिवि दैवतैः।
तथा त्वमपि दैत्येन्द्र गच्छ शीघ्रं जनान् प्रति ॥

प्रह्लादउवाच।

विधिना केन कर्त्तव्यं तिलदाही व्रतोत्तमम्।
कस्मिन्मासे तिथौ चैव विधिना केन तद्भवेत् ॥

श्रीभगवानुवाच।

पौषमासेषु या कृष्णतिथि रेकादशी शुभा।
तामुपोष्य तदा स्नानं कृत्वा नारायणं जपेत्* ॥

* यजेदिति पुस्तकान्तरे पाठः।

पुष्यर्क्षेण तु संगृह्य गोमयेन तु पिण्डकान् ।
कारयेत्तिलसंयुक्तान् ध्यायेद्देवं जनार्द्दनम् ॥
होमं कुर्य्याद्यथा शक्त्या मन्त्रैरागमसम्भवैः ।
मण्डलं कारयेद्विष्णोः कुम्भान् स्थाप्य चतुर्द्दिशम् ॥
सप्तधान्यमुदीच्यास्तु वस्त्राणि च फलानि च ।
तिलप्रस्थोपरि देवं सश्रियं स्वर्णसम्भवम् ॥
नारायणं न्यसेत् पादौ जानुभ्यां विष्णुरूपिणम् ।
ऊर्वोस्त्रिविक्रमञ्चैव मेढ्रे त्रैलोक्यरूपकम् ॥
कट्यास्तु श्रीधरं देवं पद्माख्यं नाभिमण्डले ।
उदरे* नरसिंहञ्च वैकुण्ठं कण्ठमण्डले ॥
सर्व्वसाधारणं बाह्वोर्म्मुखे विज्ञानविग्रहम् ।
नेत्रे संसारदीपञ्च सर्वात्मानं शिरस्तथा ॥
एवं न्यासविधिं कृत्वा मन्त्रमुर्त्तिं प्रकल्पयेत् ।
कृत्वा पूजां यथा योगं ततो ह्यर्घ्यं प्रपूजयेत् ॥
फलरत्नसमायुक्तं पुष्पधूपादिधूपितम् ।
मन्त्रेणानेन दैत्येन्द्र ततोऽहन्तोषमावहम् ॥
कृष्ण कृष्ण कृपालुस्त्वं सर्व्वाघौघविनाशन ।
देहि मे रूपसौभाग्यं स्वर्गं मोक्षं च देहि मे ॥
तिलदाह्नीति ये केचित् व्रतं कुर्व्वन्ति मानवाः ।
वरदोऽहं सदा तेषां ददामि विपुलां श्रियम् ॥
एवं संश्रुत्य दैत्येन्द्रो नमस्कृत्य जनार्द्दनम् ।
आगतो यत्र सम्मर्द्दं जनानां संस्थितो भुवि ॥

---

* हृदये इति पुस्तकान्तरे पाठः ।

लोका ऊचुः ।

ब्रूहि दैत्येन्द्र यद्वत्तं कथितं चक्रपाणिना ।
त्वया पृष्टेन लोकानां हितायाग्रे तथाखिह ॥

प्रह्लाद उवाच ।

अहो जना युष्मदर्थे गतोऽहं यत्र केशवः ।
मम दुःखतरं घोरं मर्द्दितं चक्रपाणिना ॥
यथोपदिष्टं देवेन निर्णयं कथयाम्यहम् ।
सविस्तरं ततो लोके व्याख्यानं दानवेन वै ॥
व्रतस्यास्य प्रभावेण पुरुषत्वं प्रजायते ।
अजरा जायते तत्र न च दुःखं प्रपश्यति ॥
मनोरथाः सुसम्पूर्णाः पुत्रपौत्रसमन्विताः ।
अवैधव्यं सदा स्त्रीषु सतीत्वं जायते जने ॥
भर्त्रा सह तथैकत्वं सुनिर्व्वाणं समृच्छति ।
पूर्व्वं तावत् क्रतं शच्या इन्द्रपत्न्या सुशीलया ॥
अनुसूयारुन्धतीभ्यां सीतया च क्रतं तथा ।
द्रौपद्यैतद्व्रतं सर्व्वं यावज्जीवमनुष्ठितम् ॥
सुखमारोग्यमैश्वर्य्यं रूपसौभाग्यबुद्धिदम् ।
सन्ध्यया संस्तुतं सर्व्वं पाञ्चाल्या यदनुष्ठितम् ॥
तत्सर्व्वं साथ पप्रच्छ विष्णुपत्नी यशस्विनी ।
तिलदाहीव्रतं भद्रे ब्रूहि त्वं सखि सुव्रते ॥
विधिमुद्यापनंचैव कथयस्व यथातथम् ।
द्रौपदी कथयामास व्रतस्यास्य विधिक्रमम् ॥
पौषे मासे तु या कृष्णा तिथिरेकादशी तथा ।

तामुपोष्य ततः स्नानं विधिपूर्व्वं समाचरेत् ॥
मौनं सङ्कल्प सञ्चिन्त्य पुराणपुरुषोत्तमं ।
ततः पूजा विधातव्या मन्त्रैः स्वागमसम्भवैः ॥
अर्घ्यं दत्त्वा विधानेन स्तुतिं कुर्य्यात् पुनः पुनः ।
उद्यापनविधिं वच्मि शृणुष्वैकमनाः सति ॥
तिलप्रस्थोपरि देवं सश्रियं सुवर्णसम्भवम् ।
पूजयेन्मण्डलं पश्चाद्वस्त्रैराभरणैः फलैः ॥
कुम्भाः सवस्त्राः कर्त्तव्याश्चत्वारो मण्डपाद्वहिः
सप्तधान्यमुदीच्यान्तु प्राच्यं होमं नु कारयेत् ॥
आचार्य्यं सकलत्रञ्च वार्चयेत् कुसुमादिभिः ।
वस्त्रैराभरणैः पुष्पैः फलैर्नानाविधोत्तमैः ॥
एवं यः कुरुते भद्रे नारी वा पुरुषोऽपि वा ।
वर्षे वर्षे तु सुश्रोणि गाञ्च दद्यात् सदक्षिणां ॥
तिलदाहीव्रतं सम्यक् ये प्रकुर्व्वन्ति मानवाः ।
तेषां सौभाग्यमतुलं सुन्दराङ्गः प्रजायते ॥
एतद्व्रतं सविस्तारमुद्यापनसमन्वितम् ।
यः करोति सदा भक्त्या स वैष्णवपुरं व्रजेत् ॥
एवं यः कुरुते भद्रे नारी वा पुरुषोऽपि वा ।
सर्व्वकामसमृद्धं तु परं पदमवाप्नुयात् ॥

इति स्कन्दपुराणोक्तं तिलदाहीव्रतम् ।

——ooo——

मैत्रेय उवाच।

विधानं शृणु राजेन्द्र यथा दृष्टं मनीषिभिः।
यथोक्तं नियमं कुर्य्यादेकादश्यामुपोषितः॥
दन्तकाष्ठं प्रगृह्यादौ वाग्यतो नियतेन्द्रियः।
श्रवणद्वादशीयोगे समुपोष्य जनार्द्दनम्॥
अर्च्चयित्वा विधानेन अहं भोक्ष्ये परेऽहनि।
नदीनां सङ्गमे स्नायादर्च्चयेत् यत्र वा मनः॥
सौवर्णं रत्नसंयुक्तं द्वादशाङ्गुलमुच्छ्रितम्।
पीतवस्त्रैः शुभैर्वेष्ट्य भृङ्गारं निर्व्रणं नवम्।
हिरण्मयेन पात्रेण मर्घ्यपात्रं प्रकल्पयेत्॥
दध्यक्षतफलैश्चैव सहिरण्यं सचन्दनम्।
नमस्ते पद्मनाभाय नमस्ते जलशायिने॥
तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे।
नमः कमलकिञ्जल्कपीतनिर्म्मलवाससे॥
महाहवरिपुस्कन्ध* घृतचक्राय चक्रिणे।
नमः शार्ङ्गासिशङ्खाब्जपाणये वामनाय च॥
यज्ञाय यज्ञेश्वराय यज्ञोपकरणाय च।
यज्ञभुक् फलदात्रे च वामनाय नमोनमः॥
देवेश्वराय देवाय देवसम्भूतिकारिणे।
प्रभवे सर्व्वदेवानां वामनाय नमोनमः॥
मत्स्य,कूर्म्म,वराहाय नरसिंहस्वरूपिणे।
रामरामभिरामाय वामनाय नमोनमः॥

---

* महाहव रिपुस्कन्द इति पुस्तकान्तरे पाठः।

श्रीधराय नमस्तुभ्यं नमस्ते गरुड़ध्वज।
चतुर्व्वाहो नमस्तेस्तु नमस्ते धरणीधर॥
एवं पूज्य विधानेन नरः स्रक्चन्दनादिभिः।
रात्रौ जागरणं कुर्य्यात् पुरतो जलशायिनः* ॥
धृत्वा जलमयं रूपं देवदेवस्य चक्रिणः।
ब्रह्माण्डमुदरे यस्य महद्भूतैरधिष्ठितं॥
मायावी वामनः श्रीशः सोऽत्रायातु जगत्पतिः।
एवं सम्पूजयित्वा तु द्वादश्यामुदये रवेः॥
भृङ्गारसहितं† वस्त्रं सम्बत्सरं प्रपूजयेत्।
वामनः प्रतिगृह्णातु वामनोऽहं ददामि तम्॥
वामनं सर्व्वतोभद्रं विजयार्थं निवेदयेत्॥
जलधेनुं तथा दद्याच्छत्रं चैव तु पादुकं।
सहिरण्यानि वस्त्राणि धेनुं वानडुहं नृप॥
यत्किञ्चिद्दीयते तत्र तदानन्त्याय कल्पते।
श्रवणद्वादशीयोगे सम्पूज्य गरुड़ध्वजम्॥
दत्त्वा दानं द्विजातिभ्यो वियोगे पारणं ततः।
सिंहस्थिते तु मार्तण्डे श्रवणस्थे निशाकरे।
श्रवणद्वादशी ज्ञेया न स्याद्भाद्रपदादृते॥
दशम्येकादशी यत्र सानुपोष्या भवेत्तिथिः।
श्रवणेन तु संयुता सा शुभा सर्व्वकामदा॥
श्रवणेन युक्ता या दशमी साप्युपोष्येत्यर्थः।

---

* सुरभ इति पुस्तकान्तरे पाठः।

† भृङ्गारं देवसहितमिति पुस्तकान्तरे पाठः।

पारणं तिथिवृद्धौ तु द्वादश्यामुडुसंचयात् ॥
वृद्धौ कुर्य्यात्त्रयोदश्यां तत्र दोषो न विद्यते।

द्वादशीतौल्ये नक्षत्रे द्वादश्यां पारणं अधिके त्रयोदश्यामित्यर्थः।

इत्येषा कथिता राजन् द्वादश्यां श्रवणे तथा।
कर्त्तव्या सा प्रयत्नेन इहामुत्रफलप्रदा ॥

इत्यग्निपुराणे विजयद्वादशीव्रतं।

—:○:—

कृष्ण उवाच।

द्वादश्यास्तु विधिः प्रोक्तः श्रवणेन युधिष्ठिर।
सर्व्वपापप्रशमनः सर्व्वसौख्यप्रदायकः ॥
एकादशी यदा शुक्ला श्रवणेन समन्विता।
विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा ॥
पुरा देवगणैः सर्व्वैः समवेतैर्व्वरार्थिभिः।
नारदः प्रार्थितो विष्णुश्चन्द्राग्न्यनिलसंयुतः ॥
बलवान् विजितो दैत्योबलिर्नामा महाबलः।
तेन देवगणाः सर्व्वे त्याजिताः सुरमन्दिरम् ॥
त्वं गतिः सर्व्वदेवानां शीघ्रमस्माकमुद्धर।
जहि दैत्यं महाबाहो बलिं बलवताम्बरम् ॥
श्रुत्वा विष्णुस्तदा वाक्यं देवानां करुणोदयं।
उवाच वाक्यं वाक्यज्ञो देवानां हितकाम्यया ॥
जानामि विरोचनेः पुत्रं बलिंत्रैलोक्यकण्टकं।
तपसा भावितात्मानं शान्तं दान्तं जितेन्द्रियं ॥

महाव्रतं महत्प्राज्ञं सत्यसन्धं महाबलं।
प्रजापतिसमं ख्यात्या प्रजानां प्रियकारकं॥
तद्गुणा नहि शक्यन्ते वक्तुं कैरपि भूतले।
अवश्यं नावसेयोऽतोभोक्तव्यं तपसः फलं॥
तपस्यान्तश्च बहुना कालेनास्य भविष्यति।
अथ काले बहुतिथे सादितिर्गुर्व्विणी भवेत्॥
सुषुवे नवमे मासि पुत्रं बालाकृतिं हरिं।
ह्रस्वपादं ह्रस्वकायं महाशिरसमर्भकं॥
पाणिपादोदरकृशमूरुकन्धरकद्वयम्।
दृष्ट्वा सुवामनं जातमदितिश्चकितं मनः॥ *
भयं बभूव दैत्यानां देवानां तोषमाबभौ।
जातकर्म्मादिकस्तस्य संस्कारः स्वयमेव हि॥
चक्रे च कश्यपो धीमान् प्रजापतिसमन्वितः
आयद्धमेखली दण्डी यतिर्यज्ञोपवीतिनां॥
कुशचर्म्माजिनधरः कमण्डलुविभूषितः।
बलेर्व्वलवतो यज्ञं जगाम बहुविस्तरं॥
दृष्ट्वा बलिं तु यज्वानं वामनो† ऽभ्येत्य तत्क्षणम्
अर्थं नाहं यज्ञपते दीयतां मम मेदिनी।
पदत्रयप्रमाणेन पठनार्थं स्थितोह्यसि॥
दत्ता दत्तास्तु च मया‡ बलिःप्राह द्विजोत्तमं।

---

* मदिति मणोमम्म किन्नमे इति पुस्तकान्तरे पाठः।

† मभ्यीषे ववामत इति पुस्तकान्तरे पाठः।

‡ स्तवमथेमि पुस्तकान्तरे पाठः।

74—2

ततोवर्द्धितुमारब्धं वामनोऽनन्तविक्रमः॥
पादौ भूमौ प्रतिष्ठाप्य शिरसाहृत्य रोदसी।
नाभ्यामिन्द्रादिकान् लोकान् ललाटे ब्रह्मणः पदम्॥
न हृतीयं पदं लेभे ततो नेदुर्दिवौकसः।
तं दृष्ट्वा महदाश्चर्य्यं सिद्धाद्या ऋषयस्तथा॥
साधुसाध्विति देवेशं प्रशशंसुर्मुदान्विताः।
ततो दैत्यगणाः सर्व्वे जित्वा त्रिभुवनं वशी॥
वलिमाहाध्यधोगच्छ सुखं सवलवाहनः*।
तत्र त्वमीप्सितान् भोगान् भुङ्क्ता मद्बाहुपालितः॥
अस्येन्द्रस्यावसाने तु त्वमेवेन्द्रो भविष्यसि।
एवमुक्तो वलिः प्रायान्नमस्कृत्य नरोत्तमं।
विसर्ज्यायं वलिं देवलोकपालानुवाच ह†
स्वानि धिष्ण्यानि गच्छध्वन्तिष्ठध्वं विगतज्वराः।
देवेनोक्ता गता देवाः प्रहृष्टा पूज्य वामनं।
एवमुक्त्वा‡ जगत्कर्त्ता तत्रैवान्तरधीयत॥
एतत्सर्व्वं समभवदेकादश्यां नराधिप।
तेनेष्टा देवदेवस्य सर्व्वथा विजयान्वितः॥
एषैव, फाल्गुने मासि पुष्येण सहिता नृप।
विजया प्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा॥
एषैवेति शुक्लपक्षैकादशी परामृष्यते।

---

* वलिमाहद्रौगच्छ सूत्तं स्ववलानुग इति पुस्तकान्तरे पाठः।

† कपिलापातुवाहवा इति पुस्तकान्तरे पाठः।

‡ एवं छत्वेति पुस्तकान्तरे पाठः।

एकादश्यां सोपवासो रात्रौ संपूजयेद्धरिं ।
रौप्यसौवर्णपात्रे वा दारुवंशमयेऽपि वा ॥
आच्छाद्य पात्रं वासोभिरहतैः फलसंयुतैः ।
मार्गचर्म्मणि गव्येथ भक्त्या वा शक्त्यपेक्षया ॥
तिलाढ़केन वित्ताढैः प्रस्थेन कुड़मेव वा ।
अलाभे यवगोधूमैः फलैः शुक्लतिलैर्भवेत् ।
पुष्पैर्गन्धैः फलैर्धूपैः कालोत्थैरर्च्चयेद्धरिं ॥
नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडोदनैः ।
स्ववित्तमनुसारेण सहिरण्यञ्च कारयेत् ॥
मन्त्रवते शतगुणं* भक्त्या लक्षगुणोत्तरम् ।
भक्तिमन्त्रगुणोपेतं† कोटिकोटिगुणोत्तरम् ॥
एभिर्म्मन्त्रपदैस्तत्र पूजयेद्गरुड़ध्वजम् ।
उपहारैर्नरश्रेष्ठ शुचिर्भूत्वा समाहितः ॥
ओं जलोपमदेहाय जलजास्याय शङ्खिने ।
जलराशिस्वरूपाय नमस्ते पुरुषोत्तम ॥
नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोस्तु ते ॥

स्नानमन्त्रः ।

मलयेषु समुत्पन्नं गन्धाढ्यं सुमनोहरं ।
मया निवेदितं तुभ्यं गृहाण परमेश्वर ॥

चन्दनमन्त्रः ।

---

* मन्त्राच्छतगुणमिति पुस्तकान्तरे पाठः ।

† भक्तिमन्त्रसमेतन्तु इति पुस्तकान्तरे पाठः ।

वनस्पतिसमुत्पन्नं गन्धाढ्यं सुमनोहरम्।
मया निवेदितं पुष्पं गृहाण पुरुषोत्तम॥

पुष्पमन्त्रः।

नमः कमलकिञ्जल्क पीतनिर्म्मलवाससे।
महाहवे रिपुस्कन्धघृष्टचक्राय चक्रिणे॥

पूजामन्त्रः।

मत्स्यकुर्म्मवराहञ्च नारसिंहञ्च वामनम्।
रामं रामञ्च कृष्णञ्च अर्च्चयामि नमोनमः*॥

अर्च्चनमन्त्रः।

पादाद्येकास्य पूजनं शीर्षमतः सर्व्वाङ्गपूजा।
धूपोऽयं देवदेवेश शङ्खचक्रगदाधर।
अच्युतानन्द गोविन्द वासुदेव नमोस्तु ते॥

धूपमन्त्रः।

त्वमेव पृथिवी ज्योतिर्वायुराकाशमेव च।
त्वमेव ज्योतिषां ज्योतिर्दीपोऽयं प्रतिगृह्यतां।

दीपमन्त्रः।

अन्नञ्चतुर्व्विधं स्वादु रसैः षड्भिः समन्वितम्।
मया निवेदितं देव प्रसीद परमेश्वर॥
अग्निर्य्यमो वैश्रवणः पापं मे हन्तु मेऽव्ययम्॥

नैवेद्यमन्त्रः।

जगदादिर्जगद्रूपोह्यनादिर्जगदन्तकृत्।

---

* नामभिर्व्वामनाद्यैरिति पुस्तकान्तरे पाठः।

जलाशयजगद्योनिःप्रीयतां मे जनार्द्दनः ॥

प्रीणनमन्त्रः ।

अनेककर्म्मनिर्व्वन्धध्वंसिनं जलशायिनम् ।
नतोऽस्मि मधुरावासं माधवं मधुसूदनम् ॥
नमो वामनरूपाय नमस्ते स्तु त्रिविक्रम ।
नमस्ते मखिवन्धाय वासुदेव नमोस्तु ते ॥

नमस्कारमन्त्रः ।

नमो नमस्ते गोविन्द वामनेश त्रिविक्रम ।
अघौघसंचयं कृत्वा सर्व्वकामप्रदो भव ॥

प्रार्थना मन्त्रः ।

सर्व्वगः सर्व्वदेवेशः श्रीधरः श्रीनिकेतनः ।
विश्वेश्वराय विष्णुश्च श्रीशायी च नमोनमः ॥

शयनमन्त्रः ।

सर्व्वं संपूजयेद्राजारेकादश्यां नृपोत्तम ।
जागरं तत्र कुर्व्वीत गेयवादित्रनिस्वनैः ॥
याश्चैव श्रवणे युक्ता द्वादशी परमा तिथिः ।
तस्याहं सङ्गमे स्नात्वा सर्व्वपापैः प्रमुच्यते ।
एवं स नियमङ्कृत्वा प्रभाते विमले सति ॥
प्रदेयः शास्त्रविद्दूषि ब्राह्मणे मन्त्रतोनृप ।
ब्राह्मणश्चापि मन्त्रेण प्रतिगृह्णीत मन्त्रवित् ॥
वामनो बुद्धिदो दाता द्रव्यस्थोवामनःस्वयम् ।
वामनस्य प्रतिग्राही वामनाय नमस्तु ते ॥

ओँ गुह्यं। ओँ शिरसि। पुष्पफलनैवेद्यं सर्व्वमेतदर्च्चन विधिना दद्यात्।

एवमुपोष्य विधिवद्देकादश्यां समन्त्रकं।
पूर्व्वोक्तविधिना चैव प्रतिपच्चोभयङ्करः॥
हस्त्यश्वरथजातीनां दाता भोक्ता विमत्सरी।
रूपसौभाग्यसंपन्नो दीर्घायुर्न्निर्जितो भवेत्॥
पुत्रैः परिवृतो जीवो जीवेच्च शरदः शतम्।
एषा व्युष्टिः समाख्याता एकादश्यां मया तव॥
पूर्व्वमेव समाख्याता द्वादशी श्रवणान्विता।
उपोष्यैकादशीं पश्चाद्द्वादशीमप्युपोषयेत्॥
नचात्र विधिलोपः स्यादुभयोर्द्देवता हरिः॥

एकादशीद्वादशीचान्यतरस्यां वा श्रवणयुक्तायां श्रवणयुक्तोपवासेनैव व्रतद्वयसिद्धिः एकस्मिन् व्रते पूर्व्वमन्यां तिथिमुपोष्य पश्चादपारयित्वा नान्योपोष्या इति यो विधिलोपः स एव दैवतैकत्वे न भवतीत्यर्थः।

बुध श्रवणसंयुक्ता द्वादशी सङ्गमोदकम्।
स्नानं* दध्योदनं सम्यगुपवासः परो विधिः॥
सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना।
एतैश्चान्यैश्च राजेन्द्र कामाच्च द्वादशीव्रतम्॥
सा द्वादशी बुध युता श्रवणेन साकं
स्याज्जायतेतिकथिता ऋषिभिर्नभस्ये।

* दानमिति क्वचित्पाठः।

तामादरेण समुपोष्य नरोऽमरत्व-
माप्नोति पार्थ अणिमादिगुणोपपन्नम् ॥

इति श्रीभविष्योत्तरे विजयद्वादशीश्रवणद्वादशीव्रतं ।

———ooo———

ब्रह्मोवाच ।

एकादश्यां यथोद्दिष्टा विश्वेदेवाः प्रपूजिताः ।
प्रजां पशून् धनं धान्यं प्रयच्छन्ति महीं तथा ॥
मूलमन्त्रः स्वसंज्ञाभिरङ्गमन्त्राः प्रकीर्त्तिताः ।
पूर्व्ववत्पञ्चपत्रस्थः कर्त्तव्यश्च तिथीश्वरः ॥
अत्र तिथिश्वरोविश्वेदेवाः ।
गन्धपुष्पोपहारैश्च यथा शक्ति विधीयते ।
पूजाशाठेरन शाठेरन कृतापि तु फलप्रदा ॥
आज्यधारासमिश्रैश्च दधिचीराम्नमाचिकैः ।
पूर्व्वोक्तफलदो होमः कृतः शान्तेन चेतसा ॥
एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयम् ।

इति भविष्यत्पुराणोक्तं विश्वव्रतम् ।

———o:o———

कृत्वा भूरितरं पापं ज्ञानतोऽज्ञानतोऽपि वा ।
तस्य पापस्य शान्त्यर्थं किं दानं किमथ व्रतम् ॥

ब्रह्मोवाच ।

महाव्रतमिदं वत्स सर्व्वपापप्रणाशनम् ।
कीर्त्तयिष्यामि ते वत्स सुखकीर्त्तिधनप्रदम् ॥

पुष्यर्चेण समायुक्ता शुक्ला वै द्वादशी भवेत्।
सा प्रोक्ता वासुदेवेन सर्व्वपापप्रणाशिनी॥
येऽर्च्चयन्ति नरास्तस्यां भक्त्या देवं जनार्द्दनम।
समुपोष्य विमुच्यन्ते पापैस्ते शतजन्मजैः॥
कर्म्मणा मनसा वाचा यत्पापं समुपार्जितम्।
तत् चालयति गोविन्द तिथौ तस्यां समर्च्चितः॥
स्नानं जपोऽथवा होमः समुद्दिश्य जनार्द्दनम्।
नरैर्य्यत् क्रियते तस्यां तदनन्तफलं भवेत्॥
यस्मान्नाशयते जन्तोः पापं जन्मशतोद्भवम्।
पुष्यर्चैकादशी तस्मात् प्रोक्ता पापप्रणाशिनी॥
एवमेव पुरा प्राह भानुः सारथिनं प्रति।

भानुरुवाच।

द्वादशी या परा ब्रह्म पुष्येणैव च संयुता।
उपोष्या तु प्रयत्नेन द्वादशी पापनाशनी॥
पुष्येण द्वादशीयुक्ता शुक्ला वै फाल्गुनस्य च।
जया सा द्वादशी प्रोक्ता स्वयं वा विष्णुना पुरा॥
तस्यां दत्तं तपस्तप्तं कोटिकोटिगुणोत्तरं।
एकादश्यां निराहारो द्वादश्यां विष्णुमर्च्चयेत्॥
रौप्य-सौवर्ण पात्रे वा दारुवंशमयेऽपि वा।
आच्छाद्य पात्रं वासोभिरहतैः सुपरीच्छितैः॥
मार्गैश्च मेढ़जैश्चैव सिद्धिः स्यात्कृत्यपेचया।
तिलाढ़केन वित्ताढ्यैः प्रस्थेन कूटजेन वा॥
अलाभे चैव गोधूमैः फलं मुख्यं तिलैर्भवेत्।

पुष्पैर्धूपैःफलैर्गन्धैः कालोत्थैरर्च्चयेद्धरिम् ॥
नानाविधैश्च नैवेद्यैर्भक्ष्यैर्भोज्यैर्गुडोदनैः ।
जागरं तत्र कुर्व्वीत गेयवादित्रनिस्वनैः ॥
एवं सनियमस्यास्य प्रभाते विमले सति ।
भक्त्या वा वित्तसारेण सहिरण्यं प्रदापयेत् ॥
समाप्ते तु व्रते ब्रह्मन् यत्पुण्यं तन्निबोध मे ।
चतुर्युगानां विप्रेन्द्र एकसप्तति खेचर ॥
तावद्विष्णुपुरे तत्र क्रीड़ते कालमक्षयम् ।

इत्यादित्यपुराणोक्तं विजयाद्वादशीव्रतम् ।

———000———

पुलस्त्य उवाच ।

एकादश्यां शुक्लपक्षे यदा तु स्यात् पुनर्व्वसुः ।
नाम्ना सा तिजया ख्याता तिथीनामुत्तमा तिथिः ॥
यो ददाति तिलप्रस्थं त्रिकालं वत्सरं नृप ।
उपवासन्तु तस्यां यः करोत्यश्नेत्य तत्समम् ॥
तस्यां जगत्पतिर्देवः सर्व्वलोकेश्वरो हरिः ।
प्रत्यक्षतां प्रयात्यस्मात्तत्रानन्तफलं स्मृतम् ॥
सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना ।
तस्यामाराधितः कृष्णो दत्तवानखिलां भुवम् ॥

इति विष्णुधर्म्मोत्तरोक्तमतिविजयैकादशीव्रतम् ।

———000———

वज्र उवाच ।

केवलं कृष्णपक्षस्य द्वादशीषु जनार्द्दन ।

कदा प्रभृति धर्म्मज्ञ विधिना केन वार्च्चयेत् ॥

मार्कण्डेय उवाच।

माघ्यान्तु समतीतायां* द्वादशी या भवेन्नृप।
ततः प्रभृति कर्त्तव्यं व्रतमेतदुपोषिता ॥
द्वादशीषु च कृष्णासु नाम कृष्णस्य कीर्त्तयेत्।
तेनैव नाम्ना कर्त्तव्यौ जपहोमौ तथैव च ॥
तिलैर्निवेदनं कार्य्यं होमे कार्य्यस्तथा तिलैः।
पौष्यान्तु समतीतायां कृष्णा या द्वादशी भवेत् ॥
तस्यां व्रतावसाने तु तिलान् दद्याद्द्विजातिषु।
सुवर्णञ्च महीपाल रक्तवस्त्रं तथैव च ॥
सम्बत्सरमिदं कृत्वा व्रतं मनुजपुङ्गव।
तिर्य्यग्योनिं नचाप्नोति स्वर्गलोकञ्च गच्छति ॥
यावज्जीवं व्रतमिदं यः करोति समाहितः।
न स दुःखमवाप्नोति नारकं मनुजोत्तम ॥
यत्र वैतरणी दुर्गा क्षुरधारा सपर्व्वता।
पापानां पावना यत्र तत्रासौ न गमिष्यति ॥

यस्या गणा भीमबला महोग्रा
दंष्ट्राकरालाग्रकरोग्रवेषा।
विद्रावणाः पापकृतां नराणां
दृष्टेर्न तस्यानघ यान्ति मार्गम् ॥

इति विष्णुधर्म्मोत्तरोक्तं कृष्णद्वादशीव्रतम्।

——000——

* मघ्यातु समतीतायमिति पुस्तकान्तरे पाठः।

वज्र उवाच।

एकामुपोष्य कृष्णां यां द्वादशीं विधिना नरः।
महाफलमवाप्नोति तन्ममाचक्ष्व भार्गव॥

मार्कण्डेय उवाच।

माध्यास्तु समतीतायां श्रवणेन तु संयुता।
द्वादशी या भवेत् कृष्णा प्रोक्ता सा तिलद्वादशी॥
तिलैः स्नानं तिलैर्होमं नैवेद्यं तिलमोदकैः।
दीपेश्च तिलतैलेन तथा देयं तिलोदकम्॥
तिलाश्च देया विप्रेषु तस्मिन्नहनि पार्थिव।
उपवासदिने राजन् होतव्याश्च तथा तिलाः॥
उपोषितेनापरेऽह्नि होतव्यश्च विशेषतः।
इन्धनञ्च प्रदातव्यं ब्राह्मणेषु तथानघ॥
तिलप्रस्थं तदा हुत्वा सोपवासो जितेन्द्रियः।
न दुर्गतिमवाप्नोति नात्र कार्य्या विचारणा॥
तद्विष्णोः परमं नित्ये होममन्त्रः प्रकीर्त्तितः।
पौरुषञ्च तथासूक्तं श्रीसूक्तेन च संयुतम्॥
होमः कार्य्योऽथ राजेन्द्र सावित्र्या परमात्मनः।
एतत् प्रोक्तं द्विजातीनां स्त्रीशूद्रेषु च यत् शृणु॥
द्वादशाक्षरो मन्त्रो च तेषां प्रोक्तौ महात्मनां।
द्वितौ तौ च द्विजातीनां मन्त्रश्रेष्ठौ नराधिप॥
तेभ्योऽप्यधिक मन्त्रोऽपि विद्यते नहि कुत्रचित्।

वज्र उवाच।

द्वादशाष्टाक्षरौ मन्त्रौ कथयस्व ममानघ।

पुण्यौ: पवित्रौ माङ्गल्यौ सर्व्वपापप्रणाशनौ ॥

मार्कण्डेय उवाच ।

ओं नमो भगवते वासुदेवाय। ओं नमो नारायणाय।

एतौमयावः कथितौ पवित्रौ
मन्त्राविमौ पापहरौ धरण्यां।
परायणौ सर्व्वतपस्विनां वरौ
वरस्य भूतौ भुवनेषु नित्यम् ॥
यथातिथिस्ते श्रवणेन युक्ता
माघस्य मासस्य तथा मयोक्ता।
कार्य्या तथेयं नृपतेर्व्विशेषाद्
योगे पवित्रे सरितान्द्वयस्य ॥

इति विष्णुधर्म्मोक्तं तिलद्वादशीव्रतम्।

———०-०———

एकादशी तथा कृष्णां फाल्गुने मासि भार्गव ।
छन्दोदेवस्य कर्त्तव्यः पूजा धर्म्मभृताम्बर ॥
पूजनाच्छन्ददेवस्य येनायं गुणवर्ज्जितम्* ।
न प्राप्नोति तथा प्रीतिं+ गुणवन्तीं न संशयम् ॥

इति धर्म्मोत्तरोक्तं कृष्णैकादशीव्रतम्।

———000———

* तेन यं गुणवर्जितमिति पुस्तकान्तरे पाठः।

+ न प्राप्नोति तथाप्रीतीति पुस्तकान्तरे पाठः।

एकादशीं तथा प्राप्य चैत्रे शुक्लस्य पूजयेत्।
सम्पूज्य तं महाभागं गृहमङ्गलमश्नुते* ॥
तमिति छन्दोदेवम्।

इति विष्णुधर्म्मोत्तरोक्तमवैधव्यशुक्लैकादशीव्रतम्।

———000———

मार्कण्डेय उवाच।
अङ्गारकं तथा सूर्य्यं निर्ऋतिं वापगेश्वरः।
हवनं वेश्वरं मृत्युं कपालकषकिङ्किणीं ॥
तत्र वैकादशान् यस्तु देवान् त्रिभुवनेश्वरान्।
एकादश्यां सोपवासः सोमं सम्पूजयेत्तथा ॥
गन्धमाल्यनमस्कारदीपधूपान्नसम्पदाः।
मार्गशीर्षाद्यथारभ्य यावत् सम्वत्सरं भवेत् ॥
सम्वत्सरान्ते दद्याच्च ब्राह्मणाय पयस्विनीं।
कृत्वाव्रतं वत्सरमेतदिष्टं
रुद्रत्वमाप्नोति नरस्तु राजन्।
रुद्रेण सार्द्धं सुचिरं वसित्वा
कामानवाप्नोति मनोऽभिरामान् ॥
तथा सर्व्वगतान् रुद्रान् मुदा सर्व्वत्रपूजयेत्।
सर्व्वकामानवाप्नोति सर्व्वगानपराजितान् ॥

इति विष्णुधर्म्मोत्तरोक्तं सर्व्वकामव्रतम्।

———०-०———

* गृहमङ्गलमाप्नुते इति पुस्तकान्तरे पाठः।

सनत्कुमार उवाच।

मासि भाद्रपदे शुक्लपक्षे यदि हरेर्दिनम्।
बुध श्रवणयोगश्च प्राप्यते तत्र पूजितः॥
प्रयच्छति सुतान् कामान् वामनो मनसि स्थितान्।
विजया नाम सा प्रोक्ता तिथिः प्रीतिकरी हरेः॥
सङ्गमः सर्व्वतीर्थानां सङ्गमे तत्र जायते।
शुक्ला भाद्रपदे स्वर्गं क्षपणा कलुषसंचयम्॥
फाल्गुने कुरुते मोक्षं अपि ब्रह्मवधारणम्।
गङ्गायमुनयोः पुण्ये नर्म्मदासरित्सङ्गमे॥
सरस्वत्यरुणयोश्चैव सङ्गमे पापनाशने।
ब्रह्मवल्लीसाभ्रामे समधारेऽथवा द्विज॥
अन्येषु सङ्गमेष्वेव स्वयमायाति वामनः।
तत्र संपूजितोऽथासौ जायते प्रेतमोक्षदः।
दध्योदनसमायुक्तां वारिधानीं प्रदापयेत्॥
पूजय त्वं जगन्नाथं वामनः प्रीयतामिति।
महापुण्यप्रदा ह्येषा सङ्गमे विजया तिथिः॥
सर्व्वपापक्षयो नूनं जायते च उपोषणात्।
गृहीत्वा नियमं प्रातर्गत्वा नद्यादिसङ्गमे॥
सौवर्णं वामनं कृत्वा सौवर्णमाषकेण वा।
यथा शक्त्या तु विन्यस्य कुम्भोपरि जगत्पतिम्॥
पूर्णपात्रे स्नापयित्वा मन्त्रैरेतैः प्रपूजयेत्।
ओं वामनाय नमः पादौ कटिं दामोदराय च।
ऊरू श्रीपतये गुह्यं कामदेवाय पूजयेत्॥

पूजयेत् जगतां पत्युरुदरं विश्वधारिणे ।
हृदये योगिनाथाय कण्ठं श्रीपतये नमः ॥
मुखञ्च पङ्कजस्थाय शिरः सर्व्वात्मने नमः ।
इत्थं संपूज्य वासोभिराच्छाद्य च जगद्गुरुम् ॥
दद्यात्सुश्रद्धया चार्घ्यं नारिकेलादिभिः फलैः ।
ओं नमोनमस्ते गोविन्द बुधश्रवणसंज्ञया ॥
अघौघसंचयं कृत्वा प्रेतमोचप्रदो भव ॥

इत्यर्घ्यमन्त्रः ।

छत्रोपानद्युगं दानं दद्यादन्नं कमण्डलुम् ।
विशेषेण द्विजाग्र्याय वामनः प्रीयतामिति ॥
धेनुदानं प्रशंसन्ति सङ्गमे जगतां पतिम् ।
उद्दिश्य कमलाकान्तं पुण्यनद्यास्तु सङ्गमे ॥
त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ।
आसप्तमं पुनात्येव दोहवानिह वेदनैः ॥
यथाशक्त्या च दानानि द्विजाग्रेभ्यः प्रदापयेत् ।
कुर्य्याज्जागरणं कुर्य्याद्गीतं शास्त्रसमन्वितम् ॥
श्रद्धया परया युक्तोनिशामनिमिषेक्षणः ।
प्रभाते भोजयेद्विप्रान् द्वादश्यां पारणं ततः ॥
कुर्य्यात्त्वयं श्रद्धया च सर्व्वं सफलतां व्रजेत् ।
एवं कृते तु विजयाव्रतेऽस्मिन् वै जयादिने ॥
न दुर्लभतरं किञ्चिदिह लोके परत्र च ।
दुर्लभा विजया नृणां दुर्लभस्तत्र सङ्गमः ॥

सुदुर्लभतरा श्रद्धा तत्र गोविन्दपूजने।
सर्व्वतीर्थैन भूयिष्ठे सङ्गमे याति सङ्गमम्॥
विजयावासरे सर्व्वदेवानां सङ्गमे भुवि।
अपि रम्योदकस्यात्र सङ्गमः पापनाशनः॥
आपगासङ्गमस्यात्र फलं वक्तुं न पार्य्यते।
इदं सर्व्वपुराणेषु रहस्यं परिगीयते॥
सङ्गमे वामनं पूज्य प्रेतोयेन न जायते।
फलमस्य व्रतस्योक्तं देवपितृद्धरोत्तमः॥
वंशोद्धारकरं मुक्तिं याति पैवल्लगणादपि।
न पावनं न तत् किञ्चिदतः परमिहोच्यते॥
विजयाव्रततुल्यं यदपरं परिपद्यते।
वामाम्भि वामनं वारिधानीं धेनुचतुष्टयं॥
दत्वाच सङ्गमे तात याति विष्णोः सलोकतां।
अनृणो जायते मोहादेवानामतिथिक्रिया॥
कुर्व्वन्नेव मनुष्याणां पितॄणां विजयाव्रतात्।
अश्रद्धया कृतं दत्तं तपस्तप्तं कृतञ्च यत्॥
विफलं जायते तावत् न च तत् प्रेत्य नो इह।
श्रद्धा धर्म्मसुता देवी श्रद्धा साधनमुत्तमं॥
श्रद्धामयोऽयं मनुजोयच्छ्रद्धादः स एव सः।
यो योगेन गतिं याति याञ्च सांख्येन योगतः*॥
इष्टापूर्त्तेन यां याति तां कलौ वामनार्च्चनात्।
मुच्यते तस्य पूर्व्वेपि पितृमातामहाः कुले॥

---

* पद्मेति पुस्तकान्तरे पाठः।

प्रेतभावा* न जायन्ते तद्वंशे प्रेतयोनयः ॥
इदं रहस्यं परमं पवित्रं पुराणसंघेषु मुनिप्रणीतं ।
विशेषकार्य्यं विजयाभिधानं वदन्ति सन्तः परमात्मनिष्ठाः ॥

इति ब्रह्मवैवर्त्तोक्तं विजयाद्वादशीव्रतम् ।

———ooo@ooo———

देव्युवाच ।

कथमेतद्व्रतं कार्य्यं वैष्णवं विष्णुवल्लभम् ।
रात्रौ जागरणं कार्य्यं विधिना केन तद्वद ॥

ईश्वर उवाच ।

फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः ।
स्नात्वा नद्यां तड़ागे वा वाप्यां कूपे गृहेपि वा ॥
गत्वा गिरौ वने वापि यत्र सा प्राप्यते शिवा ।
क्षीरोदे मथ्यमाने तु यदा वृक्षः समुत्थितः ॥
आमर्द्दन्दे वदैत्यानां तेन सामलकी स्मृता ।
अस्मिन् वृक्षे स्थिता लक्ष्मीः सदा पितृगृहे नृप ॥
शिवालक्ष्मीस्थितो वृक्षः सेव्यते सुरसत्तमैः ।
देवैर्ब्रह्मादिभिः सर्व्वैर्वृक्षोऽसौवैष्णवः कृतः ॥
तत्र गत्वा हरिः पूज्यो वृक्षमूलेऽथवा शिवा ।
पूज्या पुष्पैः शुभैरात्रौ कार्य्यं जागरणं नरैः ॥
अष्टाधिकशतैः कार्य्या फलैस्तस्याः प्रदक्षिणा ।
प्रदक्षिणीकृत्य ततो भोक्तव्यं तु फलं नरैः ॥

---

* प्रेतयोनाविति पुस्तकान्तरे पाठः ।

करकञ्जलपूर्णन्तु कर्त्तव्यं पात्रसंयुतं ।
हविष्यान्नन्तु कर्त्तव्यं दीपः कार्य्यो विधानतः ॥
एवं जागरणं कार्य्यं यथा श्रवणतत्परैः ।
मुच्यन्ते देहिनः पापैः कलिजैः कायसम्भवैः ॥
देहान्ते ये नराः पूर्व्वं पूजयन्ते हरिमन्दिरं ॥

इति स्कन्दपुराणीयप्रभासखण्डोक्तं आमलकैकादशीव्रतम् ।

———000———

अथ गोदोहमन्त्रैस्तु विधिना केन वै मुने ।
हरिं सम्पूजिता शीघ्रं नराणां स प्रसीदति ॥
क्षीरोदे मथ्यमाने च मुने पूर्व्वं सुरासुरैः ।
यत्र गावः समुत्पन्नाः सर्व्वलोकस्य मातरः ॥
सर्व्वलोकोपकारार्थं देवानां तर्पणाय च ।
यज्ञानां दोहसम्पत्त्यै तथा हरिहरस्य च ॥
गोमयं रोचना क्षीरं मूत्रं दधि घृतं गवां ।
षडङ्गानि पवित्राणि तथा सिद्धिकराणि च ॥
उच्छ्रितौ* बिल्ववृक्षश्च गोमयान्मुनि सत्तम ।
तत्रासौ लभते लक्ष्मीं श्रीवृक्षस्तेन बोध्यते ॥
गोरोचनायां माङ्गल्याः सञ्जाताः सर्व्वकामिकाः ।
गुग्गुलस्तु ततो जातो गोमूत्राच्छुभदर्शनः ॥
यत् किञ्चिज्जगतो वीर्य्यं तत्सर्व्वं क्षीरसम्भवम् ।
दध्नो जातानि सर्व्वाणि मङ्गलार्थस्य सिद्धये ॥

* उतथित इति पुस्तकान्तरेपाठः ।

घृतादमृतसम्भूतिं सुरासुरनिषेवितम् ।
हरिं सुस्नापयेत्तस्मात् पयोदधिघृतैस्तथा ॥
गुग्गुलं निर्हृत्यश्चैर्मन्त्रैः पौराणसम्भवैः ।
नैवेद्यैर्विविधाकारैर्दीपैर्व्वस्त्रैः सुशोभनैः ॥
एवं पूज्य विधानेन ब्राह्मणांस्तर्पयेत्ततः ।
मुनिपुष्पाणि पूजार्थं यावत्सु तिथिषु त्विह ॥
तावद्युगसहस्राणि स्वर्गलोके महीयते ।
ततो विष्णुपदं याति यस्मान्नावर्त्तते पुनः ॥
ये तस्य पितरः सन्ति पतिता नरकार्णवे ।
तेऽपि स्वर्गं समासाद्य मोदन्ते विगतज्वराः ॥
एवमभ्यर्च्य देवेशं ब्राह्मणेभ्यो यथापरां ।
धेनुं सर्व्वगुणोपेतां क्रमेण मुनिपुङ्गव ॥
अनेन विधिना पञ्च शरदान्तदिनानि तु ।
कर्त्तव्यमेकभक्तेन दिनान्ते लघुभुङ्नरः ॥
जलाज्यमधुधेनुञ्च तिलहेमवतीं तथा ।
दत्त्वा पुण्यमवाप्नोति न तत् सर्व्वमहामखैः ॥
सर्व्वं यत् कुरुते सम्यक् महाहरिव्रतं परं ।
नावलिम्पति पापेन पद्मपत्रमिवांभसा ॥
यत्र संकीर्त्तय कर्म्माणि मर्त्त्याः सन्ति महाधियः ।
प्रायश्चित्तानि निर्द्दिष्टं तेषां सुगतिकामिनां ॥
ब्रह्महत्यादि पापानि अगम्यागमनानि च ।
कृत्वा स्तेयं सुरापश्च प्रसादं मुच्यते मुने ॥
विक्रयं तिलधेनूनां कृत्वा व्रतमिदं शुचिः ।

मुच्यते पातकात् सद्यः कीर्त्तनात् स्मरणान्मुने॥
एवं वा द्वादशान्मासानुपोष्यैकादशीं बुधः।
यद्यः करोति शुद्धात्मा कृतकृत्यः सुखी भवेत्॥
सुनामद्वादशी पूज्या नाम्नाद्वादशभिस्तथा।
द्वादशा धेनवो देया हरिः कामान् प्रयच्छति॥
दिवि देवाः सदेवेन्द्राः कृत्वा कर्म्माण्यनेकशः।
पश्चादाराधयन्तीह हरिं शुभव्रतेन हि॥

इति वह्निपुराणोक्तं शुद्धिव्रतम्।

———000———

एकादश्यां निराहारो द्वादश्यां पुरुषोत्तमं।
अर्च्चयेद्ब्राह्मणमुखे स गच्छेत्परमं पदं॥
एषा तिथिर्वैष्णवी स्याद्द्वादशीशुक्लपक्षका।
तस्यामाराधयेद्देवं प्रयत्नेन जनार्द्दनम्॥

इति कूर्मपुराणोक्तं द्वादशीव्रतम्।

———000@000———

एकादश्यां निराहारः समभ्यर्च्य जनार्द्दनम्॥
द्वादश्यां शुक्लपक्षस्य महापापैः प्रमुच्यते।

इति कूर्म्मपुराणोक्तं द्वादशीव्रतम्।

———000———

मार्गशीर्षे शिते पक्षे द्वादश्यां समजायत।
मत्स्यो विष्णुः समाहात्मा तस्येष्टेयं सदा तिथिः॥
एकादश्यामुपोष्यादौ पठन् मत्स्यावतारकम्।

शृण्वन् सौवर्णं मत्स्यं च कारयित्वा वदेदिदम् ॥

विष्णुधर्मे ।

प्रीयतां मत्स्य इत्युक्त्वा तं दद्याद्ब्राह्मणाय तु ।
यो दद्यात् स सुखी भूत्वा विष्णुलोकं व्रजेच्छुभं ॥
पौषे मासि सिते पक्षे द्वादश्यां समजायत ।
कूर्म्मरूपी स भगवान् तस्येष्टेयं सदा तिथिः ॥
एकादश्यामुपोष्यादौ पठन् कूर्म्मस्य तारकं ।
शृण्वन् सौवर्णं कूर्म्मञ्च कारयित्वावदेदिदम् ॥
विष्णुर्मे प्रीयतां कूर्म्म इत्युक्त्वा ब्राह्मणाय तु ।
यो दद्यात्स सुखी भूत्वा विष्णुलोके महीयते ॥
यो मर्त्यो माघशुक्लस्य द्वादश्यां तु विशेषतः ।
उपोष्य भक्त्या चाभ्यर्च्य वराहं रुक्मनिर्मितम् ॥
दद्यात्पठेच्च चरितं वाराहं हरिमुत्तमं ।
वराहजन्मदिवसे विप्राय श्रद्धयान्वितः ॥
सुतमेतं समासाद्य मोदते कालमक्षयं ।
वराह विष्णु प्रीतिश्च कूर्मदेवं यथातथम् ॥
नारसिंहं फाल्गुने तु एकादश्यांसिते शुचिः ।
उपोष्याभ्यर्च्चयेद्भक्त्या नारसिंहभवे दिने ॥
सौवर्णं नारसिंह च कृत्वा शक्त्या द्विजाय तु ।
दद्यान्नृसिंहचरितमिदं शृण्वन् पठंश्च वा ॥
शत्रून् विजित्येह लक्ष्मीं प्राप्य नित्यं नरोत्तमः ।
पातालस्वर्णमाप्नोति नागदैत्याङ्गनायुतम् ॥
चैत्रे मासि सिते पक्षे एकादश्यामुपोषितः ।

वामनस्य दिनेऽभ्यर्च्य वामनं पुरुषोत्तमं।
सौवर्णं वामनं दद्यात् पठेत्तत्कथां च यो नरः॥
स चिरं वामनस्येदं शृणुयाद्वाप्युपोषितः।
स धनैरन्वितो भुक्त्वा भोगानिह च मानुषान्॥
ब्रह्मलोकमवाप्नोति विद्वान्रामानुतत्परः।
वैशाखशुक्लैकादश्यामुपोष्याभ्यर्चयेच्छुचिः॥
जामदग्न्यं तथा रामं दद्याद्विप्राय रुक्मजम्।
इदं च रामचरितं शृणुयाद्वा पठेन्नरः॥
रामस्य जन्मदिवसे तथा दाशरथेर्द्विजः।
सीतारामन्तु सौवर्णं यो विप्राय प्रयच्छति॥
द्वादश्यां रामचरितमिदं शृण्वन् पठंस्तथा।
स इन्द्रलोकं लभते रामस्यैव प्रसादतः॥
इह कीर्त्तिमवाप्नोति धनं पुत्रांश्च जीवितं।
आषाढमासि शुक्लां य उपोष्यैकादशीं द्विजः॥
द्वादश्यामर्चयेद्रामं रौहिणेयं महाबलं।
रौहिणेयस्य रामस्य तिथौ जन्मनि सत्तमे॥
सौवर्णं ब्राह्मणायापि रामं दद्यात्सपात्रकम्।
स नागलोकमाप्नोति यावदिन्द्राश्चतुर्दश॥
इहस्त्रीभोगमाप्नोति बलवान्निरुजो भवेत्।
श्रावणे मासि शुक्लां य उपोष्यैकादशीं द्विज॥
द्वादश्यामर्चयेत् कृष्णं रुक्मिणीसहितं शुचिः।
रुक्मप्रतिकृतिं कृत्वा दद्याच्च ब्राह्मणाय च॥
पठेच्च कृष्णचरितं कृष्णजन्मदिने शुचिः।

श्रावणे शृणुयाद्वापि य इदं पुरुषोत्तमः ॥
स मुच्यतेऽस्मात् संसारात् भुक्त्वा भोगमनुत्तमं ।
यस्तु भाद्रपदे मासि एकादश्यामुपोषितः ॥
शुक्लायामर्च्चयेत् कालं विष्णुं सौवर्णमच्युतं ।
द्वादश्यां जन्मदिवसे कल्किविष्णुः सुरेश्वरः ॥
दद्याद्विप्राय तं वापि भक्त्यानुष्ठानतो मुदा ।
पठेदिदं कल्किविष्णोश्चरितं शृणुयात्ततः ॥
जनलोकमवाप्नोति कृते जन्म लभेद्युगे ।
तस्मिंस्तु तस्मिन्दिवसे दत्तं विष्ण्ववतारकं ॥
अर्च्चयन्तु सुराः सर्व्वे भवेयुः सर्व्वदार्च्चिताः ॥

इति विष्णुपुराणोक्तं दशावतारव्रतं ।

———000———

एकादश्यां तु नक्ताशी यश्च कं विनिवेदयेत् ॥

विप्रायेति शेषः ।

कृत्वा मर्त्यं च सौवर्णं स विष्णोःपदमाप्नुयात् ।
एतत् कृष्णव्रतं नाम* कल्यान्तैः सुखलाभकृत् ॥

इति पद्मपुराणोक्तं कृष्णव्रतं ।

———000———

अगस्त्य उवाच ।

एकादश्यान्तु यत्नेन नक्तं कुर्य्याद्यथाविधि ।
मार्गशीर्षन्तु कृष्णायामारभ्यादौ विचक्षणः ॥

---

* कल्पान्ते चतुर्वर्गार्थदेति पुस्तकान्तरे पाठः ।

तद्व्रतं धनदस्येहं कृतं वित्तं प्रयच्छति॥

इति वाराहपुराणोक्तं धनदव्रतं।

इति श्रीमहाराजाधिराज श्रीमहादेवस्य समस्तकरणाधीश्वर सकल विद्याविशारद श्रीहेमाद्रि विरचिते चतुर्वर्ग चिन्तामणौ व्रतखण्डे एकादशीव्रतानि।

अथ षोड़शोऽध्यायः।

———000@000———

अथ द्वादशीव्रतानि।

भक्त्या विष्णोः सूरिर्हेमाद्रिणेह
प्रस्तूयन्ते द्वादशीस्थव्रतानि।
कृत्वा यानि प्राणिनोलङ्घयन्ति
तं दुर्वारासारसंसारपारं॥

विष्णुधर्मोत्तरात्।

राम उवाच।

उपवासासमर्थानां किं स्यादेकमुपोषितं।
महाफलं महादेव तन्ममाचक्ष्व पृच्छतः॥

कृष्ण उवाच।*

या रामश्रवणोपेता द्वादशी महती तु सा†।
तस्यामुपोषितः स्नातः पूजयित्वा जनार्द्दनं॥

---

* मङ्कर उवाचेति पुस्तकान्तरे पाठः।

† भाद्रपदेतर्ये ति पुस्तकान्तरे पाठः।

प्राप्नोत्ययत्नात् धर्मज्ञ द्वादशद्वादशीफलं ।
दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे ॥
वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च ।
न दुर्गतिमवाप्नोति जाति* मग्र्याञ्च विन्दति ॥
अक्षय्यं स्थानमाप्नोति नात्र कार्य्या विचारणा ।
श्रवणद्वादशीयोगे बुधवारो भवेद्यदि ॥
अत्यन्तं महती नाम द्वादशी सा प्रकीर्त्तिता ।
स्नानं जप्यं तथा दानं होमं श्राद्धं सुरार्चनं ॥
सर्व्वमक्षयमाप्नोति तस्यां भृगुकुलोद्वह ।
तस्मिन् दिने तथा स्नातो यत्र क्वचन सङ्गमे ॥
स्वर्गङ्गास्नानजं राम फलं प्राप्नोत्यसंशयं ।
श्रावणे सङ्गमाः सर्व्वे परपुष्टि† प्रदाः सदा ॥
विशेषात् द्वादशीयुक्ता बुधयुक्ता विशेषतः ।
तथैव द्वादशी प्रोक्ता बुधश्रवणसंयुता ॥
तृतीया च तथा प्रोक्ता सर्व्वकामफलप्रदा ।
तथा तृतीया धर्मज्ञ तथा पञ्चदशी शुभा ॥

ब्रह्मवैवर्त्तपुराणे ।

नमस्ये फाल्गुने मासि यदि वा द्वादशी भवेत् ।
शुद्धश्रवणसंयुक्तासङ्गमो विजया स्मृता ॥
वारिधानीप्रदानो स्याद्दध्योदनसमायुता ।

---

* गतिमिति पुस्तकान्तरे पाठः ।

† पञ्चपुण्यामिति पाठान्तरं ।

प्रेतयोनौ न जायेत पूजयित्वा च वामनं ॥
वंशः समुद्धृतस्तेन मुक्तं पितृऋणादसौ।

भविष्योत्तरात्।

युधिष्ठिर उवाच।

उपवासासमर्थानां सदैव पुरुषोत्तम।
एकया द्वादशी पुण्या ता उपोष्य ममानघ ॥

श्रीकृष्ण उवाच।

मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता।
सर्व्वकामप्रदा पुण्या उपवासे महाफला ॥
सङ्गमे सरितां स्नात्वा द्वादशीं समुपोषितः।
समग्रं समवाप्नोति द्वादशद्वादशीफलं ॥
अत्र द्वादश द्वादश्यामेवोपवासविधानं, वचनसामर्थ्यात्।

तथाचोक्तं विष्णुरहस्ये।

द्वादश्यामुपवासोऽत्र त्रयोदश्यान्तु पारणं।
निषिद्धमपिकर्त्तव्यमित्याज्ञा परमेश्वरी ॥
बुधश्रवणसंयुक्ता सैव चेत् द्वादशी भवेत्।
अतीव महती तस्यां सर्वं कृतमिहाक्षयं ॥
द्वादशी श्रवणोपेता यदा भवति भारत।
सङ्गमे सरितां स्नात्वा गङ्गादिस्नानजं फलं ॥
सोपवासमवाप्नोति नात्र कार्य्या विचारणा।
जलपूर्णं तदा कुम्भं स्थापयित्वा विचक्षणः ॥
पञ्चरत्नसमोपेतं सोपवीतं सुपूजितं।

तस्य स्कन्धे सुघटितं स्थापयित्वा जनार्द्दनं।
यथा शक्त्या स्वर्णमयं सर्व्वाङ्ग विभूषितं॥
स्नापयित्वा विधानेन सितचन्दनचर्च्चितं।
सितवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितं॥
ओँ नमोवासुदेवाय शिरः संपूजयेत्ततः।
श्रीधराय मुखं तद्वत् वैकुण्ठाय इत्थे नमः॥
नमः श्रीपतये वक्षं भुजौ सर्व्वास्त्रधारिणे।
व्यापकाय नमः कुक्षौ केशवायोदरं नमः॥
त्रैलोक्यजनकायेति मेढ्रं संपूजयेद्धरेः।
सर्व्वाधिपतये जङ्घे पादौ सर्व्वात्मने* नमः॥
अनेन विधिना राजन् पुष्पै र्धूपैः समर्चयेत्।
ततस्तस्याग्रतो देयं नैवेद्यं घृतपाचितं॥
मोदकांश्च नवान् कुम्भान् शक्त्या दद्याच्च दक्षिणां।
एवं संपूज्य गोविन्दं जागरं तत्र कारयेत्॥
प्रभाते विमले स्नात्वा संपूज्य गरुड़ध्वजं।
पुष्पधूपादि नैवेद्यैः फलैर्व्वस्त्रै सुशोभनैः॥
पुष्पाञ्जलिं ततो दत्त्वा मन्त्रमेतमुदीरयेत्।
नमो नमस्ते गोविन्द वुधश्रवणसंज्ञक॥
अघौघसंक्षयं कृत्वा सर्व्वसौख्यप्रदो भव।
अनन्तरं ब्राह्मणेदं वेदवेदाङ्गपारगे॥
पुराणज्ञे विशेषेण विधिवत्सं प्रदापयेत्।
प्रीयतां देवदेवेशोमम नित्यं जनार्द्दन॥

---

* यज्ञात्मने इति पुस्तकान्तरे पाठः।

अनेनैव विधानेन नद्यास्तीरे नरोत्तम।
सर्व्वं निवर्त्तयेत्तस्यगेकभक्तारतोपि सन्॥

कृष्ण उवाच।

अत्राप्युदाहरन्तीममितिहासं पुरातनं।
महत्यरण्येयद्वृत्तं भूमिपाल शृणुष्व तत्॥
देशो दशोरको नाम तस्य भागे तु पश्चिमे।
अतिवाजन्मनुद्देशो सर्वसत्वभयङ्करः॥
सुतप्तसिकता भूमिर्यत्र क्रुष्टा महोरगाः।
अल्पच्छायद्रुमाकीर्णा मृतप्राणिसमाकुला॥
शमीखदिरपालाशकरीरैः पीलुभिस्तथा।
सत्पतत्रभीमद्रुमाः पार्थ कण्ठकैराविला दृढ़ैः॥
गन्धप्राणिगणाकीर्णा तत्रभूर्द्दृश्यते क्वचित्।
अतर्क्कतापविषमा भूस्तृणा पुरुषोत्तम॥
ज्वलिताग्निसमश्चैव यत् किञ्चित्तत्र दृश्यते।
तथापि जीवा जीवन्ति सर्व्वकर्मनिबन्धनाः॥
नोदकं नोत्पलाराजन्नुवन्त तत्र वलाहकाः।
कदाचिदपि दृश्यन्ते प्लवमाना विहङ्गमाः॥
सकान्तरगतिः कैश्चिच्छिशुभिस्तृषितैः समं।
उत्क्रान्तजीविता राजन् दृश्यन्ते विहगोत्तमाः॥
उत्प्लुत्योत्प्लुत्यतरसा मृगः सैकसताङ्गतः।
शक्यते चैव नश्यन्ति जलैः सैकतसेतुवत्॥
तस्मिंस्तथाविधे देशे कश्चिद्दैववशाद्वणिक्।
निजसार्थपरिभ्रष्टः प्रविष्टो मरुजंङ्गले॥

उक्तवान्मलिनात्तस्मान्निर्मांसान् भीमदर्शनात् ।
बभ्रामोद्भ्रान्तहृदयः क्षुत्तृषाश्रमकर्षितः ।
व्युग्रामद्युजलाकाहं यास्यामि न बुधोपमः ।
कथमेति ददर्शासौ तृष्णाव्याकुलितेन्द्रियः ॥
स्नायुबद्धास्थिचरणा धावमानानितस्ततः ।
प्रेतस्कन्धसमारूढमेकं विचित्रदर्शनं ॥
ददर्श बहुभिः प्रेतैः समन्तात्परिवारितं ।
आगच्छमानमव्यग्रं स्तुतिशब्दपुरःसरं ॥
प्रेतस्कन्धान्महीं गत्वा तस्यान्तिकमुपागमत् ।
सोभिवाद्य वणिक्श्रेष्ठमिदं वचनमब्रवीत् ॥
अस्मिन् घोरतरे देशे भवतः कथमागमः ।
तमुवाच वणिग्धीमान् सार्थभ्रष्टस्यमे वने ॥
प्रवेशो दैवयोगेन पूर्वकर्मकृतेन तु ।
तृष्णा मे बाधते सार्थ क्षुद्भ्रमोयं भृशं तथा ॥
प्राणाः कण्ठमनुप्राप्ता वचनं नृपतीव मे ।
अत्रोपायं न पश्यामि जीवेयं नृप केनचित् ॥

कृष्ण उवाच ।

इत्येवमुक्ते प्रेतस्तं वणिजं वाक्यमब्रवीत् ।
पुन्नाममिदमुत्सृत्य प्रतीक्ष्व समुहूर्त्तकं ।
कृतातिथ्यो मया राजन् जनिष्यसि यथासुखं ॥
एवमुक्तस्तथा चक्रे स वणिक् तृष्णयार्दितः ।
मध्याह्नसमये प्राप्ते ततस्तद्देशमागतः ॥
सवासहस्त्राक्रान्तोद्देश वारिधाणी मनोरमा ।

दध्योदनस्य युक्तेन वर्द्धमानेन संयुतान् ॥
अवतीर्य्य ततस्त्वग्र्य प्रददातीष्टये तदा।
तेषां ग्रासमन्नदानेन वणिक् तृप्तिमुपागतः ॥
वितृष्णो विज्वरश्चैव क्षणेन समपद्यत।
ततस्तु मेतसं यस्य तस्माद्भागं समाहृदौ ॥
दध्योदनान्नपानीयात्प्रेतास्तृप्तिं पराङ्गताः।
अतिथिं तर्पयित्वा च प्रेतलोकं च सर्वशः ॥
ततः स्वयञ्च बुभुजे भुक्तशेषं यथासुखं।
तस्य भुक्तवतस्छत्रं पानीयं चाचयं ययौ ॥
प्रेताधिपतयस्तस्य वणिग्वचनमब्रवीत्।
आश्चर्य्यमेतत्परमं वनेऽस्मिंश्चातिभाति मे॥
अन्नपानस्य संप्राप्तिः परमस्य कुतस्तव।
स्तोकेन च तथान्नेन विभर्षि सुबहून् पृथक्॥
तृप्तमस्ते कथं तत्वे निर्मा साभिन्नकुम्भतः।
अपरश्च कथं स्नेह ममवापपरिच्चये ॥
हस्तावलं वकं कस्त्वं सन्तप्तो निर्जले वने।
तृष्णयाऽसि कथं ग्रासमाचे गेषु भवानपि ॥
कस्त्वमस्यां सुघोरायां सुटव्यां तुहतीलल:।
तदेतच्छ्रंप्रयं छिन्धि परं कौतूहलं मम॥
एवमुक्तः स वणिजा प्रेतो वचनमब्रवीत्।
शृणु भद्र प्रवक्ष्यामि दुष्कृतं कर्म चात्मनः॥
शालके नगरे रम्ये अहमासं सुदुर्म्मतिः।
वणिक् सन्तः पुरा कालो तीतोर्व्व हुम्मेमयानघ॥

साकले नगरे रम्ये नास्तिकस्य दुरात्मनः।
धनलोभान्मया तत्र न कदा वित्तभेदिता॥
न दत्ता भिक्षवे भिक्षा तृष्णाया जलदेन च।
प्रतिवेशस्तु तत्रासीद्ब्राह्मणो गुणवान् मम॥
श्रवणद्वादशीयोगे मासि भाद्रपदे तथा।
सह कश्चिन्मया सार्द्धं तौषीं नाम नदीं ययौ॥
तस्याश्च सङ्गमं पुण्यं यत्रासीच्चन्द्रगङ्गया।
चन्द्रभागा सोमसुता तत्रासीच्चार्कनन्दिनी॥
तपःशीतोष्णसलिले सङ्गमे सुमनोहरे।
श्रवण द्वादशीयोगे स्नानंचैव तथोषितः॥
चन्द्रभागस्य तोयस्य वारिधान्पीतवान् दृढं।
दध्योदनयुतैः सार्द्धं संपूर्णैर्व्वर्द्धमानकैः॥
छत्रोपानद्युगं वस्त्रं प्रतिमां विधिवद्धरेः।
प्रददौ विप्रमुख्याय रहस्यज्ञो महामुनिः॥
वित्तसंरक्षणार्थाय तस्यापि च ततो मया।
सोपवासेन दत्ता वा परिधातिसुशोभना॥
चन्द्रभागस्य प्रददौ विप्र पुष्पयुता तदा।
एतत् कृत्वा गृहं प्राप्तः ततः कालेन केनचित्॥
पञ्चत्वमहमासाद्य नास्तिक्यात् प्रेततां गतः।
अस्यामटव्यां घोरायां तथा दृष्टास्त्वयानघ॥
ब्रह्मस्वहारिणस्त्वेते पापाः प्रेतत्वमागताः।
परदाररताः केचित् स्वामिद्रोहरताः परे॥
मित्रद्रोहरताः केचिद्देशेऽस्मिंस्तु सुदारुणे।

ममैते विपदो याता अन्नपानकृतेऽनघ॥
अक्षयो भगवान् विष्णुः परमात्मा सनातनः।
यद्दीयते तमुद्दिश्य अक्षयं तत् प्रकीर्त्तितं॥
मया विहीनाः किं तत्त्वं वनेऽस्मिन् भृशदारुणे।
पीड़ामनुभविष्यन्ति दारुणां कर्म्मयोनिजां॥
एतेषां त्वं महाभाग ममानुग्रहकाम्यया।
अनेकनामगोत्राणि गृह्णीयास्त्वखिलेन च॥
अस्ति चोच्चागता चैव तव संपुटिका शुभा।
हिमवत्यां तयासाद्य यत्र त्वन्विष्यते निधिं॥
गयाशीर्षं ततो गत्वा श्राद्धं कुरु महामते।
एकमेकमथोद्दिश्य प्रेतं प्रेतं यथासुखं॥
एवं संभाष्यमाणोऽसौ तप्तजांबूनदप्रभः।
विमानवरमारुह्य स्वर्गलोकमितो गतः॥
स्वर्गं च प्रेतनाथेन प्रभावात्स वणिक् क्रमात्।
नामगोत्राणि संगृह्य प्रयातः स हिमाचलं॥
तत्र प्राप्य निधिं गत्वा विनिक्षिप्य स्वके गृहे।
धनभागमुपादाय गयाशीर्षं वटं ययौ॥
प्रेतानां क्रमशस्तत्र चक्रे श्राद्धं दिने दिने।
यस्य यस्य यथाश्राद्धं स करोति दिने वणिक्॥
स स तस्य सदा स्वप्ने दर्शयत्यात्मनस्तनुं।
ब्रवीति च महाभाग प्रसादेन तवानघ॥
प्रेतभावं मया त्यक्तं प्राप्तोऽस्मि परमां गतिं।
सत्कृत्वा धनलाभस्य प्रेतानां सत्कृतिं वणिक्॥

जगाम स्वगृहं तत्र मासि भाद्रपदे तथा ।
श्रवणद्वादशीयोगे पूजयित्वा जनार्दनं ।
दानञ्च दत्त्वा विप्रेभ्यः सोपवासो जितेन्द्रियः ॥
महानदीसङ्गमेषु प्रतिवर्षं युधिष्ठिर ।
चकार विधिवद्दानं ततो दृष्टान्तमागतः ॥
अवाप परमं स्थानं दुर्लभं सर्व्वमानवैः ।
तत्र कामफला वृक्षा नद्यः पायसकर्द्दमाः ॥
शीतलामलपानीयाः पुष्करिण्यो मनोरमाः ।

तं देशमासाद्य वणिक् महात्मा
सुमृष्टजाम्बूनदभूषिताङ्गः ।
कल्पं समग्रं सह सुन्दरीभिः
सार्द्धं सुहृद्भिर्मुदितः सदैव * ॥

बुधश्रवणसंयुक्ता द्वादशी सङ्गमोदके ।
दानं दध्योदनं शस्तमुपवासपरो विधिः ॥
सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना ।
एतैश्चान्यैश्च राजेन्द्र कामदा द्वादशी कृता ॥

या द्वादशी बुधयुता श्रवणेन सार्द्धं
सा वै जयेति कथिता मुनिभिर्नभस्ये ।
तामादरेण समुपोष्य नरो हि सम्यक् ।
प्राप्नोति सिद्धिमणिमादिगुणोपपन्नां ॥

इति भविष्योत्तरोक्तं श्रवणद्वादशीव्रतम् ।

---

* स्वर्गं सरिम्यं मुदितः सदैवेति पुस्तकान्तरे पाठः ।

ब्रह्मोवाच।

त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया।
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ॥

हरिं प्रतीदं वचनं

घृताशनो भवेद्यस्तु द्वादश्यां तत्परायणः।
स स्वर्गवासी भवतु पुमान् स्त्री वा विशेषतः।

इति वाराहपुराणोक्तं हरिव्रतम्।

———000———

मार्कण्डेय उवाच।

भुवने भारतश्चैव सुजात्यः सुजनस्तथा।
क्रतुः सर्व्वश्च मूर्द्धाच तेजः सत्यस्तवाः सदा ॥
प्रसवश्चाव्ययश्चैव दक्षोद्वादशकस्तथा।
भगोवा नाम निर्द्दिष्टा देवा द्वादश यज्ञियाः* ॥
तेषां सम्पूजनं कुर्य्याद्द्वादश्यां नियमेन तु।
गन्धमाल्यनमस्कारधूपदीपान्नसंपदाः।
संवत्सरान्ते दद्याच्च ब्राह्मणाय पयस्विनीं ॥

कृत्वा व्रतं वत्सरमेतदिष्टं
प्राप्नोति तेषां तु सलोकमेव।
तत्रोष्य कालं सुचिरं मनुष्यो
राजा भवेद्वा द्विजपुङ्गवो वा ॥

इति विष्णुधर्म्मोक्तं भृगुव्रतम्।

———000@000———

* जग्मिर इति पुस्तकान्तरे पाठः।

मार्कण्डेय उवाच ।

मनोमनस्तथाप्राणो नरोजातश्च वीर्यवान् ।
वीतिर्हयोनयश्चैव हंसोनारायणस्तथा ॥
विभुश्चापि प्रभुश्चैव साध्या द्वादश कीर्त्तिताः ।
पूजयेच्छुक्लपक्षे तान् द्वादश्यां मार्गशीर्षतः ॥
कृत्वा व्रतं वत्सरमेतदिष्टं
प्राप्नोति तेषां तु स सलोकमेव ।
तत्रोष्य कालं सुचिरं मनुष्यो
राजा भवेद्वा द्विजपुङ्गवो वा ॥

इति विष्णुधर्म्मोक्तं साध्यव्रतम् ।

———000———

मार्कण्डेय उवाच ।

धाता मित्रोऽर्यमा पूषा शक्रोंऽशोवरुणोभगः ।
त्वष्टा विवस्वान् सविता विष्णुर्द्वादशकस्तथा ॥
पूजयेद्द्वादशादित्यान् शुक्लपक्षे उपोषितः ।
मार्गशीर्षादथारभ्य द्वादश्यां नियतव्रतः ॥
दत्त्वा व्रतान्ते पुरुषः सुवर्णं
प्राप्नोति लोकान् सवितु र्नृवीर ।
मानुष्यमासाद्य भवत्यरोगो
जितेन्द्रियश्चैव धनान्वितश्च ॥

इति विष्णुधर्मोक्तं द्वादशादित्यव्रतं ।

———000———

पुलस्त्य उवाच।

पौषे मासि सिते पक्षे द्वादश्यां शक्रदैवते।
नक्षत्रयोगगे विष्णुं प्रथमं तु समर्चयेत्॥
ततः प्रभृति विप्रेन्द्र मासि मासि जनार्दनं
उपोषितः पूजयेत यावत्संवत्सरं गतं॥

मासेच मासे विधिनोदितेन
तस्यां तिथौ दानमिति ब्रवीमि।
प्राश्यं यथावद्विधिवत् क्रमेण
तदुच्यमानं निखिलं निबोध॥
घृतं यथाव्रीह्रियवं हिरण्यं
यवान्नमम्भ स्सणकान्नपानं।
कृतं पयोन्नं गुडफाणिताढ्यं
सुचन्दनं वस्त्रमनुक्रमेण॥
एकैकपादोक्तमेकैकदानं
गोमूत्रमम्भोघृतमामशाकं।
दूर्वादधिव्रीह्रियवं तिलांश्च
सूर्य्यांशुतप्तं जलमम्बुदाभं॥
क्षीरञ्च मासक्रमशः प्रयुक्तं
दार्भमम्बु कुशोदकं।
कुलप्रधाने धनधान्यपूर्णे
विवेकवत्यस्तसमस्तदुःखे।

प्राप्नोति जन्मा विकलेन्द्रियश्च
भवत्यरोगो मतिमान् सुखी च ॥

इति विष्णुधर्म्मोत्तरोक्तं सुजन्मद्वादशीव्रतं ।

——000——

बृहस्पतिरुवाच ।

कथं स राजा भाग्यस्थः सर्व्वलोकाधिकोविभुः ।
कथञ्च दिव्यतां प्राप्तो विष्णुसायुज्यतां विभो ॥
सर्व्वदेवेश्वरस्तस्य कथं तुष्ट उमापतिः ।

ब्रह्मोवाच ।

भाग्यर्च्चद्वादशी नाम सर्व्वभाग्यप्रदायिनी ।
तत्र कृत्वा हरेरर्च्चामिष्ट्वा यज्ञैर्यथाविधि ॥
सर्व्वलक्षणसम्पन्नां अष्टावक्रो महामुनिः ।

हरेरर्च्चा हरिरूपा प्रतिमा ।

शङ्कराद्धं हरेः पुंस उभे संस्थापयेद्दशी ।

शङ्कराद्धं हरेरित्यादि शङ्करस्याद्धंहरेश्च पुरुषस्याद्धंसत्येवं हरिहरमूर्त्तिमुभे संस्थापयेदित्यर्थः ।

भक्त्या सर्व्वोपहारेण द्वादशीरेणुमण्डले ।
आद्येन चक्रराजेन पूजितो मधुसूदनः ॥
तुतोष तस्य नृपतेस्तेन भाग्यत्वमाप्नुयात् ।

चक्रराजो महासुदर्शनमन्त्रः ।

तुष्टेन देवदेवेन वरो दत्तो द्विजोत्तम ।
अत ऊर्द्धं भवान् वत्स मम तुल्यो भविष्यति ॥

भाग्यचंद्वादशी तात अष्टम्यां वा तदर्चनं।
यागमण्डलपूजार्थं हरिमुद्दिश्य कारयेत्॥
आचार्य्याय प्रदातव्यं हेम गो भू तिलादिकं।
दक्षिणां वित्तसारेण पुनाति नरकार्णवात्॥
युगभाग्यप्रभावेन प्रयच्छति फलं हरिः।

युगभाग्यप्रभावेणेति युगस्य कृतादेर्भाग्यस्य कर्मणःप्रभावेणेत्यर्थः।

यथाकाले च चैत्रे च एकापि गणिका गता।
प्रयाति शतधा वृद्धिं तथाभाग्ययुगे द्विज॥
यथा भाग्ये तथा पौष्णे वासवे च द्विजोत्तम।
तुल्यरूपं विजानीयात् द्वादश्यामष्टमीषु च॥

भाग्यं भगदैवत्यं पूर्व्वफल्गुनी नक्षत्रं पौष्णं रेवती वासवं धनिष्ठा।

तुष्यते देवदेवेशः शशाङ्कांकितशेखरः।
पुत्रायूराज्यसौभाग्यं प्रयच्छति जनार्द्दनः॥
मासि मासि च योमर्त्यः करोति हरिहरार्चनं।
पद्मे सुलक्षणोपेते सर्व्ववर्णोपशोभिते॥
तस्य तुष्यति देवेशश्चक्रपाणिर्जनार्द्दनः।

इति देवीपुराणोक्तं भाग्यचंद्वादशीव्रतं।

——000——

पुष्यार्कद्वादशी पुण्या सर्व्वपापनिवर्हणी।
कृता वा केन सा शक्र घृतपात्रप्रदायिना॥
तदा प्रत्यक्षतस्तस्य देवदेवो जनार्द्दनः।

ददर्श स्वांतनुं शुभ्रां पीतां चैवचतुर्भुजां ॥

इति देवीपुराणोक्तं पुष्यार्कद्वादशीव्रतं ।

———000———

ब्रह्मोवाच ।

द्वादश्यां विष्णुमिष्ट्वेह सर्व्वदा विजयी भवेत् ।

पूज्यश्च सर्व्वलोकानां यथा गोपतिगोकरः ॥

गोपतिः सूर्य्यो गोकरो नेत्ररश्मिर्य्यस्य स गोपतिगोकरो विष्णुः ।

मूलमन्त्राः स्वसंज्ञाभि रङ्गमन्त्राश्च कीर्त्तिताः ॥

पूर्व्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः ।

गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते ॥

पूजा शाठेऽन शाठेऽन कृतापि तु फलप्रदा ।

आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः ॥

पूर्व्वोक्तफलदो होमः कृतः शान्तेन चेतसा ।

एतत्तु व्रतं वैश्वानरप्रतिपद्व्रतवद्द्रष्टव्यं ॥

इति भविष्यत्पुराणोक्त विष्णुव्रतं ।

———000———

युधिष्ठिर उवाच ।

अवियोगव्रतं ब्रूहि मम यादवनन्दन ।

विधानं तस्य कीदृक् च किं पुण्यं कात्र देवता ॥

श्रीकृष्ण उवाच ।

शृणु पाण्डव यत्नेन कथ्यमानं मयाखिलं ।

अवियोगव्रतं नाम व्रतानामुत्तमं व्रतं ॥

शुक्ले प्रोष्ठपदे मासि द्वादश्यां समुपोषितः।
स्नात्वा जलाशये स्वच्छे शुक्लाम्बरधरः शुचिः॥
जलान्ते मण्डलं कृत्वा गोमयेनातिशोभनं।
गोधूमचूर्णैस्तन्मध्ये सलक्ष्मीकं जनार्द्दनं॥
लेपयित्वा हरं गौरीं सावित्रीं ब्रह्मणा सह।
राज्ञा सह रविं राजं त्रैलोक्योद्योतकारकं॥
गन्धपुष्पैस्तथा धूपैर्नैवेद्यैर्भक्तितोऽर्चयेत्।
अवियोगव्रतं पार्थ मन्त्रेणानेन तद्गतः॥
अवियोगा दृढ़मना स्वेतस्याधाय केशवं।
शङ्करं पद्मयोनिञ्च रविं गगनभूषणं॥
इदमुच्चारयेत् पार्थ कृत्वा तत्प्रणवं नमः।
सहस्रशीर्षापुरुषः पद्मनाभो जनार्द्दनः॥
व्यासर्षिकपिलाचार्य्यौ भगवान् पुरुषोत्तमः।
नारायणोऽथ मधुहा विष्णु र्दामोदरो हरिः॥
महावराहो गोविन्दः केशवो गरुड़ध्वजः।
श्रीधरः पुण्डरीकाक्षो विश्वरूप स्त्रिविक्रमः॥
उपेन्द्रो वामनो रामो वैकुण्ठो माधवो ध्रुवः।
वासुदेवो हृषीकेशः कृष्णः सङ्कर्षणोऽच्युतः॥
अनिरुद्धो महायोगी प्रद्युम्नोऽनन्त एव च।
नित्यं ममास्तु सुप्रीतः श्रीकण्ठोऽरिनिषूदनः॥
उमापति र्नीलकण्ठःस्थाणुः शम्भु र्भगोऽरिहा।
ईशानो भैरवः शूली त्र्यम्बक स्त्रिपुरान्तकः॥
कपर्दी गोपतिर्लिङ्गी महाकालो वृषध्वजः।

शिवः सर्व्वो महादेवो रुद्रो भूतगणेश्वरः ॥
ममास्तु सह पार्व्वत्या शङ्करः शङ्करः सदा ।
ब्रह्मा शम्भु र्विभु स्स्रष्टा पौष्करः प्रपितामहः ॥
हिरण्यगर्भो वेदज्ञः परमेष्ठी प्रजापतिः ।
वेधाश्चतुर्मुखः कर्त्ता स्वयम्भूः कमलासनः ॥
विरिञ्चिः पद्मयोनिश्च ममास्तु वरदः सदा ।
आदित्यो भास्करो भानुः सूर्य्योऽर्कः सविता रविः ॥
मार्त्तण्डो मण्डली द्योती रश्मिमाली ग्रहाग्रणीः ।
प्रभाकरः सप्तसप्ति स्तरणि र्द्युमणिः खगः ॥
दिवाकरो दिनकरः सहस्रांशु र्मरीचिमान् ।
पद्मप्रवोधनः पूषा जगच्चक्षु र्द्युभूषणः ॥
द्वादशात्मा महातेजा मित्रः कालान्तको हरिः ।
निक्षुभावल्लभो देवः सुप्रीतोऽस्तु सदा मम ॥
लक्ष्मीः श्रीः कमला पद्मा विभूति र्हरिवल्लभा ।
पार्व्वती ललिता गौरी उमा शम्भुप्रिया सती ॥
गायत्री प्रकृतिः सृष्टिः सावित्री देवसम्मता ।
राज्ञी भानुमती संज्ञा निक्षुभा भास्करप्रिया ॥
दीप्ता सूक्ष्मा जया भद्रा विभूति र्व्विमला तथा ।
अमोघा विद्युति स्सैव इत्येते मूर्त्ति रूप ततः ॥

इति स्वरूपोज्ञेयः। सूर्य्यस्तु श्मश्रुल श्चतुर्व्वाहु रूर्द्धकरद्वयधृत-कमलः अधःकरद्वयधृतपुष्पमालः कर्त्तव्यः वामपार्श्वे स्वर्णपङ्कज-करा निक्षुभा कर्त्तव्या इति। पद्मनाभ शङ्कर पितामहार्कादीन्-सप्रियान् कृत्वा। दत्वा दानं गुरवे भुक्त्वा चान्ते व्रजेद्वेश्म-

यश्चरतिनरः कश्चिद्व्रतमेतद्भक्तिभावितो लोको भवति च स धनभागी सन्ततिमान् विगतसन्तापः॥ हरिहरहिरण्यगर्भ-प्रभाकराणां क्रमेण लोकेषु भुक्ता भोगान् विपुलान वियोगी अथ सुनिर्वृतो भवति* स्त्रीपुंसयोर्यदियुग्मं पुरुषोऽपि यदि समाचरेत् कश्चित् यदि नारी वा व्रतमेतच्चीर्त्वा यात्यालयं विष्णोः।

इति भविष्यत्पुराणोक्तमवियोग द्वादशीव्रतं।

——000——

युधिष्ठिर उवाच।

अक्षौहिण्यो दशाष्टौ च मद्राज्यार्थे क्षयंगताः।
तेन पापेन मे चित्ते जुगुप्सातीव जायते॥
तत्र ब्राह्मणराजन्यवैश्याः शूद्रादयो हताः।
भीष्मद्रोणकलिङ्गादिकर्णशल्यसुयोधनाः॥
तेषां वधेन यत्पापं तन्मे मर्माणि कृन्तति।
पापप्रक्षालनं किञ्चिद्धर्मं ब्रूहि जगत्पते†॥

कृष्ण उवाच।

सुमहत्पुण्यजननं गोविन्दद्वादशीव्रतं‡।
अस्ति पार्थ महाबाहो पाण्डवानां धुरन्धर॥

युधिष्ठिर उवाच।

येयं गोद्वादशी नाम विधानं तत्र कीदृशं।
कथमेषा समुत्पन्ना कस्मिन् काले जनार्द्दन॥

---

* अनाथ योगी सुनिर्व्वितो भवति इति पुस्तकान्तरे पाठः।

† महापुंण्य प्रदं स्त्रीणां गोवत्स द्वादशीव्रतमिति पुस्तकान्तरे पाठः।

‡ व्रतं ब्रूहि जनार्द्दनइति पुस्तकान्तरे पाठः॥

एतत्सर्व्वं हरे ब्रूहि मां तर नरकार्णवात् ।

कृष्ण उवाच ।

पुरा कृतयुगे पार्थ मुनिकोटिः समागताः ।
तपश्चचार विपुलं नानाव्रतधरा गिरौ ॥
हर्षेण महताविष्टा देवदर्शनकाङ्क्षया ।
जम्बूमार्गे महापुण्ये नानातीर्थविभूषिते ॥
पारिपात्रे सिद्धपात्रे रम्ये वदरिकाश्रमे ।
घण्टारवीति विख्याते उत्तमे शिखरे नृपे ॥
तापसारण्यमतुलं दिव्यकाननमण्डितं ।
वसिष्ठ, शुक्राङ्गिरस, क्रतुदक्षादिभिर्वृतं ॥
वल्कलाजिनसम्बीतै र्भृगोराश्रममण्डलं ।
नानामृगगणैर्युष्टं शाखामृगगणैर्युतं ॥
प्रशान्तसिंहहरिणं वस्तुसर्वगतद्रुमं ।
गहनं निरुत्सनं रम्यं तालसन्तान सङ्कुलं ॥
सिंहव्याघ्र गजैर्भिन्नं हरिणैः शशरैःशरैः ।
वराह तुतुभिश्चित्रैः समन्तादुपशोभितं ॥
तपस्यतां तत्र तेषां मुनीनां दर्शनार्थिनां ।
व्याजं चक्रे महीनाथ द्वादशार्द्धार्द्धलोचनः ॥
वभूव ब्राह्मणो वृद्धो जरापाण्डुरमूर्द्धजः ।
श्लथचर्मतनुः कुब्जो पाशपाणिः सवेपथुः ॥
उमा विचक्रे गोरूपं शृणुयात्पार्थ यादृशं ।
क्षीरोदतोयसम्भूताः याः पुरामृतमन्थने ॥
पञ्च गावः शुभाः पार्थ पञ्चकस्य च मातरः ।

नन्दा सुभद्रा सुरभी सुशीला बहुला सती ॥
यतो लोकोपकाराय देवानां तर्पणाय च।
जमदग्निभरद्वाजवसिष्ठशिवगौतमाः ॥
जगृहुः कामदाः पञ्च गावो दत्त्वा सुरैस्ततः।
गोमयं रोचना मूत्रं चीरं दधि घृतं गवां ॥
षड़ङ्गानि पवित्राणि संशुद्धिकरणानि च।
गोमयादुत्थितः श्रीमान् विल्ववृक्षः शिवप्रियः॥
तत्रास्ते पद्महस्ता श्रीः श्रीवृक्षस्तेन स स्मृतः।
वीजान्युत्पलपद्मनां पुनर्जातानि गोमयात् ॥
गोरोचना च माङ्गल्या पवित्रा सर्वसाधिका।
गोमूत्राज्जुहुषु जातः सुगन्धः प्रियदर्शनः ॥
आहारः सर्वदेवानां शिवस्य च विशेषतः।
जगद्वीजं जगत्किञ्चित् तज्ज्ञेयं चीरसम्भवम्।
दध्नः सर्वाणि जातानि मङ्गलान्यर्थसिद्धये।
घृतादमृतमुत्पन्नं देवाना न्तोषकारणम् ॥
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्।
एकत्र मन्त्रास्तिष्ठन्ति हविरन्यत्र तिष्ठति ॥
गोषु यज्ञाः प्रवर्त्तन्ते गोषु देवाः प्रतिष्ठिताः।
गोषु वेदाः समुत्कीर्णाः स षडङ्गपदक्रमाः ॥
शृङ्गमूले गवां नित्यं ब्रह्मविष्णू समाश्रितौ।
शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च ॥
शिरोमध्ये महादेवः सर्वकारणकारणम्*।

* सर्व्वभूतमयः शिव इति पुस्तकान्तरे पाठः।

ललाटे संस्थिता गौरी नासारन्ध्रे* च षण्मुखः ॥
कम्बलेऽश्वतरौ नागौ नासापुटसमाश्रितौ ।
कर्णयो रश्विनौ देवौ चक्षुषोः शशिभास्करौ ॥
दन्तेषु वसवः† सर्वे जिह्वायां वरुणः स्थितः ।
सरस्वती च हुङ्कारे यमयक्षौ च गण्डयोः ॥
सन्ध्याद्वयं तथोष्ठाभ्यां ग्रीवायां च पुरन्दरः ।
रक्षांसि कुक्षौदेव्यौ च पार्ष्णिकाये व्यवस्थितौ ॥
चतुष्पात् सकलो धर्म्मो नित्यं जङ्घासु तिष्ठति ।
खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः ॥
खुराणां पश्चिमे भागे राक्षसाः सम्प्रतिष्ठिताः‡ ।
रुद्रा एकादश पृष्ठे वसवः सर्वसन्धिषु ॥
श्रोणीतटस्थाः पितरः कुल्वाकेषु च मानवः ।
श्रीरपर्णांगवान्नित्यं स्वाहालङ्कारमाश्रिताः¶ ॥
उदरे पृथिवी सर्व्वा सशैलवनकानना ।
चत्वारः सागराः पूर्णा गवां ये तु पयोधराः ॥
पर्जन्यः क्षीरधारासु मेघविन्दु व्यवस्थिताः ।
उदरे गार्हपत्योग्निर्दक्षिणाग्निर्हृदि स्थितः ॥
कण्ठे आहवनीयोग्निः सभ्योऽग्निः स्थाणनि स्थितः ।
अस्थ्नि वाचः स्थिताः शैला मज्जासु क्रतवस्थिताः ॥

---

* नाशावंशेचेति पुस्तकान्तरे पाठः ।

† वायव इति पुस्तकान्तरे पाठः ।

‡ गणाश्चाप्सरसां स्थिता इति पुस्तकान्तरे पाठः ।

¶ सोमोलाङ्गूलमाश्रित इति पुस्तकान्तरे पाठः ।

ऋग्वेदोऽथर्ववेदश्च सामवेदो यजुस्तथा।
सितरक्तपीतकृष्णा गवां वर्णा व्यवस्थिताः॥
नासारूपमुपाश्रित्य सुरभीणां युधिष्ठिर।
यत्श्रित्य तत्क्षणा गौरी आदित्यसदृशीतनुः॥
आत्मानं विदधे देवी धर्मराज शृणुष्व तत्।
षडुन्नतां पञ्चनिम्नां मण्डूकाक्षीं सुवालधिं॥
ताम्रतूनीस्थितकठिं सुखरीं सुमुखींमितां।
सुशीलाञ्च वसुस्नेहां सुसुचीरां पयोधरां॥
गोरूपिणीमुमां सृष्ट्वा स्वामिने चात्र वासकम्।
चर्य्यया प्रतरं हृष्टो महादेवस्य चेतसि॥
शनैः शनैः ययौपार्थविप्ररूपी महाश्रमः।
दत्त्वा कुलपतेः पार्श्वं भृगोःस्वाङ्गं निवेदयेत्॥
तपस्विनां महातेजा स्तेषु सर्वेषु पाण्डव।
न्यासरूपां ददौ धेनुं रक्षत्वेनां दिनद्वयं॥
यावत्स्नात्वाद्दतस्तीर्त्वाजांवूमार्गादिहाश्मारहं।
रक्षिष्यामी प्रतिज्ञा या मुनिभिः सुरभी मिमां॥
अतश्चे मृगवद्देवः पुनर्व्याघ्रो बभूव ह।
वज्रचक्रनखो दर्वीं ज्वलपिङ्गल लोचनः॥
जिह्वाकरालवदनो जिह्वा लांगूलदातुगः।
संपदाश्रमफादन्तीं धेनुञ्चैव सवत्सकां॥
त्रासयामास नादेन मुनीनां दिच्चवस्थिताः।
ऋषयोऽपि समाक्रान्ता दार्त्तनादं प्रचक्रिरे॥
हाहेत्युच्चैः केचिदूचुः हुहुङ्कारां स्तथापरे।

तालस्फोटा ददुः केचि द्धयाघ्रं दृष्ट्वाति भैरवम् ॥
स्वामिनं भैरवं चक्रे गौरुत्प्लुत्य सवत्सका ।
तस्या व्याघ्रभयार्त्तायाःकपिलाया युधिष्ठिर ॥
पलायास्याः शिलामध्ये चरणं च हरतुष्टये ।
व्याघ्रवत्सकयोस्तत्र वन्दनं सुरकिन्नरैः ॥
दृश्यतेऽतीव सुव्यक्तं न ददामि चतुष्पदम् ।
सजलं शिवलिङ्गञ्च शम्भोस्तीर्थं तदुत्तमं ॥
यस्त्वं स्पृशति राजेन्द्र स गोवधाद्व्यपोहति ।
तत्र स्नात्वा महातीर्थे जम्बूमार्गे गणाधिप ॥
ब्रह्महत्यादिभिः पापै र्मुच्यते नात्र संशयः ।
ततस्ते मुनयः क्रुद्धा ब्रह्मदत्तां महास्वनां ॥
जघ्नु र्घण्टां सुरै र्दत्तां गिरिकन्दरपूरणीं ।
शब्देन तेन व्याघ्रोऽपि मुक्त्वा गावं सवत्सकां ॥
विप्रैस्तत्र कृतं नाम ढुण्ढुगौरिति विश्रुतं ।
अपिबन् परिपेयार्थं तेरुद्रा नात्र संशयः ॥
अथ प्रत्यक्षतः श्रेष्ठ स्तेषां देवो महेश्वरः ।
शूलपाणि स्त्रिपुरहा कामाशो वृषभे स्थिरः ॥
उमासहायो वरदः सस्वामी सविनायकः ।
सनन्दी समहाकालः सभृङ्गी सवलो हरः ॥
वीरभद्रश्च चामुण्डाघण्टाकर्णादिभि र्वृतः ।
मातृभिर्वृत सङ्घाते र्यक्षराक्षसगुह्यकैः ॥
देवदानवगन्धर्वमुनिविद्याधरोरगैः ।
प्रणम्य देवदेवाय पत्नीभिः सहितैस्तथा ॥

गोरूपिणी सवत्सा च पूजिता ब्रह्मचारिभिः।
कार्त्तिके कृष्णपक्षे तु द्वादश्यां नन्दिनीव्रतैः॥
ततः प्रभृति राजेन्द्र अवतीर्णा महीतले।
उत्तानपादेन तथा व्रतं चीर्णमिदं शृणु॥
उत्तानपादनामासीत् क्षत्रियः पृथिवीपतिः।
तस्य भार्य्याद्वयं चासीद्रुचिस्सुनीति विश्रुतं॥
सुनीत्यां जातो ध्रुवः पुत्रो बालपादधरोव्ययः।
रुच्याः समर्पितः सुनीत्या ध्रुवोऽयं रक्ष्यतां सखि॥
अहं करिष्ये शुश्रूषां भर्त्तुस्तावत्तदा स्वयं।
नृवीरं सवितुं नित्यं प्रतिष्ठा जायते गृहे॥
करोति भर्त्तुः शुश्रूषां सुनीती नित्यं पतिव्रता।
कदाचित् क्रोधमासाद्य सपत्न्या जनितं तया॥
स्वयञ्च व्याहनिष्यामि शिशुः खण्डच्छविः कृतः।
ततोपि कायं तत्स्याल्यां एकःसिद्धः सुसंस्कृतः॥
अन्नभोजनवेलायां ददाति नृपतेः स्वयं।
भुञ्जीत* स्वपतिं† चोक्त्वा सामिषं भोजनं किल॥
अथ भोजनवेलायां ध्रुवो जीवितमाप्तवान्।
तथैव च प्रसन्नात्मा मातुरुत्सङ्गगोऽभवत्॥
तं दृष्ट्वा महदाश्चर्य्यं सुनीती पप्रच्छ विस्मिता।
किमेतद्ब्रूहि वृत्तान्तं यस्येयं व्युष्टिःतत्तया॥
किं त्वया चरितं किञ्चिद्व्रतं दत्तं हुतं तथा।

---

* भुञ्जीतचपितामति पुस्तकान्तरे पाठः
† स्वपतिं दुष्टेति पाठान्तरं]

सत्यं सत्यं पुनः सत्यं येन जीवति ते सुतः ॥
मय्यायां सुतवान् वालो निहत्य सकली कृतः* ।
पक्वःस्वयं कृतः स्थाल्यां व्यञ्जनैः सह भोजनैः† ॥
परिग्रिश्यमानासुः पुनः कथं जीवितमाप्तवान् ।
किंते सिद्धा महाविद्या मृतसञ्जीवनी शुभा ॥
रत्नं मणि महारत्नं योगांजनमहौषधम् ।
कथयस्व महाभागे सत्यं सत्यं भगिन्यसि‡ ॥
एवमुक्ता तु हन्तेऽस्याः व्याचख्यौ वत्सकृव्रतम् ।
कार्त्तिके शुक्लद्वादश्यां यथा चानुष्ठितं पुरा ॥
व्रतस्यास्य प्रभावेन पुनर्जीवति मे सुतः ।
वत्सो मे वत्सवेलायां मनोर्थं मलते पुनः ॥
समागमश्च भवति व्रतैः प्रवसितैरपि ।
यथार्थ मेतद्‌व्याख्यातं तव गोद्वादशीव्रतं ॥
कदापि चैतत् सर्व्वं तु भविष्यति शुभाशुभा ।
एवमुक्ताव्रतं चीर्णं रुच्याः पुत्राः सुखान्विताः ॥
सम्प्राप्तजीवितान्ते च ध्रुवस्थाने निवेषिताः ।
ब्रह्मणा सृष्टिकारेण रुचिर्भर्त्रा सहोषिता ॥
दशनक्षत्रसंयुक्तो ध्रुवः सोऽद्यापि दृश्यते ।
ध्रुवर्त्तेव यद्दाहष्टे लोकः पापैः प्रमुच्यते ॥

---

* मया संसुप्तवानस्ति निहत्य सकली कृत इति पाठान्तरं ।

† पात्रां दत्तः पुनश्चैष जनत्येवाद्भितः सुत इति पाठान्तरं ।

‡ वेपथुर्हृदये मम इति पुस्तकान्तरे पाठः ।

युधिष्ठिर उवाच।

कीदृशं तद्विधानं च तन्मे ब्रूहि जनार्द्दन।

यत् कृतं श्रुघ्नीवचनाद्रुच्या यदुकुलोद्वह *॥

कृष्ण उवाच।

संप्राप्ते कार्त्तिके मासि शुक्लपक्षे† नृपोत्तम।

द्वादश्यां कृतसकल्पः स्नात्वा शुद्धे जलाशये॥

नरोवा यदिवा नारी मन्त्रं संकल्प्य चेतसि।

ततो मध्याह्नसमये कृत्वा देवार्च्चनादिकं॥

प्रतीक्षेतागमं भक्त्या गवां गोध्यानतत्परः।

सवत्सां तुल्यवर्णाञ्च शीलिनीं गाम्पयस्विनीं॥

चन्दनादिभिरालिप्य पुष्पमालाभि रर्च्चयेत्।

कुङ्कुमालक्तकैर्धूपैः धूपदीपैः‡ सुगन्धिभिः॥

अथ ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः।

चन्दनैः कुङ्कुमैर्गन्धैः पुष्पैःकालोद्भवैस्तथा¶॥

पादमूले तु दातव्या मन्त्रेणानेन पाण्डव।

पाता रुद्रेण इत्येष मन्त्रः प्रोक्तोद्विजन्मना॥

स्त्रीशूद्राणां महावाहो मन्त्रोयं परिकीर्त्तितः।

क्षीरोदार्णवसम्भूते सुरासुरनमस्कृते॥

सर्व्वदेवमये मात र्गृहाणार्घ्यं नमोऽस्तुते।

---

* यत्नात् कुलोद्वह इति पाठान्तरं।

† कृष्णपक्षे इति पुस्तकान्तरे पाठः।

‡ दीप गन्धैरिति पुस्तकान्तरे पाठः।

¶ माता रुद्राणामित्येष इति पुस्तकान्तरे पाठः।

दत्तार्घं तज्जलं पुण्यं सच्च तं मूर्ध्नि निक्षिपेत् ॥
ततो मासादि संसिद्धान्वटकांश्च निवेदयेत् ।
पञ्चसप्तदशैकं वा यथा विभवमात्मनः ॥
सुरभि त्वं जगन्मातर्नित्यं विष्णुपदे स्थिते ।
सर्व्वदेवमये ग्रासं मयादत्तमिमं शुभं ॥
दत्तार्घोदत्तनैवेद्यः कृतपूजः सुसंयतः ।
प्रार्थयेदाशिषं प्राज्ञो वध्वाग्रे करसंपुटं ॥
सर्व्वदेवमये देवि सर्व्वैर्देवैरलङ्कृता ।
मात र्ममाभिलषितं सफलं कुरु नन्दिनि ॥
एवमभ्यर्च्च्य विधिवद्दत्त्वा गवि गवाह्निकं ।
पर्य्युक्ष्य वारिणा भक्त्या प्रणम्याथ पुनः पुनः ॥
तद्दिने ताम्रिकापक्वं स्थालीपाकं युधिष्ठिर ।
गोक्षीरं गोघृतं दत्त्वादधिक्षीरं विसर्जयेत्* ॥
माषान्नं कामतोऽश्नीयाद्रात्रौ विगतमत्सरः ।
भूम्यां स्वपन् ब्रह्मचारी शृणु यत् फलमाप्नुयात् ॥
यावन्ति† गात्ररोमाणि गवां कौरवनन्दन ।
तावद्दिनानि गोलोके पूजितो मोदतेऽमरैः ॥
नारी वा कुरुते जातु व्रतमेतत् युधिष्ठिर ।
मेरोः पूर्व्वाष्टकं रम्यमिन्द्राग्नियमरक्षसां ॥
वरुणानिलरुद्राणां रुद्रस्य च युधिष्ठिर ।
तेषामुपरि गोलोकस्तत्र याति स गोव्रती ॥

---

* विसर्जयेदिति पुस्तकान्तरे पाठ ।

† यावत्यः कोट्यो रोम्णामिति पुस्तकान्तरे पाठः ।

ऊर्ज्जामन्ते हि दशमे क्कि च गां सवत्सां
याः पूजयन्ति वटकैः कुसुमैश्च हृद्यैः।
ताः सर्व्वकामसुखभोगविभूतिभाजो
मर्त्ये च सन्ति सुचिरं नृपतेश्च वत्साः॥

इति भविष्योत्तरोक्तं गोवत्सद्वादशीव्रतं।

———000———

कृष्ण उवाच।

पुरा वभूव राजर्षिरजापालइति श्रुतः।
प्रार्थितः स प्रजाभिस्तु सर्व्वदुःखापनुत्तये॥
दुःखापनोदं कुरु भो व्याधि नाना नरेश्वर।
एवमुक्तश्चिरं ध्यात्वा कृत्वा व्याधीनजागणान्॥
पालयामास हृष्टोसौ अजापालस्ततोऽभवत्।
तेनैषा निर्मिता शान्तिः नाम्नानीराजना जने॥
तस्यान्तु पाण्डवश्रेष्ठ लक्षणं वच्मि ते शृणु।
राजा पुरोहितैः सार्द्धमनुष्ठाय विधानतः॥
तस्मिन् काले बभूवाथ रावणो राक्षसेश्वरः।
लङ्कास्थितः सुरगणो नियुनक्ति स्वकर्म्मसु॥
अखण्डमण्डलं चन्द्रमातपत्रञ्चकार ह।
इन्द्रं सेनापतिं चक्रे वायुं पांशुप्रमार्जकं॥
वरुणं बन्धकर्म्मस्थं धनदञ्चनरक्षकं।
यमं संयमनेऽरीणां युयुजे मन्त्रणे मनुं॥
मेघाश्छन्दन्ति लिम्पन्ति द्रुमाः पुष्पाणि चिक्षिपुः।
सप्तर्षयः शान्तिपरा ब्राह्मणाः संस्थिताः परे॥

यमो यामककच्चायां गन्धर्वा गीततत्पराः ।
प्रेक्षणीयेप्सरोऽष्टौ वा बाह्ये विद्याधरावृताः ॥
गङ्गाद्याः सरितः पाने गार्हपत्योहुताशने ।
तिष्ठन्ति पार्थिवाः पूर्व्वां पुरसेवाविधायिनः ॥
दीप्यन्ति भासुरै रत्नैः प्रशालातो विभूषणैः ।
तं दृष्ट्वा नारदः प्राह प्रशस्तं प्रतिहारकं ॥
परावर्त्तं* मम स्थाने ब्रूहि कोऽत्र समागतः ।
उवाच च प्रणम्याग्रे दण्डपाणिर्निशाचरः ॥
एषां ककुत्स्थोमान्धाता धुन्धुमारो नलोर्ज्जुनः ।
ययातिर्नहुषो भीमो राघवोऽयं विदूरथः ॥
एते चान्ये च बहवो राजान इति आसते ।
सेवाकरा न च स्थानेनाजापाल इहागतः ॥
रावणः कुपितः प्राह शीघ्रं दूतं विसर्जय ।
इत्युक्ते प्रहितो दूतो धूम्राचो नाम राचसः ॥
धूम्राच गच्छ ब्रूहि त्वमजापालं ममाज्ञया ।
सेवां कुरु समागच्छ कबन्धायस्य पार्थिव ॥
अन्यथा चन्द्रहासेन त्वां करिष्ये विकम्बरं ।
रावणेनैवमुक्तस्तु धूम्राचो गरुड़ो यथा ॥
संप्राप्य तां पुरीं रम्यां तच्च राजकुलं गतः ।
ददर्श यतमेकं स अजापालमजावृतं ॥
मुक्तकेशं मुक्तकचं नैका भूतं क्रमद्दयं ।
यष्टिस्कन्धं रेणुभृतं व्याधिभिः परिवारितं ॥

---

* पर्व्वावर्त्तं मम स्थाने इति पुस्तकान्तरे पाठः ।

निहताभिवशार्दूलं सर्व्वोपद्रवनाशनं ।
मन्त्रामालिख्य नामानि विनिघ्नन्ति द्विषां गणं ॥
स्नानं भुक्तं शुभे स्थाने कृतकृत्यं मनुं यथा ।
दृष्ट्वा हृष्टमनाः प्राह धूम्राक्षो रावणोदितं ॥
साक्षेपमजपालोपि प्रत्युक्त्वा कारणान्तरं ।
प्रेषयामास धूम्राक्षं ततः सत्यं समादधे ॥
ज्वरमाकारयित्वा तु प्रोवाचेदं महीपतिः ।
गच्छ लङ्काधिपस्थानमाचरस्व यथोचितं ॥
नियुक्तस्त्वजपालेन ज्वरराजो जगाम ह ।
गत्वा च कम्पयामास सगणं राक्षसेश्वरं ॥
रावणस्त्वविदित्वा तु ज्वरं परमदारुणं ।
प्रोवाच तिष्ठतु नृप स्तेन मे न प्रयोजनं ॥
ततः स विज्वरो राजा बभूव धनदानुजः ।
तेनैषा निर्मिता शान्तिरजपालेन धीमता ॥
सर्वरोगप्रशमनी सर्व्वोपद्रवनाशनी ।
कार्त्तिके शुक्लपक्षस्य द्वादश्यां रजनीमुखे ॥
समुत्थिते विनिद्रे तु देवे दामोदरे तथा ।
विद्यान्ते नरमालाभिरम्ये स्त्रीवा नुरन्तिके ॥
जनयित्वा नवं विष्णुं हुत्वा मन्त्रैर्द्विजोत्तमैः ।
वर्द्धमानतपुष्पाभिर्दीपिकाभि र्हुताशनं ॥
कृत्वा महाजनाः सर्व्वे हरिं नीराजयेच्छनैः ।
पुष्पैरभ्यर्चितं देवं समालभ्य च चन्दनैः ॥
बदरैः कर्वरैश्चैव त्रपुसैरिक्षुभिस्तथा ।

गन्धैः पुष्पै रलङ्कारै र्वस्त्रै रन्नैश्च पूजितैः ।
तस्यैवानुमतां लक्ष्मीं ब्राह्मणं चण्डिकां तथा ॥
आदित्यं शङ्करं गौरीं यक्षं गणपतिं ग्रहान् ।
मातरः पितरो गावः सर्व्वा नीराजयेत् क्रमात् ॥
गवां नीराजनं कुर्य्यात् महिष्यादेश्च मण्डलं ।
भ्रामयेत्त्रासयेच्छब्दै र्घण्टावादनच्छादनैः ॥
ता गावः प्रसुता याश्च तासां पीड़ा तथागदा* ।
सिन्दूरक्तशृङ्गाग्रा हम्बारावाः सवत्सकाः ॥
अनुयान्ति च गोपालाः कलयन्तो वनानि ते ।
कर्द्दमानुलिप्तरक्ताङ्गा† रक्तपीतसिताम्बराः ॥
पञ्चकोलाहले वृत्ते गवां नीराजनोत्सवे ।
तुरङ्गान् लक्षणैर्युक्तान्‡ द्विरदांश्च सुपूजितान् ॥
राजचिह्नानि सर्व्वाणि उद्धृत्य स्वगृहाङ्गणे ।
राजा पुरोहितैः सार्द्धं मन्त्रिभृत्यपुरःसरः ॥
सिंहासनोपविष्टश्च शङ्खभेर्य्यादि¶ निस्वनैः ।
पूजयेद्गन्धकुसुमैर्वस्त्रदीप§ विलेपनैः ॥

इयमश्वादिपूजा महानवम्युत्सवे द्रष्टव्या ।

तत्र स्त्री लक्षणैर्युक्ता वेश्या वाथ कुलाङ्गना ।

---

* ताश्च प्रसूतायीति स्वापीड़स्तवकां गदा इति पाठान्तरं ।

† सर्व्वाङ्गा इति पुस्तकान्तरे पाठः ।

‡ तुरङ्गान् लक्षणोपेतानिति क्वचित् पाठः ।

¶ शङ्खतूर्य्यादीति पाठान्तरं ।

§ वस्त्रधूप विलेपनैरिति पाठान्तरं ।

शीर्षोपरि नरेन्द्रस्य विर्व्वारं भ्रामयेच्च* सा॥
शान्तिं रस्तु समिद्भिश्च द्विजैर्व्वेदस्वनेन वा।
ततो नीराजयेत् सैन्यं हस्त्यश्वरथ सङ्कुलम्॥
एवमेषा महाशान्तिः ख्याता नीराजना जने।
येषां राष्ट्रे पुरे ग्रामे क्रियते फाल्गुनस्य च॥
तेषां रोगाः क्षयं यान्ति सुभिक्षं वर्द्धते सदा।
शान्तिनीराजनालोके सर्वरोगान् व्यपोहति॥
लोकानां वर्द्धयित्वायुरजपालपरो† यथा।
येषां रोगादिपीडासु जन्तूनां हितमिच्छता॥
वर्षे वर्षे प्रयोक्तव्या‡ शान्ति नीराजनादिति।
नीराजयन्ति नवमेघनिभं हरिं यो
गोब्राह्मणार्थहितकारिणमङ्गगोभिः।
ते सर्वरोगरहिताः सहिताश्च भृत्यैः
दीर्घायुषो भुवि भवन्त्यजपालवाक्यात्॥

इति भविष्योत्तरे नीराजनद्वादशीव्रतम्।

———000@000———

सूत उवाच।

पुरा देवासुरे युद्धे हतैस्तु हरिणासुरैः।
पुत्रपौत्रेषु शोकार्त्ता गत्वा भूर्लोकमुत्तमं॥

---

* भ्रामयेद्वार यात्रिकमिति पाठान्तरं।

† रजपाल नृपा यथा इतिपाठान्तरं।

‡ प्रतिवर्षं प्रकर्त्तव्या इति क्वचित् पाठः।

समन्ते पञ्चके तीर्थे सरस्वत्याः शुभे तटे ।
भर्त्तुराराधनपरा तप उग्रञ्चकार ह ॥
तदा दितिर्दैत्यमाता* ऋषिरूपेण संस्थिता ।
फलाहारा तपस्तेपे कृच्छ्रं चान्द्रायणान् बहून् ॥
यावद्वर्षशतं साग्रं जराशोकसमाकुला ।
ततः सा तपसा तप्ता वसिष्ठादीनपृच्छत ॥
कथयन्तु भवन्तो मे पुत्रशोकविनाशनम् ।
व्रतं सौभाग्यफलदमिह लोके परत्र च ॥
ऊचुर्वशिष्ठप्रमुखा मदनद्वादशीव्रतम् ।
यस्य प्रसादादभवत् सुतशोकविवर्ज्जिता ॥

ऋषय ऊचुः ।

श्रोतुमिच्छाम्यहं त्वत्तो मदनद्वादशीव्रतम् ।
सुतानेकोनपञ्चाशद्येन लेभे दितिः पुरा ॥

सूत उवाच ।

यद्वशिष्ठादिभिः पूर्वं दितेः कथितमुत्तमं ।
विस्तरेण तदेवेदं मत्सकाशान्निबोधत ॥
चैत्रे मासि सिते पक्षे† द्वादश्यां नियतव्रतः ।
स्थापयेदव्रणं कुम्भं सिततण्डुलपूरितं ॥
नानाफलयुतं तद्वदिक्षुदण्डसमन्वितं ।
सितवस्त्रयुगच्छन्नं सितचन्दनचर्चितम् ॥
नानाभक्ष्यसमोपेतं सहिरण्यं स्वशक्तितः ।

---

* देवमातेति पाठान्तरं ।

† शुभ पक्षे इति वा पाठः ।

ताम्रपात्रं गुड़ोपेतं तस्योपरि निवेशयेत् ॥
तदभावे कथां कुर्य्यात् कामकेशवयो र्न्नरः।
कामनाम्ना हरेरर्च्चां स्नापये द्गुड़वारिणा ॥
शुक्लपुष्पाक्षततिलै रर्च्चयेदिति केशवम्*।
कामाय पादौ संपूज्य जङ्घे सौभाग्यदायकं ॥
जरू स्मरायेति पुनर्म्मन्मथायेति वै कटिं।
स्वच्छोदयायेत्युदरं अनङ्गायेत्युरो हरेः ॥
मुखं पद्ममुखायेति बाहू पञ्चशराय वै।
नमः सर्व्वात्मने मौलिमर्च्चयेदिति केशवं ॥
एवं प्रजागरं कृत्वा शुक्लमाल्याम्बरो व्रती।
ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत् ॥
ब्राह्मणान् भोजयेच्छक्त्या स्वयं भुञ्जीत बन्धुभिः ॥
भुक्त्वा तु दक्षिणां दद्यादिमं मन्त्रमुदीरयेत्।
प्रीयतामत्र भगवान् कामरूपी जनार्द्दनः ॥
हृदये सर्व्वभूतानां य आत्मेत्यभिधीयते।
अनेन विधिना सर्व्वं मासि मासि समाचरेत्
उपवासी त्रयोदश्यामर्च्चयेद्विष्णुमव्ययम्।
फलमेकञ्च सम्प्राश्य द्वादश्यां भूतले स्वपेत् ॥
ततस्त्रयोदशे मासि घृतधेनुसमन्विताम्।
शय्यां दद्याद्द्विजेन्द्राय सर्व्वोपस्करसंयुतां ॥
काञ्चनं कामदेवं च शुक्लां गाञ्च पयस्विनीं।

---

* अर्च्चयन्मधुसूदनमिति पाठान्तरं।

वासोभिर्द्विजदाम्पत्यं पूज्य शक्त्या विभूषणैः ॥
सर्व्वं गन्धादिकं दद्यात् प्रीयतामित्युदीरयेत् ।
होमं शुक्लतिलैः कुर्य्यात् कामनामानि कीर्त्तयेत् ॥
गव्येन सर्पिषा तद्वत् पायसेन च धर्म्मवित् ।
विप्रेभ्यो भोजनं दद्यात् वित्तशाठ्यं विवर्जयेत् ।
इक्षुदण्डानथो दद्यात्पुष्पमालाः स्वशक्तितः ॥
यः कुर्य्याद्विधिनानेन मदनद्वादशीमिमां ।
सर्व्वपापविनिर्मुक्तः प्राप्नोति हरिसात्म्यतां ॥
इह लोके वरान् पुत्रान् सौभाग्यसुखमश्नुते ।
यः स्मरः संस्मृतो विष्णुरानन्दात्मा महेश्वरः ॥
सुखार्थी कामरूपेण यजेत्तं जगदीश्वरम् ।
तत् श्रुत्वा च चचारासौ दितिः सर्वमशेषतः ॥
कश्यपो व्रतमाहात्म्यादागत्य परया मुदा ।
चकाराकर्कशां भूयो रूपयौवनशालिनीं ॥
वरैराच्छादयामास सा तु वव्रे वरं सुतं ।
ततः सा व्रतमाहात्म्याल्लेभे गर्भमनुत्तमं ॥
कदाचिल्लब्धसञ्चारं शतुत्वाज्जठरं दितेः ।
प्रविश्यैकोनपञ्चाशत् कृत्वा शक्रो जघान तां ॥
तावन्तोबालका भूय रुरुदुर्नश्तिं गताः ।
ततो वै चिन्तयामास किमेतदिति वृत्रहा ॥
धर्म्मस्य पश्य माहात्म्यं पुनः सञ्जीविताश्त्वमी ।
कदाचिदनया नूनं मदनद्वादशी कृता ॥

तत् प्रभावेन जीवन्ति तनया निहता अपि* ।
नूनमेतत् परिणतमधुना तत्तु पूजनं ॥
वज्रेणाभिहताः सन्तो न विनाशमवाप्नुयुः ।
एकाप्यनेकतामाप यस्मात् गर्भो हतोप्यलं ॥
अहो माहात्म्यमेतस्मिन् मदनद्वादशीव्रते ।
जीवपुत्रा बहुसुता येन नारी प्रजायते ॥

इति मत्स्यपुराणोक्तं मदनद्वादशीव्रतम् ।

———000———

भद्राश्व उवाच ।

विज्ञानोत्पत्तिकामस्य क आराध्यो भवेद्द्विज ।
कथमाराध्यते सोहि एतदाख्याहि मे द्विज ॥

अगस्त्य उवाच ।

विष्णुरेव महायज्ञः† सर्व्वदेवैरपि प्रभुः ।
तस्योपायं प्रवक्ष्यामि येनासौ वरदो भवेत् ॥
रहस्यं सर्व्वदेवानां मुनीनामुत्तमस्तथा ।
नारायणः परोदेवः तं प्रणम्य न सीदति ॥
श्रूयते च पुरा राजन् नारदेन महात्मना ।
कथितं पुष्टिदं‡ विष्णोर्व्रतमप्सरसान्तथा ॥
नारदस्तु पुराकल्पे गतवान् मानसं सरः ।
स्नानार्थं तत्र सोऽपश्यत् सर्वमप्सरसाङ्गणम् ॥

---

* यान्तीति पाठान्तरं ।
† विष्णुर्देयः सदा पूज्य इति पाठान्तरं ।
‡ तुष्टिदमिति क्वचित् पुस्तके पाठः ।

तास्तं दृष्ट्वा विलासिन्यो जटामुकुटधारिणम् ।
अस्थिचर्म्मावशेषन्तु कृष्ण कुण्डी-कपालिनम् ॥
देवासुरमनुष्याणां दिदृक्षुं कलहं सदा ।
ब्रह्मपुत्रं तपोयुक्तं पप्रच्छुस्ता वराननाः ॥

अप्सरस ऊचुः ।

भगवन् ब्रह्मतनय भर्तृकामा वयं द्विज ।
नारायणश्च भर्त्ता नो यथा स्यादाचचक्ष्व तत् ॥

नारद उवाच ।

प्रणामपूर्व्वकः प्रश्नः सर्व्वतो भवते* शुभः ।
स च मे न कृतो गर्व्वाद्युष्माभि र्यौवनस्मयात् ॥
तथा हि देवदेवस्य विष्णोर्यन्नामकीर्त्तितम् ।
भवतीभिस्तथा भर्त्ता भवत्विति हरिः शुभः ॥
तन्नामोच्चारणादेव कृतं सर्व्वं न संशयः ।
इदानीं कथयामास व्रतं येन हरिःस्वयम् ॥
वरदन्तमवाप्नोति भर्तृत्वं च नियच्छति ।
वसन्ते शुक्लपक्षस्य द्वादशी या भवेच्छुभा ॥
तस्यामुपोष्य विधिवत् सश्रीकं हरिमर्चयेत् ।
पर्य्यङ्कास्तरणं कृत्वा नानास्तरणसंयुतम् ॥
तत्र लक्ष्म्या युतं देवं रौप्यं कृत्वा निवेदयेत् ।
तस्योपरि ततः पुष्पैर्मण्डपं कारयेद्बुधः ॥
नृत्यवादित्रगीतैश्च जागरं तत्र कारयेत् ।

---

* जयते इति वा पाठः ।

मनोभवायेति* शिरस्त्वनङ्गायेति वै कटिं ॥
कामाय बाहुमूले तु कुसुमास्त्राय चोदरं।
मन्मथायेति पादौ तु हरयेति च सर्व्वतः ॥
पुष्पैः संपूज्य देवेशं मल्लिकाजातिभिस्तथा।
पश्चाच्चतुर आदाय इक्षुदण्डान् सुशोभनान् ॥
चतुर्दिक्षु न्यसेत्तस्य देवस्य प्रणतो नृप।
एवं कृत्वा प्रभाते तु दापयेद्ब्राह्मणाय तम् ॥
वेदवेदाङ्गयुक्ताय संपूर्णाङ्गाय धीमते।
ब्राह्मणांश्च तथा भोज्य व्रतमेतत्समाप्यते ॥
व्रतस्यान्ते ततो विष्णुर्भर्त्ता वो भवति ध्रुवम्।
अकृत्वा मत्प्रणामन्तु पृष्टं गर्वेण शोभनाः ॥
व्रतेनानेन देवेशं पतिं लब्धाभिमानतः।
अवसानेऽपहरणं गोपालैर्वो भविष्यति ॥
पराहृतानां कन्यानां† देवो भर्त्ता भविष्यति।
एवमुक्त्वा स देवर्षिः प्रययौ नारदः क्षणात् ॥
अतोप्येतद्व्रतं चक्रुस्तुष्टस्तासां स्वयं हरिः।

इति भविष्यत्पुराणोक्तं भर्तृप्राप्तिव्रतम्।

———000@000———

द्वादश्यां शुक्लपक्षे च मासि भाद्रपदे नरः।
नैवेद्यगन्धपुष्पाद्यै रर्चयेज्जलशायिनम् ॥

---

* नमो भवायेति वा पाठः।

† पराहृत्याय कल्पान्तमिति पुस्तकान्तरे पाठः।

न चालपेद्विकर्म्मस्थान् पाषण्डान् पतितान्नरान् ।
स्नात्वा जपन्ननन्तेति शतमष्टोत्तरं बुधः ।
व्रजंस्तिष्ठन् स्वपन् भुञ्जन् बुध्यन् प्रस्खलिते क्षुते ॥
वेदनार्त्तः स्मरेन्नित्यमनन्तं मनसा गिरा ।
व्रतमेतद्विधानेन कुर्य्यात् सम्वत्सरं नरः ॥
ततोऽथ भोजयेद्विप्रान् शक्त्या दद्याच्च दक्षिणां ।
पूर्णे संवत्सरे शक्त्या पूजयित्वा जनार्दनम् ॥
वीणा-वेणु-मृदङ्गाद्यैर्गीतनृत्यन्तु कारयेत् ।
अर्चयित्वा हरिं भक्त्या कारयित्वा तु जागरम् ॥
अनन्तफलमाप्नोति गीतवाद्यैरुदाहृतम् ।
अहिंसकः शुचिर्दान्तः सर्व्वभूतहिते रतः ॥
व्रतमेतन्नरः कृत्वा विष्णुलोके महीयते ।

इति विष्णुरहस्योक्तं अनन्तद्वादशीव्रतम् ।

———ooo———

युधिष्ठिर उवाच ।

यत् कृत्वा मुच्यते जन्तुर्महतः पञ्चपातकात् ।
पञ्चपातकिनः प्रेतान् पितॄंस्तारयते तथा ॥
निशाकृदाप्यायनश्च पूर्णिमादेवता इमाः ।
जगन्नाथो महीधारी देवेन्द्रो देवकीसुतः ॥
चतुर्भुजो गदापाणिः सुरभीदः सुलोचनः ।
सर्व्वगतश्चक्रपाणिः शूरश्चाप्यसुरान्तकः ॥
श्रीशश्च द्वादश इमा देवताः परिकीर्त्तिताः ।

स्वाहाकारान्वितैरेतैश्चतुर्थ्यन्तैश्च नामभिः॥
श्रावणादौ देवतानां पूजां च कुरुते व्रती।
श्रवणादेव कुर्व्वीत द्वादश्यां परिकीर्त्तिता:॥
पूर्णिमायान्तु देवेभ्यः पायसञ्जुहुयात्ततः।
अमावास्यां देवतानां तिलमुद्गगुड़ोदनम्॥
पञ्चरत्नानि देयानि पञ्चपातकशान्तये।
पञ्चमूर्त्तिं स्वर्णमयीं पञ्चामृतसमन्विताम्॥
भोजयेद्ब्राह्मणान् राजन् पञ्चद्वादशसंख्यया।
एतच्चीर्णं वृत्रवधान्मुक्तवान् पाकशासनः॥
अहल्या सङ्गदोषाच्च सुरापानाद्बृहस्पतिः।
गुरुस्त्रीगमनात्सोमः सुवर्णहरणाद्बलिः॥
अन्यैरपि महीपालैर्द्दिलीपसगरादिभिः।
महापातकजैर्द्दोषैर्विमुक्ताश्चोपपातकैः॥
तस्मात्त्वमपि कौन्तेय कुरु व्रतमिदं शुभम्।
यद्वाञ्छति महाराज शाश्वतीं गतिमात्मनः॥

इति भविष्यत्पुराणोक्तं पञ्चमहापापनाशनद्वादशीव्रतम्।

———000———

द्वादश द्वादशीर्यस्तु समाप्योपोषणैर्नरः।
गोवत्सं काञ्चनं विप्रानर्चयेद्भक्तितः पुनः॥
परं पदमवाप्नोति विष्णुव्रतमिदं स्मृतम्।

इति पद्मपुराणोक्तं विष्णुव्रतम्।

———000———

वराह उवाच।

द्वादश्यामुपवासन्तु ये वै कुर्व्वन्ति ते नराः।
मामेव प्रतिपद्यन्ते मम भक्तिपरायणाः॥
कृत्वा चैवोपवासन्तु गृहीत्वा च जलाञ्जलिं।
नमो नारायणायेति आदित्यं चावलोकयेत्॥
यावन्तो विन्दवः केचित् पतन्त्यञ्जलितो जलात्।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥
तथैव षष्ठ्यां द्वादश्यां कृत्वा कर्म यथाविधि।
पाण्डुरैश्चैव पुष्पैस्तु सृष्टैर्गन्धैश्च धूपनैः॥
य एवं कारयेद्भूमि तस्यापि शृणुयाद्गतिं।
दत्त्वा शिरसि पुष्पाणि इमं मन्त्रमुदीरयेत्॥

ॐ इति कृत्वा मन्त्रः।

सुरश्रेष्ठ धराधार सुमनसः सुमना गृह्य प्रीयतां भ भगवानम्बिकः। एतेन मन्त्रेण सुमनोदद्यात्।

गन्ध मन्त्र उच्यते।

ओं नमस्तुभ्यं स्वस्ति विध्युक्तसुगन्धं गृहेमं मङ्गलवते* विष्णवे। एतेन मन्त्रेण गन्धान् दद्यात्।
अश्रुत्वापि च शास्त्राणि यो मामेवञ्च कारयेत्।
मम लोकं स गच्छेच्च जायते च चतुर्भुजः॥
श्यामाकं षष्टिकञ्चैव सङ्गोज्यानि गुणांस्तथा।

---

* भगवते इति पाठः।

गुणांश्च, व्यञ्जनानि।

शालीन्-यवांश्च तथा नीवारभक्तकं तथा॥
एतानि यस्तु भुञ्जीत मम कर्मपरायणः।
स स्याच्च शङ्ख-चक्रांको लाङ्गली मुशली गदी॥

उपवासः, सूर्य्यार्घ्यो, विष्णुपूजा, श्यामाकाद्यन्यतमं पारणं चेति व्रतम्।

इति भविष्यत्पुराणोक्तं* विष्णुप्राप्तिद्वादशीव्रतम्।

———ooo———

कृष्ण उवाच।

द्वादश्यां गुह्यकानर्च्य पललाज्यतसंयुतैः।
हेमं विप्राय वै दद्यादुपवासपरायणः॥
एतद्वै गुह्यकं प्रोक्तं व्रतं पापहरं शुभम्।

इति भविष्योत्तरोक्तं गुह्यकद्वादशीव्रतम्।

———ooo———

द्वादश्यां देवदेवेशं पूजयित्वा जलाधिपं।
पुण्डरीकमवाप्नोति वरुणं यादसाम्पतिं॥

इति विष्णुधर्म्मोक्तं पुण्डरीकयज्ञप्राप्तिव्रतम्।

———ooo———

सर्व्वदेवरथं शक्रं पूजयित्वा तथा नरं।
सर्व्वान् कामानवाप्नोति स्वर्गलोकञ्च गच्छति॥

इति विष्णुधर्म्मोत्तरोक्तं शक्रव्रतम्।

———ooo———

* वराह पुराणोक्तमिति पाठान्तरं।

उमोवाच ।

भगवन् श्रोतुमिच्छामि आश्चर्यं परमं विभो ।
कथितव्यं प्रसादेन यद्यस्ति मम सौहृदम् ॥
देव येन विरूपत्वं यद्व्रतेन प्रणश्यति ।
सौभाग्यं परमं चैव प्राप्यते कस्य सेवनात् ॥
तन्मे कथय देवेश परमाभीष्टदायकम् ।

ईश्वर उवाच ।

श्रूयतां वै परं गुह्यं व्रतं पापहरं शुभम्* ।
सुरूपा द्वादशी नाम महापातकनाशनी ॥
रूपप्रदायिनी चैव तथा सौभाग्यवर्द्धनी ।
कुलवृद्धिकरीचैव सर्व्वसौख्यप्रदायिनी ॥
तां शृणुष्व प्रयत्नेन कथ्यमानां मयानघे ।
पुरा वै द्वापरस्यान्ते विष्णुर्दैत्यनिसूदकः ॥
उत्पन्नो मृत्युलोकेश वसुदेवकुले किल ।
तेनोढा रुक्मिणी नाम भीष्मस्य च सुता पुनः ॥
अत्यन्तरूपसुभगा पतिव्रतपरायणा ।
नहि तस्या विना कृष्णस्तोकमुद्वहते सुखम् ॥
श्वश्रूश्वशुरयोः पादवन्दनं भर्तृतत्परा ।
केनापि कर्म्मदोषेण कुपितां कृष्ण मातरं ॥
न प्रसादयति क्षिप्रं प्रतिमत्वेच्छती प्रियं ।
ततो देव्याः समुत्पन्नः कोपः सर्वगुणापहः ॥

---

* पापप्रणाशनमिति पुस्तकान्तरेपाठः ।

कृष्णं प्रोवाच कुपिता यदि ते जननी स्वयं ।
तत स्त्वयापि वै वाच्या कुरूपा निर्गुणाधिका ॥
मद्वाक्यं नान्यथा कर्त्तुं नार्हसि त्वं कुलोद्वह ।

कृष्ण उवाच ।

अपापां रुक्मिणीं त्यक्तुमुत्सहेऽहं कथं शुभां ।
यः परित्यजते भार्य्यामविलुप्तशरीरिणीं ॥
स प्राप्नोति च मन्दात्मा दौर्भाग्यं सात्मपौरुषं ।
विरूपत्वमवाप्नोति न सुखं विन्दते क्वचित् ॥
व्याधि र्वा जायते लोके निन्दनीयश्च देहिनां ।
इत्यहं नानुमानोऽपि कथं कुर्य्यास्तथा वचः ॥

देवक्युवाच ।

सर्व्वेषामेव दानानां दानं तीर्थादि यच्छति ।
माता गुरुतरा वत्स कस्तस्या वचनं त्यजेत् ॥
मम वाक्यस्य करणात् कथं पापिष्ठता भवेत् ।
जननी पूज्यते लोके न भार्य्या यदुनन्दन ॥

कृष्ण उवाच ।

न च त्यजाम्यहं मातः प्रियां प्राणधनेश्वरीं ।
इति तूष्णीं पराभूतां मातरं प्रेक्ष्य केशवः ॥
चिन्तामवाप परमां कथं सौख्यं भवेदिति ।
एतस्मिन्नेव काले तु नारदोमुनिसत्तमः ॥
अभ्याजगाम सहसा विष्णुं प्रेक्ष्य च विस्मितम् ।
पूजितः परया भक्त्या अर्घ्यं तस्मै निवेदितम् ॥

उपविष्टे यथान्याय पर्य्यपृच्छदनामयं।

नारद उवाच।

किं त्वं सखेदपरमः किमुद्वेगस्य कारणम।
किञ्च सिध्यति तेऽभीष्टं त्यजोद्वेगं यदुत्तम* ॥

कृष्ण उवाच।

मात्रा नियुक्तो देवर्षे परिणेतुं द्विजोत्तम।
कन्यामुद्वह यस्यापि कुरूपां कस्यचित् प्रभो ॥
यथा मातुर्नियोगोऽत्र कृतो भवति सत्कृतिः।

नारद उवाच।

श्रूयतामभिधास्यामि पूर्ववृत्तान्तमादरात्।
लक्ष्मीयुतः पुरा नाथ क्रीडमानो हि नन्दने ॥
तत्रायया स भगवान्† दुर्व्वासा ऋषिसत्तमः।
सत्कृतश्च यथान्यायं अभ्युत्थानक पूर्व्वकं ॥
प्रेक्ष्य वीभत्सरूपं तं देव्या हासः कृतस्तदा।
स च कोपेन महता वैश्वानरसमप्रभः ॥
शशाप लक्ष्मीं दुष्टात्मा मुनिः क्रोधसमन्वितः।
हसितोऽहं त्वया मुग्धे आत्मनो रूपमीक्षिता ॥
विरूपा भव दुर्बुद्धे किं न ज्ञातो ह्यहं त्वया।
इत्युक्ता सा तया देव्या यथावत् संप्रसादितः ॥
प्रसन्नो जगदे वाक्यं मे शापो न वृथा भवेत्।

---

* किञ्चोद्वेग यदूत्तमस्रात पाठान्तरम्।

† तत्रायते सभगवान् इति पुस्तकान्तरेपाठः।

जन्मान्तरेण साफल्यं भविष्यति कुरूपता ॥
सा एव चावतीर्णाहि गोचकस्य गृहे सुता* ।
सत्यभामा विरूपाङ्गी विरूप दर्शनं तथा ॥
कर्णनासातिविकृतां† सञ्जाता तत्प्रभावतः ।
पाणिपादौ कटिग्रीवा सर्वं वैरूप्यलक्षणम् ॥
तपादस्यो महाप्राज्ञः स ते कन्यां प्रदास्यति ।

कृष्ण उवाच ।

भगवन् विरूपं वदनं कथं द्रक्ष्यामि नित्यशः ।
का निर्वृतिं गमिष्यामि तां विवाह्य कुरूपिकां ॥

नारद उवाच ।

तस्या एव प्रसादेन रुक्मिण्या यदुनन्दन ।
उत्तमं प्राप्य सौरूपं सौभाग्यं परमं सुखं ॥
माता हि तावन्मान्या वै धर्म्मकामार्थं मिच्छता ।
एवं पुरा व्यतीत्येवं सम्बन्धो विहितः पुरा ॥
त्वया वाक्यं तथा कार्य्यं गुरूणां वचनं महत् ।
माता गुरुतरा भूमे इति वेदेषु गीयते ॥

ईश्वर उवाच ।

एवमुक्त्वा महादेवीं नारद स्त्रिदिवं गतः ।
कृष्णस्य मातरं प्राह वैवाह्यं हि विधीयतां ॥
विवाहितावसानेन वेदोक्तं विधिना ततः ।

---

* एवं नृपावतीर्णापि गोपिकानां गृहे सुताइति पाठान्तरम् ।

† कर्णविषाणास्ति विकृतां इति पुस्तकान्तरेपाठः ।

आनीयतां तदा देवि दर्शयामास तां वधूं ॥
पश्य त्वं वचनाद्वद्धि* परिणीता शुचिव्रता ।
निर्वृत्तिपरमं गच्छ प्रसादपरमा भव ॥
इत्युक्ता वीक्ष्य तां कृष्णः प्रणिपत्य स्वमातरं ।
जगाम देवकार्य्याणां करणाय महाबलः ॥
तां दृष्ट्वा देवमाता च बभौ दुःखान्विता भृशं ।
ईदृग्विरूपं विकृतिं कथं कर्त्तास्मि गोपनं ॥
चिन्ता च मेति†महतीमतीवोद्विग्नमानसः ।
कस्यापि नाचचक्षेऽपि विरूपं तच्छरीरजं ॥
अथ किं विहितं काले रुक्मिणी तव चाग्रतः ।
नमस्कृत्य ततः श्वश्रूं सम्पृष्ट्वा चरणौ तदा ॥
उवाच प्रस्तुतं वाक्यं भक्तियुक्तं सुखावहं ।
प्रभावं‡ द्रष्टुमिच्छामि भवतीं¶ कृष्णवल्लभां ॥
दर्शयन्तु च मे शीघ्रं प्रसादं सुविधीयतां ।

देवक्युवाच ।

श्वश्रूर्हन्ते§ सुभगे ममापि वचनं कुरु ।
दीयतां त्वरितं शुभ्रु सुरूपाद्दादशीव्रतं ॥

---

* सापश्यद्वचनादिति पाठान्तरं ।
† चिन्तामवापेति पुस्तकान्तरे पाठः ।
‡ श्वश्रूरमिति पाठान्तरं ।
¶ भगिनीमिति पाठान्तरं ।
§ सुभ्रू इति पुस्तकान्तरे पाठः ।

संप्रयच्छति* * चेतस्त्वं दर्शनन्ते भविष्यति ॥

रुक्मिण्युवाच।

कथं यद्दीयते धर्म्मं व्रतञ्चापि सुदुष्करम्।
कथं तस्यां प्रयच्छामि फलं देवैः सुदुर्लभम् ॥

देव्युवाच।

अर्द्धं प्रदीयतामस्यै तदर्द्धमथवा पुनः।
पञ्चमः सप्तमः षष्ठः षोड़शांशोऽथवा पिबा ॥

देव्युवाच।

सुरूपाद्दादशी पुण्यतिलार्द्धमपि नोत्सहे।
किं पुनः षोड़शांशेन सपत्न्या दुष्टचेतसः ॥
एवमुक्त्वा जगामाथ मन्दिरं सा शुभेच्छगा।
पुनः पृच्छति ते सा तु प्रणिपातेन वै रुषा ॥
देवि पृच्छामि† चोत्कोयं न करोति प्रभु र्मम।
कथं पश्यामि तां तन्वीं नवोढ़ां कृष्णवल्लभां ॥

कृष्ण उवाच।

अश्वा द्रक्ष्यसि ते सुभ्रूं धिग्रूपां तां सुमध्यमां।
कर्णनासा च विकृता विरूपा विकृतानना ॥
अहं तु नोत्सहे द्रष्टुमीदृग्रूपां शुचिस्मिते।
कर्म्म नृणां फलं ते च शुभाशुभमसंशयं ॥

---

* संप्रयच्छति चेतस्त्योदर्शनान्ते इति।

° संप्रयच्छसि सेतस्त्योदर्शनान्ते इति च पुस्तकान्तरे पाठः।

† देव पृच्छामि यत्कोपान्नं करोति च प्रभुर्मम इति पुस्तकान्तरे पाठः।

एवं बहुगते काले देवैश्चैव प्रभावतः ।
देव्यागारं सत्यभामा शिष्या दत्त्वा च वेश्मिता ॥
प्रार्थये यततां तूर्णं सुरूपाद्वादशीव्रतं ।
तिलादपि हि षड्भागं होमादपि हि निःसृतं ॥
सा गता तस्य कार्यं तु विवाहद्वारमार तु ।
उवाच रुक्मिणीं सा च सत्यभामा शुचिव्रता ॥
एकामप्याहुतिं देवि देहि मे भीष्मनन्दिनि ।
अर्द्धाहुतिं वा मे देहि यद्यस्ति मम सौहृदं ॥

रुक्मिण्युवाच ।

कोऽयं मतिभ्रम स्ते वै सुरूपां द्वादशीं प्रति ।
तिलाहुतिञ्च दास्यामि उद्घाटय कपाटकं ॥
इत्युक्त्वा त्वरितं स्नात्वा दत्त्वा ह्येकां तिलाहुतिं ।
तिलञ्चैव प्रदत्तेयं रूपेणैवाधिका भवत् ॥
तां दृष्ट्वा विस्मयपरा पप्रच्छ दयितां हरेः ।
कथ्यतां मम का हि त्वं किमर्थ मिह चागता ॥

सत्यभामोवाच ।

तवाहं भगिनी भद्रे कृष्णबोढा स्मि धर्म्मतः ।
सत्यभामेति मे नाम नमामि चरणौ तव ॥
इति श्रुत्वा तु वचनं विस्मयोत्फुल्ललोचना ।
नोवाच किञ्चित्चार्वङ्गी अत्यर्थं विस्मिताभवत् ॥
एतस्मिन्नेव काले च वागुवाचाशरीरिणी ।
तव दानप्रभावेन सत्यव्रतपरायणे ॥

सुरूपा द्वादशीपुण्यं देवानामपि दुर्लभं।

देव्युवाच।

कर्म्मणा केन कर्त्तव्यं किमाचारं वदस्व मे।
नियमं होमदानञ्च प्रसादः सन्निधीयतां॥

ईश्वर उवाच।

पौषमासन्तु संप्राप्य पुष्यर्चे तु सुशोधयेत्।
तस्यां रात्रौ संयतात्मा ध्यात्वा विष्णुं सनातनं॥
श्वेता गौरेकवर्णा च तस्या ग्राह्यं च गोमयं।
अन्तरिचात् प्रपतितं शुचि मौनमवास्थितः॥
तस्याः कृत्वा हुतीनां च शतमष्टोत्तरं तिलैः।
प्रतीक्ष्यैकादशीं कृष्णामुपवास परायणैः॥
भाव्यं नियमसंयुक्तैर्विशेषात्संयतात्मभिः।
स्नात्वा नद्यां तड़ागे वा विष्णुमेवाथ चिन्तयेत्॥
सौवर्णञ्च हरिं कृत्वा रूप्यं वासः स्वशक्तितः।
तिलपात्रोपरिस्थे च न्यसेत् कुम्भे सद्रव्यके॥

ततो विष्णु पूजा

इति संपूज्य विधिना पुष्पैर्धूपैः सचन्दनैः।
नैवेद्यं तिलमिश्रञ्च फलानि विविधानि च॥
अर्घ्यमन्त्रोपयुक्तानि तदग्रे स्तवनं पठेत्।
नमः परमशान्ताय विरूपाक्ष नमोऽस्तु ते॥
सर्व्वकल्मष नाशाय गृहाणार्घ्यं नमोस्तु ते।

अर्घ्यमन्त्रः।

एवं संपूज्य देवेशं होमयेद्धोमयाहुतीः।

तिलानाहुतिसंयुक्तान् मन्त्रैः सहस्रशीर्षकैः॥
हृदि ध्यात्वा च देवेशं लक्ष्मीयुक्तं सनातनं।
शङ्ख चक्र, गदा खेटं* ध्यात्वा देवं जनार्द्दनं॥
होमान्ते कारयेच्छाद्धं वैष्णवं द्विजसत्तम।
दत्त्वा च भोजनं तेभ्यः कृत्वा चैव प्रदक्षिणं॥
धर्म्मश्रवणसंयुक्ता जाग्रतो तत्र तां निशां।
तं कुम्भं वैष्णवीं मूर्त्तिं विप्राय प्रतिपादयेत्†॥
मन्त्रहीनं क्रियाहीनं‡ सर्व्वं तत्र क्षमापयेत्॥

ईश्वर उवाच।

एवं यः कुरुते देवि सुरूपाद्वादशी व्रतं।
नरो वा यदि वा नारी तच्च पुण्यं शृणुष्व मे॥
दौर्भाग्यं नश्यते तस्य अपि जन्मान्तरार्ज्जितं।
अपि भूमस्यसम्पर्कौ जायते कारणान्तरात्॥
तस्यापि न भवेद्दुःखं वैरूप्यं तस्य जन्मनि।
बन्धुजन वियोगश्च¶ नेष्टैः सह वियोगतः॥
जायते गोत्रवृद्धिश्च कीर्त्तिमान् जायते भुवि।
जातिस्मरणमाप्नोति पदं निर्व्वाणमाप्नुयात्॥
वाच्यमानमिदं भक्त्या यः शृणोति समाहितः।
पुण्यमाप्नोति सततं स्वर्गलोके महीयते॥

इति उमामहेश्वरसंवादे सुरूपाद्वादशी व्रतं।

---

* मद्दीपितमिति पुस्तकान्तरे पाठः।

† विनिवेदयेदिति पुस्तकान्तरे पाठः।

‡ भक्तिहीनमिति पुस्तकान्तरे पाठः।

¶ बान्धवै र्नैवियोगश्च इति पाठान्तरं।

मान्धाता उवाच।

एकादशी महाब्रह्मन् महापुण्यफलप्रदा।
ऋक्षयोगैस्तु संयुक्ता कथयस्व मम प्रभो॥

वसिष्ठ उवाच।

जया च विजया चैव जयन्ती पापनाशनी।
सर्व्वपापहरा चैषा कर्त्तव्या फलकाङ्क्षिभिः॥
एकादश्यां शुक्लपक्षे यदा ऋक्षं पुनर्वसुः।
सा नाम्ना च जया ख्याता तिथीनामुत्तमा तिथिः॥
समुपोष्य व्रती पापात् मुच्यते नात्र संशयः।
अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः॥
यदा शुक्ले तु द्वादश्यां नक्षत्रं श्रवणं भवेत्।
विजया सा तथा प्रोक्ता तिथीनामुत्तमा तिथिः॥
तस्यां स्नातः सर्व्वतीर्थे स्नातो भवति मानवः।
दानं सहस्रगुणितं तथा चैव प्रयोजनं॥
होमजपोपवासैश्च* सहस्राणां फलं लभेत्।
यदा च शुक्लद्वादश्यां रोहिणी च प्रजायते॥
जयन्ती नाम सा प्रोक्ता सर्व्वपापहरा तिथिः।
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु॥
तत्क्षालयति गोविन्दस्तस्यामभ्यर्च्य भक्तितः।
यदा च शुक्लद्वादश्यां पुष्यं भवति कर्हिचित्॥
तदा सातिमहापुण्या कथिता पापनाशनी।

---

* होमजप्योपवासैश्चेति पुस्तकान्तरे पाठः।

यो ददाति च यत्पुण्यं नित्यं संवत्सरे नरः ।
उपवासन्तु तस्यां च यः करोति महत्फलं ॥
तस्यां जगत्पतिर्देवः सर्व्वलोकेश्वरो हरिः ।
प्रत्यक्षतां प्रयात्याशु तदनन्तफलं स्मृतं ॥
सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना ।
तस्या माराधितो देवो दत्तवानखिलां भुवं ॥
उपवासस्तु तस्याश्च देव आराधितः स च ।
तस्मै स राज्यमखिलं सन्तुष्टो भुवि दत्तवान् ॥
वाचिकान् मानसांश्चैव कायिकांश्च विशेषतः ।
सप्तजन्मकृतं पापं मुच्यते नात्र संशयः ॥
इमामेका मुपोष्यैव पुष्य नक्षत्रसंयुतां ।
एकादशीसहस्रेण फलं प्राप्नोत्यसंशयं ॥
स्नानं दानं जपो होमः स्वाध्यायदेवतार्च्चनं ।
यदस्यां क्रियते किञ्चित्तत्सर्व्वं चाक्षयं भवेत् ॥
पुरुषैस्तु प्रयत्नेन कर्त्तव्या फलकांक्षिभिः ।
फाल्गुने च विशेषेण विशेषः कथितो नृप ॥
आमर्द्दकीव्रतं पुण्यं विष्णुलोकफलप्रदं ।
आमर्द्दकीमधो गत्वा जागरं तत्र कारयेत् ॥
कृत्वा तु जागरं विष्णोर्गोसहस्रफलं लभेत् ॥

मान्धाता उवाच ।

आमर्द्दकी कदा ह्येषा उत्पन्ना द्विजसत्तम ।
एतत्सर्व्वं समाचक्ष्व* परं कौतूहलं हि मे ॥

---

* समाचक्ष इति पाठान्तरं ।

कस्मादियं पवित्रा च कस्मात्पापप्रणाशनी।
कस्माज्जागरणं कृत्वा गोसहस्रफलं लभेत्॥

वसिष्ठ उवाच।

कथयामि महाभाग गच्छेयं भगवान् क्षितौ।
आमर्द्दकी महावृक्षः सर्व्वपापप्रणाशनः॥
एकार्णवे पुरा जाते नष्टे स्थावरजङ्गमे।
नष्टे देवासुरगणे प्रनष्टोरगराक्षसे॥
तत्र देवाधिदेवेशः परमात्मा सनातनः।
जजाप परमं ब्रह्म आत्मनः पदमव्ययं॥
ततोऽस्य जपतो ब्रह्म मुखाच्छशिसमप्रभः।
ष्ठीवनाद्बिन्दुसम्पन्नः स भूमौ निपपात ह॥
तस्माद्बिन्दोःसमुत्पन्नः स्वयं धात्रीनगो महान्।
शाखाप्रशाखाबहुला फलभारावनामितः॥
सर्वेषां चैव वृक्षाणां आदिरेष प्रकीर्त्तितः।
एतस्मिन्नेव काले तु ससृजे बहुधाः प्रजाः॥
ब्राह्मणानसृजत्तेन संसृष्टाश्च इमाः प्रजाः।
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
तांश्च दृष्ट्वा महाभाग परं विस्मयमागताः।
नजानीय इमान् वृक्षान् चिन्तयानोऽपि सर्व्वतः॥
एवं चिन्तयतस्तेषां वागुवाचाशरीरिणी।
सञ्जाता वैष्णवी तत्र ऋषीणां प्रतिबोधनी॥
असृजद्भगवान्देव ऋषयस्तु तथामराः।
अजिताश्चाच यक्षास्ते धारा वै विष्णुसम्भवा॥

आमर्द्दकी नगो ह्येष प्रवरो लोकविश्रुतः॥
विष्णो र्निष्ठीवनाज्जातः प्रवरो वैष्णवो नगः।
तस्मात्सर्व्वप्रयत्नेन सेव्या आमर्द्दकी सदा॥
सर्व्वपापहरा प्रोक्ता वैष्णवी पापनाशनी।
अस्या मूले स्थितो विष्णु रूर्द्धं चैव पितामहः॥
स्कन्धे च भगवान् रुद्रः संस्थितस्त्रिपुरान्तकः।
शाखासु सरितःसर्व्वाः प्रशाखासु च देवताः॥
पर्णेषु वसवो देवाः पुष्पेषु मरुतस्तथा।
प्रजानांपतयः सर्व्वे फलेचैव व्यवस्थिताः॥
सर्व्वदेवमयी ह्येषा धात्री च कथिता मया।
तस्मात् पूज्यतमा ह्येषा विष्णुभक्तिपरायणैः॥

ऋषिरुवाच।

को भवान्नहि जानामि अकस्मादद्द हे शुभः*।
देवोवा यदि वा चान्यः कथयस्व यथातथं॥

वागुवाच।

यः कर्त्ता सर्व्वलोकानां भुवनानां चतुर्द्दश।
अनङ्गाङ्गवपुःप्रेक्ष्य सोऽहं विष्णुः सनातनः॥
तच्छ्रुत्वा तस्य देवस्य भाषितं ब्राह्मणाः स्थिताः।
विषयोत्फुल्लनयना: परं विस्मयमागताः॥
अनादिनिधनं देवंस्तोतुञ्चैव प्रचक्रमुः।
ओं नमो भूतात्मने च भूताय परमात्मने॥

---

* आत्मात्मकोदेहश्च इति पाठान्तरं।

अव्यक्ताय नमो नित्यं अनन्ताय नमोनमः॥
दामोदराय शुचये यज्ञेशाय नमोनमः।
नमो मायापटच्छन्नजगद्धात्रीमहात्मने।
अच्युताय नमो नित्यं अनन्ताय नमोनमः॥
एवं स्तुतस्तदा तैश्च तुतोष भगवान् हरिः।
प्रत्युवाच महर्षींस्तान् अभीष्टं किं ददामि वः॥

ऋषय ऊचुः।

यदि तुष्टोहि भगवानस्माकं हितकाम्यया।
व्रतं किञ्चित् समाख्याहि स्वर्गमोक्षप्रदं परं॥
धनधान्यप्रदं पुण्यं आत्मनस्तुष्टिदायकं।
अल्पायासं बहुफलं व्रतानामुत्तमं व्रतं॥
कृतेन येन देवेश विष्णुलोके महीयते॥

विष्णुरुवाच।

फाल्गुनामलपक्षेषु द्वादशी ऋषिसत्तमाः।
ब्राह्मणानां महापुण्या सर्व्वपातकनाशनी॥
विशेषस्तत्र कथितः शृणुष्व ऋषिसत्तमाः।
आमर्द्दकी न्तु संप्राप्य जागरं यस्तु कारयेत्॥
सर्व्वपापविनिर्म्मुक्तो गोसहस्रफलं लभेत्।
एतद्वः कथितं विप्रा व्रतानामुत्तमं व्रतं॥

ऋषय ऊचुः।

व्रतस्यास्य विधिं ब्रूहि परिपूर्णं कथं भवेत्।
के मन्त्राः के नमस्कारा देवताः काः प्रकीर्त्तिताः॥
कथं स्नानं कथं दानं कथं पूजाविधिः स्मृतः।

अर्घ्यप्रदानमन्त्रञ्च कथयस्व यथातथं ॥

विष्णुरुवाच ।

श्रूयतां यो विधिः सम्यक् व्रतस्यास्य द्विजोत्तम ।
न कस्यचिन्मयाख्यातो व्रतस्य विधिरुत्तमः ॥
एकादश्याञ्च नियमं गृह्णीयाद्दन्तधावनं ।
एकादश्यां निराहारं स्थित्वा चैवापरेऽहनि ॥
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ।
इति कृत्वा च नियमं दन्तधावनपूर्व्वकं ॥
नालापेत् पतितांश्चौरान् तथा पाषण्डिनो नरान् ।
दुर्व्विनीतान् भिन्नमर्य्यादान् गुरुदारप्रकर्षकान् ॥
अपराह्णे तथा स्नानं विधिवत् कारयेद्बुधः ।
नद्यां तड़ागे कूपे वा गृहे वा नियमाशनः* ॥
मृत्तिकालम्भनं पूर्व्वं ततः स्नानं समाचरेत् ।
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ॥
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं ॥

मृत्तिकामन्त्रः ।

त्वमापो योनिः सर्व्वेषां देवदानवरक्षसां ।
श्वेतयोनि भुजङ्गाख्यं रसानांपतये नमः ॥
स्नातोऽहं सर्व्वतीर्थेषु ह्रदे प्रस्रवणेषु च ।
नदीषु देवखातेषु अत्र स्नानन्तु मे भव ॥

---

* नियतात्मवानिति पुस्तकान्तरे पाठः ।

स्नानमन्त्रः।

जामदग्निं ततश्चैव कारयित्वा हिरण्मयं।
माषकेण सुवर्णस्य तदर्द्धेनाथ वा पुनः॥
गृहमागत्य देवानां पूजाहोमन्तु कारयेत्।
ततश्चामर्दकीं गच्छेत् पोषयेच्च समन्ततः॥
तस्याधो जलकुम्भञ्च स्थापयेन्मन्त्रसंयुतं।
पञ्चरत्नसमोपेतं दिव्यगन्धादिवासितं॥
छत्रोपानहवस्त्रैश्च सितचन्दनचर्च्चितं।
स्रग्मालालङ्कृतग्रीवं सर्व्वतो धूपधूपितं॥
दीपमालाकुलं कुर्य्यात् सर्व्वत स्तु मनोहरं।
तस्योपरि न्यसेत् पात्रं दिव्यदानैः प्रपूजितं॥
पात्रोपरि न्यसेद्देवं जामदग्न्यं महाभुजं।
विशोकाय नमः पादौ जानुनी विश्वरूपिणे॥
उग्राय च* नमः कण्ठे आस्यं यज्ञमुखाय वै।
ननाम शोकवियुतो वासुदेवाय च त्रुपौ॥
ललाटे वामनायेति रामायेति पुनर्भ्रुवौ।
नमः कूर्म्मात्मने तद्वत् शिरइत्यभि पूजयेत्॥
पूजयित्वा ततो देवं अर्घ्यञ्चैव प्रदापयेत्।
फलेन चैव शुभ्रेण भक्तियुक्तेन चेतसा॥
नमस्ते देवदेवेश जामदग्ने नमोऽस्तु ते।
इमं देवमिमं देवं श्रीलक्ष्म्या सहितो हरिः॥

---

* उग्राय च तथा जङ्घ कटिं दामोदराय च इत्यादिपाठान्तरं।

अर्घ्यमन्त्रः ।

ततो जागरणं कुर्य्यात् भक्तियुक्तेन चेतसा ।
नृत्यैर्गीतैश्च वादित्रैर्धर्म्माख्यानकथानकैः ॥
वैष्णवैश्च तथा ख्यातैः चपयेच्छर्व्वरीन्तु तां ।
प्रदक्षिणं ततः कुर्य्यादामर्द्दक्या नमस्तदा ॥
शतमष्टाधिकञ्चैव अष्टाविंशतिमेव च ।
ततः प्रभातसमये नीत्वा नीराजनं हरेः ॥
ब्राह्मणं पूजयित्वा तु सर्व्वं तस्मै निवेदयेत् ।
जामदग्न्यं घटच्छत्रं वस्त्रयुग्ममुपानहौ ॥
जामदग्न्यस्वरूपी च प्रीयतां मम केशवः ।
ततश्चामर्द्दकीं स्पृष्ट्वा कृत्वा चैव प्रदक्षिणं ॥
स्नानं कृत्वा विधानेन ब्राह्मणान् भोजयेत्तदा ।
ततश्च स्वयमश्नीयात् कुक्कुटेन समन्वितः ॥
एवं कृते तु यत्पुण्यं तत्सर्व्वं कथयाम्यहं ।
सर्व्वतीर्थेषु यत् पुण्यं सर्व्वदानेषु यत् फलं ॥
सर्व्वयज्ञाधिकञ्चैव लभते नात्र संशयः ।
एतद्वः सर्व्वमाख्यातं व्रतानामुत्तमं व्रतं ॥
एतद्व्रतं गतमलं कथितं मया वै
पापापहं शुचिमतिर्हरिवासरे ते ।
योवै करिष्यति नरः शुचिशुद्धचित्तः
स प्राप्स्यते हरिपदं परमं परञ्च* ॥

---

* युद्धमतीव वा ह्यार। करिष्यते यः शुचिशुचि तस्य सप्राप्स्यते विष्णुपदं परञ्च इति पुस्तकान्तरे पाठः ।

एतावदुक्त्वा देवेश स्तत्रैवान्तरधीयत।
ते चापि ऋषयः सर्वे चक्रुः सर्व्वमशेषतः॥
तथा त्वमपि राजेन्द्र कर्त्तुमर्हसि सत्तम।
व्रतमेतद्दुराधर्षं सर्व्वपापप्रणाशनं॥

इति मार्कण्डेय पुराणे आमर्दकी व्रतं।

इति श्रीमहाराजाधिराज श्रीमहादेवस्य समस्त
करणाधीश्वर सकलविद्याविशारद
श्री हेमाद्रि विरचिते चतुर्वर्ग
चिन्तामणौ व्रतखण्डे
द्वादशी व्रतानि।